SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

ಜಾಗರೂಕತೆಯಿಂದ ಬಳಸಿ

H 375
Acc. 7656

ಹೆಚ್ಚುವಿಕೆ ಸಂಖ್ಯೆ E-688

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

Acc No 7656

ॐ

वैयाकरणभूषणसारः

पण्डितप्रवरश्रीसभापतिशर्मोपाध्याय-तत्त्वावधाने
काशीस्थखेतानसंस्कृतमहाविद्यालयप्रधानाध्यापक-
श्रीबालकृष्णशास्त्रिपञ्चोलि-निर्मितया
'प्रभा' व्याख्यया श्रीहरिवल्लभ-
शास्त्रिविरचितेन दर्पणेन
च समुल्लसितः

श्रीतारकेश्वरशर्मचतुर्वेदिना सम्पादितः

SGDF

SGDF
Sri Gargeshwari Digital Foundation

आदर्शग्रन्थमालाया द्वितीयं पुष्पम्

श्रीकौण्डभट्टविरचितो वैयाकरणभूषणसारः

गुर्जरदेशीयबड़ौदाराज्यान्तर्गत–'वसाई'–ग्रामाभिजन–

काशीस्थखेतानसंस्कृतमहाविद्यालयप्रधानाध्यापक—

व्याकरणाचार्यश्रीबालकृष्णशास्त्रिपञ्चोलिनिर्मितया

'प्रभा' व्याख्यया

दर्पणेन च समुल्लसितः

Acc no 7656 H 315

बलियामण्डलान्तर्गतगङ्गापुरग्रामनिवासिना

श्रीतारकेश्वरशास्त्रिचतुर्वेदिना

संशोध्य सम्पादितः

यमं संस्करणम् १०००
रामनवम्याम्
दिषिद
निजकरः
दव्यसपस

अस्य पुनर्मुद्रणादिविषये सर्वेऽधिकाः
'प्रभा' कृता स्वायत्तीकृताः ।

SGDF
Sri Gangadharan Digital Foundation

Adarsh Granthmala's 2nd Pushpam.

VAIYAKARAN BHUSHANS

OF

Kaund Bhatta

WITH

Prabha and Darpan Commentaries

By

Pt. Bal Krishna Pancholi
Principal Khetan Sanskrit Mahavidyalaya, Benare
&
Pt. Hari Vallabha Shastri.

Edited and published by

Pt. Tarkeshwar Chaturvedi Shastri.

First edition] 1947

SGDF
Sri Gangeshwari Digital Foundation

किञ्चिन्निवेदनम्

द् गुर्जरदेशभूसुरवरोदीच्याङ्गपञ्चोलिनां 'गायकवाड' गतो 'वसाइ' डभलाग्रामः प्रसिद्धो महान्।
सीन्नृपमानितो बुधवरोऽम्बारामशास्त्री श्रुतस्तस्मै 'गायकवाड' भूपतिमणिर्वर्षासनं दत्तवान् ॥ १ ॥
त्रः स्वपितेव शास्त्रकुशलो लक्ष्म्यादिरामाभिधस्तद्वर्षासनमाप्नुवन् कुलगतं कीर्त्तिं समुद्वर्धयन्।
सं जनयन् गुणैकवसतिं श्रीकालिदासाभिधं विप्राणां जनतासु गौरवमयं प्रातिष्ठिपद् धीनिधिः ॥ २ ॥
ी श्रीकालिदासोऽप्रतिमप्रतिभया गुर्जरेष्वद्भुतोऽभूत् नासीच्छास्त्रं हि किञ्चिन्मतिगतिरभवद्यत्र नास्यातिसूरेः
ार्य्यः शङ्करोऽभूद्भुवनजनतया मानितो माधवाख्यः पाण्डित्येनास्य प्रीत्वा व्यददत पदवीं रत्नमेतत्कवीनाम्
ग्रामे स्वकीये धनिजनधनतः कूपदेवालयादीन् संस्कृत्यान्योऽन्यवैरं द्विजजनमनसः दूरतस्त्याजयित्वा।
र्यं येन नीतं निजगृहवसताऽध्यापनं कुर्वता च ग्राम्या यत्कीर्तिगाथां प्रतिदिनमनिशं श्रावयन्ति प्रसङ्गात्४
रो गुणिनो बभूवुरमलाः श्रीकालिदासात्मजाश् 'चूनीलाल' इति ह्यजायत पुरो नीलादिकण्ठस्ततः।
दुत्तरतो बभूव तनयः श्रीदेवयुक्शङ्करः तूर्यो विट्ठलदासनामविदितः सर्वेऽपि योग्या बुधाः ॥ ५ ॥
योऽजनि नीलकण्ठपदयुक्रामान्तशास्त्री सुधीस्तस्यासँस्तनयास्त्रयः प्रथमतोऽम्थालालनाम्ना स्मृतः।
ी गिरिजादिशङ्करगुरोः प्रारम्भिकं शिक्षणं लब्ध्वा व्याकरणे परीक्षणविधावुत्तीर्य्य प्रासीदताम् ॥ ६ ॥
श्रीसोमनाथस्तदवरजननो बालकृष्णाभिधोऽहं द्वावप्यध्येतुकामौ बुधजनमहितां काशिकामेतवन्तौ।
ज्यात् सभादेः चरमपतिपदात् सर्वतन्त्रस्वतन्त्रादग्र्योऽधीत्य स्वदेशं गत इह पठितुं शङ्करं संश्रितोऽहम्७
सोमसमः समाजनिपुणः श्रीसोमनाथोऽभवद् गोस्वामिव्रजरायनामकमहाविद्यालयेऽध्यापकः।
ाद इति प्रसिद्धनगरे भक्तिं वितन्वन् जने दीक्षां वल्लभसम्प्रदायविहितां बिभ्रद्यशः ख्यापयन् ॥ ८ ॥
श्रीबालकृष्णो गुरुपदकमलं संश्रयन् काशिकायामाचार्य्योपाधिमाप्त्वा बुधजनसमितौ सत्प्रतिष्ठामवापत्।
ानीय नीता बहुविधविषये भ्रातरः पण्डितत्वं स्वीये देशेऽधुना ये गुरुतमयशसाऽध्यापयन्ते बहुत्र।९।
ध्यापकतामवाप्य कृपया विश्वेशितुः पुण्यदे देवीदत्तपदादिसूर्य्यमलयुक्खेतानविद्यालये।
तीययशः सुरद्रुकुसुमैः सार्धं स्वकीयं यशः काश्यां वर्द्धयता प्रभेयमतुला व्याख्या कृता भूषणे ॥ १० ॥
रायबहादुरो गिरिसुताभक्तो रमायाः प्रियो धर्मात्मा हरिरामनामविदितो खेतानवंशोद्भवः।
दानविधावुदारहृदयो विद्वत्समाराधकः जीव्याद्वर्षशतं प्रसन्नहृदयो लक्ष्मीसमृद्ध्या समम् ॥ ११ ॥
रायबहादुरस्य भुवने विख्यातकीर्तिश्रियः खेतानान्वयभास्वतो धिषणया राजप्रजास्नेहिनः।
षणसारमुद्रणविधौ साहाय्यकर्तुर्गृहे वाग्लक्ष्म्यौ वसतां सदा स्थिरतया केदारनाथस्य मे ॥ १२ ॥
नानिवास्तव्याः खेतानान्वयसम्भवाः। सौभाग्यारोग्यसम्पद्भिर्ऋद्ध्यन्तामुत्तरोत्तरम् ॥ १३ ॥
ादपराच्च हेतुत इह स्याद् या प्रभायां त्रुटिर्दोषज्ञाः परिमार्ज्य तां करुणया स्वीयां गुणग्राहिताम्।
ीतिपरिश्रमञ्च सफलं कुर्वन्त्विति प्रार्थये पञ्चोली विदुषां प्रसत्तिपिठरोऽहं बालकृष्णस्सुधीः ॥ १४ ॥
दोषवतां भान्ति गुणा गुणवतामिव। सुधियां सुधिया दोषा अदोषाः पुण्यशालिनाम्
तीव कर्त्तव्यं दोषदृष्टिपरं मनः। दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥ १५ ॥
ण्यदिवाकरो निजकरैः प्रोत्सार्य्य हार्दं तमः दिव्यं ज्योतिरदायि येन रचिता रम्या प्रभा भूषणे।
ोभ्यवगाहदिव्यतपसा देवत्वमाबिभ्रतः चायामि प्रभया सभापतिरहं श्रीबालकृष्णाभिधः ॥ १७ ॥

SGDF

सम्मतयः

श्रीमन्माध्वसम्प्रदायाचार्य-दार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्य-तर्करत्न-न्याय
श्रीगोस्वामिदामोदरशास्त्रिणः—

काशीस्थखेतानमहाविद्यालयप्रधानाध्यापकेन व्याकरणाचार्येण पञ्चोलीत्युपाख्य-
शर्मविदुषा रचितां वैयाकरणभूषणसारस्याभिनवां प्रभाख्यां व्याख्यामनेकत्र स्थलेषु नि
वलमन्तेवसतामुपकारमपि तु नव्याध्यापकानाञ्च साहायकमुद्भाव्याधिविचारक्षेत्रं तत्रत्य
जहीर्षताऽऽत्मप्रतिभातरीतिमन्यटीककैरनुद्ग्रथितं ग्रन्थकमर्मव्यञ्जिजिषमाणेनोट्टङ्कितामालोच
शब्दानुशासनगामिदमीयां सर्वपथीनां शेमुषीमवगच्छंश्च जिज्ञासुविचिकित्सानाडिन्धमपटिमा
लितमुज्जिहानं स्वान्ते संमदोद्रेकमन्तरमान्तमिव कतिपयाक्षरमिषेण प्रचिकटयिषुः प्रभाभासिनम
दामोदर गो

महामहोपाध्याय—शास्त्ररत्नाकर—मीमांसाकेसरि—पण्डितसार्वभौम—
प्रिन्सिपल हिन्दू विश्वविद्यालय (धर्म विज्ञान विभाग) श्रीचिन्नस्वामिशास्त्रि

श्लाघनीयतमोऽयं श्रीमतां पण्डितप्रवराणां श्रीबालकृष्णशास्त्रिपञ्चोलिमहोदयानां
चार्य्याणां खेतानसंस्कृतमहाविद्यालयप्रधानाध्यापकानां वैयाकरणभूषणसारस्य 'प्रभा'
विरचनविषयकः प्रयत्नः। भूषणसारो हि न वैयाकरणगोष्ठीषु केवलम्, परीक्षास्वपि प्रायेण
कृतप्रवेश इति नाविदितं समेषां विदुषाम्।

सोऽयं विसृत्वरप्रचारोऽपि समुचितोपकरणवैधुर्येण न तथात्मनो रहस्यमन्तर्निगूढमवबो
वन्नासीत्। सोऽयं दोषः परिहृतः प्रभारव्ययाऽनया टीकया। श्रीमद्भिः शास्त्रिवर्यैर्हि सरल
गभीरया च शैल्या, नातिविस्तृततया रीत्या तथा ग्रन्थग्रन्थिविभेदनं कृतम्, येन वैयाकरण
शब्दतत्त्वमधिजिगमिषतां महानुपकारो जायेत।

तेनाधमर्णं पण्डितकुलं छात्रवृन्दं च श्रीपञ्चोलिमहोदयानां विषय इति नात्युक्ति
चावश्यमन्तस्सन्तुष्येयुर्विमत्सरा विपश्चित्प्रवराः प्रभामिमामवलोक्येति। अतः प्रमाणपदवीं
वर्तिनीं ग्रन्थमर्मप्रकाशिनीं सरलामपि गभीरहृदयां पाण्डित्यप्रकर्षपरिपूर्णां प्रभामिमां वि
र्थिनश्च यथावदुपयुज्य महत्तमं लाभमवाप्नुयुः, तेन च श्रीपञ्चोलिमहोदयानां परिश्र
प्रोत्साहयेयुश्च तानेतादृशग्रन्थरत्नानां बहूनां निर्माण इति सुदृढं विश्वसन्, वितरंश्चानेकान् ध
अन्ते श्रीविश्वनाथं नाथामि श्रीबालकृष्णशास्त्रिपञ्चोलिमहोदयेभ्यस्सर्वमायुस्सर्वाश्चाशिष
इति विद्वद्वशंव
यथावत्सोऽनुगृह्णातु—
चिन्न

न्याय—व्याकरणाचार्य—न्याय—साङ्ख्य—वेदान्त—मीमांसा—व्याकरणतीर्थ—भू पू०
कीय संस्कृतमहाविद्यालयप्रधानाध्यापक—प० श्रीबालबोधमिश्रस्य।

अकस्माज्जातं सुवर्णे सौगन्धमिव अकस्माज्जाता सर्वाभिलषिता विद्वज्जनचेतसि
प[illegible]—बालकृष्णपञ्चोलिकृतेयं प्रभानाम्नी वैयाकरणभूषणसारव्याख्या सर्वास्वपि प्रकृत
[illegible]दियं प्रभा ब्रह्मप्रभेव सूर्यादिप्रभामन्यग्रन्थव्याख्यारूपप्रभामुपोद्बलयन्ती ब्रह्मवि
प्र[illegible] विद्यामुच्छेदयित्री भविता।

एतत्प्रभाध्यायकश्चायं श्री पं० बालकृष्णपञ्चोलिनामधेयः सुवर्णे सौगन्ध्याधायक इ
वान् इति विद्वांस एव विदाङ्कुर्वन्त्विति कृतमधिकेन स्वयं विद्वज्जनविदितवेदेनेति प्रकृतग्रन्थं
श्रीबाल

SGDF

SOME VALUABLE OPINIONS OF THE HIGHLY LEARNED PROFESSORS OF INDIA ON THIS 'PRABHA' COMMENTARY ARE AS FOLLOWS:-

K. A. Subramania Iyer,
University of Lucknow.

'Hindska'
38, Major Banks Road,
Lucknow.

21-6-1944

I have seen the commentary called 'Prabha' of Pt. Bala Krishna Pancholi Vyakarnacharya, on the Vaiyyakarana-Bhusana-Sara of Kaunda Bhatta. I could do no more than read a few selected passages. I was impressed by the clarity of the explanations and their faithfulness to tradition. Though there are many other commentaries on this work, the 'Prabha' will be of great use to students of advanced Vyakarana. There can never be too many aids to a through understanding of a work like the Vaiyyakarana-Bhusana-Sara.

K. A. Subramania Iyer,
Head of the Dept. of Sanskrit and Hindi
University of Lucknow.

This is to certify that Pt. Balkrishna Pancholi Vyakarnacharyaji is known to me I have glanced through portions of his commentary on Vaiyakaran-Bhusana-Sara in manuscript and I am convinced of the usefulness of the work.

23-6-44

Gopi Nath Kaviraj,
(Mahamahopadhyaya, Retired Principal,
Govt. Sanskrit College, Benares).

Babu Ram Saksena,
M. A., D. LITT.
University of Allahabad.

24, Chatham Lines,
Allahabad.
Dated August 22, 1944.

I have been pleased to look into the Commentary 'Prabha' of Vaiyakarana-Bhusana-Sara, here and there and am impressed with the clarity of the

commentator's expression and his desire to dive deep. The study of grammar of Sanskrit on orthodox lines to-day is more an aim by itself and involves a vigorous discipline. The commentator, Pt. Bala Krishna Pancholi, gives sufficient evidence of being thoroughly grounded in this discipline. By writing this clear exposition of the stiff work, he has rendered a very valuable service. I hope he will continue in the line.

Babu Ram Saksena,
Reader in Sanskrit and
Member, Board of Skt. Studies, U. P.

Govt. Sanskrit College,
Benares.
Dated April 18, 1947

I glanced through the commentary called "Prabha" written by Pandit Balkrishna Pancholi, Vyakaranacharya, on the Vaiyakarana Bhushana Sara of Kaunda Bhatta. There have been several commentaries already available on this important work. The speciality about this new commentary is that, owing to clarity of its explanations on difficult passages of the text as well as on Vedic and other quotations occuring therein, it is much better suited to the needs of the studeuts community. The author of the commentary has moreover taken special care to collete the text with some original manuscripts. The edition also includes the older Darpana-Vyakhya. I heartily congratulate the author on his achievement which is sure to bring him a well-deserved name among the learned community.

(M. D. Shastri),
M. A, D. phil, principal,
Govt Sanskrit College,
Benares.

SGDF
Sri Gargeshwari Digital Foundation

॥ किञ्चित्प्रास्ताविकम् ॥

॥ "विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि" ॥

इहापाततः प्रतीयमानसारेऽपि यथार्थतः साररहिते संसारे मृगतृष्णया प्राय ऐहिकेष्टानिष्टप्रेप्सा-परिजिहीर्षाभ्यामेव प्राणिमात्रस्य विद्याधनादिसंग्रहीतुं महत्तमः प्रयासस्तत्र तत्र दृष्टिपथमवतरति। ऐहिकसमुन्नतये शास्त्रप्रदर्शितोन्नतिपथमवगणयतामुच्छृङ्खलतया यथेच्छं व्यवहरतां पूर्वसुकृतवशात्प्राप्तै-श्वर्य्याणामप्यसुमतां भाव्यभ्युदयस्तु विचिकित्सामेवावगाहते। शास्त्रविरुद्धाचाराणां प्राणात्ययानन्तरं महापुण्यपण्यक्रेतव्यमनुष्यजन्मालभमानानां कीटपतङ्गादिदुःखदयोनिषूत्पद्यमानानां तेषां हीरकमन्वि-ष्यतां वराटिकालाभ इव चिरं कालमधःपातो निर्णीत एव।

अतः करुणावरुणालयो निमेषमात्रेण लोकत्रयसृष्टिविसृष्टिशक्तः, विहितनिषिद्धकर्मानुरोधेन प्राणिमात्रस्य निग्रहीतानुग्रहीता च परमेश्वरोऽनिर्वचनीयदुःखतः परिरिरक्षिषयाऽभ्युदयनिःश्रेयसाभ्यां संयुयुक्षया च ब्रह्माणमुत्पाद्य प्रवाहरूपेण प्रतिसर्गमापतितं मनुष्यबुद्ध्यविवेच्यधर्माधर्मसाधनोपदेशकं साङ्गं वेदं तस्मै समुपादिदेश। तदुक्तम्—

'यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै' इति। (श्वे० उप० ६ अ० १८) 'सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे' ॥ इति च। तथाच मानवबुद्ध्यनिर्णेयधर्माधर्मज्ञानाय वेदः, तन्मूलकानि शास्त्राणि एव च शरणीभूतानि।

वेदादिवाक्यार्थज्ञानमन्तरा धर्माधर्मयोर्ज्ञातुमशक्यतया द्विविधो हि शब्दो धर्मजनकोऽधर्मजनकश्च। तत्र धर्मजनकशब्दानां ज्ञानस्य व्याकरणाधीनतया 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' 'प्रधानञ्च षडङ्गेषु व्याकरणम्' इति भाष्योक्त्या, 'अधिविद्यं प्रकाशते' इति वाक्यपदीयेन च 'साङ्गं वेदम्' इत्याङ्गपदस्योपकारार्थकतया व्याकरणशास्त्रस्य निखिलशास्त्रोपकारकत्वबोधनाद् व्याकरणज्ञानमावश्य-कम्। यदि

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

इत्यादिना अङ्गानाम् (वेदोपकारकाणाम्) अध्ययनमुक्तम्, तथापि व्याकरणस्य प्राधान्यमत्रापि स्थिरीकृतमेव।

व्याकृतिः=व्युत्पत्तिस्तत्साधनं व्याकरणम्। व्युत्पत्तिश्च-प्रकृति-प्रत्यययोः स्वरूपस्य, तदर्थयो-

SGDF
Sri Gargeshwari Digital Foundation

commentator's expression and his desire to dive deep. The study of grammar of Sanskrit on orthodox lines to-day is more an aim by itself and involves a vigorous discipline. The commentator, Pt. Bala Krishna Pancholi, gives sufficient evidence of being thoroughly grounded in this discipline. By writing this clear exposition of the stiff work, he has rendered a very valuable service. I hope he will continue in the line.

Babu Ram Saksena.
Reader in Sanskrit and
Member, Board of Skt. Studies, U. P.

Govt. Sanskrit College,
Benares.
Dated April 18, 1947

I glanced through the commentary called "Prabha" written by Pandit Balkrishna Pancholi, Vyakaranacharya, on the Vaiyakarana Bhushana Sara of Kaunda Bhatta. There have been several commentaries already available on this important work. The speciality about this new commentary is that, owing to clarity of its explanations on difficult passages of the text as well as on Vedic and other quotations occuring therein, it is much better suited to the needs of the studeuts community. The author of the commentary has moreover taken special care to collete the text with some original manuscripts. The edition also includes the older Darpana-Vyakhya. I heartily congratulate the author on his achievement which is sure to bring him a well-deserved name among the learned community.

(M. D. Shastri)
M. A, D. phil, principal,
Govt Sanskrit College,
Benares.

SGDF
Sri Gargeshwari Digital Foundation

॥ किञ्चित्प्रास्ताविकम् ॥

॥ "विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि" ॥

इहापाततः प्रतीयमानसारेऽपि यथार्थतः साररहिते संसारे मृगतृष्णया प्राय ऐहिकेष्टानिष्टप्रेप्सा-परिजिहीर्षाभ्यामेव प्राणिमात्रस्य विद्याधनादिसंग्रहीतुं महत्तमः प्रयासस्तत्र तत्र दृष्टिपथमवतरति। ऐहिकसमुन्नतये शास्त्रप्रदर्शितोन्नतिपथमवगणयतामुच्छृङ्खलतया यथेच्छं व्यवहरतां पूर्वसुकृतवशात्प्राप्तै-श्वर्य्याणामप्यसुमतां भाव्यभ्युदयस्तु विचिकित्सामेवावगाहते। शास्त्रविरुद्धाचाराणां प्राणात्ययानन्तरं महापुण्यपण्यक्रेतव्यमनुष्यजन्मालभमानानां कीटपतङ्गादिदुःखदयोनिषूत्पद्यमानानां तेषां हीरकमन्वि-ष्यतां वराटिकालाभ इव चिरं कालमधःपातो निर्णीत एव।

अतः करुणावरुणालयो निमेषमात्रेण लोकत्रयसृष्टिविसृष्टिशक्तः, विहितनिषिद्धकर्मानुरोधेन प्राणिमात्रस्य निग्रहीतानुग्रहीता च परमेश्वरोऽनिर्वचनीयदुःखतः परिरिरक्षिषयाऽभ्युदयनिःश्रेयसाभ्यां संयुयुक्षया च ब्रह्माणमुत्पाद्य प्रवाहरूपेण प्रतिसर्गमापतितं मनुष्यबुद्ध्यविवेच्यधर्माधर्मसाधनोपदेशकं साङ्गं वेदं तस्मै समुपादिदेश। तदुक्तम्—

'यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै' इति। (श्वे० उप० ६ अ० १८) 'सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे' ॥ इति च। तथाच मानवबुद्ध्यनिर्णेयधर्माधर्मज्ञानाय वेदः, तन्मूलकानि शास्त्राणि एव च शरणीभूतानि।

वेदादिवाक्यार्थज्ञानमन्तरा धर्माधर्मयोर्ज्ञातुमशक्यतया द्विविधो हि शब्दो धर्मजनकोऽधर्मजनकश्च। त्र धर्मजनकशब्दानां ज्ञानस्य व्याकरणाधीनतया 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' धानश्च षडङ्गेषु व्याकरणम्' इति भाष्योक्तया, 'अधिविद्यं प्रकाशते' इति वाक्यपदीयेन च 'साङ्गं वेदम्' ङ्गपदस्योपकारार्थकतया व्याकरणशास्त्रस्य निखिलशास्त्रोपकारकत्वबोधनाद् व्याकरणज्ञानमावश्य-कम्। दीप

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

इत्यादिना अ[illegible]नाम् (वेदोपकारकाणाम्) अध्ययनमुक्तम्, तथापि व्याकरणस्य प्राधान्यमत्रापि स्थिरीकृतमेव।

व्याकृतिः=व्यु[illegible]स्तत्साधनं व्याकरणम्। व्युत्पत्तिश्च—प्रकृति—प्रत्यययोः स्वरूपस्य, तदर्थयो-

SGDF
Sri Gargeshwari Digital Foundation

स्तत्सम्बन्धस्य च ज्ञानरूपा। एतेन पाणिन्यादिव्याकरणाभावे वेदस्य न्यूनाङ्गत्वापत्तिरपास्ता, इष्टापत्तेः, उक्ताङ्गानां ज्ञानाभावे वेदस्वरूपस्य, तदर्थस्य च ज्ञानासम्भवाद् बुद्ध्युपजीविनाम्।

यद्यपि व्याकरणज्ञानस्य 'रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' इति भाष्योक्तं प्रयोजनं कौमुद्यादिग्रन्थाध्ययनेनापि सम्पद्येत तथापि प्रकृत्यर्थस्य प्रत्ययार्थस्य च किं विशकलितं स्वरूपम्, कश्च तयोः परस्परं सम्बन्धः। वाक्यार्थे च कस्यार्थस्य प्राधान्याप्राधान्ये, इत्यत्र मीमांसकनैयायिकादीनां भ्रममपाकर्तुम्, नाम्नाम्, धातूनाम्, प्रत्ययानाम्, समासादीनाञ्चार्थं मीमांसकादिविरुद्धमतनिराकरणपूर्वकं स्वमतेन निरूपयितुम्, नव्यन्यायपरिष्कारपद्धतिं व्याकरणरीत्या बोधयितुम्, निखिलप्रपञ्चकारणीभूतस्फोटात्मकशब्दब्रह्मावगमयितुञ्च निखिलतन्त्रनिष्णातश्रीकौण्डभट्टेन वैयाकरणभूषणं शब्दकौस्तुभसारप्रदर्शकं ग्रन्थरत्नं निरमायि। ततोऽपि सौकर्य्येण प्रौढव्युत्पत्त्युपलब्धये वैयाकरणभूषणसारो निर्मितः। तत्र यद्यपि नैयायिकादिपक्षप्रदर्शके स्वसिद्धान्तप्रतिपादके चात्र ग्रन्थे बह्व्यः टीकाः सन्ति, तथापि ते खण्डनीयमीमांसकादिमतप्रदर्शने एव व्याख्यानविस्तृतिकरणेन, कठिनवागाडम्बरेण, क्वचित्क्वचिद्व्याख्येयग्रन्थस्य सम्यगव्याख्यातत्वेन, स्फोटस्वरूपोपपादने तन्न्यूनतादर्शनेन च व्याकरणाचार्य्येण पञ्चोलिबालकृष्णशास्त्रिणा स्वच्छदर्पणे मुखावबोधवद् भूषणसारवक्तव्यार्थस्य सुबोधाय गुरुपरम्परोपलब्धपरिष्करणपद्धत्यां छात्राणां शक्तिवर्धनाय च स्वनिर्मितया प्रभानाम्न्या व्याख्यया समलङ्कृतोऽयं वैयाकरणभूषणसारः। अत्र च प्रायः सर्वासां टीकानां सारभूता विषया नोपेक्षिताः। क्वापि टीकासूपलब्धुमशक्या बहवो विषया अत्युपयुक्ताः सन्ति। मन्ये ते विषया अध्ययनशीलैश्छात्रैः, गुणग्राहिभिर्विद्वद्भिश्च स्वयमेव प्रशंसनीयाः स्युः। यद्यप्यत्र त्रुटिर्नास्तीति नहि वक्तुं शक्यते, तथाप्यनया टीकया बहूपकृतमित्यत्र नास्ति विशयः। किञ्च दर्पणटीका अद्यावधि कैश्चिदपि विद्वद्भिर्न सम्यक् शोधयितुं प्रयतितम्। क्वचिदक्षराशुद्धयः, क्वचिद् वाक्यम्, वाक्यार्द्धम्, पदादिकं वोच्छिन्नमासीत्, तत्सर्वमनेकानि लिखितपुस्तकान्युपजीव्य पण्डितवर-श्रीबालकृष्णशास्त्रिपञ्चोलिना संशोधितम्। एतद्विषये बहूनामुपकरणानामभावाद् विस्तरस्य कर्तुमशक्यत्वेन मुद्रणान्तरे उपेक्षितापेक्षया विषया उक्ताः स्युरित्यलं पल्लवितेन साम्प्रतमिति

निवेदयते—

श्रीसभापतिशर्मोपाध्यायः

(प्रिन्सिपल, विरला संस्कृत कालेज, बनारस)

SGDF
Sri Gargeshwari Digital Foundation

ॐ

प्रभाव्याख्यया दर्पणव्याख्यया च समुल्लसितः

वैयाकरणभूषणसारः

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्त्तते ॥ १ ॥

प्रभा

शास्त्रै रत्नैर्गुरुजनभवप्रज्ञयाऽऽप्तप्रकर्षैश्चित्रैस्तर्कैर्नवनवधियां सत्तरङ्गैरुपेताम् ।
पौंस्नैरर्थैः कमलनिचयैर्विष्टपं प्रीणयन्तीं वाचं वन्दे जलनिधिसमां श्रीलपञ्चोल्यहं ताम् ॥१॥
श्रीनीलकण्ठप्रभवो गुरुश्रीसभापतेराप्तसमस्तविद्यः ।
श्रीबालकृष्णस्तनुते प्रभाऽऽख्यां श्रितां वरां भूषणसारसारम् ॥२॥

वैयाकरणमते प्रकृतिप्रत्ययार्थप्रदर्शनपूर्वकं वाक्य-वाक्यार्थनिर्णायकं भट्टोजिदीक्षितादिकारिकाव्याख्यारूपं भूषणसारनामकं प्रकरणमारभमाणः श्रीकौण्डभट्टः प्रारिप्सितस्य निर्विघ्नसिद्ध्यर्थं 'मङ्गलादीनि हि शास्त्राणि प्रथन्ते (विस्तृतानि भवन्ति) वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युः' (भा० अ० १ पा० १ आ० ३ सू० १) इति भाष्योक्तेः 'विघ्नध्वंसकामो मङ्गलमाचरेत्' इत्यविगीतशिष्टाचारानुमितश्रुतेश्च मङ्गलमाचरति—

श्रीलक्ष्मीरमणमिति—श्रीर्लोकोत्तरा कान्तिस्तया सहिता लक्ष्मीर्निखिलसम्पदधिष्ठात्री देवतेति शाक-

दर्पणव्याख्या

रमाप्रेमाऽऽमजजगदवनदक्षं मधुहृत-श्रुतिस्तोमाहृत्या परिजनितवेदाननमुदम् ।
अखण्डानन्दाढ्यं निखिलजनहृत्कञ्जनिलयं हयग्रीवं वन्दे प्रकृतकृतिविघ्नक्षतिकृते ॥ १ ॥

सत्येकस्मिन्नपि बाधके समवहितसाधकसहस्रादपि कार्योत्पत्तेरदर्शनादपेक्षितप्रारिप्सितप्रत्यूहापोहायानुष्ठितं भगवत्स्तुतिरूपं मङ्गलं ग्रन्थकृच्छिष्यशिक्षार्थमादौ निबध्नाति ❀ श्रीलक्ष्मीरमणमिति ❀ । अधिकरणव्युत्पत्त्यल्युडन्तरमणशब्देन कर्तृषष्ठ्यन्तलक्ष्मीपदस्य समासः । तेन च श्रीसहितशब्दस्य मध्यमपदलोपी समासः, शाकपार्थिवादेराकृतिगणत्वात् । तदुपादानञ्च सशक्तिकस्यैव भगवतो जगन्निर्माणकारणत्वमिति ध्वनयितुम् । ❀ नौमीति ❀ "णु स्तुतौ" इति धातोरस्मच्श-

प्रभा

पार्थिवादित्वादुक्तसहिताशब्दस्य लोपः। यद्वा श्रीशब्दस्य श्रीमति लक्षणया श्रीश्चासौ लक्ष्मीरित्येव विग्रह उचितः; शाकपार्थिवादित्वकल्पने गौरवात्। यद्वा श्रीरिति लक्ष्मीरमणस्य विशेषणम्। श्रीलक्ष्मीपदस्य कर्मषष्ठ्यन्तस्य नन्द्यादित्वाण्णिजन्तात्कर्त्तरि ल्युटि निष्पन्नरमणशब्देन सह तत्पुरुषसमासः। यद्वा अधिकरणल्युडन्तरमणशब्देन कर्तृषष्ठ्यन्तश्रीलक्ष्मीरमणशब्दस्य समासः। तथाच श्रीलक्ष्मीरमणमित्यस्य विष्णुमित्यर्थः। सशक्तिकस्य परमात्मनः कारणत्वमिति द्योतनाय श्रीलक्ष्मीति विशेषणम्। लक्ष्मीरमणनमनेन तस्येष्टदेवत्वप्रतीतावपि 'ज्ञानन्तु शङ्करादिच्छेत्' इत्युक्तेर्गौरीरमणरूपवत्त्वेन नतेरौचित्यादाह—

गौरीरमणरूपिणमिति—'एकः सन् बहुधा व्यजायत', 'एकोऽहं बहु स्याम्' इत्यादिश्रुत्या एकस्यैव परमात्मनो नानारूपत्वं कार्यवैचित्र्याय, कारणवैचित्र्यस्यैव कार्यवैचित्र्यप्रयोजकत्वात्।

ननु गौरीरमणस्य रूपमिव रूपं यस्येति व्यधिकरणबहुव्रीहिणा गौरीरमणरूपमिति वक्तव्ये एकयैव वृत्त्या निर्वाहे वृत्तिद्वयादिकरणमनुचितमिति लाघवमूलक 'न कर्मधारयान्मत्त्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इति न्यायात्। अत्र कर्मधारयपदं वृत्तेरुपलक्षणम्, गौरवस्यान्यत्रापि सम्भवात्। षष्ठीतत्पुरुषाद् गौरीरमणरूपशब्दान्मत्त्वर्थे इनिर्न स्यादिति चेन्न, 'प्रत्ययस्थात्कात्' इति सूत्रे नास्ति सुब् यस्मादिति बहुव्रीहिणा 'असुपः' इति वक्तव्ये न सुप् असुबिति नञ्तत्पुरुषं कृत्वा मतुपि 'असुब्वतः' इति भाष्यप्रयोगेण तस्य न्यायस्यानित्यत्वज्ञापनेनादोषात्। किञ्च, गौरीरमणं रूपयतीति विग्रहे ण्यन्ताद्रूपधातोः कर्त्तरि णिनिप्रत्यये तत्साधुत्वौचित्यात्।

यत्तु कान्तिकाराः—रसादिषु रस-रूप-गन्धादिशब्दानां पाठोऽन्यमत्त्वर्थीयनिवृत्त्यर्थ इति 'रसादिभ्यश्च' (अ० ५ पा० २ सू० ९५) इति मतुपा बाधादिनेरत्रासाधुत्वमिति तन्न, 'रसादिभ्यश्च' इत्यत्र 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इत्यनेन तदन्तविधेर्निषेधाद् गौरीरमणरूपशब्दादिनिप्रत्यये बाधकाभावात्। अत एव 'शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे' इत्यादि सङ्गच्छते। णिनिप्रत्ययेन साधुत्वन्तु न युक्तम्, तत्रापि समासस्य कृद्वृत्तेश्च सत्त्वेन 'न कर्मधारयात्' इति न्यायविरोधस्य सत्त्वादिति पञ्चोलिनः।

ननु कथं विष्णोर्गौरीरमणरूपत्वम्, तयोर्भेदस्य सर्वलोकतन्त्रप्रसिद्धत्वादिति चेन्न, 'एकोऽहं बहु स्याम्',

दर्पणव्याख्या

ब्दाप्रयोगेऽपि गम्यमानतदर्थसामानाधिकरण्यस्य लकारार्थकर्त्तरि सत्त्वाद् वर्त्तमानक्रियाद्योतकलङुत्तमपुरुषः। 'अस्मद्युत्तमः' (पा० सू० १-४-१०७) इत्यत्र पूर्वसूत्रात् स्थानिनीत्यस्यानुवृत्तेः। स्तुतिश्चोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्यापारः। स एव च प्रकृतधात्वर्थः। बोधरूपधात्वर्थफलाश्रयत्वाल्लक्ष्मीरमणस्य कर्मता। एवञ्च वैयाकरणमते प्रकृते श्रीसहितलक्ष्मीरमणाश्रयकोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो मदभिन्नाश्रयको वर्त्तमानशब्दप्रयोगरूपो व्यापार इति वाक्यार्थः। नन्वेतच्छास्त्रप्रवर्त्तकत्वेन शिवस्याभ्यर्हिततरत्वात्तत्स्तुत्यात्मकमङ्गलमपि कुतो नाचरितमत आह—❀ गौरीरमणरूपिणमिति ❀। स्वरूपपररूपपदेन गौरीरमणपदस्य षष्ठीसमासस्ततोऽदन्तत्वनिबन्धनो मत्वर्थीय इनिः। गौरीरमणो रूपं स्वरूपं यस्येति षष्ठ्यर्थबहुव्रीहिणोक्तार्थलाभेऽपि लाघवमूलक-'न कर्मधारयाद्' इति न्यायस्य "प्रत्ययस्थात्" (पा० सू० ७-३-४४) इति सूत्रे "असुब्वतः" इति प्रयोगमुदाहरता भाष्यकृताऽनादृतत्वान्न मत्वर्थीयानुपपत्तिः। दृश्यते चेदृशस्थले प्रयोगद्वैविध्यम्—

शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे। इत्यादि।

तथाच तदभिन्नमित्यर्थः। प्रमाणं चात्रोक्तपुराणवाक्यमेव। एवञ्च कार्यवैचित्र्यस्य कारणवैचित्र्यनियम्यत्वा-

SGDF

प्रभा

'एकः सन् बहुधा व्यजायत' इत्यादिश्रुत्या एकस्यैव परमात्मनः सृष्ट्यादिविभिन्नकार्योपपत्तयेऽनेकरूपपरिग्रहात्। रमणशब्दप्रयोगेण प्रहृष्टादीश्वरादिष्टलाभः सूचितः।

नौमीति—नुधात्वर्थश्च स्वनिष्ठापकर्षनिरूपितोत्कर्षविशिष्टज्ञानानुकूलो व्यापारः। ज्ञाने उत्कर्षवैशिष्ट्यञ्च—स्वनिष्ठप्रकारतानिरूपकत्व—स्वप्रकारकज्ञानीयविशेष्यताश्रयसमवेतत्वाभ्याम्। स्वमुत्कर्षः। एवञ्च 'चैत्रो मैत्रं नौति' इत्यत्राञ्जलिकरणनौमीत्यादिशब्दोच्चारणरूपव्यापारेण 'एतदपेक्षया अहमुत्कृष्टः' इति मैत्रस्य ज्ञानं जातम्। तच्च ज्ञानमुत्कर्षविशिष्टम्, उत्कर्षाश्रयोऽहमित्यत्रोत्कर्षस्य प्रकारीभूतत्वात्। तथाच उत्कर्षनिष्ठप्रकारतानिरूपकत्वं मैत्रीयज्ञाने जातम्। द्वितीयसम्बन्धघटकज्ञानञ्च नतिकर्तुर्ग्राह्यम्। तच्च 'मदपेक्षया मैत्र उत्कृष्टः' इत्याकारकम्। तज्ज्ञानीयविशेष्यताश्रयो मैत्र इति मैत्रीयज्ञाने स्वप्रकारकचैत्रज्ञानीयविशेष्यताश्रयसमवेतत्वमप्यस्तीत्युभयसम्बन्धेन मैत्रज्ञाने उत्कर्षवैशिष्ट्यमुपपन्नम्। तेन 'मैत्रं नमति चैत्रे' तत्रत्यविष्णुमित्रस्योत्कर्षप्रकारकबोधेऽपि न 'विष्णुमित्रं नमति' इति प्रयोगः, 'मदपेक्षयोत्कृष्टो मैत्रः' इति चैत्रज्ञानीयविशेष्यताश्रयत्वस्य मैत्रे एव सत्त्वात्। स्वशब्दार्थश्चात्र नतिकर्ता[1]। उत्कर्षविशिष्टज्ञानञ्च नतिकर्मणो ग्राह्यम्। तच्च 'नतिकर्त्रपेक्षया अहमुत्कृष्टः' इत्याकारकम्। समवायसम्बन्धेन तादृशज्ञानरूपफलाश्रयत्वात् कर्मत्वम्। व्यापारश्चाञ्जलिकरणादिरूपः, 'नौमि' इत्यादिशब्दरूपश्च।

वस्तुतस्तु नायं नुधात्वर्थः, ईश्वरपित्रादिषु तादृशोत्कर्षबोधस्य स्वत एव सत्त्वेन तद्बोधनानुकूलव्यापारस्य वैयर्थ्यापत्तेः, नमस्कारत्वस्य मङ्गलत्वव्याप्यतया व्याप्यसत्त्वे व्यापकसत्तायाः आवश्यकतया स्वाभीष्टार्थसिद्धिप्रतिबन्धकविघ्नध्वंसजनकतावच्छेदकधर्मविशेषरूपमङ्गलत्वस्य पूर्वोक्तव्यापारेऽसत्त्वेन तद्व्यापकत्वानापत्तेश्च। अतः स्वाभीष्टसाधकाशीर्वचनानुकूलव्यापार एव नुधात्वर्थः। स च व्यापारः करशिरःसंयोगादिरूपः, नमस्करोमीत्यादिशब्दरूपश्चेति पञ्चोलिनः।

स्फोटरूपमिति—पूर्वोक्तोत्कर्षमेवाह—स्फोटरूपमित्यादिना। एतच्च भगवतो जगतश्च विशेषणम्। आद्ये स्फुटत्यर्थो जगद्रूपो यस्मात्स स्फोटः, बाहुलकादपादाने घञ्। शब्दात्मकं ब्रह्म स्फोटो रूपं स्वरूपं यस्य तमित्यर्थः। यद्वा स्फुटति बोधविषयो भवत्यर्थोऽस्मादिति स्फोटः=शब्दः। रूप्यते=ज्ञायते इति रूपोऽर्थः,

---

दर्पणव्याख्या

जगदवनादिकार्यवैचित्र्योपपत्तये तत्तद्गुणप्रधानमूर्त्तिपरिग्रहो भगवतो न पारमार्थिको भेद इति स्तुतिकर्मता शिवस्य नानुपपन्नेति भावः। उत्कृष्टगुणवत्त्वमेवाविष्करोति ❀ यत इति ❀ वेदान्तिमते मायाशबलस्य ब्रह्मणो जगदुपादानत्वात् "जनिकर्त्तुः" (पा० सू० १-४-३०) इत्युपादानहेतावपादानसंज्ञानिबन्धना पञ्चमी। 'गुण' इत्युक्तेः "विभाषाः" (पा० सू० २-३-२५) इत्यस्य न प्रसक्तिः। तथाच यस्मादुपादानहेतोरित्यर्थः। सर्वं जगत् स्फोटरूपं विवर्त्तत इति योजना। स्फुटत्यभिव्यक्तीभवत्यर्थोऽस्मादिति स्फोटो नामाद्यात्मकः शब्दः। बाहुलकादपादाने घञ्, रूप्यते=निरूप्यते इति रूपमर्थः, तयोः समाहारद्वन्द्वे नपुंसकैकवचनान्तम्। वाच्यवाचकस्वरूपमिति तदर्थः। "नामरूपे व्याकरवाणि" (छान्दोग्ये ६।३।२) इति श्रुतेः ❀ एतत् ❀ अत्यन्तसान्निध्येन बुद्ध्या विषयीक्रियमाणम् ❀ विवर्त्तते ❀ उत्पद्यत इत्यर्थः, धातोरुपसृष्टत्वात्। ननु नामरूपात्मकस्य "सदेव सोम्येदमग्र आसीत्" (छान्दोग्ये ६-२-१) इति श्रुत्या सनातनत्वबोधनात् कथमुत्पत्तिशालित्वमत आह ❀ जगदिति ❀ वर्तमाने पृषत्" (उणादि सू० पा० २ सू० २५०) इति निपातनात्साधु। तथाच गच्छति=तिरोधत्त इति व्युत्पत्त्या तिरोधान उक्ते यत्तिरोधत्ते तदाविर्भवतीति नियमेनाविर्भावस्य

(1) प्रथमस्वशब्दार्थः = नुधात्वर्थघटकस्वशब्दार्थः।

प्रभा

स्फोटश्च रूपश्चानयोः समाहारः स्फोटरूपं शब्दार्थस्वरूपमित्यर्थः। शब्दार्थरूपस्यं जगत उपादानकारणस्यापि शब्दार्थरूपत्वौचित्यात्। अन्त्येऽप्युक्तप्रकारेण शब्दात्मकमर्थात्मकञ्च जगदित्यर्थः, जगतो नामार्थरूपत्वात्, 'नामरूपे व्याकरवाणि' इति श्रुतेः। नामात्मकमर्थात्मकञ्च जगत्प्रकाशयानीति तदर्थः।

यत इति—वेदान्तिनये मायोपाधिकस्यैव परमात्मनो जगदुपादानत्वात्। यत इत्यस्य अनाद्युपादानत्वे सति ज्ञान (ब्रह्मज्ञान) निवर्त्याऽज्ञानरूपा माया तच्छबलिताद् ब्रह्मण इत्यर्थः। 'जनिकर्तुः प्रकृतिः' (अ० १ पा० ४ सू० ३०) इत्यपादानत्वात् पञ्चम्यन्तात्तसिल्। ब्रह्मण उपादानकारणत्वञ्च 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुत्या बोधितम्। ब्रह्मणि स्थिति-लयकारणत्वे अपि अतः श्रुत्या लब्धे। अत्र 'आत्मन आकाशः सम्भूत आकाशाद्वायुः' इति श्रुतिरपि मानम्। यद्वा यत इत्यस्य यस्मिन्नित्यर्थः, आद्यादित्वात्तसिः। न्यायादिनये यत इति निमित्तहेतौ। 'विभाषा' इति योगविभागादगुणत्वेऽपि पञ्चमी। निमित्तकारणत्वे प्रमाणन्तु 'द्यावा भूमिं जनयन् देव एक एव आस्ते विश्वस्य कर्ता भुवनस्य गोप्ता' इत्यादिश्रुतिः। न चोपादाननिमित्तकारणत्वबोधकश्रुत्योः परस्परं विरोधः, जगतो विवर्तत्वे एकत्रोपादानत्व-निमित्तत्वयोः सत्त्वे बाधकाभावात्। सर्वमिति—स्थावर-जङ्गमात्मकमित्यर्थः। एतदिति-बुद्ध्या गोचरीक्रियमाणम्। जगदिति ननु 'सदेव सोम्येदमग्र आसीत्' इति श्रुत्या प्रपञ्चस्य नित्यता प्रतीयते तत्कथं परमात्मन उपादानत्वं निमित्तत्वं वेत्यत आह—जगदिति—गच्छति कारणे लीयते इति व्युत्पत्त्या विनाशित्वप्रतीत्या यद्विनाशि तज्जन्यमिति नियमेन जगतो जन्यत्वे बाधाभावात्। न च 'सदेव सोम्येदमग्र आसीत्' इति श्रुतिविरोधः, सत्तामात्रत्वेन नित्यत्वस्य नामादिविशिष्टत्वेनानित्यत्वस्य च स्वीकारेणादोषात्। विवर्तते—वेदान्तिमते रज्जूरगवद् जगतो ब्रह्मरूपत्वे विवर्तते इत्यस्यान्यथा प्रतीयत इत्यर्थः। यथा रज्ज्वां सर्पस्य रज्जुसत्तातिरिक्तसत्ता नास्ति तथा प्रपञ्चस्यापि ब्रह्मसत्ताऽतिरिक्तसत्ता नास्ति। यावद् रज्जुर्न प्रतीयते तावत्सर्पः प्रतीयते, एवं यावद् ब्रह्म न प्रतीयते तावत्प्रपञ्चः प्रतीयते। एवञ्च अतात्त्विकोऽ-

दर्पणव्याख्या

लाभात्स एवात्रोपसृष्टार्थः। एवञ्च सत्त्वेनैतस्य सनातनत्वेऽपि नामत्वादिनाऽऽविर्भावाद्यभ्युपगमान्नोक्तश्रुतिविरोधो नापि "तस्मादेतस्माद्वा आत्मन आकाशः सम्भूतः" (तैत्तिरीयके २।१) इत्याद्युत्पत्तिबोधकतद्विरोधः। यत्किञ्चिन्नामरूपात्मकस्यान्यतोऽपि सम्भवादाह ❀ सर्वमिति ❀ यावदर्थकम्। उत्पत्तिरुपलक्षणम्—अवनादेः। तेन जगत्कर्तृत्वादिरूपोत्कृष्टधर्मस्य स्तुत्यताऽवच्छेदकस्य लाभः। अत्र च "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति" (तैत्तिरीयके ३।१) इत्याद्याः श्रुतयः प्रमाणम्।

मतान्तरे यत इति पञ्चमी निमित्तहेतुतायाम्। व्युपसृष्टवृतुधातोराद्यक्षणसम्बन्धरूपोत्पत्तिरर्थः। ननु सर्वान्तर्गतवियदाद्यात्मकपदार्थस्यानादितया कथमुत्पत्तिमत्त्वमत आह ❀ जगदिति ❀ स्थावर-जङ्गमात्मकमित्यर्थः। तथाच गच्छति = नश्यतीति व्युत्पत्त्या विनाशित्वे बोधिते विनाशिभावस्य जन्यत्वनियमेन तस्योत्पत्तिर्न विरुद्धेति भावः। एतत्कल्पे स्फोटपदं शास्त्रानुमानप्रतीतिपरम्। तादृशं रूपं यस्येति व्युत्पत्त्या स्फोटरूपमिति भगवतो विशेषणं बोध्यम्। शेषं पूर्ववत्। यद्वा स्तुत्यताऽवच्छेदकरूपं प्रदर्शयितुं विशिनष्टि ❀ स्फोटरूपमिति ❀ वक्ष्यमाणव्युत्पत्त्या समस्तार्थप्रकाशकस्वरूपमित्यर्थः। तदुपपादयन्नेव स्तुत्यताऽवच्छेदकान्तरमपि दर्शयति ❀ यत इति ❀ यस्मादुपादानादिति सार्वविभक्तिकतसिना यस्मिन्नधिष्ठाने इति वाऽर्थः। विवर्तश्चातात्त्विकोऽन्यथाभावः। अपरित्यक्तपूर्वरूपस्य रूपान्तरप्रकारकप्रतीतिविषयत्वमिति यावत्। जगच्छब्दश्च रूढ्या नामरूपपरः। तथाच यस्मिन्नधिष्ठाने एतत्सर्वं जगद् भूतेन्द्रियादि तत्तद्रूपेण प्रतिभातीत्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥

प्रभा

न्यथाभावो विवर्तः, अत्यक्तपूर्वरूपस्य रूपान्तरप्रकारकप्रतीतिविषयत्वमित्यर्थः। न्यायनये तु विवर्तते इत्यस्य उत्पद्यते इत्यर्थः। अस्य सर्वं कार्यरूपं जगदिति शेषः, तन्मते आकाशादीनां नित्यत्वात्। साङ्ख्यमते आविर्भवतीत्यर्थः, तन्मते सर्वेषां नित्यत्वेन उत्पत्ति-विनाशयोराविर्भावतिरोभावरूपत्वात्। उत्पत्तिश्चाद्यक्षणसम्बन्धः, क्षणे आद्यत्वञ्च-तत्सम्बन्धप्रागभावानधिकरणत्वे सति तत्सम्बन्धाधिकरणध्वंसानधिकरणत्वम् ॥ १ ॥

मुक्तिसाधनज्ञानविषयीभूतस्वरूपत्वेन वर्णयन् व्याकरणसिद्धान्तज्ञानाय प्रत्यक्षीकृतनिखिलशब्दसाधुत्वासाधुत्वकशेषभूषणं व्याकरणमूलभूतचतुर्दशसूत्रोपदेशकं भगवन्तं शिवं प्रार्थयते—अशेषेति—यदुद्दिश्य प्रवर्तते तत्फलम्। अशेषाणि सर्वाणि फलानि तेषां दातारमिति विग्रहे कर्मधारयस्य शेषषष्ठ्या तत्पुरुषः। अत्र दातृशब्दस्तृन्नन्तस्तृजन्तो वा। न च तृन्नन्ते 'न लोकाव्यय' (अ० २ पा० ३ सू० ६९) इति षष्ठीनिषेधस्तृजन्ते च 'तृजकाभ्याम्' (अ० २ पा० २ सू० १५) इति समासनिषेधः स्यादिति वाच्यम्, कारकषष्ठ्यामेव तयोः प्रवृत्तेः। अत एव 'जनिकर्तुः' इति 'तत्प्रयोजको हेतुश्च' इत्यादिनिर्देशाः सङ्गच्छन्ते। एतेन देवान्तरादत्रोत्कर्षः सूचितः।

भवाब्धीति—अशेषफलेति विशेषणेन मुक्तिरूपफलकुक्षीकृतत्वादेतद्वैयर्थ्यन्तु नाशङ्कनीयम्, अपवर्गफलदातृत्वस्यानन्यसाधारणत्वद्योतनाय तत्सार्थक्यात्। कामक्रोधादिषड्वर्गमकराक्रान्तत्वेन दुस्तरत्वाद् भव एवाब्धिरिति रूपकम्। यद्वा भवोऽब्धिरिवेति उपमितसमासः। तस्य तरणम्=एकस्मात्तटात्परतीरगमनम्। भवाब्धेः परं तीरमपवर्गरूपम्, तत्प्राप्तिरेव तरणम्। यद्वा भवाब्धेस्तरणम्=नाशः, वेदान्तिमते अपवर्गश्च विद्याविरुद्धा भावरूपा याऽविद्या तन्निवृत्तिकालिकस्वरूपप्राप्तिः। न च अविद्या (अज्ञान) निवृत्तेर्ब्रह्मरूपाधिष्ठानानतिरिक्ततया स्वरूपस्यापि सिद्धतया च तयोः साध्यत्वानुपपत्तिः। तद्विषयकवृत्तेः साध्यतया मुक्तावपि साध्यत्वोपचारात्, योगक्षेमसाधारण्याः साध्यतायाः सम्भवाच्च।

किञ्च, सिद्धस्यैव ब्रह्मरूपमोक्षस्यासिद्धत्वभ्रमेण तत्त्वज्ञानरूपतत्साधने प्रवृत्त्युपपत्तेः। यथा-प्राप्तप्राप्तिपरिहृतपरिहारौ। तथाहि—हस्तगतविस्मृतसुवर्णादौ 'तव हस्ते सुवर्णम्' इति रज्जौ सर्पत्वभ्रमवतः 'नायं सर्पः' इति चाऽऽप्तवाक्यात्प्राप्तस्यैव प्राप्तिः परिहृतस्यैव सर्पत्वस्य परिहारस्तथा मुक्तावपि।

दर्पणव्याख्या

"नेह नानाऽस्ति" (काठके २।४।११) इति श्रुत्या बोधितबाधस्यापि जगतः प्रतिभासे अधिष्ठानसत्ताया एव नियामकत्वात् समस्तार्थप्रकाशकत्वोपपत्तिरप्रच्युतस्वरूपस्यैव ब्रह्मणो जगद्रूपेण विवर्त्तनादविकारित्वरूपोत्कृष्टधर्मावगतिश्च। अत्र च "तमेव भान्तमनुभाति सर्वम्" (काठके २।५।१५, मुण्डके २।२।१०) इत्याद्याः कूटस्थस्वरूपप्रतिपादिकाश्च श्रुतयः प्रमाणत्वेनानुसन्धेया इति भावः। अत्र भगवद्विषयकरतिभावस्य हेत्वलङ्कारोऽङ्गम् ॥ १ ॥

जगदुपादानत्वेन स्तुत्वा अपवर्गसाधनज्ञानविषयत्वेनैतच्छास्त्रव्याख्यातृशेषभूषणत्वेन च स्तुवञ्छेषोक्तसमस्तसिद्धान्तप्रतिपत्तये प्रार्थयते ❀ अशेषेति ❀। फलं प्रवृत्त्युद्देश्यम्। स्वर्गादियत्किञ्चित्फलदातृत्वस्य देवतान्तरसाधारण्यादाह ❀ अशेषेति ❀ तथाचापवर्गरूपफलस्याप्यशेषपदेन कुक्षीकृतत्वात् तद्दातृत्वस्यानन्यसाधारण्यात् प्रार्थ्यताऽवच्छेदकधर्मलाभः। तदेव विशदयति ❀ भवाब्धीति ❀ भव एवाब्धिरिति रूपकम्, अब्धीयग्राहादिसदृशकामलोभाद्याक्रान्त-

प्रभा

न्यायमते मुक्तिस्तु आत्यन्तिकदुःखध्वंसरूपा। ध्वंसे आत्यन्तिकत्वञ्च—स्वसमानाधिकरणदुःखासमानकालिकत्वरूपम्। नन्वेवं मोक्षस्य तत्त्वज्ञानसाध्यत्वानुपपत्तिरिति चेन्न, तत्त्वज्ञानेन मिथ्याज्ञानवासनानाशः, तन्नाशाच्च विशेषणाभावविधया वासनाविशिष्टरागादिदोषनाशः, तन्नाशे च धर्माधर्मरूपायाः प्रवृत्तेरभावः, तस्माच्च प्रारब्धकर्माधीनवर्तमानदेहान्यदेहसम्बन्धरूपजन्माभावः, तथा च भोगतत्त्वज्ञानाभ्यां प्रारब्धतद्भिन्नकर्मनिवृत्तिरिति जन्माभावे दुःखानुत्पादाद् आत्यन्तिकदुःखध्वंसः। नव्यनैयायिकास्तु आत्यन्तिकदुरितध्वंस एव मोक्षः। दुःखध्वंसस्य स्वोत्तरवर्तिगुणनाश्यतया तत्त्वज्ञानानुपयोगप्रसङ्गादित्याहुः। तथाचोक्तस्वरूपे तरणे तरिम्—तरन्त्यनयेति तरिस्तरणसाधनम्। यद्यपि तरिपदार्थघटकतरणस्य सन्निहिततरणपदेनैव लाभस्तथापि 'विशेषणवाचकपदसमवधाने विशिष्टवाचकपदानां विशेष्यमात्रपरता' इति न्यायेनात्र तरिपदस्य साधनमात्रपरत्वम्। तथा च तरिम्=मुक्तिसाधनतत्त्वज्ञानविषयमित्यर्थः।

शेषाशेषेति—अशेषस्सम्पूर्णो योऽर्थस्सोऽशेषार्थः। शेषः=पतञ्जलिः, शेषांशत्वात्, तस्य योऽशेषोऽर्थो वैयाकरणनिखिलसिद्धान्तस्तल्लाभाय शेषो भूषणमलङ्कारो यस्य तं शिवं शय्यात्वेन भूषणत्वाद् विष्णुं प्रार्थये=अभीष्टसिद्धये प्रवर्तये। एतेन शेषस्य शिवाधीनत्वप्रतीत्याऽवश्यमभीष्टलाभस्तत्प्रार्थनया भविष्यतीति सूचितमनिच्छतोऽपि दातुं स्वाम्यनुज्ञया दानस्य लोके दृष्टत्वादवश्यमखिलवैयाकरणसिद्धान्तलाभः स्यादित्याशयलाभात्, 'साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः' इति कुवलयानन्दलक्षितोऽत्र परिकराङ्कुरालङ्कारः॥ २॥

वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये॥

स्पष्टोऽर्थः। इदञ्च सर्वपुस्तकेषु नोपलभ्यते। अत एव टीकान्तरे न व्याख्यातम्। अत्रैतादृशविलक्षणसामर्थ्योपन्यासेन दीक्षितस्य देवांशत्वसूचनद्वारा तदीयस्तुतेरभीप्सितार्थसाधकत्वं समुचितत्वञ्च सूचितमिति काशिका॥

दर्पणव्याख्या

स्वाद् दुरवगाहत्वेन भवे तदारोपः। तेन च भवस्य दुस्तरत्वं व्यज्यते। तस्य तरणं पारदेशप्राप्तिस्तस्मिन्नित्यर्थः ❀ तरिम् ❀ साधनम्। यद्यपि तरन्त्यनया इति व्युत्पत्त्या तरणसाधनं तरिपदार्थस्तथाऽपि तदघटकीभूततरणस्य सन्निहितपदेनैव लाभाद् द्विरुक्तिर्मा भूदिति विशेष्यमात्रपरतया व्याख्यातम्। मुक्तिसाधनज्ञानविषयमिति यावत्। मुक्तिश्च वेदान्तिमतेऽज्ञाननिवृत्तिसमकालास्वरूपप्राप्तिः। नन्वज्ञाननिवृत्तेरधिकरणानतिरिक्तायाः स्वरूपस्यापि च सिद्धत्वात्तद्रूपायास्तस्यास्तत्त्वाज्ञानसाध्यत्वानुपपत्तिरिति चेन्न, परेषां प्रागभावस्येव सिद्धाया एवाज्ञाननिवृत्तेर्योगक्षेमसाधारण्याः साध्यतायाः सम्भवात्। अधिकमन्यतोऽवधेयम्।

नैयायिकास्तु—आत्यन्तिकदुःखध्वंसो मोक्षः। ध्वंसे आत्यन्तिकत्वञ्च—स्वसमानाधिकरणदुःखासमानकालिकत्वम्। अत्रैव तत्त्वज्ञानस्योपयोगः। विशेष्यांशस्य स्वासाधारणसामग्र्या एव सम्भवान्नित्यसुखाभिव्यक्तिर्वा स इत्याहुः।

❀ शेषाशेषेति ❀ कर्मधारयोत्तरपदः षष्ठीतत्पुरुषः। तस्य च लाभपदेन समासो लाभायेदमिति विग्रहे चतुर्थ्यन्तलाभपदस्यार्थपदेन सः। शेषः=पतञ्जलिः, शेषांशत्वात्तस्य। तथाच शेषोक्तभाष्यप्रतिपादितनिखिलसिद्धान्तज्ञानायेत्यर्थः। ❀ शेषभूषणमिति ❀ शेषोऽनन्तः, स भूषणं यस्येत्यर्थः। यतोऽस्य भूषणं शेषोऽतोऽस्य शेषोक्तसिद्धान्तलब्ध्यै प्रार्थनमिति साभिप्रायविशेष्यस्योपादानात्परिकराङ्कुरालङ्कारो ऽत्र भगवद्विषयकस्त्यङ्गम्॥ २॥

CC-0. Gurukul Kangri Collection, Haridwar. Digital Edition

पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुम्भाववाग्देवताम् ।
दुण्ढि गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥ ३ ॥

प्रभा

राजाज्ञायामपि मन्त्रिणोऽनिच्छायामिष्टसिद्धेरदर्शनात्, शब्दशास्त्रे पाणिन्यादिमुनित्रयस्य प्राधान्याच्च तन्नतिरूपं मङ्गलमाचरन् 'मातृदेवो भव', 'पितृदेवो भव' इत्यादिश्रुत्या पित्रोरपि देवतात्वेन पितरं विघ्नध्वंसपूर्वकमङ्गलप्रदत्वेन गणेशञ्च नमन् प्रवृत्तिप्रयोजकज्ञान (इदं मदिष्टसाधनं मत्कृतिसाध्यञ्च) जनकज्ञानविषयेषु विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम्। विनाऽनुबन्धं ग्रन्थादौ मङ्गलं नैव शस्यते ॥ १ ॥ चतुर्षु अनुबन्धेषु सम्बन्धाधिकारिविषयप्रयोजनरूपेषु विषयज्ञानाधीनज्ञानविषयतया सम्बन्धाद्यनुबन्धेषु विषयस्य प्राधान्येन विनेयानां ग्रन्थाध्ययनप्रवृत्तये वैयाकरणसिद्धान्तरूपं विषयं प्रदर्शयन्नाह—पाणिन्यादीति—आदिना पतञ्जलिकात्यायनयोर्ग्रहणम्। पाणिन्यादिमुनीन्, अभिधीयतेऽनयेत्यभिधा = नाम 'आतश्चोपसर्गे' (३—३—१०६) इति करणेऽङ्। रङ्गोजिभट्टोऽभिधा यस्येति रङ्गोजिभट्टाभिधं पितरम्, दुण्ढति = अन्विष्यति प्रतिबन्धकान् विनाशितुमिति दुण्ढिर्गणेशः। अन्वेषणार्थकाद्दुण्ढधातोरौणादिक इनिः। तञ्च प्रणम्येत्यर्थः। विनापि चशब्दं समुच्चयो द्योत्यते। पितरं विशिनष्टि—द्वैतेति—द्वाभ्याम् = जडत्वाजडत्वविरुद्धधर्माभ्यामितो ज्ञातो यश्चैतन्यरूपस्तत्र भवं द्वैतं विषयतासम्बन्धेन वर्तमानमज्ञानं भावरूपं मिथ्याज्ञानं तदेव ध्वान्तं तमः, तत्त्वाच्छादकत्वात्। 'एकमेवाद्वितीयं ब्रह्म', 'नेह नानाऽस्ति किञ्चन' इत्यादिश्रुत्या परमार्थदशायामधिष्ठानभूतस्य ब्रह्मण एव तात्त्विकत्वात्। यद्वा—द्वावित आश्रयत्वेन प्राप्त इति द्वीतो भेदः। अथवा लक्षणया द्विपदं द्वित्वपरम्, द्वित्वेऽपि समवायसम्बन्धेन द्वित्वस्यारोपेण द्वित्वस्यापि द्वित्वविशिष्टत्वात्। न च 'आदशतः संख्या संख्येये' इति कोशविरोधः, तद्वचनस्य शक्यार्थपरत्वेनादोषाद् द्वित्वविशिष्टस्यैव संख्येयत्वेन तदविरोधाच्च। यद्वा इधातोर्भावे क्ते इतम् = ज्ञानम्, द्वयोर्विरुद्धधर्मयोरितं द्वीतं संशयात्मकं ज्ञानं तदेव ध्वान्तं तस्य निवारणादिफलं यस्यास्ताम्। आदिना मोक्षस्य सज्ज्ञानस्य च संग्रहः।

दर्पणव्याख्या

प्रेक्षावत्प्रवृत्तये इतरग्रन्थेभ्यः स्वग्रन्थस्योत्कर्षं प्रदर्शयन्नेव दर्शनीयविषयप्रयोजनसम्बन्धाधिकारिणां मध्येऽवश्यप्रदर्शनीयविषयं दर्शयति ❀ पाणिन्यादीति ❀ पुम्भाववाग्देवतामिति पितुर्विशेषणम्। पुंसो भावो यस्या इति व्यधिकरणबहुव्रीहिपूर्वपदकः कर्मधारयो वाग्देवतापदेन। अथवा पुम्भावशब्दोऽर्श आद्यजन्तः। तथाचाऽऽविष्कृतपुंविग्रहां सरस्वतीमित्यर्थः। ❀ द्वैतध्वान्तेति ❀ द्वाभ्यां प्रकाराभ्यामितः = ज्ञातः = विरुद्धोभयधर्मप्रकारकज्ञानविषयो धर्मीति यावत्। यद्वा द्वयोर्भावो द्विता। स्वनिष्ठैकविशेष्यतानिरूपितप्रकारतासम्बन्धेन विरुद्धनानाधर्मांशे धर्मिणोऽपि भावत्वसम्भवाद् द्वितापदार्थोऽपि धर्म्येव, तत्र भवं द्वैतं संशयात्मकज्ञानम्। अथवा द्वयोरनेकस्य भावो द्विता नानात्वं तत्सम्बन्धिज्ञानं द्वैतम्, परमार्थदशायामद्वितीयस्यैव ब्रह्मणोऽङ्गीकारेण श्रुतिबाधितनानात्वावगाह्यन्तः करणवृत्तिविशेषरूपमविद्याऽपरपर्यायं मिथ्याज्ञानम्, तदेव ध्वान्तं तमः, तत्त्वाऽऽच्छादकत्वात्तन्निवारणमेकं मुख्यं फलं यस्यास्तामित्यर्थः। अनधिकारिणां स्वाश्रितानामेकतरकोटिकज्ञानोत्पादकत्वेनाधिकारिणां सन्मात्रावलम्बनज्ञानप्रदत्वेन

प्रभा

यत्तु—स्वनिष्ठैकविशेष्यतानिरूपितप्रकारतासम्बन्धेन विरुद्धनानाधर्मांशे धर्मिणो (सङ्ख्येयस्य) ऽपि भावत्व (प्रकृतिजन्यबोधे प्रकारीभूतत्व) सम्भवाद् द्वीतापदार्थोऽपि धर्म्येवेति दर्पणकारास्तच्चिन्त्यम्, प्रकृतिनिष्ठशक्तिज्ञानजन्योपस्थितीयशक्तिभास्यसम्बन्धावच्छिन्नप्रकारताश्रयस्यैव भावपदार्थत्वात् । अन्यथा यथाकथञ्चित्प्रकारतया भासमानस्य भावपदार्थत्वे घटपदोत्तरत्वादिप्रत्ययस्य द्रव्यत्व—गुणाद्यर्थकत्वापत्तेरिति पञ्चोलिनः । पुम्भावेति—पुंसो भावः=पुंस्त्वम् यस्याः सा पुंभावेति व्यधिकरणबहुव्रीह्युत्तरं वाग्देवताशब्देन कर्मधारयः । यद्वा पुम्भावशब्दोऽर्श आद्यजन्तः । अथवा पुंस्पदं लक्षणया पुंस्त्वपरम् । तथा च पुम्भावयते = प्राप्नोतीति प्राप्त्यर्थकचुरादिण्यन्तभाविधातोः 'कर्मण्यण्' इति कर्त्तरि अणि पुम्भावी सा चासौ वाग्देवता चेति कर्मधारयः । एवञ्च पुंशरीरधारिणी सरस्वती एव रङ्गोजिभट्ट इति लब्धम् । दुण्ढिमिति—प्रणम्येति पूर्वेणान्वयः । पित्रादिपश्चाद् गणेशनमस्कारस्यानौचित्याद् दुण्ढिं गणेशावतारं पितरमित्यर्थः । मङ्गलमूर्त्तित्वेन गणेशरूपत्वम्, वैदुष्येण सरस्वतीरूपत्वं तस्येति भावः ।

प्राचीनग्रन्थैरगतार्थत्वं सूचयन्नाह—गौतमेति—गोतमो ब्रह्मपुत्रस्तस्य गोत्रापत्यं गौतममुनिर्न्यायसूत्रकर्त्ता । जैमिनिः = पूर्वमीमांसासूत्रकर्त्ता व्यासशिष्यः । गौतमजैमिन्योरिमानि गौतमजैमिनीयानि यानि वचनानि न्यायसूत्रमीमांसासूत्ररूपाणि तेषां व्याख्यातारः, न्यायसूत्रभाष्यकर्त्ता वात्स्यायनः, तदुत्तरव्याख्यातारश्चानेके प्राचीननैयायिका नव्यनैयायिकाश्च । मीमांसासूत्रभाष्यकर्त्ता शबरस्वामी, तदुत्तरव्याख्यायकाश्च कुमारीलभट्टप्रभाकरादयः । अत्र 'तृजकाभ्याम्' (२-२-१५) इति समासनिषेधस्तु 'अशेषफलदातारम्' इत्यत्रेव परिहरणीयः । तैर्दूषितान् = दोषवत्त्वेन प्रदर्शितान् । एतेन गौतमजैमिनीयसूत्रसम्मता एव व्याकरणसिद्धान्ता न तु तद्विरुद्धा इति ध्वनितम् । कतिचिद्व्याकरणसिद्धान्तान् उपपत्तिभिः साधकप्रमाणरूपयुक्तिभिः प्रकटये = समर्थये । तेषां व्याख्यातॄणां दोषाधायकं वचो दूषये = बाधकयुक्तिभिर्निराचक्षे ।

दर्पणव्याख्या

पुम्भाववाग्देवतायास्तन्निवर्तकत्वमिति भावः । ❀ दुण्ढिम् ❀ गणपतिम् । प्रणम्येत्यनुषज्यते । ❀ सिद्धान्तानिति ❀ भाष्यकारादिनिर्णीतार्थाः सिद्धान्तास्तानित्यर्थः । ❀ उपपत्तिभिः ❀ साधकप्रमाणोपन्यासरूपाभिर्युक्तिभिरित्यर्थः । ❀ दूषये ❀ उपपत्तिभिरेव बाधकप्रमाणोपन्यासरूपाभिरित्यर्थः ।

एतेनान्यग्रन्थेभ्य स्वग्रन्थस्योत्कृष्टत्वं ध्वनितम् । तथाच वैयाकरणसिद्धान्तोऽत्र विषयः प्रदर्शितस्तेनैव तज्ज्ञानं प्रयोजनं प्रतिपाद्यप्रतिपादकभावः सम्बन्धः सिद्धान्तजिज्ञासुरधिकारीति त्रयोऽन्येऽपि दर्शितप्राया इति भावः । ग्रन्थादावनुष्ठितस्य मङ्गलस्य तन्निबन्धनस्य च प्रयोजनमाह ❀ प्रारिप्सितेत्यादिना ❀ समाप्तये इति विहाय 'प्रतिबन्धकोपशमनाय' इत्युक्तया अलौकिकाऽविगीतशिष्टाचारानुमितफलमङ्गलस्य विघ्नध्वंस एव फलम्, जन्मान्तरीयसमाप्तिमुद्दिश्य शिष्टानां मङ्गलाननुष्ठानान्मङ्गलसमाप्त्योः शरीरनिष्ठप्रत्यासत्त्यैव कार्यकारणभावस्य कल्पनीयतया तस्य च नास्तिकसमाप्तौ व्यभिचारेण समाप्तेस्तत्त्वासम्भवात्, किन्तु कार्यमात्रं प्रति प्रतिबन्धकाभावस्य हेतुतया दुरितरूपप्रतिबन्धकनिरासे एव मङ्गलस्योपयोगो न तु समाप्तावपि, विघ्नध्वंसेनान्यथासिद्धत्वात्, समाप्तिस्त्वन्यत्र क्लृप्ततत्कारणकलापादिति सूच्यते । ❀ फणिस्मरणेति ❀ फणी = शेषः । "शेषाख्यं धाम मामकम्" इति भगवदुक्तेस्तत्स्मरणस्य विघ्ननिवारकत्वात् । मङ्गलस्य नतिस्तुत्यादिभेदेन नानात्वमिति सूचयितुं स्मरणेत्युक्तम् । ❀ प्रतिजानीत इति ❀ प्रतिज्ञाफलं तु शिष्यावधानं बोध्यम् ।

नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ।
श्रीकौण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् ॥*

प्रारिप्सितप्रतिबन्धकोपशमनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवाऽर्थः सङ्क्षेपेणेह कथ्यते ॥ १ ॥

उद्धृत इति । अत्र 'अस्माभिः' इति शेषः । 'भाष्याब्धेः शब्दकौस्तुभ उद्धृतः' इत्यु-

प्रभा

एतेन वैयाकरणसिद्धान्ता विषयाः, तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधीतकौमुद्यादिग्रन्थोऽधिकारी, साध्यसाधनसम्बन्धश्चेत्यनुबन्धचतुष्टयं सूचितम् ।

स्वकीर्त्यनुवृत्तये मङ्गलस्य दार्ढ्याय च गणेशादिनमस्काररूपं मङ्गलमारचयति—नत्वेति । गणेशेति—गणानाम्=शिवगणानाम्=प्रमथादीनामीशः=नियन्तेत्यर्थः । यद्वा, गणानाम्=विघ्नगणानाम् ईम्=लक्ष्मीं श्यति=तनूकरोतीति गणेशः, 'आतोऽनुपसर्गे' (१३-२-३) इति कः । यद्वा, गणानाम्=भक्तगणानाम् इम्=कामाद्युद्वेगं श्यतीति गणेशः । इपदं क्रोधादिपञ्चानामुपलक्षणम् । गुरूनिति—गृणाति=उपदिशति रहस्यभूतमर्थमिति गुरुः । 'कृग्रोरुच्च' इत्यौणादिकेन क्रुप्रत्यये ऋवर्णस्योत्वे च साधुः ।

सरस्वतीमिति—सरः=उदकं प्रशस्तं तदस्त्यस्या इति सरस्वती । यद्वा, सरः=सरोवरम्=अमृतसरस्तदस्त्यस्या आश्रयत्वेनेति सरस्वती तां नत्वेत्यर्थः । कौण्डभट्टेति—न च

आत्मनाम गुरोर्नाम नामाऽतिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥ १ ॥

इतिस्मृतिविरोधात् स्वनामनिर्देशोऽयुक्त इति वाच्यम्, तस्य वैखरीवाग्विषयकत्वपरत्वेन लेखने तदविरोधात् । न चैवमपि लोकप्रत्ययाय 'रामो द्विर्नाभाषते' इति स्फुटोच्चारणपररामायणविरोधो दुर्वार इति वाच्यम्, 'गोनर्दीयस्त्वाह' इति शातातपोऽब्रवीत्' इत्यादिषु स्वनामग्रहणाद् 'मनुमेकाग्रमासीनम्' इत्यादिस्थले भृगुणा गुरोर्नामोक्तेश्च कर्त्तव्यार्थविषयकज्ञानानुकूलशब्दप्रयोगात्मकप्रतिज्ञावाक्यघटकतया, उत्कर्षकीर्त्यादिलाभप्रयोजकतया च स्वनामोच्चारणे दोषाभावबोधनात्, 'असौ नामाहमस्मीति स्वनाम परिकीर्तयेत्' इति मनूक्तेरभिवादे तदुच्चारणस्य प्रत्यवायाजनकत्वाच्च ।

वैयाकरणेति—भूष्यतेऽनेनेति भूषणम्, करणे ल्युट्, वैयाकरणानां भूषणं वैयाकरणभूषणम् । न चात्र 'उभयप्राप्तौ कर्मणि' (२-३-६) इति षष्ठी, तथाच 'उभयप्राप्तौ कर्मणि' इति या षष्ठी सा न समस्यते इत्यर्थकेन 'कर्मणि च' (२—२—१४) इति समासनिषेध इति वाच्यम्, 'उभयप्राप्तौ' इत्यस्य कर्त्तृकर्मवाचकयोरुभयोः प्रयोगे एव प्राप्तिग्रहणसामर्थ्यात् प्रवृत्त्याऽत्र 'कर्त्तृकर्मणोः कृति' (२-३-६५) इत्यनेनैव षष्ठीविधानात् । अत एव 'अथ शब्दानुशासनम्' इति भाष्यप्रयोगः सङ्गच्छते । * अयं श्लोको बहुषु पुस्तकेषु नोपलभ्यते ॥

प्रारिप्सितेति—प्रारम्भश्चात्र ग्रन्थघटकाद्यशब्दोच्चारणम् । सनर्थः=इच्छा, क्तप्रत्ययार्थो विषय-

दर्पणव्याख्या

उद्धरणकर्त्राकाङ्क्षायामाह * अस्माभिरिति मूले * कथ्यते इति * हर्यादिनिबद्धकारिकाभिरिति शेषः ॥ १ ॥

क्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय। अन्यथा तन्मूलकस्याऽस्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितासारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः। 'तत्र निर्णीत' इत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम् ॥ १ ॥

प्रभा

तावान्। तथाच प्रारम्भस्य विषयितासम्बन्धेनेच्छायाम्, तस्याश्च निरूपितत्वसम्बन्धेन विषयतायामन्वयं इति प्रारम्भनिष्ठविषयतानिरूपकेच्छानिरूपितविषयताश्रयस्य ग्रन्थस्य यानि प्रतिबन्धकानि=विघ्नादीनि तेषां व्यूहः=समूहस्तस्योपशमनायेत्यर्थः। एतेन स्थूलतत्तच्छरीरावच्छिन्नात्मनिष्ठप्रत्यासत्त्या विघ्नध्वंसं प्रत्येव मङ्गलस्य कारणत्वं सूचितम्। सूक्ष्मशरीरावच्छिन्नात्मनिष्ठप्रत्यासत्त्या तु न कारणत्वम्, जन्मान्तरविघ्नध्वंसोद्देशेनाऽपि जन्मान्तरे मङ्गलकरणापत्तेर्नास्तिकादिग्रन्थे व्यभिचाराच्च। समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापादेवेति न तत्र मङ्गलस्य हेतुत्वमित्यन्यत्र विस्तरः। स्मरणरूपमिति। न च—

आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम्।

इत्याद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् स्मरणस्य मङ्गलत्वाभाव इति वाच्यम्, वस्तुनिर्देशपदेन मङ्गलात्मकवस्तुज्ञानस्यैव विवक्षितत्वेन स्मरणस्याऽपि ज्ञानत्वेनाऽदोषात्, मङ्गलस्य न त्रिविधत्वमेव, किन्त्वनेकविधत्वमिति सूचनाय तदुक्तेश्च। उक्ताभियुक्तोक्तेश्चोपलक्षणत्वात्।

शिष्यशिक्षेति—शिष्या अपि स्वकर्तृकग्रन्थारम्भे मङ्गलं कुर्य्युरिति शिक्षायै इत्यर्थः। निबध्नन्निति—ग्रन्थघटकीकुर्वन्नित्यर्थः। प्रतिजानीत इति—अस्य भट्टोजिदीक्षित इति शेषः। कर्त्तव्यार्थविषयकज्ञानानुकूलवाक्योच्चारणरूपां प्रतिज्ञां करोतीत्यर्थः।

फणिभाषितेति—फणिना=पतञ्जलिना भाषितं यद्भाष्यम्, तच्च—

'सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥' इति।

तदेवाऽब्धिरिति रूपकम्। शब्दकौस्तुभ इति—कुम्=भुवं स्तुभ्नाति=व्याप्नोतीति कुस्तुभो विष्णुः, समुद्रो वा, तस्य तत्र भवो वा मणिः कौस्तुभः। तदुक्तम्—

'स कौस्तुभो महातेजाः सूर्यकोटिसमप्रभः'।' इति।

शब्दः कौस्तुभो यत्र स शब्दकौस्तुभो ग्रन्थः। एतेन तद्ग्रन्थस्य सर्वार्थप्रकाशकत्वं ध्वनितम्। उद्धृत इति—पृथक्कृतो निष्कासित इति वार्थः।

तत्रेति—शब्दकौस्तुभे इत्यर्थः। निर्णीत इति—प्रमाणैर्वस्तुतत्त्वावधारणं निर्णयस्तद्विषय इत्यर्थः। अर्थः=वैयाकरणसिद्धान्तभूतः प्रकृतिप्रत्ययाद्यर्थः। इह=कारिकावल्याम्। अस्माभिरिति—भट्टोजिदीक्षितैरित्यर्थः। अन्यथा=भाष्याब्धेरुद्धृत इति विशेषणाभावे। आधुनिकेति—व्याकरणप्रवर्तकाचार्यतात्पर्यानभिज्ञैराधुनिकैरित्यर्थः। एतेनाऽऽधुनिकानामपि प्रामाणिकार्थोपन्यासस्य निरासोऽनुचित इति शङ्का निरस्ता।

दर्पणव्याख्या

तत्र स्फोटस्यार्थबोधजनकत्वात् तेनैवाऽऽकाङ्क्षानिवृत्तेश्च वाक्यस्फोटस्य 'वाक्यस्फोटोऽतिनिष्कर्षे' इत्यादिना सिद्धान्तयिष्यमाणत्वेऽपि प्रतिवाक्यं सङ्केतग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनासुकरत्वाच्च तत्र कल्पनया पदानि विभज्य

SGDF

[अथ धात्वर्थनिर्णयः]

प्रतिज्ञातमाह—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ २ ॥

प्रभा

उत्प्रेक्षितेति—तर्कितेत्यर्थः । आधुनिकेति—आधुनिकेन भट्टोजिदीक्षितेनोत्प्रेक्षितः = तर्कितो यः शब्दकौस्तुभस्तस्याऽप्रामाणिकतयाऽस्य ग्रन्थस्याऽपि तत्सारत्वेनाऽप्रामाणिकत्वं मा भूदिति भाष्याब्धेरुद्धृत इति शब्दकौस्तुभस्य विशेषणम् । शब्दकौस्तुभस्य भाष्यमूलकतया तत्सारत्वेनाऽस्याऽपि प्रामाणिकत्वमेवेति भावः । पाणिनीयानाम् = पाणिनिशास्त्रविदाम् । अनुपादेयता = अस्वीकार्य्यता ।

निर्णीतार्थमाह—फलेति । वैयाकरणमते स्फोटस्यैव वाचकत्वम् । स्फोटश्च—स्फुटति = प्रकाशतेऽर्थोऽस्मादिति स्फोटोऽर्थवाचकः शब्दः । स चाऽष्टविधः, १—वर्णस्फोटः, २—पदस्फोटः, ३—वाक्यस्फोटः, ४—अखण्डपदस्फोटः, ५—अखण्डवाक्यस्फोटः, ६—वर्णजातिस्फोटः, ७—पदजातिस्फोटः, ८—वाक्यजातिस्फोटश्चेति । तत्र स्फोट एक एव शब्दात्मकब्रह्मरूपः । स च वर्णादिरूपव्यञ्जकभेदात् तत्तत्संज्ञां लभते ।

परन्तु वाक्यस्फोटस्यैव मुख्यवाचकत्वम् । अन्ये स्फोटाः शास्त्रीयकार्यनिर्वाहकाः । कल्पितान्वयव्यतिरेकाभ्यां कल्पितार्थवन्त एव । तत्र वाक्येषु पदकल्पना पदेषु प्रकृतिप्रत्ययादिकल्पनेति प्रकृतिस्फोटप्रत्ययस्फोटावेव वर्णस्फोटशब्देनोच्येते । 'उणादयो बहुलम्' (अ० ३ पा० ३ सू० १) इति सूत्रे 'नाम च धातुजमाह निरुक्ते' 'नाम खल्वपि धातुजमेवाहुः नैरुक्ताः ।' 'व्याकरणे शकटस्य च तोकम्' = अपत्यम्, वैयाकरणानां शाकटायन आह—'धातुजं नामेति' इति भाष्यादिप्रामाण्यात् प्रकृतिषु धातोः प्राधान्यादादौ धातूनां तत्प्रकृतिकतिङाञ्चाऽर्थमाह—

फलव्यापारयोरिति—वाचकत्वरूपविषयत्वं सप्तम्यर्थः । एवम् 'आश्रये' इत्यत्राऽपि तदेव सप्तम्यर्थः; तथा च विभक्त्यर्थे फलस्याऽऽश्रयस्य च निरूपितत्वसम्बन्धेनान्वयः । वाचकत्वस्य च स्वरूप (आश्रयता) सम्बन्धेन धातौ तिङि चान्वयः । एवञ्च फलनिरूपितवाचकतावान् धातुः, आश्रयनिरूपितवाचकतावन्तश्च तिङ इति पूर्वार्धार्थः ।

फलव्यापारयोरिति द्विवचनेन फलनिरूपिता व्यापारनिरूपिता च धातोः पृथक्शक्तिरिति, 'एकवृन्तगतफलद्वय'न्यायेन पृथगुपस्थितिप्रयोजिका खण्डश एकैव शक्तिरिति वा सूचितम् । अत एव फले स्तोकादिरूपकर्मणोऽभेदेन ग्रामादिकर्मणश्च भेदसम्बन्धेनाऽन्वयः । फलविशिष्टव्यापारे शक्तौ तु फलस्य पदार्थैकदेशत्वेन तत्र 'पदार्थः पदार्थेनाऽन्वेति न तु पदार्थैकदेशेन' इति न्यायविरोधात् कर्माद्यनन्वयापत्तिः । तन्न्यायास्वीकारे तु 'नित्यो घटः' इत्याद्यापत्तिः, तन्न्यायस्य प्रायिकत्वस्वीकारस्त्वगतिकगतिः । न च विभिन्नपदजोपस्थितयोरेवाऽकाङ्क्षाभास्यसम्बन्धेनान्वयात् फलव्यापारयोः परस्परमनन्वयापत्तिः, तादृशनियमासिद्धेः ।

दर्पणव्याख्या

तेष्वपि प्रकृतिप्रत्ययभागांस्तथैव प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थेष्वपि प्रकृतिप्रत्ययानामनादिसङ्केतबोधनद्वारा साधुत्वान्वाख्यायके महर्षिप्रणीते शास्त्रे प्रक्रियानिर्वाहाय पदवर्णस्फोटावपि सम्मताविति दर्शयँस्तिङन्तार्थप्रधाने सुप्तिङ्चयादिरूपे वाक्ये धात्वर्थस्य प्राधान्यात्तमेवादौ निरूपयितुमाह मूले ❀ फलव्यापारयोरिति ❀ तत्र धातुरित्यस्य

SGDF

प्रभा

न चैवं हरिशब्देनोपस्थितेन्द्राश्वयोराधाराधेयभावसम्बन्धेनान्वयापत्तिः, 'सकृदुच्चरित'न्यायेन हरिशब्देन युगपदुभयविषयकस्याऽभिधया शाब्दबोधस्याऽसम्भवात्। न च तिङा युगपत्कर्तृकालादीनां बोधानुपपत्तिः, विभिन्नशक्त्योपस्थितावेव 'सकृदुच्चरित'न्यायप्रवृत्तेः। तिङश्चैकवृन्तगतफलद्वयादिन्यायेन खण्डश उपस्थापकैकशक्तेरेवाऽभ्युपगमात्। न चैवं विद्वन्मानसेत्यादौ मनःसरोवरयोर्युगपद्बोधानापत्तिः, व्यञ्जनया तत्र द्वितीयार्थस्य बोधात्।

यद्वा, न्यायमते लिङ्पदोपस्थितयोः कृतीष्टसाधनत्वयोस्तिङ्पदोपस्थितयोः कृति-वर्तमानयोश्च परस्परान्वयदर्शनेन संकोचऽऽस्यावश्यकत्वेन धातुतिङादिभिन्नं यदेकपदं तदुपस्थितयोरेव परस्परमनन्वयस्य तद्व्युत्पत्तिविषयत्वात्। अत एव व्युत्पत्तिवादे 'अनायत्त्या फलव्यापारयोः खण्डशक्तिद्वयमेव धातोः स्वीकरणीयम्' इत्युक्तम्।

न च संयोगरूपे फले भेदान्वयाभिप्रायेण 'गमनं न स्पन्दः' इति वाक्यस्य प्रामाण्यापत्तिरिति वाच्यम्, अन्तरङ्गत्वाद् युगपदुपस्थितयोः फलव्यापारयोरन्वयानन्तरमेव तत्र पदार्थान्तरस्याऽन्वययोग्यतया 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायविरोधेन फले भेदान्वयानौचित्यात्। न चैवं फले स्तोकादीनां कर्मादीनाञ्चान्वयानुपपत्तिरिति वाच्यम्, 'क्रियाविशेषणानां कर्मत्वम्' इत्यभियुक्तोक्तेः, फलाश्रयस्य कर्मसंज्ञाविधानाच्च तेषामन्वये बाधकाभावात्।

नागोजिभट्टास्तु—फलविशिष्टव्यापारे, व्यापारविशिष्टफले च धातूनां शक्तिः। फले व्यापारे च पृथक्शक्तिस्वीकारे व्यापारोद्देश्यकफलविधेयकस्य फलोद्देश्यकव्यापारविधेयकस्य च बोधस्याऽऽपत्तिः, उद्देश्यविधेयभावेनाऽन्वयप्रयोजिकायाः पृथगुपस्थितेः सत्त्वात्।

विशिष्टवाचकत्वमते तु न दोषः, पृथगुपस्थितेरसत्त्वात्। न च पृथगुपस्थितेरुद्देश्यविधेयभावेनाऽन्वयप्रयोजकत्वे मानाभावः, घटादिपदोपस्थितयोर्घटत्वघटाद्योस्तथान्वयाभावदर्शनस्यैव मानत्वात्। न च धातुजफलव्यापारोपस्थित्योस्तादृशबोधे परस्परं प्रतिबन्ध्यप्रतिबन्धकभावकल्पनान्न दोष इति वाच्यम्, तत्कल्पनायां गौरवापत्तेः। न च विशिष्टद्वये शक्तिद्वयस्य गुरुभूतधर्मद्वये शक्यतावच्छेदकत्वस्य व्यापारविशेष्यकबोधे कर्तृप्रत्ययसमभिव्याहारे, फलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहारे च कारणत्वस्य, उपस्थितिद्वये द्विविधबोधम्प्रति हेतुत्वस्य च स्वीकारेऽतिगौरवमिति वाच्यम्, प्रामाणिकगौरवस्याऽदोषत्वात्।

पृथक्शक्तिवादेऽपि विभिन्नपदोपस्थितयोरेव परस्परान्वय इति व्युत्पत्तित्यागस्य धात्वर्थविषयकबोधे व्युत्पत्त्यन्तरस्य च कल्पने गौरवम्। किञ्च, व्यापारविशेष्यकबोधं प्रति कर्तृप्रत्ययसमभिव्याहृतधातुजशक्तेः, फलविशेष्यकबोधं प्रति कर्मप्रत्ययसमभिव्याहृतधातुशक्तेश्च हेतुत्वाङ्गीकारः, शक्तिद्वयमुपस्थितिद्वयञ्च कल्पनीयमित्यतिगौरवम्।

न च नव्यमतेऽपि विशिष्टविषयकोपस्थितिद्वयस्य तादृशबोधद्वये कारणतया विशिष्टे शक्तिद्वयस्य कल्पनया च साम्यमिति वाच्यम्, विषयासम्बद्धे बोधजनकत्वान्यथानुपपत्त्या तत्तत्प्रत्ययसमभिव्याहृतधातौ

दर्पणव्याख्या

'स्मृताः' इति न विशेषणम्, विभिन्नवचनान्तोपस्थापितत्वात्। विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमात्। अत एव नीलो घटा इत्यादेर्न साधुत्वम्।

SGDF

धातुरित्यत्र स्मृत इति वचनविपरिणामेनाऽन्वयः ।

प्रभा

विशिष्टद्वयनिरूपितसम्बन्धद्वयस्य कल्पनीयतया गौरवाधिक्यस्य सुस्पष्टत्वात् । अन्यथा शक्तेर्वैफल्यम् । एवमन्यत्राऽपि पृथक्शक्तिकल्पना निरसनीयेत्याहुः ।

वस्तुतस्तु फले व्यापारे च खण्डशः शक्तिरिति प्राचीनमतमेव न्यायः, उद्देश्यविधेयभावेनान्वयनियामकव्युत्पत्तौ धातुभिन्नत्वस्य विशेषणदानेनादोषात् । तद्भिन्नत्वनिवेशे च फलोद्देश्यकेत्यादिपूर्वोक्तबोधम्प्रति नव्योक्तप्रतिबन्ध्यप्रतिबन्धकभावकल्पनागौरवाभावः ।

यत्तु, नव्येनोक्तम्—व्यापारविशेष्यकबोधं प्रति कर्त्तृप्रत्ययसमभिव्याहारः, फलविशेष्यकबोधं प्रति कर्मप्रत्ययसमभिव्याहारश्च कारणमिति पृथक्शक्तिवादिनाऽपि वक्तव्यमिति, तन्न; प्राचीनमते कर्त्तृकर्मप्रत्ययोभयसमभिव्याहारे व्यापारविशेष्यकबोधस्यैव तत्सम्मतत्वेन तादृशसमभिव्याहारस्य कारणत्वाकल्पनात् । किञ्च, विशिष्टे शक्तिस्वीकारे गुरुभूतस्य फलविशिष्टव्यापारत्वस्य व्यापारविशिष्टफलत्वस्य च शक्यतावच्छेदकत्वमिति गौरवं दुर्वारम् ।

प्राचीननये तु व्यापारत्वं फलत्वञ्च शक्यतावच्छेदकमिति न तद्दोषः । किञ्च, व्यापारविशेष्यकशाब्दं प्रति फलविशिष्टव्यापारविशेष्यकोपस्थितेः फलनिष्ठप्रकारतानिरूपितव्यापारनिष्ठविशेष्यतानिरूपकत्वेन व्यापारनिष्ठविशेष्यतानिरूपितफलनिष्ठप्रकारतानिरूपकत्वेन च विनिगमनाविरहात् कारणत्वकल्पने महद् गौरवम् । एवं फलविशिष्टव्यापारविषयकशक्तिज्ञाननिष्ठकारणतानिरूपितफलविशिष्टव्यापारविषयकोपस्थितिनिष्ठकार्यतायाः व्यापारनिष्ठविशेष्यतानिरूपितफलनिष्ठप्रकारतानिरूपकोपस्थितित्वस्य फलनिष्ठप्रकारतानिरूपितव्यापारनिष्ठविशेष्यतानिरूपकोपस्थितित्वस्य चाऽवच्छेदकतायाः विनिगमनाविरहेण स्वीकारे गौरवमपि नव्यानामापततीत्याद्युह्यमित्याहुः ।

एतेन विशिष्टव्यापारे व्यापारविशिष्टफले एव धातोः शक्तिरिति वदन्तः काशिकाकाराः परास्ता इति गुरवः ।

ननु धातुरित्यत्र 'स्मृताः' –इति विशेषणमनुपपन्नम्, सम्बन्धानवच्छिन्नविशेष्यविशेषणभावसम्बन्धावच्छिन्न (अभेदेन) यत्किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति विशेष्य-

दर्पणव्याख्या

तद्विवक्षायां तु 'वेदाः प्रमाणम्' 'जात्याकृतिव्यक्तयः पदार्थः' (न्यायसूत्रे–२।२।१८) इत्यादौ विभिन्नवचनत्वमपि । न च प्रकृते तद्विवक्षायां बीजमस्तीत्यतो वचनविपरिणामेनान्वयं दर्शयति भूषणसारे ❀ धातुरित्यत्रेति ❀

ननु यदुद्देशेन श्रुतेर्लोकतो वा प्रवृत्तिरवगता तत्त्वं फलत्वम् = अन्येच्छानधीनेच्छाविषयत्वमिति यावत् । यदुक्तं हरिणा—

यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम् ॥ इति ॥

'स्वरितञितः' (पा० सू० १।३।७२) इति सूत्रेऽपि फलपदस्य प्रवृत्युद्देश्यमुख्यफले एव प्रसिद्धेः । तथाच तादृशफलस्य धातुवाच्यत्वे विक्लित्यनुकूलव्यापारदशायां तण्डुलस्य धात्वर्थतादृशफलाश्रयत्वाभावात् कर्मत्वानुपपत्तिस्तज्जन्य-

SGDF

फलम्=विक्लित्त्यादि ।

प्रभा

वाचकप्रकृत्युत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्याया यत्र विशेषणवाचकप्रकृत्युत्तरविभक्त्याऽविवक्षितत्वं तत्र समानवचनकत्वनियमादाह—वचनेति। विशेष्यवाचकोत्तरविभक्त्या सङ्ख्याया विवक्षायान्तु 'वेदाः प्रमाणम्' इत्यादौ विभिन्नवचनकमपि साधु। प्रकृते तु विशेष्यवाचकधातूत्तरविभक्त्या धातूनां बहुत्वात् सङ्ख्याया अविवक्षितत्वात् समानवचनकत्वस्यावश्यकतया स्मृता इत्यस्य स्मृत इत्येकवचनान्तत्वं परिकल्प्यान्वयः कार्यः। अर्थवशाद् विभक्तेर्विपरिणाम इति शिष्टोक्तेरित्याह—वचनविपरिणामेनेति।

फलमिति—यदुद्दिश्य धात्वर्थक्रियायाम्प्रवृत्तिस्तत्फलम् 'स्वरितञितः' इति सूत्रे क्रियाफलम्। यथा स्वर्गमुद्दिश्य यागो विधीयते। तत्र स्वर्गरूपं फलं यदि कर्त्ता अभिप्रैति तदा आत्मनेपदम्। एवं भविष्यद्धान्यमुद्दिश्य वपिर्विधीयते इति भविष्यद्धान्यं वपेः फलं यदि कर्तृगामि तदा आत्मनेपदम्। तथा भोजनमुद्दिश्य पाको विधीयते इति पाकफलस्य भोजनस्य कर्तृगामित्वे आत्मनेपदम्। न हि द्रव्यलाभादि यागादेः फलम्, द्रव्यलाभस्य कार्यान्तरेणापि सम्भवात्।

तदुक्तम्—'स्वरितञितः' (अ० १ पा० ३ सू० ७२) इति भाष्ये साधीयो यत्र क्रियाफलं कर्त्तारमभिप्रैति। न चान्तरेण यजिं यजिफलं वपिं वा वपिफलं लभन्ते। याजिकाः पुनरन्तरेणापि यजिं गा लभन्ते, भृतकाश्च पादिकम्' इति। हरिणाप्युक्तम्—'यस्यार्थस्य प्रसिद्ध्यर्थमारभन्ते पचादयः। तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम्'॥ इति। यागस्य स्वर्गविशेषरूपं वपेर्धान्यविशेषरूपं पाकस्य भोजनविशेषरूपञ्च फलं नान्यतः कर्त्ता लभेत्। तादृशफलस्येह ग्रहणे तु सकर्मकाकर्मकत्वव्यवस्था उच्छिद्येत। धात्वर्थफलाश्रयस्यैव कर्मत्वविधानादित्याह—फलम्=विक्लित्त्यादीति—विक्लित्तिः = रूपान्तरम्=अवयवसंयोगविशेषस्तद्विभागविशेषश्च। धात्वर्थफलस्य च विक्लित्तित्वादितत्तद्रूपेण वाच्यता न तु फलत्वेन, तथैवानुभवात्।

फलत्वञ्चात्र न अन्येच्छानधीनेच्छाविषयत्वरूपम्, तस्य सुखादावेव सत्त्वेनात्र तद्बाधात् तत्साधनत्वात् तदारोपेण फलत्वे तु व्यापारादीनामपि फलत्वापत्तिरिति धातुनिष्ठवृत्तिविशिष्टत्वमत्र फलत्वम्। वैशिष्ट्यञ्च - स्वज्ञानजन्योपस्थितिविषयत्व-स्वज्ञानजन्योपस्थितिविषयव्यापारविशिष्टत्वैतदुभयसम्बन्धेन। व्यापारविशिष्टत्वञ्च-स्वजन्यत्वप्रकारकप्रतीतिविषयत्व-स्वप्रयोज्यत्वप्रकारकप्रतीतिविषयत्वैतदन्यतरसम्बन्धेन।

एवञ्च सत्तारूपफले वारिधात्वर्थे संयोगानुकूलव्यापाराभावरूपफले च नाव्याप्तिः, तत्र जन्यत्वाभावेऽपि स्वरूपसम्बन्धत्वरूपप्रयोज्यत्वस्य सत्त्वेनाऽदोषात्। यत्तु, आरोपितजन्यत्वस्य सत्तादावपि सत्त्वेन सम्बन्धघटकवैशिष्ट्यनिवेशो व्यर्थ इति, तन्न 'जन्यत्वाभाववती सत्ता' इति बाधस्य सत्त्वेन आहार्यारोपस्यैव तत्र वक्तव्यतया तत्प्रतीतये व्यञ्जनावृत्तिस्वीकारे गौरवापत्तेः। आद्यसम्बन्धनिवेशाद्विभागस्य न गमधातुफलत्वम्। द्वितीयसम्बन्धनिवेशाद् व्यापारस्य न तत्त्वम्। फलविशिष्टव्यापारे शक्तिरिति मतेऽपीदमेव धात्वर्थफललक्षणं बोध्यम्। यद्वा, कर्तृप्रत्ययसमभिव्याहारे तद्धातुजन्यशाब्दबोधीयधात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे सति तद्धातु-

दर्पणव्याख्या

तादृशफलाश्रयस्य तदापत्तिश्चेत्यत आह—❀ फलम्=विक्लित्त्यादीति ❀ अयमाशयः—फलपदस्य लोके रूढ्या तादृशार्थोपस्थापकत्वेऽप्यत्र पारिभाषिकार्थपरतैव। अन्यथा सकर्मकत्वादिव्यवहारो दुरुपपादः स्यादिति। तत्त्वञ्च तद्धात्वर्थज-

SGDF

व्यापारस्तु भावनाभिधा=साध्यत्वेनाऽभिधीयमाना क्रिया ।

प्रभा

वाच्यत्वम्=फलत्वम् इति न सत्तादावव्याप्तिः । व्यापारस्त्विति—धातुवाच्यव्यापारस्त्वित्यर्थः, भावप्रत्ययवाच्यक्रियायाः साध्यत्वेनाऽभिधीयमानत्वाभावात् । तत्र क्रियात्वस्य

'सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ।

इति कारिकोक्तस्य निखिलवैयाकरणपरिगृहीतत्वात् ।

किञ्च, साध्यस्यैव क्रियात्वे क्रिया द्विविधा—सिद्धरूपा साध्यरूपा चेति विभागानुपपत्तिः । एवञ्च द्विविधक्रियासाधारणं क्रियात्वं किमिति चेत्तत्रेदं गृहाण—गुणत्वानाश्रयत्वे सति विभागासमवायिकारणत्वं क्रियात्वम् । विभागजविभागस्य संयोगजसंयोगस्य चाङ्गीकारे विभागजनकविभागे संयोगजनकसंयोगे चाऽतिव्याप्तिवारणाय गुणत्वानाश्रयत्वे सतीति । विभागसंयोगयोश्च गुणत्वाश्रयत्वान्नाऽतिव्याप्तिः । एतच्च लक्षणं साध्यसिद्धोभयक्रियासाधारणम् । व्यापारपदशक्यतावच्छेदकधर्मत्वं वा क्रियात्वम् । तच्च स्पन्दयत्नोभयनिष्ठम् । यद्वा—तज्जन्यत्वे सति तज्जन्यजनकत्वम् । तथाहि—'पचति', 'पाकः' उभयत्रापि कर्तृजन्यत्वस्य कर्तृजन्यविक्लित्तिजनकत्वस्य च साध्यरूपक्रियायां सिद्धरूपक्रियायाञ्च सत्त्वेन लक्षणसमन्वयः । जनकत्वञ्चाऽत्र जनकत्वेन प्रतीतत्वम् । तेन साक्षाद्विक्लित्तिजनकान्तिमाग्निसंयोगदशायामेव पचतीति प्रयोगः स्यात्, न त्वधिश्रयणादिदशायामित्यपास्तम् । जनकत्वेन प्रतीतत्वस्य अधिश्रयणादावपि सत्त्वात् । यत्त्वत्र दर्पणकाराः—किञ्च, प्रयोजकत्वं यदि साक्षाज्जनकत्वं तदा 'पचति' इत्यादौ कर्तृव्यापारस्य धात्वर्थत्वानुपपत्तिः, तस्य करणव्यापारद्वारैव फलजनकत्वात् । यदि जनकाजनकसाधारणम्, तदा तण्डुलक्रयणस्याऽपि फलप्रयोजकक्रियात्वात् तद्दशायामपि देवदत्तादौ 'पचति' इति प्रयोगापत्तिः, इति, तन्न; व्यापारसामान्यस्य लक्षणप्रसङ्गे धात्ववाच्यव्यापारेऽपि तल्लक्षणसत्त्वे दोषाभावात् । यदपि जनकाजनकसाधारणस्य धातुवाच्यत्वे तण्डुलक्रयणादेरपि पच्यादिधातुत्वापत्तिरिति, तदपि न, बुद्धिविषयत्वोपलक्षिताधिश्रयणाद्यधःश्रयणान्तेष्वेव शक्तिस्वीकारेण क्रयणादेः परम्परया फलजनकत्वेऽपि तदानीं पचतीति प्रयोगाप्राप्तेरिति पञ्चोलिनः ।

अत्र जन्यत्वमुत्पत्त्याश्रयत्वरूपं परिपाल्यत्वरूपञ्चेति । तेन 'आत्माऽस्ति' इत्यादावस्त्यर्थस्य आत्म-

दर्पणव्याख्या

न्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वम्, तद्धात्वर्थत्वं वा । जन्यत्वं च जन्यत्वप्रकारकप्रतीतिविषयत्वम् । तेन सत्तादौ नाप्रसङ्गः । गम्याद्यर्थव्यापारजन्यविभागादावतिप्रसङ्गवारणाय विशेष्यम्, तदर्थव्यापारेऽतिप्रसक्तिनिरासाय च सत्यन्तम् । तच्च विक्लित्यादीनामक्षतम्, तस्यापि प्रकृतपच्यादिशक्यता तत्तद्रूपेणैव, तथाबोधस्य सर्वानुभवसिद्धत्वात्, धातुत्वादिकमजानतोऽपि तद्बोधाच्चेति भावः ।

परे तु कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम् । जन्यता चाऽऽरोपिताऽनारोपिता वेत्यन्यदेतत् । विभागजन्यसंयोगादिरूपे पतत्यर्थे विभागसंयोगयोः फलत्ववारणायोभयम् । कर्माख्याते फलस्य विशेष्यतयैव भानात्तत्रातिप्रसङ्गवारणाय कर्तृप्रत्ययसमभिव्याहार इति वदन्ति, तच्चिन्त्यम्, अनुगतफलत्वानिरुक्तेः । विभागजन्यसंयोगे (निरवयवत्वात्प्रत्यक्षत्वात्) पतत्यर्थत्वाभावस्य वक्ष्यमाणतया व्यावर्त्याऽप्रसिद्धेश्चेत्यधिकमग्रे वक्ष्यते ।

Sri Gargeshwari Digital Foundation

उक्तञ्च वाक्यपदीये—

'यावत् सिद्धमसिद्धं वा साध्यत्वेनाऽभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यऽभिधीयते ॥' इति ॥

न च साध्यत्वेनाऽभिधाने मानाभावः, 'पचति, पाकः, करोति, कृतिः' इत्यादौ धात्वर्था-

प्रभा

धारणरूपसत्तानुकूलव्यापारस्य जन्यत्वाभावेऽपि न क्षतिः । अत्रात्मधारणञ्च—स्ववृत्त्यत्यन्ताभावाप्रतियोगित्वरूपकालसम्बन्धरूपम्, सत्तारूपजात्यात्मकं स्वरूपाश्रयत्वरूपं वा । आत्मनः कालवृत्त्यत्यन्ताभावाप्रतियोगित्वात् कस्मिंश्चिदपि काले आत्मा नास्तीत्यस्य वक्तुमशक्यत्वात् । तदनुकूलव्यापारश्च तादृशात्यन्ताभावप्रतियोगित्वप्रागभावपरिपालनरूप एव । 'देवदत्तोऽस्ति' इत्यादौ च तत्तत्कालवृत्त्यत्यन्ताभावाप्रतियोगित्वरूप एव कालसम्बन्धः । उक्तञ्च वाक्यपदीपे 'असौ 'अस्धातौ' आत्मीयग्रहरूपेण साधनानां प्रवृत्तिः' इति का० ३ । भावनेति—उत्पत्त्यर्थकभवतेर्ण्यन्ताद् भावे युचि भावनेति सिद्धम् । अभिदधाति = फलं जनयति साध्यत्वेनाभिधीयते इति वा अभिधा । आद्ये 'आतश्चोपसर्गे इति कर्त्तरि कः । अन्त्ये तादृशानुपूर्वीमता सूत्रान्तरेण कर्मण्यङ् । तथाच भावना अभिधा नामिका साध्यत्वेनाभिधीयमाना क्रिया व्यापार इत्यर्थ इति काशिकाकारः ।

साध्यत्वेनाभिधीयमानेति—'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया । तदर्थश्च प्रकारीत्वम् । यथा विषयनिष्ठा विषयता त्रिविधा, प्रकारता, विशेष्यता, संसर्गता चेति । एवं विषयि (ज्ञान) निष्ठा विषयिताऽपि त्रिविधा-प्रकारिता, विशेष्यिता, संसर्गिता चेति । प्रकारितादिश्च विषयनिष्ठप्रकारतादिनिरूपिता । यथा प्रकारतानिरूपिता प्रकारिता, विशेष्यतानिरूपिता विशेष्यिता, संसर्गतानिरूपिता संसर्गिता चेति । साध्यत्वस्य निरूपितत्वसम्बन्धेन प्रकारितायां तस्याश्च स्वरूपसम्बन्धेन प्रतीतिरूपाभिधानपदार्थेऽन्वयः । अभिधीयमानेत्यत्र कर्मप्रत्ययार्थो विशेष्यता । तथा च साध्यत्वनिरूपितप्रकारितावत् प्रतीतिविशेष्यत्वं क्रियात्वं फलितम् ।

दर्पणव्याख्या

ननु व्यापारत्वं न फलप्रयोजकक्रियात्वम्, आत्माश्रयात्, क्रियात्वस्यैव हि तत्त्वाद्, दण्डादिव्यापारस्यापि धात्वर्थत्वापत्तेश्च । नचेष्टापत्तिः, धात्वर्थव्यापाराश्रयस्यैव कर्तृताया वक्ष्यमाणतया तदाश्रयस्य दण्डादेः कर्त्तुराख्यातेनाभिधानाद् 'दण्डेन देवदत्तः पचति' इत्यादौ दण्डादिपदोत्तरं तृतीयाऽनापत्तेः, प्रथमापत्तेश्च । कर्तृकरणसंज्ञयोराकडारीयतया संज्ञाद्वयसमावेशासम्भवेनाभिमतकरणसंज्ञायाः परया कर्तृसंज्ञया बाधात् । किञ्च, प्रयोजकत्वं यदि साक्षाज्जनकत्वं, तदा 'पचति' इत्यादौ कर्तृव्यापारस्य धात्वर्थत्वानापत्तिः, तस्य करणव्यापारद्वारैव फलजनकत्वात् । यदि जनकाजनकसाधारणं तदा तण्डुलक्रयणस्यापि फलप्रयोजकक्रियात्वात् तद्दशायामपि देवदत्तादौ 'पचति' इति प्रयोगापत्तिः, तण्डुलादिक्रयणादिव्यावृत्तस्य तादृशप्रयोजकत्वस्य निर्वक्तुमशक्यत्वाच्च । अत एव न तज्जन्यत्वे सति तज्जन्यजनकत्वरूपं तन्त्रान्तरप्रसिद्धं तत् । तदवच्छिन्नस्य धातुवाच्यत्वे साक्षाद्विक्लित्तिजनकान्तिमाग्निसंयोगदशायामेव 'पचति' इति प्रयोगः स्यान्नत्वधिश्रयणादिदशायामपि, तेषामन्तिमाग्निसंयोगेनान्यथासिद्धतया विक्लित्त्यजनकत्वादित्यत आह ❀ व्यापारस्त्विति ❀ ।

साध्यत्वेनेति विशेषणे तृतीया । तथाच पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकाऽभिधानविषयत्वं व्यापारत्वमित्यर्थः । अभिधानस्य प्रकारतावत्त्वं विषयतानिरूपकत्वं चौपचारिकम् । तादृशसाध्यत्वप्रकारकप्रतीतिविषयत्वमिति

वगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्। तथा च क्रियान्तरा-

प्रभा

यावदिति। सिद्धम्=भूतकालावच्छिन्नम्, 'अपाक्षीत्' इत्यादौ। असिद्धम्=भूतकालानवच्छिन्नम्=वर्तमानकालावच्छिन्नं भविष्यत्कालावच्छिन्नञ्च, यथा 'पचति' 'पक्ष्यति' इत्यादिस्थले। यावत्साध्यत्वेनाभिधीयते सा आश्रितक्रमरूपत्वात्—आश्रितमधिश्रयणाद्यवयवानां क्रमरूपं पौर्वापर्यं यया सा आश्रितक्रमरूपा तत्त्वात्। क्रियतेऽवयवानां क्रमेणोत्पत्त्या या सा क्रियेत्यन्वर्था संज्ञेत्यर्थः। यत्र चास्त्यादौ पौर्वापर्याभावस्तत्राप्यारोपेण रूढ्या वा क्रियात्वं बोध्यम्।

साध्यत्वेनेति—प्रकारित्वं तृतीयार्थः। अभिधीयते=प्रत्याय्यते। तथा च साध्यत्वप्रकारकप्रतीतिविषय इत्यर्थः। साध्यत्वञ्चानुपदमेव वक्ष्यते। पचतीति—'पचति' 'करोति' इत्यादितिङन्तस्थले 'किम्' 'कः' 'क्व' इत्यादिसाधनाकाङ्क्षासत्त्वेऽपि अन्यक्रियाविषयिकाकाङ्क्षा नोदेति इति साध्यरूपत्वं क्रियायाः। 'पाकः' 'कृतिः' इत्यादौ 'अस्ति' 'भविष्यति' 'नङ्क्ष्यति' इत्यादिक्रियान्तराकाङ्क्षा जायते।

ननु 'पाकः' इत्यादिस्थलेऽपि किंकर्तृकः किंकर्मकः पाक इत्याद्याकाङ्क्षायाः, तत्र कर्त्रादिकारकाणामन्वयस्य चानुपपत्तिः, साध्यक्रियायामेव तदन्वयस्य सिद्धान्तसिद्धत्वादिति चेन्न, घञन्तादावपि प्रकृत्या साध्यरूपक्रियाया एवोपस्थितेः। तदुक्तम्—

'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥' इति।

अत एव स्तोकस्य साध्यविशेषणत्वे 'स्तोकं पाकः' सिद्धविशेषणत्वे 'स्तोकः पाकः' इत्युभयं सिध्यति। न च पाक इत्यादौ साध्यसिद्धक्रिययोरन्वयानुपपत्तिः, न चाभेदेनान्वयः, सिद्धसाध्ययोरभेदस्य दुरुपपादत्वादिति वाच्यम्, स्ववृत्तिक्रियात्वरूपसामान्यधर्मवत्त्वेनान्वये बाधकाभावात्।

दर्पणव्याख्या

यावत्। 'घटं करोति' इत्यादौ कृञ्समभिव्याहारे घटादीनामपि साध्यत्वेन प्रतीतेरतिप्रसङ्गभङ्गाय पदान्तरसमभिव्याहाराप्रयोज्येति प्रतीतिविशेषणम्, तदसमभिव्याहारे तेषां तत्त्वेनाप्रतीतेः। अधिश्रयणाद्यधःश्रयणपर्यन्तक्रियाकलापस्य पदान्तरसमभिव्याहारमन्तरेणापि साध्यत्वेन प्रतीयमानत्वादुक्तव्यापारत्वमविकलमिति तदवच्छिन्ने पच्यादिधातुवाच्यता नानुपपन्नेति भावः॥

उक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति ❀ उक्तञ्चेति ❀ यावदिति ❀। सर्वमित्यर्थः। सर्वपदार्थमेव विवृणोति—सिद्धमित्यादि। सिद्धम्=विद्यमानध्वंसप्रतियोगि, 'अपाक्षीत्' इत्यादौ। असिद्धम्=भूतभिन्नं वर्तमानम्, तादृशप्रागभावप्रतियोगि च, 'पचति' 'पक्ष्यति' इत्यादौ। ❀ साध्यत्वेन ❀ वक्ष्माणस्वरूपेण। ❀ अभिधीयते ❀ तत्प्रकारकप्रतीतिविषय इत्यर्थः। क्वचिद्विवक्ष्यते इति पाठः।

एतेन क्रियाशब्दस्य रूढिः प्रदर्शिता। यौगिकत्वमप्याह ❀ आश्रितेति ❀ आश्रितं क्रमरूपं यस्यास्तत्त्वात् पूर्वापरीभूतावयवकत्वादित्यर्थः। तदीयाऽवयवानामधिश्रयणाद्यधः श्रयणपर्यन्तानां क्रमेणोत्पत्तेः क्रियापदेन सा उच्यते। यत्र च न क्रमिकावयवको व्यापारस्तत्र रूढिरेवादरणीया, पौर्वापर्यारोपो वा। फलस्यापि स्वजनकव्यापारगतपौर्वापर्यारोपेण तथैव भानम्। अत एव तन्मात्रवाचकस्य धातुत्वसिद्धिरिति भावः। ❀ पाक इति ❀ यद्यपि साध्यत्वेनोपस्थितिरप्यत्र, कथमन्यथा 'स्तोकं पाकः' इत्यादौ स्तोकादीनां कर्मता, तथाऽपि तत्र धातूपस्थाप्यभावस्य गुणतया प्रधानीभूतघञुपस्था-

काङ्क्षाऽनुत्थापकतावच्छेदकरूपं साध्यत्वम् । तद्रूपवत्त्वमसत्त्वभूतत्वम् । एतदेवाऽऽदाय

'असत्त्वभूतो भावश्च तिङ्गपदैरभिधीयते ।'

इति वाक्यपदीयमिति द्रष्टव्यम् ।

प्रभा

क्रियान्तरेति—अन्या क्रिया क्रियान्तरम्, मयूरव्यंसकादित्वादन्तरशब्दस्य नित्यसमासः, परनिपातश्च। धातूपस्थाप्यक्रियाज्ञाननिष्ठा या क्रियान्तराकाङ्क्षानुत्थापकता 'अस्या अन्वयिनी का क्रिया'? इतीच्छारूपा याऽऽकाङ्क्षा तदनुत्थापकता=तदुत्पादकत्वाभावः सामानाधिकरण्येन तदवच्छेदको यो धर्मस्तदेव साध्यत्वम्। तेन रूपेणोपस्थितौ शाब्दिकवृद्धानुभव एव मानम्। पाकपदेन सिद्धत्वप्रकारकमुख्यविशेष्यतया पाकोपस्थितौ या क्रियाऽन्तराकाङ्क्षोत्थापकता तदवच्छेदको धर्मः=सिद्धत्वरूपः। न च क्रियात्वलक्षणे क्रियायाः प्रवेशादात्माश्रयः, कालान्वय्यन्तरेत्यस्य निवेशेनादोषात्। तथा च कालान्वय्यन्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं साध्यत्वमिति सिद्धम्। कालस्य साध्यक्रियायामेवान्वयात् कालान्वयित्वं क्रियाया एव।

वस्तुतस्तु नाऽऽत्माश्रयः, साध्यक्रियात्वलक्षणे सामान्यक्रियाया निवेशे तत्त्वाभावात्। गुरवस्तु पचति क्रिया भवतीत्यर्थके 'पचति भवति' इत्यादौ, 'पश्य मृगो धावति' इत्यादौ च उक्तसाध्यत्वलक्षणाव्याप्तेः साधनाकाङ्क्षोत्थापकताऽवच्छेदकरूपवत्त्वं कारकान्वयितावच्छेदकरूपवत्त्वं वा साध्यत्वं बोध्यमिति न कश्चिद्दोष इत्याहुः।

साध्यत्वमेवासत्त्वभूतत्वम्। एतदेवादाय=साध्यत्वमेवादाय। तिङ्पदैः=तिङ्प्रकृतिभिः, यद्वा, तिङ्पदैः=भावतिङन्तपदैरित्यर्थः।

दर्पणव्याख्या

प्यस्य तस्य सिद्धतैवेत्याशयः। पर्यवसितार्थमाह ❀ तथा चेति ❀ क्रियान्तरेति ❀ अयमाशयः—यद्धर्मवत्ताज्ञानात् क्रियान्तराकाङ्क्षोदयस्तादृशज्ञाने प्रकारतयाऽवच्छेदकं यत्तत्सिद्धत्वम्, तद्भिन्नत्वं ज्ञाननिष्ठतादृशाऽऽकाङ्क्षोत्थापकत्वाभावावच्छेदकं वा साध्यत्वम्। साध्यत्वज्ञानस्य तु नाकाङ्क्षाप्रतिबन्धकत्वम्, क्लृप्तकारणाभावादेव तदनुत्पादात्। न च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मरूपसाध्यत्वेन धात्वर्थोपस्थितौ 'कृष्णं नमेच्चेत् सुखं यायात्' इत्यादावाकाङ्क्षाभावेन क्रियान्तरान्वयो न स्यादिति वाच्यम्, तत्रापि चेत्पदसमवधानेनाकाङ्क्षोत्थापनात्। हिरुगादीनां क्रियार्थकत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात्, अत एव न हिरुगाद्यर्थे कारकाणामन्वयः, तेषां तदर्थस्य क्रियान्तरसाकाङ्क्षत्वादिति।

वस्तुतस्तु, सिद्धत्वज्ञाने साध्याकाङ्क्षावत् पच्याद्यर्थे साध्यतयाऽवगते 'किमस्य साधनम्' इत्याकाङ्क्षोदयेन साधनाकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वमेव साध्यत्वम्। अत एव 'एतदेवादाय' इत्यग्रिमग्रन्थसङ्गतिः, अन्यथा पचति भवतीत्यादौ पूर्वोक्तरूपाभावेन तदसङ्गतिः स्पष्टैव।

उक्तञ्च हरिणा—

प्रयोगार्हेषु सिद्धः सन् मन्तव्योऽर्थो विशेषणैः।
प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते॥ इति।

साधनं हि क्रियां निर्वर्तयति इति 'सुट् कात्' (पा० सू० ६।१।१२५) इति सूत्रस्थभाष्यमप्येतत्कल्पेऽनुगुणमित्यवधेयम्।

SGDF
Sri Gargeshwari Digital Foundation

अयञ्च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः, पचतीत्यादौ तत्तत्प्रकारकबोधस्याऽनुभवसिद्धत्वात् । न च नानार्थतापत्तिः, 'तदादि'न्यायेन बुद्धिविशेषादेः शक्यता-

प्रभा

अयञ्चेति—साध्यत्वेन प्रतीयमान इत्यर्थः । यद्यपि 'घटं करोति' इत्यादौ घटस्यापि साध्यत्वेन प्रतीतिरित्यतिव्याप्तिस्तथापि करोत्यादिसमभिव्याहारे तथा प्रतीतावपि पदान्तरासमभिव्याहारे साध्यत्वेन प्रतीतस्यैव धात्वर्थव्यापारत्वात् । न च 'घटं करोति' इत्यत्र घटस्याभावात् सिद्धत्वेनापि प्रतीतिर्न स्यादिति वाच्यम्, सत्ख्यातिवादे सूक्ष्मरूपेण, बौद्धस्यैव तस्य कर्मत्वेन प्रतीत्या वाऽदोषात् । फुत्कारत्वेति—फलानुकूलः समूहघटकः फुत्कारादिव्यापारः फुत्कारत्वादिनैव वाच्यः । एवं फुत्कारादिजनको यत्नोऽपि यत्नत्वेन रूपेण धातुवाच्य एव ।

तत्प्रकारेति—फुत्कारत्वादिप्रकारकेत्यर्थः । तत्राधिश्रयणमात्रस्य धातुना विवक्षितत्वे 'स्थाली पचति' इति, अधः सन्तापनस्य तत्त्वे 'काष्ठानि पचन्ति' इति, धातुना तदविवक्षायाम् 'स्थाल्यां पचति' 'काष्ठैः पचति' इति फुत्कारादेरेकस्यापि पूर्वापरीभूतावयवत्वेनैव क्रियात्वम्, तत्र तदभावेऽपि तदध्यासेन तत्त्वाक्षतेः । तदुक्तं वाक्यपदीये—

'एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः ॥ १ ॥' इति ।

फुत्कारादिनिरूपितं शक्तताऽवच्छेदकन्तु पचित्वादिरूपतत्तदानुपूर्वीरूपमेव । पचादिरपि सङ्केतसम्बन्धेन धातुपदवत्त्वेन रूपेण क्रियात्वप्रकारकसामान्यक्रियोपस्थापक एव ।

अत एव कौमुद्यामुक्तम् 'धातुत्वेन सकलधातुवाच्या' इति । 'भूवादयो धातवः' इत्यत्र तु न धातुत्वेन क्रियासामान्यवाचकत्वम्, तस्यैव शक्तिग्राहकत्वेन तदर्थबोधात् प्राक् धातुपदवत्त्वेन भ्वादीनां बोधकत्वासम्भवात् । अतस्तत्र क्रियावाचिन इत्यस्य क्रियात्वव्याप्यतत्तद्व्यापारत्वावच्छिन्नवाचिन इत्येवार्थः । तत्र धातुपदवत्त्वेन धातुपदशक्यताऽवच्छेदकतया क्रियात्वं जातिः । एवं क्रियानिरूपितशक्तावच्छेदकतया पच्यादिनिष्ठं धातुत्वमपि जातिरूपमेव । अत्रैव तात्पर्यग्राहकम् 'भूवादयो धातवः' इति सूत्रमिति दीक्षितादयः ।

नागेशभट्टास्तु—धातुत्वन्तु न शक्तताऽवच्छेदकम्, अतिप्रसक्तत्वात्, धातुत्वाद्यजानतोऽपि बोधात्, तादृशशक्तिग्रहस्य दृष्टफलाभावेनादृष्टमात्रार्थकत्वापत्तेश्चेत्याहुः ।

यद्वा, फुत्कारादिनेकव्यक्तिवृत्तिपचित्वादिजातिरेव क्रिया । व्यक्तिद्वारकञ्च तस्याः साध्यत्वम् । स्फोटवदस्याः क्रमवद्भिरपि क्रियाक्षणैरभिव्यक्तिः । फलस्यापि स्वजनकव्यापारगतपौर्वापर्य्यारोपेण तथैव भानम् ।

दर्पणव्याख्या

केचित्तु, पचतीत्यनुगतव्यवहारादस्ति पचित्वादिकं जातिः । तथा च, क्रमिकानेकव्यक्तिवृत्तिजातिरेव क्रिया । साध्यत्वञ्च तस्या व्यक्तिद्वारकमेव । स्फोटवदस्याः क्रमवद्भिः क्षणैरभिव्यक्तिः ।

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते ॥

इति वाक्यपदीयं चाऽत्र कल्पे मानमित्याहुः ।

साध्यत्वासत्त्वभूतपदयोः पर्यायतामाह ❀ तद्रूपवत्त्वमिति ❀ । ❀ एतदेवेति ❀ निरुक्तरूपासत्त्वभूतत्वमेवे-

SGDF

वच्छेदकानामनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाऽपि अवच्छेदकबुद्धिविशेषैक्यमादायैव। उक्तञ्च वाक्यपदीये—

प्रभा

अत एव तन्मात्रवाचकस्य धातुत्वसिद्धिः। न च नानेति—यदि फुत्कारत्वाधःसन्तापनत्वादिनानाधर्मेण शक्यता तदा नानाधर्मावच्छिन्ना फुत्कारादिनिष्ठा या शक्यता तन्निरूपितशक्तताया: पचादिनिष्ठायाः पचत्वादिरूपैकैकधर्मावच्छिन्नतया नानाधर्मावच्छिन्नशक्यतानिरूपितैकधर्मावच्छिन्नशक्तताबत्त्वरूपनानार्थकत्वापत्तिः पचादेः। न चेष्टापत्तिः, गौरवात्, हर्य्यादिनानार्थकस्थले प्रकरणादीनां शक्यताऽवच्छेदकस्य नियामकत्वेन दृष्टतया 'पचति' इत्यादिस्थले तु प्रकरणाद्यनपेक्षितत्वेन फुत्कारत्वादिरूपनानाधर्मप्रकारकबोधस्यानुभवसिद्धतया तत्र नानार्थकत्वस्यानुभवविरुद्धत्वाच्चेत्याशङ्क्याह—

तदादीति—अयम्भावः—यथा तद्यदित्यादिशब्दानां घटत्वपटत्वादिरूपेण नानार्थशक्ततया नानार्थकत्ववारणाय स्वीयविषयताऽवच्छेदकत्वसम्बन्धेन वक्तृबुद्धिविशेषोपलक्षिता ये घटत्व-पटत्वादयो धर्मास्तदवच्छिन्ने तदादीनां शक्तिस्वीकारेण न नानार्थकत्वम्, तथा प्रकृतेऽपि स्वीयविषयताऽवच्छेदकत्वसम्बन्धेन पचादिधातुप्रयोक्तृसमवेतबुद्धिविशेषो (फुत्कारादिसमूहविषयकैकबुद्धि) पलक्षिता ये फुत्कारत्वादयो धर्मास्तदवच्छिन्नशक्यतानिरूपितशक्तताबत्त्वस्य पचादौ स्वीकारात्। अननुगतनानाधर्मावच्छिन्नशक्यतानिरूपितशक्तताबत्त्वस्यैव नानार्थकतया प्रकृते बुद्धिविशेषस्यानुगमकस्य सत्त्वेन नानार्थकत्वाभावः। न च बुद्धेरपि आश्रयभेदाद्भेदेनाननुगमः, तद्व्यक्तित्वेन बुद्धेर्भेदेऽपि बुद्धित्वेन तस्या अनुगतत्वात्। तथा च अनेकशक्यताऽवच्छेदकत्वं न नानार्थकत्वम्। अनेका शक्यतावच्छेदकता यस्य शब्दस्येति तस्य भावः, अनेकशक्यताऽवच्छेदकताकत्वं नानार्थकत्वम्। यथा हर्य्यादिशब्दस्य विष्णुत्वेन्द्रत्वादिषु नानाशक्यतावच्छेकता। आश्रयभेदेन शक्यतावच्छेदकताया भेदेऽपि प्रकृते शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविशेषस्यैक्येन तद्भेदाभावात्।

बुद्धिविशेषादेरिति—आदिना—बुद्धिविषयत्वतदवच्छेदकत्वयोः संग्रहः। अत्र बुद्धिविशेष उपलक्षणम्, न तु विशेषणम्। उपलक्षणत्वञ्च—तत्पदीयशक्यताऽवच्छेदकतावच्छेदकत्वेन शक्तिज्ञानविषयत्वे सति तत्पदजन्यबोधविषयत्वेन शक्तिग्रहाविषयत्वम् इति न शाब्दबोधे बुद्धिविशेषस्य भानम्। नन्ववयवीभूतफुत्कारादिव्यापाराणामाशुविनाशित्वाद् युगपदवस्थानासम्भवेन तत्समूहासम्भवात् 'आख्यातेनैका क्रिया प्रत्याय्यते' इति 'प्रशंसायाम्' (५—३—६६) इति सूत्रस्थभाष्यासङ्गतिः, 'न वै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति' इति 'सरूप' सूत्रस्थभाष्यासङ्गतिश्चेत्यत आह—

दर्पणव्याख्या

त्यर्थः ❀ असत्त्वभूत इति ❀ 'भावप्रधानमाख्यातम्' (निरुक्ते १ अ० १ ख०) इति निरुक्तार्थप्रतिपादकमेतत्।

सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते।

इति अस्य पूर्वार्द्धम्। ❀ भावश्चेति ❀। चोऽवधारणे। उक्तभाव एवेत्यर्थः। तेन सत्त्वभूतस्य तस्य व्यवच्छेदः। तिङ्पदैरिति बहुवचनस्वारस्येन तिङन्तपदैरित्यर्थः ❀ अभिधीयते ❀ बोध्यते इत्यर्थः। अभिधीयते इत्यस्य प्राधान्येनैवेति शेषः। तेन कृदन्तपदैरसत्त्वावस्थभावाऽभिधानेऽपि न क्षतिः। तिङ्पदैरिति भावाऽऽख्याताभिप्रायेणेति कश्चित्।

❀ अयं चेति ❀ साध्यत्वेन प्रतीयमानो व्यापारश्चेत्यर्थः। ❀ वाच्य इति ❀ पचत्यादिशक्य इत्यर्थः।

'गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते ॥' इति ।

प्रभा

आख्याते क्रियैकत्वेति—अत्राख्यातपदेन धातोरेव ग्रहणम्, न तु तिङन्तस्य, कृदन्तेऽपि धातूपस्थाप्यक्रियायास्तथात्वात् । घञाद्युपस्थाप्यक्रियायां त्वेकत्वान्वये बाधकाभावात् ।

अत एव 'नामाख्यातोपसर्गनिपाताः' इति भाष्ये निरुक्ते च प्रकृतित्वेनोल्लेखः । अत एव नामान्याख्यातजानि' इति शाकटायनः । आख्यायते = प्रत्याय्यते सर्वप्रधानीभूतोऽर्थोऽनेनेति बाहुलकात् करणे क्ते आख्यातं धातुरेव । 'आख्यातमाख्यातेन' इत्यत्र तु आख्यात (धातु) प्रकृतिकतिङन्ते लक्षणा, 'द्वितीया श्रित' इत्यादौ श्रितादीनां यथा श्रितादिप्रकृतिसुबन्ते । न च भाष्ये, शाकटायनोक्तौ च तिङन्तवाचकाख्यातशब्दस्य धातौ लक्षणा, अनेकत्र लक्षणास्वीकारे गौरवात् । 'भावप्रधानमाख्यातम्' इत्यत्रापि आख्यातपदेन धातुरेव ग्राह्यः, सत्त्वप्रधानानि नामानि' इत्यत्र प्रकृतेरेवोपादानात् तत्रापि तत्त्वस्यैवौचित्यात् ।

व्याकरणे क्वचित्तिङन्तस्य ग्रहणम्, क्वचिद्धातोरिति नैयायिकानामाख्यातपदेन तिङो ग्रहणं सर्वथा हेयमेव ।

शब्दरत्नकारास्तु आख्यातपदेन तिङन्तस्य ग्रहणमाहुः । आख्याते क्रियेत्यत्राख्यातपदेन धातोर्ग्रहणे आख्यातवाच्यक्रियेत्यर्थः । तिङन्तस्य ग्रहणे आख्यातजन्यशाब्दबोधविषयीभूतेत्यर्थः, तिङन्तस्य क्रियावाचकत्वाभावात्, शक्तिमत्येव वाचकत्वव्यवहारात् । 'आख्याते' इति सप्तम्यन्तपाठे तु आख्यातशब्दस्य वाच्ये बोध्ये वा लक्षणा । विषयत्वं सप्तम्यर्थस्तस्य स्वरूपसम्बन्धेन क्रियायामन्वयः । अवच्छेदकेति—फुत्कारत्वादिनिष्ठा या शक्यतावच्छेदकता तदवच्छेदको यो बुद्धिविशेषस्तद्गतैकत्वं क्रियायामारोप्येत्यर्थः । सा च बुद्धिः फुत्कारादिविषयकसमूहालम्बनरूपा एकैव । यद्वा, बुद्धिविषयसमूहगतैक्यारोपेणेत्यर्थः ।

गुणभूतैरिति—क्रमजन्मनाम् = क्रमेण=पौर्वापर्य्येणोत्पत्तिमतां फुत्कारादिव्यापाराणां समूहो बुद्ध्या संकलनात्मैकत्वबुद्ध्या समूहालम्बनात्मिकया वा प्रकल्पितोऽभेदो यत्र समूहे स बुद्धिप्रकल्पितसमूह एव क्रिया । अभेदश्चावयवानाम् । स च समूहो गुणभूतस्तत्तद्रूपेण भासमानैः समूहे प्रकारीभूतैर्वावयवैः फुत्कारादिभिर्युक्तः क्रियेति व्यपदिश्यते=व्यवह्रियते इत्यर्थः ।

एतेन क्षणनश्वराणामवयवानां युगपदवस्थानासम्भवेन समूहः क्रियेत्यसङ्गतमित्यपास्तम्, बुद्ध्या प्रकल्पने बाधकाभावात् । समूहेऽवयवगतपौर्वापर्य्यस्यारोपः, स्वत एकत्वञ्चेत्यदोषः । एवञ्चैकैकावयवेऽपि समूहरूपारोपादधिश्रयणाद्येकैकक्रियादशायामपि पचतीत्यादिव्यवहारो न विरुद्ध्यते । आरोपे च तादृशवृद्धव्यवहार एव मानम् ।

दर्पणव्याख्या

❀ अनुभवसिद्धत्वादिति ❀ । अत एव व्यजनादिना वह्निप्रज्वलनदशायां फूत्कार एव गृहीतशक्तिकस्य न पचतीति प्रयोगः । यागः, इच्छा, ज्ञानं वेति विप्रतिपत्तिस्तु स्वीयबोधानुसारादेवेति भावः । ❀ न च नानेति ❀ नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वं नानार्थत्वम् । तच्च पच्यादावक्षतमिति भावः । फलांशमादाय तत्त्वं त्वाशङ्कितुरपीष्टमेवेति बोध्यम् । ❀ बुद्धिविशेषादेरिति ❀ स्वनिरूपितविषयतावच्छेदकत्वसम्बन्धेनेति शेषः । बुद्धिविशेषविषयतावच्छेदकत्वस्येति यावत् । अयं भावः—तदादिभ्यश्चैत्रत्वादितत्तद्रूपेण बोधः सर्वानुभवसिद्धः । स च चैत्रत्वाद्यनुगमकधर्मं विनाऽनुप-

धात्वर्थं निरूप्य तिङर्थमाह—

आश्रये त्विति—फलाश्रये, व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म्म, व्यापाराश्रयः कर्त्ता। तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः, अन्यलभ्यत्वात्। शक्यतावच्छेदकं चाश्रयत्वं तत्तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते।

प्रभा

ननु 'नासङ्गतं प्रयुञ्जीत' इत्यभियुक्तोक्तेः यद्यदनन्तरं निरूप्यं तत्तत्सङ्गतम्भवतीति व्याप्त्या 'अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्मरणानुकूलसम्बन्धः सङ्गतिः। तथा हि—धात्वर्थनिरूपणानन्तरं तिङर्थनिरूपणे अनन्तराभिधानं तिङर्थनिरूपणरूपं तत्प्रयोजकजिज्ञासा 'तिङर्थज्ञानं मे जायताम्' इत्याकारिकेच्छारूपा तज्जनकं ज्ञानम्—'तिङर्थज्ञानं मदिष्टसाधनम्' इत्याकारकं तद्विषयस्तिङर्थस्तत्स्मरणानुकूलसम्बन्धश्च तिङर्थनिष्ठो धात्वर्थवाचकधातुनिष्ठोद्देश्यतानिरूपितविधेयताश्रयवाच्यत्वरूपस्तादृशसम्बन्धरूपा सङ्गतिः। सा च षोढा—तदुक्तम्—

'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा।
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते॥' इति।

स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः, प्रकृतार्थोपपादकत्वमुपोद्घातः, हेतुता=कारणता प्रसिद्धैव। कारणे कार्ये वा ज्ञाते किमस्य कार्य्यं कारणं वेति जिज्ञासोदयेन उपजीवकत्वोपजीव्यत्वयोर्हेतुतायामन्तर्भावः। न च षोढात्वव्याघातः, हेतुताया निरूपकताऽऽश्रयताऽन्यतरसम्बन्धेन सङ्गतित्वेन षोढात्वाक्षतेः। प्रतिबन्धकीभूतजिज्ञासानिवृत्तिकालावच्छिन्नावश्यवक्तव्यत्वमवसरः। यथा धात्वर्थः क इति जिज्ञासानिवृत्तौ तिङर्थस्यावश्यवक्तव्यत्वरूपावसरसङ्गतिः। निर्वाहकैक्यम्=एकप्रयोजकप्रयोज्यत्वम्। कार्यैक्यम्=एककार्यानुकूलत्वम्।

निरूप्येति—बोधनानुकूलो व्यापारो निपूर्वकरूपधात्वर्थः। धात्वर्थस्य प्राधान्येन तं निरूप्यावसरसङ्गत्या तिङर्थमाह—आश्रये त्विति—आश्रयस्याधेयसाकाङ्क्षतयाऽऽह—फलाश्रय इत्यादि। ननु व्यापारस्य प्राधान्यात् प्रथमतो व्यापाराश्रयोक्तिरेवोचितेति चेन्न, कारिकायां प्रथमं फलस्यैवोपादानात्, लकारविधायके 'लः कर्मणि' इति सूत्रे कर्मण एव प्रथमोपादानाच्च। यद्यपि न्यायनये कर्मपदेन जडवृत्तिस्पन्दस्यैव कर्त्तृपदेन कृत्याश्रयस्यैव ग्रहणम्, तथापि प्रकृते 'कर्त्तुरीप्सिततमम्' (१-४-४९) इति सूत्रात् 'स्वतन्त्रः कर्त्ता (१-४-५४) इति सूत्राच्च कर्मपदेन फलाश्रयस्य कर्त्तृपदेन धातूपात्तप्रधानीभूतव्यापाराश्रयस्यैव ग्रहणमित्याह—फलाश्रयः कर्मेत्यादि। अत एव 'घटो भवति' इत्यादौ घटादेरपि कर्त्तृत्वसिद्धिः, शाब्दिकनये स्पन्दयत्नोभयसाधारणव्यापारत्वस्य स्वीकारात्।

दर्पणव्याख्या

पन्न इति बुद्धिविशेषविषयतावच्छेदकत्वं तदनुगमकधर्ममङ्गीकृत्य तदनुगतीकृततत्तदवच्छिन्नेषु चैत्रादिषु तदादीनां शक्तिः। बुद्धिविशेषविषयतावच्छेदकत्वस्योपलक्षणत्वोपगमाच्च न चैत्रत्वादीनां तेन रूपेण शाब्दबोधे भानापत्तिः। अननुगतनानाधर्माऽवच्छिन्नशक्तिनिरूपकताऽवच्छेदकैकधर्मवत एव नानार्थत्वम्, न तेषां तदपीति तदादिशक्तिनिरूपणे निर्णीतमन्यत्र, तद्वदिहाप्यवसेयमिति।

ननु पूर्वापरीभूतक्षणनश्वरक्रमिकव्यापाराणां मेलनाऽसम्भवात्तदात्मकक्रियाया अनैक्याद् 'एका च क्रिया' इति

नन्वनयोराख्यातार्थत्वे किं मानम्। प्रतीते र्लक्षणया आक्षेपात् प्रथमान्तपदाद्वा सम्भवादिति चेद्—

प्रभा

तत्रेति—घटकत्वं त्रलर्थः। कर्मकर्तृघटकफलव्यापारयोर्धातुलभ्यत्वात् 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायेन अनन्यलभ्यमाश्रयमात्रं तिङर्थः। न चाश्रयस्य शक्यत्वे आश्रयत्वं शक्यतावच्छेदकं स्वीकार्यम्। तच्चाधारत्वरूपम्। आधारत्वञ्च निरूपक (आधेय) भेदात्सम्बन्धभेदाच्च भिन्नमिति शक्त्यानन्त्यमिति वाच्यम्, आश्रयस्य निरूपकादिभेदाद् भिन्नत्वेऽपि आश्रयत्वस्याखण्डोपाधिरूपत्वेन निरूपकाद्यनपेक्षत्वेन शक्त्यानन्त्याभावात्,

यद्वा, निरूपकादिभेदेन भेदेऽपि आश्रयतात्वेनानुगमादित्याह—तत्तच्छक्तिविशेषरूपमिति—अखण्डोपाधिरूपमित्यर्थः। एतेन कृतिमतो व्यापारवतो वा तिङः शक्यत्वे प्रकारीभूतकृतिव्यापारयोरेव शक्यताऽवच्छेदकत्वमिति तेषामानन्त्याद् गौरवमिति नैयायिकोक्तमपास्तम्, गौरवोक्तेर्वैयाकरणमताज्ञानप्रयुक्तत्वात्। तिङां कृतौ शक्तिरिति स्वीकर्तुस्तव मते कृतित्वस्य शक्यताऽवच्छेदकत्वे तस्य जातिरूपतया लाघवस्येवाश्रयत्वस्यापि तत्समत्वेन लाघवसत्त्वात्।

मीमांसकादिमतं निराकर्तुं स्वमतं स्थापयितुञ्च शङ्कते—नन्विति। अनयोः=कर्तृकर्मणोः। आख्यातेति—आख्यातपदं तिङ्बोधकमिति नैयायिकवासनाभिप्रायेणेदम्। वैयाकरणनिकाये आख्यातपदस्य धातुतिङन्तान्यतरबोधकत्वस्यैव स्वीकारात्। किं मानमिति—किंशब्दः प्रश्ने। प्रश्नश्च—जिज्ञासाबोधकशब्दः। यद्वा, आक्षेपार्थकः। आक्षेपश्चात्र—किञ्चिन्निमित्तमभिसन्धाय प्रतिषेधः। प्रकृते लक्षणादिरूपं निमित्तमभिसन्धाय कर्तृकर्मणोर्वाचकत्वप्रतिषेध आक्षेपः।

ननु येन शब्देन यदर्थबोधो जायते स तस्यार्थ इति व्याप्त्या तिङा कर्तृकर्मणोः प्रतीतिरेव मानमित्याह—प्रतीतेरिति—'देवदत्तः पचति' इत्यत्र देवदत्ताभिन्नाश्रयनिष्ठो विक्लित्त्यनुकूलो व्यापार इति प्रतीतिरेव मानमिति चेन्न, प्रतीतेस्तिङः कृतिवाचकत्वेऽपि कृतिसमवायिनि आश्रये लक्षणयोपपत्तिसम्भवात्।

ननु मीमांसकादिमते भावनाया (यत्नरूपायाः) अपि शाब्दबोधे भानस्यावश्यकत्वेन तद्भानाय शक्तिज्ञानस्य, आश्रयभानाय लक्षणाज्ञानस्य चावश्यकतया युगपद्वृत्तिद्वयज्ञानासम्भवेन लक्षणाया असम्भवः। न च भावनाश्रये लक्षणेत्युभयोर्लक्षणयैव बोध इति वाच्यम्, कर्तृत्वरूपनिर्वाहाय भावनाया आश्रये विशेषणतयैव भानस्यावश्यकत्वेन भावनायाः शाब्दबोधे प्राधान्यासम्भवादित्याह—

आक्षेपादिति—आक्षेपोऽनुपपत्तिरर्थापत्तिरिति यावत्, यथा 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र दिवाभोजनाभावविशिष्टस्य देवदत्तस्य भोजनं विना पीनत्वानुपपत्त्या रात्रिभोजनं बुध्यते। एवमाश्रयं विना भावनायाः (यत्नस्य) स्थित्यनुपपत्त्या आश्रयभानं स्यादिति भावः। अर्थापत्तिः=प्रमाकरणम्, प्रमात्मक-

दर्पणव्याख्या

"प्रशंसायाम्" (पा० सू० ४।२।६६) इति सूत्रस्थभाष्यासङ्गतिरत आह ❀ आख्यातेति ❀। निर्विभक्तिकः पाठः साधुः। आख्यातप्रतिपाद्यक्रियैकत्वव्यवस्थापीत्यर्थः। सविभक्तिकपाठे सप्तमी वैषयिकाधारे अध्याहृतज्ञानक्रियामादायबोध्या। ❀ बुद्धिविशेषैक्यमिति ❀ संकलनरूपबुद्धिविशेषात्मकविच्छेदकैक्यमादायेत्यर्थः। तथा चावयवाऽऽश्रयं पौर्वापर्यम्, समुदायाश्रयमेकत्वमादाय तत्सङ्गतिरिति भावः। तत्र मानमुपन्यस्यति ❀ उक्तञ्चेति ❀। ❀ गुणेति ❀ क्रमिकैतद्-

अत्रोच्यते-'लः कर्म्मणि च भावे चाऽकर्म्मकेभ्यः' (पा० सू० ३ । ४ । ६९) इति सूत्रमेव मानम् । अत्र हि चकारात् 'कर्त्तरि कृत्' इति सूत्रोक्तं कर्त्तरीत्यनुकृष्यते । बोधकतारूपा

प्रभा

ज्ञानञ्च । आद्यम्—उपपाद्यज्ञानरूपम्—पीनत्वादिज्ञानम्, द्वितीयम्—उपपादकज्ञानम्—रात्रिभोजनादिज्ञानम् । तथा च उपपाद्यज्ञानेनोपपादकज्ञानरूपा अर्थापत्तिरूपा प्रमा, तत्करणञ्च उपपाद्यज्ञानरूपमर्थापत्तिरूपप्रमाणम् । अक्षरार्थस्तु अर्थस्यापत्तिः,=कल्पना यया बुद्ध्या सा अर्थापत्तिः प्रमाणम् । तादृशप्रमाणेन जन्यं यज्ज्ञानं तदित्यर्थापत्तिः ।

न्यायमते आक्षेपो व्याप्तिज्ञानादिस्तस्मादित्यर्थः । तथा हि—'भावना, क्वचिदाश्रिता, गुणत्वात्, रूपादिवत्,' इत्यनुमित्यात्मकं ज्ञानमाक्षेपस्तस्मादित्यर्थः, एवं कर्मप्रत्ययस्थलेऽपि फलमात्रं तिङर्थः तदाश्रयः कर्मरूपार्थश्चाक्षेपलभ्यो बोध्यः ।

ननु व्याप्तिज्ञानानुपपत्तिज्ञानादिकं विनैव तिङ्श्रवणमात्रेण कर्तृकर्मणोर्बोधात् पदनिष्ठवृत्तिज्ञानजन्यपदार्थोपस्थितिविषयस्यैव प्रकारतया विशेष्यतया वा शाब्दबोधे भानस्य नियतत्वेनाऽक्षिप्तस्य भानानुपपत्तेश्चेदमसङ्गतमत आह—प्रथमान्तपदाद्धेति—पचत्यादितिङन्तसमभिव्याहृतात् 'चैत्रः' इत्यादिपदादित्यर्थः । न चाश्रयत्वेनाश्रयबोधायाऽश्रये तिङां शक्तिरावश्यकी, आश्रयत्वे शक्तिरिति मते तद्रूपस्य तिङाऽऽश्रयस्य च प्रथमान्तपदेन बोधसम्भवान्नाश्रये तिङां शक्तिः सिद्ध्यति । प्रथमान्तपदासमभिव्याहारेऽध्याहारेण तद्बोध उपपादनीय इति तदाशयः । अत्रेति—जिज्ञासितविषय इत्यर्थः । उच्यते—अस्य 'लः कर्मणि' इत्यादिवाक्यसन्दर्भः कर्म ।

दर्पणव्याख्या

व्यापारसमूहं प्रति गुणभूतस्तत्तद्रूपेण भासमानैरवयवैरुपलक्षितः सङ्कलनात्मकैकत्वबुद्ध्या प्रकल्पितोऽभेदो यस्य तद्रूपः समूहः क्रियेति व्यवह्रियते इति कारिकार्थः । तत्र क्षणनश्वराणां व्यापाराणां वस्तुभूतसमुदायाऽभावाद् बुद्ध्येत्युक्तम् । निरूप्येत्यस्य सङ्क्षेपेणेत्यादिः । प्रधानीभूतप्रकृत्यर्थनिरूपणानन्तरं विशेषणप्रत्ययार्थस्याऽवश्यवक्तव्यतयाऽवसरसङ्गत्या तन्निरूपणमित्यभिप्रेत्याह ❀ तिङर्थमिति । अन्यलभ्यत्वादिति ❀ 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायादिति भावः । एतेन कृतिमतो व्यापारवतो वा कर्तुः शक्यत्वेऽनेककृतिव्यापाराणां शक्यताऽवच्छेदकत्वकल्पने गौरवमिति नैयायिकाद्युक्तं दूषणमस्मन्मताऽज्ञानविजृम्भितमिति सूचितम् ।

नन्वाश्रयस्य तिङर्थत्वे आश्रयत्वं शक्यतावच्छेदकं वाच्यम् । तस्य च स्वरूपाऽभिन्नतया नानासम्बन्धाऽवच्छिन्नतया च नानात्वादननुगमोऽत आह ❀ शक्यतावच्छेदकं चेति । ❀ वक्ष्यते इति ❀ अस्य द्वितीयार्थनिरूपणाऽवसर इति शेषः । तथा च तत्राऽखण्डोपाधिरूपस्यानुगतस्य वक्ष्यमाणत्वान्न तत्र नानात्वप्रयुक्तो दोष इति भावः ।

मीमांसकादिमतं प्रबलप्रमाणेन निराकरिष्यन् कर्तृकर्मणोरुक्तं तिङर्थत्वं व्यवस्थापयितुं शङ्कते ❀ नन्विति ❀ ननु 'यद् यद्बोधकं तत्तदर्थकम्' इति नियमादाख्यातजन्यकर्तृकर्मप्रतीतिरेव मानमत आह ❀ प्रतीतेरिति ❀ । सम्भवादित्यनेनान्वितम् । सम्भवहेतुमाह ❀ लक्षणयेति ❀ । नन्वाख्यातस्याऽऽश्रयलक्षकत्वे भावनाभानानुपपत्तिस्तदुपपत्तये तत्र तस्य शक्तिकल्पने तु नाऽश्रये लक्षणासम्भवः, युगपद्वृत्तिद्वयविरोधात् । भावनाश्रयत्वेन भावनाश्रये लक्षणायां तु भावनायाः प्राधान्यानुपपत्तिरत आह ❀ आक्षेपादिति ❀ । आक्षेपोऽनुपपत्तिस्तत इत्यर्थः । तथा हि—अन्विताभिधानवादिमते पदानां विशेषणत्वेनैवार्थोपस्थापकतयाऽऽख्यातार्थभावनाया विशेषणत्वाऽनुपपत्त्या भवति तस्य आश्रयाऽऽक्षेपकत्वम् । यद्वा, अनुमानं सः । तत्प्रयोगश्च—'आख्यातपदबोध्या भावना, किञ्चिदाश्रिता, विशेषणत्वेन गृहीतशक्तिकत्वात् ।

SGDF Digitized by Siddhanta eGangotri Gyaan Kosha Foundation

तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्त्तरि चानेन विधीयन्ते, नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकताशक्तिमादाय शसादिविधानवत् ।

प्रभा

मानमिति—अनुमापकमित्यर्थः । अनुमितिप्रकारश्चेत्थम्—तिङ्प्रत्ययः, आश्रयनिरूपितशक्तिमान्, 'लः कर्मणि' इति गृहीतशक्तिकत्वात्, अणादितद्धितवत् । अत्र साध्यतावच्छेदको हेतुतावच्छेदकश्च स्वरूपसम्बन्धः । यत्पदं यद्धर्मावच्छिन्ननिरूपितशक्तिग्राहकपाणिनिसूत्रकम्, तत्पदं तद्धर्मावच्छिन्ननिरूपितशक्तिमदिति सामान्यतो व्याप्तिग्रहः ।

ननु कर्मार्थकतिङस्तदर्थकत्वसिद्धावपि सूत्रे कर्त्तृपदाभावात् तिबादिषु तत्सूत्रगृहीतशक्तिकत्वरूपहेत्वसिद्धिरित्यत आह—अत्र हीति । ननु 'लः कर्मणि' इति सूत्रेण लकारस्याश्रये शक्तिसिद्धावपि तिङस्तदसिद्धिरित्याशङ्क्याह—बोधकतेति—'उच्चारितः शब्दः प्रत्यायको नानुच्चारितः' इति न्यायेन लाघवेन शास्त्रप्रक्रियामात्रनिर्वाहाय स्थानित्वेन कल्पिते लकारे तिबादिगतां बोधजनकताशक्तिं प्रकल्प्य लकारस्य विधानेऽपि 'यदर्थाभिधानसमर्थः स तस्याऽदेशः' इति न्यायेन, लकारस्य प्रयोगघटकतयाऽनुच्चरितत्वेन च तिबादिशक्तिबोधने एव तत्सूत्रतात्पर्यात् । शक्तेर्बोधजनकतातोऽतिरिक्तत्वेऽपि तत्समानाधिकरणां तां शक्तिमित्यर्थः । नकारेति—'रामान्' 'रामैः' इत्यादौ, आदेशत एवार्थबोधात् तन्निष्ठैव शक्तिरिति भावः । ननु कर्तृत्व (यत्न) कर्मत्व (फल) योः शक्तिस्वीकारे यत्नत्वं फलत्वञ्च शक्यतावच्छेदकम्, तच्च जातिरूपमिति लाघवम् । कर्त्रादौ शक्तिस्वीकारे नानायत्नानां नानाफलानाञ्च शक्यतावच्छेदकत्वे गौरवम् ।

न च 'प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्' इत्युक्तेस्त्रिविधेषु यत्नेषु एकाकारप्रतीतेरभावात् यत्नत्वस्य त्रितयसाधारणत्वे मानाभाव इति वाच्यम्, कार्यत्वावच्छिन्ननिरूपितकारणतावच्छेदकतया यत्नत्वजातिसिद्धेः ।

दर्पणव्याख्या

घटपदबोध्यघटत्ववत्' इति । समानसंवित्संवेद्यत्वं तु नाऽऽक्षेपः, प्रमेयमित्याश्रयभाने भावनाया अभानात्, भावनापदजन्य भावनाबोधे आश्रयाऽभानाच्चेति ।

ननु व्याप्त्यादिप्रतिसन्धानं विनाऽप्याश्रयबोधस्यानुभवसिद्धत्वान्नाक्षेपादाश्रयभानोपपत्तिः, क्वाचित्कत्वात् तथाभानस्य । किञ्चोक्तरीत्या तद्भानसमर्थने आख्यातजन्यबोधे भावनायाः प्राधान्यानुपपत्तिः, शक्तिग्रहे तस्या विशेषणत्वेनैवोपस्थितत्वाद् घटत्ववत्, एतत्तत्त्वस्य विचाराऽसहत्वाच्चेत्यत आह ❀ प्रथमान्तपदाद्वेति ❀ समभिव्याहृतप्रथमान्तचैत्रादिपदादेवाश्रयप्रतीत्युपपत्तेरित्यर्थः । एवञ्च नाश्रयप्रतीत्यनुपपत्तिराश्रये आख्यातशक्तिसाधिकेति भावः ।

❀ मानमिति ❀ यद्यप्याश्रयत्वेनाश्रयभानार्थं तत्राख्यातस्य शक्तिरावश्यकीत्येवोत्तरं वक्तुमुचितं तथाऽपि धातोः फलव्यापारयोः शक्तिराख्यातस्याश्रयत्वे शक्तिरिति मते आश्रयस्य आश्रयत्वेनापि लाभान्न सामान्यत आश्रये स्वाभिमताख्यातशक्तिः सिद्ध्यतीति तन्मतनिरासार्थमपि सूत्रं प्रमाणत्वेनोपन्यस्तमिति बोध्यम् । ननु कर्तृपदाघटितमिदं सूत्रं कथमाख्यातस्य कर्तृवाचकत्वे मानमित्याशङ्कां निरस्यति ❀ अत्र हीति ❀ नन्वेतत्सूत्रं लकाराणामेव कर्त्रादिशक्तिबोधकं नाख्यातस्येत्यत आह ❀ बोधकतारूपामिति ❀ बोधजनकत्वरूपामित्यर्थः । इदं चादेशिष्वेव शक्तिरादेशानामादेशिस्मृतिद्वाराऽर्थोपस्थापकत्वमिति मतनिरासायोक्तम् । यथा चैतत् तथा वक्ष्यते । ❀ विधीयन्ते इति ❀ तथाच वर्णस्फोटपक्षे श्रूयमाणवर्णानामेव वाचकताया व्यवस्थापयिष्यमाणतया 'लः कर्मणि' इत्यादिसूत्राणां तिबादिशक्तिग्रहे एव तात्पर्यावधारणेन सम्भवति तस्याऽख्यातशक्तिसाधकप्रमाणत्वमिति भावः । ❀ नकारविसर्गादीति ❀ 'रामान्' 'रामैः'

न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे। तथाच कर्तृत्वम्—कृतिः, कर्म्मत्वञ्च फलमेवार्थोऽस्त्विति शङ्क्यम्, फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनाऽयोगात्।

प्रभा

न च प्रागभावध्वंसस्यापि कार्यतया तत्र च यत्नस्याकारणत्वात्तदसिद्धिरिति वाच्यम्, कार्ये भावत्वस्यापि विशेषणत्वेनादोषात्। यद्वा, समवायसम्बन्धावच्छिन्नकार्य्यत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया यत्नत्वजातिसिद्धिः। यदि तु संयोगादिजनकतावच्छेदकतया क्रियात्वसिद्ध्या विनिगमनाविरहाद्यत्नत्वजात्यसिद्धिरित्युच्यते, तदा यत्नपदशक्यतावच्छेदकतया तत्सिद्धिर्बोध्या। नैयायिकादिमतं दूषयति—न च सूत्र इति।

कर्त्तृत्वेति—कृत्याश्रयरूपकर्त्तृपदार्थे प्रकारीभूतायाः कृतेः, फलाश्रयरूपकर्मपदार्थे प्रकारीभूतस्य फलस्य च त्वप्रत्ययार्थतया कर्त्तृत्वम्—कृतिः, कर्मत्वञ्च फलमिति फलतीति भावः। 'आकृतिः पदार्थः' इति मतेन लक्षणया भावप्रधाननिर्देशाद्वा कर्त्तृकर्मपदं तदर्थकमिति भावः। 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायेन कृतिफलयोर्धातुलभ्यत्वेन न तत्र तिङां शक्तिरिति भावः। ननु मीमांसकानां मते फलमात्रं धात्वर्थः, भावना तिङर्थः। भावना च भवितु (उत्पद्यमानस्य) भवना (उत्पत्ति) नुकूलभावक (उत्पादक) व्यापारविशेषः स्यन्दयत्नसाधारणः। तत्र तिङ्प्रत्ययेऽस्त्यंशद्वयम्—आख्यातत्वम्, लिङ्त्वञ्च। आख्यातत्वञ्च सकलतिबादिषु। लिङ्त्वन्तु लिङ्स्थानिकतिबादिष्वेव। तत्र लिङा आख्यातत्वलिङ्त्वाभ्याम्भावनैवोच्यते।

तत्रेयान् विशेषः—लिङ्त्वेन तिङ्बोध्या या भावना सा शाब्दी भावना इत्युच्यते। यथा 'स्वर्गकामो यजेत' इत्यत्र यागकर्तुः पुरुषस्य या यागे प्रवृत्तिस्तदनुकूलो यो भावक (प्रेरक) व्यापारविशेषः—प्रेरणारूपः सा शाब्दी भावना। स च प्रवृत्त्यनुकूलव्यापारविशेषो लोके पुरुषनिष्ठः। वेदे तु पुरुषाभावात् लिङादिशब्दनिष्ठ एव। आदिना तव्यदादीनां संग्रहः। सा च भावना साध्यम्, साधनम्, इतिकर्त्तव्यताञ्चेति अंशत्रयमपेक्षते। तत्र पुरुषप्रवृत्तिरूपा आर्थी भावना साध्यत्वेन अन्वेति। करणाकाङ्क्षायां लिङादिज्ञानं साधनत्वेन अन्वेति। इतिकर्त्तव्यता=उपकारकम्, तच्च कर्मणः प्राशस्त्यज्ञानम् इतिकर्त्तव्यतया अन्वेति, प्राशस्त्यज्ञानादेव प्रवृत्तिर्जायते। आख्यातमात्रेण आर्थी भावनोच्यते। स्वर्गादीच्छाजनितो यागविषयको यः प्रयत्नः सा आर्थी भावना। 'रथो गच्छति' इत्यत्र तु अश्वादेश्चेतनस्य यत्नं रथे आरोप्य तथा प्रयोगः।

अन्ये त्वाहुः—भवितुः=उत्पद्यमानस्य भवना (उत्पत्ति) नुकूलो भावक (उत्पादक) व्यापारविशेषो भावना। यस्मिन् व्यापारे कृते करणं फलोत्पादाय समर्थं भवति। 'कुठारेण छिनत्ति' इत्यत्र भवत्येतादृशी मतिः—कुठारेण तथा व्यापारवान् भवति कर्त्ता यस्मिन्व्यापारे कृते कुठारेण छेदनं सम्पद्यते। एवं 'यजेत स्वर्गकामः' इत्यत्र यागेन तथा व्याप्रियते कर्त्ता यस्मिन् व्यापारे कृते यागात् स्वर्गो भवति। करणन्तु वेदे धात्वर्थयागादि। लोके तु कुठारादि। आख्यातार्थव्यापारश्च लोके उद्यमननिपातनादिः। वेदे तु अग्न्यन्वा-

दर्पणव्याख्या

इत्यादावित्यर्थः। ❀ कर्तृकर्मपदे इति ❀ अस्यानुवृत्तोपात्ते इत्यादिः। ❀ कर्तृत्वकर्मत्वपरे इति ❀ आकृतिशक्तिवादमभिप्रेत्य भावप्रधाननिर्देशाद्वेति भावः। ❀ कर्तृत्वम्—कृतिरिति ❀ कृञो यत्नवाचकत्वेन तत्प्रकृतिककर्त्रर्थकतृजन्तकर्तृशब्दस्य कृत्याश्रयवाचकतया तदुत्तरभावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतकृतिरूपधर्मबोधनादिति भावः। ❀ कर्मत्वञ्च फलमिति ❀ कर्मशब्दस्य धात्वर्थफलाश्रये पारिभाषिकत्वादिति भावः। ❀ शङ्क्यमिति ❀ तथाच तत्सूत्रबलान्न कर्तृकर्मणोराख्यातशक्तिः सिध्यतीति भावः।

BGDF Sri Gangadhara Digital Foundation

अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्, तर्हि कृता-

प्रभा

धानादिब्राह्मणतर्पणान्तः। अन्योत्पादानुकूलव्यापारत्वमेतन्मते स्पन्द (जडनिष्ठकर्म) यत्नोभयसाधारणम्। एवञ्च 'रथो ग्रामं गच्छति' इत्यत्र रथस्तथा गमने व्याप्रियते यस्मिन् व्यापारे कृते गमनाद् ग्रामप्राप्तिर्भवति। अत्र गमनं धात्वर्थ एव। अत्र मते रथे न यत्नारोपः, स्वत एव गमनानुकूलव्यापारस्य रथे सत्त्वात्। एवं 'देवदत्तः प्रयतते' इत्यत्रापि देवदत्तस्तथा व्याप्रियते यथा प्रयत्नो भवति। यत्नानुकूलव्यापार एव आख्यातार्थः। अत्र व्यापारश्चेच्छारूपो यत्नस्येच्छाजन्यत्वादिति धात्वर्थाद् भिन्न आख्यातार्थ इति मीमांसकाः।

दर्शनान्तरीयरीत्येति—दर्शनम्—अध्यात्मज्ञानोपायभूतं शास्त्रम्, अन्यद् न्यायशास्त्राद् भिन्नं यद्दर्शनं मीमांसारूपं तद्रीत्येत्यर्थः। व्यापारस्य=आख्यातवाच्यस्येत्यर्थः। एतेन कस्यचिन्मीमांसकस्य मते व्यापारस्य धात्वर्थत्वेऽपि धात्वर्थत्वाभावादित्युक्तिरसङ्गतेत्यपास्तम्, आख्यातार्थव्यापारस्य तन्मतेऽपि धात्वर्थभिन्नत्वात्। तत्र=व्यापारे।

यद्वा, फलमात्रं धात्वर्थः, फुत्कारादिव्यापार एवाऽख्यातार्थ इति भाट्टरहस्यमताभिप्रायेण व्यापारस्य धात्वर्थत्वाभावादित्युक्तिः। परन्त्वेतन्मते 'अग्निष्टोमेन यजेत' इत्यत्र फलमात्रस्य यजधात्वर्थत्वे तत्र फले अग्निष्टोमस्याभेदान्वयासम्भवः, यागरूपस्य कर्मणः क्षणनश्वरत्वादित्यादिमीमांसासिद्धान्तभङ्गश्चेति यत्किञ्चिदेतत्। परन्तु तमेव सिद्धान्तं मत्वैतद्ग्रन्थप्रवृत्तिरिति प्रतीयते। विक्लित्त्यादिफलमात्रं धात्वर्थो न व्यापारः, धातुवृत्त्यानुपूर्व्याः शक्तावच्छेदकत्वे तदानन्त्यात्परिगणिततिङादिप्रत्ययानामेव व्यापारवाचकत्वं लाघवात्।

तत्र शक्तावच्छेदकं नाख्यातत्वम्, अननुगमात्, किन्तु तिङ्वृत्त्यन्यतमत्वमेव। यद्वा, आख्यातत्वं जातिरेवेति तदेवावच्छेदकम्।

तिप्वादिना साङ्कर्यन्तु न, आख्यातत्वाभावसामानाधिकरण्यस्य तिप्त्वेऽभावात्। साङ्कर्यञ्च—स्वसामानाधिकरण्य—स्वाभावसामानाधिकरण्य—स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वैतत्त्रितयसम्बन्धेन परस्परविशिष्टत्वरूपम्।

न च फलमात्रस्य धात्वर्थत्वे क्रियावाचकत्वाभावाद् धातुसंज्ञानापत्तिः, फलस्यापि 'कर्मवत्कर्मणा' (३-१-८७) इति सूत्रे क्रियापदव्यवहार्यत्वेन भाष्ये दृष्टतया क्रियावाचित्वात्ततः। 'पच्यते तण्डुलः स्वयमेव' इत्यादौ वैयाकरणमतेऽपितथात्वस्यैवाङ्गीकरणीयत्वात्। एवं फलस्य धातुवाच्यत्वे ऽपि तदाश्रयत्वरूपे कर्मत्वे एव लकारः स्यादित्यपि पूरणीयम्। अन्यथा 'कर्तृकर्मादिवाचित्वं न' इत्युत्तरग्रन्थे कर्मग्रहणासङ्गतिः स्यात्।

कृतामिति—ण्वुलादिकृत्संज्ञकप्रत्ययस्थले मीमांसकैरपि व्यापाराश्रयवाचकत्वस्यैव स्वीकारात्। यदि

दर्पणव्याख्या

❀ दर्शनान्तरीयेति ❀ दर्शनं शास्त्रं न्यायादिः, अन्यद्दर्शनं दर्शनाऽन्तरं तत्र भवा दर्शनान्तरीया, गहादित्वाच्छः। 'पचति' इत्यस्य पाकं करोतीति विवरणात् फलं पच्याद्यर्थस्तिङ् तु व्यापारवचन इति मीमांसका मन्यन्ते। तन्मते व्यापारस्यान्यलभ्यत्वाभावात्तत्र लकारविधौ न किञ्चिद् बाधकम्। यद्यप्युक्तरीत्या व्यापारे शक्तिसिद्धावपि फलशक्तिबोधकं कर्मणीत्यनुपपन्नमेव, तथाप्यभिधानाऽनभिधानव्यवस्थार्थं तदप्यावश्यकमेव, द्वेधा भानं तु कथञ्चित् परिहरणीयमिति भावः। ❀ कृतामिति ❀ कृत्संज्ञकानां ण्वुल्तृजादीनामित्यर्थः। ननु 'कर्तरि कृत्' इत्येव तत्र शक्तिसाधकमस्त

मपि कर्तृकर्म्मादिवाचित्वं न सिद्ध्येत्, 'कर्त्तरि कृत्' इति च 'लः कर्म्मणि' इत्यनेन तुल्ययोगक्षेमम्।

अपि च मीमांसकानां कृतामिवाऽऽख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एवाऽऽक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं माऽस्तु।

प्रभा

लाघवादत्र कर्त्रादिपदं धर्मपरमेव तदा कृत्यपि तदेव स्यात्। ननु तत्र 'कर्त्तरि कृत्' 'तयोरेव कृत्यक्त' इत्यादिसूत्रबलात्तत्र कर्त्रादिपदं धर्मिपरं स्यादित्यत आह—कर्त्तरि कृदिति—चेन 'तयोरेव' इत्यस्य संग्रहः। तुल्ययोगेति—अलब्धस्य लाभो योगः। लब्धस्य परिरक्षणं क्षेमम्, योगश्च क्षेमश्चानयोः समाहारो योगक्षेमम्, तुल्यं योगक्षेमं यस्य तत्।

अयम्भावः—यदि 'कर्त्तरि कृत्' इत्यत एव 'लः कर्मणि' इत्यत्र 'कर्त्तरि' इत्यनुवर्तते। तत्र यदि 'पाचको देवदत्तः' इत्यत्र 'विक्लित्त्यनुकूलभावनाश्रयाभिन्नो देवदत्तः' इति सामानाधिकरण्येनान्वयलाभाय कर्तृपदमाश्रयबोधकमिति लब्धस्याश्रयरूपार्थस्य परिरक्षणरूप क्षेमम्। अलब्धाया भावनाया लाभाय आक्षेप इति योगश्चाश्रीयते तदाऽत्रापि तथैव योगक्षेमं स्यात्, तत एव कर्तृपदानुवृत्तेः। लः कर्मणीति सूत्रे कर्तृपदं धर्मं (कर्तृत्व) परं कर्त्तरि कृदिति सूत्रे तु धर्मिं (कर्तृ) परमिति वैषम्यं न स्यात्, बीजाभावात्। यदि 'लः कर्मणि' इत्यत्र धर्मपरं तदा कर्त्तरि कृत् इत्यत्रापि धर्मपरमेव स्यादित्याश्रय (कर्त्ता) आक्षेपलभ्यः स्यादिति कर्त्तृकर्मकृतामाश्रयबोधकत्वमिति मीमांसकसिद्धान्तभङ्ग इत्याह-तर्हि कृतामपीति—'न हि गोधा सर्पन्ती अहिर्भवति' इति भाष्यप्रामाण्यादुभयत्रापि तुल्यार्थकत्वमेव स्यादिति भावः।

ननु शब्दाधिकाराश्रयणात्कर्तृपदमत्र धर्मपरं स्यात्, न च प्रमाणाभावः, तिङभिप्रायेण 'शक्तिः (कर्मत्वादिरूपा) कारकम्', कृदभिप्रायेण 'शक्तिमत् (कर्मादि) कारकम्' इति भाष्यस्यैव मानत्वादिति चेन्न, तादृशाभिप्रायस्य भवत्कपोलकल्पितत्वात्। ननु कृति सामानाधिकरण्येनान्वयदर्शनाद् धर्मिपरत्वमित्यत आह—अपि चेति। तथा च मीमांसकमते यथा कृदर्थकर्त्राऽऽक्षिप्तभावना शाब्दबोधे भासते तथाऽत्रापि तिङर्थकर्त्राक्षिप्तभावनायाः शाब्दबोधविषयत्वं स्यादिति भावः।

दर्पणव्याख्या

आह ❀ कर्तरि कृदिति चेति ❀ तत्सूत्रादेव च कर्तरीति अत्रानुवर्त्तते। तथाच पूर्वसूत्रस्थकर्तृपदस्य धर्मिपरत्वमेव, अत्र धर्मपरतायां तु तत्रापि धर्मपरतैव स्यात्। तदेवाह ❀ तुल्ययोगक्षेममिति ❀ अलब्धलाभो योगः, लब्धरक्षणं क्षेमम्। एवञ्च 'लः कर्मणि' इत्यस्यानन्यलब्धभावनाया आख्यातार्थत्वप्रतिपादकत्वोपगमे न्यायसाम्यात्, कर्तरि कृत्' इत्यस्यापि कृतां भावनार्थत्वप्रतिपादकत्वम्। तस्या आक्षेपादेव लाभान्न कृतां तच्छक्तिप्रतिपादकं तदिति यदि, तर्हि 'लः कर्मणि' इत्यपि नाऽऽख्यातस्य भावनाशक्तिप्रतिपादकमिति समानमित्यर्थः।

ननु पूर्वसूत्रस्थकर्तृपदस्य धर्मिपरत्वेऽप्यनुवृत्तस्य तस्य शब्दाधिकाराऽऽश्रयणेन धर्मपरत्वसम्भवान्नोक्तदोषः। यदि च शब्दाधिकाराऽऽश्रयणं सत्येव गमके, प्रकृते च तदाश्रयणे प्रमाणाभाव इति विभाव्यते, तदाऽपि 'शक्तिः कारकम्' 'शक्तिमत्कारकम्' इति पक्षद्वयस्याप्याकरसिद्धतया तद्विकल्पस्य तिङ्कृतोर्व्यवस्थितत्वाश्रयणादर्थाधिकाराश्रयणेऽप्यभिमतार्थलाभोऽक्षत एवेत्यत आह ❀ अपि चेति ❀ तथाच विकल्पव्यवस्थाया एवाप्रामाणिकत्वेनैकार्थपरतैव न्याय्येति भावः। नन्वाख्यातस्य व्यापारावाचकत्वे कथं ततस्तद्बोधोऽत आह ❀ भावनाया इति ❀। ❀ कृदादिवदिति ❀ 'तत्र तस्येव' इति वतिः, कृदादिस्थले इवेत्यर्थः। आदिपदात् कर्त्तविहिततद्धित इत्यादेः परिग्रहः। तथाच यथा भवन्मते

तथा सति प्राधान्यं तस्या न स्यादिति चेन्न, 'घटमानय' इत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। पचतीत्यादौ पाकं करोतीति भावनाया विवरणदर्शनाद्वाच्यत्वमिति चेन्न, पाकाऽनुकूलव्यापारवतः कर्त्तुरपि विवरणविषयत्वाऽविशेषात्।

न च कर्त्तुर्विवरणं तात्पर्याऽर्थविवरणम्, पाकं करोतीत्यशब्दाऽर्थकर्मत्वविवरणवत्, इतरेतर-

प्रभा

ननु कृदाक्षिप्तभावना यथा 'पाचकः' इत्यादिस्थलेऽप्रधानीभूता तथाऽऽक्षिप्तभावनायाः प्राधान्यं न स्यादित्याह—तथा सतीति-। व्यक्तेरपीति—'आकृतिः (जातिः) पदार्थः' इति मीमांसकनये 'घटमानय' इत्यादौ जातेरानयनासम्भवाज्जात्याक्षिप्तव्यक्तेर्यथा प्राधान्येन भानं तथा आक्षिप्ताऽपि भावना प्राधान्येन भासेत, आक्षिप्तस्याप्राधान्यमेवेति नियमाभावादुक्तस्थले व्यभिचारात्, प्राधान्याप्राधान्ययोरनुभवानुसारित्वाच्चेति भावः। न च प्रत्ययार्थाऽऽक्षिप्तस्याप्राधान्यमिति नियमान्नोक्तस्थले व्यभिचारः, एतादृशनियमे मानाभावात्, फलाभावात्, षष्ठ्यर्थसम्बन्धे मतुबिति पक्षे सम्बन्धाक्षिप्तव्यक्तेरपि प्राधान्यदर्शनेन 'गोमन्तमानय' इत्यादौ व्यभिचाराच्च। विवरणेति—तत्समानार्थकशब्दान्तरेण तदर्थकथनं विवरणम्। तथाच 'पचति' इत्यत्र अर्थवच्छब्दद्वयम्—'पच्' इत्यस्य पाकमित्यनेन, तिबर्थभावनाया यत्नार्थककरोतिना च विवरणदर्शनादाख्यातवाच्या भावना प्रतीयत इति भावः। ननु विवरणस्यैवार्थनिर्णायकत्वे 'करोति' इत्यत्र कृञा यत्नस्य, तिपा यत्नाश्रयकर्त्तुरपि विवरणविषयत्वेनाख्यातार्थो भावनेत्यत्र विवरणस्य निर्णायकत्वं न स्यादित्याह—कर्त्तुरपि विवरणेति। तात्पर्यार्थेति—'पचति' इत्यतस्तिङर्थभावनाक्षिप्तकर्त्तृबोधो जायतामितीच्छारूपतात्पर्यविषयीभूतार्थविवरणमेव कर्त्तुरिति न ततः कर्त्तुस्तिङ्वाच्यत्वं सिध्यति।

ननु शब्दार्थस्यैव विवरणत्वदर्शनेन तात्पर्यार्थविवरणाप्रसिद्धिरित्यत आह—पाकमिति-'पाकं करोति' इति विवरणेऽमा कर्मत्वस्यापि विवरणात् 'पचति' इत्यत्र कर्मत्ववाचकपदाभावादशब्दार्थस्यापि कर्मत्वविवरणवदिति भावः। ननु अशब्दार्थस्याऽर्थस्यापि कर्मत्वस्य कर्मतानिरूपकत्वसम्बन्धेन विक्लित्तेर्व्यापारेऽन्वयेन फलस्यापि व्यपदेशिवद्भावेन कर्मत्वादाकाङ्क्षाभास्यसम्बन्धस्य विवरणविषयत्वेऽपि विशेषणतया भासमानस्य कर्त्तुस्तात्पर्यार्थविवरणत्वासम्भव इत्यरुचेराह—इतरेतरेति—मीमांसकादिमते समाहारद्वन्द्वे उत्तरपदस्य समाहारे लक्षणेति चेन पदार्थस्यैव विवरणमित्यत उक्तमितरेतरेति। इतरेतरयोगद्वन्द्वे 'धवखदिरौ' इत्यादौ साहित्यबोधकपदाभावादपदार्थस्यापि साहित्यस्य द्वित्वान्वयानुरोधेन भानम्। तस्य च साहित्यस्य द्वित्वानति-

दर्पणव्याख्या

धातोर्व्यापारावाचकत्वेन कृदर्थकर्त्राक्षिप्तभावनाया बोधविषयत्वं तथाऽऽख्यातेऽपीति भावः। ❀ तथा सतीति ❀ भावनाया आख्यातावाच्यत्वे सतीत्यर्थः। ❀ तस्याः ❀ भावनायाः। ❀ प्राधान्यम् ❀ मुख्यविशेष्यत्वम्। ❀ घटमानयेति ❀ 'जातिः पदार्थः' इति मते जात्याक्षिप्तव्यक्तेर्यथा प्राधान्यं तथा कर्त्राक्षिप्तभावनाया अपि प्राधान्यमुपपत्स्यत इत्यर्थः। शक्तिग्राहकेषु परिगणिताद्विवरणाद्भावनावाचकत्वमाख्यातस्याऽऽप्यास्यतीत्याशङ्कते ❀ भावनाया इति ❀ ❀ विवरणेति ❀ तत्समानाऽर्थकपदाऽन्तरेण तदर्थकथनस्य विवरणतया प्रकृते पचतीत्यस्य पाकभावनेत्याख्यातस्य भावनापदेन विवरणात्तस्य भावनावाचकत्वमित्यर्थः। विवरणस्य स्वस्वबोधानुसारितया न तेनाऽर्थनिर्णय इत्याह ❀ पाकाऽनुकूलेति ❀ पचतीत्यस्यैककर्त्तृका पाचिक्रियेति कर्त्तुर्विवरणस्याऽपि दर्शनेनाऽख्यातस्य भावनायां शक्तिरुत कर्त्तरीत्यत्र विनिगमकाऽभावादिति भावः। ❀ इतरेतरयोगद्वन्द्व इति ❀ समाहारद्वन्द्वे उत्तरपदलक्ष्याऽर्थसमाहारस्य चशब्देन

योगद्वन्द्वे समुच्चयांऽशविवरणवद्वा न तदर्थनिर्णायकमिति वाच्यम्, भावनायामपि तुल्यत्वात्। किञ्च, 'पचति देवदत्तः' इत्यत्राऽभेदान्वयदर्शनात्तदनुरोधेन कर्त्तुर्वाच्यत्वमावश्यकम् 'पक्ता

प्रभा

रिक्ततया द्वित्वस्य च द्विवचनादिनैवोपस्थित्या द्वन्द्वघटकापदार्थस्यैव चेन विवरणमिति संसर्गभिन्नस्याप्यपदार्थस्य विवरणं दृष्टमिति भावः, तदाह—समुच्चयांशेति—समुच्चायांशश्चद्वयेन विव्रियते। अपदार्थस्यापि विवरणाङ्गीकारे तिङः कर्त्तृवाचकत्वे कर्त्तुर्विवरणं न साधकं स्यादिति तत्त्वम्। एवञ्च करोतिना विवरणं भावनाया अपि तिङ्वाच्यत्वोपपादकं न स्यादित्याह—भावनायामपीति। विवरणस्य स्वस्वव्युत्पत्त्यनुसारित्वान्नाभीष्टार्थसाधकत्वमिति भावः। नन्वाख्यातस्य कर्त्तृवाचकत्वे भावनाश्रयत्वरूपकर्त्तृस्वरूपसिद्धये भावनाऽऽक्षिप्ता गुणीभूतैव प्रतीयेत न प्राधान्येन, अन्यथाऽऽक्षेपानुपपत्तिः, उपपादकस्योपपाद्यफलकत्वाद् रात्रिभोजनवत्।

न च 'आकृतिः पदार्थः' इति वादे आक्षिप्तस्यापि प्राधान्यं दृष्टमिति वाच्यम्, जात्या परिच्छेद्यत्वेन व्यक्तेरपेक्षितत्वात्परिच्छेदकापेक्षया परिच्छेद्यस्य सर्वत्र प्राधान्येनैव प्रतीत्याऽन्यत्राक्षिप्तस्य प्राधान्ये मानाभावादित्यत आह— किञ्चेति। यद्वा, ननु लाघवाद् भावनैवाख्यातवाच्या स्यान्न कर्त्ता, शक्यतावच्छेदके गौरवात्। नन्वेवं कृतामपि तथात्वापत्तिरिति चेन्न, 'पक्ता देवदत्तः' इत्यादावभेदान्वयस्य सर्वसम्मतत्वेन तत्र कर्त्तुर्वाच्यत्वस्यावश्यकत्वादित्यत आह—

किञ्चेति। यथा 'पक्ता देवदत्तः' इत्यत्राभेदान्वयस्यानुभवसिद्धत्वं तथा 'पचति देवदत्तः' इत्यत्रापि। देवदत्तपदार्थस्य अभेदेन, तिङर्थैकत्वस्य च समवायसम्बन्धेन तिङर्थकर्त्तरि अन्वयः। तिङर्थकर्त्तुश्च निष्ठत्वसम्बन्धेन, तिङर्थवर्तमानकालस्य चावच्छेद्यत्वसम्बन्धेन व्यापारेऽन्वयः। तथाच देवदत्ताभिन्नैकत्वविशिष्टकर्त्तृनिष्ठविक्लित्त्यनुकूलो वर्तमानकालावच्छिन्नो व्यापार इति।

'देवदत्तः तण्डुलान् पचति' इत्यनेन परिष्कृतार्थबोधस्तु—अभेदसम्बन्धावच्छिन्नदेवदत्तत्वाव-

दर्पणव्याख्या

विवरणादुक्तमितरेतरेति। धवखदिरावित्यादिद्वन्द्वघटकपदाऽशक्यसाहित्यस्य विग्रहवाक्यस्थचशब्देन विवरणवदित्यर्थः। इदं चाऽन्वयप्रयोजकरूपवत्त्वं योग्यता। एवञ्च, घटेन जलमाहरेत्यत्र जलाऽहरणप्रयोजकतया छिद्रेतरत्ववत् प्रकृते द्वित्वाऽन्वयप्रयोजकतयाऽपदार्थसाहित्यस्याऽपि भानमित्यभ्युपेत्योक्तम्। तत्र साहित्यस्य द्वित्वाऽऽद्यतिरिक्तस्याऽननुभवात्तस्य द्विवचनादिनैवोपस्थितेर्न तत्र समासघटकप्रत्येकपदवृत्तिः। तस्यैव चेन विवरणमिति मताऽन्तरन्तु वक्ष्यते। ❀ तुल्यत्वादिति ❀ भावनापदेनाऽऽख्यातस्य विवरणमप्यपदार्थविवरणमित्यस्यापि वक्तुं शक्यत्वादित्यर्थः। स्वस्वबोधाऽनुसारिविवरणस्य नाऽर्थनिर्णायकत्वमित्यप्युभयोः समानमिति भावः।

नन्वाख्यातस्य कर्त्तृवाचित्वे तदाक्षिप्तभावनायाः प्राधान्याऽनुपपत्तिः। न चाकृतिवादे जात्याक्षिप्तव्यक्तिवत् प्राधान्यमुपपादितमेवेति वाच्यम्, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्, तथाहि—कर्त्रा स्वस्वरूपनिरूपकतया भावनाऽऽक्षेप्तव्या, भावनाविरहिणः कर्त्तृत्वासम्भवात्। ततश्च धर्मिग्राहकमानसिद्धगुणत्वेन प्राधान्याऽसम्भवः कृतीव। जात्या तु परिच्छेद्यतयाऽवगतस्य द्रव्यस्य तथैवाऽऽक्षेपाद् भवति तस्य प्राधान्येन भानमिति प्राधान्याऽनुरोधाद्भावनाया वाच्यत्वमावश्यकमित्यतो दूषणाऽन्तरमाह ❀ किञ्चेति ❀। अभेदाऽन्वयदर्शनादिति ❀ देवदत्ताऽभिन्नैककर्त्तृको वर्त्तमानो व्यापारः इत्याकारकबोधस्याऽऽकरसम्मतत्वादित्यर्थः। ❀ तदनुरोधेनेति ❀ अभेदाऽन्वयाऽनुरोधेनेत्यर्थः। ❀ आवश्यकमिति ❀ अन्यथाऽनुभूयमानतादृशबोधाऽपलापाऽऽपत्तिरिति भावः।

देवदत्तः' इतिवत् । नचाऽभेदबोधे समानविभक्तिकत्वं नियामकम्, तच्चात्र नास्तीति

प्रभा

च्छिन्नप्रकारतानिरूपित–समवायसम्बन्धावच्छिन्नैकत्वत्वावच्छिन्नप्रकारतानिरूपिताश्रयत्वावच्छिन्नविशेष्यत्वावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नाश्रयत्वावच्छिन्नप्रकारतानिरूपिता अथ च समवायसम्बन्धावच्छिन्नबहुत्वत्वावच्छिन्नप्रकारतानिरूपिततण्डुलत्वावच्छिन्नविशेष्यत्वावच्छिन्नाभेदसम्बन्धावच्छिन्नतण्डुलत्वावच्छिन्नप्रकारतानिरूपितकर्मत्वावच्छिन्नविशेष्यत्वावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नकर्मत्वावच्छिन्नप्रकारतानिरूपितविक्लित्तित्वावच्छिन्नविशेष्यत्वावच्छिन्नानुकूलत्वसम्बन्धावच्छिन्नविक्लित्तित्वावच्छिन्नप्रकारतानिरूपिता च या वर्तमानकालावच्छिन्नव्यापारत्वावच्छिन्ना विशेष्यता तच्छालीति ।

अत्रेदं बोध्यम—सर्वकारकविभक्तीनां कर्मत्वादिशक्तिमान्, क्रियाकारकसम्बन्धश्चार्थः, तदतिरिक्तानान्तु स्वस्वामिभावादिसम्बन्ध एवार्थः । 'राजपुरुषयोः सम्बन्धस्य षष्ठी वाचिका, क्रियाकारकयोः सम्बन्धस्य द्वितीया वाचिका' इति समर्थसूत्रभाष्यात् ।

विशेषणत्वज्ञाने एव सम्बन्ध्याकाङ्क्षोदयेन विशेषणत्वञ्च सर्वविभक्तीनामर्थः । क्रियाकारकभावश्च साध्यसाधनरूप एव । तथाच 'हरिं भजति' इत्यादौ हर्यभिन्नकर्मनिष्ठसाध्यसाधनभावसम्बन्धावच्छिन्नविशेषणतानिरूपितविशेष्यतावद्भजनमिति बोधः । तत्र विशेष्यत्वं वाक्यशक्तिलभ्यम् । कर्मत्वस्य हरिनिष्ठत्वे ज्ञाते यत्समानाधिकरणप्रीतिरूपफलस्यापि हरिनिष्ठत्वं ज्ञायते । तन्मूलक एव हरिनिष्ठप्रीत्यनुकूलो व्यापार इत्यादिबोधः । न तु धात्वर्थफले प्रकृत्यर्थहर्यादेरन्वयः शाब्दः, सर्वकारकाणां भावनान्वयनियमात् । कारकाणां कर्तृनिष्ठभावनासाधनत्वञ्च भावनाभाव्यफलसाधकत्वमेव । एवमेव यागस्य भावनाकरणत्वमुपपादितं मीमांसकैः ।

कारकाणामन्वयः प्राधान्याद् भावनायामेव, न तु फले । तस्मात् क्वचित्फलीभूतफलान्वयप्रदर्शनात् कर्मकारकस्य तत्र शाब्दान्वय इति न भ्रमितव्यम् । किन्तु कर्मणः स्वनिष्ठफलनिष्पादकत्वसम्बन्धेन व्यापारे एवान्वय इत्यन्यत्र विस्तरः ।

अभेदान्वयानुरोधेन कर्त्तुर्वाच्यत्वस्यावश्यकत्वमित्याह—देवदत्त इति । प्रकारतया विशेष्यतया च शाब्दबोधे भानं पदनिष्ठवृत्तिज्ञानजन्योपस्थितिविषययोरेवेति व्यापारे प्रकारतया भासमानस्य कर्त्तुस्तिङ्वाच्यत्वमावश्यकमिति भावः ।

समानविभक्तिकत्वमिति—अभेदसम्बन्धावच्छिन्न (संसर्गानवच्छिन्न) नामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति विशेष्यविशेषणवाचकपदयोः समानविभक्तिकत्वज्ञानं कारणम् । तच्च समानविभक्तिकत्वं विशेषणवाचकपदनिष्ठं विशेष्यवाचकपदप्रकृतिकविभक्तिसजातीयविभक्तिकत्वरूपमेव । साजात्यञ्च—विभक्तिविभाजकप्रथमात्वादिना, इति 'वेदाः प्रमाणम्' इत्यादौ न दोषः । 'नीलो घटः' इत्यादौ यथा समानविभक्तिकत्वं तथाऽत्र नास्तीत्याह—तच्चात्रेति ।

दर्पणव्याख्या

❀ नियामकमिति ❀ तद्विभक्त्यन्तनामार्थनिष्ठाऽभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति तद्विभक्त्यन्तपदजन्योपस्थितेर्हेतुत्वस्य 'नीलो घटः' इत्यादौ क्लृप्तत्वादित्यर्थः । ❀ तच्चेति ❀ अभेदान्वयबोधप्रयोजकसमानविभक्तिकत्वं चेत्यर्थः । ❀ अत्र ❀ देवदत्तः पचतीत्यादौ । तादृशनियमव्यतिरेकव्यभिचारस्थलानि दर्शयति—

SGDF

वाच्यम्, 'सोमेन यजेत' 'स्तोकं पचति' 'राजपुरुषः' इत्यादावप्यभेदबोधाऽनापत्तेः ।

प्रभा

उक्तनियमे व्यभिचारमाह—सोमेनेति । सोमो लताविशेषः । तस्य मत्वर्थे लक्षणया यजधात्वर्थयागेऽभेदान्वयेन, यागस्य च करणतानिरूपकत्वसम्बन्धेन तिङर्थभावनायामन्वयेन सोमवदभिन्नयागनिष्ठकरणतानिरूपिका इष्टफलिका भावनेति बोधः । इष्टञ्च—स्वर्गादि ।

ननु सोमपदार्थस्य न यागेऽभेदान्वयः, किन्तु करणतया भावनायामन्वय इति नात्रोक्तनियमे व्यभिचार इति चेन्न, सोमयागयोः स्वातन्त्र्येण करणतानिरूपकत्वेन भावनायामन्वये वाक्यभेदापत्तेः, फलभावनायां करणीभूतस्यैव प्राधान्येन यागवत्सोमस्यापि प्राधान्यापत्त्या 'यागार्थः सोम' इति व्यवहारानुपपत्तेश्च । एवं तिङ्प्रत्ययोपात्तभावनायाः करणाकाङ्क्षायां समानपदोपस्थितधात्वर्थयागस्य करणतयाऽन्वयेनाकाङ्क्षानिवृत्तेर्विभिन्नपदोपस्थितसोमस्यान्वयानुपपत्तिः । न च सोमस्याभेदेन यागेऽन्वये 'क्रियाविशेषणानां कर्मत्वम्' इत्यभियुक्तोक्तेः कर्मतया सोमपदात् तृतीयानुपपत्तिः, यत्र धात्वर्थस्य भावनायां कर्मतानिरूपकत्वेनान्वयः, यथा 'स्तोकं पचति' इत्यादौ, तत्रैव क्रियाविशेषणानां कर्मत्वाभ्युपगमात् । प्रकृते तु यागस्य करणतयान्वय इति कर्मत्वाप्राप्तेः । नन्वेवमपि धात्वर्थफलस्य भावनारूपव्यापारोत्तरकालिकत्वेन तत्र करणतयाऽन्वयासम्भवः, भावनाभाव्यं यत्स्वर्गादि तन्निर्वर्तकत्वरूपपारिभाषिककरणत्वस्यैवात्र विवक्षितत्वात् । व्यभिचारान्तरमाह—स्तोकमिति—अत्र विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वेन तत्र स्तोकपदार्थस्याभेदान्वयः, समानविभक्तिकत्वं तु नास्तीति व्यभिचारः ।

ननु नामार्थद्वयस्य यत्राभेदेन विशेष्यविशेषणभावस्तत्रैव समानविभक्तिकत्वं नियामकमिति व्यभिचाराभाव इत्यत आह—राजपुरुष इति—अत्र राजपदस्य राजस्वत्ववति (राजसम्बन्धिनि) लक्षणया पुरुषेऽभेदान्वयेनोक्तनियमे व्यभिचार इति भावः । नैयायिकमताभिप्रायेणायं दोषः । तन्मते व्यधिकरणतत्पुरुषे पूर्वपदस्य विभक्त्यर्थविशिष्टे लक्षणयाऽभेदेनैवान्वयात् ।

दर्पणव्याख्या

❀ सोमेन ❀ इत्यादिनाः—

नन्वत्र यागे सोमस्य करणत्वेनैवान्वयात् कथमुक्तनियमस्य व्यभिचार इति चेन्न, सोमस्य यागभावनायां करणत्वेनाऽन्वये यागस्याऽपि तत्र करणत्वेनैवाऽन्वयात् 'सोमेन यागेनेष्टं भावयेत्' इत्युभयविधाने वाक्यभेदप्रसङ्गः । सोमस्य यागवत् फलभावनाकरणत्वेन प्राधान्यापत्तिर्यागार्थत्वानुपपत्तिः, प्रत्ययवाच्यफलभावनायाः समानपदोपात्तयागस्य करणत्वेनैवान्वयादाकाङ्क्षानिवृत्तेर्विभिन्नपदोपात्तस्य सोमस्य करणत्वेनाऽन्वयानुपपत्तिश्च । 'सोमेन यागम्' इत्यन्वयाभ्युपगमे यद्यपि सोमस्य न यागार्थत्वानुपपत्तिः, करणत्वेनैवान्वयात्, तथाऽपि प्रत्ययार्थभावनाकरणत्वेन उपस्थितस्य साध्यत्वेनाऽन्वयानुपपत्तिर्दुष्परिहरैवेति सोमपदस्य मत्वर्थलक्षणया 'सोमवता यागेनेष्टं भावयेत्' इति विशिष्टार्थविधानाद्वाक्यभेदप्रसङ्गो नेति मीमांसकसिद्धान्तः । तत्र चोक्तनियमे व्यभिचारो दुर्वार इति भावः ।

❀ स्तोकं पचतीति ❀ अत्रापि धात्वर्थव्यापारजन्यफले विभिन्नविभक्तिकस्तोकपदार्थस्याभेदान्वयादित्यर्थः । ननु समानविभक्तिकत्वं नामाऽर्थयोरेवाऽभेदाऽन्वयबोधे प्रयोजकम् । अत एव व्युत्पत्तौ द्विवचनस्यैवोल्लेखः । नामत्वञ्च वक्ष्यते । प्रकृते चाऽनुयोगिप्रतियोगिनोर्नामार्थत्वाभावान्नोक्तदोषोऽत आह ❀ राजपुरुष इति ❀ ।

नच लक्षणया कर्त्तुरुक्तत्वात् सामानाधिकरण्यम्, पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वाऽनापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि, 'अनेकमन्यपदार्थे' 'साऽस्य देवता'

प्रभा

वैयाकरणनये तु समासादिवृत्तावेकार्थीभावरूपशक्तिस्वीकारेण पदार्थयोः पृथगुपस्थित्यभावेनान्वयस्यैवाभावेन व्यभिचाराभावः, पृथगुपस्थितयोः परस्परं सम्बन्धस्यैवान्वयपदार्थत्वात्। तन्मतेऽपि व्यभिचारस्तु 'स्तोकं पाकः' इत्यादिस्थले बोध्यः। यदि नामार्थपदेन मुख्यविशेष्यतयोपस्थितस्यैव ग्रहणम्, प्रकृते च घञर्थे विशेषणीभूतधात्वर्थे एवान्वयेन व्यभिचाराभावस्तर्हि 'स्तोकं पक्त्वा व्रजति'इत्यादौ व्यभिचारो ज्ञेयः। तत्र क्त्वाप्रत्ययस्य लिङ्गसंख्याद्यनन्वय्यर्थप्रतिपादकत्वेन धात्वर्थानुवादकतया धात्वर्थस्य मुख्यविशेष्यतयोपस्थितत्वात्। केचित्तु, उक्तव्युत्पत्तौ समासाघटकविशेषणवाचकेत्यादिनिवेशेन नोक्तव्यभिचार इत्याहुः।

वस्तुतस्तु समासघटकपदयोरपि अभेदान्वयप्रयोजकत्वमते व्युत्पत्त्यन्तरस्यैव स्वीकृतत्वेन नोक्तापत्तिरिति बोध्यम्। अभेदबोधानापत्तेरिति—तथाचाभेदान्वये समानविभक्तिकत्वस्याप्रयोजकत्वेन 'देवदत्तः पचति' इत्यादावभेदान्वयानुरोधात् तिङः कर्त्तृवाचकत्वं स्वीकार्यमिति भावः। सामानाधिकरण्यमिति—लक्षणयैवैकधर्मिबोधकत्वरूपसामानाधिकरण्यनिर्वाहे शक्तिस्वीकारो निष्फल एवेति भाव। यौगिकानामिति—योगः=प्रकृतिप्रत्ययाद्यर्थसम्बन्धः, अवयवनिष्ठवृत्तिर्वा, तेन तया वा निर्वृत्ता यौगिकास्तेषामित्यर्थः। 'तेन निर्वृत्तम्' (५-१-७९) इति ठकि साधु। द्रव्यवाचित्वेति—लक्षणयैव द्रव्यबोधनिर्वाहाद् धर्मिशक्तत्वानापत्तेरित्यर्थः। एवम्=लक्षणयैव सामानाधिकरण्यनिर्वाहे, समासवदिति वा तदर्थः। इत्यादितद्धितानामिति—इत्यादिवाक्यघटकतद्धितानामित्यर्थः।

ननु समस्यमानपदार्थसम्बन्धिन्येव बहुव्रीहिः, 'अनेकमन्यपदार्थे' इत्यनुशासनाद्विग्रहवाक्याच्च यदुपसर्जनको वर्त्तिपदार्थसम्बन्धः प्रतीयते स स्वाम्यादिरेवान्यपदार्थः। तथाच न यौगिकानां द्रव्यवाचित्वानापत्तिः, एवं वैश्वदेव्यादिघटकतद्धितानामपीत्यनुपपत्तिमुपपादयति—अनेकमिति।

दर्पणव्याख्या

यद्यपि 'सोमेन यजेत' इत्यत्रेव 'देवदत्तः पचति' इत्यत्रापि समानविभक्तिकत्वस्याऽतन्त्रतयाऽभिमतबोधान्वयानुरोधात् कर्त्तृवाचित्वं सिद्धमेव, तथाऽपि व्युत्पत्तेर्नामाऽर्थद्वयविषयकत्वेऽपि व्यभिचारो दुरुद्धर एवेत्याशयेन नामार्थद्वयस्थलमुपात्तम्। नैयायिकमतेन चेदम्, तैः कर्मधारये, षष्ठीतत्पुरुषे च पूर्वपदशक्यलक्ष्यान्यतरस्योत्तरपदार्थेऽभेदान्वयोपगमात्। स्वमते तु जहत्स्वार्थवृत्त्यभ्युपगमेन पूर्वोत्तरपदार्थयोरन्वयस्यैवाऽभावेनोक्तव्युत्पत्तेरप्रसरादिति बोध्यम्। इदमुपलक्षणम्—षष्ठ्यर्थबहुव्रीहेरपि।

अपरे तु—उक्तव्युत्पत्तौ नामांशेऽसमस्तत्वस्यापि विशेषणान्नोक्तस्थले व्यभिचार इत्याहुः। अधिकमग्रे वक्ष्यते। ❀ सामानाधिकरण्यमिति ❀ पदयोरेकार्थाऽभिधायित्वमित्यर्थः। ❀ यौगिकानामिति ❀ योगोऽवयववृत्तिस्तन्मात्रपुरस्कारेण प्रवृत्तानामित्यर्थः। ❀ द्रव्यवाचित्वाऽनापत्तेरिति ❀। धर्मिशक्तत्वाऽनापत्तेरित्यर्थः। ❀ एवमिति ❀ लक्षणयैव सामानाधिकरण्योपपादने इत्यर्थः, इत्थमेवेति वाऽर्थः। ❀ वैश्वदेवीत्यादीति ❀ द्रव्यवाचित्वाऽनापत्तेरित्यनुषज्यते। तथाच बलाबलाऽधिकरणोच्छेदाऽऽपत्तिरिति भावः।

तथाहि—'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति श्रूयते। अत्रायं संशयः—किमनया श्रुत्याऽऽमिक्षावाजिनोभयगुणकमेकं कर्म विधीयते? अथवा तत्तद्गुणदेवताभिन्नं कर्मद्वयमिति। वाजेनान्नेनाऽऽमिक्षारूपेण

इत्यनुशासनेन पिङ्गे अक्षिणी यस्याः, विश्वे देवा देवता अस्या इति विग्रहदर्शनात् प्रधानषष्ठ्यर्थे एव अनुशासनलाभात् ।

प्रभा

अनुशासनेनेति—अनुशिष्यतेऽनेनेति करणे ल्युटि अनुशासनम् = शास्त्रम् । तस्माद्विग्रहाच्च प्रधानषष्ठ्यर्थे एव बहुव्रीहेस्तद्धितस्य चानुशासन (अनुशिष्टिरनुशासनं विधानम्) लाभात्। प्रकृतार्थोपसर्जनकः प्रधानीभूतः सम्बन्ध एव वृत्त्यर्थ इति न शास्त्रबलाच्छक्त्या द्रव्योपस्थितिः । तदुक्तमधिकरणवार्तिके—

'बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते ।
अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते ॥' इति ।

एवं तद्धितान्तानामपि सम्बन्ध एव मुख्यार्थः ।

ननु तद्धितस्य समासस्य च सम्बन्धवाचकत्वेऽपि लक्षणया सम्बन्धिबोधकत्वेन सामानाधिकरण्योपपादने क्षत्यभाव इति चेन्न, बलाबलाधिकरणविरोधापत्तेः । तथाहि—'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति श्रूयते । आमिष्यते = सिच्यते इत्यामिक्षा, आङ्पूर्वकमिषधातोरौणादिके कर्मणि सकि आमिक्षा । तप्ते (पक्वे) पयसि दधियोजनायां या विकृतिः सा आमिक्षेत्युच्यते । घनीभूतं पयः पिण्डमिति यावत् । 'छन्ना' इति वङ्गदेशे प्रसिद्धिः । वाजिने देयम्, वाजिनो देवताऽस्येति वा विग्रहेऽणि वाजिनमामिक्षानिःसृतं जलम्। तत्रायं संशयः—यदनया श्रुत्या आमिक्षावाजिनोभयगुणकमेकं कर्म विधीयते, अथवा आमिक्षागुणकं कर्म भिन्नम्, वाजिनगुणकं कर्म भिन्नमिति ।

तत्रायं सिद्धान्तः—वैश्वदेवीपदेन विश्वदेवसम्बन्धिन्या उपस्थितिरिति 'नीलो घटः' इत्यत्र नीलघटपदयोरिव सम्बन्धिविशेषाकाङ्क्षायां सम्बन्धिनः श्रूयमाणतद्धितेनोपस्थितेरुभयोः समानार्थकतया श्रौतः सम्बन्धः । न चाऽऽमिक्षापदसमभिव्याहारादेवाऽऽमिक्षापदार्थरूपविश्वदेवाभिन्नदेवतासम्बन्धिद्रव्यस्य लाभादामिक्षयाऽपि वाक्यीयसम्बन्ध एव इति वाच्यम्, उभयोरेकार्थकत्वे श्रौतत्वमेवेति सिद्धान्तात्, यत्र तु भिन्नार्थकपदान्तरापेक्षा तत्रैव वाक्यीयसम्बन्धव्यवहारात् । 'वाजिभ्यो वाजिनम्' इत्यत्र 'वाजिभ्यः' इति वाजवदर्थकपदोपस्थाप्यवाजपदार्थस्य विभिन्नार्थकवाजिपदोपस्थापिततया वैश्वदेव्या सह वाक्यीयः सम्बन्ध इति वाक्यात् श्रुतेर्बलवत्तया आमिक्षया शान्ताकाङ्क्षेति विश्वदेवाभिन्नवाजिरूपदेवतान्तरोद्देश्यकवाजिन (आमिक्षानिःसृतजल)

दर्पणव्याख्या

सम्बन्धाद्वाजिनो विश्वेदेवाः, तानुद्दिश्य वाजिनगुणो विधीयते । तेनोभयगुणकं वैश्वदेवमेकं कर्मेति पूर्वपक्षे, 'वैश्वदेव्यामिक्षा' इत्यत्र तद्धितस्य देवतासम्बन्ध्यर्थकतया श्रौतः सम्बन्धः, 'वाजिभ्यो वाजिनम्' इत्यत्र तु वाक्येन सः । सत्यामपि पदान्तरापेक्षायां स्वाभिन्नाऽर्थकपदस्यैवापेक्षणान्न श्रौतत्वबाधः सम्बन्धस्य । यत्र तु भिन्नाऽर्थकपदाऽपेक्षा, तत्रैव वाक्यस्य विनियोजकत्वात् । एवञ्च, 'वैश्वदेव्याऽऽमिक्षा' इत्येतद्विहितवैश्वदेवयागानुवादेन न वाजिनगुणविधानम्, श्रौतद्रव्येण निराकाङ्क्षत्वात् । किन्तु कर्मान्तरविधिः । 'वाजिभ्यः' इति चापूर्वदेवताविधानमिति राद्धान्तः । यदि च तद्धितस्य देवतासम्बन्धे एव शक्तिस्तदा वाजिनाऽऽमिक्षयोर्वाक्यविनियोज्यत्वस्य साम्यादामिक्षाद्रव्येण देवतासम्बन्धस्य श्रौतत्वमिति सिद्धान्तव्याकोपः । लक्षिताऽऽमिक्षाद्रव्यमादाय देवतासम्बन्धे श्रौतत्वसम्बन्धात्तदनुपपत्त्यभावेन तद्धितस्य द्रव्यार्थकत्वकल्पनमत्ययुक्तं स्यादिति ।

❀ अनुशासनलाभादिति ❀ उपलक्षणमिदम्, युक्तेरपि । तथाहि—घटपदाद् घटत्वप्रकारकबोधवद् दण्ड्यादिपदाद्दण्ड-

तथाच 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति वाक्ये द्रव्याऽनुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्ये एवाऽन्वयप्रतिपादकाऽरुणाधिकरणोच्छेदाऽऽपत्तिः, द्रव्यवाचकत्वसाधकमूल-

प्रभा

गुणकं कर्मान्तरमेवानेन (वाजिभ्यो वाजिनम्) इति वाक्येन विधीयते इति सिद्धान्तः। तद्धितस्य लक्षणया सम्बन्धिबोधकत्वे तु आभिधया श्रौतः सम्बन्ध इति 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यम्' इति बलाबलाधिकरणोक्तिर्व्याहन्येतेति भावः। तथाचेति—लक्षणया सामानाधिकरण्योपपादने चेत्यर्थः।

अरुणयेति—ज्योतिष्टोमे 'अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति' इति श्रूयते। तत्र अरुण-शब्दो गुणवचनः, अरुणत्वजातिवचनो वा। तृतीयया च शक्यस्य गुणस्यैव करणत्वमुच्यते। साक्षाद् गुणस्य क्रयणकरणत्वासम्भवेऽपि रूपरसादितारतम्येन 'रूपेण क्रीणाति' 'रसेन क्रीणाति' इत्यादिप्रयोगाणां पन-साम्रादिषु दर्शनात् आरुण्यस्यापि स्वाश्रयद्रव्यद्वारा करणत्वोपपत्तिः। नच टाबर्थस्त्रीत्वस्य द्रव्ये एव सम्भवेन गुणिबोधकत्वमेव, लक्षणया सामानाधिकरण्यसम्बन्धेन द्रव्यगतस्त्रीत्ववैशिष्ट्यमादायैव टाबुपपत्तेः। एवञ्चा-रुण्यस्य प्रथमं क्रयणेऽन्वये तस्य साक्षात्क्रयणकरणत्वासम्भवेन द्रव्यापेक्षायामारुण्यस्य प्राकरणिकसर्वद्रव्येषु सन्निवेशे प्राप्ते प्रकरणापेक्षया वाक्यस्य बलीयस्त्वादारुण्यवाचकपदघटितवाक्यघटकैकहायन्यादिपदशक्यद्रव्ये एव सामानाधिकरण्यानुरोधेनान्वय इत्युक्तमरुणाधिकरणे।

तथाच सूत्रम्—'अर्थैकत्वे द्रव्यगुणयोरैककर्म्यनियमः स्यात्' द्रव्यगुणवाचकशब्दयोरर्थैकत्वे परस्पर-मभेदान्वयेनैकार्थबोधकत्वे सति ऐककर्म्यात्=विशिष्टस्यैकक्रियासम्बन्धान्नियमः स्यात् परस्परावच्छेदस्ये-त्यर्थः। एवञ्च एकहायन्यादिपदस्य द्रव्यावाचकत्वे सामानाधिकरण्यानुरोधेनाऽऽरुण्यस्य स्ववाक्योपात्तद्रव्ये एवान्वय इति अरुणाधिकरणोक्तं विरुध्येत, बहुव्रीहेः सम्बन्धमात्रबोधकत्वे वाक्योपात्तद्रव्यस्यैवाभावादिति

दर्पणव्याख्या

सम्बन्धवानिति प्रतीतिः सर्वसिद्धा। तत्राऽऽकृत्यधिकरणन्यायेन सम्बन्धमात्रं मतुबादिवाच्यं स्यात्। अत एव 'देवदत्त-स्य गोमत्त्वम्' इत्यत्र त्वप्रत्ययस्य सम्बन्धबोधकत्वं सङ्गच्छते। घटत्वमित्यादौ प्रकृत्यर्थघटत्वबोधकत्ववत् प्रकृतिजन्यबोध-प्रकारस्य भावप्रत्ययार्थत्वाद्, विशेषस्य संसर्गस्य कथं ततो बोध इति तु नाऽऽशङ्कनीयम्, यतस्तस्य स्वाक्षिप्तव्यक्त्यंशे प्रकारतयैव भानात्। एवं षष्ठ्यर्थविहितबहुव्रीहेरप्येकं हायनमस्या इति विग्रहे, दैवतार्थकतद्धितस्यापि विश्वे देवा देवता अस्या इति विग्रहे च प्रत्ययार्थसम्बन्धस्यैव प्राधान्यदर्शनात् तस्यैव वृत्तिवाच्यत्वनिर्णयः। उक्तञ्च—

यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते।
तस्याऽपि प्रत्ययार्थत्वात् सम्बन्धस्य प्रधानता॥ इति।

न च गोमानित्यादौ सम्बन्धिप्रतीत्यनुपपत्तिः, उभयाऽऽश्रितेन सम्बन्धेनाऽऽक्षेपात्तदुपपत्तेः। तव कर्तृवत् सम्बन्धवच्च। नचाऽसत्त्वभूतसम्बन्धस्यैव विभक्त्यर्थतया तद्विहितमतुबादेस्तादृशसम्बन्धबोधकत्वेन तत्र लिङ्गसङ्ख्याऽन-न्वयाऽऽपत्त्या सत्त्वभूतसम्बन्धे एवानुशासनाऽऽदरेण शक्तिरभ्युपेया। एवञ्च द्रव्यमेवार्थो मत्वर्थीयस्याऽस्तु, सम्बन्ध आक्षेपलभ्य एव किं न स्यात्। किञ्च, मतुबादेः सम्बन्धसामान्यार्थकत्वे तस्य सम्बन्धादिपदपर्यायताऽऽपत्त्या सम्बन्ध-विशेषार्थकत्वमेवोररीकरणीयम्। तत्त्वञ्चाऽनुयोगिप्रतियोगिविशेष्यनिरूप्यत्वम्। तथाचैकस्य निरूपकस्य प्रकृत्या लाभेऽप्य नुयोगिरूपनिरूपकभानार्थं तत्र शक्तिकल्पने त्वतीव गौरवमिति वाच्यम्, मतुबादेर्यसत्त्वभूतसम्बन्ध एव वाच्यः। अत एव सम्बन्धानामनेकत्वेऽलिङ्गकत्वेऽपि च दण्ड्यादिशब्दानामेकवचनान्तत्वं नानालिङ्गकत्वञ्च, सम्बन्धिनां तथात्व एव तादृशप्रयोगदर्शनात्। तथाच, मतुबर्थसम्बन्धो लिङ्गाद्यन्वयासम्भवात्तैरेवाऽऽक्षेपः सम्बन्धिनः, आख्यातार्थसंख्ययेव कर्त्रादेः।

युक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरिति प्रपञ्चितं विस्तरेण बृहद्वैयाकरणभूषणे। तिङः इति। बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम्।

पदार्थं निरूप्य वाक्यार्थं निरूपयति—फले इत्यादि। विक्लित्त्यादि फलं प्रति। तिङर्थः—कर्तृ-

प्रभा

भावः। अधिकन्त्वाकरग्रन्थे द्रष्टव्यम्। सामानाधिकरण्यस्येति—'पिङ्गाक्षी गौः' 'वैश्वदेवी आमिक्षा' इत्यनुभवसिद्धं सामानाधिकरण्यं तस्येत्यर्थः। उक्तरीत्या=लक्षणया। ननु 'लः कर्मणि' इति सूत्रेण लकाराणां शक्तिबोधनात् 'आश्रये तु तिङः स्मृताः' इत्युक्तिरसङ्गता इत्याशङ्कायामाह—बोधकतेति।

पदार्थं निरूप्येति—एतेन वाक्यार्थनिरूपणे 'पदार्थनिरूपणस्योपजीव्यत्वादुपजीव्योपजीवकभावरूपा सङ्गतिः प्रदर्शिता। फल इति—निरूपितत्वं सप्तम्यर्थः। तेनैव सम्बन्धेन प्रधानपदार्थघटकप्रधानत्वेऽन्वयः। तथाच फलनिरूपितप्राधान्यवदभिन्नव्यापार इति बोधः। तिङर्थ इति—तिङ्शक्यत्वेनानुगमादेकवचनम्।

दर्पणव्याख्या

वस्तुतस्तु लिङ्गसंख्याऽनन्वयित्वरूपासत्त्वभूतत्वमपि षष्ठ्यर्थादावर्थसिद्धम्, प्रत्ययार्थलिङ्गसंख्यादेः प्रत्ययार्थ एव ऽन्वयायोगात्, 'प्रत्ययानाम्' इति व्युत्पत्तेश्च। तस्मान्नासत्त्वभूतसम्बन्धः षष्ठीवाच्यः।

यत्तु, अनुयोगिरूपनिरूपकभानार्थं द्रव्ये शक्तिकल्पने गौरवमिति, तदपि न, सम्बन्धप्रत्यक्षे हि यावदाश्रयभानापेक्षा, न शाब्दे, येन तच्छक्तिकल्पनागौरवं सम्भाव्येत। तस्मात् तत्र मतुबादेः शक्तौ न किञ्चिद् बाधकमिति। प्रपञ्चितं चैतदधिकमन्यत्र।

एवञ्चैकहायन्यादिपदानां सम्बन्धवाचकतायामनुशासनस्य तदुपष्टब्धानेकयुक्तीनां च सत्त्वात् तत्रैव शक्तिः सिद्ध्येन्न सम्बन्धिनीत्यखण्डार्थः।

❀ तथाचेति ❀ सामानाधिकरण्यस्य लक्षणयैवोपपादन इत्यर्थः। ❀ अरुणाधिकरणेति ❀ तथाहि—'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति श्रूयते। तत्र किमरुणिमा वाक्यं भङ्क्त्वा प्रकरणे निवेशनीयः ?, किम्वा क्रीणातिना सम्बध्यते ? इति संशये, क्रीणातिना सम्बध्यमानस्तद्योगात् क्रयणकरणं स्यात्, नचाऽमूर्तस्य तद्युक्तमिति नास्य क्रयणसम्बन्ध इति पृथगेव प्रकरणे निवेशनीय इति पूर्वपक्षः।

सिद्धान्तस्तु, सम्भवति सन्निहितपदार्थान्वये प्रकरणनिवेशानौचित्यात् पिङ्गाक्ष्यादिपदानां द्रव्यवचनतया तस्मिन्नन्वयसौलभ्येन तद्द्वारा क्रीणात्यर्थेनाऽपि समन्वयलाभाद् वाक्यघटकत्वमेव तस्येति। स चाऽनुपपन्नः, पिङ्गाक्ष्यादियौगिकानां पदानामुक्तरीत्या सम्बन्धार्थकतया द्रव्यस्य तैरनुपादानात्।

किञ्च, पूर्वपक्षोऽप्यनुपपन्नः, पिङ्गाक्ष्यैकहायनीशब्दार्थसम्बन्धस्याप्यमूर्तत्वात्, क्रीणातिकरणत्वाऽसम्भवेन क्रीणातिकरणत्वस्यैतद्वाक्यादलाभादारुण्यस्यैव वाक्यभेदशङ्कायां मूलशैथिल्याच्च। बहुव्रीह्योररुणपदस्य च लाक्षणिकद्रव्यविधायकताया अविशिष्टत्वेन बहुव्रीह्यादेरेव द्रव्यविधायकत्वम्, नारुणपदस्येत्यत्र विनिगमकाभावात्। अधिकमग्रे वक्ष्यते।

❀ उक्तरीत्येति ❀ सम्बन्धिलक्षणाकल्पनेनेत्यर्थः। * प्रपञ्चितमिति * प्रपञ्चस्तूक्तप्रायः। ❀ भूषणे इति ❀ प्रकृतस्थले, समासशक्तिनिरूपणाऽवसरे चेत्यर्थः। 'पदाऽर्थं निरूप्य' इत्यनेन पदार्थनिरूपणानन्तरं वाक्यार्थनिरूपणे तयोः सङ्गतिः सूच्यते। तत्फलं तु पूर्वापरग्रन्थैकवाक्यप्रतिपत्तिरेकप्रयोजनवती ज्ञानफलिका।

केचित्तु, उन्मत्तप्रलपितत्वशङ्कानिदानासङ्गतत्वज्ञाननिरासः प्रयोजनमित्याहुः।

सा चाऽनन्तर्याऽभिधानप्रयोजकजिज्ञासाजनकतावच्छेदकधर्मरूपा षड्विधा। तदुक्तम्—

'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा।
निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते॥' इति।

SGDF
Sri Gargeshwari Digital Foundation

कर्मसंख्याकालाः । तत्र कर्त्तृकर्मणी फलव्यापारयोर्विशेषणे । संख्या कर्त्तृप्रत्यये कर्तरि, कर्मप्रत्यये कर्मणि, समानप्रत्ययोपात्तत्वात् ।

प्रभा

विशेषणे इति—तथाच 'देवदत्तस्तण्डुलं पचति' इत्यत्र यदा देवदत्तपदेन मांसपिण्डविशेषस्य ग्रहणं तदा समवायसम्बन्धावच्छिन्नाधेयतया देवदत्ताभिन्नकर्तुर्व्यापारेऽन्वयः। यदा तु शरीरावच्छिन्नात्मनो ग्रहणं तदा यत्नरूपे धात्वर्थव्यापारे एवोक्तसम्बन्धेनान्वयः, न तु फुत्कारादौ, स्यन्दरूपस्य तस्य जडवृत्तित्वात्। तथाचोक्तम्—

'क्षितिर्जलं तथा तेजः पवनो मन एव च ।
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी ॥

इति क्षित्यादिपञ्चानामेव क्रियाऽऽश्रयत्वात्। यद्वा, आत्मरूपदेवदत्तादेर्यत्ने समवायसम्बन्धेन, फुत्कारादौ स्वनिष्ठकृतिजन्यत्वसम्बन्धेनान्वयः। एवं मांसपिण्डरूपदेवदत्तादेरपि समवायेन फुत्कारादौ, स्वावच्छिन्नात्मवृत्तितया कृतावन्वय उह्यः। फलव्यापारयोरिति—कर्त्ता व्यापारे, कर्म फले विशेषणम्। कर्त्तृप्रत्यये='चैत्रः पचति' इत्यादौ। कर्मप्रत्यये='तण्डुलः पच्यते' इत्यादौ। ननु सुबर्थसङ्ख्यायाः प्रकृत्यर्थे एवान्वयदर्शनात् तद्वद्धात्वर्थे एवान्वय उचित इत्याशङ्कायामाह—समानेति—धात्वर्थापेक्षया प्रत्यासत्त्यतिशयेन प्रत्ययार्थकर्त्रादावेव तदन्वय उचित इति भावः। अत एव रूपसूत्रे 'साधनापेक्षं पचत इत्यादौ द्विवचनम्' इति भाष्यं सङ्गच्छते।

दर्पणव्याख्या

तत्र प्रकृतसिद्ध्यऽनुकूलचिन्ताकालावच्छिन्नप्रकृतानुकूलत्वमुपोद्घातः। अनुकूलत्वञ्चात्र घटकत्वज्ञापकत्वादिरूपं यथायथं ग्राह्यम्। तत्रावच्छेदकांशः स्वरूपसन्, इतरांशश्च ज्ञात उपयोगी। एवमग्रेऽपि। स्मृतिकालावच्छिन्नोपेक्षानर्हतावच्छेदकधर्मवत्त्वं प्रसङ्गः। हेतुता प्रसिद्धा। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालावच्छिन्नावश्यवक्तव्यत्वमवसरः। निर्वाहकत्वम्—एककार्य्यजनकत्वं कारणतदवच्छेदकसाधारणप्रयोजकत्वरूपम्। एककार्य्यत्वम्—एकस्य कार्यता सा च जन्यता, जन्यज्ञानविषयत्वरूपा चेति। उदाहरणानि कानिचित्त्वत्रैव वक्ष्यन्ते। अन्यानि तु स्वयमूह्यानि। आक्षेपोदाहरणादीनां तु तन्त्रान्तरे सङ्गतित्वेन प्रसिद्धानामेष्वेवान्तर्भाव इति न तेषामाधिक्यसम्भावना। प्रकृते च पदार्थतत्संसर्गविशेषरूपवाक्यार्थयोः प्रसङ्गसङ्गतिः। तथाहि—निरूपितेषु पदार्थेषु प्रायशोऽसंसृष्टपदार्थाऽभावेन तत्संसर्गस्य सामान्यरूपेण स्मरणम्। ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वाच्छिष्यस्य 'क एषां संसर्गः' इत्याकारा विशेषधर्मजिज्ञासा, ततस्तद्बोधनाय शिष्यस्य शब्दप्रयोगः। ततः शिष्यजिज्ञासज्ञानं गुरोः। ततो जिज्ञासाविषयज्ञाने इष्टसाधनताज्ञानात् कण्ठताल्वाद्यभिघातादिसम्पादनेन गुरोः शिष्यजिज्ञासानिवृत्तिफलकं विशेषसंसर्गरूपवाक्यार्थाभिधानमिति। संसर्गगतसामान्यस्योपेक्षाऽनर्हतावच्छेदकत्वात्तद्वत्यस्य तत्र सत्त्वाल्लक्षणसङ्गतिः। इत्थमन्यत्राऽपि लक्षणानि योज्यानि।

❀ विशेषणे इति ❀। आधाराऽऽधेयभावसम्बन्धेन प्रकारावित्यर्थः। सङ्ख्यया आख्याताऽर्थकर्तृकर्माऽन्वयित्वे प्रयोजकमाह ❀ समानप्रत्ययोपात्तत्वादिति ❀। एतेन समानाऽभिधानश्रुतेर्वाक्याऽपेक्षया बलवत्त्वात् समानपदोपात्तान्वयित्वं विहाय प्रथमाऽन्तार्थेऽन्वयोऽनुचित इति व्यज्यते, एकप्रत्ययजन्योपस्थितिविषयत्वादिति तदर्थः। लडादीनां वाचकत्वकल्पे आख्यातजन्योपस्थितिविषयत्वस्य कालेऽपि सत्त्वात्तत्र व्यभिचारवारणाय कर्तृकर्मविषयत्वेन तां विशिनष्टि।

तथाच 'आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्यकर्त्तृकर्मोपस्थितिर्हेतुः' इति कार्यकारणभावः फलितः।

नैयायिकादीनामाख्यातार्थसङ्ख्यायाः प्रथमान्तार्थे एवाऽन्वयात् 'आख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुः' इति कार्यकरणभावो वाच्यः। सोऽपि 'चन्द्र इव मुखं दृश्यते'

प्रभा

तथाच = संख्याया आख्यातार्थकर्त्तृकर्मणोरन्वयाङ्गीकारे च। आख्यातार्थेति—समवायसम्बन्धेनाख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितकर्त्तृनिष्ठविशेष्यताकबोधम्प्रति आख्यातजन्यकर्त्तृविषयकोपस्थितिः समवायसम्बन्धेन कारणम्। तादृशप्रकारतानिरूपितकर्मनिष्ठविशेष्यताकबोधम्प्रति आख्यातजन्यकर्मोपस्थितिर्हेतुरिति कार्यकारणभावद्वयं फलितम्।

वस्तुतः विषयनिष्ठप्रत्त्यासत्त्या एव लाघवात् कार्यकारणभाव उचितः। समवायेन कार्यकारणभावे एकस्मिन्पुरुषेऽनेकविषयकोपस्थितिसत्त्वेन भिन्नविषयकोपस्थितेर्भिन्नविषयकशाब्दबोधवारणाय कार्यदले, कारणदले च विषयसन्निवेशस्याऽवश्यकत्वेन विषयाणामानन्त्येन गौरवप्रसङ्गात्। अतः कर्त्तृनिष्ठविशेष्यताकत्वं कर्मनिष्ठविशेष्यताकत्वञ्च कार्यदलेऽनिवेश्य कर्त्तृत्वावच्छिन्नविशेष्यतासम्बन्धेन आख्यातार्थसङ्ख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नम्प्रति विशेष्यतासम्बन्धेनोपस्थितिः कारणमित्येतावन्मात्रनिवेशेऽपि दोषाभावः। नचात्र पक्षेऽपि विशेष्यतासम्बन्धेनान्यपुरुषीयोपस्थितिमादायान्यपुरुषस्य बोधापत्तिः, तत्पुरुषीयतादृशबोधम्प्रति तत्पुरुषीयोपस्थितेः कारणत्वस्वीकारेणादोषात्। नचैवं लाघवाभावः, तत्पुरुषीयविषयाणां बाहुल्येन पुरुषस्य चैकत्वेन विषयस्य निवेशे तत्पुरुषीयत्वनिवेशापेक्षा गौरवस्यानिवार्य्यत्वात्।

'घटः' इत्यादौ संख्याप्रकारकबोधस्य सत्त्वाद् व्यभिचारवारणाय सङ्ख्यायामाख्यातार्थेति विशेषणम्। कालप्रकारकबोधे व्यभिचारवारणाय संख्येति। प्रसङ्गान्नैयायिकमतं निराकरोति—नैयायिकानामिति—तन्मते यत्नस्यैवाख्यातार्थतया तत्र संख्याया अन्वयस्य गुणे गुणानङ्गीकारादनुचितत्वेनाह—प्रथमान्तेति—विशेष्यतासम्बन्धेनाख्यातार्थसङ्ख्याप्रकारकबोधम्प्रति प्रथमान्तपदार्थनिष्ठविषयतासम्बन्धेन प्रथमान्तपदजन्योपस्थितिः कारणमिति वक्तव्यम्। तेन प्रथमान्तपदजन्यसमूहालम्बनात्मकोपस्थितौ 'हस्तिपको गच्छति' इत्यत्र प्रथमान्तहस्तिपकपदजन्योपस्थितौ सम्बन्धिविधया हस्तिनोऽपि भाने न तत्र संख्यान्वयः, प्रथमान्तपदार्थनिष्ठविषयतासम्बन्धेन तादृशोपस्थितेर्हस्तिपके एव सत्त्वेन हस्तिनि तदभावात्। नैयायिकमते कारणदले आख्यातपदभिन्नप्रथमान्तपदज्ञानप्रयुक्तं गौरवमिति सूचितम्।

सोऽपि = उक्तकार्यकारणभावोऽपि। अस्य घटित इत्यत्रान्वयः। चन्द्र इवेति—'दृश्यते' इत्यत्र 'ते'रूपाख्यातार्थैकत्वसंख्याया मुखे एवान्वयः। उक्तकार्यकारणभावस्यैव स्वीकारे तु चन्द्रस्यापि प्रथमान्तचन्द्रपदजन्योपस्थितिविषयत्वेन तत्राख्यातार्थैकत्वस्यान्वयापत्तिः। तत्रान्वयवारणायेतराविशेषणीभूतप्रथमान्तार्थोपस्थितेः कारणत्वे इवार्थसादृश्ये विशेषणीभूतचन्द्रेऽन्वयवारणेत्वतिगौरवमिति भावः। न चेष्टापत्तिः, अननुभवात्, चन्द्र

दर्पणव्याख्या

❀ तथाचेति ❀। घट इत्यादावेकत्वादिसङ्ख्याप्रकारकबोधे व्यभिचारो मा भूदिति कार्य्यतावच्छेदककोटौ ❀ आख्यातार्थेति ❀ तदर्थकालप्रकारकबोधे तन्निरासाय ❀ सङ्ख्येति ❀ स्वोक्तमाख्यातस्य कर्त्तृकर्मार्थकत्वं दर्शयितुं प्रसङ्गान्न्यायमतं निराकरोति ❀ नैयायिकानामित्यादिना ❀। ❀ अन्वयादिति ❀। एकपदोपात्तयोरेकार्थान्वयित्वस्य न्याय्यत्वादिति भावः। आख्यातार्थकालप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेरनपेक्षणादाह—❀ सङ्ख्येति।

SGDF Sri Gargeshwari Digital Foundation

'देवदत्तो भुक्त्वा व्रजति' इत्यादौ चन्द्रक्त्वार्थयोराख्यातार्थानन्वयादितराऽविशेषणत्वघटित

प्रभा

इव मुखे दृश्येते' इत्यादावेकवचनापत्तेश्च। यद्वा, 'चन्द्र इव मुखं दृश्यते' इत्यत्र सति सम्भवे उपात्तधर्मेणैव सादृश्यस्यौचित्येन दर्शनकर्मत्वेनान्वयबोधनाय तत्राप्यन्वये इष्टापत्तिरत आह—देवदत्त इति—'भुक्त्वा' इत्यत्र क्रियायाः साध्यरूपत्वेनैव भानेन कर्मत्वादेरसम्भवेनौत्सर्गिकं प्रथमायाः एकवचनमेव। 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति तु अव्ययत्वप्रयोजककृदतिरिक्तविषय एव, तथैवानुभवात्। तथाच प्रथमान्तक्त्वान्तवाच्यभुजिक्रियायामन्वयवारणाय उक्तकार्यकारणभावघटकप्रथमान्तार्थे इतराविशेषणेति विशेषणं देयम्। इतरेति स्वरूपकीर्तनम्, विशेषणतानाश्रयमात्रनिवेशेनोक्तदोषवारणात्। प्रकृते चन्द्र इवार्थसादृश्यनिष्ठविशेष्यतानिरूपितप्रकारताश्रयः। क्त्वान्तार्थभोजनञ्च स्वोत्तरकालिकव्रजननिष्ठविशेष्यतानिरूपितप्रकारताश्रय इति तयोर्विशेषणतानाश्रयप्रथमान्तार्थत्वाभावान्नातिप्रसङ्गः। ननु शाब्दबोधे तयोः प्रकारताश्रयत्वेऽपि उपस्थितौ विशेषणतानाश्रयत्वस्यैव सत्त्वाद्दोषतादवस्थ्यम्, विशेषणत्वानाश्रयेत्यस्य विशेषणत्वमात्राश्रयत्वप्रकारकतात्पर्य्यीयविषयत्वानाश्रयप्रथमान्तार्थोपस्थितिः कारणमित्यत्र तात्पर्यात्।

एतेन 'चैत्र एव पचति' इत्यादौ चैत्रस्य एवशब्दार्थान्ययोगव्यवच्छेदघटकान्यत्वेऽन्वयेन विशेषणताश्रयतया दोषतादवस्थ्यमित्यपास्तम्। चैत्रे विशेष्यताश्रयत्वप्रकारकतात्पर्यीयविषयताया अपि सत्त्वेन विशेषणत्वमात्राश्रयत्वप्रकारकतात्पर्यीयविषयतानाश्रयत्वस्य भावात्। घटित इति—घटितत्वञ्च—स्वव्याप्यत्वस्वव्यापकत्वाभाववत्त्वोभयसम्बन्धेन स्वविशिष्टत्वम्। व्याप्यताया व्यापकतायाश्च नियामकः सम्बन्धो विषयित्वरूपः। स्वम्—घटकत्वेन चिकीर्षितम्।

अयम्भावः विषयि=ज्ञानादि। तथाच 'रामः' इत्याकारकं यत्र यत्र श्रावणप्रत्यक्षात्मकं ज्ञानं तत्र तत्र ज्ञाने रेफो विषयितासम्बन्धेन वर्तते। रामशब्दोऽपि विषयितासम्बन्धेन वर्तते इति यत्र यत्र रामशब्दस्तत्र तत्र रेफ इति रेफादेर्व्यापकत्वम्, रामशब्दे च व्याप्यत्वम्। व्यापकत्वञ्च—व्यापकतावच्छेदकसम्बन्धेन

दर्पणव्याख्या

❀ इतराविशेषणत्वेति ❀। प्रथमान्तार्थेतरविशेषणत्वाघटित इत्यर्थः। तथाचेतरविशेषणताऽनापन्नार्थविषयकोपस्थितिः कारणमित्यर्थः। एवञ्च, चन्द्र-भोजनादीनां प्रथमान्तार्थत्वेऽपि इवार्थसादृश्यव्रजनादिविशेषणत्वान्न व्यभिचार इति भावः। ❀ घटित इति ❀। तदविषयकप्रतीत्यविषयः स इत्यविषय इत्यर्थः। तदविच्छिन्नावच्छेदकताकारणताग्रहविषय इति यावत्। इतराविशेषणत्वञ्च = इतरविशेषणत्वतात्पर्य्याविषयत्वम्। नातश्चैत्र इव पचतीत्यादौ, खले कपोतन्यायेन बोधे चैत्रीयं सादृश्यमित्यवान्तरबोधाऽभावेन चैत्रस्येतरनिरूपितप्रकारताशून्यत्वरूपेतराऽविशेषणत्वसत्त्वेऽपि क्षतिः अविशेषणत्वेऽपि विशेषणत्वतात्पर्य्यविषयत्वसत्त्वात्। तथाऽऽख्यातार्थसङ्ख्याप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति इतरविशेषणत्वतात्पर्याविषयार्थवृत्तिविशेष्यतासम्बन्धेन प्रथमान्तपदजन्योपस्थितिर्हेतुरिति पर्यवसितोऽर्थः।

'चैत्रेण सुप्यते' इत्यादिभावाऽऽख्यातस्थले, 'चैत्रकर्त्तृकः स्वापः' इत्यादिबोधाद्यथोक्तविशेषणकधात्वर्थस्वापे तदनन्वयाद् व्यभिचारपरिहाराय प्रथमान्तेति पदविशेषणम्। यद्येवमपि, 'चैत्र एव पचति न मैत्रः' इत्यादावन्ययोगव्यवच्छेदरूपैवकारपदार्थैकदेशेऽन्यत्वे चैत्रस्य विशेषणत्वात् तत्र संख्याऽन्वयाऽनुपपत्तिरिति विभाव्यते, तदा प्रथमान्तार्थो विशेषणत्वमात्रतात्पर्याविषयत्वेन विशेषणीयः। अवशिष्टांशस्यापि निवेशे प्रयोजनाऽभावादुक्तस्थले च चैत्रस्य मुख्यविशेष्यत्वविशेषणत्वाभ्यां तात्पर्यविषयत्वान्न सङ्ख्याऽन्वयाऽनुपपत्तिरिति तन्मतनिष्कर्षः।

Sri Gargeshwari Digital Foundation

इत्यतिगौरवम् । इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे ।

प्रभा

स्वाधिकरणवृत्त्यत्यन्ताभावीयप्रतियोगिताऽनवच्छेदकधर्मवत्त्वम् । स्वम् = व्याप्यम् । तथाच—रेफाभाववति घटादिज्ञाने रामशब्दस्याभावेन स्वाभाववदवृत्तित्वरूपव्याप्यत्वस्य सत्त्वेन स्व (रेफ) व्याप्यत्वं रामे । स्व- (रेफ) व्यापकत्वाभाववत्त्वमपि रामे स्वा (रेफ) धिकरणे राजादिज्ञाने रामशब्दस्य विषयितासम्बन्धेना-भावात् स्वाधिकरणवृत्त्यत्यन्ताभावीयप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्यापकत्वस्य रामशब्देऽभावाल्लक्षण-समन्वयः ।

प्रकृते विशेषणत्वमात्राश्रयत्वप्रकारकतात्पर्याविषयीभूतप्रथमान्तार्थोपस्थितेः कारणत्वे उक्ततात्पर्या-विषयत्वे घटकत्वम् , उक्तोपस्थितेश्च घटितत्वम् । यत्र यत्र तादृशोपस्थितिज्ञानं तत्र तत्र विषयितया तादृश-तात्पर्याविषयत्वमिति तात्पर्याविषयत्वस्य व्यापकत्वम् , उपस्थितेश्च व्याप्यत्वमिति तादृशतात्पर्याविषयत्व-व्याप्यत्वस्य, तद्व्यापकत्वाभावस्य च तादृशोपस्थितौ सत्त्वेन स्वव्याप्यत्वस्वव्यापकत्वाभाववत्त्वसम्बन्धाभ्या-मुपस्थितौ तादृशतात्पर्याविषयत्वरूपस्येतराविशेषणत्वस्य वैशिष्ट्यसत्त्वेनोपस्थितेर्घटितत्वम् । एवमेव स्व-विशिष्टत्वं घटकत्वम् , वैशिष्ट्यञ्च—स्वव्यापकत्व स्वव्याप्यत्वाभाववत्त्वोभयसम्बन्धेन । उक्तोभयसम्बन्धेन रामादिशब्दरूपघटितस्य वैशिष्ट्यं रेफादिरूपघटके स्वयमूहनीयम् । अतिगौरवमिति—अधिकगौरव-मित्यर्थः । इदमपि—प्रदर्शितगौरवमपि । यद्वा, स्वमते परमतापेक्षया लाघवमिदमर्थः । मानमिति—कृतेरा-ख्यातार्थत्वनिरसनद्वारा गौरवस्य मानत्वं बोध्यम् ।

ननु वैयाकरणनयेऽपि 'आख्यातार्थाश्रयनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधम्प्रति प्रथमान्तपदजन्योपस्थितिः कारणम्' इति चन्द्रपदार्थस्यापि प्रथमान्तपदजन्योपस्थितिविषयतया चन्द्रपदार्थ-स्याऽख्यातार्थाऽश्रयेऽऽन्वयवारणाय प्रथमान्तार्थे इतराविशेषणत्वं विशेषणं देयमित्युभयोः साम्यमिति चेन्न, शाब्दिकमते प्रथमान्तार्थस्य विशेषणतयैवाऽऽख्यातार्थेऽन्वयेनैकत्र विशेषणतयाऽन्वितस्यापरत्र विशेषणत्वा-योगादिति न्यायादेवेवार्थसादृश्ये विशेषणतयाऽन्वितस्य चन्द्रस्य तत्रान्वयाप्राप्तेरितराविशेषणत्वरूपविशेषण-स्यानावश्यकत्वात् ।

दर्पणव्याख्या

❀ अतिगौरवमिति ❀ । अन्यलभ्यकृतौ शक्तिकल्पने सङ्ख्यान्वयबोधहेतूपस्थितौ विभिन्नपदजन्यत्वनिवेश एव गौरवम् । प्रथमान्तपदार्थस्य विशेषणत्वमात्रतात्पर्याऽविषयत्वेन निवेशे त्वतिगौरवमित्यर्थः । ❀ इदमपीति ❀ उपदर्शि-तकार्य्यकारणभावे दर्शितलाघवमपीत्यर्थः ।

यद्यपि तन्मते भावनान्वयिनी सङ्ख्यान्वयनियमादाख्यातेन भावनाऽविषयकसङ्ख्यान्वयबोधस्य क्वाप्यजननाद्भावना-न्वयबुद्धित्वस्य सङ्ख्यान्वयबुद्धित्वव्यापकतया व्याप्यधर्मावच्छिन्नसामग्र्या फले जननीये व्यापकधर्मावच्छिन्नसामग्र्या अपेक्षणाद् विशेषणत्वमात्रतात्पर्याऽविषयत्वविशेषणविशिष्टप्रथमान्तार्थोपस्थितिरूपायास्तस्यास्तत्राऽभावादेवोक्तस्थले व्यभि-चाराप्रसक्तेन तद्व्यावृत्तये सङ्ख्यान्वयकारणतावच्छेदककोटावुक्तविशेषणप्रवेशाऽवसरः, तथाऽपि कृतिशक्तिवादिमते उक्त-स्थले तदापत्तिवारणाय भावनान्वयबोधकारणतावच्छेदककोटावेवोक्तविशेषणवितरणप्रयुक्तगौरवम् । अस्मन्मते तु प्रथमान्त-पदार्थस्याख्यातार्थे विशेषणतयैवान्वयेन चन्द्रादेरेकत्र विशेषणतयाऽन्वितस्य नैराकाङ्क्ष्येणाऽपरत्र विशेषणतयान्वयाऽयोगा-दुक्तव्यभिचाराऽभावेन तन्निवारकविशेषणोपादानप्रयुक्तगौरवमित्यभिप्रेत्योक्तम् ❀ इदमपीति ❀ । अधिकमन्यत्रानुसन्धेयम् ।

कालस्तु व्यापारे विशेषणम्, तथाहि—'वर्त्तमाने लट्' (पा० सू० ३।२।१२३) इत्यत्राऽधिकाराद् धातोरिति लब्धम्। तच्च धात्वर्थं वदत् प्राधान्याद् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। नच सङ्ख्यावत् कर्त्तृकर्मणोरेवान्वयः शङ्क्यः, अतीतभावनाके कर्त्तरि पचतीत्यापत्तेः,

प्रभा

आख्यातार्थकर्त्रादीनामन्वयं व्यवस्थाप्य तदर्थकालस्याप्यन्वयं व्यवस्थापयति—कालस्त्वित्यादिना—तच्च=धातुपदञ्च। वदत्=उपस्थापयत्। प्राधान्यात्=धातुजन्यशाब्दबोधे फलापेक्षया प्राधान्याद्=विशेष्यत्वाद् व्यापारमेव ग्राहयति=बोधयति। इतीति—इतिर्हेतौ, विशेष्यतया भासमानत्वादित्यर्थः। प्राधान्यादित्युक्त्या यन्मते कर्मप्रत्ययस्थले फलस्य प्राधान्यं तन्मते फले एवान्वय इति ध्वनितम्, तन्मते धातूनां फलावच्छिन्ने व्यापारे, व्यापारावच्छिन्ने फले च शक्त्या कर्मप्रत्यये फलस्यैव प्राधान्यात्। फलानुत्पत्तिदशायामपि फले वर्तमानत्वारोपेण 'पच्यते' इत्यस्योपपत्तिः। अधिश्रयणकाले समूहत्वारोपेण 'पचति' इति प्रयोगवत्। नापि 'पक्ष्यति' इत्यापत्तिः, अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्। व्यापाराविगमे फलसत्त्वे 'अपाचि' इति तु फलस्य सत्त्वेऽपि तदुत्पत्तेर्नाशात् विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वरूपभूतत्वस्य फले सत्त्वेनोपपन्नमिति नव्याः। अत एव कर्माख्यातेऽपि व्यापारविशेष्यक एव बोध इति प्राञ्चः। तत्रैव=व्यापारे एव। तदन्वयः=कालान्वयः। कालश्चावच्छेद्यत्वसम्बन्धेन व्यापारेऽन्वेति। नचेति—समानप्रत्ययोपात्तत्वात् सङ्ख्याया यथा कर्त्तृकर्मणोरेवान्वयस्तथा कालस्यापि तत्रैवान्वयोऽस्त्वित्याशङ्कते—सङ्ख्यावदिति—नच धातोरित्यस्य वर्त्तमानत्वे ऽर्थद्वारान्वयेन व्यापारे एवान्वयलाभ इति वाच्यम्, धातोरित्यस्य पञ्चम्यन्तत्वेन तादृशान्वयस्य वक्तुमशक्यत्वात्, आवृत्तौ मानाभावात्। कर्त्रादावन्वये दोषमाह—अतीतेति—व्यापारविगमेऽपि कर्त्तुर्वर्तमानत्वात्।

दर्पणव्याख्या

अत्राऽऽहुर्नव्याः। लाघवोपबृंहितोक्तयुक्तिकदम्बेनाऽऽख्यातस्य धर्मवाचकत्वसिद्धावुत्तरकालकल्प्यतादृशकार्य्यकारणभावप्रयुक्तगौरवम्, निषादस्थपत्यधिकरणन्यायेनाकिञ्चित्करम्, फलमुखत्वात्। किञ्च, चन्द्राद्युपमाने आख्यातार्थसंख्याद्यन्वयोपगम आवश्यकः। तत्र तदन्वयाऽनुपगमे सादृश्यप्रयोजकधर्माऽलाभेन वाक्यस्याऽपरिपुष्टार्थतापत्तेः। क्त्वान्तार्थभोजनादौ तु सङ्ख्यादीनामयोग्यत्वादेवानन्वयेनाऽनतिप्रसङ्गात्। एवञ्च, नास्मन्मते दोषलेशोऽपीति। कर्त्तृकर्मणोः सङ्ख्यायाश्च विशेषणतां व्यवस्थाप्य कालस्यापि तां प्रतिपादयति ❀ कालस्त्वित्यादिना❀। ❀ व्यापारे इति ❀ धात्वर्थव्यापारे इत्यर्थः।

नन्वाख्यातस्य कालशक्तिपरिच्छेदकेषु "वर्तमाने लट्" (पा० सू० ३।२।१२३) इत्यादिषु व्यापारवाचकपदानुपादानात् कथं कालस्य धात्वर्थव्यापारविशेषणतेत्यतस्तत्सूत्रप्रामाण्येनैव तां साधयति ❀ तथाहीति ❀। ❀ तच्च ❀ धातुपदं चेत्यर्थः। ❀धात्वर्थमिति❀ फलव्यापारोभयात्मकमित्यर्थः। 'सत्तायाम्' इत्याद्यर्थनिर्देशात्, भूवादिसूत्रप्रामाण्याच्चेति भावः। ❀ वदत् ❀ बोधयत्। 'सन् ब्राह्मणः' इतिवच्छता। ❀ प्राधान्यात् ❀ धातुजन्यबोधे विशेष्यतया भासमानत्वादित्यर्थः। व्यापारमेवेत्येवकारेण फलव्यवच्छेदः। प्राधान्यादित्युक्तया यन्मते कर्माऽऽख्याते फलस्य प्राधान्यं तन्मते फल एवान्वय इति ध्वनितम्। ❀ ग्राहयतीति ❀ आख्यातार्थकालविशेष्यतया बोधयतीत्यर्थः। "गुणानाञ्च परार्थत्वात्" इति न्यायात्, प्रत्ययार्थस्य साक्षात्प्रकृतिजन्यबोधविशेष्याऽन्वयित्वनियमाच्चेति भावः। ❀ कर्त्तृकर्मणोरिति ❀ समानप्रत्ययोपात्तत्वप्रत्यासत्तेरिति भावः। ❀ पचतीत्यापत्तेरिति ❀। कर्त्तुर्विद्यमानत्वादिति भावः। एवमग्रेऽपि।

अपाक्षीदित्यनापत्तेश्च । पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च । नापि फले तदन्वयः, फलाऽनुत्पत्तिदशायां व्यापारसत्त्वे, पचतीत्यनापत्तेः, पक्ष्यतीत्यापत्तेश्चेत्यवधेयम् ।

नचाऽऽमवातजडीकृतकलेवरस्योत्थानाऽनुकूलयत्नसत्त्वादुत्तिष्ठतीति प्रयोगाऽऽपत्तिः, परयत्नस्या-

प्रभा

अनापत्तेश्चेति—कर्तुरतीतत्वाभावात् । नचेष्टापत्तिः, अनुभवविरोधात् ।

व्यापारे कालान्वयस्वीकारे दोषमाशङ्क्य निराचष्टे—नचामेति—आमो रोगविशेषस्तेन जडीकृतम् = स्तब्धीकृतं कलेवरम् = शरीरम् (कले = शुक्रे वरम् = श्रेष्ठम् । 'हलदन्तात्' इति सप्तम्या अलुक्) यस्य तस्येत्यर्थः । उत्थानेति—उत्थानम् = ऊर्ध्वदेशसंयोगस्तदनुकूलयत्नरूपव्यापारस्य सत्त्वेन तस्य च वर्तमानकालावच्छिन्नत्वेनोत्तिष्ठतीति प्रयोगापत्तिरित्यर्थः । फले कालान्वये तु फलस्य = उत्थानस्याभावान्नायं दोषः ।

परयत्नस्येति—यत्नो नाम—चेष्टाजनक आत्मवृत्तिर्गुणविशेषः । तेन सह वक्तृमनसः स्वसंयुक्ताऽऽत्मसमवायरूपसन्निकर्षाभावेन अज्ञानात्=मानसप्रत्यक्षाविषयत्वात् । अप्रयोगादिति—शब्दप्रयोगे ज्ञानस्यैव प्रयोजकत्वात् । चेष्टादिनेति—'हिताहितप्राप्तिपरिहारार्था शरीरावयवहस्तादिक्रिया चेष्टा' तया तदवगतौ परकीययत्नानुमितौ । चेष्टापक्षिका, तल्लिङ्गिका वा अनुमितिः । तथाहि—'परकीयचेष्टा, यत्नजन्या, चेष्टात्वात्, मच्चेष्टावत्' इति ।

यद्वा, 'अयमुत्थानानुकूलयत्नवान्, चेष्टाविशेषवत्त्वात् अहमिव, इति । चेष्टा यदि यत्नाभावेऽपि स्यात्तर्हि तज्जन्या न स्यादिति कार्यकारणभाव एवानुकूलस्तर्कः । आदिना तत्कथनतल्लेखयोः संग्रहः । अन्ये तु तदीययत्नो नोत्थानानुकूलः, किन्तु उत्थानोद्देश्यकः । अत एव 'उत्थानाय यतते' इत्येव प्रयोगः, न तु उत्तिष्ठतीति, अनुकूलताविशेषस्यैव फलव्यापारयोः संसर्गत्वाभ्युपगमात् । अत एव यागपाकाद्युद्देश्यककुण्डनिर्माण-

दर्पणव्याख्या

❀ नापि फल इति ❀

केचित्तु—फलव्यापारयोर्धातोः पृथक्शक्तौ तयोरुद्देश्यविधेयभावेनाऽन्वयाऽऽपत्तिः । पृथगुपस्थितयोस्तथाऽन्वयस्यौत्सर्गिकत्वात् । तत्तद्धातुजन्यतादृशबोधस्य तथाऽन्वयबोधे प्रतिबन्धकताकल्पने तु गौरवम् । तस्मात् फलाऽवच्छिन्नव्यापारे, व्यापारावच्छिन्नफले च धातूनां शक्तिः । कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः । गौरवञ्च प्रामाणिकत्वान्न दोषाय । इत्थञ्च कर्त्राऽऽख्याते व्यापारस्य प्राधान्यम्, कर्माख्याते तु फलस्य । यदा यस्य प्राधान्यं तदा तस्मिन् कालाऽन्वयः । सूत्रस्थधातुपदादुभयोरपि प्राधान्येनोपस्थितत्वान्नोक्तनियमावकाशः । फलानुत्पत्तिदशायामारब्धे पाके फले वर्तमानत्वारोपाद्वा, पच्यते इत्यस्योपपत्तिः, एकाऽवयवेऽपि समूहाऽऽरोपादधिश्रयणकाले पचतीति प्रयोगवत् । आरोपे च प्रतीतिरेव मानम् । व्यापारविगमे फलसत्त्वे 'अपाचि देवदत्तेन' इत्यादिप्रयोगास्तु भूतत्वस्योत्पत्तिघटितत्वादित्याहुः ।

तदपरे न क्षमन्ते, पृथगुपस्थितयोस्तथान्वयबोधाभ्युपगमे नानार्थहर्य्यादिपदोपस्थितानामश्वसूर्यादीनामप्युद्देश्यविधेयभावापत्तिरतो विभिन्नपदजन्योपस्थितेरेव तन्त्रता तत्राऽनुसर्त्तव्या । तद्भावाच्च प्रकृते कथं तदन्वयबोधाऽऽपादनम् । तादृशफलव्यापारयोर्धातुशक्तौ मानाभावो गौरवञ्च । विशिष्टधर्मस्य शक्यतावच्छेदकत्वे उक्तप्रयोगाणाम् आरोपेणोपपादनं त्वगतिकगतिरिति स्पष्टमेव विवेकिनाम् । एतदनुरोधेन भूतत्वस्योत्पत्तिघटितत्वाऽभ्युपगमे परमताऽनुसृतिरपीति ।

ज्ञानादप्रयोगात्। किञ्चिच्चेष्टादिना तदवगतौ च, अयमुत्तिष्ठति, शक्त्यभावात् फलन्तु न जायते

प्रभा

तण्डुलक्रयणादिदशायां न यजति पचतीत्यादिप्रयोगः। कस्तदुद्देश्यकः कश्च तदनुकूलो व्यापार इत्यत्र वृद्धव्यवहार एव शरणम्।

तदपरे न क्षमन्ते, तथाहि—तदुद्देश्यकत्वस्य तदिच्छाधीनेच्छाविषयत्वरूपत्वेन उपायेच्छायाः फलेच्छाधीनत्वात्। उपायत्वञ्च—प्रयोजकत्वमेव। तथाच कुण्डनिर्माणतण्डुलक्रयणादिकालेऽपि यजति पचतीत्यादिप्रयोगः स्यात्। तस्मात् साक्षाज्जन्यजनकभाव एव फलव्यापारयोः सम्बन्ध इति तण्डुलक्रयणादीनां परम्परया विक्लित्तिजनकत्वेऽपि साक्षाज्जनकत्वाभावान्न तदानीं पचतीत्यादिप्रयोगः। प्रकृते उत्थानानुकूलयत्नस्य सत्त्वेऽपि कर्त्तृनिष्ठशक्तिरूपसहकारिकारणाभावादुत्थानानुत्पादेऽपि साक्षादुत्थानजनकस्य यत्नस्य सत्त्वेन उत्तिष्ठतीति प्रयोगस्येष्टत्वमेव। धात्वर्थत्वेनावगते फलेऽपि साध्यत्वस्य सत्त्वेन उद्देश्यत्वासम्भवात्, सिद्धत्वेन प्रतीयमानस्यैवोद्देश्यत्वदर्शनात्। नच तदानीमुत्थानोद्देश्यकत्वस्य यत्ने सत्त्वेऽपि जनकत्वस्याभावान्न तादृशप्रयोग इति वाच्यम्, अधिश्रयणादिकाले जनकताया असत्त्वेऽपि स्वरूपयोग्यत्वरूपजनकत्वमादाय पचतीत्यादिप्रयोगवदुत्तिष्ठतीत्यस्य दुर्वारत्वात्।

वस्तुतस्तु फलानुकूलयत्नमात्रधात्वर्थाभिप्रायेणोक्तप्रयोगापत्तेराशङ्का, प्रयत्नशक्तिचेष्टादिसमुदायस्य धात्वर्थविवक्षायामुत्तिष्ठतीति प्रयोगाभाव इति समाधानम्।

दर्पणव्याख्या

व्यापारे आख्यातार्थकालाऽन्वये दूषणमाशङ्क्य निराचष्टे ❀ नचेति ❀। ❀ यत्नसत्त्वादिति ❀ यत्नरूपव्यापारस्य वर्त्तमानत्वेन विषयाबाधात्। मम तु तदानीं फलाऽनुत्पत्त्या न तादृशप्रयोगाऽऽपत्तिरित्यर्थः। ❀ अप्रयोगादिति ❀ ननु परयत्नस्य विजातीयमनःसंयोगाश्रयसमवायरूपहेत्वभावादप्रत्यक्षत्वेऽपि चेष्टादिपक्षकेण तल्लिङ्गकेन वाऽनुमानेन तदवगतावुत्तिष्ठतीति प्रयोगाऽऽपत्तिर्दुःसमाधेयैवेत्याशङ्क्येष्टापत्त्या परिहरति ❀ किञ्चिच्चेष्टादिनेति ❀ यत्किञ्चिच्छरीरावयवक्रिययेत्यर्थः। ❀ तदवगतौ ❀ यत्नानुमितौ। अनुमानप्रयोगश्चैवम्—देवदत्तीयचेष्टा प्रयत्नजन्या, चेष्टात्वात्, मच्चेष्टावत्। अथवा, अयमुत्थानाऽनुकूलयत्नवान्, विजातीयचेष्टावत्त्वात्, अहमिवेति। चेष्टाप्रयत्नयोः कार्यकारणभावश्च प्रकृतेऽनुकूलस्तर्कः। स्वाश्रयावच्छेद्यत्वस्य हेतुतावच्छेदकसम्बन्धत्वान्न स्वरूपासिद्धिरिति।

परे तूक्तापत्तिमन्यथैव परिहरन्ति—तथाहि—आमवातजडीकृतकलेवरप्रयत्नस्योत्थानोद्देश्यकत्वेऽपि तदजनकत्वान्नोक्तप्रयोगापत्तिः। अत एव 'उत्थानाय यतते' इत्येव तत्र प्रयोगः। यागपाकाद्युद्देश्यककुण्डनिर्माणतण्डुलक्रयणादिदशायां 'यजति पचति' इत्यादिप्रयोगवारणाय स्वरूपसम्बन्धरूपप्रयोजकताविशेषस्यैव सम्बन्धताया अभ्युपेयत्वादिति।

तच्चिन्त्यम्, तदुद्देश्यकत्वं हि तदिच्छाऽधीनेच्छाविषयत्वम्, उपायेच्छायाः फलेच्छाधीनत्वात्। उपायत्वञ्च प्रयोजकत्वमेव। कथमन्यथा तत्रेच्छेति, प्रकृते यजतीत्यादिप्रयोगो दुर्वार एव। तस्मात् साक्षाज्जन्यजनकभाव एव फलव्यापारयोः सम्बन्ध इत्येवाभ्युपेयम्, तावतैवोक्तप्रयोगवारणात्। प्रकृते शक्तिरूपसहकारिकारणाभावेन तदनुत्पत्तावपि तदीययत्ने साक्षाज्जनकत्वस्य निराबाधत्वेनोत्तिष्ठतीति प्रयोगस्यैवेष्टत्वात्, प्रकृतधात्वर्थतयाऽवगते तस्मिन् साध्यत्वस्यैव सत्त्वेनोद्देश्यत्वस्य तदानीमसम्भवाच्च। एतदभिप्रेत्यैव सारकृता, 'उत्थानानुकूलयत्नसत्त्वे' इत्युक्तम्। अत एव पाकानुकूलप्रकृतधात्वर्थयत्नसत्त्वे पचतीत्येव प्रयोगोऽन्यदा तु 'पाकाय यतते' इति।

इति लोकप्रतीतेरिष्टत्वात् । एवञ्च तिङर्थो विशेषणमेव, भावनैव प्रधानम् । यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टम् , तथाऽपि 'भावप्रधान-

प्रभा

एवञ्चेति—पूर्वोक्तयुक्तीनामवश्याश्रयणीयत्वे चेत्यर्थः । यद्वा, कालस्यापि विशेषणत्वसिद्धौ चेत्यर्थः । भावनैवेति—धात्वर्थव्यापार एवेत्यर्थः । एवपदेनात्र प्रत्ययार्थस्य प्राधान्यनिरासः । ननु भावनाया धात्वर्थत्वे तस्यास्तिङर्थकर्त्रादिकम्प्रति विशेषणत्वापत्तिः, 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोश्च प्रत्ययार्थः प्रधानम्' इत्यभियुक्तोक्तेः । नन्वेवं सङ्ख्याकालयोरपि प्राधान्यापत्तिः, तयोरपि प्रत्ययार्थत्वादिति चेन्न, क्रियाभेदाय कालः स्यात् सङ्ख्या सर्वस्य भेदिका' इति वृद्धोक्तेः सङ्ख्याकालातिरिक्तप्रत्ययार्थस्यैव प्राधान्यादित्याशङ्क्य निराकरोति—यद्यपीति । अन्यत्र =तृजाद्यन्ते ।

भावप्रधानमिति-आख्यातम्=तिङन्तम्, भावप्रधानम्=तिङर्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यताकबोधजनकमित्यर्थः । आख्यातं लक्ष्यम् , भावप्रधानत्वं लक्षणम् । अत्र भावपदेन फलव्यापारयोर्ग्रहणमिति कर्मतिङि फलस्य प्राधान्यमिति मतेऽपि न दोषः । नच क्त्वान्तानां भावप्रधानत्वात् तत्रातिप्रसङ्गः, तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिभावार्थप्रतिपादकत्वम् आख्यातत्वमिति तदर्थात् । तेन 'काष्ठैः पाकः' 'पक्त्वा इत्यादौ नातिप्रसङ्गः । पचति भवति, (पाको भवतीत्यर्थके) 'पश्य मृगो धावति' इत्यादौ च नाव्याप्तिः । भावप्रधान-

दर्पणव्याख्या

वस्तुतस्तु कृतिरूपव्यापारमात्रस्य धात्वर्थत्वविवक्षायामुत्तिष्ठतीति प्रयोगः । प्रयत्नसामर्थ्यचेष्टादिघटितस्य तस्य समुदायस्य तद्विवक्षायान्तु नेति सारकाराशयः, अत एव तदोत्थानाय यतते इति प्रयोगोऽपि सूपपाद इति बोध्यम् ।

उपसंहरति ❀ एवञ्चेति ❀ विशेषणमेवेत्येवकारेण तिङर्थस्य विशेष्यत्वव्यवच्छेदः ❀ भावनैवेति ❀ धात्वर्थभावनैवेत्यर्थः । अत्राप्येवशब्देन फलस्य तिङर्थकर्त्रादेश्च व्यवच्छेदः । प्रकृतिप्रत्ययार्थयोरिति व्युत्पत्तिविरोधमाशङ्कते ❀ यद्यपीति ❀ । ❀ अन्यत्र ❀ पक्तेत्यादौ । ❀ दृष्टमिति ❀ तथाच प्रकृत्यर्थभावनायाः प्राधान्योपगमे तद्विरोध इति भावः । ❀ भावप्रधानमिति ❀ नामाऽऽख्यातोपसर्गनिपातभेदेनोद्दिष्टं चतुर्विधं पदं प्रकल्प्य नामाऽऽख्यातलक्षणप्रतिपादके इमे वाक्ये । अत्राऽऽख्यातं भावप्रधानमिति योजना । यथाश्रुते यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्

इत्यभियुक्तोक्तेः, शाब्दबोधे प्राङ्निर्दिष्टस्यैवोद्देश्यतया विवक्षितार्थाऽलाभात् । अत एव 'वृद्धिशब्दस्य प्राङ्निर्देशो मङ्गलार्थः' इत्याऽऽकरोक्तं सङ्गच्छते । एवमग्रेऽपि । आख्यातत्वाऽवच्छिन्ने प्रधानभावार्थप्रतिपादकत्वरूपलक्षणतात्पर्यावधारणाच्च लक्षणवाक्याच्छब्दमर्यादया प्रकृतपदद्वयार्थाभेदस्याऽधिकस्य भानेऽपि न क्षतिः । लक्ष्यताऽवच्छेदकञ्च तिङन्तत्वरूपाऽऽख्यातत्वम् । 'आख्यातमाख्यातेन' इत्यादौ तत्रैवाऽऽख्यातपदस्य शक्त्यवधारणात् । 'भावकालकारकसङ्ख्याश्चत्वारोऽर्था आख्यातस्य, तत्र भावः प्रधानम्' इति प्रकृतनिरुक्तभाष्याच्च । एतेन तिङः प्रधानभावार्थकत्वस्य प्रतिपादकमेव तदिति वदन्तः प्रत्युक्ताः ।

तच्छब्दपरामृश्य भावादिचतुष्टयस्यैकदा तिङा प्रतिपादनाऽसम्भवाच्च । भावत्वं निष्पाद्यत्वम् । नातः कर्माऽऽख्यातस्य फलविशेष्यकबोधकतावादिमते तत्राऽप्रसक्तिः । प्रधानप्रतिपादकत्वस्य नाममात्रे, भावप्रतिपादकत्वस्य भुक्त्वेत्यादिनाम्न्यतिप्रसक्तत्वात्तद्वारणाय विशिष्टमुपात्तम् ।

प्राधान्यञ्चोपस्थितत्वात् स्ववाचकप्रकृतिकप्रत्ययार्थनिरूपितमेव । नातः 'काष्ठैः पाकः' इत्यादौ प्रत्ययार्थकरणनिष्ठ-

माख्यातं सत्त्वप्रधानानि नामानि' इति (नि० अ० १ ख० १) निरुक्तात्, भूवादिसूत्रादिस्थ-क्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते ।

प्रभा

त्वमात्रन्तु न लक्षणम्, अव्याप्त्यतिव्याप्तिदोषग्रस्तत्वात् ।

सत्त्वप्रधानानीति—नामानि सत्त्वप्रधानानि । नामानि लक्ष्याणि, सत्त्वप्रधानानीति लक्षणम् । तत्र नामानि कृदन्तप्रकृतिकविभक्त्यन्तानि । यद्वा, उपसर्गनिपातभिन्नानि सुबन्तानि । अत एव 'नामाख्यातोपसर्गनिपाताः' इति पदचतुष्टयविभागः सङ्गच्छते । सत्त्वम्=द्रव्यम्=लिङ्गाद्यन्वयि, तन्निष्ठमुख्यविशेष्यताकार्थोपस्थापकम् । मुख्यविशेष्यतानिवेशाच्च 'पचति' इत्यादौ तिङन्ते आश्रयत्व-सङ्ख्यानिष्ठप्रकारतानिरूपिततिङर्थ-कर्त्रादिनिष्ठविशेष्यताकबोधजनकत्वसत्त्वेऽपि नातिप्रसङ्गः ।

निरुक्तादिति—निरुक्ते हि 'चत्वार्य्याहुः पदजातानि—नामाख्यातोपसर्गनिपाताः । 'सत्त्वप्रधानं नाम भावप्रधानमाख्यातम्' इत्युक्तम् आख्यातम्=तिङन्तम्, न तु तिङ्मात्रम्, अत एव तन्निरुक्तभाष्ये 'भावकाल-कारकसङ्ख्याश्चत्वारोऽर्था आख्यातस्य, तत्र 'भावः प्रधानम्' इत्युक्तिः सङ्गच्छते । एतेन 'भावप्रधानमाख्यातम्' इति निरुक्ते भावपदेन भावनाऽपरपर्य्याया कृतिरेवाभिधीयते । तस्याश्च प्रथमान्तपदासमभिव्याहारे प्राधान्यसत्त्वेन तिङा कृतेरभिधाने नैयायिकानामपि उक्तनिरुक्तन्न विरुद्ध्यत इत्यपास्तम्, कारकस्याख्यात-वाच्यत्वबोधकनिरुक्तभाष्यविरोधात् ।

भूवादिसूत्रादिस्थेति—तत्र हि 'का तर्हि इयं वाचोयुक्तिः' 'पचति भवति' 'त्वं पचसि भवति' 'पद्यति

दर्पणव्याख्या

प्रकारतानिरूपितविशेष्यताशालिबोधजनके पाकादिनाम्न्यतिप्रसङ्गः । नवौत्सर्गिकैकवचनान्तभावविहिततव्याद्यन्तनाम्नि सः, तथाच तिङ्बोध्यार्थनिष्ठप्रकारतानिरूपितविशेष्यतातात्पर्यप्रतिपादकत्वं तत् पर्य्यवस्यति ।

इतराविशेषणत्वरूपं तु न तत्, पचति भवतीत्यादिवाक्यघटकपच्याद्यर्थक्रियायां तदसत्त्वेन पचतीत्याख्यातेऽव्याप्तेः । क्त्वः पूर्वकालार्थकत्वस्य निराकरिष्यमाणत्वान्नोक्तलक्षणस्यालक्ष्येऽतिप्रसङ्गः । "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्येण, पाक इत्यादाविव तस्य सत्त्वाऽतिदेशेन साध्यत्वरूपभावत्वाऽभावादेव नाऽतिप्रसङ्ग इति तु न सत् । यतः साधुत्वान्वाख्यायकव्याकरणस्मृत्या यत्कृदर्थभावे लिङ्गाद्यन्वयेऽनुभवसिद्धस्तस्मिन्नेव तदतिदिश्यते । यथा पाक इत्यादौ घञर्थभावे । क्त्वार्थे तु लिङ्गाद्यननुभवेन तत्र तदतिदेशविषयस्यान्याय्यत्वात्, अव्ययकृत्वेन तस्य धात्वर्थानुवादकत्वस्य वक्ष्यमाणत्वाच्च ।

तथाच भावप्रधानकत्वं तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिभावप्रतिपादकत्वं पर्यवस्यति । एतेन, पचति भवतीत्यादिवाक्यघटकाऽऽख्यातसंग्रहाय क्वचित् क्रियान्तरनिष्ठविशेष्यतानिरूपितविशेषणत्वाभाववत्त्वं तत् । पच्याद्यर्थक्रियाया भवत्यर्थविशेषणत्वेऽपि क्वचित्तदसमभिव्याहारे विशेष्यतयैव भानान्न तत्रातिप्रसङ्ग इत्युक्तं निरस्तम् । उक्तापेक्षया अभाव-घटितत्वेनास्य गुरुत्वात् । अग्रिमलक्षणे प्राधान्यस्य विशेष्यत्वरूपस्यैव वक्ष्यमाणतयाऽत्रापि तस्यैव न्याय्यत्वात् । तत्र 'भावप्रधानम्' इति भाष्येण मदुक्तार्थस्यैव लाभाच्च ।

❀ सत्त्वप्रधानानीति ❀ अत्रापि पूर्ववदुद्देश्यविधेयभावकल्पना । लक्ष्यतावच्छेदकं च कृदाद्यन्तप्रकृतिकवि-भक्त्यन्तत्वरूपं नामत्वम् । प्रकृतिः, प्रत्ययः, विभक्तिरित्येतन्नाम, सत्ता, द्रव्यम्, लिङ्गम्, संख्या, च नामार्थ इति तद्भाष्यात् । 'क्रियाप्रधानमाख्यातं सत्त्वप्रधानं नाम । यतः क्रियां पृष्टस्तिङाचष्टे—किं करोति ?, पचतीति । द्रव्यं पृष्टः कृताऽऽचष्टे—कतरो देवदत्तः, यः पाचक' इति 'प्रशंसायाम्' इति सूत्रस्थमहाभाष्याच्च । तत्र कृतेत्यस्य तत्प्रकृतिकसुबन्तेनेत्यर्थः । कृता द्रव्या-

अपिच, आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात् प्रथमान्तस्य प्राधान्या-

प्रभा

भवति' इति सैषा वाचोयुक्तिः पच्यादिक्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति' इत्युक्तम्। अत्र 'पचति भवति' इत्यस्य पाककर्तृका भवनक्रिया, 'त्वं पचसि भवति' इत्यस्य त्वदभिन्नाश्रयनिष्ठपाकाभिन्नाश्रयिका भवनक्रिया, 'पक्ष्यति भवति' इत्यस्य च भविष्यत्कालिकपाकाभिन्नाश्रयिका भवनक्रियेति बोधः। प्रथमान्तार्थस्य मुख्यत्वे तु उक्तबोधासिद्धिः। 'त्वं पचसि भवति' इत्यत्र भवसीत्यस्यापत्तिश्च, युष्मदर्थस्यैव प्राधान्येन भवतिक्रियायाः कर्तृत्वापत्तेः। मन्मते तु पाकक्रियाया एव प्राधान्यात् 'भवति' इति प्रथमपुरुषोपपत्तिः। नच 'पक्ष्यति भवति' इत्यसम्भवः, भविष्यत्कालिकपाकक्रियाया वर्तमानकालिकभवनक्रियायाः कर्तृत्वासम्भवादिति वाच्यम्, भविष्यन्ती पाकक्रिया सूक्ष्मरूपेण भवतीत्यर्थात्, बौद्धभविष्यत्पाकक्रियायास्तदानीमपि सत्त्वाच्च।

अत्रेदं बोध्यम्—कालकर्त्रादिनिरूपिता या शक्तिः सा निरुपकतासम्बन्धेन कालाद्यर्थे आश्रयतासम्बन्धेन च लट्त्वाद्यवच्छिन्ने शब्दे। तत्र वर्तमानत्वम्—न 'प्रारब्धापरिसमाप्तक्रियाधिकरणदिवसादिकालवृत्तित्वरूपम्', व्यापारविगमेऽपि तद्दिनमादाय 'पचति' इत्यस्यापत्तेः। किन्तु 'पचति' इत्यादिशब्दप्रयोगाधिकरणकालवृत्तित्वरूपमिति न गतदिनमादाय 'पचति' इत्यस्य प्रयोगः। एवं विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वरूपातीतत्वे, वर्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपे भविष्यत्वे च तत्तच्छब्दप्रयोगाधिकरणकालवृत्तित्वरूपमेव वर्तमानत्वं ग्राह्यम्। एवं 'पचति' इत्याद्याख्यातजन्या या वर्तमानत्वप्रकारिका क्रियाविशेष्यिका प्रतीतिस्तदीया या पचतीत्यादिशब्दप्रयोगाधिकरणकालवृत्तिविषयता तादृशविषयताश्रयक्रियात्वं वर्तमानकालिकक्रियात्वम्। अत एव पाकान्निवृत्तेऽपि कर्तरि तदीयव्यापारे वर्तमानत्वभ्रमेण 'पचति चैत्रः' इति व्यवहारस्योपपत्तिः। भूतत्वादिघटकवर्तमानत्वस्य ध्वंसप्रागभावयोरन्वयः। वर्तमानत्वप्रकारकक्रियाविशेष्यकप्रतीतिविषयताया वर्तमानकालिकत्वादेव कृष्णजन्मादिवर्णने 'श्रीकृष्णो विहरति' इत्यादिप्रयोगाणामुपपत्तिः।

एवञ्च भविष्यत्वादिघटकवर्तमानत्वमपि तत्तच्छब्दप्रयोगाधिकरणक्षणवृत्तित्वप्रकारकज्ञानविषयत्वरूपं बोध्यम्। तेन भविष्यत्पाकाभावेऽपि पक्ष्यतीति प्रयोगसिद्धिः। ननु न्यायादिमतेऽपि प्रथमान्तपदासमभिव्याहारे प्रत्ययार्थकृतिरूपभावनायाः प्राधान्यस्यानुभवसिद्धत्वात् पूर्वोक्तनिरुक्तभाष्योपपत्तिर्भविष्यति। एवं भूवादिसूत्रस्थभाष्यस्यापि भवनक्रियाकर्तृविक्लित्त्यनुकूलव्यापारानुकूलकृतिरित्यर्थाश्रयणेन विरोधाभाव इत्यत आह—अपिचेति।

अभेदान्वयादिति—तिङर्थाऽऽश्रयस्य प्रथमान्तार्थे मृगादावभेदेनान्वयादित्यर्थः। अभेदान्वयोक्तिः स्व-

दर्पणव्याख्या

ऽभिधानेऽपि, 'न केवलाः' इति न्यायेन केवलस्य प्रयोगाऽनर्हत्वात्, निरुक्तभाष्यस्थविभक्तिपदस्वारस्याच्च। व्युत्पत्तिपक्षमवलम्ब्य चेदम्। नातोऽव्युत्पत्तिपक्षे नामाऽऽदिष्वतिप्रसङ्गः।

लक्षणमाह ❀सत्त्वप्रधानानीति❀ सत्त्वम् = द्रव्यं वक्ष्यमाणलक्षणं तत्प्रधानं यत्रेति विग्रहाल्लिङ्गादिनिष्ठप्रकारतानिरूपितविशेष्यताशाल्यर्थप्रतिपादकत्वं नामलक्षणमित्यर्थः। विशेष्याऽर्थकत्वस्य निपाताऽऽख्यातादावतिप्रसक्तत्वात् तद्वारणाय प्रकारतानिरूपितत्वान्तं विशेषणम्। व्यक्तिबोधस्य धर्मविषयकत्वनियमेन जातिप्रकारतानिरूपितत्वस्यातिप्रसङ्गाऽवारकत्वात्तदनुपादानम्। लक्ष्यतावच्छेदकाऽनाक्रान्तेषु यादृच्छिकेष्वतिप्रसङ्गस्तु लक्षणे तद्व्यतिरिक्तत्वविशेषणेनैव परिहरणीयः। एवं धात्वर्थाऽनुवादकप्रत्ययान्तेष्वप्रसङ्गोऽपि लक्ष्यतावच्छेदकसंकोचेनैव परिहार्यः। तत्र नामत्वव्यवहारोऽपि स्वाद्यन्तत्वनिबन्धनो भाक्त इति तद्भावः। उपसर्गादिलक्षणं तु वक्ष्यते। ❀ भूवादीति ❀।

पत्तिः । तथाच, 'पश्य मृगो धावति' इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्,

प्रभा

वासनाभिप्रायेण, तन्मते एव तिङ आश्रयार्थकत्वात्। नैयायिकनये तु कृतिरेव तिङर्थः। तस्याश्चाऽऽश्रयतासम्बन्धेन, समवायसम्बन्धेन वा प्रथमान्तार्थेऽन्वयः। उभयमतेऽपि भाष्यसिद्धैकवाक्यत्वानुपपत्तिरस्त्येव।

तथाहि—'कर्मणा यमभिप्रैति' (१-४-३२) इति सूत्रे क्रियाग्रहणमपि कर्त्तव्यम्, इहापि यथा स्यात् 'श्राद्धाय निगर्हते' 'युद्धाय संनह्यते' 'पत्ये शेते' इति, तत्तर्हि वक्तव्यम्, न वक्तव्यम्, कथं क्रियां हि नाम लोके कर्मेत्युपचरन्ति। कां क्रियां करिष्यसि। किं कर्म करिष्यसीति, एवमपि कर्त्तव्यम्। कृत्रिमाकृत्रिमयोः कृत्रिमे कर्मसम्प्रत्ययो भवति। क्रियाऽपि कृत्रिमं कर्म। न सिद्ध्यति। 'कर्तुरीप्सिततमं कर्म' इत्युच्यते। कथन्नाम क्रियया क्रिया ईप्सिततमा स्यात्। क्रियाऽपि क्रियया ईप्सिततमा भवति। कया क्रियया? संदर्शनक्रियया प्रार्थयतिक्रियया, अध्यवस्यतिक्रियया च' इत्युक्तं भाष्यकृता। एवञ्च 'सन्दर्शनक्रियया' इत्युक्त्या धावनक्रियायाः दर्शनक्रियाम्प्रति कर्मत्वमुक्तप्रायमिति 'पश्य मृगो धावति' इति वाक्यं मृगकर्तृकधावनकर्मकदर्शनपरत्वेन भाष्यकृतामभिप्रेतमिति प्रतीयते। तदुक्तं हरिणाऽपि—

'सुबन्तं हि यथाऽनेकं तिङन्तस्य विशेषणम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्॥' इति॥

न तु भाष्यकृता 'पश्य मृगो धावति' इत्यस्यैकवाक्यत्वं कुत्रापि कण्ठरवेणोक्तम्। तदुक्तं भाष्यसिद्धेति। एकवाक्यता न स्यादिति—न्यायमते धावनानुकूलकृतिमान्मृगः, 'दर्शनाश्रयस्त्वम्' इत्येव बोधः स्यात्। धावनस्य कृतौ विशेषणतया 'एकत्र विशेषणत्वेनान्वितस्यापरत्र विशेषणत्वायोगात्' दर्शनविशेषणता न स्यादित्येकवाक्यताभङ्गः स्पष्ट एवेति भावः। पदयोरेकवाक्यत्वञ्च—'साक्षात् परम्परया वा स्वार्थान्वितापरार्थबोधकत्वसम्बन्धेन परस्परविशिष्टत्वम्'।

यद्वा, 'स्वघटकमुख्यविशेष्यतायोग्यक्रियाविषयकबोधजनकत्वप्रकारकतात्पर्यीयविशेष्यतावत्पदविशिष्टभिन्नं यन्मुख्यविशेष्यतायोग्यक्रियाविषयकबोधजनकत्वप्रकारकतात्पर्यीयविशेष्यतावत्पदं तादृशपदद्वयाघटितत्वे सति परस्परनिरूप्यनिरूपकभावानापन्नविषयताप्रयोजकपदाघटितत्वमेकवाक्यत्वम्'। पदवैशिष्ट्यञ्च—स्ववृत्त्यानुपूर्वीमत्त्व—स्वप्रयोज्यविषयताप्रयोजकत्वैतदुभयसम्बन्धेन। 'देवदत्तो ग्रामं गच्छति' इत्यत्र मुख्यविशे-

दर्पणव्याख्या

इत्थं हि तत्र भाष्यम्—'का तर्हीयं वाचोयुक्तिः 'पचति भवति' 'त्वं पचसि भवसि' पक्ष्यति भवतीति। सैषा वाचोयुक्तिः, पचादिक्रिया भवतिक्रियायाः कर्त्री भवन्ति" इति। तेन चाऽऽहत्यैव पचाद्यर्थक्रियाकर्त्तृकभवनक्रियायाः प्राधान्यं प्रतिपाद्यते। धात्वर्थक्रियाया आख्यातार्थविशेषणत्वाभ्युपगमे तु स्वस्वार्थविरुद्धत्वेन पदार्थान्तरे विशेषणतयाऽन्वये नैराकाङ्क्ष्येण भवत्यर्थक्रियायामाख्यातार्थविशेषणपचादिक्रियाणामन्वयाऽसम्भवेन तद्विरोधोऽप्रतिरोध एव स्यादिति भावः। सूत्रादीत्यादिना "प्रशंसायाम्" इति सूत्रपरिग्रहः।

ननु "भावप्रधानमाख्यातम्" इति निरुक्तेन तिङन्ते भावनाऽपरपर्य्यायभावप्राधान्यं प्रतिपाद्यते। सा च नैयायिकमते कर्त्राख्याते कर्तृत्वं कृतिः, कर्माख्याते कर्मत्वं फलम्, तन्निरूपिताऽऽश्रयत्वं वा। तैः सङ्ख्याकालातिरिक्ताऽऽख्यातार्थस्य भावनापदव्यपदेश्यत्वोपगमात्। भावाऽऽख्याते तु धात्वर्थव्यापार एवाऽनुवादकत्वात् तदाख्यातस्य। प्राधान्यं च तस्याः प्रकृत्यर्थापेक्षम्।

समानप्रत्ययोपात्तत्वप्रत्यासत्त्या फलमात्रं धात्वर्थ इति वदतां मीमांसकानामेतदपि भाष्यं मूलम्। तत्र लडाद्यर्थ-

SGDF
By Gurukul Kangri Digital Foundation

प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्म्मत्वापत्तौ द्वितीयापत्तेः ।

प्रभा

ष्यतायोग्यक्रियाविषयकबोधजनकत्वप्रकारकं तात्पर्यम्—'गच्छतिपदं मुख्यविशेष्यतायोग्यगमनक्रियाविषयकबोधकम्भवतु' इत्याकारकतात्पर्यीयविशेष्यतावत्पदं गच्छतिपदं तद्विशिष्टं पदन्तदेव। यतः स्व (गच्छति) वृत्तिरानुपूर्वी गच्छतित्वरूपा तद्वत्त्वं तत्रैव गच्छतिपदे एव । स्व (गच्छति) प्रयोज्यविषयता गमननिष्ठा तत्प्रयोजकत्वमपि तत्रैवेति गच्छतिपदविशिष्टं गच्छतिपदमेव, तद्भिन्नं मुख्यविशेष्यतायोग्यक्रियाविषयकबोधजनकत्वप्रकारकतात्पर्य्यीयविशेष्यतावत्पदं 'पचति देवदत्तः' इतिवाक्यघटकं पचतिपदं तादृशपदद्वयाघटितत्वं 'देवदत्तो ग्रामं गच्छति' इत्यस्य। स्वघटकपदप्रयोज्यविषयत्वानिरूपितविषयताप्रयोजकं पदं घटादिपदं तद्घटितत्वमपि 'देवदत्तो ग्रामं गच्छति' इति वाक्ये ।

'ओदनं पच तव भविष्यति' इत्यस्य तु नैकवाक्यत्वम्—पचपदविशिष्टं पचपदं तद्भिन्नं भविष्यतिपदमिति तादृशपचपदभविष्यतीतिपदद्वयघटितत्वमेव तत्र। 'ओदनं पच तव' इत्यस्यापि नैकवाक्यत्वम् । स्वघटकपदप्रयोज्यविषयत्वानिरूपितविषयताप्रयोजकं पदं तवपदं तदघटितत्वं तत्र नास्तीति । 'पश्य मृगो धावति' इत्यत्रैकवाक्यत्वमुपपन्नम् , धावनक्रियायां तादृशतात्पर्यीयविशेष्यता नास्तीति तादृशं पदं पश्यपदं तद्विशिष्टं तदेव तद्भिन्नं तादृशं पदमुदासीनं न तु धावतिपदम्, तदर्थस्य दर्शनक्रियायां विशेषणत्वान्मुख्यविशेष्यत्वाभावात् । एवं 'पचति भवति' इत्यादावप्येकवाक्यत्वं बोध्यम् । विच्छिद्यपाठे साकाङ्क्षत्वे सति एकार्थ (परस्परनिरूप्यनिरूपकभावापन्न) प्रतिपादकत्वमेकवाक्यत्वमित्यर्थकम् 'अर्थैक्यादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्' इति जैमिनिसूत्रमपि तदर्थकमेव ।

प्रथमान्तमृगस्येति—प्रथमान्तमृगपदेनोपस्थितस्येत्यर्थः । एतेन प्रथमान्तस्यानन्वयादिदमसङ्गतमित्यपास्तम् ।

द्वितीयापत्तेरिति—धावनजनककृतिमान् मृगकर्मकदर्शनाश्रयस्त्वमित्यर्थे 'पश्य मृगं धावति' इति

दर्पणव्याख्या

कालान्वयोपगमे तु तदपेक्षमपि । उक्तभाष्येऽपि क्रियापदार्थस्तत्सम्मतभावनैव । अत एव "क्रियां पृष्टस्तिङाऽऽचष्टे" इत्येवोक्तम्, न तु तिङन्तेनेति ।

कृत्यादिरूपभावनाया आख्यातार्थत्वे मानं तु भूवादिसूत्रस्थम् "कथं ज्ञायतेऽयं प्रकृत्यर्थं अयं प्रत्ययार्थः" इति प्रघट्टकेऽन्वयव्यतिरेकाभ्यां शक्तिग्राहकम्—"इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते, पच्शब्दश्चकारान्त अतिश्चप्रत्ययः । श्रूयते प्रत्ययार्थोऽपि कश्चिद् गम्यते, विक्लित्तिः, कर्त्तृत्वम्, एकत्वम् । 'पठति' इत्युक्ते कश्चिच्छब्दो हीयते, कश्चिदुपजायते, कश्चिदन्वयी । पच्छब्दो हीयते, पठ्शब्द उपजायते, अतिशब्दश्चान्वयी । अर्थोऽपि कश्चिद्धीयते, कश्चिदुपजायते, कश्चिदन्वयी । विक्लित्तिर्हीयते, पठिक्रियोपजायते, कर्त्तृत्वमेकत्वं चान्वयि । तेन मन्यामहे यः शब्दो हीयते यस्याऽसावर्थो योऽर्थो हीयते, यः शब्द उपजायते तस्याऽसावर्थो योऽर्थ उपजायते, यः शब्दोऽन्वयी तस्याऽसावर्थो योऽर्थोऽन्वयी" इति भाष्यम् । तत्राऽतेः प्रत्ययस्य कैश्चित्पूर्वाचार्यैः कल्पनाद्, अतिश्च प्रत्यय इत्युक्तमिति कैयटः। 'पच्यते' 'पठ्यते' इत्यादावप्युक्ताऽन्वयव्यतिरेकोद्देशेन कर्मत्वस्याप्याख्यातार्थत्वं न्यायसाम्यात् तत एवाऽवधार्य्यते । किञ्च, भावप्रधानम्" इति निरुक्तं तद्भाष्यस्वरसात् सकलकारकसङ्ख्याविशिष्टभावनाया धात्वर्थत्वमाश्रित्य प्रवृत्तम् । अत एव; नामलक्षणनिर्वचनेन कारकस्य तत्र नामार्थत्वेनोल्लेखः, तस्य धातुलभ्यत्वेन नामार्थत्वाभावादिति तदाशयात् ।

नच रूपप्सूत्रस्थभाष्यप्रामाण्यात् क्रियाया एकत्वसत्त्वेऽपि द्वित्वाऽऽदिसत्त्वे मानाऽभावात् कथं तथोक्तसङ्गतिरिति

दर्पणव्याख्या

वाच्यम्, परे त्वित्यादिना वक्ष्यमाणरीत्या कारकगतायास्तस्यास्तत्राऽऽरोपसम्भवात्। कालसङ्ख्ययोर्द्योत्यत्ववत् कारकस्याऽपि द्योत्यत्वम्, न्यायसाम्यात्। तस्य प्रत्ययार्थत्वोपगमे 'पाचकः' 'पक्वः' इत्यादाविव प्राधान्यापत्तेः। जात्यतिरिक्तपदार्थस्य विशेषणताया द्योत्यत्वस्यैव तन्त्रत्वात्। अत एव "स्त्रियाम्" इति सूत्रे भाष्ये प्राधान्याऽऽपत्तिभिया लिङ्गस्य वाच्यतापक्ष उपेक्षितः। वाच्यस्याऽपि प्रकृत्यर्थाविशेषणत्वे तदसङ्गतिः स्पष्टैव।

नचोक्तकल्पे 'ग्रामं गच्छति' इत्यत्र कर्मबोधवद्धातोरपादानादिकारकविशिष्टक्रियाबोधाऽऽपत्तिः। पञ्चम्यादिरूपसमभिव्याहृतद्वितीयादिविभक्तिश्च द्योतिका, अन्येषां त्वन्याः। नहि स्वप्रकृतिकप्रत्ययत्वमेव स्वार्थद्योतकतायां तन्त्रम्, उपसर्गाणां तदनापत्तेः। किन्तु, स्वसमभिव्याहृतप्रत्ययनिपातान्यतरत्वम्। तच्च तण्डुलादिपदोत्तरविभक्तेरप्यक्षतम्। द्रव्यस्य संख्याऽविशेषितस्य तत्त्वे नाम्नः सङ्ख्याभानाऽऽपत्त्या तदर्थकत्वमावश्यकमिति तद्भावः। अत एव "भावकालकारकसङ्ख्याश्चत्वारोऽर्था आख्यातस्य" इति भाष्यस्थकारकपदस्याऽसङ्कुचितवृत्तिताऽपि सङ्गच्छते।

यदि चान्यप्रकृतिकविभक्तेरन्यप्रकृत्यर्थद्योतकतायाः क्वाप्यदृष्टचरत्वान्नोक्ताऽऽशयवर्णनं साधीय इति विभाव्यते, तदापि सङ्ख्याकालकर्त्तृकर्मकारकविशिष्टक्रियाया धात्वर्थत्वमादाय तत्प्रवृत्तिः, आख्यातस्यैव तादृशक्रियाद्योतकतासम्भवात्।

नचास्त्वेवमेवाऽऽशयः, वाच्यताकल्पोक्तकार्यकारणभावकल्पनप्रयुक्तलाघवस्योपोद्बलकत्वादिति वाच्यम्, यत् तादृशमतं प्रक्रियादशायां चक्षुःश्रुत्युक्तिविश्वस्तैरत्याश्रयितुमशक्यम्, प्रागेव तु प्रकृतिप्रत्ययाऽर्थविवेचनचतुरैराक्षपादैः। तथाहि—कारकविशिष्टक्रियाया धात्वर्थत्वे 'लः कर्मणि' इति विधिवैयर्थ्यापत्तिः। नच तस्या द्योतकत्वप्रतिपादकता, शानजादेरपि तथात्वाऽऽपत्त्या तत्राऽपि कर्त्रादीनां क्रियाविशेषणतया भानापत्तेः।

किञ्च, 'चैत्रौ पचतः' इत्यादौ चैत्रादिगतसङ्ख्यायास्तत्रारोपे मानाभावः, वाचकतामते कर्त्राद्यंशे तद्भानोपगमेन प्रयोगप्रामाण्योपपत्तावाप्रामाण्याऽभ्युपगमस्याऽन्याय्यत्वात्, स्वाश्रयाऽऽधेयत्वसम्बन्धेन द्वित्वादेस्तत्र सत्त्वेऽप्यव्यावर्त्तकतया विशेषणत्वाऽभावेन तद्वैशिष्ट्यस्य तत्राऽसम्भवाच्च। नहि द्वित्वाश्रयाश्रितं घटाऽऽदिरूपं क्रिया वा, द्वे इति व्यवह्रियते। अधिकमग्रे वक्ष्यते।

किञ्च, कर्त्तृकर्मणोः पदार्थैकदेशतया तत्र देवदत्तादीनामन्वयाऽसम्भवः, "पदार्थः पदार्थेनाऽन्वेति" इति व्युत्पत्तेः। तदन्वयाऽभ्युपगमेऽपि धात्वर्थे ऽभेदेन विशेषणतया स्तोकादिपदवन्नपुंसकत्वाऽऽपत्तिश्च। अपिच, क्रियाविशेषणत्वेनोपस्थितस्य कर्त्तृविशेषेणाऽऽकाङ्क्षाविरहात् पचतीत्युक्ते, कः कीदृगिति प्रश्नाऽनुपपत्तिः। वक्ष्यति हि ग्रन्थकृत्—'नहि गुणभूतः कर्त्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्' इति। अत एवैतत्प्रामाण्यात् प्रत्ययवाच्यत्वम्, कर्तुर्धात्वर्थविशेषणत्वं चेति गर्ज्जयन्तः परास्ताः, प्रत्ययस्य द्योतकतायामेव तन्नियमस्य दर्शितत्वात्, प्रत्ययार्थप्राधान्यस्यैव ततो लाभाच्च।

नच भावनायाः प्रत्ययवाच्यतापक्षेप्युक्तप्रश्नाऽनुपपत्तिर्दुःसमाधेयैवेति वाच्यम्, शक्तिभ्रमाल्लक्षणया वोपस्थितस्य कर्त्तुः साकाङ्क्षत्वसम्भवात्।

किञ्च, 'प्रत्ययानां प्रकृत्यर्थाऽन्वितस्वार्थबोधकत्वम्' इति व्युत्पत्तिसिद्धविभक्त्यर्थसङ्ख्याप्रकारकबोधं प्रति विशेष्यतया प्रकृतिजन्योपस्थितेर्हेतुत्वस्य कर्त्रादावभावेन सङ्ख्याऽन्वयाऽसम्भवः। आख्यातार्थसङ्ख्याप्रकारकबोधे आख्यातार्थकर्त्तृकर्मोपस्थितेर्हेतुत्वकल्पनमप्याग्रहमूलकमेव, पदार्थयोराधाराधेयभावेनाऽन्वये विभिन्नपदजन्योपस्थितेस्तन्त्रत्वात्। विभक्त्यर्थकर्त्तृलिङ्गानन्वयिनोऽद्रव्यतया तत्र सङ्ख्यान्वयासम्भवात्, "गुणानाञ्च परार्थत्वात्" इति न्यायाच्च। मन्मते अयोग्यतया तस्याः स्वप्रकृत्यर्थानन्वयेऽपि प्रकृत्यर्थान्वयनियमोऽक्षत एव, "अणुरपि विशेषोऽध्यवसायकरः" इति न्यायात्।

किञ्चाऽऽख्यातस्य कर्त्रर्थकत्वे राजसम्बन्धिपुरुषाऽभिन्नकर्त्तृकं गमनमित्यभिप्रायेण, 'राज्ञः पुरुषो गच्छति' इतिवत् स्वस्वामिभावादिसम्बन्धेन राज्ञः कर्त्तृत्वेन विवक्षया 'राजा पुरुषो गच्छति' इति प्रयोगाऽऽपत्तिः। नच तत्र षष्ठीप्रसक्तिः,

दर्पणव्याख्या

तदर्थस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव तत्प्रसरात्। व्यक्तीभविष्यति चैतदुपरिष्टात्। आख्यातार्थकर्तुरनामधात्वर्थत्वेन "नामार्थधात्वर्थत्वयोः" इति व्युत्पत्तिविषयताया अप्यभावात्।

नच तवापि चैत्रस्य पाकानुकूला कृतिरिति 'चैत्रस्य पचति' इति प्रयोगापत्तिरिति वाच्यम्, षष्ठ्यर्थस्य नामार्थसाकाङ्क्षतयाऽऽख्यातार्थकृतेश्च प्रथमान्तार्थसाकाङ्क्षतया परस्पराकाङ्क्षाविरहात्, "गुरुविप्रतपस्विदुर्गतानाम्" इत्यादाविव पाकादिसम्बन्धितया चैत्रादिविवक्षायां षष्ठ्यन्तप्रयोगस्य सर्वैरेवोपगमाच्च। तस्माद्धात्वर्थक्रियाया आख्यातार्थं प्रति प्राधान्ये निरुक्तमानोपन्यसनं मुधैवेति कोविदो विदांकुर्वन्तु।

पचतिभवतीत्यादौ पाकानुकूलाऽऽख्यातार्थकृतौ भावनाश्रयत्वरूपभवतीति तिङन्ताऽर्थभावनाऽन्वयोपगमेन पाकविशिष्टकृतौ भवनकर्तृत्वेऽवगते तद्विशेषणपच्यर्थक्रियायामपि तल्लाभात् 'पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति' भाष्यस्थादिपदस्य हेतुपरतया तेन व्यापाराऽर्थकपचादिशब्दस्य समासे पच्याद्यर्थहेतवः क्रियाः कृत्यात्मकव्यापार भवनक्रियानिरूपितकर्तृत्ववत्यो भवन्तीत्यर्थस्य तस्माल्लाभाद् वा तादृशैकवाक्यत्वस्याऽस्माभिरभ्युपगमान्न भूवादिसूत्रस्थभाष्यविरोधोऽपि। तादृशभाष्यप्रामाण्यादेव च भवन्मते धात्वर्थप्रकारकबोधे धातुजन्योपस्थितेर्हेतुत्ववन्मन्मतेऽप्याऽऽख्यातार्थभावनाप्रकारकबोधे तिङ्जन्यभावनोपस्थितेरपि विशेष्यतासम्बन्धेन हेतुत्वस्य कल्प्यतयोक्तैकवाक्यत्वस्य सूपपादत्वात्।

नचोक्तबोधाभ्युपगमे आख्यातेन कर्तुरबोधनाच्चैत्रादिपदोत्तरं तृतीयाऽऽपत्तिरिति वाच्यम्, तादृशप्रथमान्तार्थप्रकारकबोधे विशेष्यतया तिङ्जन्योपस्थितेर्हेतुतया तस्यां चैत्रस्याऽऽधेयतासम्बन्धेनाऽन्वयाभ्युपगमेन मुख्यविशेष्यतयैव तद्भानेन आश्रयातिरिक्तांशे विशेषणतया कृत्याश्रयबोधनरूपस्याभिधानस्य तत्र सत्त्वात् तृतीयाऽऽपत्त्यसम्भवात्।

नच चैत्रः पचतीत्येतावन्मात्रप्रयोगेऽपि चैत्रस्याऽऽधेयतासम्बन्धेनान्वयाऽऽपत्तिरिति वाच्यम्, प्रथमान्ताऽर्थप्रकारकबोधे तिङर्थविशेष्यतापन्नभावनोपस्थितेर्हेतुत्वस्यापि कल्पनेनोक्तदोषाऽप्रसक्तेः।

नच चैत्रे पाकानुकूला कृतिरित्यत्रेव चैत्रः पचति भवतीत्यादौ सप्तम्याऽऽपत्तिर्दुर्वारैवेति वाच्यम्, धात्वर्थविशेषणभूताधेयत्वस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव सप्तमीविधानात्, एवमाधेयत्वस्य प्रकारतयाऽविवक्षणाच्च। इदं चाख्यातार्थकृतिमुख्यविशेष्यकबोधमभिप्रेत्योक्तम्। वस्तुतस्तु, चैत्रः पचति भवतीत्यादौ प्रथमान्तार्थविशेष्यकबोधाभ्युपगमेऽपि नैकवाक्यताक्षतिः, भवनकर्तृत्वाऽन्विताया एव पाकविषयकभावनायाश्चैत्रांशे प्रकारतया भानसम्भवात्।

एतेन कृतिविशेष्यकबोधाभ्युपगमे प्रथमान्तार्थप्रकारकबोधे तिङर्थभावनोपस्थितेर्हेतुत्वकल्पने गौरवमिति दूषणमलग्नकम्, विशेषणतयैव तदन्वयाभ्युपगमादित्यरुचेराह ❀ अपिचेति ❀। ❀ अभेदान्वयादिति ❀ इदं च तन्मतेऽपि कर्त्राख्यातार्थ इति स्वीयवासनाऽनुसारेण। नैयायिकमते तु कृतेराख्यातार्थतया तस्या आश्रयत्वेनैव प्रथमान्तपदाऽर्थेऽन्वयादित्यवधेयम्।

❀ भाष्यसिद्धेति ❀ "क्रियाऽपि कृत्रिमं कर्म, क्रियाऽपि हि क्रिययेप्सिता भवति, कथा, सन्दर्शनप्रार्थनादिक्रियया" इति "कर्मणा यम्" इतिसूत्रस्थभाष्यसिद्धेत्यर्थः। त्वन्मते धावनाऽनुकूलकृतिमान् मृग इत्यावान्तरवाक्यार्थबोधस्य तत्र जायमानत्वेन धावनस्य कर्त्रवरुद्धतया विशेषणतयाऽन्यत्राऽन्वये नैराकाङ्क्ष्येण दर्शने कर्मतयाऽन्वयाऽयोगात्। किन्तु धावनाऽनुकूलकृतिमान् मृगो दर्शनाश्रयस्त्वमित्येव बोध एष्टव्यः। एवञ्चैकमुख्यविशेष्यकबोधजनकत्वरूपैकवाक्यत्वाऽभावात् तद्विरोधो दुर्वार इति भावः।

ननु धावनाऽनुकूलकृतिमन्मृगस्यैव कर्मतया दृश्यर्थेऽन्वयान्नोक्तदोषोऽत आह—❀ प्रथमान्तेति ❀। ❀ कर्मत्वापत्ताविति ❀ कर्मत्वेन प्रकारतापत्तावित्यर्थः। कर्मतासम्बन्धेन मृगस्य दर्शनक्रियायामन्वयस्त्वसम्भवी, "नामार्थधात्वर्थयोः" इति व्युत्पत्तिविरोधात्, वक्ष्यमाणद्वितीयाऽऽपादनविरोधाच्चेति भावः। ❀ द्वितीयापत्तेरिति ❀ कर्मणोऽत्र तिङाऽनभिधानेन अनभिहिताधिकारीय "कर्मणि द्वितीया" इत्यस्य जागरूकत्वादिति भावः।

F-688

नचैवमप्रथमासामानाधिकरण्याच्छतृप्रसङ्गः, एवमपि द्वितीयाया दुर्वारत्वेन 'पश्य मृगः' इत्यादिवाक्यस्यैवाऽसम्भवापत्तेः ।

नच पश्येत्यत्र तमिति कर्माध्याहार्य्यम्, वाक्यभेदप्रसङ्गात्, उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वात्, आध्याहारेऽनन्वयापत्तेश्च ।

प्रभा

वाक्यस्यैव सम्भवेन तादृशवाक्यस्यैवासिद्धिरित्याशयः । वैयाकरणमते तु न द्वितीयापत्तिः, धावनस्यैव कर्मतया तद्वाचकधातोरप्रातिपदिकत्वात्, मृगस्याकर्मत्वाच्च । धावनस्य च कर्मतानिरूपकत्वसम्बन्धेन दर्शनेऽन्वयः ।

ननु तार्किकमतेऽपि न द्वितीयापत्तिः, धावनक्रियाविशिष्टमृगस्यैव कर्मतया मृगशब्दस्य तादृशविशिष्टावाचकत्वेन कर्मावाचकत्वात् । नच विशिष्टस्य शुद्धानतिरिक्ततया शुद्धस्यापि कर्मत्वेन दोषतादवस्थ्यम्, ज्ञानार्थकधातुसमभिव्याहारे कर्मत्वस्य विषयतारूपतया प्रकृते धावनविशिष्टमृगत्वावच्छिन्नविषयताया एव कर्मतात्वेन मृगशब्दस्य तदप्रयोजकत्वात् । अत एव

'श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।'
'जानामि सीता जनकप्रसूता ।'

इत्यादिषु सीताशब्दादुत्पत्तिशब्दाच्च न द्वितीयेति चेन्न, नीलमुणविशिष्टघटादेः कर्मत्वविवक्षायां 'नीलं घटमानय' इत्यादौ द्वितीयानापत्तेः । नचेष्टापत्तिः, 'अनभिहिते' (२-३-१) इतिसूत्रस्थभाष्यविरोधात् । तत्र हि 'अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः' इति परिगणनाभावे भीष्मगुणविशिष्टस्य कर्मत्वविवक्षायां कटशब्दादुत्पन्नद्वितीयया कर्मत्वस्योक्ततया भीष्मशब्दाद् द्वितीया न स्यादिति परिगणनमित्युक्तम् । विशिष्टस्य कर्मत्वे प्रत्येकं कर्मत्वाप्रयोजकत्वे 'भीष्मं कटं कुरु' इत्येतत्परकभाष्यस्यासङ्गत्यापत्तिः स्पष्टैव । पूर्वोक्तेषु

'श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।'

'जानामि सीता जनकप्रसूता' इत्यादिषु 'उत्पत्तयः शुभाः' इत्यत्राऽऽर्षत्वादेव द्वितीयार्थे प्रथमा । 'जानामि सीतां जनकप्रसूताम्' इत्येव, पाठः । वाक्यभेदेति—'धावनजनककृतिमान् मृगः' इत्येको बोधः । 'तत्कर्मकदर्शननिरूपिताऽऽश्रयतावांस्त्वम्' इत्यपर इत्येकवाक्यत्वाभावः, पूर्ववाक्यघटकपदार्थनिष्ठविषयत्वानिरूपितविषयताप्रयोजकपश्यादिपदघटितत्वात् । ननु तमित्यस्याध्याहारे पूर्ववाक्यघटकमृगपदार्थतत्पदार्थयोरैक्यान्मृगनिष्ठकर्मतानिरूपकत्वसम्बन्धावच्छिन्नविषयतानिरूपितदर्शननिष्ठविषयतायां सत्त्वेनैकवाक्यत्वात्तदतिरत आह—उत्कटधावनेति । अनन्वयेति—धावनक्रियाया इति शेषः । यद्वा, तदर्थमृगस्य । तथाच दर्शनक्रिया-

दर्पणव्याख्या

❀ एवमिति ❀ मृगपदोत्तरं द्वितीयाप्रसङ्गे इत्यर्थः । शतृशानजविधौ लडर्थकर्तुः प्रथमान्ताऽर्थसामानाधिकरण्येन विशेषितत्वान्मृगपदस्य द्वितीयान्तत्वे तदापत्त्या द्वितीया न भविष्यतीति शङ्कितुराशयः । नहि शत्रापत्तिर्द्वितीयाप्रतिबन्धिका, किन्तु कर्मणोऽभिधानम्, तदभावसत्त्वाच्च द्वितीया दुर्वारेत्याशयेन समाधत्ते—❀ एवमपीति ❀ । ❀ असम्भवापत्तेरिति ❀ । मृगस्य कर्मतया दृश्यर्थेऽन्वयोपगमे 'धावन्तं मृगं पश्य' इति वाक्यस्यैवोचितत्वादित्यर्थः ।

ननु "अर्थैक्यादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्" इति जैमिनिसूत्राद् विच्छिद्य पाठे साकाङ्क्षत्वे सत्येकार्थप्रतिपत्तिजनकत्वमेकवाक्यत्वमित्यर्थो लभ्यते । प्रकृते तमित्युक्ते कमित्याकाङ्क्षासत्त्वाद्यथाकथञ्चिद्वाक्यद्वयस्य धावनाऽनुकूलकृतिमन्मृगकर्मकदर्शनरूपैकार्थप्रतिपादकत्वाच्च न वाक्यभेदप्रसङ्गोऽत आह—❀ उत्कटेति ❀ । ❀ अध्याहार इति ❀ पूर्वाऽनुपात्ताकाङ्क्षितपदस्याऽनुसन्धाने इत्यर्थः । ❀ अनन्वयापत्तेश्चेति ❀ तत्पदेन मृगस्य धावनाऽनुकूलकृतिमन्मृ-

एवञ्च, 'भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणम्' इति नैयायिकोक्तं नादरणीयम्। किन्तु 'आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणम्' इति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद् धात्वर्थभावनो-

प्रभा

निरूपितविषयतारूपफलाश्रयत्वेन धावनस्यैव विवक्षिततया मृगस्याकर्मत्वेनानन्वयापत्तेरित्यर्थः। एवञ्च भाष्याभिमतैकवाक्यत्वासिद्धिरिति भावः। नच अध्याहृततत्पदेन धावनस्यैव ग्रहणमिति नानुपपत्तिरिति वाच्यम्, सर्वनाम्नां प्रधानपरामर्शित्वेन विशेषणीभूतधावनस्य तेन परामर्ष्टुमशक्यत्वात्। एवञ्च = उक्तरीत्या कर्तुराख्यातार्थत्वस्य, धात्वर्थप्राधान्यकबोधस्य च सिद्धौ। भावनेति—तार्किकमते सङ्ख्याकालातिरिक्तस्तिङर्थो भावना। बोध इति—विशेष्यतासम्बन्धेन इति शेषः। कारणमिति—तत्तत्प्रथमान्तार्थनिष्ठविशेष्यतासम्बन्धेनेति शेषः। तेन प्रथमान्तपदजन्यसमूहालम्बनोपस्थितौ पदार्थान्तरे नान्वयः। कर्त्तृप्रकारकेति—कर्तृनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनेत्यर्थः। फले व्यभिचारवारणायाऽऽह—भावनात्वेति—ननु धातुना भावनायाः पृथगुपस्थितौ भावनात्वनिष्ठप्रकारतानिरूपिता भावनानिष्ठा विशेष्यतारूपविषयता सा च न भावनात्वावच्छिन्ना, स्वनिष्ठप्रकारतानिरूपितविशेष्यतायाः स्वेनानवच्छिन्नत्वादिति चेन्न, भावनात्वनिष्ठप्रकारतानिरूपितविशेष्यताऽऽख्यविषयतयेति तदर्थात्, भावनात्वस्य भावनानिष्ठोपस्थितीयविशेष्यतायाः शक्तिभास्यसमवायसम्बन्धेनावच्छेदकत्वाभावेऽपि सामानाधिकरण्यसम्बन्धेनावच्छेदकत्वसम्भवाच्चेति तत्त्वम्। धातुना भावनात्वेन भावनोपस्थितिरित्यभिप्रायेणेदम्।

वस्तुतस्तु, नेदं युक्तम्, सर्वधातूनां पर्यायतापत्तेः, एकधर्मप्रकारकोपस्थापकानामेव पर्य्यायत्वात्। अतस्तत्तद्विशेषधर्मेणोपस्थापकत्वे तु पाकत्वादिनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनेत्यर्थो बोध्य इति गुरवः।

एवं कर्मप्रत्ययस्थले विशेष्यतासम्बन्धेन तिङर्थकर्मप्रकारकबोधम्प्रति धातुजन्यफलोपस्थितिविशेष्यतासम्बन्धेन कारणमित्यपि द्रष्टव्यम्।

ननु धात्वर्थभावनायाः कृदर्थम्प्रत्येव विशेषणत्वम्, यथा 'पक्ता' इत्यादौ विक्लित्त्यनुकूलव्यापाराश्रय इति बोधः। तथाच 'पश्य मृगो धावति' 'पचति भवति' इत्यादौ क्रियाप्रकारकक्रियाविशेष्यकबोधो न स्यादित्यत आह—भावनाप्रकारकेति। कृज्जन्योपस्थितिवदिति। ननु यत्र कृज्जन्योपस्थितौ कथञ्चिद् घटार्थोऽपि विषयीभूतस्तत्र कृज्जन्योपस्थितिर्विशेष्यतासम्बन्धेन घटेऽपीति तत्रापि भावनान्वयः स्यादिति चेन्न, स्वजनकज्ञानीयकृन्निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन कृज्जन्योपस्थितेः कारणत्वस्वीकारात्। स्वम्=उपस्थितिस्तज्जनकं ज्ञानम्, शक्तिसम्बन्धेन कृद्विशिष्टः कर्तृरूपोऽर्थस्तज्ज्ञानीयविशेष्यता कर्तृनिष्ठेति तादृशविशेष्यतासम्बन्धेन कर्तर्य्येवोपस्थितेः सत्त्वान्न घटादावन्वयो भावनायाः।

दर्पणव्याख्या

गस्य वा परामर्शेऽपीप्सितस्य तादृशधावनक्रियाया इत्यर्थकर्मत्वान्वयस्य तद्वाक्याद् भानाऽनुपपत्तेरित्यर्थः। उपसंहरति—❀ एवञ्चेति ❀ आख्यातार्थविशेष्यकबोधाऽङ्गीकर्तृनये एकवाक्यताऽनुपपत्तिरूपदूषणदार्ढ्यं चेत्यर्थः। ❀ नादरणीयमिति ❀ उक्तदोषग्रस्तत्वादिति भावः। स्वमतनिष्कर्षमाह—❀ किन्त्विति ❀ फले व्यभिचारनिरासायोपस्थितिविशेष्यतां विशिनष्टि—❀ भावनात्वावच्छिन्नेति ❀।

पस्थितिरपि हेतुः, 'पश्य मृगो धावति', 'पचति भवति' इत्याद्यनुरोधादिति दिक्।

इत्थञ्च पचतीत्यत्रैकाऽऽश्रयिका पाकाऽनुकूला भावना। पच्यते इत्यत्रैकाऽऽश्रया या विक्लित्तिस्तदनुकूला भावनेति बोधः।

प्रभा

हेतुरिति—कार्यकारणभावस्यानुभवमूलकत्वात्तादृशकार्यकारणभावोऽपि कल्प्यत इति भावः।

इत्थञ्चेति—कर्तृप्रत्यये तिङर्थकर्तुः, कालस्य च धात्वर्थव्यापारविशेषणत्वे, तिङर्थसंख्यायास्तिङर्थकर्तृविशेषणत्वे, कर्माऽऽख्याते तृतीयार्थकर्तुः, तिङर्थकालस्य च धात्वर्थव्यापारविशेषणत्वे संख्यायास्तिङर्थकर्मविशेषणत्वे, कर्मणश्च धात्वर्थफलविशेषणत्वे, फलस्य च धात्वर्थव्यापारविशेषणत्वे चेत्यर्थः। एकाऽऽश्रयिकेति—समवायसम्बन्धेनैकत्वविशिष्टो य आश्रयस्तन्निष्ठा वर्तमानकालावच्छिन्ना विक्लित्त्यनुकूला भावनेति बोधः। पच्यत इति—समवायसम्बन्धेनैकत्वविशिष्टो यः कर्मरूप आश्रयस्तन्निष्ठा या विक्लित्तिस्तदनुकूला देवदत्ताभिन्नकर्तृनिष्ठा वर्तमानकालावच्छिन्ना भावनेति बोधः।

नवीनमते कर्मणि तिङि धात्वर्थव्यापारः फले जन्यत्वसम्बन्धेन विशेषणम्। 'पक्वः' इत्यादौ कर्मणि क्तिः 'फुत्कारादिव्यापारजन्यविक्लित्त्याश्रयः' इति बोधानुसारेण व्यापारम्प्रति फलस्य प्राधान्यदर्शनात् कर्मतिङ्यपि फलस्यैव विशेष्यत्वमुचितम्। अत एव 'इष्यते पुत्रः' 'इष्टः पुत्रः' इत्यर्थे 'पुत्रीयति' इति न प्रयोगः, भिन्नार्थत्वात्। किन्तु पुत्रमिच्छतीत्यर्थे एव 'क्यच्' इति 'सुप आत्मनः' इति सूत्रे भाष्यम्। भिन्नार्थत्वञ्चैकत्र फलप्राधान्यम्, अपरत्र व्यापारस्येति नव्याः।

उभयत्र व्यापारविशेष्यकबोधवादिप्राचीनास्तु पुत्रीयतीत्यत्र कर्तरि संख्यान्वयः, कर्मप्रत्यये कर्मणि तदन्वय इति भिन्नार्थत्वमाश्रित्य भाष्यं सङ्गमयन्ति। तथाच देवदत्ताभिन्नकर्तृनिष्ठस्तण्डुलाभिन्नाऽऽश्रयनिष्ठविक्लित्त्यनुकूलो वर्तमानकालावच्छिन्नो व्यापार इति प्राचीनमते व्यापारविशेष्यक एव बोधः। नव्यमते तु देवदत्ताभिन्नकर्तृनिष्ठवर्तमानकालावच्छिन्नव्यापारजन्या तण्डुलाभिन्नाऽऽश्रयनिष्ठा विक्लित्तिरिति बोधः।

दर्पणव्याख्या

ननु त्वन्मतेऽप्याख्यातस्य धात्वर्थमुख्यविशेष्यकबोधजनकत्वनियमभङ्गप्रसङ्गोऽत आह—❀ पश्येति ❀ तथाचोक्तनियम एतदतिरिक्तविषयक इति भावः।

ननु धावनकर्तृत्वविशिष्टमृगरूपवाक्यार्थस्य कर्मतया दर्शनेऽन्वयः। तथाच न "नामार्थयोः" इति व्युत्पत्तिविरोधः, वाक्यस्यानामत्वात्। अत एव न ततो द्वितीयापत्तिरपि। धावनविशिष्टस्य दर्शनकर्मत्वाऽवगतौ विशेषणीभूतधावनस्यापि कर्मतालाभाच्च न प्रतिपिपादयिषितान्वयालाभोऽपि। 'चैत्रः पचति भवति' इत्यादौ तूक्तदिशैकवाक्यत्वमुपपादितमेव। तथाचोक्तकार्य्यकारणभावकल्पे कथं तदनुरोधो बीजमत आह—❀ दिगिति ❀ तदर्थस्त्वेवंरीत्या वाक्यैकवाक्यताप्रतिपादने भाष्यकृत्सम्मतपदैकवाक्यतया प्रतिपिपादयिषितान्वयालाभ एव। किञ्चाभेदेन नीलविशिष्टघटस्य कर्मत्वे प्रतिपिपादयिषिते, 'नीलं घटं जानाति' इत्यादौ द्वितीयानुपपत्तिरिति।

अत्र नैयायिकाः—धावनक्रियाकर्तृत्वावरुद्धमृगस्य कर्मतासम्बन्धेन दृश्यर्थेऽन्वयोपगमान्न पदैकवाक्यताभङ्गः। तदवरुद्धत्वञ्च तदन्वयितया तात्पर्य्यविषयत्वम्। नचैवं कर्मतासंसर्गेण तण्डुलस्याऽप्यन्वयसम्भवात् 'तण्डुलः पचति' इति प्रयोगापत्तिरिति वाच्यम्, यतो न वयं सामान्यतः कर्मत्वादिभेदसम्बन्धेन नामार्थस्य धात्वर्थेऽन्वयमभ्युपेमः, किन्तु क्रियान्तरकर्तृत्वाऽवरुद्धस्य। नच तण्डुलस्तथा, येन पच्याद्यर्थे तस्य कर्मतासंसर्गः स्यात्। अत एव 'काष्ठं भस्मराशिः करोति' इति न प्रयोगः, भस्मराशेः कर्तृत्वानवरुद्धत्वात्। 'काष्ठं भस्मराशिः क्रियते' इत्यादौ कर्मत्वान्तरावरुद्धक्रियायां तु तदनवरुद्धस्यापि व्युत्पत्तिवैचित्र्यात्। तस्य तत्र तत्संसर्गत्वाऽनभ्युपगमे वाक्यभेदाऽऽपत्त्या तद्वाक्यजबोधस्य, 'काष्ठं

दर्पणव्याख्या

नाश्यते' 'भस्म क्रियते' इति वाक्यद्वयजबोधस्येव 'भस्मकाष्ठविकृतिरन्यविकृतिर्वा' इति संशयनिवर्त्तकत्वानापत्तेरित्याद्यन्यत्र प्रपञ्चितम् ।

एवञ्चाऽत्र पदैकवाक्यताया अनायासेनैवोपपत्तौ भावनाप्रकारकबोधे धात्वर्थभावनोपस्थितेर्हेतुत्वं निष्प्रमाणकमेव । नाऽपि मृगपदोत्तरं द्वितीयाऽऽपत्तिः, प्रातिपदिकार्थविशेष्यतया कर्मत्वस्याऽविवक्षणात् । अत एव न तत्र षष्ठीप्रसक्तिरपि, संसर्गस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव, "षष्ठी शेषे" इत्यनेन तद्विधानात् । एवम्, 'घटो नास्ति' इत्यादावपि बोध्यम् । किन्तु प्रातिपदिकार्थे तत्र प्रथमैव । नाऽपि 'नीलं घटं जानाति' इति प्रयोगाऽनुपपत्तिः, घटस्य क्रियान्तरकर्तृत्वाऽनवरुद्धत्वेन कर्मत्वान्तरविशेषणतानापन्नायां जानात्यर्थक्रियायां कर्मतायाः संसर्गत्वासम्भवात् ।

'पश्य लक्ष्मण पम्पायां बकः परमधार्मिकः' ।

इत्यादावस्तीत्यध्याहार्य्यम् । वस्तुतस्त्वेतत् दृष्टान्तेन 'तण्डुलः पचति' इत्यादौ बोधाऽऽपादनं न विचारसहम्, कर्मताऽन्वयसंसर्गकपच्यर्थविशेष्यकबोधस्याप्रसिद्धौ तथाऽऽपादनासम्भवात् । 'तण्डुलं पचति' इत्यादौ विभक्त्यर्थकर्मत्वसम्बन्धेन तादृशबोधः प्रसिद्ध इति चेत्तर्हि तादृशबोधे द्वितीयान्ततण्डुलपदसमभिव्याहृतपचतीत्यानुपूर्वीज्ञानस्य हेतुतया तदभावादेवाऽऽपाद्यस्याप्यऽसम्भवात् । तदुक्तम्—'यादृशं फलं क्वचित् प्रसिद्धं तादृशस्यैवाऽऽपत्तिः सम्भवति' इति ।

एतेन 'पश्य लक्ष्मण' इत्यत्र "अस्तिर्भवन्तीपरोऽनुप्रयुज्यमानोऽप्यस्ति" इति भाष्यस्थाऽपिशब्दस्वारस्येन वाक्यपरिपोषकक्रियान्तराऽभावेऽस्तेरध्याहार इत्यर्थलाभेन प्रकृते वाक्यपरिपोषिकाया दर्शनक्रियायाः सत्त्वेन तदध्याहारे मानाभावात् कर्मतासंसर्गेणाऽन्वयोऽनुपपन्न इति दूषणमलग्नकम् । एवञ्चाऽऽख्याते प्रथमान्तपदसमभिव्याहारे प्रायः प्रथमान्तार्थविशेष्यकबोधो निराबाधः । अत एव, 'यो यः शूद्रस्य पचति द्विजोऽन्नं सोऽतिनिन्दितः' इत्यत्र प्रधानपरामर्शितदो द्विजपरामर्शकत्वमनायासेन संगच्छते ।

ननु प्रथमान्तार्थविशेष्यकबोधवादिमते, 'पचतिकल्पं चैत्रः' "पचतःकल्पं चैत्रौ" इत्यादौ कल्पबाद्यन्तस्य नामतया, तद्विशेषणवाचकतया च प्रथमान्तचैत्रादिपदसमानलिङ्गवचनत्वाऽऽपत्तिराख्यातार्थकृतेः प्रथमान्तार्थचैत्रादावभेदान्वयापत्तिश्चेति चेन्न, स्वार्थिकानां प्रायशः प्रकृत्यर्थताऽवच्छेदकगतकुत्सादिद्योतकतया प्रकृते प्रकृत्यर्थताऽवच्छेदकक्रियागतेषदसमाप्तत्वस्य कल्पपा द्योतनात्, सत्त्वासत्त्वाभ्यां प्रकृत्यर्थतावच्छेदकसमानस्य भावेषदसमाप्तत्वप्रतिपादककल्पबाद्यन्ते नपुंसकैकवचनान्तत्वयोरौचित्यात् । कल्पबाद्यन्तस्य नामत्वेन समानविभक्तिकत्वेन च तदर्थस्य चैत्रेऽभेदाऽन्वयाऽऽपत्तिरिति तु मूर्खप्रलपितत्वादनादेयम्, लक्ष्यार्थकर्तृरभेदान्वयस्येष्टत्वात् । शक्यार्थस्य त्वयोग्यत्वादेवानन्वयात्, 'घटः' 'पटः' इत्यादौ व्यभिचारवारणाय व्युत्पत्तावसति बाधके इति विशेषणाच्चेत्याहुः ।

अत्रेदमाभाति—प्रथमान्तकर्तृवाचकपदसमभिव्याहारे प्रायः प्रथमान्तार्थविशेष्यकबोध एव नैयायिकानाम् । क्वचित्तु, पश्य मृगो धावतीत्याद्येकवाक्यताऽनुरोधात् तिङर्थभावनाविशेष्यकोऽपि सः । तथाहि—वैयाकरणैरुक्तस्थलीयैकवाक्यतानुरोधाद्धात्वर्थभावनाप्रकारकबोधे धातुजन्यभावनोपस्थितेर्हेतुता कल्प्यते ।

नैयायिकैस्तु कर्मतासम्बन्धेन तिङर्थभावनाप्रकारकबोधे धातुजन्यभावनोपस्थितेस्तदिति सममेव । 'देवदत्तः पचति भवति' इत्येकवाक्यतानुरोधात्प्रथमान्तार्थकर्तृप्रकारकबोधे तिङर्थभावनोपस्थितेरपि तत्कल्प्यते । तथाचोक्तस्थल आधेयतासम्बन्धेन मृगविशिष्टधावनाऽनुकूलकृतेः कर्मतया दृश्यर्थेऽन्वये मृगनिष्ठा या धावनाऽनुकूला कृतिस्तत्कर्मदर्शनाऽऽश्रयस्त्वमिति वाक्यार्थबोधः । धावनविशिष्टकृतौ च बोधितकर्मत्वस्य, "सविशेषणे हि" इति न्यायाद्धावने पर्यवसानाच्च प्रतिपिपादयिषितार्थस्याऽपि लाभः । नाऽपि मृगपदोत्तरं द्वितीयाऽऽपत्तिः, मृगकर्मताया एतद्वाक्यादलाभात् । एवञ्च, 'पचति भवति' इत्यत्राऽपि 'प्रथमान्तार्थकर्तृविशिष्टा पाककृतिर्वर्त्तमानभावनाऽऽश्रयिका' इति बोधात् तत्राऽप्येकवाक्यत्वाऽक्षतिः । एवञ्च

दर्पणव्याख्या

'प्रकृतिप्रत्ययार्थयोः' इति न्यायाऽविरोधेनैव भाष्यकारोक्तपदैकवाक्यता न्यायनयेऽपि सूपपादेत्यलं परमताऽनुवर्णनेन।

फलितमाह * इत्थञ्चेति * आख्याताऽर्थकर्तृप्रकारकबोधं प्रति धात्वर्थभावनोपस्थितेस्तादृशकर्मप्रकारकबोधे तादृशफलोपस्थितेर्हेतुत्वे चेत्यर्थः। भावनेत्यस्य वर्त्तमानेत्यादिः। कर्माऽऽख्याते भावनाविशेष्यकबोधोपवर्णनन्तु प्राचामनुरोधेन।

नव्यास्तु—कर्मकृतिफलविशेष्यबोधस्य दृष्टत्वेन कर्माख्यातेऽपि तद्विशेष्यकबोध एव न्याय्यः। एवञ्च प्रत्ययार्थे साक्षात्प्रकृत्यर्थविशेष्यान्वयित्वमिति व्युत्पत्तिरपि न विरुद्ध्यते। अत एव 'इष्यते पुत्रः' इत्यर्थे पुत्रीयतीति न, भिन्नार्थकत्वात्। किन्तु, पुत्रमिच्छतीत्यर्थ एवेति, "सुप आत्मनः" (पा० सू० ३।१।८) इति सूत्रे भाष्ये उक्तम्। अन्यथोभयत्राऽपि व्यापारविशेष्यकबोधेन विभिन्नार्थकत्वकथनाऽसङ्गतिः, अस्मन्मते त्वेकत्र व्यापारो विशेष्योऽन्यत्रेच्छारूपं फलमिति भिन्नार्थकत्वं स्पष्टमेव, क्यजन्तात्तु कर्मणि प्रत्ययो दुर्लभः, अकर्मकत्वात्। उक्तञ्च कैयटेन—'यदा क्रियाफलस्य प्राधान्यं तदा वाक्यमेव—इष्यते पुत्रः, नतु क्यजन्तः, तस्याऽकर्मकत्वात् कर्मणि प्रत्ययाऽनुत्पादात्' इति। इत्थञ्च 'भावनाजन्यैकाश्रयिका वर्त्तमाना विक्लित्तिः' इति बोध इत्याहुः।

भावाऽऽख्याते तु भावनैव विशेष्या, तथैवाऽनुभवात्। तिङ्त्वनुवादक एव, किन्तु लट्त्वादिना कालार्थकः। संख्या तु न तदर्थः, कर्त्रादिरूपाऽर्थोपस्थित्याऽत्मकहेत्वभावेन तदर्थसंख्याया अन्वयाऽसम्भवात्। किन्तु, 'न केवलाः' इत्यादिन्यायेन साधुत्वार्थमेकवचनमेव। "एकवचनमुत्सर्गतः करिष्यते" इति सिद्धान्तात्।

"काले युक्ताभिसरणे मुह्यन्ते मृगमोहिकाः।
उष्ट्रासिकाः समास्यन्ते शय्यन्ते हतशायिकाः॥"

इत्यत्र बहुवचनन्तु भाष्यकारप्रयोगादेवेति प्राञ्चः।

नव्यास्तु, ऐकवचनस्यौत्सर्गिकत्वं सत्येव गमके, यथाऽव्ययात् तदुत्पत्तौ "अव्ययादाप्सुपः" इति। अत एव "ङ्याप्" इति सूत्राऽभावे तिङन्तेभ्यस्तदुत्पत्तिमाशङ्क्य तिङा संख्याया उक्तत्वान्नेति परिहृतं भाष्ये। त्वदुक्तरीत्या तिङा कारकगतायास्तस्या उक्तत्वेऽपि प्रकृत्यर्थगतायास्तस्या अनुक्ततयौत्सर्गिकतया वैकवचनस्याशक्यवारणत्वेन तदसङ्गतिः स्पष्टैव।

"द्व्येकयोः" इत्यादेर्लः कर्मणि इत्यनेनैकवाक्यताऽपि—लकाराः कर्मादौ भवन्ति तेषां स्थाने चैकत्वादौ तिबादयो भवन्तीत्याकारैव। नहि तत्र द्वितीया कर्मणीत्याद्यस्ति, येन संख्यायाः कारकविशेषणता प्रतीयेत। आवृत्तौ च न मानम्। तस्मात् सर्वत्र संख्यायाः प्रकृत्यर्थ एवाऽन्वयः।

'कस्यैकत्वादौ" इत्याकाङ्क्षायामुपस्थितत्वात् प्रकृत्यर्थाऽन्वयस्यैवोचितत्वात्। कर्मणीत्यादेरपि विधेयं प्रति विशेषणत्वेन, 'गुणानाञ्च परार्थत्वात्' इति न्यायेन संख्यायामसम्बन्धात्। कर्मणीत्यादेः कस्य कर्मणीत्याऽकाङ्क्षासत्त्वेन तत्र धात्वर्थान्वयस्य क्लृप्तत्वात्। क्रियायामप्येकत्वमस्त्येव "एका क्रिया" इति रूपप्सूत्रभाष्यात्। एवञ्च तस्य प्रकृत्यर्थेऽन्वयादेकवचनम्। द्वित्वादिकन्तु स्वोत्तरतिङ्वाच्यकारकगतं तत्रारोप्य कर्तृकर्मकेषु तिङ्षु द्विवचनादिसिद्धिः। अत एव न साधने द्वित्वादिसंशयः। क्रियागतसंख्यारोपस्य साधनज्ञाननिमित्तत्वात्। अनेकः पचतीत्याद्यनुरोधेन साधनेऽपि संख्यारोपस्य तवाऽपि वाच्यत्वात्, तस्याऽप्यऽन्वयः प्रकृत्यर्थ एव। प्रकृते, हतशायिकाः शय्यन्ते इत्यादौ हतशयनसदृशानीत्यर्थे उपमाने बहुत्वोपपादनसामर्थ्येनोपमेये तिङन्तार्थक्रियारूपे उपमानगतबहुत्वारोपेण बहुवचनम्। तिङ्वाच्यकारकगताया एवारोपो नाऽन्यगताया इत्यत्र धात्वर्थशक्तिस्वभाव एव बीजम्। अत एव भावे द्विवचनादिः। तदुक्तम्—

"एकत्वेऽपि क्रियाऽऽख्याते साधनाश्रयसंख्यया।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः॥" इति।

SGDF Sri Gurudev Digital Foundation

देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याऽभेदाऽन्वयः। 'घटो नश्यति' इत्यत्र घटाऽभिन्नाऽऽश्रयको नाशाऽनुकूलो व्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाश-

प्रभा

अभेदान्वय इति—कर्त्तरि तिङि अभेदेन देवदत्तादेः प्रथमान्तस्यार्थस्य तिङर्थाऽऽश्रयेऽन्वयः। कर्मणि तिङि तण्डुलादेस्तिङर्थाश्रयेऽभेदेनान्वयः। तत्र 'देवदत्तेन' इत्येतद्घटकतृतीयार्थकर्तरि प्रकृत्यर्थदेवदत्तस्याभेदेनान्वयः। कर्तुश्च निष्ठत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वयः। शेषं पूर्ववत्। सकर्मकधातूनां फलव्यापारोभयवाचकत्वं व्यवस्थाप्याकर्मकाणामप्युभयवाचकत्वमावश्यकमित्यभिप्रायेण तत्स्थलीयबोधाकारमाह—घटो नश्यतीति।

प्रतियोगित्वविशिष्टेति—'घटो नश्यति' इत्यत्र नाशः=चरमक्षणसम्बन्धः। क्षणे चरमत्वञ्च—स्वाधि-

दर्पणव्याख्या

एवञ्चाख्यातार्थप्रकारकबोधे धातुजन्योपस्थितिः कारणमित्येक एव कार्यकारणभाव इति लाघवम्, "प्रत्ययानाम्" इति व्युत्पत्तिपरिपालनञ्चेत्याहुः।

तदपरे न क्षमन्ते, औत्सर्गिकैकवचनस्य समयपरिपालनार्थकतया तत्र गमकाऽऽकाङ्क्षाया अभावेन 'सत्येव गमके' इत्युक्तिर्व्यर्था। यदपि गमकतया व्याप्सूत्रभाष्योपन्यसनम्, तत् तथैव, यतस्तदेव भाष्यं क्रियायां संख्यासामान्याभावबोधकम्। तथाहि—व्याप्सूत्राऽभावे तिङन्तात् सुबुत्पत्तिशङ्का प्रत्ययार्थकारकसंख्यामादाय, प्रकृत्यर्थगतसंख्यामादाय वा वक्तव्या। तत्र प्रकृत्यर्थस्याऽसत्त्वरूपतया संख्यान्वयाऽयोगात्। कारकगतसंख्यामादायैव प्रसक्ता, सा तिङोक्तत्वादित्यनेन निराक्रियते। समयपरिपालनस्य तिङैव कृतत्वात्, तदप्राप्त्यैव तन्निराकरणस्याऽप्रसक्तेः। 'सुप्तिङन्तं पदम्' 'तिङ्ङतिङः' इत्यादिसूत्रस्वारस्यादुक्तार्थज्ञापनापेक्षया तिङन्तादौत्सर्गिकैकवचनाभावस्यैव तेन ज्ञापयितुमुचितत्वाच्च।

'एका च क्रिया' इति भाष्यमपि न क्रियायामेकत्वं बोधयति, किन्तु संख्यासामान्याऽभावमेव। कथमन्यथा साधारणैकवचनेनैवोपपत्तौ वचनारम्भसार्थक्यम्। किञ्चोपमाने बहुत्वोपपादनसामर्थ्येनेति वदता कारके द्वित्वाद्युपपादनसामर्थ्येनेत्यऽप्युक्तप्रायम्। एवञ्च, हतशायिका इत्यत्रोपमाने बहुत्वोपपादकबहुवचनवत् प्रकृते कारके कस्यचिद् द्वित्वाद्युपपादनस्याभावात् तदारोपासम्भवः।

नच चैत्रमैत्राविति द्विवचनादितस्तदवगतिः, चैत्रो मैत्रश्च पचत इत्यादौ तदभावात्, कारकान्वयात्प्रागेव चैत्राद्यन्वितायास्तस्याः कारकानन्वितत्वाच्च। भावाऽऽख्याते स्वोत्तरतिङ्वाच्यकारकाऽप्रसिद्ध्या द्विवचनासम्भवाच्च। 'कस्यैकत्वे' इत्याकाङ्क्षाया योग्यजिज्ञास्यसम्बन्धिन्या एवौचित्यात्, क्रियाया असत्त्वेन परिच्छेदकाकाङ्क्षाया एवासम्भवेन तत्र तदन्वयोक्तेः पराहतत्वाच्च। पचतीत्यादिजन्यबोधानन्तरं जायमानस्य सर्वसिद्धैकत्वादिवैशिष्ट्येन जिज्ञास्यकारकबोधक 'कः कौ' इत्यादिप्रश्नस्याऽनुपपन्त्या सिद्धायाः कारके संख्यान्वयप्रतीतेरनुपपत्तेरेव कर्मणीत्यादिपदानुवृत्तौ मानत्वात्। उक्तवाक्यपदीयस्याप्याख्यातार्थक्रियाया एकत्वेऽपि संख्यासामान्याभाववत्त्वेऽपि क्वचित् कर्तृकर्मादिबाहुल्येन सा नानेव प्रतीयते इत्यर्थान्न तद्विरोधोऽपि। ततः शब्दमर्यादया धात्वर्थे तिङर्थसङ्ख्याऽन्वय इत्यर्थस्यालाभाच्च। "गुणानाञ्च परार्थत्वात्" इति तु प्रधानस्यान्वययोग्यत्वे सत्येव। अत एव कैयटादिभिस्तिङर्थसंख्यायाः कारक एवाऽन्वयः स्वीकृतः। एवञ्च भाष्यकारप्रयोगादन्यत्र भावाख्याते द्विवचनाद्यसाध्वेवेत्यधिकं स्वयमूह्यम्।

* आख्यातार्थकर्त्रादिभिरिति * 'समानविभक्तिकयोरेवाऽभेदान्वयः' इति नियमस्य प्रागेव दूषितत्वादिति भावः। अकर्मकस्थले ऽपि फलव्यापारोभयार्थकत्वं धातोरन्यैरपि स्वीकार्य्यमिति सूचयञ्छाब्दबोधप्रकारमाह * घटो नश्यतीति *। तद्व्यापाराऽऽकाङ्क्षायामाह * स चेति। * प्रतियोगित्वेति * प्रतियोगित्ववैशिष्ट्यन्तु निरूपकतासम्बन्धेन बोध्यम्। तत्समवधानमेव तदनुकूलो व्यापार इत्यर्थः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Digital Foundation

सामग्रीसमवधानम् । अत एव तस्यां सत्यां नश्यति, तदत्यये 'नष्टः' तद्भावित्वे नङ्क्ष्यतीति प्रयोगः । 'देवदत्तो जानाति', इच्छतीत्यादौ च देवदत्ताऽभिन्नाऽऽश्रयको ज्ञानेच्छाद्यनुकूलो वर्त्तमानो

प्रभा

करणक्षणप्रागभावानधिकरणत्वरूपम् । स्वम्=घटादि, घटे स्वरूपसम्बन्धेन नाशप्रतियोगिता, सामानाधिकरण्यसम्बन्धेन तद्विशिष्टा या दण्डाद्यभिघातरूपा सामग्री, तस्याः समवधानम्=स्थितिः । तथाच प्रतियोगित्वसमानाधिकरणनाशसामग्रीरूपो व्यापारो घटे । नाशश्च प्रतियोगितासम्बन्धेन तत्रैवेति फलसमानाधिकरणव्यापारवाचकत्वरूपमकर्मकत्वं नशधातोः । तथाच नाशरूपं फलम्, तादृशसामग्रीरूपो व्यापारश्च नशेरर्थः । तादृशसामग्रीरूपव्यापारे कालान्वयः । अत एव=तत्तत्सामग्रीरूपव्यापारस्य नशधात्वर्थत्वादेव । 'णश अदर्शने' इत्युक्तेर्ज्ञानाविषयीभवनमप्यर्थः । अत एव निष्ठासंज्ञासूत्रे 'कतरद्देवदत्तस्य गृहम् ? अदो यत्रासौ काक इति । उत्पतिते काके नष्टम् (अज्ञातम्) तद् गृहं भवति' इति भाष्योक्तं सङ्गच्छते ।

तस्याम्=व्यापारभूतायां सामग्र्याम् । सत्याम्=वर्तमानकालावच्छिन्नायाम् । तदत्यये=भूतकालावच्छिन्नत्वे । तद्भावित्वे=भविष्यत्कालावच्छिन्नत्वे । तथाच तादृशसामग्र्यामेव कालान्वय इति भावः । नाशमात्रस्य धात्वर्थत्वे तु नाशस्यातीतत्वासम्भवान्नष्ट इति प्रयोगानापत्तिः । इयमापत्तिर्वर्तमानध्वंसप्रतियोगित्वं भूतत्वमिति मतेन । वर्तमानध्वंसप्रतियोगिकालवृत्तित्वरूपभूतत्वे तु नोक्तापत्तिः । फलतावच्छेदकसम्बन्धेन फलानधिकरणं यः तन्निरूपितव्यापारताऽवच्छेदकसम्बन्धावच्छिन्नवृत्तितावद्व्यापारवाचको यो धातुः स सकर्मकः । यः फलतावच्छेदकसम्बन्धेन फलाधिकरणनिरूपितव्यापारतावच्छेदकसम्बन्धावच्छिन्नव्यापारवाचको धातुः सोऽकर्मकः । फलतावच्छेदकसम्बन्धश्च—येन सम्बन्धेन फलाश्रयत्वमादाय कर्मसंज्ञाऽनुभवसिद्धा स एव । स च तत्तद्धातुस्थले नियत एव । एवमेव येन सम्बन्धेन व्यापाराश्रयत्वमादाय कर्तृसंज्ञाऽनुभवसिद्धा स एव व्यापारतावच्छेदकः । तथाच फलतावच्छेदक इत्यस्य कर्मपदार्थघटकफलनिष्ठाधेयतानियामक इत्यर्थः । एवमेव व्यापारतावच्छेदक इत्यस्य कर्तृपदार्थघटकव्यापारनिष्ठाधेयतानियामक इत्यर्थो बोध्यः ।

प्रकृते नाशरूपफलताऽवच्छेदकः सम्बन्धः प्रतियोगित्वरूपः । व्यापारतावच्छेदकश्च दण्डाद्यभिघातरूपसामग्र्याः संयोगरूपत्वे समवायसम्बन्धः । विभिन्नरूपत्वे स्वरूपादिस्तदवच्छेदकः । जानातीत्यादौ ज्ञानमात्रं धात्वर्थः । ज्ञाने एव फलत्वं व्यापारत्वञ्चारोप्य विषयतारूपफलतावच्छेदकसम्बन्धेन घटादेर्ज्ञानरूपफलाश्रयत्वात्कर्मत्वम् । समवायरूपव्यापारतावच्छेदकसम्बन्धेन व्यापाराश्रयत्वात् कर्तृत्वमिति गौणकर्मत्वं जानतीत्यादिसविषयार्थकधातूनामिति नैयायिकास्तेषां मतं निराकरिष्यन् स्वमते शाब्दबोधप्रकारमाह—देवदत्त इति—जानातेर्ज्ञानानुकूलो व्यापारः, इच्छतेश्चेच्छानुकूलो व्यापारः । फलतावच्छेदकसंसर्गश्च विषयता । ज्ञानेच्छादिरूपफलस्य घटादौ सत्त्वात् कर्मत्वम्, तदाह—घटाभिन्नाश्रयकेति । आदिना 'यतते देवदत्तः' इत्यस्य संग्रहः ।

दर्पणव्याख्या

❀ अत एवेति ❀ यतो नाशमात्रं नार्थः, प्रतियोगित्वविशिष्टनाशफलकतत्तत्सामग्रीरूपो व्यापारोऽप्यत एवेत्यर्थः । फल-व्यापारयोरैकाधिकरण्याच्च न सकर्मकत्वम् । एतदर्थमेव प्रतियोगित्वविशिष्टेत्युपात्तम् । यन्मते नाशमात्रं न धातोरर्थस्तन्मते नाशोत्पत्त्यनन्तरं नाशस्य सदैव सत्त्वान्नश्यतीति प्रयोगापत्तिस्तस्य ध्वंसाऽप्रतियोगित्वाच्च नष्ट इति प्रयोगाऽनुपपत्तिरिति सूचनाय, तस्यां सत्यामित्यादिना त्रैकालिकप्रयोगप्रदर्शनम् । नैयायिकमतं तु लुङर्थनिरूपणे वक्ष्यते ।

जानात्यादिसविषयार्थकानां ज्ञानाद्यतिरिक्तव्यापाराद्यर्थकत्वानभ्युपगमे सकर्मकत्वाऽनुपपत्तिं सूचयन् स्वमते शाब्दबोधं दर्शयति ❀ देवदत्तो जानातीत्यादि ❀ । आदिपदग्राह्याऽर्थमाह ❀ इच्छादीति ❀ । क्वचिज्जानातीत्यादावित्येव पाठः ।

व्यापार इति बोधः। स चान्तत आश्रयतैवेतिरीत्योह्यम् ॥ २ ॥

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे 'पचति' इत्यत्रोभयबोधापत्तिः। कर्तृमात्रबोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह—

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयाऽन्वयम् ॥ ३ ॥

तङादयः फले आश्रयाऽन्वयं द्योतयन्ति, फलाऽन्वय्याश्रयस्य कर्मत्वात्। तद्द्योतकाः = कर्मद्योतकाः। व्यापाराऽन्वय्याश्रयस्य कर्तृत्वात्। तद्द्योतकाः = कर्तृद्योतका इति समुदायार्थः। द्योतयन्ति = तात्पर्य्यं ग्राहयन्ति ॥ ३ ॥

प्रभा

अत्र फलतावच्छेदको व्यापारतावच्छेदकश्च समवाय एवेति व्यापाराधिकरणमात्रवृत्तिफलवाचकत्वेनाकर्मकतया देवदत्ताभिन्नाश्रयवृत्तियत्नसमानाधिकरणो व्यापार इति बोधः। व्यापारश्च आत्ममनःसंयोग एव। तदनुसन्धानाभावे त्वाह—आश्रयतैवेति। आश्रयता चात्राखण्डधर्मरूपा। तत्र क्रमिकत्वाभावेऽपि क्रमिकत्वारोपः, स्वरूपसम्बन्धविशेषरूपैव वा।

यत्त्वावरणभङ्गानुकूलो ज्ञानरूपो व्यापारो जानात्यर्थ इति तन्न, 'धर्माधर्मौ जानाति' इत्यादावनुपपत्तेः। तथाहि—आवरणं द्विविधम्—असत्त्वापादकम्, अभानापादकञ्च। तत्र धर्माधर्मयोः परोक्षत्वात् परोक्षान्तःकरणवृत्त्याख्यज्ञानेन असत्त्वापादकावरणस्य भङ्गेऽपि अभानापादकावरणस्य परोक्षवृत्तिरूपज्ञानेनानिवृत्तिः। यथा 'पर्वतो वह्निमान्' इत्यत्र व्याप्त्याकारान्तःकरणवृत्त्यवच्छिन्नचैतन्ये प्रतिबिम्बितवह्न्यवच्छिन्नरूपचैतन्यरूपपरोक्षज्ञानेन वह्न्यसत्त्वापादकावरणस्य भङ्गेऽपि अभानापादकावरणस्य तेनानिवृत्तिः। ऊह्यमिति—इच्छत्यादावप्यूह्यमित्यर्थः ॥ २ ॥

उभयेति—कर्तृकर्मोभयबोधापत्तिरित्यर्थः। ननु 'सकृदुच्चरितः' इति न्यायविरोध इत्यत आह—कर्तृमात्रेति—यत्र तात्पर्यग्रहस्तस्यैव बोधेन कर्मणि तात्पर्यग्रहे तन्मात्रस्यापि बोधापत्तिः, कर्मण्यपि 'लः कर्मणि' इत्यनेन शक्तिबोधनात्।

तात्पर्येति—तात्पर्यञ्च—'तिङ्पदं कर्तृत्वावच्छिन्नविषयकबोधजनकम्भवतु' इति, 'कर्मत्वावच्छिन्नविषयकबोधजनकम्भवतु' इत्याकारकञ्चेच्छाविशेषरूपम्। नच 'पचति' इत्यत्र 'तिपदं कर्मत्वावच्छिन्नं बोधयतु' इति तात्पर्यस्यापि सत्त्वे तिपा कर्मणोऽपि बोधापत्तिः, तात्पर्यपदेनात्रानादितात्पर्यस्यैव ग्रहणात्। तथाच तात्पर्यग्राहकमित्यस्यानादितात्पर्यग्राहकमित्यर्थः। फलव्यापारयोरिति—निर्द्धारणे षष्ठी। निर्द्धारणे बहुवचनान्तस्यैव प्रयोगदर्शनात्। तादृशषष्ठ्यसम्भवे तु 'मध्ये' इति शेषो बोध्यः। तत्र 'षष्ठी शेषे' इति षष्ठी। तङादयो धातूपस्थाप्ययोः फलव्यापारयोर्मध्ये फले आख्यातार्थाऽऽश्रयान्वयं द्योतयन्ति। शबादयो व्यापारे आश्रयान्वयं द्योतयन्ति = व्यञ्जनया बोधयन्तीत्यर्थः। ननु तिङादिसमभिव्याहारे आश्रयस्य फलव्यापारयोरन्वयेऽपि कर्मादिद्योतकत्वं न सिध्यतीत्यत आह—फलान्वयीति। तत एव हेतोस्तद्द्योतकाः। तदर्थबोधनायाह—कर्मद्योतका इति। अत्र तङ्पदं कर्मविषयकबोधजनकत्वप्रकारकतात्पर्येणोच्चरितमित्येवं व्यञ्जनया बोधयन्तीत्यर्थ इत्याह तात्पर्यं ग्राहयन्तीति।

दर्पणव्याख्या

❀ स चेति ❀। ज्ञानानुकूलो व्यापारश्चेत्यर्थः। तदन्वेषणायात्ममनः संयोगस्यैव सुलभत्वादाह ❀ अन्तत इति ❀ तदनुपस्थितावित्यर्थः ❀ आश्रयतैवेति ❀ तस्या अनवयवत्वेऽपि साऽवयवत्वारोपाद् व्यापारत्वं निर्वाह्यमिति भावः।

SGDF

नन्वेवं 'क्रमादमुं नारद इत्यबोधि स' इत्यादौ, 'पच्यते ओदनः स्वयमेव' इत्यादौ च व्यभिचारः, कर्मणः कर्तृत्वविवक्षायां कर्त्तरि लकारे सति, 'कर्मवत् कर्मणा तुल्यक्रियः' (पा० सू० ३।१।८७) इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्त्तुरेव बोधात्, व्यापारे एवाश्रयान्वयाच्च। अबोधीत्यत्रापि बुध्यतेः कर्त्तरि लुङ्, तस्य "दीपजन" (पा० सू० ३।१।६१) इति चिण्, 'चिणो लुक्' (पा० सू० ६।४।१०४) इति तस्य लुग् इति साधनादित्याशङ्कायामाह—

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्य्ययात्।
तस्माद् यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥ ४ ॥

प्रभा

एवञ्च यत्र यत्र यगादिसमभिव्याहारस्तत्र तत्राऽऽख्यातस्य कर्मद्योतकत्वमिति, यत्र यत्र शबादिसमभिव्याहारस्तत्र तत्राऽऽख्यातस्य कर्तृद्योतकत्वमिति चान्वयव्याप्तिः। यत्र यत्राऽऽख्यातस्य कर्मबोधकत्वाभावस्तत्र तत्र यगादिसमभिव्याहाराभाव इति, यत्र यत्राऽऽख्यातस्य कर्तृबोधकत्वाभावस्तत्र तत्र शबादिसमभिव्याहाराभाव इति च व्यतिरेकव्याप्तिः फलति ॥ ३ ॥

तत्र यगादीनामन्वयव्याप्तौ व्यभिचारमाह—नन्वेवमिति—अत्र चिण्यक्सत्त्वेऽपि आख्याते कर्मबोधकत्वाभावः। अबोधीति—अत्र कर्त्तरि लुङ्। अत एव 'सः' इति कर्तृवाचके तृतीयाया अभावः। पच्यते ओदनः स्वयमेवेति—अत्र ओदनरूपे कर्त्तरि लट्।

यत्तु दर्पणकारेणोक्तम्—शबादीनां व्यतिरेकव्याप्तौ अत्र व्यभिचार इति, तन्न, आख्याते कर्तृबोधकत्वाभावस्य शबादिसमभिव्याहाराभावव्याप्यत्वेन व्याप्याभावे व्यापकस्य शबादिसमभिव्याहाराभावस्य सत्त्वेऽपि व्यतिरेकव्यभिचाराभावादिति पञ्चोलिनः।

कर्मणः कर्तृत्वेति—सौकर्य्यातिशयद्योतनायैतादृशी विवक्षा। अयम्भावः—सर्वेषां कारकाणां व्यापारा धातुवाच्याः। यदा यस्य व्यापारो बुद्धिस्थः सन् धातुना विवक्ष्यते तदैव तादृशव्यापाराश्रयः कर्त्ता। अत एव 'काष्ठं पचति' 'स्थाली पचति' इत्यादिप्रयोगाः सङ्गच्छन्ते। एवञ्च 'काष्ठेन पचति' इत्याद्यप्युपपन्नम्, तदा तद्व्यापारस्य धातुना अविवक्षणात्।

अयम्—तङादयः शबादयश्च तत्तदर्थद्योतका इत्युक्तोऽर्थः। यथागमम्=यथाशास्त्रम्, यथाबोधं वा।

दर्पणव्याख्या

उपोद्घातसङ्गत्या शबादीनां द्योतकतां निरूपयितुमाह ❀ नन्विति ❀ ननु 'सकृदुच्चरितः शब्दः सकृदर्थं गमयति' इति व्युत्पत्तेर्नैकदाऽर्थद्वयबोधोऽत आह ❀ कर्तृमात्रबोधवदिति ❀ मात्रशब्दोऽवधारणे ❀ तात्पर्य्येति ❀ तत्तदर्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यग्रहजनकमित्यर्थः। अत एव कर्त्तरि शबित्यादौ कर्त्रादिग्रहणं सार्थकम्। अन्यथा 'लः कर्मणि' इत्येतद्विहितलादेशैरेव कर्त्रादिबोधेनान्यलभ्यत्वात्तद्वैयर्थ्यं स्पष्टमेवेति भावः।

मूले ❀ फलव्यापारयोस्तत्रेति ❀। तत्रेति धातूपस्थाप्ययोरित्यर्थः। 'फलव्यापारयोः' इति निर्द्धारणे सप्तमीत्याशयेन व्याचष्टे सारे ❀ फल इति ❀।

❀ व्यभिचार इति ❀। यगादीनामन्वये, शबादीनां व्यतिरेके चेत्यर्थः। यगादिसत्त्वेऽपि फले आश्रयाऽन्वयाऽबोधाच्छबाद्यभावेऽपि व्यापारे तिङर्थ आश्रयान्वयात् तदेवोपपादयति ❀ कर्मणः कर्तृत्वविवक्षायामित्यादि ❀। सौकर्य्यातिशयद्योतनार्था च तद्विवक्षा तण्डुलादिगताग्निसंयोगादिरूपव्यापारस्यैव फलजनकतया धात्वर्थत्वविवक्षायामित्यर्थः।

SGDF

कर्मकर्तृविषयादौ = 'पच्यते ओदनः स्वयमेव, इत्यादौ । अत्र ह्येकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः ।

'क्रमात्' इति आदिपदग्राह्यम् । अत्र 'सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानाऽनुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापारः' इति बोधः । यथोचितमिति = सकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयचिण्यगादि कर्मद्योतकमिति भावः ॥ ४ ॥

प्रभा

'पच्यते ओदनः' इत्यादौ यगादिसत्त्वेऽपि व्यापारे एवाख्यातार्थाश्रयस्यान्वय इति बोधयितुं शाब्दबोधं दर्शयति —अत्र हीति । आदिपदेति—कारिकायां 'विषयादौ' इत्यत्रादिपदेनेत्यर्थः ।

'क्रमादमुं नारद' इत्यत्रत्य क्रमपदार्थप्रदर्शनायाऽऽह—सामान्येति—आगच्छन्तं नारदं श्रीकृष्णः पूर्वं 'त्विषां चयः' इति सामान्येन ततः 'शरीरी' इति विशेषादिरूपेण ज्ञातवान् इत्यर्थः । नच कर्तरि लुङि नारदस्य कर्मत्वाद् द्वितीया स्यादिति वाच्यम्, 'निपातेन' इतिशब्देन कर्मत्वस्याभिधानात्, अनभिहितकर्मत्वाभावात् । भाष्ये तिङादिपरिगणनेन निपातेनाभिधाने द्वितीयाया अप्रवृत्तौ मानाभावे तु 'त्विषां चय इत्यारभ्य' 'नारदः' इत्यन्तो भागो ज्ञानाकारपरः । तथाच तेषां धात्वर्थे ज्ञानेऽभेदेनान्वयः । एवञ्च इतिपदं ज्ञानाकारप्रदर्शनपरमेव, न तु कर्मत्वबोधकम् । नन्वेवं 'स्तोकं पाकः' इत्यत्रेव ज्ञानरूपे फलेऽभेदान्वयेऽपि 'क्रियाविशेषणानां कर्मत्वम्' इति कर्मत्वापत्तौ द्वितीयापत्तिस्तदवस्थेति चेन्न, 'त्विषां चयः' 'नारदः' इत्यादिविभक्त्यन्तानामेव ज्ञानरूपतया कर्मत्वेऽप्यप्रातिपदिकत्वाद् द्वितीयाया अप्राप्तेः । नच निपातेनाभिधानेऽपि कारकविभक्तिस्वीकारे 'विषवृक्षोऽपि सम्वर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इत्यादौ द्वितीयापत्तिः, छेत्तुमित्यत्र तुमुनः साधुत्वाय 'इच्छार्थकेषु समानकर्तृकेषु' इति सूत्रप्रवृत्तये 'इष्यते' इत्यस्याध्याहारेण तिङैव कर्मण उक्तत्वादित्यन्यत्र विस्तरः ।

अकर्मकधातुसमभिव्याहृतयकः कर्मद्योतकत्वाभावादाह—सकर्मकेति । भावसाधारणेति—धारणया = ज्ञानेन सह वर्तत इति साधारणः । भावार्थे विधानविषयकधारणया सह वर्तमानो यो विधिः = कर्मार्थे विधिः । साहित्यञ्चैकज्ञानविषयत्वेन । भावकर्मोभयार्थकप्रत्ययज्ञानप्रयोज्यचिण्यगादिविधि (शास्त्र) विधेयं यद् यक्चिणादि तत्कर्मद्योतकमित्यर्थः । नच वैयाकरणानां तादृशयक्चिणादिज्ञानसम्भवेऽपि इतरेषां तज्ज्ञानासम्भवेन बोधानापत्तिरिति वाच्यम्, लिङ्गादिषु वैयाकरणानामपि प्रकरणादेरेव तात्पर्यग्राहकत्वस्य वाच्यतया तज्ज्ञानशून्यानामपि प्रकरणादेरेव तात्पर्यग्राहकत्वात् ॥ ४ ॥

दर्पणव्याख्या

वस्तुतस्तु फलस्यापि जनकव्यापारगतपौर्वापर्यारोपेण व्यापारत्वेन भानात् इति पूर्वमुक्तत्वात्तण्डुलगतफलस्यैव व्यापारत्वेन विवक्षायामित्यर्थः । ❀ साधनादिति ❀ । तथाच व्यभिचारान्न तङादीनां द्योतकतेति भावः ।

❀ क्रमादित्यादीति ❀ । कर्मकर्तृविषयादाविति मूलस्थादिपदेनेत्यर्थः सामान्येत्यादिक्रमादित्यस्य विवरणम्, सविषयधात्वर्थनिरूपितकर्मत्वस्य विषयत्वे पर्यवसानमित्यभिप्रेत्याह ❀ विषयकेति ❀ । सकर्मकधातुसमभिव्याहृतयगादीनां कर्मद्योतकत्वादाह ❀ सकर्मकेति ❀ पच्यते तण्डुलः स्वयमेवेत्यादौ यगादि तु न तथा, किन्त्वातिदेशिकम् । 'कर्मवत् कर्मणा' इति विहितातिदेशत्वस्याऽऽकरे सिद्धान्तितत्वान्न तत्र व्यभिचार इति भावः । ❀ भावसाधारणेति ❀ । भावकर्मणोः सार्वधातुके यगित्यादिविहितेत्यर्थः । तेन, 'दीपजन' इत्यादिविहितव्यावृत्तिः ॥ ४ ॥

❀ एवमिति ❀ उक्तप्रकारेणेत्यर्थः । ननु फलव्यापारयोरित्यनेन सामान्यतो धातोः फलव्यापारवाचकत्व-

एवं सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य 'फलव्यापारयोः' इति प्रतिज्ञातं धातोर्व्यापारवाचित्वम्, लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति—

प्रभा

ननु 'फलव्यापारयोर्धातुः' इत्यनेन प्रतिज्ञातं फलव्यापारयोर्धातुवाच्यत्वं समर्थ्य उभयोर्वाच्यत्वमस्वीकुर्वतां मतं निराकरणीयम्, तदकृत्वा ततः पूर्वमेव शाब्दबोधनिरूपणमसङ्गतमित्याशङ्कायामाह—**एवं सूचीकटाहेति**—युगपत् सूचीकटाहापेक्षिणौ लौहकारसमीपे गतवन्तौ। तत्र सूच्यपेक्षक आह 'कुरु मे सूचीम्' इति। अपर आह 'कुरु मे कटाहम्' इति। शिल्पी तु अल्पकालायाससाध्यां सूचीं निर्माय बहुकालायाससाध्यं कटाहं निर्मीति, यतः सूच्यपेक्षकस्य बहुकालयापनं मा भूदिति। तथैवाल्पायाससाध्यम्, अल्पवादिविप्रतिपन्नञ्च वाक्यार्थमुपवर्ण्य बहुकालायाससाध्यं बहुवादिविप्रतिपन्नञ्च फलव्यापारयोर्धातुवाच्यत्वं समर्थयितुमाह—**लडाद्यन्त इति**—परसमीपवाचकान्तशब्देन बहुव्रीहिणा, अतद्गुणसंविज्ञानबहुव्रीहिणा वा लडादिरन्तः समीपोऽन्तावयवो वा यस्येत्यर्थकेन लडाद्यन्तशब्देन धातोर्ग्रहणम्। तेन तिङन्ते आख्यातवाच्यां भावनां स्वीकुर्वतोऽपि प्राभाकरादीन् प्रति 'भावनाया अवाच्यत्वं वदतः' इति विशेषणस्य नासङ्गतिः।

प्राभाकरास्तु—फलमेव धात्वर्थः। पचिगमित्यजिप्रभृतीनां विक्लित्तिसंयोगविभागादिरूपफलमेवार्थः। पुरुषप्रवृत्तिरूपा आर्थी भावना चाऽऽख्यातार्थः। आख्यातार्थवर्तमानत्वादिकं तु भावनायामेवान्वेति, समानपदोपस्थितत्वात्। तेन भावनाविरामे न 'पचति' इत्यादिप्रयोगः। नच 'ग्रामो गमनवान्' इत्यापत्तिरुत्तरदेशसंयोगरूपफलस्योभयनिष्ठत्वादिति वाच्यम्, निरूपकत्वादिरूपसम्बन्धविशेषेण वर्तमानस्य फलस्यैव धातुवाच्यत्वात्। अन्यथा आभिमुख्यसम्बन्धेन संयोगानुकूलक्रियाया ग्रामेऽपि सत्त्वाद् धातोर्व्यापारवाचित्वेऽपि तुल्यो दोषः। नचैवं 'यजति' 'ददाति' 'जुहोति' एतेषां पर्यायत्वापत्तिः, स्वत्वध्वंसरूपैकफलार्थत्वादिति वाच्यम्, यजतेरदृष्टोत्पादकस्वत्वध्वंसरूपफलस्य, ददातेः परस्वत्वोत्पत्तिमात्रफलस्य, जुहोतेरदृष्टोत्पादकप्रक्षेपफलस्य च वाच्यत्वाङ्गीकारात्। तथाच स्वस्वत्वध्वंसरूपफलोपलक्षितदेवतोद्देश्यकद्रव्यत्यागो यजतिपदस्य, सङ्कल्पितस्वीकरणपूर्वकपरस्वत्वोपत्तिस्वस्वत्वध्वंसफलकद्रव्यत्यागो ददातिपदस्य, देवतोद्देश्यकप्रक्षेपफलको द्रव्यत्यागो जुहोतिपदस्य च वाच्य इति फलितम्। अत एव 'अस्ति' 'विद्यते' इत्यादितः फलमात्रप्रतीतिरुपपद्यते। 'करोति' इत्यत्रोत्पत्तिरूपफलं धातुवाच्यम्, तदनुकूलो यत्नश्चाख्यातवाच्यः। एवञ्च न करोतियतत्योः समानार्थकत्वम्। एवं 'जानाति' इत्यत्र विजातीयविषयता, 'इच्छति' इत्यत्र च विजातीयविषयता च फलमिति सर्वधातूनां फले एव शक्तिरित्याहुः॥

आदीनिति—आदिना प्राचीननैयायिकादिसङ्ग्रहः। तन्मते हि मीमांसकमत इव फलं धात्वर्थः, कृतिराख्यातार्थः।

दर्पणव्याख्या

प्रतिज्ञातस्योत्तरक्षणे एवोपपत्तिभिस्तद्व्यवस्थापनं कर्त्तुमुचितम्, नतु वाक्यार्थनिरूपणानन्तरम्, तेन जिज्ञासाविच्छेदादित्याशङ्कायामाह ❀ सूचीकटाहन्यायेनेति ❀। तथाच सामान्यतः फलव्यापारयोर्धात्वर्थत्वे, आश्रयस्य तिङर्थत्वे न ज्ञाते, निरसनीयवादिविप्रतिपत्तिकत्वेन सुप्रतिपाद्यतया च प्रथमं वाक्यार्थे एव शिष्यजिज्ञासोदयात्। स एवाऽऽदौ निरूपितः, नतु धात्वर्थः, निरसनीयबहुवादिविप्रतिपत्तिकत्वेनातिदुरूहतया च तस्य पूर्वमजिज्ञासितत्वादिति भावः।

'लडाद्यन्ते' इत्यतद्गुणसंविज्ञानबहुव्रीहिणा धातुपरम्। तथाच, यजेत, पचेतेत्यादौ यज्यादिधातावित्यर्थः। अवाच्यत्वम् ❀ वाच्यतानिरूपकत्वाऽभावम्। 'प्रभाकरादीन्' इत्यादिना नैयायिकसंग्रहः।

व्यापारो भावना सैवोत्पादना सैव च क्रिया ।
कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ ५ ॥

पचति = पाकमुत्पादयति, पाकानुकूला भावना, तादृश्युत्पादना इति विवरणाद् विव्रियमाणस्यापि तद्वाचकतेति भावः । व्यापारपदं च फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम् । अत एव पचतीत्यत्र अधःसन्तापनत्व-फूत्कारत्व-चुल्ल्युपरिधारणत्व-यत्नत्वादिभिर्बोधः सर्वसिद्धः ।

प्रभा

सैवेति—यद्यपि तच्छब्देन व्यापारस्य परामर्शात् पुल्लिङ्गनिर्देश उचितस्तथापि 'उद्देश्यविधेययोरैक्यमापादयत् सर्वनाम पर्यायेण तत्तल्लिङ्गभाग् भवति' इति वृद्धोक्तेरुभयविधप्रयोगदर्शनाच्च भावनारूपविधेयानुरोधेन 'सा' इति स्त्रीलिङ्गनिर्देशः । अत एव 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इत्यादिप्रयोगाः सङ्गच्छन्ते । यद्वा 'स' इति पुल्लिङ्गनिर्देश एव, 'सोऽचि लोपे चेत्' इत्यनेन सोर्लोपे वृद्धौ तद्रूपसिद्धेः । व्यापारभावनयोर्भेदभ्रमनिरासाय एक एवार्थः कुत्रचित् केनचिच्छब्देन बुध्यते, कुत्रचित् केनचिच्छब्देनेति -प्रसिद्ध्यनुरोधाय चानेकपर्यायोपादानम् । चेतनाचेतनसाधारणयत्नफूत्कारादीनां धातुवाच्यत्वक्रियात्वयोर्बोधनार्थं वा अनेकपर्य्यायोपादानम् ।

ननु न हि क्रियापदं व्यापारपर्य्यायभूतम्, यत्नमात्रार्थककृधातुना निष्पन्नत्वेन यत्नमात्रार्थकत्वादित्याशङ्कायामाह—कृञोऽकर्मकतेति । ननु धातोर्व्यापारवाचित्वे मानाभावः, इति चेद् विवरणस्यैव मानत्वादित्याह—पाकमिति । अत एव = फूत्कारयत्नादीनां तेन तेन रूपेण धातुवाच्यत्वादेव । सर्वसिद्धः = सर्वानुभवसिद्धः । अनुभवोऽर्थनिर्णये प्रबलं प्रमाणमिति भावः ।

दर्पणव्याख्या

यद्यपि व्यापारो धात्वर्थत्वेन नैयायिकसम्मतस्तथापि नाऽसौ तन्मते भावनापदव्यपदेश्य इति भावः । 'व्यापारो भावना सैव' इत्यादिपूर्वार्द्धस्य यो 'गुणभूतैरवयवैः' इत्याद्युक्तलक्षणलक्षितोऽर्थस्तद्वाचकव्यापारपदं भावनादिपदैर्विव्रियते । विव्रियमाणस्य विवरणसमानार्थकत्वेन धातोर्भावनावाचकत्वसिद्धिरित्यर्थः । तत्रोद्देश्यविधेययोरैक्यमापादयतः सर्वनाम्नः पर्यायेणान्यतरलिङ्गकत्वस्य, 'शैत्यं हि यत् सा प्रकृतिर्जलस्य 'इत्यादिबहुषु स्थलेषु दर्शनान्न 'सा'इति स्त्रीलिङ्गनिर्देशानुपपत्तिः । पुँल्लिङ्गत्वेऽपि, 'सोऽचि लोपे चेत्' इति लोपेन साधुत्वाच्च । भावनैव वाऽस्तु तत्पदपरामृष्या ।

ननु सम्भवेदेवं धातोर्व्यापारार्थकत्वे, तत्र च किं मानमित्याशङ्क्य कृञा धातुविवरणे मानं दर्शयति सारे ❀ पचति पाकमुत्पादयतीति ❀ ननु 'या क्रिया भावना सैवोत्पादनाऽपि च सा स्मृता' इत्युक्तेऽपि क्रियाया भावनात्वलाभे किमिति व्यापारपदोपादानमत आह—❀ व्यापारपदञ्चेति ❀ तथाच व्याप्रियतेऽनेनेति करणव्युत्पन्नेन, भावव्युत्पन्नेन वा व्यापारपदेन फलानुकूलयावतामधिश्रयणादीनां भावनात्वलाभाय तदुपादानम् । क्रियापदेन तु कृतिपदवद्यत्नमात्रार्थकत्वस्यापि सम्भवेन तन्मात्रस्यैव तद्विवरणेन भावनात्वलाभः स्यादिति भावः ।

❀ अत एवेति ❀ तत्तद्रूपेण फूत्कारत्वादीनां धातुवाच्यत्वादेवेत्यर्थः । ❀ सर्वसिद्ध इति ❀ । अत एव पचतीत्युक्ते फूत्कारादिमान्न वेति सन्देहानुदयादिति भावः । यद्रीत्या नैयायिकैर्व्यापारत्वस्याख्यातवाच्यतावच्छेदकत्वं निरस्य कृतित्वस्य तद्व्यवस्थापितं तद्रीत्यैव धातोः कृतित्वमात्रं शक्यताऽवच्छेदकं भविष्यतीति तटस्थाऽऽशङ्कां निराकरोति ❀ नचैव मेषामित्यादि ❀ 'नच' इति साध्वीत्यनेनान्वितम् ।

SGDF Sri Gargeshwari Digital Foundation

नचैवमेषां शक्यताऽवच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्, 'रथो गच्छति' जानातीत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी, शक्यताऽवच्छेदकत्वस्यापि लक्ष्यताऽवच्छेदकत्ववद् गुरुणि सम्भवात्,

प्रभा

नचेति—अस्य साध्वीति वक्ष्यमाणेनान्वयः। नच साध्वीत्यर्थः। एषामिति—अधःसन्तापनत्वादीनामित्यर्थः। गौरवेति—यत्नत्वजात्यपेक्षया फूत्कारत्वादीनामुपाधित्वान्नानाधर्मत्वाच्च गौरवापत्त्येत्यर्थः। तदवच्छेदकमिति—धातुवाच्यतावच्छेदकमित्यर्थः। यत्नत्वस्य जातिरूपतया लघुत्वादिति भावः।

ननु यत्नत्वस्यापि जातित्वे मानाभाव इति चेन्न, चेष्टाम्प्रति यत्नस्य कारणतया कारणतावच्छेदकतया प्रवृत्तिरूपयत्नम्प्रति इष्टसाधनताज्ञानस्य कारणत्वेन, कार्यताऽवच्छेदकतया वा जातित्वसिद्धेः। एवञ्च फलं धात्वर्थः, यत्न आख्यातार्थ इति नैयायिकमतं पर्यवसन्नम्।

ननु यत्नस्य प्राणिधर्मत्वाद् रथादौ बाधात् 'रथो गच्छति' इत्यादौ सर्वानुभवसिद्धा व्यापारप्रतीतिर्विरुध्येतेत्यत आह—रथो गच्छतीति। जानातीति—आदिना 'इच्छति' 'नश्यति' इत्यादेः सङ्ग्रहः।

व्यापारत्वादीति—आश्रयत्व-प्रतियोगित्वादीनां संग्रहः। जानातीत्यत्र ज्ञानजनकताया जन्यताया वा कृतौ बाधात् 'इच्छति' इत्यत्रेच्छायाः कृतावनन्वयस्य 'नश्यति' इत्यत्र नाशस्य च कृतावनन्वयस्य चाऽऽपत्तिर्बोध्या।

लक्षणयेति—उक्तेषु आख्यातस्य व्यापारे आश्रयत्वे, प्रतियोगित्वे च लक्षणयेत्यर्थः। 'रथो गच्छति' इत्यत्र 'संयोगानुकूलव्यापारवान् रथः' इति। 'जानाति' 'इच्छति' इत्यत्र ज्ञानेच्छानिरूपिताश्रयतावान् देवदत्त इति, 'नश्यति घटः' इत्यत्र 'नाशनिरूपितप्रतियोगितावान् घटः' इति च बोधः। नचैवमिति—नचेत्यस्य साध्वीत्यत्रान्वयः। नैयायिकेति—नैयायिकेन यथा कृत्यर्थकाऽऽख्यातस्य तत्र व्यापारे लक्षणा कृता, तथा मयाऽपि कर्त्तव्येति भावः।

लक्ष्यतावच्छेदकत्ववदिति—व्यापारे लक्षणावादिनये यथा गुरुभूतस्य=(सखण्डोपाधिरूपस्य) व्यापारत्वस्य लक्ष्यताऽवच्छेदकत्वं तथा धातुशक्यत्वे ऽपि तस्य शक्यतावच्छेदकत्वस्वीकारे गौरवाभाव इति भावः।

वस्तुतस्तु व्यापारत्वमखण्डोपाधिरूपमेवेति न गौरवम्। व्यापारत्वस्य जातित्वन्तु न, यत्नत्वेन साङ्कर्यात्। यदि तु यत्नत्वस्य गुणत्वं नाङ्गीक्रियते तदा नोक्तदोषः। रथो गच्छतीत्यत्र तव लक्ष्यताऽवच्छेदके गौरवम्, अस्माकं शक्यताऽवच्छेदके तदिति साम्यमेव। गुरुणीति—शक्तिलक्षणयोरुभयोरपि धात्वर्थसम्बन्धत्वाविशेषाद्

दर्पणव्याख्या

❀ एषाम् ❀ अधिश्रयणत्वादीनाम्। ❀ गौरवेति ❀ धातुवाच्यत्वावच्छेदकत्वे गौरवापत्त्येत्यर्थः। तेषां कृतित्वापेक्षया गुरुत्वान्नानात्वाच्चेति भावः।

❀ तदवच्छेदकमिति ❀ धातुवाच्यताऽवच्छेदकमित्यर्थः। ननु कृतेरेव धात्वर्थत्वे रथादावचेतने तद्बाधात्तादृशप्रयोगानुपपत्तिरत आह ❀ रथो गच्छतीत्यादि ❀ व्यापारादीत्यादिनाऽऽश्रयत्व-प्रतियोगित्वपरिग्रहः। जानातीत्यादावित्यादिपदग्राह्ये घटो नश्यतीत्यादौ नाशाश्रयत्वस्य बाधात्प्रतियोगित्वे एव लक्षणाया द्रष्टव्यत्वात्।

❀ नैयायिकरीतिरिति ❀ आख्यातार्थविचारे हि तैर्व्यापारे लक्षणाम्, कृतौ च शक्तिं स्वीकृत्याऽयं प्रयोगः समर्थितस्तद्वन्मयाऽपि समर्थनीय इति सादृश्यात् रीतिपदोपादानम्, न त्वन्यांऽशे तन्मतादर इति भावः। लाघवोपष्टब्धमानादेवाऽर्थसिद्धिर्न केवलाल्लाघवादित्याशयेन मीमांसकरीत्या तद्रीतेरेवाऽसाधुत्वमाविष्करोति ❀ शक्यताऽवच्छेदकत्वस्येति ❀

तयोर्वैषम्ये बीजाभावात्। नच पचति = पाकं करोतीति यत्नार्थककरोतिना विवरणाद् यत्न एवाऽऽख्यातार्थ इति वाच्यम्,

प्रभा

गुरुधर्मावच्छिन्ने लक्षणाया इव शक्तेरपि सम्भवादित्यर्थः। वैषम्य इति—शक्तिलक्षणयोर्द्वयोरपि, पद-तदर्थ-सम्बन्धघटितत्वसाम्याद् गुरुधर्मे लक्ष्यतावच्छेदकत्वं स्वीकार्यम्, शक्यतावच्छेदकत्वं न स्वीकार्यमिति वैषम्य इत्यर्थः।

बीजाभावादिति—समनियतस्य गुरुधर्मस्य, लघुधर्मस्य च सत्त्वे लघुधर्मे एवावच्छेदकत्वं स्वीकार्यं न तु गुरुधर्मे, गौरवात्। प्रकृते रथो गच्छति' इत्यत्र व्यापारे लक्षणायां व्यापारत्वं लक्ष्यतावच्छेदकम्। 'इच्छति' इत्यत्र आश्रये लक्षणायामाश्रयत्वम्। 'नश्यति' इत्यत्र प्रतियोगिनि लक्षणायां प्रतियोगित्वं लक्ष्यताऽवच्छेदकमिति शक्यतावच्छेदकीभूतकृतित्वापेक्षया गौरवसत्त्वेऽपि यथा लक्ष्यतावच्छेदकत्वं नैयायिकानामिष्टं तथा शाब्दिकानां व्यापारस्य शक्यत्वे व्यापारत्वस्य फूत्कारत्वादीनाञ्च शक्यतावच्छेदकत्वे गौरवसत्त्वेऽपि तत्स्वीकार्य्यम्, समनियतस्य तादृशस्य लघुधर्मस्याभावादित्युक्तं बीजाभावादीति। तादृशलघुधर्मस्यासम्भवेन 'सम्भवति लघुधर्मे' इत्यस्य विषयाभावादिति भावः। कृतित्वस्य व्यापारत्वादेश्च समनियतत्वाभावात्। किञ्चावच्छेदकत्वं यदि स्वरूपसम्बन्धविशेषस्तदा गुरूणामपि धर्माणां सत्त्वेन स्वरूपसम्बन्धत्वकल्पने गौरवाभाव एव।

अथ स्वरूपसम्बन्धादतिरिक्तं तदापि 'गङ्गातीरत्वं लक्ष्यतावच्छेदकम्' इत्युपपत्तये गुरुधर्मस्याप्यवच्छेदकत्वमावश्यकम्। यद्यवच्छेदकत्वमन्यूनानतिरिक्तवृत्तित्वरूपं तदापि तादृशत्वस्य गुरुधर्मेऽपि सत्त्वादवच्छेदकत्वं दुर्वारमेव।

अयम्भावः—स्वरूपसम्बन्धविशेषरूपमवच्छेदकत्वं सम्भवति लघुधर्मे गुरुणि न तत्प्रकल्पयेत्। यथा प्रत्यक्षं प्रति महत्त्वस्य कारणत्वे लघुनि महत्त्वत्वे कारणतावच्छेदकत्वं कल्प्यते, न तु अनेकद्रव्यस्य कारणत्वं स्वीकृत्यानेकद्रव्यत्वे। यथा वा 'प्रमेयघटो नास्ति' इत्यत्र घटत्वे एव प्रतियोगिताऽवच्छेदकत्वं न तु प्रमेयत्वविशिष्टघटत्वे। अतः 'सम्भवति' इति न्याये सम्भवतीत्यस्य सम्भवत्तदवच्छेदकताके धर्मे इत्यर्थः।

एवञ्च—सम्भवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः स तदवच्छेदकत्वाभाववानितिव्याप्तिः फलिता। असम्भवत्तदवच्छेदकताकधर्मे गुरुण्यपि तदवच्छेदकत्वमुचितमेव। सम्भवत्तदवच्छेदकत्वञ्च = तदवच्छेदकबाधकशून्यत्वम्। बाधकञ्चावच्छेद्यं यत्प्रतियोगितादि तदसमनैयत्यम्। तथा प्रतियोगिसमनैयत्यमेव सम्भवत्तदवच्छेदकत्वम्। समनैयत्यञ्चात्र न स्वव्याप्यत्व-स्वव्यापकत्वोभयसम्बन्धेन परस्परविशिष्टत्वरूपम्, 'गुणे गुणकर्मान्यत्वविशिष्टसत्ता नास्ति' इतिवत् 'गुणे सत्ता नास्ति' इति प्रतीत्यापत्तेः।

तथाहि—विशिष्टसत्तानिष्ठप्रतियोगिताया विशिष्टसत्ताशुद्धसत्तयोरैक्येन सत्तायामपि सत्त्वेन सत्तात्वस्यापि प्रतियोगितासमनैयत्येन तत्रैव प्रतियोगितावच्छेदकत्वकल्पनेनोक्तप्रतीतेर्दुर्वारत्वात्। किन्तु 'तदन्यूनवृत्तित्वे सति तन्निरूपकाभावविरोधिताऽवच्छेदकत्वरूपम्'।

दर्पणव्याख्या

तथाच असति बाधके शक्तिर्गुरुणाऽपि धर्मेणावच्छिद्यते, कृतित्वाल्लक्षणावदित्यनुमानात्तेषु शक्तिः सेत्स्यतीति भावः।

ननु तेषां कृतित्वाऽपेक्षया गुरुत्वमेव बाधकमत आह ❀ तयोरिति ❀ शक्यतावच्छेदकत्व लक्ष्यतावच्छेदकत्वयोरित्यर्थः। ❀ बीजाभावादिति ❀ सम्भवति समनियते लघौ धर्मे गुरौ तदभावादित्यस्य प्रकृतेऽनवतारेण यद्यवच्छेदकत्वं स्वरूपसम्बन्धविशेषस्तदा तत्स्वरूपत्वस्य गुरूणामपि सत्त्वात्किमनुपपन्नम्। अथातिरिक्तं तदा गुरुधर्मेऽपि तत्स्वीकार

'रथो गमनं करोति' 'बीजादिना अङ्कुरः कृतः' इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः ।

प्रभा

सत्तात्वे तु न गुणकर्मान्यत्वविशिष्टसत्ताभावविरोधितावच्छेदकत्वम्, तादृशाभावस्य गुणेऽपि सत्त्वेन तद्विरोधिताया अभावेन तदनवच्छेदकत्वात् । विशिष्टसत्तात्वे एव तदवच्छेदकत्वम्, उक्तसमनियतत्वस्य तत्रैव सत्त्वात् । शक्यतावच्छेदकत्वमेव स्वरूपसम्बन्धो न लक्ष्यतावच्छेदकत्वमिति चेन्न, स्वरूपसम्बन्धस्य तत्तत्स्वरूपत्वे गुरुधर्मस्वरूपाणामपि सत्त्वेन तत्र तादृशावच्छेदकत्ववारणासम्भवात् ।

किञ्च, गुरुधर्मे तदवच्छेदकत्वाभावकल्पनापेक्षया लाघवात्तत्रावच्छेदकत्वकल्पनमेवोचितम् । अन्यत्र कृप्ताभावस्य सम्बन्धत्वमात्रं कल्प्यते इति चेन्न, कल्प्यमानावच्छेदकत्वस्य सम्बन्धत्वकल्पनाया एव युक्तत्वात्, गुरुधर्मेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य सत्त्वाच्चेति दिक् ।

विवरणादिति—विव्रियमाणार्थस्य तत्समानार्थकशब्दान्तरेण कथनं विवरणम् । विवरणादिति हेतुना अनुमितिः सूचिता । अनुमितिप्रयोगश्च—सर्वे धातवो यत्नवाचकाः, यत्नार्थककरोतिना विवरणात् । यत्पदं यत्पदविवरणविशिष्टं तत्पदं तदर्थवाचकम्, घटपदवत् । अत्र स्वरूपसम्बन्धेन यत्नवाचकत्वं साध्यम् । स्वकर्मीभूतशब्दार्थनिरूपितशक्तिमत्त्वप्रकारकतात्पर्यविषयत्वं हेतुतावच्छेदकसम्बन्धः । स्वम्=विवरणम्, तत्कर्मीभूतः शब्दः=कृधातुरूपः । अवशिष्टमूह्यम् । यत्न एवेति—अत्र 'यत्न एवार्थः' इति, 'यत्न एव धात्वर्थः' इति वा पाठः साधुः । 'आख्यातार्थः' इति त्वसङ्गतः, धात्वर्थस्यैव प्रकृतत्वात् । रथ इति—'गमनजनककृत्याश्रयो रथः' 'बीजादिकर्तृककृतिजन्योत्पत्त्याश्रयोऽङ्कुरः' इत्यबाधितबोधदर्शनात् कृञो यत्नार्थकताया असिद्धेरुक्तहेतोरसिद्धत्वात् । (रथस्य, बीजादेश्च जडत्वेन तत्र यत्नरूपकृतेर्बाधादिति भावः) 'अङ्कुरः कृतः' इत्येतावन्मात्रोक्तावीश्वरस्य कर्तृत्वसम्भवात् 'बीजादिना' इत्युपात्तम्, कर्तरि तृतीयया । तथाच व्यापारे कृञः प्रयोगप्राचुर्यात् तत्रैव शक्तिकल्पनमुचितम् । एवञ्च कृञा विवरणदर्शनात् पचेरपि व्यापारत्वेनैव फूत्कारादयो वाच्या, नतु

दर्पणव्याख्या

आवश्यकः । गङ्गातीरत्वं लक्ष्यताऽवच्छेदकमिति व्यवहारात्, वृत्त्यवच्छेदककोटिप्रविष्टत्वस्योभयत्र साम्याच्च । तत्र न्यूनाऽतिरिक्तवृत्तित्वरूपाऽवच्छेदकत्वमादाय तादृशव्यवहारो यदि, तदा सर्वत्रैव तथास्त्विति भावः ।

ननु लाघवादेव न तस्याऽवच्छेदकत्वं वदामः, किन्तु मानादपीत्याशङ्कते ❀ नचेति ❀ यत्नार्थककरोतिनेत्युक्त्या व्यापारजन्यत्वप्रतिसन्धानाऽविशेषेऽपि घटाङ्कुरयोः कृताऽकृतव्यवहारात्कृञो यत्नार्थकत्वं सिद्धमेवेति ध्वनयति ❀ विवरणादिति ❀ तदर्थप्रतिपादकपदकथनरूपादित्यर्थः । धातुमात्रं यत्नत्वविशिष्टे शक्तम्, बाधकं विना यत्नत्वविशिष्टाऽर्थककरोतिप्रतिपादिताऽर्थकत्वात्, यद्यद्विशिष्टबोधकपदप्रतिपादितार्थकं भवति तत्तत्र शक्तम् । घटत्वविशिष्टशक्तघटपदप्रतिपादितार्थककलशादिपदवदिति सामान्यतो दृष्टाऽनुमानविधया शक्तिग्राहकत्वाद्विवरणस्येति भावः । यत्न एवार्थ इति पाठः । यत्न एव आख्यातार्थ इति पाठस्तु प्रकृतसन्दर्भविरुद्धः । ❀ अर्थः ❀ धात्वर्थः । एवकारेण व्यापारस्य वाच्यत्वव्यवच्छेदः ।

कृञो यत्नार्थकत्वे एव धातुमात्रस्य तदर्थकत्वसम्भावना । तदेव गगनकुसुमोपमानमित्याह ❀ रथो गमनं करोतीत्यादि ❀ रथादावचेतने यत्नस्य बाधेन तादृशप्रयोगाऽनुपपत्त्या न कृञो यत्नार्थकत्वम्, अपितु व्यापारार्थकत्वमेवेति, तेन विवरणाद्धातोर्व्यापारार्थकत्वमेव सिद्ध्यतीति भावः ।

ननु रथो गच्छतीति प्रयोगस्थधात्वर्थप्रतिपादककृञो व्यापारे लाक्षणिकत्वान्न तेन यत्नार्थकत्वक्षतिरत आह ❀ बीजादिनेति ❀ तथाच कृञो व्यापारे प्रयोगप्राचुर्य्येण तत्रैव शक्तिर्न्याय्येति तेन विवरणाद्धातोर्व्यापारार्थक-

किञ्च, भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात् ।

प्रभा

फूत्कारत्वादिना । अन्यथा पचेर्व्यापारसामान्यार्थककरोतिना विवरणासङ्गतिः, तत्र तत्र विक्लित्त्यनुकूलव्यापारः पचेरर्थ इत्यर्थोल्लेखासङ्गतिश्च ।

नच पचिना लोकप्रसिद्धफूत्कारत्वादिरूपेण बोधानुपपत्तिः, लक्षणादिना तथाबोधस्योपपादयितुं शक्यत्वात् ।

ननु व्यापारावाच्यत्वे यत्नजन्यत्वाप्रतिसन्धानदशायां 'घटः कृतः' 'अङ्कुरः कृतः' इति व्यवहारानुपपत्तिः, व्यापारजन्यत्वप्रतिसन्धानाविशेषात्, ईश्वरकृतिजन्यत्वेऽपि चैत्रादिकृतिजन्यत्वाभावप्रतिसन्धानदशायां तादृशव्यवहारस्येष्टत्वात् । तदुक्तमाचार्यैः—

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ॥ इति

परस्मिन्=मीमांसकमत इत्यर्थः । निरूढलक्षणा एव कर्तृपदस्थकृञोऽपीति चेल्लाघवात्कृतित्वावच्छिन्ने एव शक्तिरस्तु, व्यापारे एव लक्षणाऽस्तु, लघुधर्मावच्छिन्ने एव शक्तेर्मीमांसकादिमतसिद्धत्वात्, लक्षणया बोधात् तत्पदजन्यबोधविषयत्वप्रकारकभगवदिच्छायाः सन्मात्रविषयिण्यास्तत्रावश्यकत्वेऽपि लघुधर्मावच्छिन्न एव सम्बन्धत्वमङ्गीक्रियते, न गुरुधर्मावच्छिन्ने, अनुभवबलेन गौरवज्ञानस्य प्रतिबन्धकत्वकल्पनात् । शक्यसम्बन्धरूपलक्षणायास्तु तत्रापि सम्बन्धत्वं क्लृप्तम्, न कल्प्यमिति वैषम्यमत एव न लक्षणोच्छेद इति सकलतान्त्रिकसिद्धमित्यत आह—**किञ्चेति** ।

अवाच्यत्व इति—व्यापाररूपभावनाया धातोस्तिङश्चावाच्यत्वे इत्यर्थः । **द्वितीयेति**—व्यापारस्यावाच्यत्वे स्वजनकव्यापारव्यधिकरणधात्वर्थफलाश्रयत्वरूपं कर्मत्वं वक्तव्यम्, धात्वर्थफलाश्रयत्वरूपं वा । तथाच 'घटो भवति' इत्यत्रापि घटपदाद् द्वितीयापत्तिः, भूधात्वर्थोत्पत्तिरूपफलाश्रयत्वात् । व्यापारस्य धातुवाच्यत्ववादिनये तु न दोषः, धात्वर्थव्यापाराश्रयस्यैव कर्तृत्वेन परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात् ।

दर्पणव्याख्या

त्वमवश्यमङ्गीकरणीयमिति भावः ।

अत्रेदमवधेयम्—वैयाकरणमतेऽपि पचत्यादेः फूत्कारादिव्यापारे व्यापारत्वेनैव शक्तिः, व्यापारसामान्यार्थककृञा विवरणात् । एवञ्च व्यापारत्वेन कृतेरपि संग्रहान्मत्तो भूतं ननु 'मया कृतम्' इति तत्र तत्रोक्तं सङ्गच्छते । तत्तद्रूपेण क्वचिद् बोधस्तु पचत्यादीनां तत्तद्रूपावच्छिन्ने लक्षणयोपपाद्यः ।

शक्यादन्येन रूपेण ज्ञाने भवति लक्षणा । इत्यभियुक्तोक्तेः ।

अत एव वाक्यार्थप्रदर्शनाऽवसरे विक्लित्त्यनुकूलो व्यापारः, ज्ञानाऽनुकूलो व्यापार इति व्यापारसामान्यार्थकव्यापारपदेन सोत्कीर्त्तितस्य सङ्गतिरिति । 'कृञोऽकर्मकतापत्तेः' इति मूलमवतारयति ❀ किञ्चेति ❀ । ❀ अवाच्यत्वे ❀ धात्वशक्यत्वे । ❀ द्वितीया स्यादिति ❀ धात्वर्थोत्पत्तिरूपफलाऽऽश्रयत्वात् ।

ननु घटो भवतीत्यत्र कृत्याश्रयत्वरूपकर्तृत्वबाधेऽपि धात्वर्थफलाऽन्विताऽऽख्यातार्थव्यापाराश्रयत्वरूपकर्तृत्वसत्त्वात्तेन कर्मत्वस्याऽवश्यं बाधेन नोक्तस्थले द्वितीयाप्रसक्तिः, अन्यथा कर्त्तरि लकारोऽप्यनाकरतामापद्येतेत्याशङ्क्य निराकुरुते

SGDF

नचात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्म्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्, अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात्। कृत्याश्रयत्वस्य, कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्, धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्।

प्रभा

फलमात्रस्य धातुवाच्यत्वे तु बाधो न स्यादित्याह—नचेति। अनुगतेति—चेतनाचेतनसाधारणेत्यर्थः। कृत्याश्रयत्वस्येति—धात्वर्थफलानुकूलकृत्याश्रयत्वस्येत्यर्थः। कारकेति—कारकाणां चक्रम्=समूहः, सकलकारकेत्यर्थः, तस्य प्रयोक्तृत्वम्=प्रवर्तकत्वम्, इतरकारकाणां व्यापारस्य कर्तृव्यापारप्रयोज्यत्वात्, कृत्याश्रयत्वस्य प्रयोक्तृत्वस्य च प्राणिधर्मतया घटादावभावात्। एवञ्च तव मते कृतिमत एव स्वतन्त्रपदेन विवक्षिततया कृतेरभावे कर्तृसंज्ञाऽप्राप्त्या फलाश्रयत्वेन कर्मसंज्ञायां द्वितीयापत्तिर्दुर्वारा स्यादिति भावः। ननु धात्वर्थानुकूलव्यापाराश्रयत्वमेव कर्तृत्वमस्मन्मते विवक्षितमिति दोषाभाव इत्यत आह—कारकमात्रेति—सकलकारकेष्वित्यर्थः, मात्रशब्दस्य सर्वार्थकत्वात्।

ननु कारकचक्रप्रयोक्तृत्वप्रकारकविवक्षाविषयत्वमेव कर्तृत्वम्, तस्य च घटेऽपि विवक्षितुं शक्यत्वेन नोक्तापत्तिरत एव 'कारके' (अ० १ पा० ४ सू० २३) इति सूत्रभाष्ये 'सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यञ्च विवक्षितम्। तयोः पर्यायेण वचनम्। तयोः=स्वातन्त्र्यपारतन्त्र्ययोः पर्य्यायेण वचनं भविष्यति। वचनाश्रया च संज्ञा भविष्यति। तद्यथा 'बलाहकाद् विद्योतते विद्युत्' 'बलाहके विद्योतते' 'बलाहको विद्योतते' इत्युक्तम्। अनेन विवक्षाधीनं कारकमात्रमिति स्पष्टमेव बोधितमित्यत आह—

दर्पणव्याख्या

❀ नचेति ❀। घटस्येति ❀ घटं भावयतीत्यत्रेव, घटो भवतीत्यत्राऽपि द्वितीयाऽऽपत्तिः। मन्मते तु धातूपात्तव्यापाराऽऽश्रयत्वेन परया कर्तृसंज्ञया बाधान्न तदापत्तिरिति भावः।

निराकरणप्रकारतामाह ❀ अनुगतेति ❀ चेतनाऽचेतनसाधारणेत्यर्थः। ❀ त्वन्मते ❀ भवदीयमते। ❀ दुर्वचत्वेनेति ❀ वक्तुमशक्यत्वेनेत्यर्थः। तदेवाऽऽह ❀ कृत्याश्रयत्वस्येति ❀ तस्याऽचेतनेऽव्याप्तत्वादिति भावः। ❀ कारकचक्रप्रयोक्तृत्वस्य वेति ❀ तद्धात्वर्थीयनिखिलकारकप्रवर्त्तकत्वरूपस्य चेत्यर्थः। नैयायिकमतं निरस्य मीमांसकं प्रत्याह ❀ धात्वर्थेति ❀। ❀ कारकमात्रेति ❀ मात्रपदं कृत्स्नाऽर्थकम्। सर्वस्याऽपि कारकस्य धात्वर्थाऽनुकूलयत्किञ्चित्क्रियाश्रयत्वात्। क्रियाजनकत्वस्यैव कारकत्वादिति भावः।

नन्वचेतने कृत्याश्रयत्वरूपकर्तृत्वस्य बाधेऽपीतरव्यापाराऽनधीनत्वप्रकारकविवक्षाविषयव्यापाराश्रयत्वरूपकारकचक्रप्रयोक्तृत्वरूपमेव कर्तृसंज्ञानियामकम्। व्यापारश्च क्वचित् कृतिः, क्वचित् संयोगादिरेव। तादृशव्यापाराश्रय एव 'स्वतन्त्रः कर्त्ता' इति सूत्रे स्वतन्त्रपदार्थः, तत्सूत्रप्रणयनसामर्थ्यात्। तदुक्तम्—'कारके' इति सूत्रे भाष्ये—प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा। किं पुनः प्रधानम्? कर्त्ता। कथं ज्ञायते कर्त्ता प्रधानमिति? यत्सर्वेषु कारकेषु सन्निहितेषु कर्त्ता प्रवर्त्तयिता भवति' इति। स्थाली काष्ठैः पचतीत्यादौ स्थाल्येव तत्त्वेन विवक्षिता इति तद्भावः। वक्ष्यते चाऽधिकमुपरिष्टात्।

मीमांसकमते प्रसक्तदूषणोद्धृतिरपि वक्ष्यमाणैव। एवञ्च घटगततादृशव्यापारस्यैव स्वातन्त्र्यविवक्षया कर्तृत्वस्य निराबाधेन न द्वितीयाप्रसङ्गोऽत आह

SGDF
Sri Gargeshwari Digital Foundation

अपिच भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्। 'स्वार्थफलव्यधिकरणव्यापारवाचकत्वम्', 'स्वार्थव्यापारव्यधिकरणफलवाचकत्वम्' वा सकर्म्मकत्वं भावनाया वाच्यत्वमन्तरेणासम्भवि।

प्रभा

अपिचेति। स्वार्थेति—भूधातोः पच्याद्यर्थफलव्यधिकरणव्यापारवाचकत्वादतिव्याप्तिवारणाय फले स्वार्थेति विशेषणम्। फलव्यधिकरणेत्यस्य फलाधिकरणभिन्नाधिकरणेत्यर्थः। फलाधिकरणता च फलतावच्छेदकसम्बन्धेन। तेन कालिकसन्बन्धेन भूधात्वर्थात्मधृतिरूपफलस्याधिकरणं कालस्तद्भिन्नदेवदत्तादिवृत्तिव्यापारवाचित्वेन भूधातोः सकर्मकत्वं निरस्तम्। यावदवयवेष्ववयविनः स्थितिः=आत्मधारणम्, तथाचाधेयतारूपा स्थितिरेवात्मधारणम्। यद्वा, नित्येषु तदसम्भवात्तत्तद्धर्माश्रयतैव तत्। आत्मधारणरूपफलस्य फलतावच्छेदकस्वरूपादिसम्बन्धेन फलाधिकरणदेवदत्तादिवृत्तिव्यापारवाचकत्वात्।

नन्वेवमपि गम्धात्वर्थसंयोगरूपफलाधिकरणं चैत्रादिर्ग्रामश्च, तत्र फलाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदस्य चैत्रादावसत्त्वात् सकर्मकत्वानापत्तिरिति चेन्न, स्वार्थव्यापारानधिकरणं यत्फलाधिकरणं तदवृत्तिव्यापारवाचकत्वरूपसकर्मकत्वस्य स्वीकारेणादोषात्। चैत्रादौ व्यापारानधिकरणं संयोगाधिकरणञ्च यद् ग्रामादि तदवृत्तिव्यापारस्य सत्त्वात् स्वार्थफलाधिकरणं यत्किञ्चिद् ग्रामादि तद्भिन्नाधिकरणवृत्तिव्यापारवाचकत्वस्य सकर्मकलक्षणत्वाद्वाऽदोषः। नचैवमपि जीवत्यादावतिव्याप्तिः, धारणरूपफलस्य प्राणवृत्तितया व्यापारस्य च देवदत्तादिवृत्तितयोक्तसकर्मकत्वस्य सत्त्वादिति वाच्यम्, स्वार्थफले स्वशक्यतावच्छेदकघटकावृत्तित्वस्य विशेषणदानेनादोषात्, जीवत्यर्थधारणरूपफलस्य च प्राणधृत्यनुकूलव्यापारत्वरूपशक्यतावच्छेदकघटकप्राणवृत्तित्वस्यैव सत्त्वात्।

नागेशास्तु—एतादृशसकर्मकत्वस्य गुरुत्वात् 'अध्यासिता भूमयः' इत्यादावव्याप्तेश्चैतच्छास्त्रीयकर्मसंज्ञकान्वय्यर्थकत्वं सकर्मकत्वम्, तदनन्वय्यर्थकत्वमकर्मकत्वमित्याहुः। अन्वयश्च-पृथगुपस्थितयोः संसर्गरूप इति जीवत्यादावेतन्मतेऽपि न दोषः, प्राणधारणयोः पृथगुपस्थितेरभावात्। फलव्यापारयोर्विशेष्यविशेषणभावे विनिगमनाविरहादाह—स्वार्थव्यापारेति—अत्रापि व्यापारतावच्छेदकसम्बन्धेन व्यापाराधिकरणं फलतावच्छेदकसम्बन्धेन फलाधिकरणञ्च बोध्यम्। तेन कालिकादिसम्बन्धमादाय न दोषः। नचाविवक्षितकर्मत्वेनाकर्मकेष्वतिव्याप्तिः, उक्तलक्षणे कर्माविवक्षाविरहविशिष्टत्वे सतीति विशेषणेनातिप्रसङ्गविरहादिति दिक्।

दर्पणव्याख्या

❀ अपिचेति ❀।

स्वार्थफलेति ❀ शक्यतावच्छेदककोट्यप्रविष्टाऽऽश्रयकत्वेन फलस्य विशेषणान्न जीवत्यादावतिप्रसङ्गः। एवमविवक्षितकर्मकत्वाऽभाववत्त्वेनाऽपि स्वार्थो विशेषणीयः, नाऽतोऽविवक्षितकर्मतयाऽभ्युपगतभावलकारप्रकृतिस्मृधातौ सः। वैयधिकरण्यं त्वग्रे विवेचयिष्यते।

❀ असम्भवीति ❀ तथाच व्यापारवाचकत्वं धातोरावश्यकमिति भावः।

SGDF Sri Gangeshwari Digital Foundation

'अन्यतमत्वं तत्त्वम्' इति चेन्न, एकस्यैवार्थभेदेनाकर्म्मकत्व-सकर्म्मकत्वदर्शनात् । तदेतदभिसन्धायाह—कृञ इति ।

अयं भावः—व्यापाराऽवाच्यत्वपक्षे फलमात्रमर्थ इति फलितम् । तथाच करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम् । तथाच 'यती प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्म्मकतापत्तिरुक्तरीत्या दुर्वारेति ।

प्रभा

अन्यतमत्वमिति—सकर्मकत्वप्रकारकप्रमात्मकज्ञानविषयीभूतान् पच्यादीन् सर्वान् पठित्वा एतदन्यतमत्वरूपं सकर्मकलक्षणं वाच्यम्, तच्चान्यतमत्त्वम्—तत्तद्धातुवृत्त्यानुपूर्व्यवच्छिन्नप्रतियोगिताकयावद्भेदात्यन्ताभाववत्त्वम्, नतु तावद्भिन्नभिन्नत्वम्, तत्र जगतः प्रवेशेन परस्परभेदानां वैशिष्ट्ये क्रमभेदेन च गौरवात् । एकस्यैवेति—एकानुपूर्वीकस्यैवेत्यर्थः । यथा वहधात्वादिः, स च प्रापणे सकर्मकः, स्यन्दनेऽकर्मकः । एतेनार्थभेदाच्छब्दभेदेन एकस्यैव धातोरित्यसङ्गतमित्यपास्तम्, आनुपूर्व्यैक्येन तत्त्वस्याव्याहतत्वात् ।

ननु स्वार्थफलजनकव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं वाच्यम्, तच्च करोतावक्षतम्, यत्नरूपफलस्य फलताऽवच्छेदकविषयतासम्बन्धेन स्व (यत्न) जनकात्ममनस्संयोगादिरूपव्यापारानधिकरणघटादिवृत्तित्वात् तद्भिन्नत्वरूपाकर्मकत्वञ्च करोतौ न सम्भवतीति 'कृञोऽकर्मकतापत्तेः' इत्यापत्तिरसङ्गतेत्यत आह—अयम्भाव इति । करोतीत्यादाविति—आदिना जानातीत्यादेः संग्रहः, तस्यापि ज्ञानेच्छादिरूपफलमात्रार्थकत्वात् । तन्मात्रमिति—यत्नादिरूपफलमात्रमित्यर्थः । व्यापारे धात्ववाच्यस्य प्रकृतत्वेन 'नहि यत्नोऽर्थः' इत्यस्य व्यापारस्थानीयत्वासम्भवादाह—फलस्थानीयेति । अकर्मकतेति—यदि फलवाचित्वमकर्मकत्वं तदा सर्वेषामकर्मकता । उक्तरीत्येति—उक्तसकर्मकधातुभिन्नाकर्मकधातुत्वमितिरीत्येत्यर्थः ।

दर्पणव्याख्या

❀ अन्यतमत्वमिति ❀ पच्यादिधातून् शृङ्गग्राहिकयोपादाय तावद्भिन्नभिन्नत्वमित्यर्थः ❀ तत्त्वमिति ❀ अनुगतं सकर्मकत्वमित्यर्थः । ❀ दर्शनादिति ❀ यथा जिधातोरभिभवार्थेऽकर्मकत्वस्य, न्यूनीकरणार्थे सकर्मकत्वस्याभ्युपगमात्सकर्मकधातुलक्षणे तत्प्रवेशेऽकर्मके तस्मिन्नतिव्याप्तिप्रवेशे च न्यूनीकरणेऽर्थे तत्रैवाऽव्याप्तिरित्यर्थः ।

यद्यपि तत्तदर्थविशिष्टानेवोक्तरीत्योपादाय सकर्मकत्वनिर्वचने दोषाभावस्तथापि 'बहुलमेतन्निदर्शनम्' इति स्मरणात्तत्र तत्रावृत्तिकरणाच्च तावद्धातूनां युगपद् ग्रहणाऽसम्भवे तात्पर्यमिति बोध्यम् । ❀ तदेतदिति ❀ पूर्वोक्तदूषणगणमित्यर्थः ।

ननु कृञोऽकर्मकतापत्तेरित्यस्य कृञो यत्नार्थकत्वनिरासप्रतिपादकस्य कथमुक्तार्थाऽभिसन्धायकत्वमित्याशङ्क्याऽभिसन्धानप्रकारं विशदयति ❀ अयम्भाव इति ❀ । ❀ फलमात्रमिति ❀ मात्रपदेन व्यापारव्यवच्छेदः, करोतीत्यादौ इत्यादिना सविषयार्थधातुसंग्रहः ।

❀ तन्मात्रमिति ❀ यत्नादिरूपविषयिमात्रमित्यर्थः ❀ अकर्मकतापत्तिरिति ❀ व्यापारस्य धात्ववाच्यत्वे उक्तलक्षणाऽऽक्रान्तस्येति भावः । केचित्तु, अकर्मकत्वापत्तिरिति विषय्यर्थककृञाद्यभिप्रायेणैव तेषामेव प्रक्रान्तत्वात्, एवं च न तदप्रसिद्धिरित्याहुः । ❀ उक्तरीत्येति ❀ । उक्तप्रायरीत्या = सकर्मकधातुभिन्नधातुत्वमित्याकारिकयेत्यर्थः, यथाश्रुते धातोर्व्यापाराऽवाचकत्वे स्वार्थफलसमानाधिकरणव्यापारवाचकत्वरूपाऽकर्मकत्वापादनस्याऽसम्भवदुक्तिकत्वापत्तेः ।

तथाच 'न हि यत्नः' इत्यत्र फलस्थानीयत्वेनेति शेषः। कृञ इति-धातुमात्रोपलक्षणम्, सर्वेषामप्यकर्म्मकता, सकर्म्मकता वा स्यादिति भावः।

अथवा, 'व्यापारो भावना' इत्यर्थेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत् साधयन्

प्रभा

नच धातुमात्रस्य व्यापारवाचकत्वे सकर्मकधातुभिन्नाकर्मकधातुत्वमिति दुर्वचम्, भेदप्रतियोगिनः सकर्मकधातोर्दुर्लभत्वादिति वाच्यम्, ण्यन्तधातुदुहादिधातुरूपप्रतियोगिनः सुलभत्वात्। ननु अकर्मकत्वापत्त्या सविषयार्थकज्ञाधात्वादेर्व्यापारार्थकत्वसिद्धावपि धातुमात्रस्य व्यापारवाचकत्वे प्रमाणाभाव इत्यत आह—धातुमात्रेति। 'फलमात्रं धात्वर्थः' इति कस्यचिन्मीमांसकस्य मतं खण्डयित्वा व्यापारमात्रं धात्वर्थः, संयोगादिरूपफलविशेषान्वयबोधे च गम्यादिधातुविशेषजन्यव्यापारोपस्थितेर्हेतुतया न गच्छति-त्यजत्योः समानान्वयबोधजनकतेति व्युत्पत्तिवादोक्तनैयायिकविशेषस्य मतं निराकर्तुमाह—अथवेति। तत्=सकलधातुवाच्यत्वम्।

दर्पणव्याख्या

नन्विदानीं धातुमात्रस्यैव व्यापारवाचकत्वस्याऽसिद्धत्वात् सकर्मकरूपप्रतियोग्यऽसिद्धया भवदुक्तार्थापादनस्याऽप्यसम्भवदुक्तिकत्वं समानम्। अन्यतमत्वरूपस्य तु स्वयमेव निराकृतत्वादुक्तपदेन तद्ग्रहणाऽसम्भवादिति चेन्न, नयत्यादिद्विकर्म्मकाणां संयोगाऽद्यनुकूलाऽजादिनिष्ठक्रियात्मकफलार्थकत्वस्य धातोः फलमात्रार्थकत्ववादिनाऽप्यभ्युपगमादजादिनिष्ठक्रियायाः संयोगरूपफलजनकत्वाल्लोकप्रसिद्धेश्च व्यापारत्वात्तदर्थकधातून् ण्यन्तादिधातून् वोपादायैव कथञ्चित्प्रसिद्धिसम्भवादिति नोक्तव्याख्याने दोषः।

नन्वेतावता ज्ञाकृञादीनां व्यापारार्थकत्वं सिद्धम्, न धातुमात्रस्येत्यतः कृञ्पदं धातुमात्रपरतया व्याचष्टे—❀ कृञ इति❀। ❀ धातुमात्रोपलक्षणमिति ❀ कृञ्पदं शक्यलक्ष्यसाधारणधातुत्वेनाऽजहत्स्वार्थलक्षणया धातुमात्रबोधकम्। तथाच धातुमात्रस्याऽकर्मकतापत्त्या न फलमात्रार्थकता, किन्तु व्यापाराऽर्थकताऽपीत्यर्थः। ❀ अकर्मकतेति ❀ पूर्वोक्तभिन्नसर्वधातूनां सेत्यर्थः। यदि फलवाचकत्वमेव सकर्मकत्वं, तदा सर्वेषामविशेषेण सकर्मकतैव स्यादित्याह ❀ सकर्मकतेति ❀

वस्तुतस्तु, उक्तयुक्तया धातोर्व्यापारार्थकत्वसिद्धिस्तदैव स्याद् यदि स्वार्थफलेत्यादिसकर्मकलक्षणं सकर्मकधातुमात्रसाधारणं स्यात्, तदेव न, अध्याद्युपसृष्टशीङादिष्वऽव्याप्तेः। तस्माद् भ्वादीनां धातुत्वाऽनापत्तिः। मैत्रेण पाचयतीत्यादौ मैत्रादीनां कर्त्तृत्वाऽनुपपत्तिश्च तथा। अत एव 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते' इत्याद्युपपत्तिरिति दिक्।

ननु, 'कृञोऽकर्मकतापत्तेः' इति ग्रन्थो न मीमांसकमतनिराकरणपरः। तस्य, तस्मात् करोतिरित्यादिना निराकरिष्यमाणत्वात्, तैः कृञा यत्नार्थकत्वाऽनभ्युपगमाच्च। नापि नैयायिकमतनिरासपरः, नैयायिकैः फलव्यापारयोरुभयोरपि धातुवाच्यत्वाऽभ्युपगमात्। तदुक्तमाख्यातवाददीधितौ 'स्तां वा फलव्यापारौ पृथगेव धात्वर्थौ' इति। धातोः फलाऽवच्छिन्नव्यापारार्थकत्वे कर्माख्याते फलस्य द्वेधा भानापत्त्या तयोर्विशकलितयोरेव शक्तिर्ज्यायसीति तद्भावः। फलस्य धातुवाच्यत्वे परं केषाञ्चिन्न्यायविदां विप्रतिपत्तिः, कर्माख्यातेन द्वितीयया च तद्भानसम्भवात्। किञ्चैतद्ग्रन्थस्य धातुमात्रस्य व्यापाराऽर्थकत्वसाधकत्वे धातोरकर्मतापत्तेः, 'फलमात्राऽर्थता न हि' इत्येव ब्रूयान्न तु कृञ इत्यपरितोषादन्यार्थपरतया मूलमवतारयति ❀ अथवेति ❀।

❀ प्रसाध्येति ❀ पूर्वाऽर्द्धस्य विवरणपरतया व्याख्यानादिति भावः। ❀ तदिति ❀ धातुवाच्यत्वमित्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

नैयायिकाभ्युपगतं जानाति–करोत्यादेः केवलज्ञान-यत्नादिक्रियामात्रवाचित्वं दूषयति–कृञ इति । अयं भावः—फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात् । तथाच स्वार्थफलव्यधिकरण-

प्रभा

क्रियामात्रेति—मात्रपदेन फलस्य धातुवाच्यत्वनिरासः । ननु फलावाचकत्वेऽपि फलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वं धातोर्व्यापारमात्रवाचित्वेऽपि अक्षतम्, यद्वा, द्वितीयाद्यर्थफलान्वय्यर्थकत्वं सकर्मकत्वम्, द्वितीयादीनामेव फलार्थकत्वाददोष इत्यत आह—अयम्भाव इति ।

दर्पणव्याख्या

❀ जानातिकरोत्यादेरिति ❀ निर्दिष्टयत्नार्थकभिन्नसविषयार्थकधातुमात्रोपलक्षणम् । ❀ क्रियामात्रेति ❀ मात्रपदेन फलव्यवच्छेदः । सकर्मकाणां प्रायशः फलावच्छिन्नव्यापारवाचकत्वम्, विशकलितफलव्यापारोभयार्थकत्वं वा, जानात्यादीनां तु ज्ञानादिव्यापारार्थकत्वमेव । अकर्मकाणां तु सर्वेषां न फलार्थकत्वम्, तस्य ततोऽननुभवात्, किन्तु व्यापारार्थकत्वमेवेति प्राचीननैयायिकाभ्युपगमात् । वक्ष्यमाणरीत्या कृञः फलार्थकत्वे तु तुल्यन्यायात् सर्वेषामेव तत्सिद्धिरिति भावः ।

ननु कृञः फलावाचकत्वे कथमकर्मकत्वमत आह ❀ अयं भाव इति ❀ । वाचकत्वादीत्यादिना स्वार्थव्यापारव्यधिकरणफलवाचकत्वस्य नैयायिकनये फलाऽवच्छिन्नव्यापारार्थकत्वस्याऽपि सकर्मकत्वात्तस्य च सङ्ग्रहः । जानात्यादीनामेव फलार्थकत्वानभ्युपगम उच्छेदपदार्थोऽव्याप्तिः, सर्वेषामेव तदनभ्युपगमे त्वसम्भवः । तथाच कृञ्धातुः फलवाचकः, सकर्मकत्वात्, पच्यादिवदित्यनुमाने विपक्षबाधकतर्कप्रदर्शकं कृञोऽकर्मकेत्यादीति बोध्यम् ।

वस्तुतस्तु, व्यापारो भावना सैवेति पूर्वार्द्धमेव विवरणप्रदर्शनेन धातोः फलव्यापारोभयार्थत्वसाधकम् । तथाहि–धातोर्व्यापारार्थकत्वेऽसिद्धे भावनादिपदैर्व्यापारपदविवरणमात्रान्न तस्य तावत्सिद्धिरिति स्फुटमेव । अतः पचति पाकं करोति, पाकभावना, तादृश्युत्पादना, इत्यादिविवरणपरतैव तस्य वाच्या । व्याख्यातं च तथैव सारकृता । तथाच व्यापारार्थककृञेव विक्लित्याद्यर्थकपाकादिपदेनाऽपि विवरणादुभयोरपि धात्वर्थत्वसिद्धिः तत्र जानात्यादौ फलांशे विप्रतिपन्नं नैयायिकं प्रत्युक्तार्थोपष्टम्भकतया कृञोऽकर्मकतेत्याद्युक्तम् । धातुमात्रे व्यापाराऽवाचकत्वं वदन्तं मीमांसकं प्रति तु तदुपपादकतयैव-तस्मात्करोतिरित्यादि ।

यद्यपि व्यापारांशे विप्रतिपन्नं प्रत्यपि कृञ इत्याद्युपष्टम्भकम्, तथापि विवरणस्यैवाऽऽख्यातपरतया सकर्मकत्वस्य व्यापारार्थकत्वं विनाऽप्यन्यथासिद्धावुद्भावितायां तद्ग्रन्थस्याऽऽवश्यकत्वादिति ।

नव्यनैयायिकास्तु–सकर्मकधातूनां फले तज्जनकत्वेन विवक्षितव्यापारेषु चोपलक्षणीभूतसाधनाऽऽकाङ्क्षोत्थापकताऽवच्छेदकधर्मसमानाऽधिकरणधर्मत्वाऽनुगतीकृततत्तद्धर्माऽवच्छिन्नेषु शक्तिः, सम्भवति फलजनकतया विवक्षितानां तेषां विभिन्नधर्मवत्त्वम् । यत्र त्वेकधर्माऽवच्छिन्नस्यैव फलाऽनुकूलत्वं विवक्षाविषयस्तत्र तदवच्छिन्न एव धातोः सा । नहि सर्वत्र समुदाय एव शक्तिरिति राजाऽऽज्ञाऽस्ति ।

'क्रिया नामेयम्' इत्यादि भाष्यं तु बहुकालसाध्योक्तधात्वर्थविषयमिति न तद्व्याकोपः । अन्यथा सर्वत्राऽगतिकगत्यारोपाश्रयणापत्तेः । तेषामेव च व्यापारपदव्यपदेश्यत्वम् । कृतित्वस्य तादृशधर्मसमानाधिकरणधर्मत्वेऽपि न तस्य पच्याद्यर्थताऽवच्छेदकत्वम्, तदंशे तस्योपलक्षणत्वाऽनङ्गीकारात् । अत एव व्युत्पन्नानां न कदाचिदपि तत्तात्पर्येण यागपाकादिपदप्रयोगस्तथा प्रयुक्तादपि तस्मात्पाकादिकृतिबोधश्च । एतेन तस्या अपि व्यापारतया धातोरेव लाभान्न तिङस्तत्र शक्तिरिति निराकृतम् ।

व्यापारवाचित्वादिरूपसकर्म्मत्वोच्छेदापत्तिः। नच कृञादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम्, व्यवहारस्य भाक्तत्वेऽपि कर्म्मणि लकारासम्भवात्।

प्रभा

ननु पच्यादेरुक्तसकर्मकत्वानुरोधेन, गच्छति—त्यजत्योरेकस्यैव व्यापारस्य संयोगविभागजनकतया पर्य्यायत्ववारणाय द्वितीयया फलविशेषबोधे गम्यादिरूपतत्तत्समभिव्याहारादिरूपानेकविधकारणकल्पने गौरवेण च फलव्यापारोभयार्थकत्वेऽपि यत्नादिरूपसविषयार्थककृञ्ज्ञाधात्वादेर्यत्नज्ञानादिरूपव्यापारमात्रवाचित्वेऽपि बाधकाभावः। सकर्मकत्वव्यवहारस्तु सविषयार्थकधातूनां विषयत्वरूपं लाक्षणिकं कर्मत्वमादायेत्यत आह—भाक्त इति—लाक्षणिक इत्यर्थः, भज्यते=सेव्यते स्व (लक्षणा) प्रयोजकतयाऽनयेति भक्तिर्लक्षणा, शक्यसम्बन्धरूपलक्षणायाः स्वघटकत्वेन शक्यस्यापि भजनादिति भावः। नैयायिकोक्तमिति—प्राचीननैयायिकोक्तमित्यर्थः, नव्यनैयायिकैः फलव्यापारयोरुभयोरपि धातुवाच्यत्वस्वीकारात्। व्यवहारस्य=सकर्मकशब्देन

दर्पणव्याख्या

जानात्यादीनां तु विषयत्वं फलं तन्निर्वाहकज्ञानादिव्यापारश्च शक्यम्। कृञस्तु साध्यत्वम्, यत्नश्चाऽर्थः। तेन तद्धात्वर्थफलसम्बन्धित्वरूपं मुख्यकर्मत्वं घटादीनां निराबाधम्। एवं स्वार्थफलव्यधिकरणत्वरूपं सकर्मकत्वमपि। यत्नाद्यकर्मकाणां तु तत्तद्धर्मावच्छिन्नयत्नादिरूपव्यापार एव सा। भोजनं यतते' इत्यप्रयोगेण तद्विषयत्वस्य धातुशक्यत्वाऽनुपगमात्। 'यतते' इत्युक्ते कर्माऽकाङ्क्षाया अभावाच्च।

अध्याद्युपसृष्टशीङादीनां तु फले निरूढलक्षणैव, शीङादितः सर्वत्र फलाबोधात्। तदर्थेऽनादितात्पर्य्यग्राहकतयैव च "अधिशीङ्स्थासाम्" (पा० सू० ७।४।४६) इत्यादिसूत्रोपयोगः। कर्त्तेत्यत्र तु कृञो यत्नबोधकत्वादेव नाऽचेतने स्वरसतः कर्त्तृपदप्रयोगः।

एवञ्च कर्त्तृबोधनिर्वाहार्थं पचतीत्यादावाख्यातस्य कृतौ शक्तिरावश्यकी। तदर्थप्रयत्नस्याऽऽश्रयाश्रयिभावेन प्रथमान्तार्थेऽन्वयात् तद्बोधोपपत्तेः। यत्र तु न तद्बोधसिद्धी रथो गच्छतीत्यादौ तत्र व्यापारे, आश्रयत्वादौ वा यथायथं लक्षणा। 'स्वतन्त्रः कर्त्ता' (पा० सू० ७।४।५४) इतिसूत्रसामर्थ्येन, धात्वर्थव्यापाराऽश्रयतत्प्रतियोगिनामपि कर्त्तृत्वस्य परिभाषणान्न कर्त्तृबोधाऽनुपपत्तिः। यत्र प्रथमान्तसमभिव्याहारः, यत्र तु कृत्यादिविशेष्यक एव तात्पर्यं तत्र तद्विशेष्यकोऽपि बोधः। अनभिहित इत्यस्याप्यबोधित इत्येवाऽर्थः। अबोधनं त्वाश्रयाऽतिरिक्तार्थे विशेषणतया कृत्याद्यर्थप्रबोधनमेवेति नाऽभिधानाऽनभिधानव्यवस्थाऽनुपपत्तिः। चैत्रः पचतीत्यादौ कर्त्तृबोधस्य कृतिशक्त्यैव निर्वाहे तत्राऽख्यातशक्तिकल्पनाऽनौचित्याच्च। व्यापारव्यपदेशाभावेन विकृत्यादीनामुक्तधर्मत्वस्योपलक्षणत्वाऽनुपगमात्, पृथक्शक्तिरदृष्टैव। फलत्वं तु पूर्वं निरूपितमेव। एवं सति क्वचिद् दूषणं प्रसक्तमवगणयिष्यते इत्याहुः। एवं सकर्मकत्वादिनिर्वचनाऽनुपपत्त्या धातोरुभयार्थकत्वमावश्यकमिति पर्यवसितम्।

व्यापारमात्रशक्तिवादिनस्तु—द्वितीयाद्यर्थान्वय्यर्थकत्वं सकर्मकत्वम्। पच्यादिसमभिव्याहारे द्वितीयाया विकृत्याद्यर्थकत्वात्। जानात्यादिसमभिव्याहारे च विषयत्वाऽद्यर्थकत्वात्, तदन्वयित्वं तदर्थेऽक्षतमित्याहुः। जानात्यादियोगे घटादीनां गौणकर्मत्वमिति वदतां मतमाशङ्क्य निराचष्टे ❀ नचेति ❀। ❀ भाक्त इति ❀ भज्यते = आमृश्यते सेव्यते वा शक्यार्थोऽनयेति भक्तिर्लक्षणा, तया, शक्याऽर्थस्य तिरोधानात्, स्वज्ञाने घटकतया शक्यार्थस्याऽपेक्षणाच्च। तत आगतो भाक्त इत्यर्थः॥

❀ भाक्तत्वेऽपि ❀। लक्षणानिबन्धनत्वेऽपि। ❀ कर्मणीति ❀। मुख्यसकर्मत्वमादाय शास्त्रस्य चारितार्थ्ये गौणे तद्व्यापारे मानाऽभावादिति भावः।

CC-0. Sri Gargeshwari Digital Foundation

नहि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्य्यं कर्त्तुं शक्यम्। एवञ्च 'नहि यत्नः' इत्यत्र यत्नमात्रमित्यर्थः ॥ ५ ॥

अत एवाह—

किन्तूत्पादनमेवातः कर्म्मवत् स्याद् यगाद्यपि ।
कर्म्मकर्त्तर्य्यन्यथा तु न भवेत् तद् दृशेरिव ॥ ६ ॥

उत्पादनम् = उत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः।

प्रभा

प्रयोगस्य। तेन = तटरूपलाक्षणिकार्थेन। तथाच 'क्रियते घटः' इत्यादेरसिद्धिरिति भावः, धातुवाच्यव्यापारव्यधिकरणफलाश्रयस्यैव प्रधानकर्मतया धात्ववाच्यस्य विषयत्वरूपफलस्योत्पत्तिरूपफलस्य वा घटादौ सत्त्वेन मुख्यकर्मत्वाभावात् 'गौणमुख्य'न्यायेन, प्रधानाप्रधानयोरिति न्यायेन च तादृशकर्मणः 'लः कर्मणि' इति सूत्रेऽग्रहणात्।

नचैवं तुल्यन्यायात् कर्तुरपि तादृशस्यैव ग्रहणेन 'पच्यते तण्डुलः' इत्यादेरसिद्धिः, 'कर्मवत्कर्मणा' इति सूत्रारम्भसामर्थ्येन कर्तृपदे गौणमुख्यन्यायाद्यप्रवृत्तेः। यत्नमात्रमिति—व्यापारस्थानीययत्नमात्रमित्यर्थः। मात्रपदेन फलव्यवच्छेदः। कृञादेर्मुख्यसकर्मकत्वसिद्धये यत्नादिरूपव्यापारस्य, उत्पत्त्यादिरूपफलस्य च धातुवाच्यत्वं स्वीकार्यमिति भावः ॥ ५ ॥

अत एवेति—उक्तदोषनिरासाय धातूनां फलव्यापारार्थकत्वादेवेत्यर्थः। उत्पादनमिति—उत्पत्तिरूपफलम्, व्यापारश्च धात्वर्थः। अत एव 'स्तोकं पचति' इत्यत्र विक्लित्त्यादौ स्तोकादेरन्वये 'पदार्थः पदार्थेन' इति न व्युत्पत्तिविरोधः। यत्नादीति—आदिना यत्नेतरव्यापारस्यापि धातुवाच्यत्वं सूचितम्। तेन 'रथो गच्छति' 'रथो गमनं करोति' इत्यादौ शक्यार्थयत्नाश्रयत्वस्य बाधेऽपि यत्नेतरशक्यार्थव्यापाराश्रयत्वस्य रथादिरूपेऽपि कर्त्तरि सत्त्वान्न लक्षणाऽऽश्रयत्वरूपं गौरवमिति ध्वनितम्।

ननु व्यापारमात्रस्य धात्वर्थत्वेऽपि प्रत्यया (द्वितीयादि) र्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्य प्रत्ययार्थफलाश्रयत्वरूपाकर्मकत्वस्य चाश्रयणे दोषाभावः, 'घटं भावयति' इत्यादौ फलस्यान्वयव्यतिरे-

दर्पणव्याख्या

तत्र लौकिकं दृष्टान्तमाह—❀ नहीत्यादि ❀ भाक्तराजपदव्यवहार्य्येण पुरोहितादिना तदीयकार्यप्रवर्त्तनान्महद्भूतश्चन्द्रमा इत्यादावात्ववारणायाऽऽश्रितगौणमुख्यन्यायस्य विशिष्यार्थोपस्थापकविशिष्टरूपोपादानपुरस्सरपदकार्यविषयकत्वस्याऽन्यत्र व्यवस्थापनाच्च नाऽत्र तद्विषयतेत्यन्ये।

परेत्वेतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वमेव सकर्मकत्वम्, सकर्मकपदात् कर्मणा सहेत्यर्थकाच्छब्दमर्यादया पूर्वोक्तार्थालाभाच्च 'लः कर्मणि' इत्यादौ सकर्मकपदाद् बोधाऽनापत्तेः। तदनन्वय्यर्थकत्वमकर्मकत्वम्। अत एवाऽध्यासिता भूमय इत्यादौ कर्मणि क्तोपपत्तिः। अन्वयस्य पृथगुपस्थितसंसर्गरूपतया न जीवत्यादिषु दोष इत्याहुः।

अयमेव पक्षः फलावच्छिन्नव्यापारबोधकत्वं सकर्मकत्वमिति वदद्भिराश्रितः, फलस्य कर्मतायाः सर्वैरेवोपगमात्, फलाऽन्वय्यर्थकत्वस्य सकर्मकेषु सत्त्वात्। यदि चैकोपस्थितिविषयत्वान्नोक्तः प्रकारः सम्भवतीति विभाव्यते तदा पृथक्शक्तिवादिमते निर्दुष्टत्वमेव, अवच्छिन्नपदस्य सम्बन्धपरत्वेन कर्मीभूतफलसम्बन्धिव्यापाराऽर्थकत्वस्य सुस्थत्वात्। अकर्मकाणां फलार्थत्वाऽनङ्गीकारेणाऽतिव्याप्त्यव्याप्त्योरनवकाशादित्यवधेयम्। 'अध्यासिता भूमयः' इत्यादौ यथोक्तोपपत्तिस्तथोपपादितं प्राक् ॥ ५ ॥

फलस्य वाच्यत्वे युक्त्यन्तरमाह—अत इत्यादि। यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः 'कर्मवत् स्यात्'इतिपदेन 'कर्म्मवत् कर्म्मणा तुल्यक्रियः' (पा० सू० ३।१।८७) इति सूत्रं लक्ष्यते। अयमर्थः—यत एवास्योत्पादनार्थकता, अतः पच्यते ओदनः स्वयमेवेतिवत्, क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्म्मनिष्ठत्वाभावात् तन्न स्यात्, दृशिवत्। यथा दृश्यते घटः स्वयमेवेति न,

प्रभा

काभ्यां कर्मप्रत्ययस्य बहुत्वेनानुपूर्वीरूपशक्तताऽवच्छेदके गौरवेण, प्रत्ययार्थत्वे मानाभावेन च णिच्प्रकृतिधातुवाच्यत्वे सिद्धे घटे कर्मत्वस्य भाविधातौ सकर्मकत्वस्य चाव्याप्त्यापत्तेः, पचतीत्यादौ द्वितीयादिकं विनाऽपि सर्वानुभवसिद्धस्य फलविषयकबोधस्यापलापापत्तेश्च।

ननु मुख्यामुख्यसाधारणकर्मत्वान्वितव्यापारवाचकत्वमेव सकर्मकत्वम्। कर्मत्वञ्च—सङ्केतसम्बन्धेन कर्मपदवत्त्वमेवेति नाननुगमः। 'कर्मवत्कर्मणा' इति सूत्रबलात् 'गौणमुख्य'न्यायस्य 'कारके'इत्यधिकारेऽप्रवृत्त्या गौणकर्तृत्ववद् गौणकर्मत्वस्यापि ग्रहणे द्वितीयादिसिद्धावपि 'लः कर्मणि' इत्यादौ 'गौणमुख्य'न्यायाप्रवृत्तौ मानाभावेन 'ज्ञायते घटः' 'क्रियते घटः' इत्याद्यसिद्धिरिति चेन्न, कर्मणि लकारादिविधायके स्वरितत्वप्रतिज्ञाकरणेन 'स्वरितेन अधिकः कारः' इत्यर्थकेन 'स्वरितेनाधिकारः' इति सूत्रबलेन गौणकर्मत्वस्यापि ग्रहणेनादोषात्। सङ्केतसम्बन्धेन कर्मपदवदर्थान्वितार्थकत्वरूपसकर्मकत्वस्य ग्रहणादेव 'अध्यासिता भूमयः' इत्यादीनां सिद्धिः। अन्यथा स्वार्थफलव्यधिकरणव्यापारवाचकस्य सकर्मकत्वे तत्सिद्ध्यनापत्तिरित्यत आह—युक्त्यन्तरमाहेति।

अतः=फलव्यापारोभयार्थत्वात्। कर्मवत्—कर्मणि इवेत्यर्थे सप्तम्यन्ताद्वतिः। कर्मणि प्रत्यये यथा यगादिर्भवति तथा कर्मकर्तर्य्यपि यगादिः स्यादित्यर्थः। यद्वा, 'कर्मवत्' इति 'कर्मवत्कर्मणा तुल्यक्रियः' इति सूत्रैकदेशानुकरणम्। तच्च 'कर्मवत्कर्मणा' इति सूत्रविहिते लाक्षणिकम्, सूत्रे लक्षणायामप्यनन्वयापत्तेः। तथाच मूले 'सूत्रं लक्ष्यते' इत्यस्य सूत्रविहितं लक्ष्यते इत्यर्थः। तस्य यगादिन्यन्वयः। अन्यथा=व्यापारमात्रार्थत्वे। तत्=यगादि। न स्यादिति—कर्मस्थक्रियया=फलरूपया, फलसमानाधिकरणव्यापाररूपया वा तुल्या क्रियोक्तरूपा यत्र तादृशः लकारवाच्यः कर्ता कर्मवदित्यर्थकस्य 'कर्मवत्कर्मणा' इत्यस्य कृञो व्यापारमात्रवाचकत्वेऽप्राप्तेर्धात्वर्थयत्नस्य घटाद्यसमवेतत्वाच्च। 'कर्मवत्कर्मणा' इत्यत्र 'कर्मणा'पदम् 'मञ्चाः क्रोशन्ति' इतिवत् कर्मस्थक्रियायां लाक्षणिकम्, क्रियायां क्रियाप्रतियोगिकतुल्यत्वस्यैवोचितत्वात्। सादृश्यनियामको धर्मश्च—स्वसजातीयान्यूनानतिरिक्तत्वरूपः। नच 'घटं जानाति' इत्यत्र विषयतया घटस्य ज्ञानाश्रयत्ववद् यत्नस्यापि विषयतया सत्त्वात् 'क्रियते घटः स्वयमेव' इत्युपपन्नमेवेति वाच्यम्, उक्तरीत्या 'दृश्यते घटः स्वयमेव' इत्यादेरप्यापत्तेरित्याशयेनाह—दृश्यते घटः स्वयमेवेति। नचेष्टापत्तिः, कर्मस्थभावकानां कर्मस्थक्रियाणाञ्च कर्मवद्भावः' इति भाष्यविरोधात्। नचैवं 'घटं यतते' इत्यपि स्यात्, विषयताया 'यत्'धात्वर्थफलाश्रयतानवच्छेदकतया तदनापत्तेः, समवायस्यैव तत्र फलतावच्छेदकतायाः शिष्टप्रयोगानुसारेण कल्पनात्।

दर्पणव्याख्या

ननु 'कर्मवत् स्याद् यगाद्यपि' इति मूलस्य कर्मवद् यगाद्यपि भवेदित्यर्थो लभ्यते। स च बाधितोऽविवक्षितश्चेत्यत आह—❀ कर्मवत्स्यादिति पदेनेति ❀। ❀ सूत्रं लक्ष्यते इति ❀। सूत्रविहितं लक्ष्यते इत्यर्थः। यथाश्रुते कर्मपदात् स्वघटितत्वेन लक्षणया सूत्रोपस्थितावपि तस्य यगादिकमित्यनेनाऽनन्वयापत्तेः। एतद्बोधनायैव स्यादिति लक्ष्यकोटावुपात्तमिति।

SGDF Sri Gargeshwari Digital Foundation

दर्शनस्य घटावृत्तित्वात्, तथा यत्नस्यापि, इति तथा प्रयोगानापत्तेरिति ॥ ६ ॥

नन्वेवं कृञादेरिव जानातीत्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचित्वमावश्यकम्, अन्यथा सकर्म्मकतानापत्तेः ।

प्रभा

ननु यत्धात्वादौ विषयतायाः फलताऽनवच्छेदकत्वे समवायस्यैव फलताऽवच्छेदकत्वं वाच्यमिति तेन सम्बन्धेन फलाश्रयत्वात् कर्तुः कर्मत्वापत्तिः, कर्तृसंज्ञया बाधेन तदनापत्तेः । यत्तु—विषयतया घटवृत्तित्वेऽपि समवायेन कर्तृवृत्तितया न कर्ममात्रवृत्तिक्रियकत्वरूपकर्मस्थक्रियकत्वमिति तन्न, 'दृश्यते घटः' इतिवत् 'क्रियते घटः' इत्यस्याप्यसङ्गत्यापत्तेः । मन्मते तु लक्ष्यानुरोधात् समवाय-विषयत्वोभयोरपि दृश्धात्वर्थफलतावच्छेदकत्वस्वीकारेण फलतावच्छेदकसम्बन्धेन कर्ममात्रवृत्तिक्रियकत्वाभावान्न दृश्यत्धात्वादौ क्षतिः ।

अयम्भावः—प्राचीननैयायिकमते विषयत्वस्य फलत्वेन यथा 'क्रियते घटः' इत्यत्र विषयत्वरूपफलस्य घटादिरूपकर्ममात्रवृत्तित्वात् कर्मस्थक्रियकत्वेन कर्मवद्भावस्तथा यत्—दृशिधात्वादावपि तत्त्वस्य सत्त्वेन 'यत्यते घटः स्वयमेव' 'दृश्यते घटः स्वयमेव' इति स्यात् । यदि तयोः कर्मस्थक्रियकत्वं त्वन्मते नास्ति तदा कृञोऽपि तन्न स्यादिति । वैयाकरणनये तु उत्पत्तेः=फलस्य, यत्नरूपव्यापारस्य च कृञर्थत्वादुत्पत्तिरूपफलस्य घटादिमात्रवृत्तित्वात् कर्मवद्भाव इति । एवमिति—स्वार्थफलव्यधिकरणव्यापारवाचकत्वस्यैव सकर्मकत्वे इत्यर्थः ।

विषयावच्छिन्नेति—अयम्भावः—ज्ञानार्थकधातूनां सकर्मकत्वसिद्धये फलव्यापारोभयार्थकत्वं वक्तव्यम् । तत्र फलम्=आवरणभङ्गरूपं धातुवाच्यम्। घटादिप्रत्यक्षस्थलेऽन्तःकरणं चक्षुरादिद्वारा घटादिरूपविषयदेशे गत्वा विषयाकारेण परिणमति । विषयाकारपरिणाम एवान्तःकरणस्य वृत्तिरित्युच्यते। तया वृत्त्या चावरणभङ्गो जायते । आवरणन्नाम—आध्यासिकतादात्म्यसम्बन्धेन विषयघटाद्यवच्छिन्नं यच्चैतन्यं तस्यावरक (नास्ति न प्रकाशते इति व्यवहारयोग्यत्वम्=आच्छादकमिति यावत्) मज्ञानं तन्निष्ठा या आवरकशक्तिः सैवावरणमित्युच्यते । तस्यावरणस्योक्तरूपया ज्ञानपदव्यवहर्त्तव्यया वृत्त्या भङ्गो (नाशो) जायते स एवावरणभङ्गः फलम्, ज्ञानञ्च व्यापारः । एतदाशयेनाह—विषयावच्छिन्नावरणभङ्गादिफलेति । आदिना वृत्तौ चैतन्यसम्बन्धस्य परिग्रहः । ज्ञानस्य चैतन्यसम्बन्धरूपत्वे, चैतन्यरूपत्वे वा आवरणभङ्गस्य फलत्वासम्भवः, धात्वर्थफले व्यापारजन्यत्वस्य, प्रयोज्यत्वस्य वा आवश्यकतया आवरणभङ्गे तदुभयोरप्यसम्भवात् । जन्यत्वप्रकारकप्रतीतिविषयत्वस्यैव फलत्वेऽपि तादृशप्रतीतेरपि तत्राभावेन फलत्वासम्भव एव । अतो ज्ञानमेव फलम्, व्यापारश्चात्ममनःसंयोगरूपो वृत्तिरूपो वा बोध्यः । ज्ञानस्य चैतन्यरूपत्वे अभिव्यक्तिगतजन्यत्वारोपेण जन्यत्वप्रकारकप्रतीतिविषयत्वं सूपपादम् । अत एव 'जानाति' 'इच्छति' इत्यादौ ज्ञानानुकूलव्यापारः, इच्छानुकूलो व्यापार इति बोधो वैयाकरणनिकाये प्रसिद्ध उपपद्यते इति पञ्चोलिनः ।

दर्पणव्याख्या

❀ घटावृत्तित्वादिति ❀ घटमात्रवृत्तित्वाऽभावेन कर्मस्थक्रियकत्वाभावादिति तु परमार्थः ॥ ६ ॥

❀ एवमिति ❀ कर्मवद्भावानुरोधेन करणाऽर्थकरोतेरुत्पत्तिसहितयत्नाऽर्थकत्वाऽभ्युपगमे इत्यर्थः । जानात्यादेरपीत्यादिपदाद् गम्यादिपरिग्रहः ॥ आवरणभङ्गादीत्यादिपदेन तु संयोगादेः सः । आवश्यकमित्यनेन तत्र ज्ञानस्यैव फलत्वाऽङ्गीकारे तदनाश्रयत्वाद् घटादेः कर्मत्वानुपपत्तिरपि सूच्यते । आवरणभङ्गस्याऽप्यतीतादौ यथा फलत्वं तथा सारे एव सुबर्थनिर्णये वक्ष्यते । ❀ सकर्मकताऽनापत्तेरिति ❀ स्वार्थफलव्यधिकरणेत्याद्युक्तरूपस्य तत्राऽसम्भवादिति भावः ।

तथाच ज्ञायते घटः स्वयमेवेति किन्न स्यात् ।

प्रभा

विषयावच्छिन्नत्वविशेषणं स्वरूपकीर्तनपरम्, आवरणभङ्गमात्रं धात्वर्थः । उत्पत्तिरूपफलस्य कर्ममात्रनिष्ठत्वेन कर्मस्थक्रियत्वे चेत्यर्थः । अत्रेदं बोध्यम्—आवरणभङ्गस्य, विषयताया वा फलत्वे ज्ञाधात्वादीनां कर्मस्थक्रियकत्वापत्तिः । तदुक्तं हरिणा—

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥

इति । यत्र कर्मणि धात्वर्थक्रियाकृतविशेषदर्शनं तत्र कर्मस्थक्रियकत्वम् । यत्र कर्तरि क्रियाकृतविशेषदर्शनं तत्र कर्तृस्थक्रियकत्वमिति पूर्वार्धस्याशयः ।

नन्वेवं पच्यादिकर्तर्य्यपि श्रमादिरूपविशेषस्य दर्शनात् पच्यादीनामपि कर्मस्थक्रियकत्वानुपपत्तिः, चिन्तयति-पश्यतीत्यादीनां कर्तृस्थभावकत्वानुपपत्तिश्च कर्तरि क्रियाकृतविशेषाभावादतो मतान्तरमाह—क्रियाव्यवस्थेति—अन्येषां मते क्रियाव्यवस्था शब्दैरेव प्रकाश्यते ।

अयम्भावः—येऽपि कर्मस्थभावकाः पच्यादयः तत्रापि श्रमादिविशेषः कर्तर्य्यपि दृश्यते । तथाच 'विशेषदर्शनं यत्र' इति लक्षणेन नास्ति निर्वाहः । तस्माद् यत्र शब्दैरेव विशेषः प्रतिपाद्यते तत्रैव क्रिया स्थिता । तद्यथा—'घटं पश्यति' इत्यादौ शब्दः किञ्चिद् विशेषविशिष्टं दृशिक्रियाविषयं घटादिकं नाभिधत्ते इति शब्दवशेन कर्तृस्थभावकत्वात् 'दृश्यते घटः स्वयमेव' इति न भवति । 'काष्ठं भिनत्ति' इत्यादौ भिदिक्रियाविषयं काष्ठादिकं किञ्चिद् विशेषविशिष्टमभिधत्ते इति तद्वशेन कर्मस्थभावकत्वात् 'भिद्यते काष्ठं स्वयमेव' इति भवति ।

मञ्जूषाकारास्तु—उत्तरार्धमन्यथा व्याचख्युः । तथाहि—यत्र कर्तृकर्मसाधारणधर्मरूपं फलं शब्देन प्रतिपाद्यते स कर्तृस्थभावकः, यथा—'पश्यति घटम्' 'ग्रामं गच्छति' 'हसति' इत्यादौ । तत्र विषयतासमवायाभ्यां ज्ञानमुभयनिष्ठं संयोगश्चोभयनिष्ठः, एवं हासोऽपि । नच विषयताऽऽवरणभङ्गावेवम् । यत्र तु कर्त्रवृत्तिधर्मरूपं फलं सः कर्मस्थभावकः । यथा—'भिनत्ति' इत्यादौ । नहि द्विधाभवनादि कथमपि कर्तृनिष्ठं प्रतीयन्तीति हेलाराजः ।

अत एव कर्मवत्सूत्रे भाष्ये उक्तम्—'नच कर्तृस्थभावकानां कर्मणि क्रियायाः प्रवृत्तिरस्ति' इति । तेषां धातूनां वाच्यायाः फलरूपक्रियायाः कर्ममात्रे प्रवृत्तिर्नास्तीत्यर्थ इत्याहुः । ज्ञायते घट इति—अत्रेदमाकूतम्—यद् गमि-जानात्योः फलव्यापारोभयार्थकत्वं प्रसाध्य तत्र ज्ञायते घटः' स्वयमेवेत्याद्यापत्तिः प्रदर्शिता । सा

'विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता'

इति हर्युक्तप्रथमकल्पाभिप्रायेण बोद्धव्या । 'शब्दैरेव प्रकल्पिता' इति द्वितीयपक्षे तु गमि-जानात्योः केवलव्यापारार्थकत्वेऽपि शब्दतः कर्मणि क्रियाकृतविशेषादर्शनेन कर्तृस्थक्रियकत्वात् कर्मवद्भावो न सम्भवति । सकर्मकत्वोपपत्तये तु ज्ञानानुकूलव्यापारार्थकत्वाद्यभ्युपेयम् । धातुवाच्या फलरूपा क्रिया यत्र कर्ममात्रनिष्ठा तस्य कर्मस्थक्रियकत्वमिति मते तु धातूनां फलवाचकत्वमावश्यकम्, फलवाचकत्वाभावे कर्मस्थक्रियकत्वानापत्तेः । एवञ्च सिद्धान्तभूतकर्मस्थक्रियकत्वपक्षे उक्तस्थले कर्मवद्भावाप्राप्त्या 'कर्मवत्कर्मणा' इत्यस्य यथाश्रुतकर्मसंज्ञकार्थक्रियातुल्यक्रियः कर्ता कर्मवदित्यर्थाभिप्रायेणाऽऽशङ्का । प्राप्यकर्मत्वप्रदर्शनेन करिष्यमाणमुत्तरमपि प्राचीनमताभिप्रायेणैवेत्याह—

SGDF Sri Gargeshwari Digital Foundation

एवं ग्रामो गम्यते स्वयमेवेत्याद्यपीत्याशङ्कां मनसि कृत्वाह—

निर्वर्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते ।
न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽत्र व्यवस्थितः ॥ ७ ॥

ईप्सितं कर्म्म त्रिविधम्—निर्वर्त्यम्, विकार्य्यम्, प्राप्यञ्च । तत्राद्ययोः कर्म्मवद्भावः,

प्रभा

मनसि कृत्वेति । लिखितपुस्तके मनसिकृत्येति पाठः । तत्र 'मनसि' इति विभक्त्यन्तप्रतिरूपकमव्ययम् । 'उरसिमनसी अनत्याधाने' इति गतित्वाद् गतिसमासे ल्यप्, अभ्युपगम्येत्यर्थः । परीक्षाकृताऽपि एतदुक्तम् । तथाच यथा शङ्का तथैव उत्तरमिति ध्वनितम् । सिद्धान्तोऽत्रेति—'सिद्धान्तो हि व्यवस्थितः' इति लिखितपुस्तके पाठः । 'हि' इत्यस्य 'यतः' इत्यर्थकत्वेन कारणप्रदर्शकतयाऽयमेव पाठो युक्तः ।

त्रिविधमिति—त्रित्वञ्चात्रोपाधिगतम्, निर्वर्त्यादिप्रत्येककर्मण एव बहुत्वात् त्रित्वासङ्गतेः । आद्ययोः = निर्वर्त्य-विकार्ययोः । 'तुल्यक्रियः कर्ता' इत्युक्तौ केन तुल्यक्रियत्वमित्याकाङ्क्षायाम् 'कर्मवत्कर्मणा' इति सूत्रे 'धातोरेकाचः' इति सूत्राद् धातोरित्यस्यानुवर्तनाद् धातुवाच्यक्रियया सूत्रघटक 'कर्मवत्' इत्यनेन कर्मकारकस्योपस्थित्या च कर्मस्थया धातुवाच्यक्रियया तुल्यक्रिय इत्यर्थलाभेन करणाधिकरणस्थतुल्यक्रियत्वे कर्मवद्भावाप्राप्त्या सूत्रे 'कर्मणा' इति ग्रहणं व्यर्थं सद् दृश्यमानो यः कर्मनिष्ठो विशेषो धात्वर्थफलोत्पत्तेः प्राग् यादृशं स्वरूपं कर्मणस्तद्विलक्षणं यद् धातुवाच्यफलकृतं स्वरूपं तद्रूपो यो विशेषस्तत्प्रयोजिका या फलादिरूपा कर्मस्था क्रिया तां लक्षयति ।

दर्पणव्याख्या

वस्तुतस्तु जानातेर्ज्ञानरूपफलाऽर्थकत्वमेव युक्तम् । 'नच कर्तृस्थभावकानां कर्मणि क्रियायाः प्रवृत्तिरस्ति' इति भाष्येण कर्तृस्थभावकानां क्रियाफलस्य कर्ममात्रे वृत्तिर्नास्तीत्यर्थकेन कर्तृकर्मोभयसाधारणफलार्थकत्वं कर्तृस्थक्रियकत्वं वदतां कर्ममात्रवृत्तिफलार्थकत्वरूपकर्मस्थक्रियकत्वस्यैवाऽभ्युपगमेन तत्राऽऽवरणभङ्गस्य फलत्वे तत्पक्षे कर्मवद्भावस्य दुर्निवार्यतापत्तेः । आदृतश्चायमेव पक्षो जानातीत्यादौ ज्ञानेच्छाद्यनुकूलो व्यापार इति शाब्दबोधप्रकारं दर्शयता ग्रन्थकृताऽपि । प्रकृते आशङ्कासमाधाने तु भाष्यहर्य्याद्युक्तप्रथमकल्पाऽभिप्रायेणेति सारे एव स्फुटम् ।

नचोक्तकल्पे ज्ञानस्य समवायेन घटादावसत्त्वात्तेषां जानातिकर्मत्वानुपपत्तिः, ज्ञानस्य तदनुकूलव्यापारस्याश्रयतादेश्च सामानाधिकरण्यादकर्मकत्वापत्तिः, कर्तृस्थभावकत्वानुपपत्तिश्चेति वाच्यम्, शास्त्रे ज्ञानम्, घटे ज्ञानमिति प्रतीत्या विषयतया तस्य ज्ञानाश्रयताभ्युपगमेनाद्यदोषस्य फलताऽऽवच्छेदकसम्बन्धघटितसामानाधिकरण्यघटिताऽकर्मत्वस्य तत्राऽभावेन द्वितीयस्य विषयता-समवायाभ्यां कर्मकर्त्रुभयवृत्तित्वेनाऽन्त्यदोषस्य वाभावात् । अधिकमग्रे वक्ष्यते ।

प्रकृतमनुसरामः । ❀ किन्न स्यादिति ❀ क्रियते घटः स्वयमेवेत्यत्र घटस्योत्पत्तिरूपफलाश्रयत्ववदावरणभङ्गरूपफलाश्रयत्वस्यापि सत्त्वादिति भावः । ननु निर्वर्त्य-विकार्यकर्मणोः कर्मवद्भावो न प्राप्यकर्मणीत्यत्र किं मानमत आह मूले—❀ सिद्धान्तोऽत्रेति ❀ अत्र "कर्मवत् कर्मणा तुल्यक्रियः" (पा० सू० ३।१।८७) । इति सूत्रभाष्ये । तत्र हि धातोरेकाच इति सूत्रादनुवर्त्तमानधातुग्रहणेन धातुवाच्यक्रियया इत्यर्थलाभेन 'साध्वसि श्छिनत्ति' 'स्थाली पचति' इत्यादौ करणाधिकरणाभ्यां तुल्यक्रिये कर्त्तरि वस्तुतः सतोऽपि व्यापारस्य धातुवाच्यत्वाऽभावादेवाऽनतिप्रसङ्गे कर्मग्रहणमतिरिच्यमानं कर्मस्थक्रियां लक्षयतीति सिद्धान्तो व्यवस्थित इत्यर्थः । कर्मस्थक्रियकत्वं च प्राप्यभिन्नकर्मण्येव सम्भवतीति दर्शयितुमादौ वक्ष्यमाणमपि विभागं सुखबोधायाऽऽह—❀ ईप्सितङ्कर्मेति ❀ यद्यपि द्वेष्याऽऽद्यनीप्सितस्याऽप्येष्वेवान्तर्भावात् कर्म त्रिविधमित्येवं वक्तुं

नान्त्ये, प्राप्यत्वञ्च—क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। नह्ययं घटः केनचिद् दृष्टो ग्रामोऽयं केनचिद् गत इति शक्यं कर्म्मदर्शनेनाऽवगन्तुम्।

प्रभा

एतेन यत्र नगरादौ राजागमनप्रयोज्यपताकाद्यलङ्करणदर्शनेन गम्धात्वर्थाऽगमनस्य ज्ञातुं शक्यतया गम्यादीनामपि कर्मस्थक्रियकत्वापत्तिरित्यपास्तम्, तद्वैलक्षण्यस्य गम्धात्वर्थसंयोगरूपफलाप्रयोज्यत्वात्। एवञ्च 'कर्मणा'पदसामर्थ्यादुक्तकर्मस्थक्रियकाणां धातूनामेव कर्ता कर्मवन्नान्येषामित्याह—

नान्त्य इति—प्राप्ये कर्मस्थक्रियया तुल्यक्रियः कर्ता कर्मवन्नेत्यर्थः। राजदर्शनग्रामगमनादौ कर्तर्य्येव हर्षश्रमादिरूपविशेषस्य दर्शनात् तत्र 'कर्तृस्था क्रिया' इत्येव व्यवहारः। **वक्ष्यत इति**—यद्यपि हरिणा सप्तविधं कर्म उक्तम्, तथाऽपि ईप्सितस्य कर्मणस्त्रैविध्यमेवोक्तमिति कर्मवद्भावे तस्यैवोपकारकतया अनीप्सितं कर्म चतुर्विधं सुबर्थनिर्णये वक्ष्यत इत्युक्तमित्यर्थः। तथाच कर्मगतो यो विशेषस्तद्व्यवहारप्रयोजकव्यापारार्थको यो धातुस्तत्कर्मणः कर्तृत्वविवक्षायां कर्मवद्भाव इति सिद्धम्। तदाह—**न ह्ययं घट इति**।

अवगन्तुमिति—यथा पाकादिना तण्डुलादौ विशेषो भवति नैवं गमनादिना ग्रामादाविति विशेषाभावात् कर्मदर्शनेन कर्तृव्यापारोऽनुमातुमशक्य एवेति भावः। तथाच **'क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता'** इति भाष्यकारीयसिद्धान्तेन फलताऽवच्छेदकसम्बन्धेन व्यापारनिष्ठजनकतानिरूपितफलनिष्ठजन्यतावच्छेदकसम्बन्धेन वा यत्र कर्तृकर्मोभयनिष्ठं धातुवाच्यं फलं तत्र कर्तृस्थक्रियत्वम्। यथा—'पश्यति घटम्' इत्यत्र ज्ञानरूपं फलं फलताऽवच्छेदकसम्बन्धेन विषयत्वरूपेण घटे, ज्ञानरूपफलस्य जन्यताऽवच्छेदकसम्बन्धश्च समवायस्तेन ज्ञानरूपं फलं कर्तरि तिष्ठति इति फलताऽवच्छेदकसम्बन्धेन कर्मणि फलजन्यताऽवच्छेदकसम्बन्धेन कर्तरीत्युभयवृत्तितया कर्तृस्थक्रियत्वं जानातेः। 'तण्डुलं पचति' इत्यत्र विक्लित्तेः पूर्वरूपध्वंसपूर्वकरूपान्तरोत्पत्तिरूपत्वे उत्पत्तेराद्यक्षणसम्बन्धरूपतया तस्याः स्वरूपसम्बन्धः फलतावच्छेदकः फलजन्यतावच्छेदकश्चेति तेन सम्बन्धेन कर्ममात्रवृत्तित्वात् कर्मस्थक्रियत्वम्। विक्लित्तेरवयवशैथिल्य-काठिन्यादिरूपत्वे च समवायसम्बन्ध एव फलताऽवच्छेदकस्तज्जन्यताऽवच्छेदकश्चेति तेनापि कर्ममात्रवृत्तित्वमेव फलस्येति कर्मस्थक्रियत्वमेवेति कर्मवद्भावः सिद्ध्यति। नच स्वरूप-समवाययोः फलजन्यताऽवच्छेदकत्वे धात्वर्थव्यापारेण सह कार्यकारणभावानुपपत्तिः, व्यापारस्य व्यापारताऽवच्छेदकसमवायादिसम्बन्धेन कर्तृवृत्तितया व्यधिकरणत्वात् कार्यताऽवच्छेदक-कारणतावच्छेदकसम्बन्धेन कार्य-कारणयोः सामानाधिकरण्यस्यैव कार्यकारणभावनियामकत्वादिति वाच्यम्, स्व (व्यापार) जन्यरूपादिध्वंसवत्त्वस्यैव कारणताऽवच्छेदकत्वस्वीकारेण तेन सम्बन्धेन-व्यापारस्यापि तण्डुलादिवृत्तित्वात्।

नचैवमपि जन्यत्वस्य सम्बन्धनियततया व्यापाररूपध्वंसयोर्व्यधिकरणत्वेनोक्तसम्बन्धासिद्धिः, स्वसमानाधिकरणेच्छोद्देश्यत्वस्यैव कारणतावच्छेदकत्वेनादोषात्।

नचैवं फलसमानाधिकरणव्यापारवाचकतया पच्यादेरकर्मकत्वापत्तिः, फलताऽवच्छेदकसम्बन्धेन

दर्पणव्याख्या

युक्तम्। तथापि हरिणा—

"तयोरेभ्यस्त्रिधा मतम्। तच्चेप्सिततमम्"—

इत्यादिना पार्थक्येन विभजनात् तदनुसृत्याऽत्रापि तथैवोक्तमिति ध्येयम्। ❀ प्राप्यत्वञ्चेति ❀ आद्ययोर्लक्षणे तु सुबर्थनिर्णये वक्ष्येते। ❀ वक्ष्यत इति ❀ क्रियाकृतविशेषाणामिति कारिकयेत्यर्थः। कर्मगतविशेषाधायकक्रियार्थकत्वं कर्मस्थक्रियकत्वं कर्मवद्भावप्रयोजकमिति दर्शयितुं तदन्वयव्यतिरेकौ दर्शयति—नहीत्यादि

SGDF Sri Gargeshwari Digital Foundation

घटं करोतीति निर्वर्त्ये, सोमं सुनोतीति विकार्य्ये च तज्ज्ञातुं शक्यमिति न तत् प्राप्यम्। तथा-च घटादेर्दृश्यादौ प्राप्यकर्म्मत्वान्नोक्तातिप्रसङ्ग इति भावः।

प्रभा

फलानधिकरणनिरूपितव्यापारताऽवच्छेदकसम्बन्धावच्छिन्नाधेयतावच्छिन्नाधेयतावद्व्यापारवाचकत्वस्यैव सकर्मकत्वलक्षणत्वात्। व्यापारतावच्छेदकसम्बन्धश्च—न फलनिष्ठजन्यतानिरूपितव्यापारनिष्ठजनकतावच्छेदकः, किन्तु फलतावच्छेदकवत् समवायादिसम्बन्ध एव। तेन सम्बन्धेन फलवैयधिकरण्यं व्यापारेऽक्षतमेव सकर्मकेषु। नचैवमपि गमेरकर्मकत्वापत्तिर्दुर्वारैवेति वाच्यम्, व्यापारताऽवच्छेदकसम्बन्धेन व्यापारानधिकरणनिरूपितफलतावच्छेदकसम्बन्धावच्छिन्नाधेयतावत्फलवाचकत्वस्यैव सकर्मकत्वात्। तथाच—व्यापारतावच्छेदकसमवायसम्बन्धेन व्यापारानधिकरणग्रामादिनिरूपितफलतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयतावत् संयोगरूपफलवाचकतया गमेः सकर्मकत्वं सुलभम्। फूत्कारादिव्यापारस्यात्मनोऽनधिकरणत्वे तु स्वा (फूत्कारादि) श्रयनिष्ठावच्छेदकतानिरूपितावच्छेद्यतासमानाधिकरणेच्छीयोद्देश्यताश्रयत्वसम्बन्धः कारणतावच्छेदको बोध्यः। यत्ने फलजनकता तु स्वसमानाधिकरणेच्छीयोद्देश्यताश्रयत्वरूपपूर्वोक्तसम्बन्धावच्छिन्नैव ग्राह्या। तत्रेच्छा कर्तृनिष्ठप्रधानीभूतप्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारिकैव ग्राह्या। फलतावच्छेदको व्यापारतावच्छेदकसम्बन्धश्च तत्र तत्र भिन्न एवेति स्वयमूहनीयः। फलतावच्छेदकसम्बन्धस्यानुगतस्वरूपन्तु सुबर्थनिर्णये वक्ष्यते।

निर्वर्त्य इति—'सुवर्णं कुण्डलं करोति' इत्यत्र कुण्डलं निर्वर्त्यं कर्म, सुवर्णं विकार्यम्। प्रकृतिपरिणामश्च विकृतिरिति मते कुण्डलं विकार्यमेव। तदुक्तं हरिणा—

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्ष्यते॥' इति।

यस्य घटादेः सती प्रकृतिर्मृदादिः। अविद्यमाना प्रकृतिः शब्दे संयोगादिरिति वादिनाऽभिन्नत्वेन नाश्रीयते तस्य निर्वर्त्यं कर्म कुण्डलम्। अभेदेन परिणामं वदतां तु विकार्यमिति तदर्थः।

दर्पणव्याख्या

❀ सोमं सुनोतीति विकार्य्य इति ❀। नन्वाद्ययोः कर्मस्थक्रियकत्वेन कर्मवद्भावविषयत्वेऽपि तत्र कथं सोमं सुनोतीत्यस्य विकार्य्यलक्षणाक्रान्तत्वम्, प्रकृतेः सोमस्य परिणामित्वाऽनवगमात्। तदुक्तम्, 'प्रकृतेस्तु विवक्षायां विकार्य्यम्' इति विवक्षायामित्यस्य परिणामित्वेनेत्यादिरिति चेदित्थं चूर्णीकरणरूपाऽभिषवैकदेशचूर्णं प्रति प्रकृतिसोमस्य परिणामित्वविवक्षया तदुपपत्तिः।

अन्ये तु—क्रिया यद्धर्मनाशकं फलं जनयति तद्विकार्य्यमिति लक्षणाऽभिप्रायेण सोमे विकार्य्यनिर्देशः। तथाहि—आरम्भकसंयोगनाशकविभागानुकूला क्रिया सुनोतेरर्थः। सोमपदं च प्रकृते तदवयवे लाक्षणिकम्। तथाच सोमावयवरूपसोमपदाऽर्थवृत्त्यारम्भकसंयोगस्य धात्वर्थक्रियाजन्यविभागेन नाशाद्विकार्य्यत्वोपपत्तिरित्याहुः।

❀ ज्ञातुं शक्यमिति ❀ एतेन क्रियाकृतविशेषधर्मप्रकारकप्रतीतियोग्यत्वं कर्मवद्भावप्रयोजकमित्युक्तं भवति। प्राचीननैयायिकमते तु प्रकृते कृञ उत्पत्तिरूपफलावच्छिन्ने यत्ने लक्षणया कर्मवद्भावोपपत्तिः। ❀ नोक्तातिप्रसङ्ग इति ❀ न कर्मवद्भावापत्तिरित्यर्थः।

प्राचीननैयायिकमते तु ज्ञानं करोतीत्याद्यप्रयोगात् साध्यत्वे फले यत्ने च कृञः शक्तिरेव। तथाच घटादौ साध्यत्वरूपविशेषधर्मप्रकारकप्रतीतेः सार्वजनीनत्वात्, तादृशप्रतीतियोग्यतायास्तत्राऽनपायादनायासेनैव कर्मवद्भावोपपत्तिः। यदि च कर्तृगतविशेषाऽऽधायकक्रियार्थकत्वं तत्स्थक्रियकत्वमिति लक्षणे पच्यादिकर्त्तरि श्रमरूपविशेषदर्शनाज्जानात्यादिकर्त्तरि

SGDF

धातूनां फलवाचकत्वे त्यजिगम्योः पर्य्यायतापत्तिः, क्रियावाचकत्वाविशेषात् । फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति । तस्मादावश्यकं सकर्म्मकाणां फलवाचकत्वम् ।

प्रभा

नव्यनैयायिकरीत्या फलस्य धातुवाच्यत्वं साधयितुमाह—धातूनामिति—बहुवचनेन सर्वेषामेव धातूनां पर्यायतापत्तिः सूचिता । सा च धातुवाच्यव्यापारनिष्ठशक्यताया व्यापारत्वस्यावच्छेदकत्व एव । यदि तु व्यापारत्वव्याप्यफूत्कारत्वादीनामेव शक्यताऽवच्छेदकत्वं तदा धात्वन्तरस्य पर्यायत्वाभावेऽपि त्यजिगम्यादीनां विभाग-संयोगजनकक्रियावाचकतया पर्यायापत्त्या ग्रामं गच्छतीत्यर्थे ग्रामं त्यजतीति प्रयोगापत्तिर्दुर्वारैव ।

अविशेषादिति—एकधर्मावच्छिन्नाया एव क्रियायाः संयोग-विभागजनकत्वादिति भावः ।

ननु विभागोपलक्षिते व्यापारे त्यजतेस्संयोगोपलक्षिते गच्छतेः शक्तिस्वीकारेणोक्तदोषाभाव इत्यत आह—फलस्येति । उपलक्षणत्व इति—उपलक्षणत्वञ्चात्र अशक्यत्वे सति शक्यव्यावर्तकत्वम् । जनकत्वादिति—तथाच संयोग-विभागयोः स्वार्थव्यापारजन्यत्वाविशेषाद् गम्यर्थव्यापारे संयोग एवोपलक्षणम्, न विभाग इत्यत्र विनिगमनाविरहादुभयोपलक्षणत्वे पर्यायापत्तिस्तदवस्थैवेति भावः ।

नच व्यापारमात्रस्य धात्वर्थतानये कर्मवाचकत्वेनाभिमतद्वितीयादेरेव फलवाचकत्वं स्वीकार्यम् । तथाच द्वितीयाद्यर्थसंयोगनिष्ठजनकत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितव्यापारनिष्ठविशेष्यताकबोधम्प्रति गम्यादिधातुसमभिव्याहारज्ञानस्य कारणत्वम् । द्वितीयाद्यर्थविभागप्रकारकबोधम्प्रत्युक्तरीत्या कार्यकारणभावात् पर्यायापत्त्यादिदोषवारणे तु गौरवमिति धातूनां फलवाचकत्वमेवोचितमित्युपसंहरति तस्मादिति—पूर्वोक्तयुक्तिक-

दर्पणव्याख्या

तददर्शनाच्चाऽतिव्याप्त्यादिदोषादुक्तभाष्येण,

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥

इति हरिकारिकोत्तरार्द्धेन च पूर्वोक्तलक्षणयोरेव निर्भरः प्रतीयते इत्युच्यते, तदाऽपि न क्षतिः । कर्मस्थक्रियकलक्षणे जानात्यादिभिन्नत्वस्य षोपदेशलक्षणे ष्वष्काद्यन्यतमत्वस्येव कर्तृस्थक्रियकलक्षणे जानात्याद्यन्यतमत्वस्यापि निवेशेन करोतौ कर्मस्थक्रियकत्वस्य जानात्यादौ कर्तृस्थक्रियकत्वस्य चोपपत्तेः । अत एव हरिणाऽपि, 'शब्दैरेव प्रकल्पिता' इत्यत्र शब्दपदमुपात्तम् । शब्दप्रतिपाद्याऽर्थगतविशेषैः शब्दैश्चेति तदर्थादिति । दर्शनान्तरीयां युक्तिमुपन्यस्यति—❀ धातूनामिति ❀ त्यजिगम्योरित्युपलक्षणं तादृशधातुमात्रस्य । ❀ पर्यायतापत्तिरिति ❀ तच्छक्यताऽवच्छेदकाऽवच्छिन्नशक्तत्वस्यैव पर्य्यायतापदार्थत्वादिति भावः ।

ननु त्यजिगम्योः क्रमेण विभागसंयोगोपलक्षितव्यापाराऽर्थकत्वमेवञ्च पर्य्यायलक्षणे तदुपलक्षणेतरानुपलक्षितत्वस्याऽपि विशेषणान्नोक्ताऽऽपत्तिरत आह—❀ उपलक्षणत्वेऽपीति ❀ उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वे सति शक्तिविषयत्वम् । ❀ जनकत्वादिति ❀ । तथाच संयोगविभागयोः स्वार्थव्यापारजन्यत्वाऽविशेषाद् गम्यर्थव्यापारे संयोग एवोपलक्षणं, नो विभाग इत्यत्र विनिगमकाऽभावादुभयस्यैवोपलक्षणत्वे उक्तापत्तिर्दुर्वारेति फलेऽपि शक्तिरावश्यकीति भावः । अत्र ग्रामं गच्छतीत्यादौ द्वितीयाऽर्थसंयोगादिरूपफलाऽन्वयित्वस्यैव विनिगमकत्वाद् गमनक्रियायां संयोगस्यैवोपलक्षणत्वमित्यस्य सुवचतयाऽन्यत्र लक्षणयोपपत्तेश्च नोक्तरीतिः साध्वीत्यस्वरसोऽपि वदन्तिभ्यां सूचितः । उपसंहरति—❀ तस्मादिति ❀ उक्तयुक्तिसङ्गतेरित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

अकर्म्मकाणां तु तन्निर्विवादमेव, "भू सत्तायाम्" इत्याद्यनुशासनाच्च । अत एव 'द्व्यर्थः पचिः' इति भाष्यं सङ्गच्छते इति दिक् ॥७॥

एवं सिद्ध्यतु फलव्यापारयोर्वाच्यत्वम्, किन्तु आख्यातवाच्यैव सा भावना, न धातोः, प्राधान्येन प्रतीयमानस्य व्यापारस्य धात्वर्थतायाः 'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्' इति न्यायविरुद्धत्वात्, 'तदागमे हि दृश्यते' इति न्यायविरुद्धत्वाच्च ।

प्रभा

दम्बादित्यर्थः । निर्विवादमेवेति—सकर्मकस्थले फलस्य द्वितीयार्थत्वं सम्भवति, अकर्मके भवतीत्यादौ च सत्तादिरूपफलवाचकत्वं धातोरेव सम्भवतीति भावः । द्व्यर्थ इति—विक्लेदना, निर्वर्तना च पचेरर्थः । तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः । एवञ्च विक्लित्तिनिर्वृत्तिरूपफलावाचकत्वे भाष्योक्तद्व्यर्थत्वासम्भवेन फलव्यापारोभयोर्वाच्यत्वं भाष्यसम्मतमिति भावः । सङ्गच्छत इति—तण्डुलानोदनं पचतीत्यत्र तण्डुलानां विकार्यकर्मत्वमोदनस्य निर्वर्त्यकर्मत्वमभिमतं तन्निर्वाहार्थमुत्पत्तिविक्लित्तिरूपफलद्वयार्थकत्वपरमेव भाष्यम् ।

ननु धातुमात्रस्योभयार्थकत्वे चक्षुरादिकं जानातीति स्यात्, ज्ञानानुकूलचक्षुरादिमनःसंयोगादेः फलस्य सत्त्वादिति चेन्न, स्थाली पचतीतिवदिष्टापत्तेरित्याह—दिगिति ॥ ७ ॥

पूर्वोक्तयुक्त्यादिकदम्बैः फलव्यापारयोर्धातुवाच्यत्वे साधिते तिङ्वाच्यैव भावनेति मण्डनमिश्रमतमाशङ्क्य निराकुरुते—एवं सिद्ध्यत्विति । आख्यातेति—आख्यातम्=तिङ् तद्वाच्यैव भावनेत्यर्थः । यद्वा, आख्यातम्=तिङन्तं तज्जन्यबोधविषयत्वं भावनाया इत्यर्थः । विरुद्धत्वादिति—प्रत्ययान्तेन प्रतीयमानार्थयोर्यस्य प्राधान्येन प्रतीतिस्तस्य प्रत्ययार्थत्वमिति नियमादिति भावः ।

प्रत्ययार्थसङ्ख्यायाः स्त्रीत्वस्य च विशेषणतयैव भानदर्शनेन तन्नियमस्य प्रायिकत्वदर्शनादाह—तदागम इति—'पशुना यजेत' इत्यत्रैकत्वस्य करणत्वेन साक्षात् क्रियायामन्वयः 'प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्' इति व्युत्पत्त्या प्रकृत्यर्थे एवान्वयस्य सिद्धत्वादेकत्वस्य यागाङ्गत्वाभावादविवक्षितत्वमेव तस्य स्यादिति पशुद्वयादिकरणकयागेनापीष्टभावनापत्तिरिति पूर्वपक्षे 'शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथाऽन्येषाम्' इत्युत्तरपक्षीयजैमिनिसूत्रम् । एतदर्थस्तु शब्दबोद्ध्यमेकत्वं यथा भवति तथोपलभ्यते । हि=यतः तदागमे=एकवचनागमे एकवचनश्रवणे तत्=एकत्वं दृश्यते=बुध्यतेऽतः शब्दत उपस्थितत्वात्

दर्पणव्याख्या

❀ निर्विवादमेवेति ❀ स्वार्थफलसमानाऽधिकरणव्यापारवाचकत्वरूपाऽकर्मकत्वस्य धातोः फलवाचकत्वं विनाऽनुपपन्नत्वादिति भावः । ननु सकर्मकत्वं पूर्वोक्तमेव, तद्भिन्नधातुत्वं चाऽकर्मकत्वमिति नोक्ताऽनुपपत्तिरत आह—❀ भू सत्तायामिति ❀ गणेषु फलस्यैव निर्देशादिति भावः । ❀ अत एवेति ❀ धातुमात्रस्य फलवाचकत्वादेवेत्यर्थः । ❀ द्व्यर्थ इति ❀ द्व्यर्थपदं फलव्यापारोभयार्थकमित्याशयः । ननु 'द्व्यर्थः पचिः' इति भाष्यं पचेरुपादानात्सकर्मकाणां फलार्थकत्वे साधकमस्तु, न त्वकर्मकाणामत आह—❀ दिगिति ❀ तथा सति सत्ताद्यर्थनिर्देशवैयर्थ्याऽऽपत्तेः । धातुसामान्यशक्त्या पच्यादेरिव भवत्यादेरपि व्यापारबोधसम्भवादिति दिगर्थोऽवसेयः ॥ ७ ॥

ननु 'व्यापारो भावना सैव' इत्युक्तविवरणेन न व्यापारस्य धात्वर्थतानिर्णयः, पचति=पाकं करोतीति विवरणेन आख्यातार्थताया अपि वक्तुं शक्यत्वादिति मीमांसकाशङ्कासमाधानपरतया मूलमवतारयति—❀ एवमित्यादिना ❀ । ❀ वाच्यत्वमिति ❀ तिङन्तजन्यबोधविषयत्वमित्यर्थः । तथाच पाकाऽनुकूला भावनेत्यादिविवरणेनाऽपि पचतीत्यस्य पाकाऽनुकूलभावनाबोधकत्वमस्त्वित्यर्थः । यथाश्रुते विवरणेन धातोर्भावनावाचकत्वनिर्णये 'किन्त्वाख्यातवाच्यैव सा' इत्युत्तरग्रन्थासङ्गतेः । 'प्रकृतिप्रत्ययौ' इति न्यायस्य संख्यादौ व्यभिचारमाशङ्क्याह—❀ तदागमे हीति ❀

एवञ्च 'स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्म्मकत्वम्, आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यम्' इत्यादिवदन्तं मीमांसकम्मन्यं प्रत्याह—

प्रभा

तस्य=एकत्वस्य ज्ञानम्=यागाङ्गत्वज्ञानं यथाऽन्येषाम्=पशुत्वादीनां यागाङ्गत्वं तथा एकत्वस्यापीत्यर्थः। तदागमे यद् दृश्यते तत्तस्यार्थ इत्यर्थः। एवञ्च यथा एकवचनागमे एकत्वं प्रतीयतेऽतः एकवचनार्थत्वं तस्य, तथा आख्यातप्रयोगे व्यापारः प्रतीयतेऽत आख्यातार्थत्वं व्यापारस्याङ्गीकार्यम्, अन्यथा न्यायविरोधापत्तिरिति तात्पर्यम्। तथाचोक्तं भट्टपादैः—

प्रत्ययार्थं सह ब्रूतः प्रकृति-प्रत्ययौ सदा।
प्राधान्याद् भावना तेन प्रत्ययार्थोऽवधार्यते ॥ १ ॥
तथा क्रमवतो नित्यं प्रकृति-प्रत्ययार्थयोः।
प्रत्ययश्रुतिवेलायां भावनात्माऽवगम्यते ॥ २ ॥ इति

प्रत्ययश्रुतिवेलायामित्यस्यैव 'तदागमे' इत्यनेनोक्तिः। नन्वेवं पूर्वोक्तसकर्मकाकर्मकत्वविभागानुपपत्तिः, धात्वर्थव्यापाराश्रयत्वरूपकर्तृत्वस्य दुर्वचत्वेन कर्तरि प्रत्ययासिद्धिश्चेत्यत आह—**एवञ्च स्वयुक्तेति**—स्वम्=प्रकृतधातुरूपम्। स्वयुक्तेति—आख्यातविशेषणम्। योगश्च स्वाव्यवहितोत्तरवर्तित्वरूप इति 'देवदत्तः पचति' 'भवति घटः' इत्यादौ भूधातुयुक्तत्वेऽप्याख्यातस्य न भूधात्वादावतिव्याप्तिः। **वाच्यमिति**—कृदन्तेऽन्यादृशकर्तृत्वस्य वक्तव्यतया गौरवञ्चेति भावः। यद्वा, स्वयुक्तप्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वं वाच्यमिति भावः। सकलमीमांसकैः फलव्यापारयोर्धातुवाच्यत्वं स्वीक्रियते, नतु केवलफलस्येत्याह—**मीमांसकम्मन्यमिति**—नतु मीमांसकान्प्रति, तैरुभयवाचकत्वस्य धातौ स्वीकारादिति भावः।

दर्पणव्याख्या

इदं च यः प्रधानं स प्रत्ययार्थ इति न्यायाऽऽकार इत्यभिप्रेत्य तन्मूलसूत्रालोचने तु यः प्रत्ययार्थः स प्रधानमिति न्यायाकारो लभ्यते। तथाहि—'पशुना यजेत' इति श्रूयते, तत्रैकवचनोपात्तमेकत्वं यागे विशेषणमुत प्रकृत्यर्थे इति संशये पशुपदार्थस्य यागं प्रति गुणत्वात् सम्भावितयावत्पशुकरणेन प्रधानावृत्तौ प्रधानभङ्गापत्त्या यावद्गुणप्रधानाऽऽवृत्तेरयोगादेकत्वविशिष्टपशोर्विधाने त्वेकत्वस्य पशुविशेषणतया यागाङ्गत्वाऽभावात्तदविवक्षितमेव स्यादित्यर्थकेन "तत्रैकत्वमयागाङ्गमर्थस्य गुणभूतत्वात्" इति सूत्रेण पूर्वपक्षिते, "शब्दवत्तूपलभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथाऽन्येषाम्" (जै० अ० ४ पा० १ सू० १५) इति सिद्धान्तसूत्रम्। शब्दवत्=शब्दवाच्यम्, यथा भवति तथोपलभ्यते। एकत्वं हि यतस्तदागमे=एकवचनसमवधाने दृश्यते। अतस्तस्य प्राधान्येन प्रतीतिर्यथान्येषामरुणादीनामित्यर्थः। यद्वा 'तदागमे' तत्=एकत्वम्, आगमे=एकवचनविधायकागमे 'द्व्येकयोः' इत्यत्र दृश्यते एकवचनरूपप्रत्ययार्थत्वेन प्रतीयते, अन्येषाम्=करणादीनामित्यर्थः।

एवञ्च समानप्रत्ययोपात्तत्वप्रत्यासत्त्या विभक्त्यर्थकरणाऽन्वितस्याऽरुणाऽधिकरणन्यायेन प्रथमं क्रियायामन्वयः, पश्चात् प्रकृत्यर्थे। तथाच पश्वेकत्वोभयकरणको याग इति बोधेनैकत्वस्य यागाङ्गत्वाऽवगमान्नानेकपशुभिर्याग इति तद्भावः। प्राधान्यं च प्रकृत्यर्थाऽविशेषणत्वमेव, प्रत्ययार्थमादाय न्यायावताराद्यः प्रत्ययार्थ इति भागस्य न्यायघटकत्वम्। प्रकृते आख्याताऽसमवधाने भावनाऽबोधात् तस्याप्राधान्येन भानमिति तत्सङ्गतिरिति बोध्यम्।

ननु सकर्मकत्वाऽनुगतकर्तृत्वयोर्दुर्वचत्वमेवैतन्मते दूषणमत आह ❀ एवञ्चेति ❀ भावनाया आख्यातवाच्यत्वे चेत्यर्थः। तथाचाऽऽरब्धे पाके फलाऽनुत्पत्तिदशायां पाको जातो नवेति प्रश्ने, भविष्यतीत्युत्तराऽनुरोधात् फलमात्रं धातुवाच्यमिति मीमांसकाशयः।

SGDF Sri Gargeshwari Digital Foundation

तस्मात् करोतिर्धातोः स्याद् व्याख्यानं नत्वसौ तिङाम् ।
पक्कवान् कृतवान् पाकं किं कृतं पक्कमित्यपि ॥ ८ ॥

तस्मात् = अभिप्रायस्थहेतोः, स चेत्थम्–फलमात्रस्य धात्वर्थत्वे 'ग्रामो गमनवान्' इति प्रयोगापत्तिः, संयोगाश्रयत्वात् । फलानुत्पाददशायां व्यापारसत्त्वे 'पाको भवति' इत्यनापत्तिः, व्यापारविगमे फलसत्त्वे पाको विद्यत इत्यापत्तिश्च ।

यत्तु, भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न, कर्त्राख्यातवत्

प्रभा

अभिप्रायस्थेति—तच्छब्दस्य बुद्धिविशेषविषयत्वोपलक्षितधर्मावच्छिन्ने शक्तिस्वीकारादित्याशयात् । स चेति—अभिप्रायस्थहेतुरित्यर्थः । गमनवानिति—गमन–संयोगयोः पर्यायत्वादिति भावः । अनापत्तिरिति—पाकपदस्य फलमात्रार्थकत्वेन तदानीं फलाभावादिति भावः । आपत्तिश्चेति—फलस्य विक्लित्त्यादेः सत्त्वात् । फलव्यापारयोः पृथक्धात्वर्थत्वमतेऽपि केवलफलार्थत्वमादाय तदापत्तिस्तु न शङ्क्या, अन्तरङ्गत्वात् फलस्य व्यापारे एव प्रागन्वयात् ।

केनचिदुक्तं दूषणोद्धारं निराकुरुते–यत्त्विति—घञादिर्व्यापारार्थकत्वं फलमात्रं धात्वर्थ इति मतस्यानुपपत्तिर्नेत्यर्थः । अन्विताभिधानवादिनये पदमात्रस्य सम्बन्धविशिष्टस्वार्थबोधकत्वादाह–अनुकूलेति ।

वस्तुतस्तु अनुकूलत्वस्याकाङ्क्षालभ्यत्वात् फलितार्थपरमेतत् । तथाच 'पाकानुकूला भावना' इति मानसो बोधः । अत एव 'दध्ना जुहोति' इत्यत्र दधि जुहोतीत्यर्थः । 'ज्योतिष्टोमेन' इत्यत्र तु यागस्य मानसिकः पार्ष्णिकः करणत्वबोधः, असिद्धस्यापि यागस्य स्वकरणनिष्पन्नस्य करणत्वसम्भवात् । सोमादीनान्तु साक्षात् करणत्वं न सम्भवति, नहि क्रियामन्तरेण काष्ठादिमात्रात् सोमरसे पाक उत्पद्येतेति । कर्त्राख्यातवदिति—'लः कर्मणि' इति सूत्रेऽनुवृत्तकर्तृपदस्य व्यापाराश्रयार्थकत्वेन तत्र प्रकारतया भासमानस्य व्यापारस्य धर्मवाचककर्तृपदेन लाभवदत्रापि कर्तृपदं तत्परं स्यादिति भावः । नचैवं 'पक्ता देवदत्तः' इत्यादेः सामानाधिकरण्यानुपपत्तिः, लक्षणया; 'कर्तरि' इत्यस्यावृत्त्या एकस्य 'कर्तरि' इत्यस्य धर्मिपरत्वेन वा सामानाधिकरण्योपपत्तेः ।

दर्पणव्याख्या

हेतोः पूर्वमनुपादानादाह ❀ अभिप्रायस्थेति ❀ त्यदादीनां बुद्धिस्थपरामर्शकत्वादिति भावः ।

❀ प्रयोगापत्तिरिति ❀ भावल्युडन्तगमनपदार्थसंयोगात्मकफलस्य ग्रामे सत्त्वाद् ग्रामः संयोगवानितिवद् ग्रामो गमनवानिति प्रयोगस्य प्रामाण्यापत्तिरित्यर्थः । एवमग्रेऽप्यूह्यम् । ❀ फलाऽनुत्पादेति ❀ फलानुत्पादे तादृशप्रयोगस्य सर्वाननुमतत्वादुक्तम् ❀ व्यापारसत्त्व इति ❀ । ❀ भवतीत्यनापत्तिरिति ❀ पाकपदार्थस्य विक्लित्तेरवर्त्तमानत्वादित्यर्थः । फलोत्पाददशायामर्थाऽबाधात्तादृशप्रयोगस्येष्टत्वादाह ❀ विद्यत इत्यापत्तिश्चेति ❀ व्यापारांशपरित्यागेन फलमात्रस्य धात्वर्थत्वाऽभिप्रायेण तु भविष्यतीत्युत्तरं पाकमुत्पादयतीति विवरणञ्चेति भावः ।

❀ अनुकूलेति ❀ अनुकूलत्वोत्कीर्त्तनं त्वन्विताऽभिधानवादिनां मतमेतदिति सूचयितुम् । ❀ नानुपपत्तिरिति ❀ भावविहितल्युड्घञाद्यर्थव्यापारस्य ग्रामादौ बाधान्न पूर्वोक्तप्रयोगापत्तिरित्यर्थः । विक्लित्यनुकूलघञाद्यर्थव्यापारस्य कर्तृतया भावनादावन्वयान्न पूर्वोक्तप्रयोगाऽनुपपत्त्यापत्तिरिति भावः ।

ननु कर्त्तरि कृदिति विहितस्य कृतः पक्ता पाचक इत्यादौ कर्त्रर्थत्वदर्शनात्तद्विहितघञादीनां व्यापाराऽर्थत्वदौर्लभ्यात्तदर्थत्वबोधनाय 'भावे' इत्यनुशासनं चारितार्थ्यमित्याशङ्कामपाकरिष्यँस्तदनुगुणं दृष्टान्तमाह ❀ कर्त्राख्यातवदिति ❀ । तथाच लः कर्मणीति विहितकर्त्राख्यातस्य त्वन्मते व्यापाराऽर्थकत्ववत्, कर्त्तरि कृदिति विहितघञादीनामपि व्यापाराऽर्थकत्वसम्भवादित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

'कर्त्तरि कृत्' इत्यत एव तद्विधानलाभे भावे विधायकाऽनुशासनवैयर्थ्यापत्तेः, तद्विरोधापत्तेश्च। अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत्तर्हि धातुत एव सकलव्यापारलाभसम्भवेनाख्यातस्य पृथक्शक्तिकल्पने गौरवमिति। पचतीत्यस्य पाकं करोतीति विवरणात्मा करोतिर्धातोरेव व्याख्यानम् = विवरणम्, अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः। मीमांसकोक्तं बाधकमुद्धरँस्तन्मतं दूषयति—नत्वित्यादिना।

प्रभा

वैयर्थ्यापत्तेरिति—तथाच तद्विरोध इति भावः। तद्विरोधापत्तेश्चेति। तद्भाष्यविरोधापत्तेरिति क्वचित्पाठः। घञादीनामपि असत्त्वभूतकारकान्वययोग्यव्यापारार्थकत्वे 'भावे' इति सूत्रस्थभाष्यविरोधापत्तेरित्यर्थः। तत्र हि भावे सर्वलिङ्गो निर्देशः.....सर्वलिङ्गे भावे एते प्रत्यया यथा स्युः, एतेन घञादीनां सत्त्वार्थकत्वं सूचितम्। यदि घञादीनामसत्त्वभूतक्रियार्थकत्वं स्यात्तदा भाष्यविरोधः स्पष्ट एवेति भावः। चो हेतौ यतो भावे इत्यस्य वैयर्थ्यापत्तिरतस्तद्विरोध इति भावः। यद्वा, 'भावप्रधानमाख्यातमिति निरुक्तबलादाख्यातस्य व्यापारार्थकत्वस्वीकारेऽप्यत्र तथात्वे मानाभावेन भावप्रत्ययानां घञादीनां साधुत्वमात्रार्थकत्वमिति त्वदीयसिद्धान्तविरोधापत्तिरिति भावः। वस्तुतस्तु तद्भाष्यविरोधापत्तेरित्येव पाठः काशिकासम्मतः साधुः।

ननु घञादीनां सत्त्वासत्त्वोभयार्थकत्वस्वीकारेण सत्त्वार्थकत्वपरकभाष्याद् विरोधाभाव इत्यत आह—चेति—चेन दूषणान्तरसङ्ग्रहः, तथाहि—आख्यातस्य व्यापारवाचकत्वे कर्त्रादीनामभिधानानभिधानयोर्व्यवस्थायाः 'पाचकः' 'पक्वः' इत्यादौ साध्यक्रियान्वययोग्यकर्मत्वाद्यनुपपत्त्या कारकषष्ठ्यादीनाञ्चानुपपत्तेः सङ्ग्रहः। नच घञादीनां सत्त्वासत्त्वार्थतयोक्त एव दोषपरिहारः, तद्वाचकत्वे गौरवापत्तेः। अभ्युपेयमिति—उक्तदोषनिकरनिरासाय यत्नातिरिक्तो व्यापारोऽपि धात्वर्थो यत्न आख्यातार्थ इति भावः। सकलेति—विनिगमनाविरहाद् यत्नव्यापारयोरित्यर्थः। पृथक्शक्तीति—व्यापारे धातोराख्यातस्य च यत्ने शक्तिकल्पनायां गौरवमिति भावः। नन्वाख्यातार्थस्य करोतिना विवरणाद् यत्नार्थत्वं तस्येत्यत आह—पचतीत्यस्येति। विवरणात्मेति—विवरणस्यात्मा = स्वरूपम् = करोतिः धातोरेव नाख्यातस्येति भावः। व्याख्यानमित्यस्यैवार्थो विवरणमिति—तदर्थकथनमित्यर्थः। करोतिना धात्वर्थविवरणे भाष्यमपि मानम्।

तथाहि—'कथं ज्ञायते क्रियावचनाः पच्यादय इति प्रश्ने यदेषां करोतिना सामानाधिकरण्यम्, किं करोति? पचति' इति। अनेन 'करोति' इति धात्वर्थविवरणमिति स्पष्टमेवोक्तम्। मीमांसकेति—मीमांसकम्मन्येत्यर्थः, बहुमीमांसकैरुभयार्थकत्वस्वीकारात्। बाधकमिति—'प्रकृतिप्रत्ययौ सहार्थम्' इति न्यायविरोधात्मकमित्यर्थः। तन्मतमिति—

'प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा।
प्राधान्याद् भावना तेन प्रत्ययार्थोऽवधार्यते॥'

इति भट्टपादोक्त्या आख्यातार्थ एव भावनेति मीमांसकमतमित्यर्थः।

दर्पणव्याख्या

❀ विरोधाऽऽपत्तेश्चेति ❀ चो हेतौ, यतो वैयर्थ्यमतस्तद्विरोधापत्तिरित्यर्थः। उक्तिवैचित्र्यमेतत्। यद्वा भावविहितप्रत्ययानां धात्वर्थानुवादकत्वात् प्रयोगसाधुतामात्रार्थकत्वमिति त्वदीयसिद्धान्तविरोधापत्तेरित्यर्थः। व्याख्यानमित्यस्य विवरणम्—❀ विवरणमिति ❀।

❀ अतस्तदपीति ❀ पचतीत्यस्य पाकं करोतीति विवरणमपीत्यर्थः। अपिना दूषयिष्यमाणप्रकृतिप्रत्ययाविति न्यायसमुच्चयः। धातोः पृथग्विवरणं तु तवाऽऽख्यातार्थसंख्याकालव्यापाराणां मध्ये व्यापारस्य कृत्वा संख्यादेस्तदुत्तरतिङा

SGDF

नाऽसौ तिङां व्याख्यानम्, 'पक्ववान्'इत्यादावनन्वयापत्तेः ।

अयं भावः—"प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्" इत्यत्र हि 'विशेष्यतया प्रकृत्यर्थप्रकारकबोधे(बोधम्प्रति)तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुः' इति कार्य्यकारणभावः फलितः । तथाच पक्ववानित्यत्र पाकः कर्म्मकारकम्, क्तवतुप्रत्ययार्थः कर्तृकारकम् । तयोश्चारुणाधिकरणोक्तरीत्या, वक्ष्यमाणाऽस्मद्रीत्या चान्वयासम्भव इति

प्रभा

अनन्वयापत्तेरिति—ननु पदार्थोपस्थित्यादिसामग्रीसत्त्वेऽन्वये बाधकाभावः । नच कारकाणां क्रियायामेवान्वयनियमेन प्रकृते 'पक्ववान्' इत्यादौ प्रकृतिप्रत्ययाभ्यां क्रियाया अनुपस्थित्या तदन्वयाभाव इति वाच्यम्, कर्तृत्वादिना क्रियायामेवान्वय इति नियमेऽपि सम्बन्धसामान्येनान्वये बाधकाभावादित्यत आह—अयम्भाव इति । सहार्थमिति—सह चासावर्थश्चेति सहार्थ इति अन्वितार्थ इत्यर्थः । नचार्थशब्दात् 'सह युक्ते' इति तृतीयापत्तिः, 'उपपदविभक्तेः' इति न्यायाद् द्वितीयया बाधात् । केनान्वित इत्याकाङ्क्षायां प्रकृत्यर्थेनान्वितमर्थं प्रत्ययः प्रत्ययार्थेनान्वितमर्थं प्रकृतिश्चाभिधत्ते इत्यर्थः । विशेष्यविशेषणभावाकाङ्क्षायामाह—तयोश्चेति । विशेष्यतयेति—प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनेत्यर्थः । हेतुरिति—विशेष्यतासम्बन्धेनेत्यर्थः । पाकः=विक्लित्तिरूपफलरूपः । कर्मकारकमिति—व्यपदेशिवद्भावेन फलस्यापि फलाश्रयत्वात् कर्मत्वमित्यर्थः । नच कालिकसम्बन्धेन फलाश्रयत्वमादाय कर्मत्ववारणाय फलतावच्छेदकसम्बन्धेन फलाश्रयस्य कर्मत्वं वाच्यम्, व्यपदेशिवद्भावेनेत्यस्य फलतावच्छेदकसम्बन्धेन फलाश्रये व्यपदेशिनि तण्डुलादाविव तेनैव सम्बन्धेन फलाश्रयत्वातिदेशेनेत्यर्थः । अत्र मानञ्च 'क्रियाविशेषणानां कर्मत्वम्' इत्यभियुक्तोक्तिरेव । अरुणेति—यथा आरुण्यादिगुणानां गुणिनाञ्च करणत्वश्रुत्या कारकाणां क्रियान्वयनियमात् क्रियायामेवान्वयः न परस्परम्, तथा कारकयोः कर्मकर्त्रोः परस्परमन्वयाभाव एव स्यादिति भावः । इयाँस्तु विशेषो यदरुणयेत्यत्र गुणगुणिनोः परस्परं विशेष्यविशेषणभावयोग्यतासम्भवेनार्थिकः पार्ष्ठिकान्वयः । अत्र तु अयोग्यतयाऽनन्वय एव इति । वक्ष्यमाणेति—क्रियात्वस्यैव कारकान्वयितावच्छेदकतया क्रियायामेव कारकान्वय इति वक्ष्यमाणरीत्येत्यर्थः ।

दर्पणव्याख्या

विवरणवद्धात्वर्थव्यापारस्याऽप्युपपन्नमिति न तदाख्यातार्थत्वसाधकम् । अत एव "कथं ज्ञायते क्रियावचनाः पच्यादयः यदेषां करोतिना सामानाधिकरण्यम्, किं करोति ? पचति" इति भूवादिसूत्रभाष्ये उक्तम् । तेन विवरणमपि धातोरेवेति स्पष्टमेव बोध्यते इति भावः । पक्ववानिति मूलमपि करोतेराख्यातविवरणत्वाऽभावसाध्यतया व्याचष्टे ❀ पक्ववानित्यादाविति ❀ । अनन्वयमेव विशदयति ❀ अयम्भाव इत्यादि ❀ ।

❀ सहार्थमिति ❀ सम्बद्धार्थमित्यर्थः । ❀ ब्रूतः ❀ बोधयतः, ❀ तयोः ❀ प्रकृतिप्रत्ययाऽर्थयोर्मध्ये, ❀ प्रत्ययाऽर्थः ❀ प्रत्ययवृत्तिग्रहविशेष्यः, ❀ प्रधानमिति ❀ प्रकृत्यर्थप्रकारतानिरूपितविशेष्यताशालीत्यर्थः । तादृशव्युत्पत्तिसिद्धिकार्य्यकारणभावमभिनयेन दर्शयति ❀ विशेष्यतयेति ❀ प्रत्ययस्य प्रकृत्यर्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रतीत्यर्थः । हेतुरित्यस्य विशेष्यतासम्बन्धेनेति शेषः ।

❀ अरुणाधिकरणोक्तरीत्येति ❀ अरुणयेति पदोपात्ताऽऽरुण्यस्य प्रथमं करणत्वेनेतरक्रियायामन्वयः, नामार्थाऽन्वयस्तु पार्ष्ठिक इति तत्रोक्तम् । ❀ वक्ष्यमाणेति ❀ कारकत्वस्य क्रियाजनकत्वरूपत्वेन क्रियाजनकमिति ज्ञाते, का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया अपि साध्यरूपायाः साधकाऽऽकाङ्क्षया च परस्पराऽन्वयौचित्यमित्याशयेन क्रियात्वमेव हि कारकाऽन्वयिताऽवच्छेदकमिति सुबर्थनिर्णये वक्ष्यमाणरीत्येत्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाऽभावे क्व प्राधान्यबोधक उक्तकार्य्यकारणभावः। नच

सम्बन्धमात्रमुक्तश्च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥

इति भट्टपादोक्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात् अन्वयप्रयोजकरूपवत्त्वस्य तथात्वात्।

प्रभा

अन्वयनियमस्यैवेति—मीमांसकमते एतादृशस्थले (पक्वानित्यादौ) पाकस्य कर्मत्वात् क्तवत्वर्थस्य कर्तृत्वाद् 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायेन क्रियायामेवान्वययोग्यत्वसत्त्वेन च प्रकृत्यर्थप्रत्ययार्थयोरन्वयाभावेन व्यभिचारादुक्तनियमस्यै (अन्वितार्थबोधकत्वं प्रकृतिप्रत्ययोः) वासम्भवे इत्यर्थः। प्राधान्येति—'तयोश्च प्रत्ययार्थः प्रधानम्' इति प्राधान्यबोधककार्यकारणभाव इत्यर्थः। भावाधिकरणोक्तरीत्या अन्वयमाशङ्क्य निराकरोति—नचेत्यादिना—तत्र हि भावार्थाधिकरणे 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्युदाहृत्य भट्टपादैः सिद्धान्तितम्। आख्यातार्थभावनायां स्वर्गकामपदोपात्तः स्वर्ग एव फलत्वेन सम्बध्यते, नतु धात्वर्थो यागः, तस्यासुखरूपत्वेनापुरुषार्थत्वात्। नच स्वर्गस्य भिन्नपदोपात्तत्वादाख्यातरूपसमानपदश्रुतेर्बलवत्त्वाद् यागस्यैव साध्यत्व (फलत्वम्) मस्त्विति वाच्यम्, 'यागसम्बन्धिनी भावना' इत्येवं सम्बन्धं बोधयित्वैव समानपदश्रुतेश्चरितार्थत्वात्। सर्वदैवं हि धात्वर्थभावनयोः प्रथमं सम्बन्धसामान्यमेव प्रत्याय्यते। तस्य=सम्बन्धसामान्यस्य य एकोंऽशः=सम्बन्धविशेषः तस्य निवेशे=बोधने तु श्रुतेः=यजेत इति शब्दस्य सामर्थ्यं नास्ति। यथा पचतीत्यत्र 'पाकसम्बन्धिनी भावना' इत्येव श्रौतोऽर्थः। 'पाकानुकूला भावना' इति तु पश्चान्मानसो बोध इति 'सम्बन्धमात्रमुक्तश्च' इति कारिकार्थः। वाजपेयाधिकरणेऽपि भट्टपादैः स्पष्टीकृतोऽयमर्थः। तथैव प्रकृते 'पाकसम्बन्धी कर्ता' इति प्रकृतिप्रत्ययार्थयोरन्वयसम्भवेन व्यभिचाराभावादुक्तनियमस्यैवाभाव इत्यसङ्गतमित्याशङ्कायामाह—योग्यताविरहादिति—कारकाणां कर्तृत्वकर्मत्वादिसंसर्गेण क्रियायामेवान्वय इति संसर्गविधयैवान्वयस्य भाष्यसम्मतत्वेन क्रियायामेवान्वय इति तात्पर्यम्। फलस्य कर्मरूपकारकत्वेन क्रियायामेव योग्यतया अन्वयबोधो नतु कारकान्तरे, 'वह्निना सिञ्चति' इत्यत्रेव योग्यताविरहात्। योग्यतामुपपादयति—अन्वयेति—अन्वयप्रयोजकरूपवत्त्वमेव योग्यता, नतु तत्तत्पदार्थे पदार्थतावच्छेदकधर्मावच्छिन्नसंसर्गत्वम्। 'घटेन जलमाहर' इत्यादौ जलाहरणे घटत्वावच्छिन्नसंसर्गः प्रतिपाद्यः। स च यस्य

दर्पणव्याख्या

❀ सम्बन्धमात्रमिति ❀ "ज्योतिष्टोमेन यजेत" इत्यत्र यजेतेति श्रुत्या धात्वाख्यातार्थयागभावनयोः सम्बन्धसामान्यं प्रतिपाद्यते। तयोः क्रियाकारकभावरूपसम्बन्धविशेषबोधने तु नाऽस्याः श्रुतेः कश्चिदभिधादिरूपो व्यापारः, तद्वाचकपदाऽभावादिति तदर्थः। तथाच यजेतेत्यत्र यागसम्बन्धिभावनेति बोधः, न यागकरणकभावनेति, तद्वत्प्रकृते पाकसम्बन्धी कर्त्तेति बोधः। कर्मत्वादिना तत्संसर्गकबोधे एव क्रियाया अपेक्षणादित्याशङ्कितुराशयः। फलस्य कारकत्वेनाऽयोग्यत्वात्तादृशाऽन्वयबोधोऽप्यसम्भवदुक्तिक इत्याह ❀ योग्यताविरहादिति ❀।

ननु तत्पदार्थे तत्पदार्थवत्त्वं योग्यता, अस्ति च सा प्रकृते, पाकप्रयोजकत्ववत्पाकसम्बन्धित्वरूपाऽकर्तुरत आह ❀ अन्वयप्रयोजकरूपवत्त्वस्येति ❀ तथाच तत्पदार्थे तत्पदार्थताऽवच्छेदकावच्छिन्नत्वस्यैव योग्यत्वे जलाहरणे घटकरणत्वस्य सत्त्वात्तस्मिन् सुषिरघटस्यापि करणत्वेनाऽन्वयापत्तिः। अस्मन्मते तु सच्छिद्रेतरघटत्वस्य जलाऽऽहरणान्वयप्रयोजकत्वेन तादृशघटे तादृशाऽऽहरणान्वयप्रयोजकत्वमिति न तदन्वयापत्तिरिति भावः।

BRDI
Sri Gargeshwari Research Foundation

क्रियात्वमेव हि कारकान्वयिताऽवच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्त्तुं विवरणेन धात्वर्थक्तवत्वर्थयोः कर्म्मत्व–कर्तृत्वे दर्शयति—'कृतवान् पाकम्' इति।

वस्तुतस्तु 'प्रत्ययार्थः प्रधानम्' इत्यस्य, यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः, 'अजा' 'अश्वा' छागीत्यत्र स्त्रीप्रत्ययार्थे स्त्रीत्वस्यैव प्राधान्यापत्तेः, छाग्यादेरनापत्तेश्च। किन्तूत्सर्गोऽयम्। विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात्।

अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः।

प्रभा

कस्यचिद् घटस्य कारणतारूपोऽपि सम्भवति इति सुषिरेतरत्वस्य लाभो न स्यात्। यदि तु अन्वयप्रयोजकरूपवत्त्वं योग्यतेत्युच्यते तदा सच्छिद्रस्य घटस्य जलाहरणे करणत्वासम्भवेन सच्छिद्रेतरत्वलाभः। अन्यथा तदन्वयासम्भव इत्याह–क्रियात्वमिति।

ननु क्तवत्प्रत्ययार्थो भावनाश्रयः कर्त्तेति तेनाक्षिप्तभावनायामन्वयः स्यादित्यत आह—वस्तुतस्त्विति—अयम्भावः–यत्र यत्र प्राधान्यं तत्र तत्र प्रत्ययार्थत्वमिति व्याप्त्या प्राधान्यस्य व्याप्यत्वं प्रत्ययार्थत्वस्य व्यापकत्वं लभ्यते। यत्र यत्र प्रत्ययार्थत्वं तत्र तत्र प्राधान्यमिति व्याप्तौ च प्रत्ययार्थत्वस्य व्याप्यत्वं प्राधान्यस्य व्यापकत्वं प्रतीयत इत्युभयथाऽपि 'अजा' इत्यादौ 'स्त्रीत्वविशिष्टा अजा' इत्येवं स्त्रीत्वप्रकारकबोधस्यैव सर्वसम्मतत्वेन व्यभिचारस्य दुर्वारतयोक्तनियमासम्भव एव इत्याह—अजेति। उत्सर्ग इति—प्रायिक इत्यर्थः। अयम्—प्रत्ययार्थः प्रधानमिति न्यायः। ननु नियामकाभावे यथेच्छं विशेष्यविशेषणभावः स्यादत आह—विशेष्यत्वादिनेति। व्युत्पत्त्यनुरोधादिति—व्युत्पत्तिः=शास्त्रप्रयोज्यप्रकृति–प्रत्ययस्वरूप–तदर्थ–तदन्वयादिविषयकयथार्थज्ञानजन्यसंस्कारविशेषः, तथाच तत्तच्छास्त्रप्रयोज्यसंस्कारानुरोधादिति फलति। तथाच तत्तच्छास्त्रप्रयोज्यव्युत्पत्त्य (संस्कार) नुसारी बोधः, ननु बोधानुसारिणी व्युत्पत्तिरिति भावः। व्युत्पत्त्यनुसारिबोधं दर्शयति—अत एवेति—आख्यातस्थले वैयाकरणानां व्यापारविशेष्यकबोधेऽपि नैयायिकादीनां स्वव्युत्पत्त्यनुसारात् प्रथमान्तार्थादिविशेष्यक एव बोधः।

दर्पणव्याख्या

ननु 'घटेन जलमाहर' इत्यत्र घटे छिद्रेतरघटत्ववत् प्रकृते किं कारकान्वयितावच्छेदकं यदभावादनन्वयापत्तिरुद्भाव्यतेऽत आह ❀ क्रियात्वमेव हीति ❀।

ननु कृदर्थकर्त्राक्षिप्तभावनायां पाकादीना कर्मत्वेनान्वयसौलभ्यान्नोक्तदूषणमत आह ❀ वस्तुतस्त्विति ❀ प्रधानप्रत्ययार्थवचनमिति सूत्रस्वरसो यः प्रधानं स प्रत्ययार्थः। तदागमे हीति न्यायश्च, यः प्रत्ययाऽर्थ इत्यर्थे मूलमिति ध्येयम्। अजेत्यादौ विशेष्याजादिपदार्थस्य प्रत्ययार्थत्वाऽभावेन व्यभिचारस्य स्फुटत्वात् तदुपेक्ष्य, द्वितीयकल्प एव व्यभिचारं दर्शयति—❀ अजेति ❀

इष्टापत्तावाह—❀ छाग्यादेरिति ❀ स्त्रीत्वविशेषणछाग्यादेश्छागनिष्ठस्त्रीत्वादेरिति वाऽर्थः। एकत्र विशेषणतयाऽन्वितस्यापरत्र विशेषणतयाऽन्वये नैराकाङ्क्ष्येण छागीमानयेत्यादौ कर्मत्वादिकारके छागी गच्छतीत्यादौ छागनिष्ठस्त्रीत्वस्य छागीपदार्थस्यायोग्यतयाऽऽख्यातार्थकर्त्तरि वाऽनन्वयापत्तेश्चेति भावः। छाग्यादेरनापत्तेश्चेति पाठे प्राधान्यानापत्तेरित्यर्थः।

ननु सा व्युत्पत्तिरपार्थैव स्यादत आह ❀ किन्त्विति ❀ तथाच तादृशव्युत्पत्तेः कृत्तद्धितमात्रविषयकत्वं न प्रत्ययमात्रविषयकत्वमिति न तद्बलाद् व्यापारस्याख्यातार्थत्वमिति भावः। ननु कथं तर्हि व्यापारविशेष्यको बोधोऽत आह ❀ विशेष्यत्वादिनेति ❀ तथाच व्युत्पत्त्यनुसारी बोधः, ननु बोधानुसारिणी व्युत्पत्तिः। एवञ्च तादृशव्युत्पत्त्यङ्गीकर्तॄणां तथैव बोधः, अन्यादृग्व्युत्पत्तिमतां त्वन्यथापीति भावः। तदेव विशदयति ❀ अत एवेति ❀।

SGDF Digital Foundation

लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारक एव बोधः, न नैयायिकादीनाम् । घटः, कर्म्मत्वम्, आनयनं कृतिरित्यादौ विपर्य्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधः, नतु तद्व्युत्पत्तिरहितानाम् । अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं सङ्गच्छते ।

अत एव "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" (पा० सू० १।२।५६) इत्याह भगवान् पाणिनिः ।

प्रभा

आलङ्कारिकाणाम्—अलङ्कारशास्त्रवासनावताम् । शक्यतावच्छेदकेति—'गङ्गायां घोषः' इत्यादौ गङ्गात्वेन तटबोधः, न तु तटत्वेन, तटत्वेन बोधे चमत्कारासिद्धेः । नेति—नैयायिकानां मते 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा' इत्यभियुक्तोक्त्या लक्ष्यवृत्तितटत्वादिनैव लक्ष्यस्य बोधः । अत एव 'कचतस्त्रस्यति वदनम्' इत्यादौ कचस्य राहुत्वेन बोधात् त्रासोपपत्तिः, वदने चन्द्रत्वारोपश्च सिध्यति । शक्यतावच्छेदकरूपेण भाननये तु तदनुपपत्तिरेव ।

वस्तुतस्तु शक्यतावच्छेदकरूपेण लक्ष्यार्थबोधनयेऽपि कचत्वेन राहोरेव बोधात् त्रासात् चमत्कारसिद्धिः । राहुत्वेन राहुबोधे चमत्कारे तु तादृशबोधे सर्वत्रैव चमत्कारापत्तिः । 'शक्यादन्येन' इत्यस्य लक्ष्यवृत्तिधर्मेण लक्ष्यस्य ज्ञाते एव लक्षणा इत्येवार्थः । अत एव 'विधौ न लक्षणा', विधेयस्यापूर्वबोध्यस्य ज्ञातत्वाभावात् । घट इति—'घटमानय' इत्यादौ यथा घटकर्मकानयनविषयको बोधस्तथा तत्रैव 'घटः' कर्मत्वम्, आनयनम्, कृतिः, इत्यादौ शब्दजन्योपस्थितिसत्त्वान्नव्यनैयायिकानां बोधः । तद्व्युत्पत्तिरहितानाम्—शब्दजन्यपदार्थोपस्थितिमात्रेण बोध इति व्युत्पत्तिरहितानाम् । किन्तु प्रकृत्यर्थस्य प्रत्ययार्थे एव विशेष्यतया, विशेषणतया वाऽन्वय इति व्युत्पत्तिमतां न तेन बोधः । निराकाङ्क्षमिति—आकाङ्क्षाया अपि शाब्दबोधे कारणत्वात् 'घटनिष्ठं कर्मत्वम्' इत्यादिबोधे घटाद्युत्तरकर्मत्ववाचकप्रत्ययसमभिव्याहाररूपाकाङ्क्षाया अपेक्षितत्वेन तदभावादेव न बोध इति भावः । अत एव=बोधस्य व्युत्पत्त्यनुसारित्वादेव ।

दर्पणव्याख्या

शक्यताऽवच्छेदकप्रकारक इति ❀ 'लक्षणाऽऽरोपिता क्रिया' इति काव्यप्रकाशीयसूत्रपर्य्यालोचनया शक्यतावच्छेदकारोपविषयनिष्ठसंसर्गस्यैव लक्षणात्वलाभात्, 'गङ्गायां घोषः' इत्यत्र गङ्गात्वेनैव लक्ष्यार्थप्रतीतिरत एव ततो वैयञ्जनिकी शैत्यपावनत्वादिप्रतीतिः । 'जाता लता हि शैले' इत्यादौ च कनकलतात्वेनैव रूपेण बोधस्य चमत्काराऽऽधायकत्वादिति तदाशयः ।

❀ नैयायिकादीनामिति ❀ सम्बन्धिताऽवच्छेदकरूपेणैव लक्ष्यार्थस्य भानम् । अत एव 'कचतस्त्रस्यति वदनम्' इत्यादौ सम्बन्धिताऽवच्छेदकराहुत्वादिनैव बोधस्य त्रासाऽऽधायकस्योपपत्तिः । कचत्वादिशक्यताऽवच्छेदकरूपेण लक्ष्याऽर्थबोधाङ्गीकारे तदनुपपत्तिः स्पष्टैव । किञ्च, शक्यताऽवच्छेदकम्, न लक्ष्यतावच्छेदकम् ।

शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा ।

इत्यभियुक्तोक्तिविरोधादिति तद्भावः ।

❀ घटः कर्मत्वमिति ❀ नव्यमते एकपदेऽपरपदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वस्याकाङ्क्षात्वोपगमेन घटपदे कर्मत्वपदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वज्ञानदशायां तादृशवाक्यात्तैः शाब्दबोधाऽभ्युपगमादित्यभिप्रेत्य 'नव्यानाम्' इत्युक्तम् । निराकाङ्क्षमित्यस्याऽऽधेयतासंसर्गेण बोध इति शेषः । ❀ अत एवेति ❀ बोधस्य व्युत्पत्त्यनुसारित्वादेवेत्यर्थः ।

SGDF

'प्रधानं प्रत्ययार्थः' इति वचनम् ('न' इत्यनुवर्त्य) न कार्य्यम्, अर्थस्य=तथाबोधस्य, अन्यप्रमाणत्वात्=व्युत्पत्त्यनुसारित्वादिति हि तदर्थः। एवं सत्यपि नियामकापेक्षणे च "भावप्रधानमाख्यातम्" इति वचनमेव गृह्यतामिति सुधीभिरूह्यम्।

'तदागमे हि' इति न्यायो विवरणञ्चाऽतिव्याप्तमित्याह—किं कृतं पक्वमिति।

प्रभा

वचनमिति—प्राचीनवैयाकरणैर्हि 'प्रधानं प्रत्ययार्थः' इति सूत्रं कृतम्। तच्च पाणिनिना खण्ड्यते—'प्रधानप्रत्ययार्थवचनम्' इत्यादिना। नचात्र निषेधवाचकशब्दाभावात् 'खण्ड्यते' इत्यसङ्गतमित्यत आह—न इत्यनुवर्त्येति—पूर्वसूत्रादिति शेषः। वस्तुतस्तु पूर्वसूत्रे नञोऽभावात् 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति सूत्रात् 'अशिष्यम्' इति पदमनुवर्तनीयम्। 'न' इत्यनुवृत्तिकथनन्तु तुल्यार्थाभिप्रायेणेति पञ्चोलिनः।

ननु प्रत्ययार्थस्य क्वचित् प्राधान्यं क्वचिदप्राधान्यमित्यर्थे नियामकाभावे त्वन्मतेऽपि आख्यातसमभिव्याहारे धात्वर्थव्यापारस्य प्रकारतया भानं दुर्वारमित्यत आह—नियामकापेक्षण इति। आख्यातमिति—अत्राख्यातपदेन धातुरुच्यते, आख्यायते सर्वप्रधानभूतोऽर्थोऽनेनेति व्युत्पत्तेः। तत्र नाम्नः प्रकृतित्वेनाख्यातपदेनापि प्रकृतेरेव ग्रहणस्यौचित्यात्, 'नामान्याख्यातजानि' इति निरुक्ताच्च। नह्यत्राख्यातप्रत्ययजन्यत्वं तदन्तजन्यत्वं वा नाम्नि सम्भाव्यते। अत एव 'सर्वं नाम च धातुजमाह' इति निरुक्तार्थसमानार्थकं भाष्योक्तं सङ्गच्छते। तथाच वाक्ये सर्वापेक्षया प्रधानीभूतभावार्थकत्वं धातुलक्षणं फलति।

नागेशास्तु—'आख्यातमाख्यातेन' इति मयूरव्यंसकादिगणसूत्रात्, 'चत्वारि पदजातानि—नामाख्याते उपसर्गनिपाताश्च' इति निरुक्ताद् भाव-काल-कारक-सङ्ख्याश्चत्वारोऽर्था आख्यातस्य, तत्र 'भावः प्रधानम्' इति भाष्योक्तेश्च आख्यातपदं तिङन्तपरमेवेति। प्राङ्नव्योभयमतेऽपि 'भावप्रधानमाख्यातम्' इति निरुक्तं प्रागुक्तप्रमाणैर्भावस्य धात्वर्थत्वे व्यवस्थापिते तत्प्राधान्यनियामकं भवत्येव। तदागम इति—यथा हि—एकवचनागमे एकत्वप्रतीतेरेकवचनार्थत्वमेकवचनस्य, तथा—आख्यातागमे भावनाप्रतीतेर्भावनाया आख्यातार्थत्वं वक्तुमशक्यम्। किं कृतमिति प्रश्ने 'पक्वम्' इति उत्तरदर्शनाद् आख्यातस्याभावेऽपि भावनाप्रतीतेरसङ्गत्यापत्तेः। मन्मते तु भावनाया धात्वर्थत्वान्नानुपपत्तिरित्याह—न्यायो विवरणञ्चेति। 'पक्वम्' इत्यस्य 'पाकः कृतः', इति विवरणमित्यर्थः। अतिव्याप्तमिति—अतिव्याप्तो न्यायः, अतिव्याप्तञ्च विवरणमिति 'नपुंसकमनपुंसकेन' इति

दर्पणव्याख्या

❀ व्युत्पत्त्यनुसारित्वादिति ❀ कार्यकारणभावग्रहाधीनत्वादित्यर्थः। बोधानुसारिणी हि व्युत्पत्तिः, नहि बोधो व्युत्पत्त्यनुसारी। अत एवारोपे सति निमित्तानुसरणम्, नतु निमित्तमस्तीत्यारोप इति प्रामाणिकाः।

❀ अर्थस्य ❀ विशेष्यत्वादिना प्रतीयमानस्य। ❀ अन्यप्रमाणत्वात् ❀ स्वविशेषणीभूतप्रतीत्यनुरोधकव्युत्पत्तिकत्वादित्यर्थः। 'प्रधानं प्रत्ययार्थः' इति नियमस्य पाणिनिनाऽनादृतत्वेऽपि, 'यो यः प्रत्ययार्थः स प्रधानम्' इत्यर्थस्य 'तदागमे हि' इति सूत्रयता जैमिनिनाऽऽदृतस्याऽदुष्टत्वादाख्यातार्थतयैव व्यापारस्य प्राधान्यम्, टाबादीनां द्योतकत्वेन सङ्ख्यावाचकत्वेऽपि प्रत्ययजन्योपस्थितौ सङ्ख्याद्यवृत्तित्वस्य विशेषणाच्चोक्तकार्यकारणभावस्य निर्दुष्टत्वादित्यन्ये। प्रतीयमानार्थस्य प्राधान्यमिति 'तदागमे हि' इति न्यायाकार इत्याशयेनाह—❀ तदागमे हीति ❀। ❀ अतिव्याप्तमिति ❀ 'नपुंसकमनपुंसकेन' इति क्लीबशेषतैकवचनान्ततायां च व्यभिचरितमित्यर्थः। तदेव विशदयति ❀ कृत्वेति ❀ 'पक्वम्' इत्यत्राऽपिनाऽनुपदोक्त 'पक्ववान्' इत्यस्याऽपि संग्रहः, तत्र भावनाया आक्षेपात् प्रतीयमानत्वेऽपि प्रत्ययार्थत्वाऽभावेन व्यभिचारसम्भवात्। किं कृतमित्यतो व्यापारविषयस्य जिज्ञास्यत्वाऽवगमात् 'पक्वम्' इत्यतस्तदनवबोधेनाऽस्योत्तरत्वाऽनुपपत्त्या व्यापारबोधकत्वप्रौव्ये तस्य प्रत्ययार्थत्वाऽभावादव्यभिचार इत्यर्थः।

कृञा विवरणं प्रतीतिश्च पक्वमित्यत्रापि, इति तत्रापि भावना वाच्या स्यादिति भावः।

नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह—अपीति—तथाचोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इति भावः। भवद्रीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति द्रष्टव्यम् ॥ ८ ॥

साधकान्तरमाह—किं कार्य्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि।
किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥ ९ ॥

'कार्य्यम्' इत्यत्र 'ऋहलोर्ण्यत्' (पा० सू० ३।१।१८४) इति कर्मणि ण्यत्। 'पचनीयम्' इत्यादौ चानीयर्। आदिना 'ज्योतिष्टोमयाजी' इत्यादौ करणे उपपदे कर्त्तरि णिनिः। एते च क्रियायोग-

प्रभा

एकशेषे एकवद्भावः। इत्यत्रापीति—अपिना 'पक्वान्' इत्यस्य संग्रहः। अत्र त्वन्मते धातुना फलस्य, प्रत्ययेन कर्मादेश्च प्रतीतिसम्भवेऽपि भावनायाः प्रतीतिराक्षेपेणैव वाच्या, इति तस्याः प्रत्ययार्थत्वाभावेन पूर्वोक्तन्यायादेर्व्यभिचार इति भावः। उभयेति—अत्र साधारण्यम्=समभिव्याहारः। कृदाख्यातोभयत्रोपलभ्यमानस्य धातोरेव भावनावाचकत्वे लाघवमिति। नच धातुत्वं दुर्वचम्, पाणिन्याद्यभियुक्तसङ्केतसम्बन्धेन धातुपदवत्त्वरूपधातुत्वस्य सुवचत्वात्। अन्यथा 'सर्वं नाम च धातुजमाह' इत्यादिधातुपदघटितवाक्याद् बोधानापत्तिः ॥ ८ ॥

अनीयरिति—कर्मणीति शेषः।

दर्पणव्याख्या

❀विवरणमिति❀ विवरणञ्चाऽत्र प्रश्नोत्तररूपमेव। तद्बोधनार्थमेव किमनुल्लेखः, अन्यथा केवलकृतशब्दस्य पक्वपदविवरणतया लोकाऽप्रसिद्धेर्विवरणं चाऽतिव्याप्तमित्यस्याऽसङ्गतेः। ❀वाच्या स्यादिति❀ प्रत्ययवाच्या स्यादित्यर्थः। 'अपि'-शब्दः पूर्वोक्ताऽर्थस्यैव न समुच्चायकः, किन्त्वर्थान्तरस्यापीति वक्तुमाशङ्कते—❀ नन्विति ❀ तथाचोक्तापत्तिरिष्टैवेति भावः।

अपिसमुच्चितार्थं प्रकटयति—❀ तथाचेति ❀। ❀ उभयेति ❀ आख्यातकृदन्तोभयेत्यर्थः। ❀ साधारण्येनेति ❀ साधारण्यमत्र समभिव्याहारविशेषः। ❀ प्रतीतेरिति ❀ भावनाप्रतीतेरित्यर्थः। ❀ उभयसाधारण इति ❀ घटकतया प्रयोगद्वयाऽनुस्यूत इत्यर्थः। तथाच प्रयोगद्वये नियतवृत्तित्वेन धातोरेव भावनावाचकत्वसिद्धिः, धातुत्वस्य शक्ताऽवच्छेदकत्वेन लाघवात्, नतु तिङ्कृतोः, तिङ्त्वस्य चाननुगतस्य शक्ताऽवच्छेदकत्वे गौरवात्, परस्परव्यभिचाराच्चेत्युक्तापत्तेर्नेष्टत्वसम्भावनेति भावः।

ननु धातुत्वस्य शक्तावच्छेदकतायाः प्रागेव निराकृतत्वान्नोक्तदूषणस्य 'अपि'शब्दसमुच्चयत्वमत आह—❀भवद्रीत्येति❀ स्वमते भावनायाः प्रकृत्यर्थत्वादुक्तम्—भवदिति। प्रत्ययार्थत्वादित्यनेन पूर्वोक्तमतद्वयमध्ये त्वस्यैव मीमांसकसम्मतत्वमिति सूच्यते। व्याख्यातञ्च तथैव। अवतरणे तन्न्यायविरोधोपदर्शनं तु प्रत्ययाऽर्थत्वप्राधान्ययोः प्रायशः समनैयत्येन, प्रधानस्य प्रत्ययार्थत्वसाधकत्वस्याऽपि ततो लाभेन प्रकृतिवाच्यत्वे तदनुपपन्नमित्याशयेनेति बोध्यम् ॥ ८ ॥

साधकान्तरमित्यस्य धातोर्व्यापारवाचकत्वे इत्यादिः। किं कार्यमित्यत्र प्रश्नोत्तरभावरूपविवरणेनैव व्यापारस्य धात्वर्थत्वसिद्धिरित्यत्र न तात्पर्यम्, किन्तु प्रश्नोत्तरभावरूपविवरणस्य प्रक्रान्तत्वात् किम उल्लेख इति सूचयन्नाह ❀ कार्यमित्यत्रेति ❀। ❀ णिनिरिति ❀ "भूते" इत्यधिकृत्य "करणे यजः" (पा० सू० ३।२।५) इति सूत्रेणेति शेषः। ❀ एते ❀ ण्यदादय इत्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

मन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति, विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यऽसम्भवात्। नच 'गम्यमानक्रियामादाय कारकयोगः' इति भाट्टरीतिर्युक्ता, आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः।

अथ लिङ्गसंख्यान्वयानुरोधात् कर्त्तुर्वाच्यत्वमावश्यकमिति तेनाऽक्षेपाद् भावनाप्रत्ययः स्यादिति मतम्, तर्हि संख्यान्वयोपपत्तये आख्यातेऽपि कर्त्ता वाच्यः स्यात्। 'पक्कवान्' इत्यादौ कालकारकान्वयानुरोधाद् भावनाया अपि वाच्यत्वस्याऽऽवश्यकत्वाच्चेति भावः।

अपिना हेत्वन्तरसमुच्चयः। तथाहि—नखैर्भिन्नः 'नखभिन्नः', हरिणा त्रातः 'हरित्रातः' इत्यादौ, "कर्तृकरणे कृता बहुलम्" (पा० सू० २।१।३२) इति समासो न स्यात्, 'पुरुषो राज्ञो भार्य्या देवदत्तस्य' इतिवद्, असामर्थ्यात्।

प्रभा

असन्त इति—असम्भवन्त इत्यर्थः, कारकस्य क्रियान्वयनियमादिति भावः। तद्वाच्यताम्=क्रियाया वाच्यताम्। असम्भवमेव दर्शयति—विना क्रियामिति। गम्यमानेति—पदं विनाऽपि प्रतीयमानाम् 'क्रियते' इत्यादिक्रियामित्यर्थः। भाट्टरीतिरिति—कृदन्ते कर्त्रादिना भावनाऽऽक्षिप्यते इति तदुक्तेरिति भावः। तथात्वापत्तौ=भावनाया आक्षेपापत्तौ। आवश्यकमिति—कृतीति शेषः। लिङ्गस्य सत्त्वेन प्रतीयमाने एवान्वयस्य सर्वसम्मतत्वादिति भावः। सङ्ख्यान्वयेति—'सङ्ख्यान्वितं द्रव्यम्' इत्यभियुक्तोक्तेरित्याशयः। अनुरोधादिति—कालकारकयोस्तत्रैवान्वयनियमादिति भावः। न स्यादिति—नखैरित्यादिकरणादिकारकाणां क्रियायामेवान्वयनियमेन भिदादिधातुवाच्यायाः क्रियाया अभावात् अध्याहृत 'कृत्वा' इत्यादिक्रियैवान्वयस्य वाच्यतया भिन्नादिपदार्थेन सामर्थ्याभावादिति भावः। भार्य्येति—भार्य्याया देवदत्तेनान्वयाद् राज्ञाऽन्वयाभावेन यथा सामर्थ्याभावः।

दर्पणव्याख्या

❀ क्रियायोगमन्तरेणेति ❀ क्रियान्वयिनामेव कारकतया धातोर्व्यापारावाचकत्वे 'कार्य्यो घटः' इत्यादौ कर्मादिसंज्ञानां, 'कारके' इत्यधिकृत्य विहितानां घटादावसम्भवेन तत्र विधीयमानण्यदाद्यनुपपत्तिर्धातोस्तदाक्षिपति, देवदत्तस्य पीनत्वानुपपत्तिरिव रात्रिभोजनमिति भावः। तदेवाह—❀ विना क्रियामिति ❀। गम्यमानेति ❀ अस्य तदुपस्थापकपदाभावेऽपीत्यादिः। ❀ तथात्वापत्ताविति ❀ गम्यमानक्रियामादायैव कर्त्तृकर्माऽर्थकप्रत्ययोपपत्तावित्यर्थः। ❀ तत्राऽपि ❀ तिङ्संज्ञकाऽऽख्याते।

❀ लिङ्गसङ्ख्यान्वयाऽनुरोधादिति ❀ अस्य पाचक इत्यादावित्यादिः। ❀ आवश्यकम् ❀ इत्यस्य कृतीति शेषः। कृन्निरूपितवाच्यत्वं कर्त्तुरवश्यमङ्गीकरणीयमित्यर्थः। ❀ तेन ❀ कर्त्रा। ❀ आक्षेपात् ❀ इत्यस्य स्वरूपनिरूपकतयेत्यादिः। ❀ प्रत्यय इति ❀ बोध इत्यर्थः। ❀ तस्य ❀ वाच्यत्वस्येत्यर्थः।

❀ असामर्थ्यादिति ❀ विशिष्टार्थोपस्थित्यजनकत्वादित्यर्थः, निराकाङ्क्षत्वादिति यावत्। त्रात-भिन्नपदान्तर्गतधात्वर्थक्रिययोः कर्त्तृकरणकारकसाकाङ्क्षत्वेन, हरिणेत्यादिपदोपस्थितकर्त्तृकरणयोश्च कारकत्वेन क्रियासाकाङ्क्षत्वेन परस्परसाकाङ्क्षत्वरूपसामर्थ्यं सुघटम्, व्यापारस्य धात्वर्थतावादिमते। भवन्मते तु 'पुरुषो राज्ञो भार्या देवदत्तस्य' इत्यादिवन्निराकाङ्क्षत्वात् समासाऽनुपपत्तिरिति भावः। इदमुपलक्षणम्—कारकविभक्तेरपि।

SGDF Sri Gargeshwari Digital Foundation

नचाध्याहृतक्रियामादाय सामर्थ्यं वाच्यम्, 'दध्योदनः' 'गुडधानाः' इत्यादिवत्। अन्यथा तत्रापि "अन्नेन व्यञ्जनम्" (पा० सू० २।१।३४) "भक्ष्येण मिश्रीकरणम्" (पा० सू० २।१।३५) इति समासो न स्यादिति वाच्यम्, तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि 'हरिकृतम्' इत्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य, "कर्तृकरणे" इत्यस्याक्षेपेण परम्परासम्बन्धे प्रवृत्त्ययोगात्।

नचैकक्रियान्वयित्वमेव सामर्थ्यमिति शङ्क्यम्, 'असूर्य्यम्पश्याः'

प्रभा

अध्याहृतेति—भिन्नादिपदघटककृदर्थकर्मादिना 'हरिणा' इत्यत्र तृतीयार्थकर्त्रादिना वा स्वान्वययोग्यत्वेन 'नखैः कृत्वा भिन्नः' 'इत्येवं क्रियाया अध्याहारेण तस्यां हर्यादीनामन्वये स्वान्वय्यन्वयित्वरूपपरम्परासम्बन्धेन भिन्नादिपदार्थेऽप्यन्वयसत्त्वादिति भावः। दध्योदन इति—'अन्नेन व्यञ्जनम्' इत्यादिसूत्रसामर्थ्यात् 'दध्नोपसिक्तो गुडेन मिश्रितः' इत्येवमुपसेकादिक्रियाद्वारासामर्थ्यमादाय यथा समासस्तद्वदेवेत्यर्थः। अन्यथा = आक्षिप्तक्रियान्वयेऽसामर्थ्याङ्गीकारे। आनर्थक्यादिति—सूत्रवैयर्थ्यादित्यर्थः। अगत्या = उपायान्तराभावेन। इत्यादाविति—आदिना 'हिरण्येन कृतम्' इत्यादेः संग्रहः। साक्षादिति—हर्यादिनिष्ठकर्तृत्वादिनिरूपकत्वसम्बन्धेनेत्यर्थः। कृधातोः यत्नरूपव्यापारार्थकतया तन्निरूपितकर्तृत्वस्य हर्यादौ साक्षात्सत्त्वेन साक्षादन्वयेन चरितार्थस्य 'कर्तृकरणे' इति सूत्रस्येत्यर्थः। आक्षेपेण = कृत्वेत्याद्याक्षेपेण। परम्परासम्बन्धे = स्वान्वय्यन्वयित्वरूपे। स्वम् = कर्त्रादिस्तदन्वयी कृञर्थव्यापारस्तदन्वयी भिन्नादिपदार्थ इत्युक्तपरम्परासम्बन्धः सुलभः।

नचैकक्रियान्वयित्वमिति—एकस्यां क्रियायामन्वयित्वमेव मुख्यं सामर्थ्यम्। अत एव 'धवखदिरौ' इत्यादिद्वन्द्वे परस्परं धवखदिरयोः सम्बन्धाभावेऽपि एकत्र छेदनादिक्रियायामन्वयमादाय सामर्थ्यम्। तच्च 'नखैः कृत्वा भिन्नः' इत्यर्थे, 'नखैर्भिन्नः कृतः' इति वार्थे नखपदार्थभिन्नपदार्थयोः करणकर्मणोः कारकत्वेन कृञर्थव्यापारेऽन्वयेन सुलभमित्यत अत आह—असूर्यमिति—नञर्थनिषेधस्य सूर्यरूपकर्मकारकस्यापि क्रियायामन्वयेन मुख्यसामर्थ्यस्यैव सत्त्वेनासमर्थसमासपरकभाष्यविरोधापत्तिरिति भावः।

दर्पणव्याख्या

❀ अध्याहृतक्रियामादायेति ❀ करोत्यर्थव्यापारमादायेत्यर्थः। ❀ सामर्थ्यमिति ❀ तथाच 'नखैः कृत्वा भिन्नः' इति बोधाभ्युपगमेनाध्याहृतार्थमादाय सामर्थ्योपपत्तिरित्यर्थः। अध्याहृतक्रियामादाय सामर्थ्याऽभ्युपगमे दृष्टान्तमाह— ❀ दध्योदन इत्यादि ❀। ❀ विध्यानर्थक्यादिति ❀ अन्नेन व्यञ्जनम्' इत्यादेरपि पदविधित्वेन समर्थपरिभाषाविषयतया स्वतोऽसमर्थदध्यादिपदानां समासविधानवैयर्थ्यापत्त्योपसेचनादिक्रियाध्याहाराऽभ्युपगमेऽपीत्यर्थः।

❀ हरिकृतमिति ❀ कृधातोर्व्यापारार्थकत्वस्वीकारात्तन्निरूपितकर्तृत्वस्य हरौ साक्षात्सत्त्वादध्याहारं विनैव शास्त्रचारितार्थे 'हरित्रातः' इत्यादावध्याहृतक्रियाद्वारकसामर्थ्यमादाय तत्प्रवृत्तौ मानाभावादित्यर्थः। कृञो व्यापारार्थकत्वानभ्युपगमे त्वध्याहृतार्थस्यापि सामर्थ्यानुपपादकत्वाच्छास्त्रवैयर्थ्यमेव स्यादिति सूचनाय 'कृतम्' इत्युक्तम्। आदिना 'शरकृतम्' इत्यादिकरणतृतीयातत्पुरुषपरिग्रहः।

केचित्तु, कृदर्थकत्रैव तृतीयार्थकर्त्राक्षिप्तभावनामादाय 'हरित्रातः' इत्यादौ, 'नखैर्भिन्न' इत्यादौ तु करणसामर्थ्येनाध्याहृतां तामादाय सामर्थ्योपपत्तौ न तदनुपपत्तिर्धातोर्भावनावाचकत्वसाधिका। एवञ्च कृञः फलार्थकत्वेऽपि न समासानुपपत्तिरित्याहुः, तच्चिन्त्यम्।

❀ एकक्रियान्वयित्वमेवेति ❀ 'धवखदिरौ' इत्यादौ तस्य दृष्टत्वेनान्यत्रापि साक्षात्परम्परया वा तस्यैव समासप्रयोजकत्वमिति भावः। ❀ असूर्य्यम्पश्या इति ❀ नञर्थप्रसज्यप्रतिषेधस्य क्रियान्वयित्वस्य वक्ष्यमाणतया सूर्य्यस्यापि

इत्यादेरसमर्थसमासत्वानापत्तेः । इष्टापत्तौ कृतः सर्वो मृत्तिकयेत्यत्र 'कृतसर्वमृत्तिकः' इत्यापत्तेः । नचाऽत्र समासविधायकाभावः, "सह सुपा" (पा० सू० २ । १ । ४) इत्यस्य सत्त्वात् । अन्यथा असमर्थसमासोऽपि विधायकाभावान्न स्यादिति ।

किञ्च, भावनायास्तिङर्थत्वे 'भावयति घटम्' इतिवद् 'भवति घटम्' इत्यपि स्यात्, धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात् । नचाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्, आख्यातार्थव्यापाराश्रयस्य कर्तृत्वे 'पाचयति देवदत्तो विष्णुमित्रेण' इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः, 'ग्रामं गमयति देवदत्तो विष्णुमित्रम्' इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ

प्रभा

इत्यादेरिति—'अश्राद्धभोजी ब्राह्मणः' 'अपुनर्गेयाः श्लोकाः' इत्यादेः संग्रहः । कृतः सर्व इति—कृञर्थक्रियायां मृत्तिकापदार्थस्य करणतया, सर्वपदार्थस्य कर्मतया चान्वयेनोक्तसामर्थ्यस्य सत्त्वादिति भावः । नचात्रापीष्टापत्तिः, अत्र समासाभावस्यैव सर्वसम्मतत्वात् । अत एव 'सर्वचर्मणः कृतः' इति सूत्रे 'सर्वचर्मणः' इति निर्देशात् निपातनात् समास इत्युक्तम् । ननु कृतः सर्व इत्यादावनभिधानात् समासाभावः । यद्वा 'सह सुपा' इत्यस्यासार्वत्रिकत्वान्नोक्तापत्तिः, तेनैव सर्वत्र समाससिद्धौ 'द्वितीया श्रित' इत्यादिसूत्रवैयर्थ्येन तस्यासार्वत्रिकत्वज्ञापनात् । अन्यथा तत्तत्सूत्रैस्तत्पुरुषादिसंज्ञा एव विधीयेरन् । एवञ्च 'प्रथमानिर्दिष्टम्' इति सूत्रे समासव्याप्यसंज्ञाविधायकशास्त्रघटकप्रथमान्तपदनिर्दिष्टमुपसर्जनमित्यर्थकरणेनोपसर्जनसंज्ञाऽपि निर्वहेत् । अत एव 'सुपा' इत्यनेन समासस्यागतिकगतिकत्वं तत्र तत्रोक्तं सङ्गच्छते । 'देवत्रातो गलो ग्राहः' इति निर्देशात् 'कर्तृकरणे' इति न्यासेन 'सुपा' इत्यनुवृत्त्या च कृदन्तेनैव समासे सिद्धे कृद्ग्रहणसामर्थ्याच्च क्रियाद्वारकसामर्थ्यमादाय कृदन्तेन समासो भवतीति ज्ञापनेन सिद्धिरित्यत आह—किञ्चेति । धात्वर्थफलेति—उत्पत्तिरूपभूधात्वर्थफलाश्रयत्वरूपस्य कर्मत्वादित्यर्थः। नन्वियमापत्तिः 'फलव्यापारोभयमपि धात्वर्थः' इतिवादिमतेऽपि तुल्या, कर्तृसंज्ञया कर्मसंज्ञाया बाध इति समाधानमप्युभयसम्मतमित्यत आह—नचाख्यातेति—तथा दृष्टान्ते घटं भावयतीत्यादौ प्रयोजकव्यापारो णिजर्थः, दार्ष्टान्तिके घटो भवतीत्यत्र तु घटरूपप्रयोज्यव्यापार आख्यातार्थः । एवञ्च घटं भावयतीत्यत्र घटस्याख्यातार्थव्यापाराश्रयत्वाभावात् णिजर्थभावनां प्रति कर्मत्वम् । घटो भवतीत्यत्र घटस्याख्यातार्थव्यापाराश्रयत्वात् कर्तृसंज्ञया कर्मसंज्ञाया बाधात्कर्मत्वाभावः ।

अकर्तृतापत्ताविति—'गुरुः शिष्याभ्यां 'पाचयति'इति सर्वसम्मतवाक्यानुरोधेनाख्यातार्थव्यापारान्वयिन्येव तदर्थसंख्यान्वयनियमादाख्यातेन गुरोरुक्तत्वात् प्रथमा, तदनुरोधेन 'पाचयति'इत्यत्रैकवचनोपपत्तिश्च । प्रयोज्यस्याख्यातार्थव्यापाराश्रयत्वे पाचयतीत्येकवचनानुपपत्तिः, शिष्यशब्दात्प्रथमापत्तेश्च प्रयोज्यस्याख्यातार्थव्यापाराश्रयत्वाभावात् प्रयोज्यविष्णुमित्रस्याकर्तृत्वापत्तिरिति भावः । नच विष्णुमित्रस्य करणत्वविवक्षया करणतृतीयया निर्वाहः, कर्तुः प्रयोजकव्यापाराश्रयस्यैव हेतुसंज्ञाविधानेन तस्य करणत्वे णिजनुत्पत्त्यापत्तेः ।

दर्पणव्याख्या

कर्मकारकतया तदन्वयित्वेन भवदुक्तसामर्थ्यस्य तत्र सत्त्वादिति भावः । ❀ कृतसर्वमृत्तिक इति ❀ मृत्तिकायाः करणतया, सर्वपदार्थस्य कर्मतया कृधात्वर्थाऽन्वयित्वादिति भावः । योगविभागस्यानिष्टानापादकत्वादाह— ❀ किञ्चेति ।

❀ अकर्तृतापत्ताविति ❀ आख्यातार्थव्यापारानाश्रयत्वादिति शेषः । अस्मन्मते तु णिच्यकृत्यर्थव्यापाराश्रयत्वेन कर्तृत्वान्न तदनुपपत्तिरिति भावः । ननु विष्णुमित्रस्याऽकर्तृत्वेऽपि करणत्वविवक्षयैव तत्र तृतीया सुलभेत्यत आह—❀ ग्रामं गमयतीति ❀ 'कर्तुरीप्सिततमम्' इत्यनेन प्रकृतिकर्तृनिष्ठव्यापारजन्यफलसम्बन्धिन एव कर्मसंज्ञाविधानेन त्वन्मते विष्णु-

ग्रामस्य गमिकर्मत्वानापत्तेश्च। तथाच ग्रामाय गमयति देवदत्तो विष्णुमित्रम्' इत्यपि न स्यात्, "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" (पा० सू० २।३।१२) इति गत्यर्थकर्मण्येव चतुर्थीविधानात्। एतेन णिजन्ते आख्यातार्थ उभयम्, तदाश्रयत्वाद्देवदत्त-यज्ञदत्तयोः कर्तृतेत्यपास्तम्।

प्रभा

ननु 'फलव्यापारौ धात्वर्थः' इति मतेऽपि प्रयोज्यविष्णुमित्रस्य कर्मतया 'कर्तुरीप्सिततमम्' इत्यनेन ग्रामस्य कर्मत्वाप्राप्तौ तद्वारणाय तत्र सूत्रे कर्तृपदं स्वतन्त्रपरं वाच्यम्, स्वातन्त्र्यञ्च—'धात्वर्थफलानुकूलव्यापाराश्रयत्वरूपम्'इति मम मतेऽपि तस्य प्रयोज्ये सत्त्वाद्दोषाभाव इति चेन्न, फलानुकूलव्यापाराश्रयत्वस्य कारकमात्रेऽतिव्याप्तत्वादाख्यातार्थव्यापाराश्रयत्वस्यैवैतन्मते स्वातन्त्र्यपदार्थत्वात्तस्य च प्रयोज्येऽभावादुक्तदोषतादवस्थ्यात्। ननु प्रयोज्यस्य स्वतन्त्रार्थककर्तृपदेनाग्रहणेऽपि प्रयोजके उक्तस्वातन्त्र्यसत्त्वेन तन्निष्ठव्यापारजन्यं फलं प्रयोज्यव्यापारस्तादृशव्यापारजन्यं फलं सयोगादिरिति ग्रामवृत्तिसंयोगे कर्तृवृत्तिव्यापारजन्यत्वस्याभावेऽपि साक्षादुत्पाद्यं परम्परया चोत्पाद्यं यत्तदुभयसाधारणस्य प्रयोज्यत्वस्य सत्त्वेन प्रयोजककर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वमादाय कर्मत्वाद् द्वितीयासिद्धिरित्यत आह—**गमिकर्मत्वेति**—णिच्प्रकृतिगमिनिरूपितकर्मत्वानापत्तेरित्यर्थः। **तथाचेति**—णिच्प्रकृतिगमेः कर्मत्वाभावे चेत्यर्थः। **गत्यर्थकर्मण्येवेति**—फलमात्रस्य धात्वर्थतावादिनये गत्यर्थकर्मत्वञ्च—संयोगरूपगत्यर्थकधातुविहितलस्थानिकाख्यातार्थव्यापाराश्रयकर्तृनिष्ठाख्यातार्थव्यापारजन्यफलाश्रयत्वरूपम्, तच्च ग्रामे बाधितम्, प्रयोज्यव्यापारजन्यसंयोगरूपफलाश्रयत्वस्यैव ग्रामे सत्त्वात्, प्रयोज्यस्य च गत्यर्थकर्तृत्वाभावादिति भावः।

एतेन=उक्तरीत्या 'ग्रामाय' इति प्रयोगनिर्वाहेण। **उभयम्**—प्रयोज्यव्यापारः, प्रयोजकव्यापारश्चेत्यर्थः। **अपास्तमिति**—अयम्भावः—आख्यातस्य व्यापारद्वयाभिधायकत्वेन विष्णुमित्रस्य कर्तृत्वोपपादनेऽपि तत्कर्तृत्वस्य तिङाऽभिधानात्तृतीयानुपपत्तेरुक्तार्थकसूत्राप्राप्त्या चतुर्थ्यनापत्तेश्चेति भावः। ननु गत्यर्थकर्मपदेन गम्यर्थसंयोगाश्रयत्वे सति तदर्थव्यापारानाश्रयो विवक्षितः, लक्ष्यानुसारात्। किञ्च 'गत्यर्थकर्मणि' इति सूत्रं भाष्ये प्रत्याख्यातम्। तथाहि—"किमर्थं पुनरिदमुच्यते' चतुर्थी यथा स्यात्।.....चतुर्थ्यपि सिद्धा, कथम्? सम्प्रदान इत्येव, न सिध्यति, 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्युच्यते, क्रियया चासौ ग्राममभिप्रैति, कया क्रियया=गमिक्रियया, क्रियाग्रहणमपि तत्र (सम्प्रदाने) चोद्यते" इति। एवञ्च 'पत्ये

दर्पणव्याख्या

मित्रस्याकर्तृतया तद्व्यापारजन्यफलाश्रयस्यापि ग्रामस्याकर्मत्वेन तद्वाचकपदोत्तरं द्वितीयानापत्तिः, विष्णुमित्रस्य करणत्वे णिचोऽसम्भवश्च। धात्वर्थव्यापारजन्यफलाश्रयस्यैव कर्मत्वाङ्गीकारे तु णिजन्तकर्मतैव स्यान्न गमिकर्मतेति भावः। इष्टापत्तावाह—❀ तथाचेति ❀।

❀ एतेनेति ❀ आख्यातार्थव्यापाराश्रयस्य कर्तृत्वनिरासेनेत्यर्थः। ❀ णिजन्ते ❀ पाचयतीत्यादौ। ❀ उभयमिति ❀ प्रयोज्य—प्रयोजकव्यापारद्वयमित्यर्थः। ❀ तदाश्रयत्वादिति ❀ आख्यातार्थव्यापारद्वयाश्रत्वादित्यर्थः।

❀ अपास्तमिति ❀ अयं भावः—आख्यातस्य व्यापारद्वयाऽभिधायकत्वेन विष्णुमित्रस्य कर्तृत्वोपपादनेऽपि तत्कर्तृत्वस्याख्याताभिधानाद्देवदत्तपदोत्तरमिव विष्णुमित्रपदोत्तरं तृतीयादौर्लभ्यम्, एवमाख्यातार्थव्यापाराश्रयत्वस्योभयोरप्यविशिष्टत्वात् प्रधानव्यवहारोच्छेदापत्त्या "हेतुमति च" (पा० सू० ३।१।२६) इत्यनुशासनविरोधश्चेति।

Digitized by Digital Library Foundation

किञ्च, 'तस्मिन् प्रयोगे य आख्यातार्थः' इत्यस्यावश्यकत्वेनाऽऽख्यातशून्ये—'देवदत्तः पक्ता' इत्यादौ देवदत्तस्याऽकर्तृतापत्तेरिति दिक्।

सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य

प्रभा

शेते' इतिवत् चतुर्थ्यपि सिध्यतीत्यत आह—किञ्चेति।

तस्मिन्प्रयोग इति—यत्किञ्चिदाख्यातार्थव्यापाराश्रयतया सर्वत्रैवातिप्रसङ्गाद्यथा 'ग्रामं गच्छति देवदत्तः' इत्यत्र ग्रामस्याख्यातार्थव्यापारानाश्रयत्वेऽपि 'ग्रामोऽस्ति' इत्यत्र ग्रामस्यापि तदाश्रयत्वात्तदापत्तिरिति भावः। आख्यातशून्ये इति—ननु आख्यातशून्यस्थलेऽपि प्रथमाऽनुरोधेन तिङन्ताध्याहारस्यावश्यकता। अन्यथा 'तिङ्समानाधिकरणे प्रथमा' इति वार्तिकृदुक्तेः प्रथमायाः साधुत्वानापत्तिः। तथाच 'देवदत्तः पक्ता' इत्यादावप्यस्त्याद्यध्याहार आवश्यक इति तदाख्यातार्थव्यापाराश्रयत्वाद् देवदत्तस्य कर्तृत्वं स्यादिति चेन्न, अस्धात्वर्थनिरूपितकर्तृत्वेऽपि पचिनिरूपितकर्तृत्वस्य तत्राभावेन तृजनापत्तेः।

ननु 'कर्तरि कृत्' इति सूत्रारम्भसामर्थ्याद् यद्धातुप्रकृतिककृदर्थस्याक्षिप्ताख्यातार्थभावनाश्रयत्वं तस्माद्धातोः कर्तरि कृदित्यर्थेन कृत्प्रत्ययस्य व्यापारे कर्त्रादौ च शक्तिं स्वीकृत्य धातुप्रकृतिकप्रत्ययार्थव्यापाराश्रयत्वरूपकर्तृत्वस्वीकारे दोषाभाव इति चेन्न, क्लिष्टकल्पनापत्तेरित एवारुचेराह—दिगिति—दिगर्थस्तु—एवं क्लेशेन कर्तृत्वोपपादनापेक्षया धातोरेव फलव्यापारोभयार्थकत्वस्वीकारे लाघवम्। किञ्च, अनुकूलत्वसम्बन्धावच्छिन्नफलनिष्ठप्रकारतानिरूपितव्यापारनिष्ठविशेष्यताकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वाख्यातयोर्धातुकृतोश्च समभिव्याहाररूपाकाङ्क्षाज्ञानस्य कारणत्वं वाच्यम्। एवञ्च धात्वाख्यातानुपूर्व्याः, धातुकृदानुपूर्व्याश्च कारणताऽवच्छेदकत्वकल्पनापेक्षया धातुमात्रगतानुपूर्व्या एव कारणतावच्छेदकत्वकल्पने लाघवमपि धातोः फलव्यापारार्थकत्वसाधकमिति दिक्।

सूत्रानुपपत्तिमिति—ननु 'भूवादयः' इत्यस्य भूरादिर्येषामित्यर्थे बहुव्रीहिणा भूप्रभृतयो धातुसंज्ञका इत्येवार्थ उपलभ्यते, नतु भ्वादिगणपठिताः क्रियावाचिनो धातुसंज्ञकाः, सूत्रे क्रियावाचकशब्दाभावात्। नच 'भूवादयः' इति निर्देशानुपपत्तिः, निपातनाद्वकारागमसत्त्वात्। उक्तं भाष्ये—'मङ्गलार्थं वकारमागमं प्रयुङ्क्ते' इति। नचानर्थक्यम्, 'भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते' इति वार्तिककृतैव सफलत्वप्रदर्शनात्। यथा अकस्माद् दध्यादेर्दर्शनं मङ्गलसूचकं तथा उच्चारणमात्रेण मङ्गलसूचकोऽत्र वकारः। यद्वा

दर्पणव्याख्या

ननु णिजाख्यातार्थान्यतरार्थव्यापाराश्रयत्वं कर्तृत्वम्। अस्मन्मते फलमात्रस्य गणपठितधात्वर्थत्वेन तदनुकूलणिजर्थव्यापाराश्रयत्वेन विष्णुमित्रस्याऽपि कर्तृत्वाद्दौर्लभ्येन नोक्ताऽनुपपत्तिरत आह ❀ किञ्चेति ❀ आख्यातार्थव्यापाराश्रयत्वस्य केवलान्वयितया अव्यावर्तकत्वेनाऽऽख्यातं तद्वाक्यस्थत्वेनाऽवश्यं विशेषणीयम्। एवञ्च 'चैत्रः पक्ता' इत्यादावाख्यातशून्ये वाक्ये कृदर्थकर्तर्यव्याप्तिर्दुर्वारेत्यर्थः।

ननु 'अस्तिर्भवन्तीपरः' इति भाष्येणाख्यातप्रयोगस्य तत्राऽवश्यम्भावान्नोक्तापत्तिः। किञ्च, 'धातुविहितप्रत्ययवाच्यतदाक्षिप्ताऽन्यतरव्यापाराश्रयत्वं कर्तृत्वम्'। धातुविहितेति प्रत्ययविशेषणाच्च न करणतृतीयार्थव्यापाराश्रयेऽतिव्याप्तिः, उक्तस्थले कृद्वाच्यकर्त्राक्षिप्तव्यापाराश्रयत्वान्नोक्तदोषोऽत आह—❀ दिगिति ❀ तदर्थस्त्वितरनिवृत्तितात्पर्यकतादृशवाक्येऽस्त्यध्याहारस्यानावश्यकत्वादुक्तप्रकारस्य न साधीयस्त्वम्। किञ्चैवंरीत्या कर्तृत्वनिर्वचनाऽपेक्षया धातोर्व्यापारार्थकत्वमभ्युपगम्य तदाश्रयत्वमेव कर्तृत्वं निर्वक्तुमुचितम्, लाघवादित्यादिः।

SGDF Sri Gargeshwari Digital Foundation

स्वोत्प्रेक्षितत्वं निरस्यति–किञ्चेति । धातुसंज्ञाविधायकम्–"भूवादयो धातवः" (पा० सू० १ । ३ । १) इति सूत्रम् । तत्र भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारकवाचिनोरेकशेषः । आदिश्च आदिश्च आदी, ततो भूवौ आदी येषां ते भूवादयः । तथाच भूप्रभृतयो वासदृशा धातव इत्यर्थः । तच्च क्रियावाचकत्वेन । तथाच 'क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वम्' पर्य्यवसन्नम् । अत्र क्रियावाचित्वमात्रोक्तौ वर्ज्जनादिरूपक्रियावाचके

प्रभा

आगमीभूतवकारस्य सत्त्वेऽविकृतभूशब्दस्य श्रवणेन 'भूः' इति व्याहृतेः स्मारकतया वशब्दो मङ्गलसूचक इति न सूत्रानुपपत्तिः । 'फलमात्रं धात्वर्थः' इति मतेऽपि इत्याशङ्कायां 'भूवादयः' इत्यस्य सिद्धान्तार्थमाह—धातुसंज्ञेति । व्यवस्थाप्रकारेति—'तत आरम्भणं व्यवस्था'—प्रथमावधिरिति यावत् । तथाच भ्वादय इत्यस्य भूशब्दादारभ्य पठिता ये शब्दास्ते भ्वादय इत्यर्थः । तदुक्तं भाष्ये—'भू' इत्यत्र य आदिशब्दः स व्यवस्थायां वर्तते, 'वा' इत्यत्र य आदिशब्दः स प्रकारे, 'भू' इत्येवमादयो 'वा' इत्येवं प्रकारा इति । यद्यपि भूरादिप्रथमावयवो यस्य समुदायस्य ते भ्वादय इत्यपि वक्तुं शक्यते। उद्भूतावयवगतसङ्ख्याविवक्षया बहुत्वम्। तथापि भाष्यानुरोधेन तथोक्तम् ।

वासदृशा इति—वस्तुतस्तु सादृश्यप्रतियोगिताऽवच्छेदकीभूतधर्मस्य व्यापको यो धर्मस्तेनैव धर्मेण सादृश्यं गृह्यते। यथा 'क्षत्रियवद्ब्राह्मणोऽयम्' इत्यादौ क्षत्रियत्वव्यापकवीरत्वेन सादृश्यम् । तथाच प्रकृते कालेन साक्षादवच्छिन्नत्वरूपक्रियावाचकत्वस्य सादृश्यप्रयोजकत्वं प्रकृते न सम्भवति, वात्वरूपसादृश्यप्रतियोगितावच्छेदकस्याव्यये वाशब्देऽपि सत्त्वेन तत्र चोक्तक्रियावाचकत्वस्याभावेन क्रियावाचकत्वे वात्वव्यापकत्वाभावात् । किञ्चैकपदोपस्थापितयोः क्वचिद्भेदेनान्वयस्य व्युत्पन्नत्वेऽपि अभेदेनान्वयस्याव्युत्पन्नतया 'भूवादयः' इत्येकपदेनोपस्थापितयोः 'भूप्रभृतयः' 'क्रियावाचिनः' इत्यर्थयोः परस्परमभेदान्वयानुपपत्तिः । किञ्च, एकधर्मावच्छिन्नस्यैकसम्बन्धेनैकधर्मावच्छिन्नेऽन्वयरूपसाहित्यस्याभावेन द्वन्द्वानुपपत्तिरिति प्रकारान्तरेण तथाविधार्थोपलब्धव्यः । तथाहि—भूवादयश्च भूवादयश्चेति भूवादयः, तन्त्रेणायं निर्देशः, एकत्रादिशब्दः प्रकारार्थः, अपरत्र प्रभृत्यर्थः, बोधश्च विशिष्टावृत्त्या । एवञ्चानव्ययभूशब्दसाहचर्याद् वा शब्दोऽप्यनव्यय एव गृह्यते । अनव्ययवाशब्दश्च क्रियावाची इति तत्साहचर्य्यात् क्रियावाची एव भूशब्दो गृह्यते, इति परस्परसाहचर्य्यात् क्रियावाचिन इत्यर्थलाभः । तत्र क्रियावाचिन इत्यस्य यदि क्रियात्वावच्छिन्नशक्यतानिरूपितशक्तितावन्त इत्यर्थस्तदा क्रियात्वव्याप्यधर्मेण क्रियावाचकानां पच्यादीनां धातुत्वानापत्तिः । अतः क्रियात्वव्याप्यधर्मावच्छिन्नवाचिन इत्येवार्थः । तथाच क्रियासामान्यवाचिनाम् , क्रियाविशेषवाचिनाञ्च धातुसंज्ञा सिद्ध्यति । यद्वा, धातुत्वरूपशक्तितावच्छेदकत्वेन सर्वे धातवः क्रियासामान्यवाचकाः । तत्तदानुपूर्वीरूपेण तु क्रियाविशेषवाचका इति क्रियात्वावच्छिन्नवाचका अपीति क्रियावाचिन इत्यस्य यथाश्रुतार्थकत्वेपि न दोषः । अत एव परममूले उक्तम्—'धातुत्वेन सकलधातुवाच्या' इति ।

तच्चेति—सादृश्यञ्चेत्यर्थः । क्रियावाचकत्वेनेति–न तु शब्दत्वेन, प्रकृतित्वेन वा । आद्येऽव्यावर्तकत्वेन तद्विशेषणवैयर्थ्यापत्तेः । द्वितीये निपाते वाशब्दादावतिव्याप्तेः । अत एव नासत्त्ववाचित्वेनापि,

दर्पणव्याख्या

❀ स्वोत्प्रेक्षितत्वमिति ❀ निर्मूलस्वकल्पनाविषयत्वमित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

'हिरुक्' 'नाना' इत्यादावतिव्याप्तिरिति 'भ्वादिगणपठितत्वम्' उक्तम् ॥९॥

तावन्मात्रोक्तौ चाऽह—

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः ।
नहि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम् ॥ १० ॥

गणपठितत्वमात्रोक्तौ सर्वनामाव्ययानामपि धातुत्वं स्यात् । तथाच—'याः पश्यसि' इत्यादौ "आतो धातोः" (पा० सू० ६ । ४ । १४०) इत्याकारलोपापत्तिः । ननु लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणम्, तस्य लाक्षणिकत्वादित्यत आह—वेत्यादि ।

प्रभा

अव्यये दोषावारणात् । नचादादित्वेन सादृश्यम्, भ्वादीनां स्तम्भ्वादीनाञ्च वादिबहिर्भूततयाऽसङ्ग्रहापत्तेः । किन्तु क्रियावाचकत्वेनैव । तथाच भाष्यम्—'कथं पुनर्ज्ञायते क्रियावचनाः पच्यादय इति, यदेतेषां करोतिना सामानाधिकरण्यम्' इति । हिरुङ्नानेति—क्रियावाचित्वस्य क्रियाबोधकत्वार्थकत्वपरत्वे इदं दूषणम्, हिरुगादीनां क्रियाविशेषणत्वेन तद्बोधकत्वात् । वस्तुतस्तु साक्षात्कालावच्छिन्नत्वस्य, कारकान्वयितावच्छेदकधर्मवत्त्वस्य वा हिरुगाद्यर्थवर्जनादावभावादाह—आदाविति—आदिना 'शिश्ये' इत्यादिभावतिङन्तघटकतिङो ग्रहणं बोध्यम् ॥ ९ ॥

तावन्मात्रेति—भ्वादिगणपठितत्वमात्रोक्तावित्यर्थः । सर्वनामेति—ननु यच्छब्दनिष्पन्नयाशब्दस्याव्ययस्य 'वा' 'मा' 'नु' इत्यादेश्च भ्वादिगणपठितत्वाभावाद् धातुत्वाप्राप्तिः । किञ्च, भ्वादिगणोऽदादितः पूर्व एवेति अदादीनां धातुसंज्ञा न स्यादिति चेन्न, 'भूवादयः' इति सूत्रे भ्वादिपदेन भूशब्दादारभ्य धातुपाठान्तकण्ड्वादिगणचरम'सम्बर' शब्दपर्यन्तानां त्रिनवत्यधिकनवशतीसहितसहस्रसंख्याकानाम् (१९९३) सौत्राणाञ्च ग्रहणात् । अत एव तत्तद्गणोक्तधातुषु धात्वधिकारोक्तकार्यसिद्धिः । अत्र प्रमाणञ्च गणविशेषप्रयुक्तकार्यविधायक 'अदिप्रभृतिभ्यः' इत्यादिसूत्रकदम्बकमेव । नन्वेवमपि लक्ष्यस्थानां भ्वादीनामाबन्तयादीनामव्ययानाञ्च गणबाह्यत्वमेवेति कथं लक्ष्याणां संग्रहोऽतिव्याप्तिश्चेति चेदत्रोच्यते—भ्वादिगणपठितत्वमित्यस्य भ्वादिगणपठितवृत्त्यानुपूर्वीमत्त्वमर्थ इत्यव्याप्तेः परिहारेऽपि 'या' 'वा' 'मा' 'नु' इत्यादिष्वतिव्याप्तेस्तादवस्थ्यात् । एवमेव सर्वत्र गणसूत्रेषु बोध्यम् । यथा 'सर्वादीनि सर्वनामानि' सर्वादिगणपठितशब्दवृत्त्यानुपूर्वीमन्ति सर्वनामसंज्ञकानीत्येवार्थः । अन्यथा कुत्रापि लक्ष्ये गणप्रयुक्तं कार्यं न स्यादिति तत्तत्सूत्रवैयर्थ्यापत्तिः ।

प्रतिपदोक्तेति—स्वविशिष्टं स्वघटकपदेन प्रतिपदोक्ततया गृह्यते । वैशिष्ट्यञ्च—स्वीयोद्देश्यतावच्छेदकरूपावच्छिन्नविधेयताश्रयत्वम्, स्वीयोद्देश्यतावच्छेदकसमर्पकज्ञानविषयीभूतानुपूर्वीविशिष्टविधेयताश्रयत्वमि-

---

दर्पणव्याख्या

❀ हिरुगिति ❀ यथाश्रुतमनुरुध्य चेदम्, तदर्थस्य कालानन्वितत्वेन क्रियात्वासम्भवात् । किन्तु तावन्मात्रोक्तौ 'आर्णवयति' इत्यादावतिव्याप्तिर्बोध्या, तेषां धातुत्वे च शास्त्रविषयतया साधुत्वापत्तेरिति बोध्यम् ॥ ९ ॥

तावन्मात्रोक्तावित्यत्र मात्रपदेन क्रियावाचकत्वदलव्यवच्छेदः । इष्टापत्तिमाशङ्क्याह ❀ तथाचेति ❀ 'याः' इत्यस्य द्वितीयान्तत्वं सूचयितुमाह ❀ पश्यसीति ❀ ।

❀ लक्षणप्रतीति ❀ लक्ष्यते = अन्वाख्यायते साधुशब्दोऽनेनेति लक्षणम् = सूत्रम् । तदनुसन्धानसापेक्षत्वोपचारेण

अव्यये = 'वा' इत्यादावतिप्रसङ्गः, तादृशस्यैव गणे पाठेन निर्णयासम्भवात्। तथाच विकल्पार्थकः 'वाति' इति प्रयोगः स्यादिति भावः। नच गतिगन्धनाद्यर्थनिर्देशो नियामकः, तस्य "अर्थानादेशनात्"

प्रभा

त्युभयसम्बन्धेन। विधेयतायामानुपूर्वीवैशिष्ट्यञ्च—स्वावच्छिन्नत्वम्, स्वावच्छिन्नपदप्रयोज्योद्देश्यतानिरूपितत्वमित्येतदन्यतरसम्बन्धेन। स्वविशिष्टमित्यत्र स्वपदेन यत्र सूत्रे परिभाषा प्रवर्तनीया तत्सूत्रं ग्राह्यम्। यथा 'गातिस्थाघुपा' इति। आद्यसम्बन्धनिवेशेन 'गतिकारकपूर्वपदस्य यणिष्यते' इति वार्तिके परिभाषाया अप्रवृत्त्या 'आध्यै' 'प्रध्यै' इति भाष्योक्तबहुव्रीहावपि यण्सिद्धिः, गतित्वावच्छिन्नविधेयताश्रयत्वस्य समासेऽसम्भवाद्। विशेषेण बहुव्रीहितत्पुरुषयोरुभयोर्ग्रहणात्। द्वितीयसम्बन्धदानात् 'विभाषा दिक्समासे' इत्यत्र स्वघटकदिक्पदवृत्त्यानुपूर्वीमत्पदघटित 'दिङ्नामानि' इति शास्त्रविहितबहुव्रीहेरेव ग्रहणम्। अत्रोद्देश्यतावच्छेदकसमर्पकज्ञानेति विशेषणेन 'तृतीयासमासे' इति सूत्रीयसर्वादित्वज्ञानायोपयुज्यमानपूर्वत्वादिरूपानुपूर्वीमत्पूर्वपदघटित 'पूर्वसदृश' इति विहिततृतीयासमासस्यैव ग्रहणम्।

यत्तु, 'भूवादयः' इति सूत्रे 'लक्षणप्रतिपदोक्तयोः' इति परिभाषा न प्रवर्तते। अन्यथा

'नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारजश्शकारश्चेर्षाट्टवर्गस्तवर्गजः' ॥

इत्याप्तोक्तेरनुस्वारादिघटितानां धातुसंज्ञा न स्याल्लाक्षणिकत्वादिति तन्न, 'भूवादयः' इति सूत्रदृष्ट्याऽनुस्वारादीनामसिद्धत्वेन तेषामपि प्रतिपदोक्तानामेवोपलब्धेः। 'आतोऽनापः' इति न्यासे दोषाभावेनाह—अव्यये वेति—आदावित्यादिना 'मा' 'नु' इत्याद्यव्ययानां संग्रहः। ननु 'वा' इत्यस्य धातुत्वेऽपि न क्षतिः, 'वाति' इति प्रयोगस्येष्टत्वादिति चेन्न, गत्यर्थस्य वातीत्यस्येष्टत्वेऽपि विकल्पार्थे तस्यानिष्टत्वात्, तदाह—विकल्पार्थक इति—तथाच विकल्पार्थके वातीत्यस्यानिष्टत्वमिति भावः।

नियामक इति—एवञ्च गतिगन्धनयोर्वाशब्दो भ्वादिः। एवं मानेऽर्थे माङ्शब्दो भ्वादिरित्येवं रूपेण नियामकत्वे विकल्पेऽर्थे वाशब्दस्य भ्वादित्वाभाव इति भावः। तस्य = अर्थनिर्देशस्य। अनादेशनात् = अक-

दर्पणव्याख्या

लाक्षणिकमपि लक्षणशब्देनोच्यते। यथा 'पै' इत्यस्य 'पा' इति रूपं विलम्बोपस्थितिकम्, लक्षणाऽनुसन्धानसापेक्षत्वात्। प्रतिपदोक्तं तु तद्विभक्तिविशेषानुवादेन पठितं शीघ्रोपस्थितिकम्, लक्षणानुसन्धानानपेक्षणादिति। यथा पिबतेः 'पा' इति रूपम्। तथाच शीघ्रोपस्थितिकत्वं प्रतिपदोक्तग्रहणे बीजम्, तच्च 'या' इति गणपठिते एव, सर्वनाम्नि लक्षणानुसंधानसापेक्षेति भावः। अव्यये = वेत्यादावित्यादिना, सु-इत्युपसर्गस्य, मा माङिति स्वराद्योश्च संग्रहः। षत्वप्रकरणपाठादुपसर्गव्यावृत्तिर्न शङ्क्या, षिध्वादिसंग्रहाय पारिभाषितषोपदेशत्वस्य तत्राऽपि सत्त्वात्।

❀ प्रयोगः स्यादिति ❀ उपलक्षणञ्चैतत्—सुवति, माति, मिमीते, इत्यादिप्रयोगाणाम्। षूङ् प्राणिप्रसवे, मा माङ् माने इत्यादिधातूनां सत्त्वेन तन्निर्णयासम्भवात्। सत्यन्तोक्तौ तु न दोषः, वाद्यर्थस्य विकल्पादेर्भूतादिकालासम्बन्धेन क्रियाभावादिति भावः। ❀ नियामक इति ❀। गणे पठितानामेव धातुत्वस्याभिप्रेतत्वेऽर्थनिर्देशवैयर्थ्यापत्त्या निर्दिष्टार्थानामेव धातुत्वं ज्ञाप्यते इत्यर्थः। ❀तस्य❀ अर्थनिर्देशस्य। ❀अर्थानादेशनादिति❀ अर्थस्य सत्तादेः, अनादेशनादनाज्ञानादित्यर्थः।

इति भाष्यपर्य्यालोचनया आधुनिकत्वलाभात् ॥ १० ॥

नन्वस्तु 'क्रियावाचकत्वे सति गणपठितत्वं धातुत्वम्', क्रिया च धात्वर्थ एव, न व्यापार इत्याशङ्कां समाधत्ते—

धात्वर्थत्वं क्रियात्वञ्चेद्धातुत्वं च क्रियार्थता ।
अन्योऽन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाऽऽकरम् ॥ ११ ॥

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे च तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम् । यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ज्ञप्तौ वा प्रतिबन्धकत्वाभ्युपगमेनासङ्गत्यापत्तेः ।

प्रभा

थनात् । गणपाठकृता पाणिनिना इति शेषः । गणपाठे प्रायो धातुमात्रस्यैव पाठो नत्वर्थस्येति भावः । अत एव 'भूवादयः' इति सूत्रे भाष्ये 'परिमाणग्रहणं कर्तव्यम्, इयानवधिर्धातुसंज्ञो भवतीति वक्तव्यम् । कुतो ह्येतद्भूशब्दो धातुसंज्ञो भवति, न पुनर्भ्वेधशब्द इति' । इति भाष्य-वार्तिकयोः सङ्गतिः । यदि 'भू सत्तायाम्' 'एध वृद्धौ' इति पाठः स्यात्तदा गणे भ्वेधशब्दाभावात् तदसङ्गतिः स्पष्टैव । नच 'चुटू' इति सूत्रभाष्ये 'उबुन्दिर् निशामने' 'स्कन्दिर् गतिशोषणयोः' इति अर्थनिर्देशासङ्गतिः, क्वचिदर्थनिर्देशेऽपि सर्वत्र तथात्वाभावात् । अत एव 'नमो वरिवस' इति सूत्रे भाष्ये उक्तम्—'एवमर्थं खल्वप्याचार्यश्चित्रयति क्वचिदर्थानादिशति क्वचिन्नेति' । अत एव 'कूर्द खूर्द गूर्द क्रीडायामेव'इत्येवकारग्रहणस्य धातूनामनेकार्थत्वेऽभियुक्तोक्ता ज्ञापकता संगच्छते । आधुनिकत्वेति—आधुनिको हि अर्थनिर्देशो न त्वार्ष इति भावः । सत्यन्तोपादाने तु न दोषः, वाद्यर्थस्य कालानन्वयित्वेनाक्रियात्वात् ॥ १० ॥

धात्वर्थ एव = फलमेव । धातुत्वग्रहे = धातुत्वज्ञाने । तदर्थेति—धात्वर्थेत्यर्थः । क्रियात्वग्रहः = क्रियात्वज्ञानम् । तदवच्छिन्नेति—क्रियात्वावच्छिन्नक्रियेत्यर्थः । अन्योऽन्याश्रय इति—सामान्यलक्षणन्तु परस्परापेक्षितत्वमेव । एष च दोषः ज्ञाने, उत्पत्तौ, स्थितौ च । यथा-कार्यत्वज्ञानकारणत्वज्ञानयोः, वटोत्पत्तिबीजोत्पत्त्योः, जलस्थितिपृथिवीस्थित्योः । उत्पत्तौ ज्ञप्तौ वेति—उत्पत्तावस्य दूषकताबीजन्तु तर्क एव । तथाहि—घटो

दर्पणव्याख्या

❀ आधुनिकत्वलाभादिति ❀ भीमसेनादिप्रणीतत्वावगतेरित्यर्थः । तथाच भूवादिसूत्रे 'परिमाणग्रहणं कर्त्तव्यम्, कुतो ह्येतत्, भूशब्दो धातुसंज्ञको भवति, न पुनर्भ्वेधशब्द इति,' यद्यप्यर्थनिर्देशस्य सूत्रकृत्प्रणीतत्वमपि । तथाच "चुटू" (पा० सू० १।३।७) इति सूत्रे-यदयमिरितः कांश्चिन्नुमनुषक्तान् पठति, उबुन्दिर् निशामने, स्कन्दिर्गतिशोषणयोः, इति । तेन नेरितामिदिद्विधिरिति भाष्ये उक्तम् । तथापि भाष्यद्वयप्रामाण्यात्सर्वधात्वर्थनिर्देशस्यापाणिनीयत्वेन न तन्निर्देशस्य नियामकतेति भावः । चुलुम्पादीनां स्तम्भ्वादीनां च 'कास्यनेकाच आम्'इतिवचनादुदित्करणाच्च धातुतेति दिक् ॥ १० ॥

❀ धात्वर्थत्वमेवेति ❀ फलमेवेत्यर्थः । तथाच नैतत्सूत्रानुपपत्तिर्धातोर्व्यापारार्थत्वसाधिकेति भावः । ❀ उत्पत्ताविति ❀ यथाबीजाऽङ्कुराद्युत्पत्तौ अनादित्वेन तत्परिहार इत्यन्यत् । यथा वा चैत्रपुत्रश्चैत्र इत्यादौ, तत्राप्येकोत्पत्तिं विनाऽपरानुपपत्तेः । ❀ ज्ञप्ताविति ❀ । हलन्त्यमित्यादौ प्रसिद्धः । ❀ असङ्गत्यापत्तेरिति ❀ । यथा पृथिवी-जलयोराधाराधेयभाव इत्यादावुभयोः परस्पराधाराधेयभावेन स्थितेः सर्वैरेवाभ्युपगमात् । प्रकृते वस्तुतो धात्वर्थस्य क्रियात्वे क्रियात्वस्य धात्वर्थत्वे बाधकाभावेन तत्र दूषणदानस्यानुचितत्वापत्तेरित्यर्थः ।

नच 'अन्यतमत्वं धातुत्वम्', "भूवादयः" इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह— अस्त्विति। व्यापारसन्तानः क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः। ननु सत्तादीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम्। धात्वर्थत्वात् तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्न, अन्यतममध्ये विकल्पस्यापि 'विकल्पयति'इति प्रयोगानुसारात् प्रवेशावश्यकत्वेन तदर्थके 'वा' इत्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनाऽतिव्याप्तेरिति ॥ ११ ॥

प्रभा

यदि घटजन्यः स्यात्तदा घटभिन्नः स्यात्, कारणस्य कार्याव्यवहितप्राक्क्षणवृत्तित्वनियमादिति। एवं ज्ञप्त्यादावपि बोध्यम्। वस्तुतस्तु धात्वर्थस्य क्रियात्वे, क्रियात्वस्य च धात्वर्थतायामविवादात्तत्र दूषणोद्भावनमनुचितमिति ग्रहपदं पूरयित्वेत्युक्तमिति पर्यवसितोऽर्थः। यत्रोत्पत्तौ अनादित्वं तत्रान्योन्याश्रयो न क्षतिकरः, बीजाङ्कुरवत्। एवं स्थितावपि बोध्यम्। यावन्तो धातुपदव्यवहार्यास्तान्निर्दिश्यैतदन्यतमत्वं धातुत्वम् 'धात्वर्थत्वं क्रियात्वञ्चेत्' इति कारिकायां ग्राह्यमतो नान्योन्याश्रय इत्याह—अन्यतमत्वमिति—भ्वादिभिन्नभिन्नत्वरूपमित्यर्थः। भ्वादिभिन्ना ये तद्भिन्नत्वं भ्वादिष्वेवेति तत्त्वं सुवचम्। यदि तु उक्तान्यतमत्वलक्षणे जगतः प्रवेशाद् गौरवं तदा भ्वादिप्रतियोगिकयावद्भेदकूटाभाववत्त्वमेवान्यतमत्त्वं ग्राह्यम्। लघुभूतं तदेवादाय धातूद्देश्यककार्यसिद्धौ संज्ञाविधायकशास्त्रस्य निष्प्रयोजनत्वापत्तिरित्याह—वैयर्थ्यापत्तेरिति।

केचित्तु मीमांसको धात्वर्थत्वं क्रियात्वं यदि ब्रूयास्तदाऽन्योन्याश्रयो दोषस्तव मते इति वैयाकरणं प्रति दोषमुक्त्वा 'तस्मादाख्यातार्थः क्रिया' इत्याह—वैयाकरणः समाधत्ते—अस्त्विति—'व्यापारसन्तानः क्रिया' तद्वाचको धातुरिति नान्योन्याश्रय इत्यर्थ इत्याहुः। लक्षणमिति—सूत्रजन्यवाक्यार्थरूपमित्यर्थः। नन्वेवं 'कथं पुनर्ज्ञायते क्रियावचनाः पच्यादयो यदेतेषां करोतिना सामानाधिकरण्यम्' इति भाष्यविरोधः, फलांशस्य करोतिना सामानाधिकरण्याभावादत आह—धात्वर्थत्वादिति—तथाच गौणस्तत्र क्रियात्वव्यवहार इत्याशयः। 'कर्मवत्कर्मणा तुल्य' इति सूत्रे 'क्रिया' शब्देन फलस्यैव ग्रहणात्। तेषाम्=फलानाम्। विकल्पयतीति—कृपधातोरेव 'विकल्पयति' इति प्रयोगानुसारेण विकल्परूपफलार्थकत्वमावश्यकम्। तथाच तादृशफलवाचक 'वा' इत्यव्ययस्य धातुत्वं दुर्वारमिति भावः। अस्यैव=क्रियावाचकत्वे सति गणपठितत्वस्यैव ॥ ११ ॥

दर्पणव्याख्या

❀ अन्यतमत्वमिति ❀। भ्वादिभिन्नभिन्नत्वमित्यर्थः ॥

❀ वैयर्थ्यापत्तेरिति ❀ तावतैवातिप्रसङ्गभङ्गे गुरुधर्मावच्छिन्नशक्तिप्रतिपादकस्य तस्यानतिप्रयोजनकत्वापत्तेरित्यर्थः। दृष्टफलाभावादिति भावः। केचित्तु भ्वादिषु धातुरित्यनुगतव्यवहारात् क्रियात्वमपि जातिरेव शक्यतावच्छेदकतयेव शक्तावच्छेदकतयाप्यसति बाधके जातिसिद्धेर्निष्प्रत्यूहत्वात्। भूवादिसूत्रं त्वनभिज्ञप्रतीतिपरम्, तादृशजातिपरिचायकप्रदर्शकमित्याहुः।

नन्वस्मन्मते पूर्वापरीभूतावयवसमुदायरूपक्रियाया धात्वर्थत्वेन तद्गृहीतपौर्वापर्यारोपेण फलस्य क्रियात्वोपपत्तिः। भवन्मते तु क्रियाया धात्वर्थत्वानुपगमेन कथं तत्र तद्व्यवहारोऽत आह ❀ धात्वर्थत्वादिति ❀ तथाच तत्र फलत्वव्यवहार इव क्रियात्वव्यवहारोऽपि धात्वर्थत्वप्रयोजकत्वाऽभ्युपगमेन तदुत्पत्तेरिति भावः। ❀ भाष्यादौ कृत इति ❀ "कर्मवत्कर्मणा" इति सूत्रे 'भूवादि' सूत्रे च भाष्यादावित्यर्थः। आदिपदात् वृत्त्यादिपरिग्रहः ॥ ११ ॥

SGDF Sarayu Trust Digital Foundation

नन्वस्यैव धातुत्वे 'अस्ति' इत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह—

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥ १२ ॥

अस्त्यादौ = 'अस् भुवि' इत्यादौ, धर्म्यंशे=धर्म्मिभागे, भाव्ये = भाव्यत्वेन विवक्षिते, अस्त्येव = प्रतीयत एव । अयमर्थः—'स ततो गतो न वा'इति प्रश्ने, महता यत्नेन 'अस्ति' इति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव ।

प्रभा

क्रियेति—तत्तत्कालसम्बन्धरूपसत्तायाः, जातिरूपसत्तायां वा एवं प्रतीतेः क्रियावाचकत्वाभाव इति भावः । धर्मिभागे—धर्मः = फलं तदस्यास्तीति धर्मी = कर्त्ता, अकर्मकधातुस्थले फलाश्रयस्य कर्तृत्वात् । तथाच धर्मिभागे इत्यस्य धर्मिणि (कर्तरि) प्रकारतया भासमाने फले इत्यर्थः । धर्मिणो धर्मघटिततया फले धर्म्यंशव्यवहारः । फलस्य भाव्यतायां विवादादाह—भाव्यत्वेन विवक्षित इति । अयमर्थः = अयमभिप्रायः । गतो न वेति प्रश्न इति—अनेन भाव्यजिज्ञासा ध्वनिता । सा च भाव्यस्य बोधेनैव निवर्तेत । यद्युत्तरवाक्याद् भाव्य (फल) बोधो न स्यात्तदा—

'जिज्ञासितपदार्थस्य संसर्गो येन गम्यते ।
तदुत्तरमिति प्रोक्तमन्यदाभासशब्दितम् ॥

इत्यभियुक्तोक्तिविरोधादुत्तरवाक्यत्वानुपपत्तिः । प्रतीयत इति—उत्पत्त्यनुकूलव्यापार आत्म (स्वरूप) धारणानुकूलव्यापारश्चास्त्यादीनामित्यर्थः । तत्तद्धर्मिणि उत्पाद्यत्वेन विवक्षिते सति 'रोहितो लोहितादासीत्' इत्यत्र उत्पत्त्यनुकूलो व्यापारः प्रतीयत एव ।

दर्पणव्याख्या

❀ अस्यैवेति ❀ क्रियावाचकस्यैवेत्यर्थः । एवकारेण फलमात्रवाचकत्वव्यवच्छेदः । एतदवाचकत्वे हेतुः ❀ क्रियाप्रतीत्यभावादिति ❀ तदवाचकानाम् = व्यापारावाचकानामित्यर्थः । ❀ अधातुत्वप्रसङ्ग इति ❀ । आपत्तेरिष्टत्वं तु न, ततो लकाराद्यनुत्पत्तिप्रसङ्गादिति भावः ॥

❀ धर्म्यंशे ❀ फलरूपे इत्यर्थः । अंशपदोपादानात् धर्मिणो धर्मघटितमूर्त्तिकत्वादकर्मकस्थले कर्तृवृत्तित्वाच्च फलस्यापि तदंशत्वात् तस्य भाव्यतायामेव विवादादाह ❀ भाव्यत्वेनेति ❀ भावनानिष्पाद्यत्वेनेत्यर्थः । फलसाध्यव्यापारस्य जिज्ञासितत्वे इति यावत् । अत एव वक्ष्यति 'आसन्नविनाशम्' इति । विवक्षास्थलमेव प्रश्नोत्तरभावेन दर्शयति ❀ स ततो गतो न वेति ❀ गत्यर्थाऽकर्मकेति कर्त्तरि क्तः । प्रश्न इत्यनेन भाव्यत्वस्य जिज्ञास्यत्वं ध्वन्यते । तथाच गतो न वा किमिति प्रश्नाऽऽकारः ।

❀ प्रयोग इति ❀ प्रश्ननिवर्त्तके वाक्य इत्यर्थः । ❀ प्रतीयते एव ❀ इत्यस्यास्धातुनेति शेषः । ननु स ततो गतो न वेति वाक्याद् गेहाद्यवधिकविभागानुकूलव्यापाराश्रयत्वतदभावान्यतरस्य जिज्ञास्यत्वमवगम्यते । महता यत्नेनाऽस्तीति वाक्यात्त्वस्तेर्व्यापारार्थकत्वाभ्युपगमेऽपि चैत्रादिकर्तृकसत्ताऽनुकूलव्यापार एवेति कथमेतयोः प्रश्नोत्तरत्वम् ? तथाहि—यद्धर्मावच्छिन्ने जिज्ञासितयद्धर्माऽवच्छिन्नस्य सम्बन्धो यत्प्रश्नवाक्यात् प्रतीयते तद्धर्मावच्छिन्ने जिज्ञासिततद्धर्मावच्छिन्नसम्बन्धबोधकवाक्यस्योत्तरता । यदाहुः—

SGDF Sri Gangeshwari Digital Foundation

उत्पत्त्यादिबोधने तु सुतराम् ।

रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत् । (रामायणम्) ।

इत्यादिदर्शनात् ।

किञ्च, अत्र भावनाविरहे लडादिव्यवस्था न स्यात्, तस्या एव वर्त्तमानत्वादिविवक्षायां तद्विधानात् ।

"क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका"

इति वाक्यपदीयादिति ।

नन्वेवम् अस्ति इत्यत्र स्पष्टं कुतो न बुद्ध्यत इत्यत आह—अन्यत्रेति ।

प्रभा

उत्पत्त्यादीति—उत्पत्त्याद्यर्थकत्वे मानन्तु 'धान्यानां भवने क्षेत्रे' 'तत्र भवः' इति निर्देश एव । आसीदिति—अभवदित्यर्थः । वाल्मीकीयरामायणे वंशवर्णनमिदम् । तस्या एव = भावनाया एव । एवेन फलांशव्यवच्छेदः ।

क्रियाभेदायेति—स्व (काल) विशिष्टक्रियाया इतरक्रियातो व्यावृत्तये इत्यर्थः । तदुक्तं भाष्ये—'नान्तरेण क्रियां भूतभविष्यद्वर्तमानाः काला व्यज्यन्ते । अस्त्यादिभिरपि भूतभविष्यद्वर्तमानाः काला व्यज्यन्ते' इति । अस्तिभवतिविद्यतीनामात्मभरणमित्यर्थः । आत्माऽत्र सत्ता । सत्ता च षड्भावविकाराः—जन्म, सत्ता, वृद्धिः, परिणामः, अपचयः, विनाशः । तत्र आविनाशरूपषष्ठविकारादनुस्यूतं सदिति प्रत्ययवेद्यं यद्रूपं तत् । निरुक्तेऽपि—'अस्तीत्युत्पन्नस्य सत्त्वावधारणात्' इति । अस्तीति चोत्पन्नस्य सत्त्वस्य = सत्तावतोऽवधारणमाचष्टे इति तद्भाष्यकृतः । सर्वस्य—क्रियायास्तद्भिन्नस्य च । एवम् = धातुमात्रस्य क्रियावाचकत्वे । अन्यत्र = सकर्मकस्थलभिन्नस्थलेऽकर्मके इत्यर्थः ।

दर्पणव्याख्या

जिज्ञासितपदार्थस्य संसर्गो येन गम्यते ।
तदुत्तरमिति प्रोक्तमन्यदाऽऽभासशब्दितम् ॥ इति ।

यथा घटत्वावच्छिन्नं जिज्ञासितधर्मावच्छिन्नसम्बन्धबोधकस्य, कस्माद् घट इति प्रश्नवाक्यस्य घटत्वावच्छिन्ने जिज्ञासितदण्डत्वाऽवच्छिन्नस्य हेतुहेतुमद्भावबोधकम् 'दण्डाद् घटः' इति वाक्यमुत्तरम् । प्रकृते तु, गत इति, नेति वेत्युत्तरं युज्यते ।

किञ्चोक्तप्रश्नेन सत्तासाधकव्यापारस्य जिज्ञास्यत्वानवगमात् कथमेतस्योत्तरत्वम् । तथात्वेऽपि पूर्वोत्तरवाक्ये यत्नेनेत्युपादानाद्यत्नपदोपस्थाप्ययत्ननिष्पाद्यत्वबोधेनैवोत्तरत्वसिद्ध्या, न ततो धातोर्व्यापारार्थकत्वसिद्धिरत आह ❀ उत्पत्त्यादीति ❀ सुतरामित्यस्य व्यापारार्थकत्वमिति शेषः । अत्राश्रयताबोधस्योभयमतसिद्धत्वेन सैव साध्यत्वेनाभिधीयमानत्वाद् व्यापारः । पौर्वापर्य्यं च परमते सत्तायामिव कालगतं तत्रारोपितमेवेति भावः ।

ननु तत्राप्याश्रयताया धात्वर्थत्वकल्पनमप्याग्रहमूलकमेव । तत्रोत्पत्तिमात्रार्थकत्वेऽपि रोहिताश्रयिका भूतानद्यतनोत्पत्तिरित्यभिमतार्थबोधलाभादत आह ❀ किञ्चेति ❀ । ❀ तस्या एवेति ❀ । भावनाया एवेत्यर्थः । एवकारेण फलव्यवच्छेदः । यथा चैतत्तथोक्तं सार एव । ❀ तद्विधानात् ❀ लडादिविधानात् । तत्र हरिसम्मतिमप्याह ❀ क्रियाभेदायेति ❀ । तुमर्थादिति चतुर्थी, वार्त्तिकेन तादर्थ्ये वा । क्रियां भेत्तुम् = विशेषयितुमित्यर्थः । कालः लडादिबोध्यः, अस्तीति शेषः । लडाद्यर्थकालः क्रियामात्रभेदक इति यावत् । विभक्त्यर्थरूपा सङ्ख्या तु सर्वस्याख्यातप्रातिपदिकार्थस्य भेदिकेति तदर्थः । मतान्तरे तु धातुप्रातिपदिकार्थस्येति बोध्यम् । एवम् = धातोर्व्यापारवाचकत्वे ।

अशेषभावात् = भावनायाः फलसमानाधिकरणत्वात्। तथाच भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः।

नन्वेवम् 'किं करोति' इति प्रश्ने, 'पचति' इत्युत्तरस्येव 'अस्ति' इत्युत्तरमपि स्यादिति चेत्, इष्टापत्तेः, आसन्नविनाशं कञ्चिदुद्दिश्य 'किं करोति' इति प्रश्ने, पचतीत्युत्तरस्येव, 'अस्ति' इत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते 'किं करोति' इति प्रश्नः, पाकादिविशेषगोचर एवेत्यवधारणात् 'अस्ति' इति नोत्तरमिति ॥ १२ ॥

प्रभा

अशेषभावादिति—भावशब्दो भवत्यस्मिन्निति व्युत्पत्त्याऽधिकरणघञन्तोऽधिकरणवाची, शेषः = फलव्याप्त्यतिरिक्तः = फलानधिकरणम्। तथाच शेषः = फलानधिकरणम्, भावः = अधिकरणं यस्याः सा फलासमानाधिकरणा सा न भवतीत्यशेषभावा = फलसमानाधिकरणा। अशेषभावशब्दोऽत्र धर्मपरः, तथाच अशेषभावात् = फलसामानाधिकरण्यादित्यर्थः।

यद्वा अशेषेण = कार्त्स्न्येन भावः = भवनं तस्मादित्यर्थः। भावनायाः फलेन सहान्यूनानतिरिक्तवृत्तित्वादिति यावत्। ननु सकर्मकगम्यादिस्थलेऽपि फलसामानाधिकरण्यसत्त्वात् भावनाप्रतीतिर्न स्यादिति चेन्न, भावनानधिकरणावृत्तिफलसामानाधिकरण्यं भावनानिष्ठं स्वरूपतो भावनाप्रतिबन्धकम्, न तु तज्ज्ञानापेक्षया। तथाच गम्यादिस्थले संयोगस्य भावनानधिकरणग्रामादिवृत्तित्वान्न तत्सामानाधिकरण्यं भावनाप्रतीतिं स्थगयति। एवञ्च आत्मधारणानुकूलव्यापारार्थके घटोऽस्तीत्यादौ फलव्यापारयोः सामानाधिकरण्याद् भावना स्पष्टं न प्रतीयत इति भावः।

ननु 'घटोऽस्ति' इत्यादौ साध्यमानावस्था प्रतीयते, तदानीञ्चासिद्धस्य घटस्य न कर्तृत्वसम्भवः। किञ्च निष्पन्ने घटे न साध्यमानत्वसम्भव इति चेन्न, बौद्धघटस्य बाह्यघटेनाभेदमध्यस्योभयोपपादनसम्भवात्। तत्स्पष्टत्वे = भावनाप्रतीतिस्पष्टत्वे। स्पष्टत्वञ्च प्रतीतौ फलप्रतीत्यनभिभूतत्वम्। निरूपितत्वं सप्तम्यर्थस्तेनैव सम्बन्धेन दोषपदार्थैकदेशप्रतिबन्धकतायां स्पष्टत्वस्यान्वयः, तथाच भावनाप्रतीतिस्पष्टत्वनिरूपितप्रतिबन्धकतावदुक्तफलसामानाधिकरण्यमित्यर्थः। भावनाप्रतीतिस्पष्टताप्रतिबन्धकफलसामानाधिकरण्यमिति यावत्।

नचात्माऽस्ति, दिगस्ति, इत्यादौ दिगात्मकर्तृकसत्ताया नित्यत्वात् कथं भावनाप्रतीतिरिति वाच्यम्, स्वरूपधारणानुकूलव्यापारस्यैव तत्रास्त्यर्थत्वात्। तथाच 'पच्यते तण्डुलः स्वयमेव' इत्यादिस्थले आश्रयतारूपव्यापारस्य साध्यत्वेन यथा भानं तथाऽऽत्माऽस्तीत्यादावपि तस्या एव साध्यत्वेन भानम्बोध्यम्। आत्मादिकर्तृकं स्वरूपधारणमिति बोधः। एवमिति—अकर्मकाणामपि व्यापारार्थकत्वे इत्यर्थः ॥ १२ ॥

दर्पणव्याख्या

मूले—❀ अशेषभावादिति ❀ शेषः = फलव्याप्त्यतिरिक्तः, भवत्यस्मिन्निति भावः = अधिकरणं यस्येति बहुव्रीहिणा शेषभावशब्दः फलव्यधिकरणार्थकः भावप्रधाननिर्देशस्तस्मान्नञ्समस्तात् पञ्चम्येकवचने फलव्यधिकरणत्वाभावादित्यर्थावगतिः ॥ १२ ॥

SGDF Sri Gargeshwari Digital Foundation

नन्वेवं भावनायाः फलनियतत्वात्, फलाश्रयस्य च कर्मत्वात्, सर्व्वेषां क्रियावाचकत्वे सकर्म्मकतापत्तिरित्यत आह—

फलव्यापारयोरेकनिष्ठतायामकर्म्मकः ।
धातुस्तयोर्धर्म्मिभेदे सकर्म्मक उदाहृतः ॥ १३ ॥

एकनिष्ठतायाम् = एकमात्रनिष्ठतायां भिन्नाधिकरणावृत्तितायामिति यावत् । तेन गम्यादौ फलस्य कर्त्तृनिष्ठत्वेऽपि नातिव्याप्तिः । अकर्म्मको यथा—भ्वादिः । तयोः = फलव्यापारयोः

प्रभा

फलनियतत्वादिति—फलव्याप्यत्वादित्यर्थः । यद्यपि निपूर्वकयमेर्व्यापकत्वमर्थस्तथाच नियतत्वादित्यस्य व्यापकत्वादित्यर्थ उचितस्तथापि 'यत्र यत्र फलवाचकत्वं तत्र तत्र व्यापारवाचकत्वम्' इति व्याप्तौ फलवाचकत्वेन हेतुना व्यापारवाचकत्वानुमितिः स्यात् तत्तु नात्र विवक्षितम्, अतः पूर्वमेव फलवाचकत्वस्योभयसम्मतत्वेन तेन हेतुना व्यापारवाचकत्वसिद्धौ व्यापारस्योक्तयुक्तिभिर्धात्वर्थत्वाङ्गीकारे फलनियतत्वकथनस्य वैयर्थ्यापत्तेः । भावनावाचकत्वस्य व्याप्यत्वे तु तद्व्यापकफलवाचकत्वस्यावश्यकत्वेन फलव्यापारोभयवाचकतया सकर्मकत्वापत्तिशङ्का युज्यते । फलं नियतम् (व्यापकम्) यस्येति व्युत्पत्त्या फलवाचकत्वस्य व्यापकत्वं भावनावाचकत्वस्य व्याप्यत्वमुपलभ्यते । एवञ्च फलनियतत्वादित्यस्य 'भावनायाः फलव्यापकत्वात्' इति परीक्षाव्याख्यानं चिन्त्यमिति गुरवः । फलाश्रयस्येति—धात्वर्थफलाश्रयत्वरूपकर्मणः सर्वत्र सत्त्वादिति भावः ।

फलव्यापारयोः = धात्वर्थफलव्यापारयोः । एकनिष्ठाधिकरणतानिरूपिताधेयतावत्फलव्यापारवाचकत्वमकर्मकत्वमिति स्वीकारे देवदत्तादिनिष्ठाधिकरणतानिरूपिताधेयतावत्संयोगव्यापारोभयवाचकतया गम्यादेरप्यकर्मकत्वापत्तिरित्याह—एकमात्रेति—धात्वर्थव्यापाराधिकरणभिन्नावृत्तिफलवाचकत्वमकर्मकत्वमिति भावः । तथाच गम्यादेर्देवदत्तरूपव्यापाराधिकरणभिन्नग्रामादिवृत्तिसंयोगादिरूपफलवाचकतया नाकर्मकत्वम् ।

दर्पणव्याख्या

फलितमाह सारे ❀ भावनायाः फलेति ❀ एकमात्राधिकरणकफलसामानाधिकरण्यस्य स्वरूपतो भावनास्पष्टभानप्रतिबन्धकत्वाऽभ्युपगमान्न स्पष्टं तत्प्रतीतिः । स्पष्टत्वञ्च—फलप्रतीत्यनभिभूतत्वमिति भावः । ❀ एवम् ❀ अस्त्याद्यकर्मकाणां व्यापाराऽर्थकत्वे । ❀ फलनियतत्वादिति ❀ फलव्याप्यत्वादित्यर्थः । भावनावाचकत्वस्य फलवाचकत्वव्याप्यत्वादिति यावत् ❀ सकर्मकतापत्तिरिति ❀ फलव्यापारोभयवाचकस्य पच्यादेः सकर्मकत्वदर्शनादिति भावः ।

ननु फलव्यापारयोरेकनिष्ठत्वस्याकर्मकतायां तन्त्रत्वे गम्यादीनामप्यकर्मकतापत्तिः, तदर्थफलव्यापारयोरेककर्त्तृवृत्तित्वादतो व्याचष्टे ❀ एकमात्रनिष्ठतायामिति ❀ एकमात्रनिष्ठत्वम् = एकेतरावृत्तित्वे सत्येकवृत्तित्वम् । तत्र प्रयोजनाभावाद्विशेष्यांशमपहाय फलितार्थमाह ❀ भिन्नाधिकरणेति ❀ भिन्नत्वञ्च व्यापाराधिकरणापेक्षया बोध्यम् ।

तथाच स्वार्थव्यापारानधिकरणावृत्तिफलवाचकत्वं पर्य्यवसितं लक्षणं लक्ष्ये ग्राहयति, तत्र सत्ताऽऽत्मकव्यापारस्यैकमात्रनिष्ठत्वस्याऽविकलत्वादिति भावः ।

ननु मूले 'तयोर्धर्मिभेदे' इत्यनेन स्वार्थफलव्यधिकरणव्यापारवाचकत्वम्, स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वमुक्तम् । तत्र वैयधिकरण्यं तदधिकरणाऽवृत्तित्वम् । तथाच ग्रामादावव्याप्तिः, तदर्थफलव्यापारयोः परस्पराऽधि-

SGDF

आश्रयभेदे सकर्मक इत्यर्थः । उक्तञ्च वाक्यपदीये—

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकः ॥ इति ।

बिभ्रदिति—तेन स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः । तेन = कर्म्मणा सकर्म्मकत्वन्तु न, अन्तर्भावात् = फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः । 'आत्मानं जानाति' 'इच्छति' इत्यादौ च द्वावात्मनौ=शरीरात्मा, अन्तरात्मा च । तत्रान्तरात्मा तत्कर्म्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्म्मवत्कर्मणा" (पा० सू० ३ । १ । ८७) इति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्म्मकत्वमित्यवधेयम् ॥ १३ ॥

प्रभा

आश्रयेति—'धर्मिभेदे' इत्यस्यैव व्याख्यानमाश्रयभेद इति। एवञ्च धात्वर्थव्यापाराधिकरणभिन्नवृत्तिफलवाचकत्वं सकर्मकत्वम् । तच्च पच्यादीनां गम्यादीनाञ्चास्तीति भावः। आत्मानम् = स्वरूपम् । आत्मना = स्वेन । बिभ्रत् = धारयत् । अस्य देवदत्तादिरिति शेषः । 'अस्ति देवदत्तः' इत्यनेन देवदत्ताभिन्नाश्रयवृत्तिरात्मधारणानुकूलो व्यापार इति बोधः । व्यपदिश्यते = व्यवह्रियते । तेन = तादृशव्यवहारेण । स्वधारणेति—स्वः = आत्मा ।

नन्वेवम् 'आत्मानं धत्ते' इतिवत् 'आत्मानमस्ति' इति स्यादत आह—तेन कर्मणेति । अन्तर्भावादिति—धात्वर्थतावच्छेदकशरीरे आत्मरूपकर्मणः प्रवेशादित्यर्थः । तथाच सकर्मकपदस्य कर्मणा सह वर्तत इति व्युत्पत्त्या कर्मसंज्ञकान्वय्यर्थप्रतिपादकः सकर्मक इत्यर्थः । प्रकृते च न धात्वर्थे आत्मरूपकर्मान्वयः, पृथग्बुद्ध्योः संसर्गस्यैवान्वयपदार्थत्वात् , आत्मरूपकर्मणश्च पृथगनुपस्थितेः । इदञ्च व्याख्यानं हेलाराजानुसारेण । कौण्डभट्टश्च स्वार्थसाधकत्वेन सामान्यतोऽकर्मकपरतया व्याचष्टे—अन्तर्भावादिति । फलांशेन = स्वरूपधारणाऽऽत्मकफलेन । सामानाधिकरण्येति— धात्वर्थव्यापारस्यैकाधिकरणत्वादित्यर्थः ।

ननु फलव्यापारयोरेकमात्रवृत्तित्वेनाकर्मकत्वे 'आत्मानं जानाति' इत्यादौ ज्ञानादिरूपफलस्य तदनुकूलात्ममनःसंयोगरूपव्यापारस्य चैकत्र कर्तरि सत्त्वादकर्मकत्वापत्तिरित्यत आह—आत्मानमिति—शरीरावच्छिन्न आत्मा एकः, अन्तःकरणावच्छिन्न आत्मा चान्यः । तत्राद्यः कर्म, द्वितीयः कर्ता । एवञ्च फलताव-

दर्पणव्याख्या

करणवृत्तिभिन्नत्वाभावादतो व्याचष्टे भूषणसारे—❀ आश्रयभेद ❀ इति । तथाच प्रथमलक्षणे कर्तृभिन्नतदधिकरणाऽवृत्तित्वरूपस्य द्वितीये तदनधिकरणावृत्तित्वरूपस्य निवेशान्नानुपपत्तिरिति भावः ।

अस्तेः फलव्यापारोभयार्थकत्वे हरिसम्मतिमप्याह—❀ उक्तञ्चेति ❀ । ❀ व्यपदिश्यते ❀ = व्यवह्रियते । ❀ अन्तर्भावादिति ❀ धात्वर्थतावच्छेदककोटिप्रविष्टत्वादित्यर्थः ।

पृथगुपस्थितयोरेवान्वयनियमात् कर्मसंज्ञकार्थान्वय्यर्थकरूपसकर्मकत्वस्य तत्रानवकाशादिति भावः । स्वोक्तलक्षणानुसारेण सारकृद् व्याचष्टे—❀ फलांशेनेति ❀ स्वकर्मकधारणरूपफलेन सह तदनुकूलव्यापारस्यैकाधिकरण्यादित्यर्थः । आत्मरूपकर्मणा सकर्मकत्वं कुतो नेत्याकाङ्क्षायामेतत्समाधानस्योदक्षरत्वदोषदुष्टस्य योग्यत्वं सुधीभिर्विभावनीयम् ।

ननु 'आत्मानं जानाति' इत्यादावनुपदोक्तसकर्मकलक्षणस्याव्याप्तिः, तत्र ज्ञानरूपफले तदर्थव्यापारस्य वैयधिकरण्याभावादतिव्याप्तिश्च फलसमानाधिकरणेत्याद्यकर्मकलक्षणस्येत्याशङ्क्य समाधत्ते— ❀ आत्मानं जानातीत्यादिना ❀ । ❀ अन्तरात्मेति ❀ अन्तःकरणावच्छिन्नात्मा शरीरात्मा तदवच्छिन्नः सः । तथाचाऽऽत्मन एकत्वेऽपि ततः शरीररूपोपाधिभेदपरिकल्पितं भेदमादाय वैयधिकरण्यस्य सूपपादत्वादुक्तलक्षणयोर्नाव्याप्त्यतिव्याप्ती इत्याह—❀ भिन्नाधिकरणेति ❀ ॥ १३ ॥

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे 'पाकः' इत्यत्रापि तत्प्रत्ययापत्तिः। नचेष्टापत्तिः, "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यविरोधादित्यत आह—

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥ १४॥

आख्यातशब्दे = 'पश्य मृगो धावति' इत्यादौ, भागाभ्याम् = तिङन्ताभ्याम्, प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानम्, पचतीत्यत्राऽपि भागद्वयसत्त्वात्। साध्यसाधनरूपता

प्रभा

च्छेदकविषयतासम्बन्धेन शरीरात्मनः फलाश्रयत्वात्कर्मत्वम्। व्यापारतावच्छेदकसमवायसम्बन्धेन व्यापाराश्रयत्वादन्तरात्मनः कर्तृत्वम्॥ १३॥

असत्त्वभूतेति—क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मविशिष्टेत्यर्थः। तत्प्रत्ययेति—असत्त्वभूतक्रियाबोधापत्तिरित्यर्थः। द्रव्यवदिति—लिङ्गसङ्ख्यान्वयि अत्र द्रव्यम्।

आख्यातेति—'आख्याते' इत्येव वक्तव्ये शब्दग्रहणं बहुव्रीहिलाभार्थम्। द्वे आख्याते शब्दौ यत्र वाक्ये तदाख्यातशब्दम्—तिङ्द्वयघटितवाक्यमित्यर्थः। यद्वा आख्यातयोः शब्द आख्यातशब्दः, घटितत्वं षष्ठ्यर्थः, तथाचाख्यातद्वयघटितवाक्यात्मकशब्द इत्यर्थः। तदाह—पश्य मृग इति—आदिना 'पचति भवति' इत्यादेः सङ्ग्रहः। भागाभ्याम् = वाक्यस्य तिङन्तरूपांशाभ्याम्। 'भागाभ्याम्' इत्यस्य प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तं यद्व्याख्यानं तद् अपव्याख्यानम्—दूषितं व्याख्यानमित्यर्थः। भागद्वयेति—एतन्मते आख्यातञ्चासौ शब्दश्चेति कर्मधारयः। तथाच तत्रापि प्रत्ययशक्तिमादाय धात्वर्थस्य सिद्धत्वापत्तिरिति भावः। वस्तुतोऽपव्याख्यानमित्युक्तिश्चिन्त्या। तथाहि—'धावति' इत्यादौ धातुना साध्यावस्था क्रिया, तदुत्तरप्रत्ययेन च कर्त्राद्यभिधानात् साधनवर्तित्वं यथा, तथा 'पाकः' इत्यत्रापि। अन्ते इयान् विशेषो यद् धातुप्रत्ययाभ्यां क्रियैवाभिधीयत इति। साध्यसाधनेति—'पश्य' इति तिङ्प्रकृत्यर्थदर्शनस्य साध्यरूपता, साध्यरूपक्रियायामेव कारकान्वयस्य वक्ष्यमाणत्वात्। 'धावति' इत्यत्र प्रकृत्यर्थधावनस्य दर्शने कर्मत्वेनान्व-

दर्पणव्याख्या

❀ असत्त्वभूताया इति ❀ क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्माक्रान्ताया इत्यर्थः। ❀ तदिति ❀ तेन रूपेण प्रतीत्यापत्तिरित्यर्थः। ❀ कृदभिहित इति ❀ कृदर्थ इत्यर्थः। ❀ द्रव्यवदिति ❀ द्रव्येण = नामार्थेन तुल्यं प्रकाशते = भासते इत्यर्थः। द्रव्यधर्माणि—लिङ्गसङ्ख्याकारकत्वानि गृह्णातीति यावत्। यद्वा द्रव्यम् = क्रियाकाङ्क्षोत्थापकतावच्छेदकरूपसिद्धत्ववत्, तेन तुल्यं प्रकाशते इत्यर्थः, सिद्धत्वेन भासत इति यावत्। तथाच तादृशभाष्येणापाद्यव्यतिरेकनिर्णये तद्धेतुभूते प्रामाण्योपगमादिष्टापत्तेरसुकरत्वादिति भावः।

आख्याते शब्दौ यस्मिन्निति बहुव्रीहिणा वाक्यमन्यपदार्थ इत्याशयेनाह—❀ पश्येत्यादि ❀। ❀ तिङन्ताभ्याम् ❀ पश्य-धावतिभ्याम्। धावतेः साधनत्वेन, पश्यतेः साध्यत्वेन क्रियाबोधकत्वाद् दृष्टान्ततोपपत्तिरत एव वक्ष्यति 'इयान् परं विशेषः' इति। ❀ प्रकृत्यादीति ❀ ❀ व्याख्यानम् ❀ विवरणस्थम्। आख्यातशब्द इति कर्मधारय इति तद्भावः। अपव्याख्याने हेतुमाह ❀ पचतीत्यत्रेति ❀ तथाच तिङन्तरूढेन केवलाख्यातपदेनैव पचत्यादितिङन्तरूपार्थलाभे शब्दपदवैयर्थ्यम्। मन्मते तु तस्य बहुव्रीहिलाभसम्पादकतयाऽऽख्यातशब्दपदस्य तिङन्तद्वयघटितवाक्यपरतोपपत्तिः, पचत्यादेर्भागद्वयस्य साध्यसाधनवर्तित्वेऽपि क्रियायास्ततः साधनत्वेनाऽबोधाद् दृष्टान्तत्वासम्भवश्चेति भावः। तदेव विशदयति—❀ साधनरूपतेति ❀।

यथाक्रमं ग्राह्या। साध्यत्वम्—क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्त्वम्—कारकत्वेनान्वयित्वम्। स घञादिष्वपीति—प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था। इयान् परं विशेषः—घञाद्युपस्थाप्या लिङ्गसङ्ख्यान्वयिनी, कारकान्वयिनी च। आख्यातान्तोपात्ता तु नैवम्। तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्।

प्रभा

यात् साधनम्=कारकं तद्रूपता। लोके यथा 'पश्य मृगो धावति' इत्यादौ भागाभ्यां साध्यसाधनवर्तिता=वृत्तिः प्रकल्पिता, तथा शास्त्रे=व्याकरणशास्त्रे स एव क्रमो घञादिभावार्थकप्रत्ययेष्वपि 'पाकः' इत्यादिषु प्रकृत्या साध्यवर्तिता प्रत्ययेन साधनवर्तिता प्रकल्पनीयेति।

एवञ्च 'पश्य मृगो धावति' इत्यनेन कर्मत्वसम्बन्धेन एकत्वविशिष्टमृगाभिन्नाश्रयवृत्तिवर्तमानकालावच्छिन्नधावनविशिष्टं त्वदभिन्नाश्रयनिष्ठं प्रवर्तनाविषयो दर्शनमिति बोधः। अत्र धावनस्य कर्मत्वसम्बन्धेन दर्शनेऽन्वयः। एवम् 'देवदत्तः पचति भवति' इत्यनेन कर्तृत्वसम्बन्धेन एकत्वविशिष्टदेवदत्ताभिन्नाश्रयनिष्ठवर्तमानकालावच्छिन्नपचिक्रियाविशिष्टा वर्तमानकालावच्छिन्ना भवनक्रियेति बोधः। अत्र पचिक्रिया भवनक्रियायाः कर्त्री। अत एव 'भवतिक्रियायाः पचिक्रियाः कर्त्र्यौ भवन्ति' इति भाष्यं सङ्गच्छते। विशेषः=भेदः। कारकान्वयिनीति—कारकत्वव्याप्यधर्मेण कर्मत्वादिनाऽन्वयिनीत्यर्थः। यथा 'पाकं पश्य' 'पाकेन कृतम्' इत्यादि।

तथाच कृदुपस्थाप्यक्रियायां लिङ्गसङ्ख्यान्वितत्वम्, कारकत्वव्याप्यकर्मत्वादिसम्बन्धेनान्वितत्वञ्चेत्युभयं भासते। नैवम्=उभयधर्मवती न, किन्तु कारकत्वव्याप्यधर्मेण कर्मत्वादिनाऽन्वितत्वेनैव दृष्टान्त (पश्य मृगः) दार्ष्टान्तिक (पाकम्) योः साधर्म्यम्, सर्वधर्मेण सादृश्यस्य प्रायोऽदर्शनात्। तदाह—कारकत्वेनान्वयित्वेति।

ननु तिङन्तार्थक्रियायाः कारकत्वेनान्वयित्वे कारकत्वेनानन्वयित्वरूपासत्त्वरूपता तस्या भज्येतेति चेन्न, धात्वर्थानाश्रयकारकत्वेनानन्वयित्वस्यैवासत्त्वरूपत्वात्। तिङन्तार्थक्रियाया धात्वर्थफलाश्रयकर्मत्वेन धात्वर्थव्यापाराश्रयकर्तृत्वेन चान्वयेऽपि तदितरकारकत्वेनान्वयित्वस्याक्षतेः, कर्तृकर्मणोरेव धात्वर्थाश्रयकारकत्वात्। तदुक्तं वाक्यपदीये—

'क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः।
असत्त्वरूपता तस्या इयमेवावधार्यताम्'॥ इति।

साधनाकाङ्क्षोत्थापकतावच्छेदकधर्मवत्त्वरूपस्यासत्त्व (साध्यत्व) स्य स्वीकारे दोषाभावाच्च। धात्वर्थक्रियैव हि साधनमाकाङ्क्षति। नन्वेकत्रैव धावनादिक्रियायां साध्यत्वसाधनत्वाङ्गीकारे तयोर्वैधर्म्यभङ्ग इति चेन्न, सम्बन्धिभेदे वैधर्म्यभावात्, धावनादेर्दर्शनम्प्रति साधनत्वस्य, मृगादिकम्प्रति साध्यत्वस्य च स्वीकारे बाधकाभावात्। यथा एकत्र एकनिरूपितपितृत्व-पुत्रत्वयोरसम्भवेऽपि विभिन्ननिरूपितपितृत्व-पुत्रत्वयोः

दर्पणव्याख्या

❀ प्रकृत्या ❀—'पाकः' इत्यादाविति शेषः।

नन्वनयोर्लिङ्गसङ्ख्यान्वयित्वानन्वयित्वेन वैषम्यात् कथं दृष्टान्तदार्ष्टान्तिकभावोऽत आह ❀ इयान् परमिति ❀ तथाच यत्किञ्चिद्धर्मवत्त्वेन सादृश्यविवक्षणान्नोक्तदोष इति भावः।

ननु धात्वर्थस्य कारकत्वेनाऽनन्वयित्वे कारकानन्वयित्वरूपमसत्त्वं तस्या भज्येतेति चेत् तत्र क्रियानाधारत्वविशेषणेन कर्तुर्व्यापाराऽऽधारत्वेन कर्मणः फलाधारत्वेन कर्तृत्वेन कर्मत्वेनान्वयेऽप्युक्तरूपस्यासत्त्वस्याक्षतत्वात्। उक्तञ्च—

'क्रिया न युज्यते लिङ्गं क्रिया नाऽऽधारकारकैः।
असत्त्वरूपता तस्या इयमेवाऽवधार्यताम्'॥ इति।

SGDF Sri Gargeshwari Digital Foundation

नच घञन्ते धातुना तथाभिधाने मानाभावः, 'ओदनस्य पाकः' इति कर्म्मषष्ठ्या मानत्वात्। नचाध्याहृततिङन्तक्रियान्वयात् षष्ठी, "कर्तृकर्म्मणोः कृति" (पा० सू० २।३।६५) इति कृदन्तेन योग एव तद्विधानात्, "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (पा० सू० २।३।६९) इति लादेशयोगे षष्ठीनिषेधाच्च। एवंरीत्या 'काष्ठैः पाकः' इत्याद्यपीष्टमेव। एवं फलांशोऽपि धातुना असत्त्वावस्थापन्न एवोच्यते।

प्रभा

सामानाधिकरण्यं प्रसिद्धमेव। धातुना=धातुभागेन। तथाभिधाने=साध्यत्वेनाभिधाने। मानत्वादिति—साध्यत्वेन प्रतीयमानक्रियायामेव कारकान्वयात्, प्रकृते साध्यत्वेन पाकानुपस्थितौ कर्मत्वानुपपत्त्या कर्मषष्ठ्यनुपपत्तिरिति भावः। नचेति—यथा 'कटे शेते' 'स्थाल्यां पचति' इत्यादौ कर्तृकर्मद्वारा क्रियायोगमाश्रित्याधिकरणसप्तम्याः साधुत्वम्, तथा प्रकृतेऽपि पाकद्वारा भवतिक्रियायोगमादाय षष्ठी भविष्यतीति भावः। कृदन्तेनेति—यद्धात्वर्थफलवत्त्वं प्रत्यासत्त्या तद्धात्वर्थक्रियानिरूपितकारकत्ववत एव कर्मणो ग्रहणात् षष्ठ्यसिद्धिरिति भावः। नन्वेवं घञन्तादौ साध्यक्रियाया भाने करणादीनामपि तत्रान्वयः स्यादित्याह—एवंरीत्येति। एवम्=क्रियांशवत्।

दर्पणव्याख्या

क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्=असत्त्वभूतत्वमिति मते त्वत्र दोषः प्रागुक्त एव। साधनाकाङ्क्षोत्थापकतावच्छेदकधर्मवत्त्वरूपतया परिष्कृते तु न क्वापि दोष इति। ❀ तथाभिधाने इति ❀ उक्तसाध्यत्वेन रूपेण प्रतीतावित्यर्थः।

❀ ओदनस्येति ❀ अत्रौदनपदं तण्डुलादिपरम्, अन्यथा विक्लिन्नस्यैवौदनपदार्थतया तस्य पाकासम्भवेन बाधितार्थकताऽऽपत्तेः। ❀ कर्मषष्ठ्या इति ❀ कर्मत्वेन कर्मशक्तायाः षष्ठ्या एवेत्यर्थः। ❀ मानत्वादिति ❀ अनुपपत्तिरूपप्रमाणत्वादित्यर्थः। घञन्तेन सिद्धभावस्यैवाऽभिधाने कारकाणां साध्यस्वभावक्रियाऽन्वयित्वनियमेनौदनस्याकारकतयाऽकर्मत्वेन तत्र षष्ठ्यनुपपत्तेरेव तस्य साध्यस्वभावक्रियार्थकत्वे मानत्वादिति भावः। ❀ क्रियान्वयादिति ❀ साध्यस्वभावाऽध्याहृतभवत्यर्थस्य परम्परान्वयादित्यर्थः।

नन्वोदनस्य कृदन्तार्थफलाश्रयत्वरूपकृदन्तयोग्यस्यापि सत्त्वेन कथं तदनुपपत्तिरत आह—❀ न लोकेति ❀ इदञ्च समाधिसौकर्यादुक्तम्। प्रत्यासत्त्या यद्धात्वर्थफलाश्रयत्वं तद्धात्वर्थकारकस्यैव कर्मतालाभेन पाकपदार्थस्य क्रियात्वेन भवत्यर्थस्य क्रियात्वेऽपि तदर्थफलाश्रयत्वाभावेनौदने कर्मत्वस्यैव दुरूपपादत्वात्। ननु तत्र मा भूत् कृद्योगषष्ठी, शेषषष्ठ्यैव तथा प्रयोगोपपत्तेरिति चेन्न, सर्वत्र सम्बन्धषष्ठ्यैव प्रयोगोपपत्त्या कर्तृकर्मणोरित्यादिविधिवैयर्थ्यापत्तेः। यदि च 'जगतः कर्त्ता' इत्यादौ कर्म्मत्वेन कर्मत्वप्रकारकसर्वसिद्धबोधोपपत्त्यर्थं समासस्थले "गतिकारकोपपदात्कृत्" (पा० सू० ६।२।१३९) इत्यादिविहितस्वरनिर्वाहार्थञ्च तस्यावश्यकतेति विभाव्यते, तदा प्रकृते किं तत्प्रयोजनं पाणिपिहितमिति भावः। नन्वसत्त्वभूतक्रियाया भावप्रत्ययप्रकृत्यर्थत्वे काष्ठानां तन्निरूपितकरणत्वस्यापि सम्भवाद्भवत्यर्थाऽनध्याहारेऽपि 'काष्ठैः पाकः' इत्याद्यपि प्रसज्येते त्याशङ्क्येष्टापत्त्या परिहरति—❀ एवंरीत्येति ❀।

अन्ये तु भावप्रत्ययस्थले सम्बन्धिभेदेनैकस्यैव पितृत्व-भ्रातृत्ववद्भावत्यर्थस्य मृगदर्शनसम्बन्धिभेदात् साधनवच्चैकस्या एव क्रियाया वाचकप्रत्ययरूपसम्बन्धिभेदात् साध्यत्व-साधनत्वाभ्यामुपस्थितिर्न ताभ्यां भिन्नभिन्नक्रियोपस्थितिरित्याहुः। ❀ एवमिति ❀ यथा 'ओदनस्य पाकः' इत्यादावोदनस्य कर्मत्वाऽनुपपत्त्याऽसत्त्वभूतव्यापारो धातुवाच्यस्तथेत्यर्थः। तादृशफलस्यावाच्यत्वेऽनुपपत्तिं दर्शयति—

SGDF Sri Gargeshwari Digital Foundation

अत एव 'स्तोकं पचति' इतिवत् 'स्तोकं पाकः' इत्युपपद्यते इति ॥ १४ ॥

एतदेव स्पष्टयति—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥ १५ ॥

नच घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, 'पाकः' इत्युक्ते, भवति नष्टो वेत्याद्याकाङ्क्षोत्थापनस्यैव मानत्वात्,

प्रभा

स्तोकं पाक इति—व्यपदेशिवद्भावेन फलस्यापि फलाश्रयत्वेन कर्मतया तत्समानाधिकरणात्स्तोकपदाद् द्वितीया । अत एव 'क्रियाविशेषणानां कर्मत्वम्' इत्यभियुक्तोक्तिः सङ्गच्छते ।

नच कृद्योगे 'कर्तृकर्मणोः' इति षष्ठ्या द्वितीयाया बाधः स्यादिति वाच्यम्, कर्तृसाहचर्य्याद् भेदेन क्रियान्वयिनः कर्मण एवं तेन षष्ठीविधानात् । प्रकृते च फलेऽभेदेनैव स्तोकपदार्थस्यान्वयः । अत्र च 'मलोपवचनञ्च' इति वार्तिकमेव मानम्, अन्यथा 'दारुणाध्यापकः' इति भाष्योक्तमुदाहरणमसङ्गतं स्यात्, कृद्योगषष्ठ्या समासेन सिद्धत्वात् । नचैवं 'कर्तृकर्मणोः' इत्यस्य वैयर्थ्यम्, 'कर्तरि कृत्' इति सूत्रभाष्यानुरोधेन तुमुन्नादीनामिव क्तिनोऽपि साध्यावस्थापन्नधात्वर्थानुवादकत्वमेवेति 'वस्त्रस्य कृतिः' इत्यादौ चरितार्थत्वात् । नच शेषषष्ठ्यैव समासो वाक्यञ्चेति वाच्यम्, कर्तृत्वादिना बोधासिद्धेः ।

यद्वा—'ओजःसहोम्भसा वर्तते' इत्यतः 'वर्तते' इत्यनुवर्त्य 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' इत्यनेन द्वितीयान्तात् प्रतीपान्वीपादिशब्दात् 'वर्तते' इत्यर्थे ठग् विधीयते । तत्र 'वर्तते' इत्यस्याकर्मकत्वाद् द्वितीयान्ताट्ठग्विधानवैयर्थ्येन ज्ञाप्यते—'क्रियाविशेषणाद् द्वितीया भवति' इति, नतु व्यपदेशिवद्भावेन कर्मत्वम्, फलतावच्छेदकसम्बन्धेन फलाश्रयत्वाभावादिति स्तोकशब्दात् षष्ठ्यप्राप्तिः ॥१४॥

एतदेव = प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्थेत्यर्थस्वरूपमेव । साध्यत्वेनेति—तत्र पाकादिशब्दे साध्यत्वेन प्रतीयमाना या क्रिया सा धातुरूपं निबन्धनम् = प्रतिपादकं यस्याः सा धातुप्रतिपाद्या क्रिया वाचकतासम्बन्धेनास्ति । यद्वा—धातुरूपं निबन्धनम् = निमित्तं यस्याः क्रियायाः । प्रतीतौ यन्निमित्तजन्यत्वं तत् प्रतीयमानक्रियायामारोप्यान्यपदार्थत्वं तस्याः । तस्याः = क्रियायाः, यः सिद्धभावः = सिद्धत्वम् । स घञादि निबन्धनम् = प्रतिपादकं यस्य स घञादिनिबन्धनः—घञादिप्रतिपाद्य इत्यर्थः । कारिकाप्रतिपाद्यमर्थं शङ्कासमाधिभ्यां द्रढयति—नच इत्यादिना । आकाङ्क्षोत्थापनस्येति—क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकधर्म-

दर्पणव्याख्या

❀ अत एवेति ❀ अन्यथा तादृशप्रयोगानुपपत्तिस्तादृशफलस्य वाच्यत्वे तु तस्य व्यपदेशिवद्भावेन स्वसम्बन्धितया कर्मत्वात् तत्समानाधिकरणस्तोकादिशब्देभ्यो द्वितीयोपपत्तिः । तत्र स्तोकादिभ्यः कर्तृकर्मणोरिति षष्ठी तु न, कर्तृसाहचर्य्येण भेदान्वयिन एव कर्मणस्तत्र ग्रहणात् । अत एव "पूजनात्पूजितम्" इति सूत्रे भाष्ये 'दारुणं यथा भवति तथाऽध्यापक इत्यर्थे दारुणाध्यापकसिद्ध्यर्थं मलोपवचनमारब्धं भाष्ये' । अन्यथा, कर्तृकर्मणोरिति विहितषष्ठ्यन्तेन समासे तद्वैयर्थ्यं स्फुटमेवेत्यन्यत्र विस्तरः ।

अन्ये तु ओजःसहोऽम्भसा वर्त्तते, इत्यधिकारे "तत्प्रत्यनुपूर्वमीपलोमकूलम्" (पा० सू० ४।४ २८) इति सूत्रे द्वितीयान्ततच्छब्दग्रहणं ज्ञापकम्—'क्रियाविशेषणाद् द्वितीया' इत्यस्यार्थस्य, नतु स्तोकाद्यर्थस्य कर्मत्वमपि, फलस्य फलाश्रयत्वाऽभावात् । एवञ्च न तद्वाचकेभ्यः षष्ठीप्रसक्तिरित्याहुः ॥ १४ ॥

SGDF Sri Gargeshwari Digital Foundation

धातूपस्थाप्यायां तदसम्भवस्योक्तत्वात्, 'स्तोकः पाकः' इत्यनापत्तेश्च। तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया। घञर्थान्वये प्रथमा, पुँल्लिङ्गता चेति—तत्सिद्धये घञादेः शक्तिरुपेया। एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम्।

नच घञन्तशक्त्युपस्थाप्यान्वये 'स्तोकः पाकः' इति भवतीति वाच्यम्, घञन्तानुपूर्व्याः शक्तितावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथा शक्तिकल्पनादिति दिक्।

प्रभा

वत्त्वस्यैव साधनरूपत्वमिति भावः। अनापत्तेश्चेति—प्रत्ययेन सिद्धावस्थापन्नक्रियाया अनभिधाने धातुप्रतिपाद्यक्रियायामेवाभेदान्वयेन द्वितीयैव स्यान्न तु प्रथमा, धात्वर्थतान्वये नपुंसकालिङ्गता च। धात्वर्थान्वये = धात्वर्थफलान्वये। द्वितीयेति— पदार्थमात्रस्य लिङ्गत्रयवत्त्वेन क्रियाया अपि लिङ्गत्रयवत्त्वात् क्रियाविशेषणे विनिगमनाविरहाल्लिङ्गत्रये प्राप्ते 'सामान्ये नपुंसकम्' इति नपुंसकविधानात्। घञ्वाच्यक्रियायाः 'घञजपः पुंसि' इति पुंस्त्वनिर्णयान्न तद्विशेषणे नपुंसकत्वमिति भावः। घञर्थेति— घञर्थस्य सिद्धरूपत्वेन = लिङ्गसङ्ख्यान्वयित्वेन भानम्। एवं व्यापारान्वयेऽपि 'स्तोकः पाकः' इत्येव, व्यापारस्याकर्मतया तद्विशेषणे द्वितीयाया अप्राप्तेः। वस्तुतस्तु 'तत्प्रत्यनुपूर्वम्' इति ज्ञापकसिद्धेन 'क्रियाविशेषणाद् द्वितीया' इति वचनेन साध्यभूतव्यापारान्वयेऽपि द्वितीयैव। एतेन = घञादिशक्त्या उक्तप्रयोगव्यवस्थापनेन। कातन्त्रपरिशिष्टमतमनूद्य दूषयति—नच इत्यादिना —तथाहि-'पाकं पश्य' इत्यादौ घञन्तानुपूर्व्याः शक्तितावच्छेदकत्वमावश्यकम्, अन्यथा सुबर्थसङ्ख्याकर्मादेर्धात्वर्थेऽन्वयो न स्यात्, धातोः सुबप्रकृतित्वात्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्। प्रकृत्येकदेशार्थेऽपि अन्वयाभ्युपगमे तु यत्रैक एव कर्ता पाकद्वयं करोति तत्र पाके द्वित्वान्वयाबाधात् 'पचन्तौ पश्य' इति प्रयोगापत्तिः। ननु 'धात्वर्थे सुबर्थसङ्ख्यान्वयबुद्धिम्प्रति धातूत्तरप्रत्ययविशेष्यकयत्किञ्चिदर्थपरत्वज्ञानं प्रतिबन्धकम्' इत्युच्यते, अस्ति च प्रकृते 'शता कतृबोधको भवतु' इति ज्ञानम्, तथाच न तत्र संख्यान्वय इति चेन्न, कल्पनागौरवात्। एवञ्च प्रकृत्यर्थप्रत्ययार्थान्वयाभिप्रायेण घञन्ते शक्तिरुपेया। एवञ्च घञन्तार्थेऽन्वयाभिप्रायेण 'स्तोकः पाकः' इत्यपि सिध्यतीत्याशङ्कायामाह—गौरवादनुशासनाच्चेति। नच वैयाकरण-

दर्पणव्याख्या

❀ उक्तत्वादिति ❀ क्रियान्तराकाङ्क्षाऽनुत्थापकतावच्छेदकरूपवत्त्वं साध्यत्वमित्यादिनेत्यर्थः; क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपेणोपस्थितेः क्रियान्वयासम्भवादिति भावः। तेन रूपेणोपस्थितेः 'पश्य मृगो धावति' इत्यादौ व्यभिचरितत्वादाह—❀ स्तोकः पाक इति ❀ घञा सिद्धावस्थक्रियाया अबोधने धात्वर्थविशेषणवाचकस्तोकादिशब्दस्य लिङ्गसर्वनामनपुंसकत्वापत्तिरिति भावः। तदेव विशदयति—❀ तस्मादिति ❀। ❀ एतेनेति ❀ घञादीनां सिद्धावस्थाऽऽपन्नक्रियावाचकत्वव्यवस्थापनेनेत्यर्थः। ❀ प्रयोगसाधुतामात्रमिति ❀ मात्रपदेन वाचकत्वव्यवच्छेदः।

❀ नैयायिकनव्योक्तमिति ❀ धातूनां सुब्विभक्त्यप्रकृतित्वात्तदर्थे सुबर्थसङ्ख्याकर्मत्वादीनामन्वयानुपपत्त्या धातोरिव घञन्तस्यापि क्रियावाचकत्वमभ्युपेयम्, प्रकृत्येकदेशार्थे तदन्वयाऽभ्युपगमे तु यत्र पाककर्त्रादेर्द्वित्वादिकं बाधितम्, पाकादेश्च तदबाधितम्, तत्र 'पचन्तौ पश्यति' इत्यादिप्रयोगापत्तेः। धातूपस्थाप्यार्थे सुबर्थान्वयबोधं प्रति तद्धातूत्तरधर्मिककिञ्चिदर्थपरत्वज्ञानस्य प्रतिबन्धकत्वावगमे तु गौरवम्। एवञ्च यत्र धातुमात्रस्य पाकादौ तात्पर्य्यं तत्र तद्विशेषतावाचकस्तोकपदाद् द्वितीयैव। यत्र तु कृदन्तसमुदायस्य तत्र तद्विशेषणवाचकपदं तत्समानविभक्तिकमेवेति कातन्त्रपरिशिष्टकृन्मतं नव्यनैयायिकमतत्वेनानूद्य दूषयति—❀ नचेति ❀। ❀ गौरवादिति ❀।

Sri Gargeshwari Digital Foundation

एवञ्च घञ्शक्त्यभिप्रायेण 'कृदभिहितः' इति भाष्यम्, अतो न तद्विरोध इति भावः॥ १५ ॥

ननु कारकाणां भावनान्वयनियम एव 'पाकः' इत्यत्रापि कर्म्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिद्ध्येत्। स एव कुत इत्याशङ्कां समाधत्ते—

सम्बोधनान्तं कृत्वोऽर्थाः कारकं प्रथमो वतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ्॥ १६ ॥

सम्बोधनान्तस्य क्रियायामन्वयः, 'त्वं ब्रूहि देवदत्त' इत्यादौ निघातानुरोधात्, "समानवाक्ये

प्रभा

सिद्धान्तेऽपि वृत्तिमात्रे समुदायशक्तिरावश्यकी, अन्यथा 'कृत्तद्धित' इति सूत्रेऽपि अर्थवद्ग्रहणानुवृत्त्या प्रातिपदिकत्वं न स्यादिति वाच्यम्, समुदायशक्तेरावश्यकत्वेऽपि 'तयोरेव' 'भावे' 'अकर्तरि च' इत्यादिशास्त्रबलात्कृतोऽप्यर्थवत्त्वस्यावश्यकत्वात्, अन्यथा खशि शबनुत्पत्त्या जनमेजयाद्यसिद्ध्यापत्तेः। नच खश्निमित्तकगुणेन सिद्धिः, तस्य ङित्त्वेन 'क्ङिति च' इति गुणनिषेधात्॥ १५ ॥

स एव = कारकाणां भावनायामेवान्वय इति नियम एव। सम्बोधनान्तमिति—सम्बोधनान्तमित्यस्य सम्बोधनविभक्त्यन्तार्थ इत्यर्थः। क्रियायाम् = साध्यभूतक्रियायामन्वेति, कृत्वोर्थाः—क्रियायामनुयन्ति। कारकम्, प्रथमवत्यर्थश्च तत्रैवान्वेति, धातुसम्बन्धाधिकारनिष्पन्नार्थोऽसमस्तनञर्थश्च क्रियायामन्वेतीत्यर्थः। देवदत्तेति—बोधनाय सम्मुखीकरणं सम्बोधनमिति व्युत्पत्त्या 'प्रकृतवाक्यार्थविषयकबोधफलकश्रोत्रभिमुखीभावानुकूलव्यापारविषयकेच्छा सम्बोधनविभक्त्यर्थः'। अभिमुखीभावश्च—'प्रकृतवाक्यार्थबोधाय श्रोतुर्मनोदानादिरूपः, तत्र देवदत्तस्य निष्ठत्वसम्बन्धेन विभक्त्यर्थैकदेशे प्रकृतवाक्यार्थविषयकबोधफलकाभिमुखीभावेऽन्वयः, विशिष्टेच्छायाश्च विषयत्वसम्बन्धेन भाषणक्रियायामन्वयः। तथाच देवदत्तनिष्ठो यः प्रकृतवाक्यार्थविषयकबोधफलकोऽभिमुखीभावस्तदनुकूलो व्यापारः = सम्बोधनविभक्त्यन्तप्रयोगरूपो वक्तृनिष्ठस्तद्विषयकेच्छा प्रयोक्तुः, तादृशेच्छाविषयः = प्रवर्तनाविषयश्च त्वत्कर्तृकं भाषणमिति 'त्वं ब्रूहि देवदत्त' इत्यनेन बोधः। तथाच देवदत्तस्य निष्ठत्वसम्बन्धेन अभिमुखीभावे, तस्य च विषयितासम्बन्धेनेच्छायाम्, तस्याश्च विषयतासम्बन्धेन भाषणेऽन्वयः, इति देवदत्तस्य स्वनिष्ठविषयतानिरूपितविषयतानिरूपितविषयतानिरूपितविष-

दर्पणव्याख्या

ननु भावाख्यातवद्भावविहितघञादीनां धात्वर्थानुवादकत्वे स्थिते प्रागुक्तप्रयोगोपपत्तयेऽनायत्त्या घञन्तानुपूर्व्याः शक्तावच्छेदकत्वस्वीकार आवश्यक इत्यत आहन्त ❀ अनुशासनादिति ❀ तथाच गुरुभूतानुपूर्व्याः शक्तावच्छेदकत्वापेक्षयाऽनुशासनानुगुण्यादुक्तप्रयोगोपपत्तये घञत्वस्यैव तत्त्वमुचितमिति भावः।

ननु घञादीनां व्यापारावाचकत्वेऽपि 'क्रियाविशेषणाद् द्वितीया' इत्यत्र क्रियापदस्य पाकार्थकतया तथानुपस्थाप्यपरत्वात् 'स्तोकः पाकः' इत्यादौ धातूपस्थाप्यपाकस्योक्तविशेषणवैकल्यान्न तद्विशेषणवाचकपदाद् द्वितीयाऽऽपत्तिरत आह ❀ दिगिति ❀ तदर्थस्तु—स्यादेवं यदि क्रिया विशेषणाद् द्वितीयेति स्वतन्त्रमनुशासनं स्यात्, किन्त्वस्मदुक्तफलितार्थकथनमेव तत्। तथात्वे वा त्वन्मते 'स्तोकम्' इत्यनापत्तेश्चेति ॥ १५ ॥

❀ क्रियायामिति ❀ प्रवर्त्तनाविषयक्रियायामित्यर्थः। तत्र तदनन्वये निघाताऽनुपपत्तिं प्रमाणयति—❀ निघाताऽनुरोधादिति ❀। ❀ समानवाक्य इति ❀। 'आख्यातं सविशेषणं वाक्यम्' इति समर्थसूत्रभाष्यात्साक्षात्परम्परया वा पदार्थान्तराऽन्वितक्रियाबोधकाख्यातस्यैकवाक्यतालाभेन सम्बोधनान्तार्थस्य क्रियायामनन्वये 'त्वं ब्रूहि देवदत्त' इत्यादौ तदभावात् 'समानवाक्ये' इति, प्रकृत्यामन्त्रितस्येति विहितस्य निघातस्यानुपपत्तेरित्याखण्डलार्थः। तत्र 'शालीनां ते ओदनं दास्यामि'

प्रभा

यतावत्त्वरूपपरम्परासम्बन्धेन भाषणक्रियायामन्वयात् देवदत्तपदार्थभाषणक्रिययोः विशेष्यविशेषणभावसत्त्वादेकवाक्यस्थत्वम् । तथाहि—स्वनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्व–स्वनिष्ठविशेष्यतानिरूपितप्रकारत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतावत्त्वैतदन्यतरसम्बन्धेन क्रियाविशिष्टार्थप्रयोजकत्वरूपैकवाक्यत्वघटकद्वितीयान्यतरसम्बन्धो देवदत्तपदे सुलभः । तथाहि—भाषणक्रियानिष्ठविशेष्यतानिरूपितप्रकारत्वावच्छिन्नविशेष्यता इच्छानिष्ठा तन्निरूपितप्रकारत्वावच्छिन्नविशेष्यताऽभिमुखीभावनिष्ठा तन्निरूपितप्रकारतावत्त्वं देवदत्तस्येति तत्प्रयोजकत्वं देवदत्तपदे इति 'त्वं ब्रूहि देवदत्त' इत्यत्र पदात्परस्यामन्त्रितस्य निघात (अनुदात्त) इत्यर्थकेन 'आमन्त्रितस्य च' इत्यनेन निघातः सिद्ध्यति, निमित्तं ब्रूहिपदं निमित्ति (कार्य्यि) देवदत्तपदं तयोरेकवाक्यस्थत्वात् । यद्वा विभक्त्यर्थसम्बन्धेन देवदत्तस्य भाषणे प्रकारत्वमिति प्रथमनिरूपितत्वमादायैव लक्षणसमन्वयः ।

नागेशमते तु बोधनायाभिमुखीभावः सम्बोधनमिति व्युत्पत्त्या 'बोधफलकाभिमुखीभाव एव विभक्त्यर्थः', तस्य च संख्याया इव प्रकृत्यर्थे आश्रयतासम्बन्धेनान्वयः । प्रकृत्यर्थस्य च

'प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते'

इति हर्य्युक्तेरुद्देश्यतानिरुपकत्वसम्बन्धेन प्रवर्तनान्वयद्वारा विधेयभूतक्रियायामन्वयः । तथाच अभिमुखीभवद् देवदत्तोद्देश्यकप्रवर्तनाविषयः त्वत्कर्तृकं भाषणमिति बोधः । एवं 'व्रजानि देवदत्त' इत्यत्र प्राचीनमते 'प्रकृतवाक्यार्थविषयकबोधफलकदेवदत्तनिष्ठाभिमुखीभावानुकूलव्यापारविषयकेच्छाविषयः प्राप्तकालिकं मत्कर्तृकं गमनम्' इति बोधः । नव्यमते—'जानीहि' इत्यस्याध्याहारः । तथाचाभिमुखीभवद् देवदत्तोद्देश्यकप्रवर्तनाविषयः मत्कर्तृकव्रजनविषयकं त्वत्कर्तृकं ज्ञानमिति बोधः । अत्र व्रजननिष्ठविशेष्यतानिरूपितप्रकारताया देवदत्तेऽभावेऽपि साक्षात्परम्परासाधारणाख्यातार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वरूपस्यैकवाक्यत्वस्य सत्त्वेन निमित्तनिमित्तिनोरेकवाक्यस्थत्वान्निघातसिद्धिः । अस्ति च प्रकृते आख्यातार्थव्रजननिष्ठविषयतानिरूपितज्ञाननिष्ठा विषयता तन्निरूपिता विषयता च प्रवर्तनानिष्ठा तन्निरूपिता विषयता देवदत्तनिष्ठा तत्प्रयोजकत्वं देवदत्तस्येति निघातसिद्धिः । अत एव 'तिङ्समानाधिकारणे प्रथमा' इति वार्तिकमते देवदत्तपदात् प्रथमा सिध्यति ।

यत्तु स्वोद्देश्यकप्रवर्तनाविषयत्वसम्बन्धेन क्रियायामन्वय इति तन्न, नामार्थस्य साक्षाद् भेदसम्बन्धेन धात्वर्थेऽन्वयस्याव्युत्पन्नत्वात् । अन्यथा कर्मत्वादिसम्बन्धेन अन्वये 'तण्डुलः पचति' इत्यपि स्यात् । तस्माद् विभक्त्यर्थसम्बन्धेन विभक्त्यर्थान्वयद्वारा वा क्रियायामन्वय इत्येव पक्षो ज्यायान् । प्राचीनमते 'व्रजानि देवदत्त' इत्यत्र तिङ्सामानाधिकरण्याभावात् प्रथमा न सिध्यतीत्यतो नव्यमतमेवादरणीयम् । 'उद्देश्यत्वसम्बन्धेन प्रवर्तनायामन्वयः' इत्यनेन सिद्धस्यैव सम्बोध्यत्वं सूचितम् । तेन 'राजन् भव युध्यस्व' इत्यस्य न साधुत्वम्, सिद्धस्यैवोद्देश्यत्वात्, राजत्वस्य चासिद्धत्वात् । एवञ्च सम्बोध्यतावच्छेदकधर्मावच्छिन्नस्य सम्बोध्यतावच्छेदकरूपेण सिद्धत्वे एव सम्बोधनविभक्तिरिति फलितम् । 'आख्यातं सविशेषणं वाक्यम्' इति समर्थसूत्रोक्तैकवाक्यत्वस्य, पूर्वोक्तैकवाक्यत्वस्य च 'पचति भवति देवदत्त' इत्यत्र सत्त्वान्निघातसिद्धिः । नचात्र 'पाको भवति' इत्यर्थे देवदत्तपदार्थस्य तत्रानन्वयान्निघातासिद्धिः, किञ्च तिङ्सामानाधिकरण्याभावात् प्रथमानुपपत्तिरिति वाच्यम्, 'जानीहि' इत्यस्याध्याहारेणादोषात्, 'वाक्यैकदेश'न्यायेन तावन्मात्रस्यैव ज्ञानार्थकत्वाद्वा । तिङन्त-

दर्पणव्याख्या

इत्यादौ 'शालीनाम्' इत्यादेः समानवाक्यस्थत्वसिद्धये 'परम्परया' इति । 'पचति भवति' इत्यादिसाधारणं चैतत् । प्रकृते च सम्बोधनस्यानुवाद्यविषयतयाऽनुवाद्यस्य विधेयसाकाङ्क्षतया, विधेयतायाश्च क्रियानिष्ठत्वेन तत्रैव सम्बोधनान्तार्थान्वयौचित्यात् समानवाक्यस्थत्वमक्षतमिति भावः । बोधस्त्वत्राभिमुखीभवनानुकूलव्यापारविषयदेवदत्तोद्देश्यकप्रवर्तनाविषयत्वदभिन्नकर्तृकं

SGDF

निघातयुष्मदस्मदादेशाः" इत्यनेन समानवाक्ये एव तन्नियमात्। उक्तञ्च वाक्यपदीये—

सम्बोधनपदं यच्च तत् क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥ इति ॥

'पचति भवति देवदत्तः' इत्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यतासत्त्वात् स्यादेव निघातः, "तिङ्ङतिङः (पा० सू० ७।१।८८) इति सूत्रयता तिङन्तानामप्येकवाक्यतास्वीकारात्। 'एकतिङ् वाक्यम्' इति वदतां

प्रभा

द्वयादिघटितेऽप्येकवाक्यत्वे सूत्रकारसम्मतिमाह—तिङ्ङतिङ इति—तिङन्तद्वये एकवाक्यत्वाभावे 'अतिङः' इत्यस्य वैयर्थ्यापत्त्या तिङन्तद्वयेऽपि एकवाक्यत्वं सूत्रकृदभिमतमिति प्रतीयते इति भावः। भाष्यकृता तु 'पचति भवति' इत्यस्य 'पचिक्रिया भवतिक्रियायाः कर्त्र्यौ भवन्ति' इत्यर्थः स्वयमेवोक्तः। तदुक्तं हरिणा—

'बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।
तिङन्तेभ्यो निघातस्य पर्युदासस्तथाऽर्थवान्' ॥ इति।

एकतिङिति—एकम् = अद्वितीयं तिङन्तं यत्र समुदाये तद्वाक्यमित्यर्थः। अत्रापि 'विशेषणविशिष्टक्रियार्थकम्' इति विशेषणं देयम्, अन्यथा 'पठति चैत्रः, पचति मैत्रः' इत्यत्र 'चैत्रः पचति' इत्यंशमादाय निघातापत्तिः, एकतिङ्घटितत्वात्, तद्दाने तु पचतिना सह चैत्रस्य सम्बन्धाभावान्न दोषः। हरिणाप्युक्तम्—

'एकतिङ् यस्य वाक्यन्तु शास्त्रे नियतलक्षणम्।
तस्यातिङ्ग्रहणे नार्थो वाक्यभेदान्न विद्यते ॥' इति।

दर्पणव्याख्या

भाषणमिति। तत्र हरिसम्मतिमाह—❀ उक्तञ्चेति ❀।

❀ सम्बोधनपदमिति ❀ तद्बोध्यमित्यर्थः। ❀ विशेषणमिति ❀ स्वोद्देश्यकप्रवर्त्तनाविषयत्वरूपपरम्परासम्बन्धेनेत्यर्थः। व्रजानीत्यस्य हि 'जानीहि' इति शेषः,

सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताऽऽभिमुख्यो हि जनः क्रियासु विनियुज्यते ॥

इति कारिकान्तरे 'विनियुज्यते' इति वदता प्रवर्त्तनाविषयक्रियायामेव तदन्वयबोधनात्। प्रवर्त्तनोद्देश्यस्यैव तद्विषयक्रियोद्देश्यत्वादुद्देश्यविधेयभावस्य तयोः संसर्गमर्य्यादया लाभादेकवाक्यतया निघात इति तदर्थः। शाब्दबोधस्त्वत्र सम्बोधनविषयदेवदत्तोद्देश्यकप्रवर्त्तनाविषयो मत्कर्तृकव्रजनकर्मकं ज्ञानमिति। ❀ सूत्रभाष्यादिरीत्येति ❀ भूवादिसमर्थसूत्रस्थभाष्योक्तरीत्येत्यर्थः।

❀ स्यादेवेति ❀ आमन्त्रितदेवदत्तपदस्येत्यर्थः। अत्र 'जानीहि' इति पदाध्याहारेणोक्तरीत्या देवदत्तपदस्यैकवाक्यस्थत्वाऽक्षतेरिति भावः। तत्र सूत्रकारसम्मतिमाह ❀ तिङ्ङतिङ इतीति ❀। ❀ तिङन्तानामिति ❀ बहुवचनेन प्रकृते 'जानीहि' पदाध्याहारः सूच्यते, अन्यथा तत्र निघाताप्राप्त्या तत्पर्युदासबोधकातिङ्ग्रहणस्य वैयर्थ्यापत्तेरिति भावः।

सम्मतिरियं सूत्रकृत एकवाक्यतांशे निघातांशे च। भाष्यसम्मतिस्तु न, तेनातिङ्ग्रहणस्य प्रत्याख्यानात्।

नन्वेवं कथमतिङ्ग्रहणप्रत्याख्यानसङ्गतिः, पचति भवतीत्यत्र निघातवारकतया तस्याऽवश्यकत्वादिति चेन्न, तत्र कारकान्वितक्रियाबोधकत्वरूपैकवाक्यत्वस्य सुप्चयसुप्तिङन्तचयसाधारणस्य सत्त्वेऽपि वार्त्तिककारपरिभाषितश्रूयमाणैकतिङ्त्वरूपैकवाक्यत्वस्य तत्रासत्त्वादित्याशयात्। तथाचोक्तस्थले तादृशैकवाक्यत्वाभावान्नियताप्रसक्तिरेवैतत्सूचनायैव ❀ स्यादेव निघात

वार्त्तिककाराणां मते परं न। वस्तुतस्तु 'एकतिङ्विशेष्यकं वाक्यम्' इति तदभिप्रायस्य हेलाराजीयादौ, वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम्॥ कृत्वोऽर्थाः,

प्रभा

नियतलक्षणम्=विवक्षितैकत्वम्। ऋषीणां दर्शनं तात्त्विकं भवतीति मतभेदेन वाक्यत्वभेदो न न्याय्य इत्याह—**वस्तुतस्त्विति**—एकं तिङन्तं मुख्यविशेष्यीभूतार्थप्रतिपादकं यत्रेति व्युत्पत्त्या मुख्यविशेष्यताश्रयार्थबोधकैकतिङन्तघटितसमुदायत्वरूपं वाक्यत्वं फलितम्। नन्वेकतिङ्घटितस्य वाक्यत्वे 'त्वया शयितव्यम्' 'ब्रूहि ब्रूहि देवदत्त' इत्यस्य चैकवाक्यत्वानापत्तिः, आद्ये तिङन्तघटितत्वाभावात्, द्वितीये 'तिङन्तद्वयघटितत्वात्। किञ्च, 'त्वया शयितव्यमिति मैत्रो ब्रूते' इत्यस्यैकवाक्यत्वापत्तिश्च, इति चेन्न, 'मुख्यविशेष्यतायोग्यक्रियाप्रतिपादकत्वनिष्ठप्रकारतानिरूपिततात्पर्य्यीयविशेष्यतावत्, पदाघटकञ्च यत्पदद्वयं तदघटितत्वे सति परस्परनिरूप्यनिरूपकभावापन्नविषयत्वाप्रयोजकपदाघटितत्वमेकवाक्यत्वम् इति स्वीकारेणादोषात्। आद्ये मुख्यविशेष्यतायोग्यक्रियाप्रतिपादकत्वनिष्ठप्रकारतानिरूपिततात्पर्यीयविशेष्यतावद् एकमेव शयितव्यपदमिति तादृशपदद्वयाघटित्वात्, द्वितीये 'नित्यवीप्सयोः' इति सूत्रेण 'सर्वस्य द्वे' इति द्विर्वचननिर्देशेन एकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते। अतः स्थानिवद्भावेन समुदायस्य पदत्वम्, अवयवयोश्च स्वत एव, अत्रानस्तमितावयवभेदस्य समुदायस्याऽदेशत्वात्। एवञ्च 'वृक्षान् वृक्षान्' इत्यत्र णत्वनिषेधः, 'अश्वेऽश्वे' इत्यादौ पूर्वरूपादिकम्, 'अश्नीताश्नीत' इत्यादौ पररूपाभावादिकञ्च सिध्यति। तथाच यद्यपि 'ब्रूहि ब्रूहि' इति पदद्वयम्, तथापि समुदायरूपपदघटकतया पदाघटकपदद्वयाघटितत्वस्य तत्राक्षतत्वात्। तृतीये वदनक्रियायां शयनस्य कर्मत्वेऽपि मुख्यविशेषतायोग्यक्रियावाचकपदद्वयघटितत्वाद् दोषाभावो बोध्यः। उदासीनपदमादायातिव्याप्तिवारणाय विशेष्यदलम्। यथा—'त्वया शयितव्यं देवदत्तस्य वस्त्रम्' इत्येतद्घटके 'त्वया शयितव्यं देवदत्तस्य' इत्यत्र। एतेन—'सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता'। इत्यमरकारोक्तं लौकिकवाक्यलक्षणमपि संगृहीतम्। 'क्रिया वा' इत्यत्र 'वा' शब्दश्चेदर्थे। 'सुप्तिङन्तचयः' इत्यत्र सुप् च तिङ् च सुप्तिङौ तावन्तौ ययोस्ते सुप्तिङन्ते, सुब्विशिष्टं तिङन्तं सुप्तिङन्तम्, सुप्तिङन्ते च सुप्तिङन्तञ्च सुप्तिङन्तानि तेषां चय इत्यर्थः। तथाच सुबन्तचयः—'देवदत्तेन शयितव्यम्' इत्यादिः, तिङन्तचयः—'पचति, भवति' इत्यादिः, सुबन्तविशिष्टतिङन्तचयः—'चैत्रः पचति' इत्यादिः, त्रयाणामपि वाक्यत्वम्।

'अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्'।

इति जैमिनिसूत्रमप्येतत्परमेव। **हेलाराजीयेति**—हेलाराजः=वाक्यपदीयटीकाकारः, तस्येदं व्याख्यानमित्यर्थे 'वा नामधेयस्य' इत्यनेन वृद्धत्वे 'वृद्धाच्छः' इत्यनेन छप्रत्यये हेलाराजीय इति शब्दः सिध्यति। कृत्वोऽर्था इति—कृत्वसुच् सुच् च द्वावेव कृत्वोऽर्थौ प्रत्ययौ, बहुवचनन्तु लक्ष्यबहुत्वाभिप्रायेण। तत्रैकशब्दात् 'एकस्य सकृच्च' इति सुचि सकृदादेशे एकवारं पचतीत्यर्थे—'सकृत्पचति' इत्यस्य साधुत्वम्। गणनञ्च—कस्यचित्पदार्थस्य संख्यावत्तया बोधनम्। अभ्यावृत्तिश्चैकशब्देन बोधयितुं न शक्यते इति

दर्पणव्याख्या

इति ❀ सम्भावनाद्योतकतिङ उपादानम्। तदेतदाविष्करोति— ❀ वार्त्तिककाराणामिति ❀ ❀ परम् ❀ केवलम्। यथाश्रुतसूत्रमनुरुध्याह ❀ वस्तुतस्त्विति ❀। ❀ हेलाराजीय इति ❀

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।
तिङन्तेभ्यो निघातस्य प्रतिषेधस्तथाऽर्थवान्॥

इति वाक्यपदीयव्याख्याऽवसर इति शेषः। ❀ तन्मतेऽपि भवत्येवेति ❀ इदञ्च निरुक्तलौकिकवाक्यत्वस्यैव निघातप्रयोजकत्वमित्याशयमूलकमित्यवधेयम्।

SGDF
Sri Gargeshwari Digital Foundation

"संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा० सू० ५ । ४ । १७) इति क्रियायोगे तत्साधुत्वोक्तेः, क्रियाया अभ्यावृत्तिः = पुनः पुनर्जन्म, तस्मिन् द्योत्ये इति तदर्थात् ।

कारकम्, 'कारके' इत्यधिकृत्य तेषां व्युत्पादनात् । कारकशब्दो हि क्रियापरः, करोति कर्तृकर्म्मादिव्यपदेशानिति व्युत्पत्तेः । तथाचाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियाऽर्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम् ।

प्रथमो वतिः, "तेन तुल्यं क्रिया चेद्वतिः" (पा० सू० ५ । १ । ११५) इति विहितः,

प्रभा

अभ्यावृत्तिरत्र न सम्बध्यते । क्रियागणनायां सुजत्र, 'द्वित्रिचतुर्भ्यः सुच्' इति द्व्यादिभ्यः सुजेव, इति पञ्चादिभ्य एव कृत्वसुच्प्रत्ययो बोध्यः । 'पञ्चकृत्वो भुङ्क्ते' इत्यादौ पञ्चादिशब्दास्तत्संख्योत्पत्तिपरास्तद्द्योतकाश्च कृत्वसुजादयः । पुनः पुनर्जन्मैवाभ्यावृत्तिस्तस्याश्च साध्यार्थविषयतया क्रियायामेव सम्भवः, न द्रव्यगुणयोः, तयोः सिद्धस्वभावत्वात् । पुनः पुनर्दण्डः, पुनः पुनः स्थूलः, इत्यादावपि भवतिक्रियाया एवाभ्यावृत्तिः, एवञ्चाभ्यावृत्तेः क्रियायामेवान्वय आवश्यकः, तदन्वयिताऽवच्छेदकस्यान्यत्रासम्भवात् । नन्वेवं क्रियाग्रहणं व्यर्थम्, 'एको देवदत्तः' इत्यत्र सुज्वारणायोत्तरसूत्रे क्रियाग्रहणस्यानुवृत्तेरुक्तत्वात् । सङ्ख्यायास्तत्तत्सङ्ख्यावत्तया बोधरूपं यद्गणनं तत्रैव हेतुतया गणनलाभे गणनग्रहणं लोके गणनायां प्रसिद्धा ये तेषामेव ग्रहणार्थमिति युग्मशरादिशब्दान्न ते प्रत्ययाः । तथाच 'पञ्चकृत्वो भुङ्क्ते' इत्यादिना पञ्चादिसंख्योत्पत्तिका वर्तमानादिकालिकी एकादिकर्तृका भुज्यादिक्रिया इति बोधः । क्रियापर इति—तथाच भाष्यम्—'अथवा यावद् ब्रूयात् क्रियायामिति तावत्कारके इति' इति, कारकशब्दः क्रियापर्याय इति तदर्थः । 'एवञ्च कृत्वा निर्देश उपपन्नो भवति—'कारके' इति । इतरथा हि कारकेष्विति ब्रूयात्' इति भाष्यात् 'कारके' इति विषयसप्तमी, 'अन्वयी' इत्यध्याह्रियते, तथाच 'क्रियायामन्वयी कर्मादिसंज्ञो भवति' इति कर्मादिसंज्ञाविधायकानामर्थः । एवञ्च 'कारके' इत्यस्य क्रियायामित्यर्थे कारकसंज्ञा एव नास्ति । 'गतिकारकोपपदात्' इत्यादौ कारकपदे स्वरितत्वप्रतिज्ञया स्वरितेनाधिकः कार इत्यर्थमादाय कर्मादीनां ग्रहणम् । क्रियाऽन्वयिनामिति—क्रियायामन्वयि कर्मसंज्ञं स्यात्, क्रियायामन्वयि कर्तृसंज्ञं स्यादित्येवं रूपेणेत्यर्थः । प्रथम इति—इदमुपलक्षणम्—'तदर्हम्' इति विहितवतेरपि, तत्रापि क्रियाग्रहणानुवृत्तेः, द्वितीयान्तादर्हणस्य कर्त्र्यां क्रियायां वतिरित्यर्थः । तेन तुल्यमिति—तृतीयान्तात्तुल्यमित्यर्थे वतिः स्याद् यत्तुल्यं सा क्रिया चेदित्यर्थः । उपमानपदार्थः, उपमेयपदार्थश्च क्रियेति यावत् । तथाच 'ब्राह्मणवदधीते क्षत्रियः' इत्यनेन ब्राह्मणाध्ययनसदृशं क्षत्रियकर्तृकाध्ययनमिति बोधः । ब्राह्मणपदञ्चात्र ब्राह्मणाध्ययने लाक्षणिकम्, तस्मात् क्रियाबोधकात् तृतीयान्ताद्वतिरिति फलितम् । 'ब्राह्मणसदृशः क्षत्रियः' इत्यर्थे 'ब्राह्मणवत् क्षत्रियः' इत्यसाधुरेव । 'पर्वतो वह्निमान्,

दर्पणव्याख्या

❀ पुनः पुनर्जन्मेति ❀ ॥ अत एव सकृत्प्रवृत्तौ, द्विः पचतीति न । 'पञ्चकृत्वो भुङ्क्ते' इत्यादौ पञ्चादिशब्दाः संख्योत्पत्तिपराः । तस्या एव कृत्वसुजादिर्द्योतकः । सूत्रस्वारस्याच्च तद्द्योत्यार्थस्य क्रियायामन्वय इति भावः । क्रियाऽन्वयिनामेव संज्ञेत्यपादानादिमध्यम् । क्वचित्तथैव पाठः । ❀ स्पष्टमिति ❀

अन्ये तु—उत्तरभाष्ये करोति = क्रियां निर्वर्त्तयतीति व्युत्पत्तिप्रदर्शनात्कारकत्वम् । अत एव ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वम्, पुत्रेणाऽन्यथासिद्धत्वात् । अत एव तेषां क्रियायामन्वयः । क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन, क्रियाया अपि जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यात् । अत एव "गतिकारकोपपदात्कृत्" (पा० सू० ६ । २ । ३९१) इत्यादौ कारकशब्दस्यापादानादिपरता सङ्गच्छते । 'कारके' इति तु प्रथमार्थे सप्तमीत्याहुः ।

तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्। धातुसम्बन्धाधिकारे, "धातुसम्बन्धे प्रत्ययाः" (पा० सू० ३।४।१) इत्यधिकृत्य तेषां विधानात्।

असमस्तनञ्—समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः, उत्तरपदार्थान्वयेऽपि समास-

प्रभा

महानसवत्' इत्यपि महानससदृशः पर्वत इत्यर्थेऽसाधुरेव। वह्निमत्त्वेन महानसकर्तृकभवनसदृशं पर्वतकर्तृकभवनमित्यर्थे तु साधुरेव।

धातुसम्बन्ध इति—अत्र धातुपदं धात्वर्थपरम्, शब्दरूपाणां धातूनामाकाङ्क्षितसम्बन्धस्य दुरुपपादत्वात्। यदि त्वर्थद्वारको धातूनां सम्बन्धो गृह्येत, तदा धातुद्वयादिसत्त्वे एवैतस्य प्रवृत्तिः स्यात्तथाच 'गोमानासीत्' 'गोमान् भविता' इत्यादि न सिध्येदिति लक्षणया 'धात्वर्थानां सम्बन्धे प्रत्ययाः' इत्येवार्थो ग्राह्यः। इदञ्च सूत्रं ये प्रत्यया यत्र काले उक्तास्ते प्रत्यया धात्वर्थयोरेककालिकत्वादिरूपे सम्बन्धे विवक्षिते प्राधान्येन या क्रिया प्रतीयते तस्यां यत्कालिकत्वं तस्मिन्काले गुणभूतक्रियावाचिभ्यः प्रत्यया भवन्तीति कालान्तरेऽपि प्रत्ययान् विदधाति। कालं निमित्तीकृत्य विहिता ये प्रत्ययास्तेऽस्य विषयाः। तथाच गुणीभूतक्रियावाचकोत्तरप्रत्ययार्थस्य प्रधानीभूतक्रियायामेवान्वय इत्युक्तं कारिकायाम्—**धातुसम्बन्धाधिकारनिष्पन्नेति**। यथा 'वसन् ददर्श' 'पश्यन् ययौ' इत्यत्र वासदर्शनयोर्दर्शनगमनयोश्च भूतकालिकत्वम्, तत्र वर्तमानकालिकलटः स्थाने शतृप्रत्ययो नोपपद्यते इति 'धातुसम्बन्धे' इत्यनेन प्रधानीभूताऽख्यातार्थक्रियाकालमादाय भूते लट्। अतीतवासकर्तृकर्तृकं परोक्षभूतकालिकं दर्शनमित्यादिरूपेण बोधः।

समासायोग्य इति—प्रसज्यनञः क्रियायामेवान्वयेन सुबन्तार्थेन सह सामर्थ्याभावात् समासायोग्य इत्यर्थः। **प्रसज्येति**—प्रपूर्वकसञ्जधातोः क्त्वो ल्यपि नलोपे साधुः। प्रतिषिध्यतेऽसौ प्रतिषेधः, कर्मणि घञि प्रतिषेध इति। तथाच प्रसज्य=आपाद्य=वितर्क्य=तर्को नाम–'तर्कयामि' इत्यनुभवसाक्षिकमानसत्वव्याप्यजातिविशेषाश्रयः तद्विषयीकृत्येति यावत्। प्रतिषेधः=निषेधविषयः प्रतियोगी यस्याभावस्य सोऽभावः प्रसज्यप्रतिषेधः=अत्यन्ताभाव इत्यर्थः। 'सुपा' इति समासः। प्रसज्यप्रतिषेधम्=अत्यन्ताभावं वाचकत्वेनार्हति यो नञ् 'तदर्हति' इति सूत्रेण छे प्रत्यये प्रसज्यप्रतिषेधीयो नञ् अत्यन्ताभावार्थक इति यावत्। अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वमिति मतेनेदम्। अन्ये तु प्रसज्येत्यस्य क्रियया सम्बध्येत्यर्थः। क्रियान्वय्यभावार्थकनञित्यर्थः। तथाचोक्तम्—

'प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्' ॥ इति ॥

नञ्समासेऽपि विभाषाधिकारात् समासाभावेऽपि उत्तरपदार्थेन घटादिनैव नञर्थस्य सम्बन्धात् 'न घटः' इत्यनेनापि आरोपितघटत्ववान्, प्रतियोगितासम्बन्धेनाभावविशिष्टो घट इति वा बोधात् समासायोग्य इति विशेषणम्। तथाच 'न घटः' इत्यत्र समासयोग्यत्वसत्त्वात् क्रियायामन्वयाभावेऽपि न दोषः। समासयोग्यत्वञ्च नञः—उत्तरपदार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वम्। समासायोग्यस्यैव विवरणम्—**प्रसज्यप्रतिषेधीयेति**।

दर्पणव्याख्या

❀ इत्युक्तत्वादिति ❀ तथाच ब्राह्मणवदिति वृत्तौ ब्राह्मणशब्दस्य ब्राह्मणकर्तृकाध्ययनतुल्यमेककर्तृकमध्ययनमिति 'ब्राह्मणवदधीते' इत्यतो बोधः। तत्र तस्येवेति विहितवतेर्द्रव्यगुणान्वयित्वान्मूले प्रथम इत्युक्तम्। ❀ विधानादिति ❀ तत्र धातुशब्दस्य धात्वर्थपरतायाः 'वसन् ददर्श' इत्यत्र अतीतवासकर्तृकर्तृकं दर्शनमित्यादिरीत्या बोधादिति भावः॥

❀ प्रसज्येति ❀ प्रतिषेधशब्दः कर्मघञन्तः, बाहुलकात्। प्रसज्य = आपाद्य प्रतिषेधः = प्रतियोगी यस्य तादृशा

विकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणायोगात् ।

नचासमस्तनञः क्रियान्वये मानाभावः, न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते इत्यादौ क्रियाया एव निषेधप्रतीतेः । अत एव विद्यमानेऽपि घटे तादृशप्रयोगः ।

प्रभा

ननु 'घटो नास्ति' इत्यत्र घटाभाव एव न तु क्रियाभाव इत्याशङ्कायामाह—नचासमस्तेति ।

असमस्तनञ इति—समासाघटकनञर्थस्यात्यन्ताभावरूपस्येत्यर्थः । न त्वमिति—यदि नञर्थाभावे प्रतियोगितया युष्मदाद्यर्थस्यान्वयः स्यात्तदा 'न त्वं पचसि' इत्यनेन त्वदभावकर्तृकः पाकः' इति 'न युवां पचथः', इत्यनेन 'द्वित्वविशिष्टयुष्मदभावकर्तृकः पाकः' इति च बोधात् तिङा युष्मदर्थसामानाधिकरण्याभावान्मध्यमादिपुरुषानुपपत्तिः, अभावरूपकर्तुरैक्यात् 'न युवां पचथः' इत्यत्र द्विवचनासिद्धिः, अभावे पाकक्रियाकर्तृत्वबाधात्तज्जन्यबोधस्याप्रमात्वापत्तिः, अनुभवसिद्धस्य तत्क्रियाऽभावविशेष्यकबोधस्यापलापश्च स्यादिति तत्तत्क्रियाप्रतियोगिकाभावविशेष्यकबोध एव स्वीकर्त्तव्य इति भावः ॥

चैत्र इति—अभावे एकत्वविशिष्टचैत्रादेर्विशेषणत्वे एकवचनस्य सिद्धावपि प्रतियोगिनो द्वित्वादिविशिष्टत्वेऽपि एकवचनमेव स्यादिति भावः ॥

निषेधप्रतीतेरिति—'त्वत्कर्तृकपाकाभावः' इति धात्वर्थक्रियाया अभावबोधने तु युष्मदाद्यर्थसामानाधिकरण्यस्य तिङि सत्त्वात्पुरुषव्यवस्था सिद्ध्यतीति भावः ।

यत्तु—'न त्वं पचसि' इत्यादौ युष्मच्छब्दस्य युष्मदर्थभिन्ने लक्षणया लक्ष्यार्थस्यापि युष्मदर्थतया तत्र तिङ्सामानाधिकरण्यसत्त्वान्न पुरुषव्यवस्थानुपपत्तिरिति तन्न, युष्मदर्थस्य, तद्भिन्नस्य च पाककर्तृत्वाभावदशायामिष्टस्य 'न त्वं पचसि' इत्यादिप्रयोगस्यासङ्गत्यापत्तेः, युष्मदर्थभिन्नस्य कर्तृत्वेऽपि युष्मच्छक्यार्थे द्वित्वविवक्षायाम् 'न युवां पचथः' इत्यादिप्रयोगानापत्तेश्च । अत एव=प्रसज्यप्रतिषेधीयनञः क्रियाप्रतियोगिकाभावस्य बोधकत्वादेव ।

विद्यमानेऽपीति—घटवत्तानिश्चये घटाभावबोधस्याशक्यतया तत्र घटकर्तृकोत्पत्त्यनुकूलव्यापाराभाव एव बोद्धव्य इति भावः । यद्यपि घटात्यन्ताभावस्य नित्यतया घटाभावजननबोधनं न सम्भवति इति 'विद्यमानेऽपि' इत्युक्तिर्निष्फला, तथापि उत्पादविनाशशाली कश्चनापरोऽप्यत्यन्ताभाव इति पक्षे घटाभावेऽपि जननाश्रयत्वसम्भवाद् घटस्य विद्यमानत्वोक्तिरित्याशयात् ।

तादृशेति—'घटो न जायते' इत्येतादृश इत्यर्थः । 'तथाप्रयोगः' इत्येव लिखितपुस्तकेषु पाठः ।

दर्पणव्याख्या

ऽभावोऽर्थो यस्येति व्युत्पत्त्याऽभावार्थक इत्यर्थः । ❀यथाश्रुतेति❀ 'न ब्राह्मणमानय' इत्यादौ नञर्थारोपस्य ब्राह्मणादावन्वयेन व्यभिचारापत्तेरिति भावः । ❀ निषेधप्रतीतेरिति ❀ अत्यन्ताभावप्रतीतेरित्यर्थः । तथाच तादृशप्रतीतिरेवोक्तनञर्थस्य क्रियाऽन्वयित्वे मानमिति भावः ।

तस्य प्रतियोगितया युष्मदाद्यर्थाऽन्वयित्वे तु युष्मदादौ लकारवाच्यकर्तृवाचकत्वरूपसामानाधिकरण्याभावान्मध्यमपुरुषाद्यनुपपत्तिर्युष्मदर्थप्रतियोगिकाभावस्यैकत्वेन द्विवचनाद्यनुपपत्तिश्चेति सूचयितुम्—❀न त्वं पचसि❀ ❀न युवां पचथः❀ इत्युक्तम् । एवं चैत्रप्रतियोगिकाभावकर्तृत्वोपगमे पाके तत्कर्तृकत्वबाधः, पाकानुकूलकृत्यभावार्थकत्वे त्वन्मते पुरुषव्यवस्थापकाभावेन कदाचिन्मध्यमोत्तमयोरापत्तिश्चेति बोधयितुम्—❀ चैत्रो न पचति ❀ इत्युक्तम् । ❀ अत एवेति ❀ नञः क्रियाप्रतियोगिकाभावबोधकत्वादेवेत्यर्थः ॥

❀ तादृशप्रयोग इति ❀ 'घटो न जायते' इत्याकारक इत्यर्थः । घटस्य विद्यमानतादशायां घटकर्तृकोत्पत्त्यनुकू-

तथाच 'घटो नास्ति' इत्यत्राप्यस्तित्वाभाव एव बोध्यते। नहि घटो न जायते, नास्तीत्यनयोर्धात्वर्थभेदान्तरेणास्ति विशेषः। तथाच 'भूतले न घटः' इत्यत्राप्यस्तीत्यध्याहार्य्यम्,

प्रभा

तथाच = 'न त्वं पचसि' इत्यादौ क्रियानिषेधाऽवश्यकत्वे च।

यदि नञर्थस्य क्रियायामन्वयस्तदा घटकर्तृकोत्पत्त्यनुकूलव्यापारस्य प्रकृते सत्त्वेन 'घटो न जायते' इति वाक्यार्थस्याबाधिता प्रतीतिर्जायते। घटाभावस्य कर्तृत्वे तु जननप्रतीतिर्बाधिता स्यादिति भावः। नचैवमपि लडर्थवर्तमानत्वस्य धात्वर्थे एवान्वयात् प्रकृते घटकर्तृकोत्पत्त्यनुकूलवर्तमानकालाऽवच्छिन्नव्यापारासत्त्वेन प्रतियोगिनोऽप्रसिद्ध्या तादृशव्यापाराभावस्यापि बोधो न स्यादिति वाच्यम्, वैयाकरणनये बौद्धतादृशव्यापारस्य, नैयायिकनये देशान्तरीयस्य च तस्य प्रतियोगिनः प्रसिद्धेः। यथा 'वायौ रूपं नास्ति' इत्यत्र वायुनिरूपिताधेयतावद्रूपस्याप्रसिद्धावपि बौद्धतादृशरूपकर्तृकसत्ताभावस्य शाब्दिकनये प्रतीतिः। नैयायिकनये च स्पर्शगतवायुनिरूपिताऽधेयत्वस्य रूपे भ्रममादाय तज्जन्यो बोध उपपाद्यः।

अस्तित्वाभाव इति—घटकर्तृकसत्ताया अस्तित्वाभाव इत्यर्थः। ननु घटस्य विद्यमानत्वे घटाभावबोधस्य बाधात् क्रियानिषेधप्रतीतिस्वीकारेऽपि घटस्याविद्यमानत्वे घटाभावप्रतीतौ बाधकाभाव इत्याशङ्कायामाह—नहीति—तथाच क्वचित् क्रियाऽभावस्य क्वचित्तदन्याभावस्य प्रतीत्यभ्युपगमेऽर्धजरतीयं स्यात्तच्च न युक्तमिति भावः। तथाच = प्रसज्यप्रतिषेधार्थकनञः क्रियान्वयनियमे च। अध्याहार्यमिति—यत्र क्रियावाचकपदं न श्रूयते तत्रोक्तनियमात् 'अस्तिर्भवन्तीपरो(भवन्तीति 'लट्' इत्यस्य संज्ञा)ऽप्रयुज्यमानोऽप्यस्ति' इति भाष्याच्च नञर्थान्वययोग्यक्रियापदमध्याहार्यमिति भावः। तत्राध्याहृतपदप्रतिपाद्यक्रियाया अनुयोगितासम्बन्धेन नञर्थाभावेऽन्वयः। एवञ्च 'घटकर्तृकसत्ताभावः' इत्येव बोधस्तत्रापि।

यत्तु—'भूतले न घटः' इति वाक्यात् 'भूतलनिरूपिताऽधेयत्वाभाववान् घटः' इत्येव बोध इति तन्न, कारकाणां क्रिययैवान्वयनियमेन क्रियाऽतिरिक्ते नञर्थे भूतले इत्यधिकरणकारकस्यान्वयानौचित्यात्। अत एव 'सुडनपुंसकस्य' इति सूत्रे 'नपुंसकस्य सुटो न सर्वनामस्थानसंज्ञा' इत्यर्थे 'नहि नपुंसकेन सामर्थ्यम्, केन तर्हि, भवतिना' इति भाष्यं सङ्गच्छते।

शाब्दबोधस्थले द्विविधो हि कार्यकारणभावः—आत्मनिष्ठप्रत्यासत्त्या, विषयनिष्ठप्रत्यासत्त्या च। तत्र कार्यकारणयोः कार्यताऽवच्छेदककारणताऽवच्छेदकसम्बन्धाभ्यां सामानाधिकरण्यमपेक्ष्यते। तथाच आत्मरूपमधिकरणमादाय यदा कार्यकारणभावस्तदा शाब्दबोधरूपकार्यस्य, उपस्थितिरूपकारणस्य च आत्मनि समवायसम्बन्धेन सामानाधिकरण्यमिति आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभाव इत्युच्यते। तत्र समवायसम्बन्ध एव कार्यताऽवच्छेदकः, कारणताऽवच्छेदकश्च।

शाब्दबोधीयविषयताऽऽश्रयः, उपस्थितीयविषयताऽऽश्रयश्च यो घटादिस्तन्निष्ठविषयतामादाय विषयतासम्बन्धेन यदा शाब्दबोधोपस्थित्योः कार्यकारणभावस्तदा विषयनिष्ठप्रत्यासत्त्या कार्यकारणभाव इति व्यवह्रियते। तत्र विषयता एव कार्यतावच्छेदकसम्बन्धः, कारणताऽवच्छेदकसम्बन्धश्च। सा च नानाविधा—प्रकारता,

दर्पणव्याख्या

व्यापाराभावाऽबाधात्त्वन्मते तु घटाऽभावे उत्पत्त्यनुकूलव्यापारकर्तृत्वाऽभावादुक्तप्रयोगानुपपत्तिरिति भावः। उक्तरीत्या नञः क्रियाप्रतियोगिकाऽभावबोधकत्वध्रौव्ये घटो नास्तीत्यत्र घटाऽभावकर्तृकत्वस्य धात्वर्थे अबाधेऽपि तद्बोधमनादृत्य घटास्तित्वाभावबोधाभ्युपगम उचितः, वक्ष्यमाणकार्य्यकारणभावबलादित्याह ❀तथाच घट इति❀। तदेवोपपादयति❀नहीत्यादिना❀।

ननु यत्र न क्रियावाचकसमभिव्याहारो भूतले न घट इत्यादौ तत्र नञा कथं क्रियाप्रतियोगिकाभावो बोधनीयोऽत आह—❀ तथाचेति ❀। ❀ अध्याहार्य्यमिति ❀। 'अस्तिर्भवन्तीपरः' इत्यादिभाष्ये क्रियान्तराभावेऽप्यस्तिक्रियामादाय

प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात् । शेषं

प्रभा

विशेष्यता,अवच्छेदकता, संसर्गताऽऽदिविषयतापदव्यवहार्य्या। तत्र विषयनिष्ठप्रत्यासत्तिपक्षमादायाह—प्रकारतासम्बन्धेनेति—नञर्थात्यन्ताभावविशेष्यको बोधः कार्यम्, नञर्थाभावनिष्ठविशेष्यतानिरूपितशाब्दबोधीयप्रकारता च कार्यताऽवच्छेदकसम्बन्धः, धातुजन्यभावनोपस्थितिः कारणम्, उपस्थितीयविशेष्यता च कारणताऽवच्छेदकसम्बन्धः। तथाच आत्मधारणानुकूलव्यापाररूपसत्ताया अस्तिना विशेष्यतयोपस्थितिसत्त्वात्तत्र नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन घटकर्तृकसत्ताभाव इति बोधस्य च सत्त्वाल्लक्षणसमन्वयः।

एतेन 'भूतले न घटः' 'इत्यत्र भूतलनिरूपिताऽऽधेयत्वाभाववान् घटः' इत्येव बोध इत्यपास्तम्, उक्तनियमविरोधात्, भाष्याननुमतत्वाच्च।

अत्र नैयायिकाः—'भूतले न घटः' इत्यत्र 'भूतलनिरूपिताऽधेयत्वाभाववान् घटः' इत्येव बोधः। 'अहं नास्मि' 'त्वं नासि' इत्यादौ मदभावे त्वदभावे युष्मदस्मदोर्लक्षणया तिङा युष्मदस्मदर्थस्य लक्ष्यार्थस्य सामानाधिकरण्यसत्त्वान्न दोषः। नच 'युवां न स्थः' इत्यत्र युष्मदर्थाभावस्य युष्मदर्थत्वेऽपि तस्यैकत्वाद् द्विवचनानुपपत्तिः, प्रतियोगिनो द्वित्वादिविशिष्टत्वे युष्मदर्थकर्तृकसत्तानिरूपिततिङर्थाऽऽश्रयत्वप्रतियोगिकाभावस्यैव द्वित्वविशिष्टयुष्मदाद्यर्थे, 'सत्तानिरूपिताऽश्रयत्वाभाववन्तौ' 'युवाम्' इति 'न युवां स्थः' इत्यादिना 'सत्तानिरूपिताश्रयत्वाभाववन्तौ घटौ' इति घटौ न स्तः, इत्यादिना च बोधाङ्गीकारात्पुरुषव्यवस्थोपपत्तेः। एवं 'घटो न जायते' इत्यत्र 'उत्पत्त्यनुकूलव्यापाराऽश्रयत्वाभाववान् घटः' इत्येव बोधः। 'वायौ रूपं नास्ति' इत्यत्र वायुनिरूपिताधेयत्वाभाववद् रूपम्' इत्येव बोध इत्याहुस्तन्निरासायाऽऽह—शेषमिति—यदा कश्चिदपि पाकं न करोति तदाऽपि 'न त्वं पचसि' इत्यादिप्रयोगा इष्यन्ते, ते न सिद्ध्येयुः, युष्मद्भिन्नकर्तृकपाकस्याभावात्। नच देशान्तरे युष्मदाद्यर्थभिन्नकर्तृकपाकः सम्भवतीति वाच्यम्, एवमपि इह नगरे पाकसामान्याभावसत्त्वे 'इह नगरे त्वं न पचसि' इत्यादीनामसिद्धितादवस्थ्यात्, तादृशप्रतियोग्यप्रसिद्धेः। एवं सामान्यादिषु 'समवायसम्बन्धेन सत्ता नास्ति' इति वाक्येन शाब्दबोधानापत्तिः, समवायसम्बन्धेन सामान्यादिषु कस्यापि पदार्थस्यावृत्तितया समवायसम्बन्धावच्छिन्नसामान्यादिवृत्तित्वस्याप्रसिद्धेः। 'सामान्यादिवृत्तित्वं

दर्पणव्याख्या

वाक्यपरिपूर्त्तिबोधनादिति भावः। ❀ प्रकारतासम्बन्धेनेति ❀ नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन धातुजन्योपस्थितेर्हेतुत्वस्य 'न त्वं पचसि'इत्याद्यनुरोधेन क्लृप्तत्वादत्राऽपि तद्बोधोपपत्तयेऽस्त्यध्याहार आवश्यक इति भावः।

ननु नञर्थाभावस्य शाब्दबोधे प्राधान्योपगमे तदर्थभेदात्मकाभावस्यापि प्राधान्यमेवाभ्युपेयम्, अभावत्वाविशेषात्, तथाच 'असर्वस्मै' इत्यादौ सर्वनामताप्रयुक्तस्मायादिकार्यानुपपत्तिः, 'अतिसर्वाय' इतिवत्। असर्वशब्दात् 'सर्वभिन्नः' इति बोधेन भेदांशे सर्वपदार्थस्योपसर्जनत्वात् महासंज्ञाकरणेन संज्ञोपसर्जनार्थानां सर्वाऽदिबहिर्भावात्। किञ्चानेकमन्यपदार्थे इत्यादावनेकशब्दादेकवचनानुपपत्तिरत आह—शेषमिति—

नन्वत्वं पचसीत्यादाविवात्राऽपि नञः पर्युदासद्योतकत्वाऽभ्युपगमाद् युष्मल्लक्ष्यार्थत्वद्भिन्ने सामानाधिकरण्याबाधान्न पुरुषव्यवस्थाऽनुपपत्तिः। सङ्ख्यायास्तत्राबाधान्न द्विवचनाऽनुपपत्तिरपीति। तादृशकार्य्यकारणभावस्यैवाप्रामाणिकतया कथं तदनुरोधोऽस्त्याध्याहारनियामकः। 'घटो न जायते' इत्यादौ प्रसज्यप्रतिषेधार्थकनञ्स्थले तु यथा नानुपपत्तस्तथा वक्ष्यते। तथाच भूतले घटो नेत्यादौ भूतलवृत्तिघटाभाव इति बोधे बाधकाभावोऽत आह—❀ शेषमिति ❀।

SGDF

नञर्थनिर्णये (निरूपणे) वक्ष्यते ॥ १६ ॥

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम् ।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्य्यताम् ॥ १७ ॥

"यस्य च भावेन भावलक्षणम्" (पा० सू० २ । ३ । ३७) इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात् । "षष्ठी चानादरे" (पा० सू० २ । ३ । ३८) इति तदग्रिमसूत्रेऽपि चकाराद्यस्य च भावेनेत्यायातीत्यर्थः ।

प्रभा

समवायसम्बन्धावच्छिन्नत्वाभाववत्' इति बोधस्तु वक्तुमशक्यः, तादृशाभावतात्पर्येण 'पृथिव्यामपि सत्ता नास्ति' इति प्रयोगापत्तेः, पृथिवीनिरूपितघटवृत्तिवृत्तित्वे समवायसम्बन्धावच्छिन्नत्वाभावात् ॥ १६ ॥

तथा यस्य चेति—तथा = सम्बोधनाद्यर्थस्येव । 'यस्य च भावेन' इत्येकदेशेन सूत्रं लक्ष्यते । तथाच यस्य क्रियया क्रियान्तरं लक्ष्यते ततः = ज्ञापकक्रियाश्रयवाचकात् सप्तमीत्यर्थकेन 'यस्य च भावेन भावलक्षणम्' इति सूत्रेण विहिता सप्तमी । 'षष्ठी च' इत्यनेन 'षष्ठी चानादरे' इति सूत्रं लक्ष्यते । अनेनापि ज्ञापकक्रियाऽऽश्रयवाचकादनादरे गम्ये षष्ठी सप्तमी च, 'च' शब्देन पूर्वसूत्रात् सप्तम्यनुवृत्तेः । तत्र षष्ठीसप्तम्योः ज्ञापकत्वमर्थः 'गोषु दुह्यमानासु गतः' इत्यनेन दोहनकर्माभिन्नगोनिष्ठज्ञापकतानिरूपितज्ञाप्यतावदतीतकालिकगमनाश्रयो देवदत्तादिरिति बोधः । 'भावलक्षणम्' इत्युक्तेर्ज्ञाप्यतायाः क्रियायामेव सत्त्वाच्च तत्रैवान्वयस्यौचित्यात् 'छात्रेष्वधीयानेषु गतः' इत्यनेनाप्यध्ययनकर्त्रभिन्नछात्रनिष्ठज्ञापकतानिरूपितज्ञाप्यतावदतीतकालिकगमनाश्रयाभिन्नश्चैत्रादिरिति बोधः । एवं 'रुदति रुदतो वा प्राव्राजीत्' इत्यत्र 'षष्ठी चानादरे' इति षष्ठी-सप्तम्यौ । तत्र रोदनकर्त्रभिन्नपुत्रादिविशिष्टमतीतकालिकं यद् व्रजनं तदाश्रयः पित्रादिरिति बोधः । व्रजने पुत्रादिवैशिष्ट्यञ्च—स्ववृत्तिरोदनकालिकत्वम् स्वविषयकानादरसामानाधिकरण्यमेतदुभयसम्बन्धेन । इमे षष्ठीसप्तम्यौ यत्र मानान्तरेण ज्ञातस्यार्थस्य कालविशेषादिज्ञापनाय शब्दप्रयोगस्तत्रैवेति 'राहूपरागे स्नायात्' इत्यादावधिकरणे एव सप्तमी, नानेन । उक्तोदाहरणेषु रुदतीत्यादिषु 'धातुसम्बन्धे' इत्यनेन भूते लट् ।

दर्पणव्याख्या

तथाच यदा युष्मदर्थभिन्नकर्तृको न पाकस्तदा न त्वं पचसीति प्रयोगाऽनापत्तिः । पर्युदासद्योतकतावादिमतेऽतस्तत्र प्रसज्ज्यप्रतिषेधार्थकत्वमेवाऽङ्गीकरणीयमित्युक्तयुक्त्या कार्य्यकारणभावस्यावश्यकतेत्यादिशेषपदार्थः । नैयायिकमतमपि तत्रैव व्यक्तीभविष्यति । 'नञर्थनिरूपणे' इत्यस्य 'विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम्' इति कारिकाव्याख्यानावसरे इति शेषः । वक्ष्यते इति—'एतत्तदोः इति सूत्रे 'अनञ्समासग्रहणेन नञ्समासान्तर्गतोपसर्जनीभूतार्थप्रतिपादकानामपि गणपठितानां सर्वादित्वज्ञापनान्नोक्तानुपपत्तिः । तथा अनेकमन्य' इत्यत्र विशेष्यवाचकैकवचनान्त 'सुप्' शब्दानुरोधात्, ''सेव्यतेऽनेकया' इत्यादौ प्रत्येकं योषासु सेवनान्वयबोधानुरोधादेकवचनमिति न तदननुपपत्तिरपीति वक्ष्यते इत्यर्थः । तद्योग इति—क्रियान्वय इत्यर्थः ॥ १६ ॥

❀ साधुत्वाऽऽख्यानलाभादिति ❀ अयम्भावः—"यस्य च भावेन भावलक्षणम्" । (पा४ सू० २।३।३७) इति सूत्रेण क्रियाज्ञापकक्रियाश्रयवाचकपदात् सप्तमी विधीयते । 'भावलक्षणम्' इत्युपादानाज्ज्ञापकत्वरूपसप्तम्यर्थस्य क्रियायामेवान्वयः । अत एव 'गोषु दुह्यमानासु गतः' इत्यादौ दोहनक्रियाऽऽधारकालेन गमनपरिच्छेदकत्वं बुध्यते इति ।

❀ आयातीति ❀ । समस्तसूत्रमेव तत्रानुवर्त्तते इत्यर्थः । तथाचाऽनादरे गम्यमाने यन्निष्ठक्रियायाः क्रियान्तरज्ञापकत्वं तद्वाचकतेति तदर्थात् तद्विहितयोरपि तयोः षष्ठीसप्तम्योः क्रियायोगे एव साधुत्वं लभ्यत इत्यर्थः । ननूक्तानां क्रियान्वया-

सापेक्ष, अनादर

साधुत्वमिति—तत्स्वरूपं तु वक्ष्यते ।

क्रिययैवेति—अयं भावः—भूवादिसूत्रादिषु प्रायशः क्रियाशब्देन भावनाव्यपदेशात् तत्र तस्य साङ्केतिकी शक्तिः । फलांशे क्वाचित्कः—क्रियत इति यौगिकः प्रयोगः । तथाच संज्ञाशब्दस्यानपेक्ष्य प्रवृत्तत्वेन बलवत्त्वाद्भावनान्वय एव साधुता लभ्यते । अत एव संज्ञाशब्दप्राबल्यात् 'रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयम्, नतु वेदे तदुत्तरपठ्यमानऋक्षु' इति नवमे निर्णीतम् ।

प्रभा

साधुत्वमिति—'व्याकरणव्यङ्ग्यो जातिविशेषः साधुत्वम्' इति वक्ष्यते इत्यर्थः । तथाच क्रियान्वये एवैषां साधुत्वं नान्यथेति भावः । नन्वस्तु क्रियान्वयेऽष्टानां साधुत्वम्, परन्तु क्रिया च धात्वर्थ एवेति फलमात्रं धात्वर्थ इति मते फलान्वयेऽपि क्रियान्वयित्वमक्षतमेवेति न पाक इत्यादिस्थले एषामन्वयबलेन भावनायां धात्वर्थत्वं सिध्यतीत्याशङ्कायामाह—अयम्भाव इति । तस्य = क्रियाशब्दस्य । सङ्केतात् = शास्त्रकारीयव्यवहारात् आगता शक्तिः साङ्केतिकी—अध्यात्मादित्वात् ठञ्, रूढिशक्तिरिति यावत् । यौगिक इति—योगात् = अवयवशक्तेः आगतो यौगिकः । अनपेक्ष्येति—प्रकृतिप्रत्ययशक्तिमननुसन्धायेत्यर्थः । तथाच क्रियाशब्देन क्रियते या सा क्रिया = फलम् इति प्रकृतिप्रत्ययतदर्थज्ञानपूर्वकमेव क्रियाशब्देन फलप्रतीतिः । व्यापारस्य तु शक्तिज्ञानमात्रेणोपस्थितिरिति शीघ्रोपस्थितिकतया क्रिययैवावधार्यतामित्यत्र क्रियापदेन भावनाया एव ग्रहणम्, नतु फलस्य । फलस्य तु क्वचित्प्रमाणान्तरसत्त्वे एव । यथा 'क्रियाविशेषणानां कर्मत्वम्' इत्यत्र फलस्य ग्रहणम् । अत एव—रूढेर्बलवत्त्वादेव । प्राबल्यादिति प्रकृतिप्रत्ययाद्यनपेक्षतया शीघ्रोपस्थितिकत्वमेव बलवत्त्वे बीजमित्युक्तं प्राबल्यादिति । अत एव = संज्ञाशब्दस्यानपेक्ष्यप्रवृत्तत्वादेव । संज्ञाशब्दानां प्राबल्ये मीमांसाभाष्यमपि प्रमाणयति—रथन्तरमिति—रथन्तरशब्दः सामवेदीयमन्त्रविशेषः । उत्तरेति—'रथन्तरमुत्तरयोर्गायति' इति श्रूयते । अथेदानीमिदं संदिह्यते—रथन्तरयोन्यपेक्षया उत्तरत्वविशिष्टयोर्योन्योः 'रथन्तरमुत्तरयोर्गायति' इति श्रुतिघटकेन 'उत्तरयोः' इति पदेन गृह्यते, उत उत्तरानामकग्रन्थपठितऋचोर्वा ग्रहणमिति । तत्र उत्तरत्वविशिष्टयोरित्यर्थे किन्निरूपितमुत्तरत्वमित्यवध्याकाङ्क्षा जायते । ग्रन्थस्य ग्रहणे तु अवध्याकाङ्क्षा न जायते इत्यनपेक्ष्यबोधकत्वेन बलवत्त्वादुत्तराग्रन्थपठितऋचोरेव ग्रहणमिति मीमांसाया नवमाध्याये निर्णीतम्, इति रूढेर्बल-

दर्पणव्याख्या

भावेऽपि शक्तत्वरूपसाधुत्वं सुलभमत आह—❀ तत्स्वरूपमिति ❀ साधुत्वस्वरूपमित्यर्थः । ❀ वक्ष्यत इति ❀ साधुत्वनिर्वचनवसर इति शेषः ।

साधुत्वं न शक्तत्वम्, अपशब्दादपि बोधोदयात्, किन्तु व्याकरणैकव्यञ्जिका पुण्यजनकतावच्छेदकजातिरिति वक्ष्यत इत्यर्थः । प्रकृते च व्याकरणेन क्रियान्वितेष्वेव तद् व्यज्यत इति तदन्यस्यासाधुतैवेति भावः ।

ननु 'क्रिययैवावधार्यताम्' इति मूलेन क्रियाऽन्वये एवोक्तानां साधुत्वं लभ्यते इति सत्यमेव, तथापि भाष्ये क्रियापदस्य फलेऽपि प्रयोगात्साक्षात्परम्परया वा क्रियापदार्थफलान्वयेनापि तेषां साधुत्वोपपत्तौ नोक्तरीतिर्धातोर्व्यापारवाचकत्वसाधिकेत्याशङ्क्याऽऽशयं प्रकाशयति—❀ अयम्भाव इति ❀ । ❀ प्रायशः क्रियाशब्देनेति ❀ तथाच प्रयोगबाहुल्यं रूढिसद्भावे प्रयोजकमिति भावः ।

❀ साङ्केतिकीति ❀ सङ्केताभिव्यङ्ग्या रूढिरित्यर्थः । तत्र हेतुः—❀ क्वाचित्क इति ❀ । तत्र नियामकमाह—❀ यौगिक इति ❀ क्रियते = व्यापारेण निष्पाद्यते इति व्युत्पत्तेरिति भावः । ❀ अनपेक्ष्येति ❀ प्रकृतिप्रत्ययशक्तिमननुसन्धायेत्यर्थः । ❀ अत एवेति ❀ संज्ञाशब्दस्यानपेक्ष्य प्रवृत्तिकत्वेन बलवत्त्वादेवेत्यर्थः ।

❀ नवमे इति ❀ मीमांसानवमाध्याये इत्यर्थः । तथाहि—रथन्तरं हि "यद्योन्यां तदुत्तरयोर्गायति" इति श्रूयते ।

SGDF Sri Gargeshwari Digital Foundation

किञ्च फलांशोऽपि भावनायां विशेषणम्, कारकाण्यपि क्वचित्तथाभूतानि, इति "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" (जै० सू० ३।१।२२) इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्यन्वियन्ति। 'नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके' इति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति मीमांसका अपि

प्रभा

वत्त्वं स्पष्टमेवोपलभ्यते। एवञ्च वेदे रथन्तरयोन्युत्तरं बृहद्योनिः पठिता, तस्यां रथन्तरं न गीयते, किन्तूत्तराग्रन्थ-पठितऋक्ष्वेवेत्युक्तम्। ननु क्रियाशब्दः 'फले यौगिकः' 'भावनायां रूढः' इति निर्णीते एवोक्ताधिकरणानुरोधेन क्रियापदेन भावनाया ग्रहणमिति वक्तुं शक्यते, कर्मणि प्रत्यये फलपरत्वम्, करणे प्रत्यये भावनापरत्वमिति योगेनैव निर्वाहः। किञ्च फलस्यापि 'कर्मवत्कर्मणा' इति सूत्रे क्रियापदेन ग्रहणात्, साध्यत्वेन प्रतीयमान-त्वादस्त्यादौ सत्तादेरेव क्रियात्वोपपादनाच्च सर्वत्र क्रियापदेन फलस्य ग्रहणेऽपि बाधकाभाव इत्यत आह—

किञ्चेति—'तण्डुलं पचति' इत्यादौ तिङन्ते, कृदन्ते—'पाचकः' 'पक्वः' इत्यादौ क्रियायाः कर्तृकर्मणोर्विशेष-णीभूततया आह—क्वचिदिति। तथाभूतानि = क्रियायां विशेषणीभूतानि। गुणानाञ्चेति—अग्न्याधेये वारण-वैकङ्कतनामानि पात्राणि श्रूयन्ते। तानि यज्ञपात्राणि यज्ञावचरवचनात् तत्र संदिह्यते—पवमानेष्टेरङ्गानि, दर्शपूर्णमाससर्वयज्ञाङ्गानि वा। तत्र वारणस्य होमार्थत्वं श्रुत्या न बोध्यते, इति प्रधानेऽग्न्याधेयेऽसम्भवन् पदार्थः प्रधाने यो गुणीभूतस्तदङ्गं भवति। तथाच प्रधानेऽग्न्याधेयेऽसम्भवन्ति वारणपात्राणि अग्न्याधेये अङ्गभूता या पवमानेष्टिस्तदङ्गानि स्युरिति पूर्वपक्षे समाधीयते—यदि अग्न्याधेयस्य पवमानेष्टिरङ्गभूता तदा तदङ्गानि वारणपात्राणि स्युः। तदेव तु न, अग्न्याधानमग्नेः संस्कारकमिति स्वयमेव होमात्मकयज्ञस्याङ्गम्। एवञ्च 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्' गुणानाम् = विशेषणानाम्, परार्थत्वात् = अन्योप-कारकत्वात् समत्वात् = समानधर्मवत्त्वात् परस्परमसम्बन्धः स्यात् = परस्परं सम्बन्धः = गुणगुणिभावो न स्यादिति न्यायेनाग्न्याधेयोऽङ्गम् पवमानेष्टिरङ्गम्, इति परस्परमङ्गाङ्गीभावो न स्यादिति मीमांसकैः स्वीकृतम्, तथा प्रकृतेऽप्यनेनैव न्यायेन फलमपि भावनायामन्वितमिति भावनाङ्गभूते फले कारकाणामन्वयो न स्यात्, किन्तु प्रधानभूतायां भावनायामेवेत्याह—सर्वे सेवका इति—सेवका यथा राजोपकारकास्तथा फल-मपि भावनोपकारकम्। फले विशेष्यभूतभावनोपकारकत्वञ्च इतरभेदसाधकत्वरूपम्। कारकाणाञ्च भावना-निष्पादकत्वमेवेति तस्यामेव फलस्य कारकाणाञ्चान्वयः, नतु फले कारकाणामन्वयः, निराकाङ्क्षत्वात्। अत्र लोकप्रसिद्धमपि दृष्टान्तमाह—नहीति।

दर्पणव्याख्या

तत्र रथन्तरयोनेः परतो बृहद्योनेः पठितत्वाद्रथन्तरं तस्यां गेयम्? उतोत्तराग्रन्थे, "न त्वा वा मन्यते" इत्यस्य पठितत्वात् तत्र गेयमिति संशयेऽविशेषादुभयत्रैव गेयमिति पूर्वपक्षे उत्तराग्रन्थे उत्तराशब्दस्य संज्ञारूपेण प्रसिद्धिः' बृहद्योनौ तु तस्याः पूर्वग्रन्थापेक्षिकोत्तरत्वबलाद्यौगिकी सेतिसंज्ञाशब्दस्यानपेक्ष्य प्रवृत्तिकत्वेन बलवत्त्वादुत्तराशब्दसङ्केतित—"न त्वा वा मन्यते" इत्याद्यृक्ष्वेव तद्गेयमिति नवमे निर्णीतम्, तद्वत्तत्रापीति भावः। ननु भावनायां क्रियापदस्य साङ्केतिकी शक्तिः, फले तु यौगिकः प्रयोग इत्यत्रैव न दृढतरं मानम्, येनोक्ताधिकरणावतारः सम्भाव्येत, प्रायेण तस्य तु यौगिकत्वेनाऽप्युपपत्तेरत आह—❀किञ्चेति❀।

❀ तथाभूतानीति ❀ विशेषणानीत्यर्थः। कर्त्राऽऽख्यातस्थले दृष्टत्वादिति भावः। ❀ गुणानामिति ❀ विशेषणानां परार्थत्वात् = अन्योपकारकत्वादत एव समत्वात् = समानधर्मत्वात्तेषां परस्परं सम्बन्धो न भवेदिति न्यायार्थः। तथाच यथा फलस्योपकारकत्वाद् विशेष्यभावनायामन्वयस्तथा कारकाणामपि साक्षात्परम्परया वा तत्रैवान्वयः, अन्यथा कारकत्वस्यैवा-ऽनुपपत्तेः। नतु फले, निराकाङ्क्षत्वादिति भावः। तदनुसारिलौकिकन्यायमप्युपन्यस्यति 'नहि भिक्षुक' इत्यादि। अन्वियन्तीति—वी गतीत्यत्र प्रश्लिष्टस्य रूपम्। ❀ मीमांसका अपीति ❀ उक्तन्यायेन कारकप्रकारकबोध

मन्वते । एवञ्च 'विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुः' इति कार्य्यकारणभावस्य क्लृप्तत्वात् । यत्रापि 'पक्ता' 'पाचकः' इत्यादौ भावना गुणभूता, तत्रापि क्लृप्तकार्य्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीयते, इत्यादि भूषणे प्रपञ्चितम् । केचित्तु भूतले घटः, देवदत्तो घटमित्यादावन्वयबोधाकाङ्क्षानिवृत्त्योरदर्शनान्न तद्व्यतिरेकेण साधुत्वलाभ इत्याहुः ॥१७॥

प्रभा

मीमांसका इति—फलनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति आख्यातजन्यभावनोपस्थितेः कारणत्वमनेन न्यायेन तैः साधितमिति भावः । विशेष्यतया = विशेष्यतासम्बन्धेन । कारकादीति—आदिना फल-कालयोः संग्रहः, तयोरपि धात्वर्थभावनायामेवान्वयात् । कार्यकारणभावस्य—कार्यम् = विशेष्यतया कारकादिप्रकारकशाब्दबोधरूपम्, कारणम् = धात्वर्थभावनाविषयकोपस्थितिरूपं तत्त्वस्येत्यर्थः । ननु कृत्स्थले—'पक्ता' 'पक्कः' इत्यादौ विक्लित्त्यनुकूलव्यापाराश्रयः, व्यापारजन्यफलाश्रयः, इति क्रमेण बोधाद् भावनाया अपि कर्तृकर्मादौ विशेषणत्वात् 'गुणानाञ्च' इति न्यायेन भावनायामपि कारकान्वयो न स्यादित्याह—यत्रापीति । अनुरोधादिति—कार्यकारणभावान्तरकल्पने गौरवादिति भावः । अत एव 'नहि भिक्षुको भिक्षुकान्तरम्' इति लौकिकन्याये 'सत्यन्यस्मिन्' इत्युक्तम् । क्लृप्तकार्येति—विशेष्यतासम्बन्धेन कारकादिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनात्वसमानाधिकरणविशेष्यतासम्बन्धेनोपस्थितिः कारणमिति सिद्धकार्य्यकारणभावादित्यर्थः । तस्यामेव = भावनायामेव । अवसीयते = निश्चीयते । प्रपञ्चितमिति—फलांशे न कारकाणामन्वयः, किन्तु भावनायामेवेति मीमांसकसम्मतत्वादित्यर्थः । अन्यथा तन्मते 'सोमेन यजेत' इत्यादौ करणस्य फलरूपयागस्य भावनायामनन्वयापत्तेः, फलांशस्याख्यातार्थभावनां प्रति करणत्वेनान्वये फले च कारकान्वये वाजपेयाधिकरणभङ्गापत्तेश्च । तस्मात् 'पाकः' इत्यादौ ओदनादिकारकान्वयसिद्धये भावनाया धात्वर्थत्वमावश्यकमिति भावः ।

कारकाणां भावनायामन्वये प्रकारान्तरमाह—केचित्त्विति—अन्ये वैयाकरणास्त्वित्यर्थः । अन्वयबोधेति—अन्वयबोधस्य, आकाङ्क्षानिवृत्तेश्चादर्शनादित्यर्थः । क्रियावाचकपदाकाङ्क्षासत्त्वेन निराकाङ्क्षबोधादर्शनादिति भावः । तद्व्यतिरेकेण—क्रियावाचकपदाभावेन । साधुत्वेति—'सर्वं हि वाक्यं क्रियया परिसमाप्यते' इति न्यायात् 'निराकाङ्क्षान्वयबोधजनकत्वमेव साधुत्वम्' इति तदाशयात् । एतेन 'भूतले घटः' इत्यनेन भूतलनिरूपिताधेयतावान् एकत्वविशिष्टो घट इति, 'देवदत्तः' 'घटम्' इत्यादावपि 'एकत्वविशिष्टो देवदत्तः' 'घटनिष्ठं कर्मत्वम्' इति च बोधदर्शनादिदमसङ्गतमिति अपास्तम्, तथापि निराकाङ्क्षबोधासिद्धेः ।

आहुरिति—अनेनारुचिः सूचिता । तथाहि—साधुत्वं हि व्याकरणव्यङ्ग्यो जातिविशेषः । तच्च क्रियावाचकपदाभावेऽपि 'अग्ने तेजस्विन्' इत्यादावस्त्येव । अत एव 'गाम्' इत्युक्ते 'कर्म निर्दिष्टम्, कर्ता क्रिया चानिर्दिष्टे' इति भाष्यं सङ्गच्छते ॥ १७ ॥

दर्पणव्याख्या

प्रत्याख्यातजन्यभावनोपस्थितेर्हेतुतायास्तैः क्लृप्तत्वादिति भावः ॥ कारकादीत्यादिना लडाद्यर्थकालपरिग्रहः । ❀ गुणभूतेति ❀ तृजाद्यर्थकर्त्तरि विशेषणीभूतेत्यर्थः । एतेन पूर्वोक्तन्यायस्य तत्रासम्भवो दर्शितः । ❀ तस्यामेवेति ❀ धात्वर्थभावनायामेवेत्यर्थः । ❀ प्रपञ्चितमिति ❀ फलांशे तु न कारकाणामन्वयः, मीमांसकमतेऽपि तस्याव्युत्पन्नत्वात्, अन्यथा कारकान्वितस्य कारकत्वासम्भवेन यागरूपफलस्य करणतया क्रियायामनन्वयाऽऽपत्तेरिति हि तत्रोक्तम् ।

❀ अदर्शनादिति ❀ 'सर्वं हि वाक्यं क्रिययापरिसमाप्यते' इति न्यायेन तत्रस्तिजानात्यादिक्रियामन्तरेणान्वयबोध-निराकाङ्क्षत्वयोरदर्शनादित्यर्थः । तत्र 'चैत्रः सुन्दरः' इति क्रियासाकाङ्क्षवाक्यस्यासाधुतापत्तिः । फलांशान्वयलाभेनैवोपपत्तौ भावनावाचकत्वालाभश्चेत्यस्वरसः 'आहुः' इत्यनेन सूच्यते ॥ १७ ॥

SGDF

स्वयमुपपत्तिमाह—यदि पक्षेऽपि वत्यर्थः कारकञ्च नञादिषु ।
अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ॥ १८॥

'पर्वतो वह्निमान्, धूमात्, महानसवत्', भूतले न घटः, 'भूतले घटः' इत्यादिपदात् । एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयबोधश्चाभ्युपेयते तर्हि चतुर्थ्याः स्पृहिकल्पनाऽपि

प्रभा

स्वयमिति—कारिकाकृतेत्यर्थः । आत्मना कल्पितामुपपत्तिमाहेत्यर्थः । एतेन स्वयमित्यस्य 'आत्मना' इत्यर्थकत्वेन 'स्वयमाह' इत्यसङ्गतमित्यपास्तम्, आत्मपदार्थस्य कल्पितक्रियायामन्वयात् । यद्वा—'प्रकृत्यादिभ्यः' इत्यभेदे तृतीया, आत्माभिन्नो ग्रन्थकार आह इत्यर्थः । उपपत्तिम् = क्रियायामनन्वये बाधकप्रदर्शनरूपाम् ।

यत्तु, केनचिन्नैयायिकेनोक्तम् 'भूतले न घटः' इत्यनेन 'भूतलनिरूपिताधेयत्वाभाववान् घटः' इति बोधान्न क्रियाध्याहारापेक्षा, एवम् 'पर्वतो वह्निमान् धूमात्, महानसवत्' इति वेदान्तिकृतन्यायप्रयोगे प्रतिज्ञायां क्रियापदप्रयोगो वृथेति च तद्दूषयन्नाह—यदि पक्ष इति—पक्षे = पर्वतादौ, वत्यर्थः = सादृश्यम्, यदि सादृश्यमनुयोगितासम्बन्धेन पक्षे 'महानसप्रतियोगिकसादृश्यवान् पर्वतः' इत्येवंरूपेणान्वेतीत्यर्थः । वैयाकरणमते तु—महानसपदम्—महानसवृत्तिवह्निकर्तृकसत्तापरम्, पर्वतपदञ्च पर्वतवृत्तिवह्निपरम्, अस्तीत्यध्याह्रियते । तथाच महानसवृत्तिवह्निकर्तृकसत्तासदृशी पर्वतवृत्तिवह्निकर्तृका सत्तेति बोधः, इति वत्यर्थसादृश्यस्य सत्तारूपक्रियायामन्वयः । आदिपदादिति—कारिकास्थ 'नञादिषु' इति पदघटकादिपदात् 'भूतले न घटः' 'भूतले घटः' इत्यादि गृह्यते इत्यर्थः । अत्रापि सप्तम्यर्थाधिकरणत्वस्य, नञर्थस्य च सत्तारूपक्रियायामेवान्वयः । एवमादिषु—'भूतले न घटः' इत्यादिपूर्वोक्तविधेष्वित्यर्थः । अनुशासनविरोधेऽपि—शास्त्रविरोधेऽपि उक्ताष्टकस्य, वत्यर्थस्य च क्रियायामेवान्वय इति शास्त्रबोधितार्थविरोधेऽपीति यावत् । अन्वयश्चेति—शास्त्रबोधितान्वयातिरिक्तान्वयश्चेत्यर्थः । चतुर्थ्याः = 'पुष्पविषयिणीच्छा' इत्यर्थे चतुर्थ्यां श्रुतायां 'स्पृहयति' इतिपदमेवाध्याह्रियते, नतु पदान्तरमिति कल्पना त्यज्यताम्, 'स्पृहेरीप्सितः' इति सूत्रविरोधस्य त्वन्मतेऽकिञ्चित्करत्वादिति भावः ।

दर्पणव्याख्या

❀ उपपत्तिमिति ❀ उक्ताष्टकस्य भावनायामन्वये साधकोपन्यासरूपां तामुक्तानन्वये बाधकोपन्यासरूपां तामाहेत्यर्थः । 'स्वयमुपपत्तिम्' इति पाठे 'स्वयम्' इत्यनेन वक्ष्यमाणयुक्तेरनाकरत्वं सूच्यते । ननु सम्बोधनान्तादीनां क्रियान्वय एव साधुत्वे, पर्वतो वह्निमान् महानसवदित्यादौ वत्यर्थसादृश्यस्य कथं पर्वतेऽन्वयः ? कथं वा भूतले न घट इत्यत्र सप्तम्यर्थभूतलाधेयत्वस्य नञर्थाऽभावे इत्यत आह मूले ❀ यदि पक्षेऽपीति ❀ पक्षे = प्रतिज्ञावाक्यजन्यबोधविशेष्ये सन्दिग्धसाध्यके धर्मिणि पर्वतादाविति यावत् ❀ कारकम् ❀ अधिकरणादि । ❀ नञादिषु ❀ नञर्थाभावे, इतरनामार्थे चेत्यर्थः । तमेव विशदयति सारे—❀ पर्वतो वह्निमानित्यादिना ❀ ❀ आदिपदादिति ❀ नञादिष्वित्यादिपदादित्यर्थः । तदेव विवृणोति ❀ एवमादिष्विति ❀ भूतले घट इत्यादावित्यर्थः ।

❀ अन्वयश्चेति ❀ महानससदृशः पर्वतः, भूतलवृत्तित्वाभाववान् घटः, भूतलवृत्तिर्घटाभाव इति वा बोधश्चेत्यर्थः । तेन तुल्यमित्यनुशासनेन क्रियागतसादृश्यबोधन एव वतेः, 'कारके' इत्यधिकृत्य, सप्तम्यधिकरणे चेत्यनुशासनेन क्रियान्वय एव सप्तम्याश्च साधुत्वबोधनादुक्तम् ❀ यदीति ❀ । ❀ चतुर्थ्या इति ❀ पुष्पेभ्य इत्यत्र "स्पृहेरीप्सितः" (पा० सू० १ । ४ । ३६) इति विहितचतुर्थ्याः स्पृहयत्युपात्तार्थे एव स्वार्थान्वयबोधकत्वम्, न पदान्तरोपात्ते, अध्याहृते वा, तदर्थेऽनुशासनविरोधादिति स्वसिद्धान्तस्त्यज्यतामित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

त्यज्यतामित्यर्थः । अनुशासनानुरोधतौल्ये अर्द्धजरतीयमयुक्तमिति भावः ॥ १८ ॥

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह—

प्रभा

चतुर्थ्या इति—हेतौ पञ्चमी । विषयतासम्बन्धावच्छिन्नेच्छानुकूलमनःसंयोगादिरूपो व्यापारः, समवायसम्बन्धावच्छिन्नेच्छानुकूलेच्छासमानाधिकरणमनःसंयोगादिरूपो व्यापारश्च स्पृहेरर्थः । आद्यार्थे—विषयतारूपफलतावच्छेदकसम्बन्धेनेच्छारूपफलाश्रयत्वात् पुष्पाणां कर्मत्वम् । द्वितीयार्थे—फलतावच्छेदकसमवायसम्बन्धेन पुष्पाणां फलाश्रयत्वाभावात् कर्मत्वाप्राप्त्या शेषषष्ठ्यां प्राप्तायां सम्प्रदानत्वविधानम् । अनुशासनेति—'स्पृहेरीप्सितः' इति शास्त्रानुरोधेन तथा कल्प्यते इति चेत्तर्हि अन्यत्रापि शास्त्रानुरोधत्यागोऽनुचित इति भावः ।

अर्धजरतीयमिति—जरत्या अर्धम् अर्धजरती, तत्सदृशम् अर्धजरतीयम् । 'समासाच्च तद्विषयात्' इतीवार्थे छः । यद्वा गहादित्वाद् भवार्थे छः । भाष्यसम्मतोऽप्ययं न्यायः । तथाहि—'अणिञोः' (पा० सू० ४।१।७८) इति सूत्रे भाष्ये "ष्यङः प्रत्ययत्वम्, आदेशत्वं वा इति विकल्प्य प्रत्ययत्वेऽनुबन्धाकरणत्वं समर्थ्य, आदेशत्वेऽप्यनुबन्धो न कर्तव्यः, इत्याश्रित्य इञो यादेशे 'यङश्चाप्' इति चापोऽभावे 'वाराह्या' इत्यत्र 'ञ्नित्यादिर्नित्यम्' इति प्राप्ताद्युदात्तत्वाभावाय इत्संज्ञामकृत्वैवादेश इत्युक्तम् । ततः प्रत्ययत्ववादिनाऽऽदेशत्वे स्वरसिद्धावपि वृद्धिर्न स्यादित्यर्धजरतीयत्वं स्यात्" इति दूषणमुक्तम् । प्रत्ययत्वाभिप्रायेण 'नचेदानीमर्धजरतीयं लभ्यम्, वृद्धिर्मम भविष्यति स्वरो नेति, तद्यथा अर्धं जरत्याः कामयन्तेऽर्धन्नेति, इति प्रत्ययत्वपक्षे अर्धजरतीयन्यायापत्तिः परिहृता । अत्र कैयटः—'मुखं न कामयन्तेऽङ्गान्तरन्तु कामयन्ते जरत्याः' इति, अस्य कैयटस्य 'कामिनः' इति शेषः । तथाऽन्यत्रापि 'न जानीमो विषयसन्धायामिवान्तरालेऽवस्थानेऽर्धजरतीयकौशलम्' (बृह० उप० भा०) । अत्रानन्दगिरिः—'यथा न जागर्ति, न स्वपिति...इति अन्तरालेऽवस्थानं दुर्घटम्, यथा चार्धं कुक्कुट्याः पाकाय, अर्धञ्च प्रसवाय' इति कौशलन्नोपलभ्यते' इति । अर्धजरतीसदृशं शास्त्रस्य त्यागोपादानम्, तत्सदृशञ्चौचित्यानौचित्यम् ।

एकं सादृश्यं समासार्थः, द्वितीयञ्चेवार्थः । एवञ्च 'भूतले न घटः' इत्यादौ स्वसिद्धान्तानुसारेणान्वयबोधोत्पत्तये 'अस्ति' इत्यादिपदमध्याहार्यम् । 'पर्वतो वह्निमान् धूमात् महानसवत्' इत्यादावपि वत्यर्थसादृश्यस्य क्रियायामन्वयाय 'भवितुमर्हति' इति योजनीयम् । तत्रार्हणक्रियायां वत्यर्थसादृश्यस्यान्वयः, 'तेन तुल्यं क्रिया चेत्' इत्यनुशासनानुरोधात्, वतिप्रकृतिमहानसादिशब्दानां महानसकर्तृकभवने लक्षणा, 'तेन तुल्यम्' इति शास्त्रानुरोधेन क्रिययोरेव सादृश्ये वतेर्विधानात् । 'महानसवत्' इत्यत्र 'तत्र तस्येव' इति वतिस्तु न, 'महानसवत् पर्वते' पर्वतस्य वा इत्यापत्तेः ॥ १८ ॥

कर्त्रादाविति—आदिना भावार्थस्य संग्रहः । इन्यादीनामिति—आदिना क्त्वातुमुन्नादीनां संग्रहः । तत्र कर्त्रादिकारकाणां क्रियायामेवान्वय इत्यत्र प्रमाणान्युक्तानि । क्त्वाद्यर्थस्य क्रियान्वये प्रमाणन्तु 'समानकर्तृकयोः पूर्वकाले' इति, 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति च सूत्रे एव । ननु 'कृतपूर्वी कटम्' इत्यत्र

दर्पणव्याख्या

❀ अर्द्धजरतीयमिति ❀ इदमर्थे, गहादित्वाच्छः । क्वचिदनुशासनानुरोधः, क्वचिन्नेत्यर्द्धजरतीसदृशमित्यर्थः । तथाच स्वीयसिद्धान्तप्रच्युतिरूपबाधकभियाऽत्रापि पर्वतो वह्निमान् भवितुमर्हतीत्येव प्रतिज्ञाऽङ्गीकरणीया, ननु क्रियावाचकपदशून्या सेति नोक्तनियमे व्यभिचारः । 'भूतले न घटः' इत्यादौ यद् वक्तव्यं तत्तूक्तम् । वक्ष्यते चाऽधिकमिति भावः ॥ १८ ॥

कृतपूर्वीत्यत्र भावविहितक्तेन सिद्धाऽवस्थापन्नो भाव उच्यते । तद्विशेषणं च प्रकृत्यर्थक्रियेत्याशयेन मूलमवतारयति—❀ एवमित्यादिना ❀ कर्त्रादावित्यादिना भावपरिग्रहः, इन्यादीनामित्यादिना क्त्वा-तुमुन्नादीनाम् ।

अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः ।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥ १९ ॥

न विविच्य ग्रहः = ग्रहणं यस्याः सा अविग्रहा = गुणीभूतेति यावत् । यथाच 'ग्रामं गतः' इत्यत्र क्तप्रत्ययार्थगुणीभूतापि क्रिया ग्रामादिकर्म्मभिः सम्बध्यते, तथा 'कृतपूर्वी कटम्' इत्यत्रापि गुणभूता इन्यादिभिरित्यर्थः ।

प्रभा

भाष्यप्रामाण्यात् पूर्वं कर्मणोऽविवक्षया भावे क्ते पश्चात्कर्मणो विवक्षा, कृतं पूर्वमनेनेति विग्रहः । 'पूर्वादिनिः' इत्यतः पूर्वादित्यनुवृत्तेः 'सपूर्वाच्च' इत्यनेन कर्तरि इनिः । यद्वा 'नपुंसके भावे क्तः' इत्यनेनैवाकर्मकत्वाद् भावे क्तः ।

ननु 'कृतपूर्वी' इत्यत्र क्तार्थस्य भावस्य सिद्धावस्थापन्नस्य धात्वर्थो भावो विशेषणम् इति गुणीभूतक्रियायां कथं कर्मणोऽन्वय इत्याशङ्कां निराकुर्वन्नाह—अविग्रहेति । विविच्येति—पृथग्भूयेत्यर्थः, इतराविशेषणत्वेनेति यावत् । ग्रहणम् = ज्ञानम् । गुणीभूतेति—क्तप्रत्ययार्थकर्त्रादौ विशेषणीभूतेत्यर्थः । गुणभूतेति—सिद्धावस्थापन्नक्तार्थभावं प्रति विशेषणभूतेत्यर्थः । इन्यादिभिरिति—इन्याद्यर्थकर्त्रादिभिरित्यर्थः । यद्वा, कर्मणोऽविवक्षया भावे विहितस्य क्तस्य स्वातन्त्र्येण प्रयोगस्यादृष्टतया धात्वर्थानुवादकत्वमेवेति क्तार्थे गुणीभूतत्वाभावेऽपि इन्याद्यर्थकर्त्रादौ गुणीभूतत्वमेवेति गुणीभूतत्वेन दृष्टान्तदार्ष्टान्तिकयोः साम्यं बोध्यम् । नन्वेवमपि दृष्टान्ते गुणीभूतक्रियायां विशेषणतया कर्मणोऽन्वयः, इन्याद्यर्थकर्त्रादेस्तु न गुणीभूतक्रियायामन्वय इति चेन्न, विशेष्यत्वविशेषणत्वकृतभेदेऽपि परान्वयित्वमात्रेण दृष्टान्ततयोपादानात् । एकत्वविशिष्टकटाभिन्नाश्रयिका या उत्पत्तिस्तदनुकूलव्यापाराश्रयाभिन्नो देवदत्तादिरिति 'कृतपूर्वी कटम्' इत्यनेन बोधः ।

दर्पणव्याख्या

❀सम्बध्यते इति❀ कारकप्रकारकबोधं प्रति विशेष्यतया धातुजन्यभावनोपस्थितेर्हेतुतायाः पूर्वमुक्तत्वादिति भावः ।

❀ कृतपूर्व्वी कटमिति ❀ नन्वत्र कर्मणि क्ते कटशब्दादनभिहिताधिकारीयद्वितीयाऽनुपपत्तिः, भावे क्तस्तु सकर्मकाद्गनकुसुमायमान एव, तयोरेवेति नियमात् । अत एव नपुंसके भावेऽपि न सः । तथाच कथमुक्तदार्ष्टान्तिकवाक्योपपत्तिरिति चेदत्राहुः—कर्मणो विशेषरूपेण प्रागविवक्षया अकर्मकत्वाद्भावे प्रत्यये तदन्तस्य पूर्वशब्देन समासे 'सपूर्वाच्च' इतीनिः, पश्चात्तु कर्मणो विशेषरूपस्य विवक्षया तत्र द्वितीयेति । इदञ्च 'कर्तृकर्मणोः कृति' (पा० सू० २।३।६५) इति भाष्ये स्पष्टम् । ईदृशविवक्षाऽविवक्षे च तद्भाष्यप्रामाण्यात् कृतपूर्वीत्यादिविषये एव, नान्यविषये इति बोध्यम् ।

❀ इन्यादिभिरिति ❀ तदर्थकर्त्रादिभिरित्यर्थः । वस्तुतस्तु दार्ष्टान्तिके स्ववाचकप्रकृतिकप्रत्ययार्थेऽन्यस्मिन् वा गुणीभूता क्रिया कटादिकर्मादिभिरिति व्याख्येयम् । नातः कृतपूर्व्वीति प्रयोगघटकेन्यर्थकर्तुर्विशेष्यत्वेन प्रकृतार्थासङ्गतिः, पूर्वकालिकक्रियाकर्त्तेति ततो बोधेन तादृशक्रियाया इन्यर्थकर्त्तरि गुणत्वात् । नाप्ययं भावाधिकारीयः, स्वातन्त्र्येणाप्रयोगात् । नच 'पूर्वं कृतमनेन' इति विग्रहात् धात्वर्थक्रियाविशेष्यक एव ततो बोधः, तथा सति तस्या अविग्रहत्वाभावेन मूलविरोधप्रसङ्गात् । धात्वर्थानुवादकप्रत्ययान्ते प्रत्ययार्थाविशेषणीभूतधात्वर्थक्रियाया एव प्रतीत्या तद्विहितप्रत्ययार्थकर्तुर्विशेष्यताया एवौचित्यात्, अन्यथा 'पचतिकल्पम्' इतिवत् नपुंसकत्वापत्तेश्च । अत एव .भोक्तुं गतमेतेनेत्यादिप्रयोगोपपत्तिः, भावानधिकारीयभावविहितप्रत्ययस्य धात्वर्थानुवादकत्वेन तत् प्रकृत्यर्थक्रियायाः साध्यमात्रस्वभावत्वात्, अगुणत्वाच्च । एवम् 'अव्ययकृतो भावे' इत्युक्ते 'पाकः' इत्यादिप्रयोगस्थघञर्थात्तुमुन्नाद्यर्थे वैलक्षण्यानुभवात् तुमुनादीनामपि साध्यमात्रस्वभावभावार्थकत्वमित्यन्यत्र विस्तरः ।

SGDF Sri Gargeshwari Digital Foundation

नच वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात् तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम्, नित्यसापेक्षेष्वेकदेशेऽपि 'देवदत्तस्य गुरुकुलम्,' 'चैत्रस्य नप्ता'

प्रभा

वक्ष्यमाणेति—'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' इत्यादिनेत्यादिः।

पदार्थैकदेश इति—पदार्थैकदेशत्वञ्च—पदजन्योपस्थितीयप्रकारताश्रयत्वम्, तथाच 'पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेन' इति न्यायविरोधात् पदार्थैकदेशे न पदार्थान्तरस्यान्वयः।

एवञ्च 'यत्किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति मुख्यविशेष्यतासम्बन्धेन शक्तिज्ञानजन्योपस्थितिः कारणम्' इति कार्यकारणभाव एवात्र न्याये बीजं बोध्यम्। कथमिति—'गतः' इत्यादौ कृद्वृत्तिसत्त्वेन गमनकर्तृरूपगतपदार्थैकदेशक्रियायां कर्मान्वयासम्भवाद् दृष्टान्तासिद्धिरिति भावः। नच 'पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेन' इति न्यायस्वीकारे फलाभावः, नित्यपदार्थस्य गोत्वे, पशुत्वे चान्वयाभिप्रायेण 'गौर्नित्या' इत्यादेः पशुभेदस्य पशुत्वेऽन्वयतात्पर्येण 'पशुरपशुः' इत्यादेश्च वारणरूपफलसत्त्वात्।

नित्यसापेक्षेष्विति—नित्यसापेक्षत्वञ्च—स्वनिरूपकाकाङ्क्षाव्याप्यज्ञानविषयत्वम्। स्वम्=नित्यसाकाङ्क्षत्वेन जिघृक्षितम्। एवञ्च यत्र यत्र गुरुत्वज्ञानं तत्र तत्र गुरुत्वस्य निरूपकं किमित्याकाङ्क्षायाः सत्त्वेन आकाङ्क्षाया व्यापकत्वम्, गुरुत्वज्ञानस्य च व्याप्यत्वमिति व्याप्यज्ञानविषयत्वं गुरुत्वे इति गुरुत्वं नित्यसाकाङ्क्षम्। देवदत्तस्येति—निरूपितत्वं षष्ठ्यर्थः, तेनैव सम्बन्धेन गुरुपदार्थैकदेशगुरुत्वे देवदत्तपदार्थरूपनिरूपकस्यान्वयः। नप्तेति—'जन्यजन्यः पुमान् नप्ता'; तदेकदेशभूतजन्यतायां चैत्रस्य निरूपितत्वरूपषष्ठ्यर्थसम्बन्धेनान्वयः। तथाच देवदत्तनिरूपितगुरुत्ववत् कुलमिति, चैत्रनिरूपितजन्यतावज्जन्यः पुमानिति च बोधः। नित्यसापेक्षस्थले हि पक्षद्वयी, चैत्रस्य गुरुकुलम्' इत्यादौ विशेषणीभूतचैत्रादेर्गुर्वादिद्वारक'स्वनिरूपितगुरुत्ववदुत्पाद्यत्व'सम्बन्धेन कुलादिरूपविशेष्ये एवान्वय इत्येकः पक्षः।

दर्पणव्याख्या

❀ वृत्तिमात्रे इति ❀ मात्रपदं कृत्स्नार्थकम्। ❀ वक्ष्यमाणत्वादिति ❀ 'समासे खलु भिन्नैव' इत्यनेन इत्यादिः, तत्र समासपदस्य वृत्तिसामान्यपरत्वेन व्याख्यास्यमानत्वादिति भावः। ❀ कथमिति ❀ गत इत्यादौ कृद्वृत्तिसत्त्वेन गमनकर्तृरूपगतपदार्थैकदेशभावनायां कर्म्मान्वयासम्भवाद् दृष्टान्तासिद्धिरिति भावः। नित्यसापेक्षस्थले हि पक्षद्वयम्—चैत्रस्य गुरुकुलमित्यत्र विशेषणस्य चैत्रादेर्गुर्वादिद्वारकसम्बन्धेन कुलादिरूपविशेष्य एवान्वय इति तत्रैकः पक्षः। स चोक्तो हरिणा—

समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह॥ इति।

उक्तस्थले समुदायनिरूपितसम्बन्धे षष्ठी अवयवद्वारकश्च समुदायेन सम्बन्ध इति सामर्थ्याद् अवयवमपीति विशेषणं स्पृशतीति तदर्थः। अपरस्तु गुर्वादिनिरूपितसम्बन्धे एव देवदत्तस्येति षष्ठी तत्रैव तदन्वयः। उक्तञ्च—

सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते॥ इति॥

नित्यमिति—साऽपेक्षपदाऽर्थान्वयि, हि=यतो देवदत्तस्य गुरोः कुलमित्यादिव्यस्ते या व्यपेक्षा सा समासेऽपि न हीयत इति कारिकार्थः। पदार्थः पदार्थेनाऽन्वेतीति व्युत्पत्तिस्तु नित्यसापेक्षातिरिक्तविषयेति तद्भावः। तत्रान्तिमं पक्षमभिप्रेत्य समाधत्ते—❀ नित्यसापेक्षेष्विति ❀

SGDF Sri Gargeshwari Digital Foundation

इत्यादाविवान्वयाभ्युपगमात् । एवं भोक्तुं पाकः, भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम् ॥ १९ ॥

प्रभा

तदुक्तं हरिणा—

'समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवाँस्ते तु युज्यन्ते तद्वता सह' ॥ इति ।

उक्तस्थले समुदायनिरूपितसम्बन्धे षष्ठी । अवयवद्वारकश्च समुदायेन सम्बन्ध इति सामर्थ्यादवयवमपि विशेषणं स्पृशतीति तदर्थः । अपरस्तु पक्षः—गुरुत्वादिनिरूपितसम्बन्ध एव षष्ठ्यर्थ इति गुरुत्वे एव देवदत्तादेरन्वय इति । उक्तञ्च—

'सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते ॥' इति ।

देवदत्तस्य गुरोः कुलम्' इति वाक्ये या व्यपेक्षा सा समासेऽपि न हीयते इति कारिकार्थः । तत्रान्तिमपक्षमभिप्रेत्य समाधत्ते—नित्यसापेक्षेष्विति—तथाच गुरुत्वादेर्नियतान्यनिरूपितत्वेन तदुपस्थितौ नियमेन जायमानाया निरूपकाकाङ्क्षाया निवृत्तये देवदत्तादिपदार्थान्वयवत् प्रकृतेऽपि गमनरूपसाध्यस्य साधकं किमित्याकाङ्क्षानिवृत्तये ग्रामादिरूपकर्मादिकारकान्वयस्यावश्यकत्वान्न दृष्टान्तासङ्गतिरिति भावः । इत्यादाविवेति—आदिना घटादन्यः, घटात्पृथक्, इत्यादेः संग्रहः । अत्र भेदे पृथक्त्वे चैकदेशे पञ्चम्यर्थावधित्वस्यान्वयः । विशेष्ये एव एकदेशघटितपरम्परासम्बन्धेनान्वय इति पक्षे तु "भावनायामेवान्वयः' इत्यस्य भावनायामेव साक्षात्सम्बन्ध इत्यर्थः । एवञ्च भावनाघटितसम्बन्धं विना अन्यत्रान्वय एव तादृशनियमेन व्यावर्त्यत इति भावः । कारिकायां 'गतादिस्था' इत्येतद्घटकादिपदग्राह्यमाह—भोक्तुमिति—अत्र घञर्थभावनायां विशेषणीभूतसाध्यस्वरूपपचिभावनायामेव तुमुन्क्त्वार्थभावनयोरन्वय इति भावः । अत्र भाष्यप्रदीपोद्योतकाराः—'एकस्य सकृच्च' (पा० सू० ५।४।१९) इति सूत्रभाष्यात् 'भोक्तुं पाकः' इत्यादेरसाधुत्वं लभ्यते । तथाहि—"अथानु-

दर्पणव्याख्या

तथाच गुरुत्वादेर्नियतान्यनिरूप्यत्वेन तदुपस्थितौ नियमेन जायमानाया निरूपकाकाङ्क्षाया निवृत्तये देवदत्तादिपदार्थान्वयवत् प्रकृतेऽपि किं साधकं गमनरूपसाध्यमिति साधनाकाङ्क्षानिवृत्तये ग्रामादिरूपकर्मकारकान्वयस्याऽऽवश्यकत्वान्नदृष्टान्तासङ्गतिरिति भावः । आदिना 'शरैः शातितपत्रः'इत्यादेः सङ्ग्रहः । अवतरणिकास्थादिपदग्राह्यं स्पष्टयति—❀एवं भोक्तुं पाक इत्यादाविति ❀ अत्राऽप्यादिपदग्राह्यम्—❀ भुक्त्वा पाक इति ❀ घञर्थभावगुणभूतायां पच्यर्थक्रियायां तुमुन्नाद्यन्तार्थभोजनादिक्रियान्वय इति बोध्यमित्यर्थः । घञाद्यन्तप्रयोगस्थले प्रकृतिप्रत्ययाभ्यामसत्त्वसत्त्वभावा विशेष्यविशेषणभावापन्ना क्रियाऽभिधीयते । तत्र प्रत्ययार्थत्वेन घञाद्यर्थक्रियायाः प्राधान्यम् । अत एव प्रकृत्यर्थसाध्यमात्रस्वभावां तामादाय कारकान्वयोपपत्तिः, उक्तधर्माक्रान्तक्रियोपपदत्वेन ण्वुलः सम्भवेऽपि 'कारको गतः' इत्यादीनामनभिधानमेवेति भावः ।

नव्यास्तु—तुमुन्विधायके क्रियार्थायां क्रियायामित्युक्त्या प्रत्यासत्त्या क्रिययोरेकजातीयत्वलाभेन स्ववाचकप्रकृतिकप्रत्ययार्थं प्रत्यगुणीभूतायाः साध्यमात्रस्वभावाया एव क्रियायामित्यनेन ग्रहणाद्भोक्तुं गतम्, भोक्तुं पाक इत्यसाध्वेव, उभयत्रापि क्रिययोः साध्यमात्रस्वभावत्वाभावात्, प्रकृतिप्रत्ययार्थयोस्तयोर्विशेष्यविशेषणभावाच्च । ध्वनितं चेदमुपपदमतिङिति सूत्रभाष्ये । यत्र तु क्रियामात्रार्थकस्य ग्रहणं तत्र क्रियामात्रविशेषणादपीति गतपाकादियोगेऽपि सुक्त्वादीत्याहुः ।

तेषामयमाशयः—घञाद्यन्तस्थले प्रकृतिप्रत्ययाभ्यां विशेष्यविशेषणभावापन्नसत्त्वासत्त्वस्वभावक्रियाद्वयमुपस्थाप्यते । तत्र प्रत्ययार्थक्रियायाः प्राधान्यम् । एवञ्च धातूपस्थाप्यक्रियायाः साध्यमात्रस्वभावत्वेऽपि तस्या घञर्थं प्रति गुणत्वान्न तत्र तुमुन्नादीति ।

SGDF Sri Gargeshwari Digital Foundation

अतिप्रसङ्गमाशङ्क्य समाधत्ते—

कृत्वोऽर्थाः क्त्वातुमुन्वत्स्युरिति चेत् सन्ति हि क्वचित् ।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात् ॥ २० ॥

'भोक्तुं पाकः' भुक्त्वा पाक इत्यादौ, "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (पा० सू० ३ । ३ । १०) "समानकर्त्तृकयोः पूर्वकाले" (पा० सू० ३ । ४ । २१) इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुन्नादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वोऽर्था अपि स्युः । 'एकः पाकः' इत्यत्र, "एकस्य सकृच्च" (पा० सू० ५ । ४ । १९) द्वौ पाकौ, त्रयः, चत्वार इत्यत्र "द्वित्रिचतुर्भ्यः सुच्" (पा० सू० ५ । ४ । १८) । 'पञ्च' इत्यत्र कृत्वसुच् स्यात् । तथाच 'सकृत् पाकः' द्विस्त्रिश्चतुः पाका इत्याद्यापत्तिरिति चेदिष्टापत्तिः, "द्विर्वचनम्" इत्यादिदर्शनात् ।

प्रभा

वर्तमानेऽपि क्रियाग्रहणे इह कस्मान्न भवति । 'एकः पाकः' इति पूर्वयोश्चापि योगयोः कस्मान्न भवति 'द्वौ पाकौ' 'त्रयः पाकाः' 'चत्वारः पाकाः' 'पञ्च पाकाः' 'दश पाकाः' इति । नैतत्क्रियागणनम्, किन्तर्हि द्रव्यगणनमेतत्" । एतेन भावघञन्तपाकादिसमभिव्याहारे कृत्वोऽर्थानामसाधुत्वं स्पष्टमेव लभ्यते । 'तुमुन्ण्वुलौ' इति सूत्रे 'क्रियार्थायाम्' इति स्त्रीलिङ्गनिर्देशेनैव तत्फलक्रियाया लाभे क्रियाग्रहणसामर्थ्यात् प्रत्यासत्त्या च प्रत्ययार्थविशेषणतानापन्नसाध्यत्वमात्रापन्नक्रियावाचकपदोपपदे एव तुमुन्नादिविधानात् 'पाकः' इत्यत्र साध्यक्रियाया गुणीभूतत्वान्न तुमुन्नादिरित्याहुः ॥ १९ ॥

ननु गुणीभूतक्रियाऽन्वयेऽपि यदि तुमुन्नादीनां साधुत्वं तदा 'सकृत्पाकः' 'द्विः पाकाः' इत्याद्यपि स्यादित्याशङ्क्येष्टापत्त्या परिहरन्नाह—एकः पाक इति । इत्याद्यापत्तिरिति—आदिना 'पञ्चकृत्वः पाकाः' इत्यादेः संग्रहः ।

दर्पणव्याख्या

तत्रेदं चिन्त्यम्, भावानधिकारीयधात्वर्थानुवादकप्रत्ययान्तयोगे तुमुनो/दुर्वारत्वात् । किञ्च सुज्विधायकेऽप्युक्तविशेषणविशिष्टायास्तस्या ग्रहणमावश्यकम् । तत्तद्विशेषणीभूतक्रियायाः साध्यमात्रस्वभावत्वेन तज्जन्मगणने द्वौ पाकावित्यत्र सुजापत्तेरशक्यवारणत्वात् । नच तत्रेष्टापत्तिः, क्रियापदोपादानवैयर्थ्यादभ्यावृत्तिपदसामर्थ्येनैव क्रियाया लाभादिति वक्ष्यमाणत्वात् ।

किञ्च 'साध्यत्वेन क्रिया तत्र' इति हरिपद्यव्याख्याऽवसरे, एकस्यैव सम्बन्धिभेदादाचार्यत्वमातुलत्वादिवदेकस्या एव क्रियायाः प्रकृतिप्रत्ययरूपवाचकसम्बन्धिभेदादुपस्थितिरिति स्वोक्तिविरोधः क्रियाद्वयाबोधाङ्गीकार इति ।

❀ अतिप्रसङ्गमिति ❀ स्वमते गुणीभूतक्रियामादाय कृत्वोऽर्थप्रत्ययापत्तिरूपं तमित्यर्थः । ❀ क्रिययोः पूर्वकाल इति ❀ क्रिययोर्मध्ये पूर्वकालवृत्तिक्रियार्थकाद् धातोरित्यर्थः । ❀ तुमन्नादयः ❀ इत्यादिपदात् क्त्वादिपरिग्रहः । ❀ विधीयमाना इति ❀ 'अव्ययकृतो भावे' इत्युक्तेर्भाव इति शेषः । पूर्वकालोद्देश्यत्वादीनां संसर्गविधया भानस्य वक्ष्यमाणत्वात् । ❀ द्विर्वचनम् ❀ इत्यादिपदात् द्विःप्रयोगद्विरागमनादिपरिग्रहः, तत्र ल्युड्वञर्थगुणीभूतक्रियामादाय सुचो दर्शनादिति भावः ।

SGDF Sri Gargeshwari Digital Foundation

अतिप्रसङ्गस्त्वनभिधानान्नेत्याह—अतीति। "नहि वचिरन्तिपरः प्रयुज्यते" इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः।

केचित्तु—"सङ्ख्यायाः क्रियाभ्यावृत्तिगणने" इत्यत्र क्रियाग्रहणं व्यर्थम्, तस्या एवाभ्यावृत्ति-

प्रभा

अतिप्रसङ्ग इति—विशेषणीभूतक्रियामादाय कृत्वोऽर्थप्रत्ययानामापत्तिरूप इत्यर्थः। वस्तुतस्तु कृत्वोऽर्थविधायके क्रियाया एवाभ्यावृत्तिसम्भवेन अर्थतः क्रियालाभे क्रियाग्रहणस्योत्तरार्थताया उक्तत्वेन गुणभूतायामपि क्रियायां कृत्वोऽर्थप्रत्ययानां साधुत्वमेव। अत एव 'द्विर्वचनेऽचि' इति सूत्रम्, 'द्विःप्रयोगो द्विर्वचनं षाष्ठम्' इति भाष्यञ्च सङ्गच्छते।

नच 'द्विर्वचने' इत्यत्र वचधातुना साध्यत्वेनोपस्थितायाः, ल्युटा सिद्धत्वेनोपस्थिताया भाषणक्रियायाः 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्' इति नियमात् परस्परमन्वय आवश्यकः। तत्र सिद्धसाध्यक्रिययोर्विरुद्धतयाऽभेदान्वयासम्भव इति वाच्यम्, स्ववृत्तिक्रियात्ववत्सम्बन्धेनान्वयस्य वक्तुं शक्यत्वात्। यद्यपि कृद्वृत्तावेकार्थीभावात्मकशक्तेः सत्त्वेन पृथगुपस्थितेरभावादन्वयासम्भवस्तथाप्येकोपस्थितिविषयीभूतयोरपि साध्यसिद्धक्रिययोः सम्बन्धोऽपेक्ष्यते इति सम्बन्धाकाङ्क्षायां स एव सम्बन्धो वक्तव्यः। तथाच स्ववृत्तिक्रियात्ववत्सम्बन्धेन 'साध्यभाषणविशिष्टं सिद्धभाषणम्' इति वचनशब्देन बोधः। एवमेव 'पाकः' इत्यादावपि बोध्यमिति पञ्चोलिनः।

किञ्च तुमुन्नादीनां प्रधानक्रियान्वयित्वे साधुत्वस्वीकारेऽपि भावप्रत्ययस्थले

'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना'

इति हर्य्युक्तरीत्या एकस्यैव चैत्रादेर्यथा सम्बन्धिभेदाद् आचार्यत्व-पितृत्वादिर्भेदस्तथैव एकस्या एव क्रियायाः धातुना साध्यत्वेन प्रतिपादने प्रत्ययस्य तात्पर्यग्राहकत्वम्, प्रत्ययेन सिद्धत्वेन प्रतिपादने धातोस्तात्पर्यग्राहकत्वमिति गुणीभूतत्वाभावे उक्तप्रयोगाणामिष्टापत्तिरुचितैव। अत एव भावप्रत्ययस्थले 'पाकः' इत्यादौ क्रियाया न द्विधा बोधानुभवः। यत्र 'गतः' इत्यादिस्थले गुणीभूतत्वं क्रियायास्तत्र तुमुन्क्त्वादीनान्तु असाधुत्वमेव, क्रियाप्राधान्ये एव तत्प्रवृत्तेरिति दिक्।

यदि तु 'सकृत्पाकः' इत्यादीनां शिष्टाप्रयुक्तत्वं तदाऽनभिधानमेव तेषामित्याह-अनभिधानादिति। तादृशप्रयोगेण क्रियाजन्मगणनाऽप्रतीतेरित्यर्थः। तथाच भाष्यम्—'एकः पाकः' 'द्वौ पाकौ' 'त्रयः पाकाः' इह क्रियागणनसत्त्वात् कस्मान्न कृत्वोऽर्था भवन्तीत्याशङ्कायामुक्तम्—नैतत्क्रियागणनम्, किन्तर्हि, द्रव्यगणनमेतत्? कथं कृदभिहितो भावो द्रव्यवद् भवतीति। 'सकृद्भुक्त्वा' 'सकृद्भोक्तुम्' 'द्विर्भुक्त्वा' 'द्विर्भोक्तुम्' इत्यादौ सुबोऽभावमाशङ्क्योक्तम्, नैषः दोषः, क्रियागणनाद् भविष्यति, इति लिङ्गसंख्यान्वय्यर्थभावस्थले 'पाकः' इत्यादौ साध्यत्वेन सिद्धत्वेन च क्रियाया भानम्। लिङ्गसङ्ख्यानन्वयिभावस्थले एतद्भाष्यप्रामाण्यादेव साध्यत्वेनैव भानं, न सिद्धत्वेनेति भावः।

अनभिधानमन्तरापि 'सकृत्पाकः' इत्यादिप्रयोगापत्तिं निराकुर्वतां मतमाह—केचिदिति—यत्र साध्यत्वेनैव प्रतीतिस्तत्रैव कृत्वोऽर्थप्रत्ययः। 'पाकः' इत्यादिस्थले तु सिद्धत्वेनापि प्रतीतिरिति न तत्र तादृशप्रयोगप्रसक्तिरिति भावः। तस्या एवेति—अभ्यावृत्तिः = पुनः पुनर्जन्म, सा च क्रियाया एव भवति। द्रव्यगुण-

दर्पणव्याख्या

❀ अतिप्रसङ्गस्त्विति ❀ 'सकृत्पाकः' इत्यादिप्रयोगापत्तिरूपस्त्वित्यर्थः। ❀ अनभिधानादिति ❀ शिष्टाप्रयुक्तत्वादित्यर्थः। ❀तस्या एवेति❀ पूर्वापरीभूतावयवकसमुदायरूपक्रियाया एवेत्यर्थः। एवकारेण द्रव्यगुणव्यवच्छेदः, तयोः

SGDF

सम्भवेन सामर्थ्यात्तल्लाभात्। तथाच साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम्, नच 'पाकः', इत्यादौ तादृशीति नातिप्रसङ्गः, द्विर्वचनमिति च 'द्विःप्रयोगो द्विर्वचनम्' इति व्युत्पत्त्या, "द्विर्वचनेऽचि" (पा० सू० १ । १ । ५९) इति ज्ञापकं वा आश्रित्योपपादनीयमित्याहुः ॥२०॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकी, इति धातोरेव भावना वाच्या, नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते—

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्य्यते ॥ २१ ॥

प्रभा

योस्तु सिद्धस्वभावतया न पुनः पुनर्जन्म। 'पुनः पुनर्दण्डः' 'पुनः पुनः स्थूलः' इत्यादौ तु गम्यमानभवत्यादिक्रियाया एव पौनः पुन्यमिति न दोषः।

वस्तुतस्तु 'एकस्य सकृच्च' इति सूत्रे अभ्यावृत्तिरिति न सम्बध्यते, एकपदेन हि एकैव क्रिया व्यक्तिः प्रतीयते, तस्यास्त्वभ्यावृत्तेरसम्भवात् 'एको देवदत्तः' इत्यर्थे 'सकृद्देवदत्तः' इत्यादिवारणाय क्रियाग्रहणस्यानावश्यकत्वमित्यरुच्या केचिदित्युक्तम्। सामर्थ्यादिति—अभ्यावृत्तिपदसामर्थ्यादित्यर्थः। तत्=क्रियापदम्। तादृशी=साध्यमात्रस्वभावा। नच धातुना साध्यमात्रस्वभावैव प्रतीयते इति दोषतादवस्थ्यम्, प्रत्ययेन सिद्धाया अपि प्रतीत्या तत्र तन्मात्रप्रतीतेरसम्भवात्। द्विर्वचनमिति चेति—द्विर्वचनमिति प्रयोगस्त्वित्यर्थः। व्युत्पत्त्येति—भाष्योक्तव्युत्पत्तिबलेनेत्यर्थः। ज्ञापकमिति—साध्यमात्रस्वभावत्वाभावेऽपि सुज्भवतीत्यर्थे ज्ञापकमित्यर्थः। उपपादनीयमिति—अस्य 'द्विर्वचनम्' इति शब्दस्वरूपेणान्वयः। आहुरिति—अनेनारुचिः सूचिता। क्रियाग्रहणस्योत्तरत्रानुवृत्त्या चरितार्थत्वाद् भाष्यानुक्तत्वेन 'इह किञ्चित् त्रपो' इति न्यायेन यथेच्छकल्पनाया अन्याय्यत्वात् ॥२०॥

'सिंहावलोकन'न्यायेन पुनरपि भावनाया आख्यातवाच्यत्वमाशङ्क्य निराकर्तुमाह—नन्विति—सिद्धान्ते=वैयाकरणसिद्धान्ते। बोधकतेति—'इन्द्रियाणां स्वविषये' इत्यनेन वक्ष्यमाणबोधजनकतारूपेत्यर्थः। आख्यातेति—'आख्यातं भावनाविषयकबोधजनकतावत्' इति शक्तिज्ञानवतां मीमांसकानामित्यर्थः। बोधादिति—आख्यातेन भावनाया बोधादित्यर्थः। आवश्यकीति—बोधकतारूपा शक्तिराख्याते आवश्यकीति भावः। भेद्यभेदकेति—भिद्यते=इतरस्माद् व्यावर्त्यते यत्तद् भेद्यम्=विशेष्यम्, विशेष्यताश्रय इति यावत्। कर्मणि ण्यत्। भिनत्ति=इतरस्माद् व्यावर्तयति यत्तद् भेदकम्=विशेषणम्, इतरव्यावर्तकमिति यावत्।

दर्पणव्याख्या

सकृदेवोत्पत्तेः। क्रियायास्तु नैकस्या अपि निवृत्तिभेदाया धातुवाच्यत्वोपगमेन तज्जन्मनि पौनःपुन्यसम्भवादिति भावः।

❀ सामर्थ्यादिति ❀ अभ्यावृत्तिपदोपादानसामर्थ्यादित्यर्थः। सामर्थ्यञ्च—तदाक्षेपार्थकत्वम्।

❀ साध्यमात्रेति ❀ यद्यपि धातूपस्थाप्यायां तस्यां तत्त्वमक्षतम्, प्रागुक्तयुक्तेस्तथापि साध्यमात्रस्वभावपदस्योक्तप्रत्ययार्थगुणीभूतसाध्यस्वभावमात्रपरत्वान्न दोषः। ❀ तादृशीति ❀ घञुपस्थाप्योक्तरूपेत्यर्थः। ❀ व्युत्पत्त्येति ❀ विवरणपरभाष्यकारप्रयोगादित्यर्थः ❀ ज्ञापकमिति ❀ तादृशसूत्रकृत्प्रयोगरूपमित्यर्थः। 'हतशायिकाः शय्यन्ते' इतिवदिति भावः। ❀ आहुरिति ❀ सारग्राहिण इति शेषः, आहुरित्यस्वरसः सूचितः। तद्बीजन्तु क्रियापदस्योक्तार्थपरत्वेऽपि उक्तातिप्रसङ्गस्यापरिहारेण तस्य स्पष्टप्रतिपत्त्यर्थतैवोचिता। अनभिधानाश्रयणेनैवोक्तापत्तिवारणे द्विर्वचनमित्यादिप्रयोगाणां लोकसिद्धानां ज्ञापकानुसरणेनोपपत्तिश्चानुचितेति ॥ २० ॥

❀ सिद्धान्त इति ❀ वैयाकरणसिद्धान्ते। 'इन्द्रियाणां स्वविषयेषु' इत्यादिना प्रतिपादिता बोधकतारूपा

SGDF Sri Gangadharan Digital Foundation

भेद्यम् = विशेष्यम्, भेदकम् = विशेषणं तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम्। अयमर्थः—व्याकरणस्मृतिः शब्दसाधुत्वपरा तत्रैवावच्छेदकतया कल्प्यमानधर्म्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णये एव शक्तिनिर्णय उच्यते।

प्रभा

कर्तरि ण्वुल्। भेद्यञ्च भेदकञ्चेति भेद्यभेदके तयोर्यः सम्बन्धः = विशेष्यविशेषणभावरूपस्तद्रूपो य उपाधिः = इतरव्यावर्तको धर्मस्तस्य यो भेदः = विशेषः = सम्बन्धविशेषसमवायादिरिति यावत्। सः = सम्बन्धविशेष एव निबन्धनम् = निमित्तं यस्य = साधुत्वस्य तादृशं साधुत्वमित्यर्थः।

अयम्भावः—घटादिशब्दानां घटत्वादिप्रवृत्तिनिमित्तं तदेव भेदकमित्युच्यते। यच्च तदाश्रयीभूतं घटादि तदेव भेद्यम् = विशेष्यम्, तयोः = घटत्वघटयोर्यो विशेष्यविशेषणभावः स एव सम्बन्धोपाधिः = इतरव्यावर्तकः = समवायसम्बन्धेन घटत्वविशिष्टघटनिरूपितबोधकत्वमेव घटशब्दे, नतु घटविशिष्टघटत्वबोधकत्वम्, पटत्वविशिष्टपटबोधकत्वं वेत्येवं घटादिशब्दानामन्यतो बोधकत्वं वारयति। तथाच यस्मिन् विशेष्ये = विशेष्यतया भासमाने घटादौ यादृशविशेषणा(घटत्वादि)न्विते यादृशा (घटत्वादिरूप) नुपूर्व्याः सूत्रवार्तिकभाष्यकाराद्यन्यतमेन साधुत्वमुक्तं स शब्दस्तत्र साधुरन्यत्रासाधुरेव, अर्थविशिष्टशब्दानामेव तैः साधुत्वबोधनात्। अत एव दन्त्यसकारमध्योऽश्वशब्दो दरिद्रे साधुः, नतु घोटके। एवं तालव्यशकारमध्योऽश्वशब्दो दरिद्रेऽसाधुर्घोटके च साधुरित्यादि व्यवतिष्ठते। एवञ्च सूत्रकारादिभिः 'धातुर्भावनाविषयकबोधजनकतावान्' इति बोधिते भावनारूपार्थे आख्यातमसाधु, धातुश्च साधुरिति लब्धम्। ननु व्याकरणस्य शब्दसाधुत्वान्वाख्यायकत्वमेव, नतु शक्तिग्राहकत्वम्, अत एव 'अथ शब्दानुशासनम्' इति 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति, 'वृद्धिरादैच्' इति सूत्रे, मृजेरकिङ्त्सु प्रत्ययेषु 'मृजिप्रसङ्गे मार्जिः साधुर्भवति' इति च भाष्यम्—

'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः'

इति वाक्यपदीयञ्च सङ्गच्छते।

नन्वेवमप्यस्तु धातोरेव भावनायां साधुत्वम्, तथापि भावनाबोधकमाख्यातमिति भावनाशक्तत्वमाख्यातस्य नावगतमित्याशङ्कां निरसितुमाह—अयमर्थ इति। तत्र = साधुशब्दे। अवच्छेदकतयेति—'पच्यादिपदं भावनाविषयकबोधजनकतावत्' इत्याकारकं यच्छक्तिज्ञानं तादृशज्ञानीया या बोधजनकत्वनिष्ठप्रकारतानिरूपितपच्यादिनिष्ठा विशेष्यताऽऽख्या विषयता तदवच्छेदकीभूतो धर्मविशेषः शक्तिः। यद्वा—पच्यादिनिष्ठा या भावनाविषयकबोधजनकता तदवच्छेदकतयेत्यर्थः। जनकताया अवच्छिन्नत्वनियमेनावच्छेदकधर्मकल्पनाया आवश्यकतयाऽवच्छेदकत्वेन कल्पितधर्मस्यैव शक्तित्वमुचितम्। तथाचावच्छेदकीभूतधर्मस्य, साधुत्वस्य च साधुशब्दे समनियततया समनियतयोरैक्यान्मीमांसकानां मते साधुत्वरूपैव शक्तिरित्याह—शक्तत्वं (शक्तिः) साधुत्वमिति। तद्रीत्या = मीमांसकरीत्या। साधुत्वनिर्णय इति—तथाच व्याकरणस्य साधुत्वनिर्णायकत्वेऽपि शक्तिनिर्णायकत्वस्यापि निर्बाधतया 'लः कर्मणि' इति सूत्रादिविरोधाद् भावनाबोधकत्वेन आख्यातप्रयोगोऽसाधुरेवेति भावः।

दर्पणव्याख्या

शक्तिराख्यातेऽप्यबाधितैव, ततो भावनाबोधस्य जायमानत्वादित्यर्थः। ❀ साधुत्वपरेति ❀। तथाच हरिः—

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः। इति।

❀ तत्र ❀ साधुशब्दज्ञाने। ❀ अवच्छेदकतया ❀ साधुशब्दज्ञाननिष्ठबोधजनकताऽवच्छेदकतयेत्यर्थः।

SGDF

अतिरिक्तशक्तिवादेऽप्याख्यातानामसाधुता भावनायां स्यादेव। एवञ्च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे, याज्ञे कर्मण्यसाधुशब्दप्रयोगात् 'नानृतं वदेत्' इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं

प्रभा

ननु साधुत्वातिरिक्तमेव शक्तत्वम्, न साधुत्वरूपम्, अन्यथा असाधुशब्दाद् बोधानापत्तिरित्याह—**अतिरिक्तशक्तिवाद इति**—साधुत्वापेक्षयाऽतिरिक्ते शक्तिवादे इत्यर्थः। तत्र साधुत्वम्=व्याकरण-शिष्टप्रयुक्तत्वान्यतरव्यङ्ग्यो जातिविशेषः, पदार्थान्तरं वा। अत एव 'अत्रायं शक्तः' 'अत्रायं साधुः' इति वाक्यद्वयजन्यप्रतीतिभेद उपपद्यते। **स्यादेवेति**—व्याकरणस्मृतेः साधुत्वज्ञापनार्थकत्वेऽपि साधुत्वस्यार्थविशेषविशिष्टे शब्दविशेषे एव नियतत्वेनार्थापेक्षतया शक्तिनिर्णायकत्वमपि सिद्धमेव। तदुक्तम्—

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः'॥ इति।

आख्यातेन भावनाया बोधेऽपि सूत्रकाराद्यन्यतमेनाऽऽख्यातस्य भावनायां शक्तेरबोधनादसाधुता स्यादेवेत्यर्थः। अत एव भाष्ये 'समानश्च खेदविगमो गम्यायाञ्चागम्यायाञ्च' इति दृष्टान्तेन 'समानायामर्थावगतौ शब्देन चापशब्देन च, तत्र धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देन' इत्युक्तं सङ्गच्छते। ननु धर्मनिर्णायकजैमिनिसूत्रविरोधे पाणिनिस्मृतिर्बाध्येतेति चेन्न, 'यत्परः शब्दः स शब्दार्थः' इति न्यायेन साधुत्वानुशासनार्थमेव पाणिनेः प्रवृत्तत्वाद् व्याकरणस्य स्वबोध्यसाधुत्वार्थविषये दर्शनान्तरापेक्षया बलीयस्त्वात्।

वस्तुतस्तु जैमिनिवचनव्याख्यातृविरोधेऽपि तत्सूत्रविरोधो नास्त्येव। तथाहि—भावार्थाधिकरणे जैमिनिसूत्रम्—'भावार्थाः कर्मशब्दा (धातवः) स्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते' इति। 'दद्यात्' 'जुहुयात्' इत्यादयः कर्मशब्दा भावार्थाः'=क्रियार्थकाः, 'भावप्रधानमाख्यातम्' इति निरुक्तात्। अतस्तेभ्यः क्रिया प्रतीयेत=प्राधान्येन प्रतीयेत। हि=यतः=प्राधान्यात्, एष एव=क्रियारूप एवार्थो विधीयते, नतु द्रव्यरूपः, क्रियायाश्चाशुविनाशित्वात्, कालान्तरभाविस्वर्गादिरूपेष्टजनकता तत्र न सम्भवतीति द्वारभूतमपूर्वं (पुण्यम्) कल्पनीयमिति जैमिनिसूत्रार्थः। शेषं स्पष्टम्। पूर्वोक्तसूत्राद् भावनाया धात्वर्थत्वमेव लभ्यते, नत्वाख्यातार्थत्वम्। अत एवोक्तं ग्रन्थकृता—'जैमिनीयवचनव्याख्यातृभिर्दूषितान्' इति। **चतुर्थ्यर्थ इति**—इदमुपलक्षणम्—यत्रार्थे यस्य शास्त्रेण विधानं तत्रार्थे शास्त्राबोधितस्य। **प्रयोगे इति**—सती सप्तमीयम्। **नानृतमिति**—अनृतं द्वेधा—शब्दानृतम्, अर्थानृतञ्च। शब्दानृतम्—'गावी' 'गोणी' 'गोता' इत्यादि। अर्थानृतम्—'अश्वे' 'अस्व'शब्दः। **निषेधेति**—निषेधोल्लङ्घनञ्च निषिद्धार्थानुष्ठानम्। **प्रायश्चित्तमिति**—पापविशोधनमित्यर्थः।

'प्रायः पापं विजानीयात् चित्तं तस्य विशोधनम्। इत्युक्तेः।

दर्पणव्याख्या

❀अतिरिक्तशक्तिवादेऽपीति❀ साधुत्वं न शक्तत्वम्, असाधोरपि बोधात्। किन्तु बोधकत्वमिति वक्ष्यमाणसिद्धान्तिमतेऽपीत्यर्थः।

❀ असाधुता भावनायां स्यादेवेति ❀ आख्याताच्छक्तिभ्रमेण भावनाबोधेऽपि तत्र तस्यासाधुता स्यादेवेत्यर्थः। तथाच भाष्यकृता—"सिद्धे शब्दार्थसम्बन्धे"(म० भा० आ० १) इत्यत्र "समानायामर्थावगतौ साधुभिर्भाषितव्यं नासाधुभिरिति गम्या गम्येतिवन्नियमः क्रियते इति पस्पशायामुक्तम्। एवञ्च यादृशविशेषणान्वितयादृशविशेष्यबोधे यादृशानुपूर्व्याः सूत्रकृदाद्यन्यतमसम्मतत्वं तादृशबोधे तादृशानुपूर्वीकः शब्दः साधुर्नान्यत्र। अत एवास्वशब्दोऽश्वे न साधुः, किन्तु निःस्वे। अश्वशब्दो निस्वे न साधुः, किन्तु तुरग इति सङ्गच्छते। नन्वस्तु असाधुतेत्यत आह ❀ एवञ्चेति ❀ याज्ञे कर्मणीत्यनेन "नानृतं वदेन्नापभ्रंशितं वा" इत्यादिश्रुतेः क्रतुप्रकरणे पाठादितरत्र तत्प्रयोगे प्रत्यवायाभावं सूचयति।

दर्शनान्तरीयव्युत्पत्तिमतां स्यादेवेति ।

ननु त्वन्मते 'नानृतम्' इति निषेधः क्रत्वर्थ एव न सिद्ध्येत्, आख्यातेन कर्त्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात्, प्रकरणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यते, इति चेन्न,

प्रभा

दर्शनान्तरीयेति—व्युत्पत्तिः=शास्त्रजन्यं यत् शब्दार्थज्ञानं तत्सम्पाद्यः संस्कारविशेषः, शास्त्रीयार्थबोधकशक्तिर्वा। तथाच मीमांसादर्शनजन्यो यः संस्कारः—'आख्यातं भावनाबोधकम्' इत्येतद्विषयकस्तादृशसंस्कारवतामित्यर्थः। त्वन्मते=वैयाकरणमते। क्रत्वर्थ एवेति—अत्रेदं बोध्यम्—सूत्रादिप्रमाणैः कर्तुराख्यातार्थत्वे साधितेऽपि दर्शपूर्णमासप्रकरणपठितस्य 'नानृतं वदेत्' इति निषेधवाक्यस्य क्रत्वर्थत्वं (क्रतूपकारकत्वम्) न सिद्ध्येत्, क्रतावपभाषणे जाते याज्ञिकैः क्रतुवैगुण्यनिवारणार्थं प्रायश्चित्तमनुष्ठीयते, तदसङ्गतं स्यात्। तथाहि—नानृतमित्यस्य दर्शपूर्णमासक्रतुप्रकरणे पठितत्वात्क्रत्वर्थत्वम्, आख्यातेन कर्तुरुपस्थितत्वात् श्रुत्यादीनामेकत्र समवाये=एकत्र समवधाने परस्य=एतत्सूत्रपठितेषु परस्य दौर्बल्यम्, वैयाकरणनये श्रुत्या=आख्यातरूपशब्देन कर्तुरुपस्थितत्वात् पुरुषार्थत्वम्, तत्र 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यम्, अर्थविप्रकर्षात्' इति न्यायात् श्रुतेर्बलवत्त्वात्पुरुषार्थत्वमेव स्यात्, न प्रकरणप्राप्तक्रत्वर्थत्वम्।

मीमांसकमते तु आख्यातरूपश्रुत्या उपस्थिता भावना, कर्ता च भावनया आक्षिप्यते इति श्रुत्या क्रियारूपा या क्रतुस्तदर्थत्वमनृतवदनस्य सिध्यति। तथाच क्रतुवैगुण्यनिवारणाय सकलयाज्ञिकमीमांसकप्रायश्चित्ताऽऽचाररूपाऽऽचारविरोधाद् भावनावाचकत्वमेव तिबादीनामभ्युपेयम्। नच 'लः कर्मणि' इति शास्त्रादिविरोधः—यथा वृद्धिगुणशब्दौ लोकवेदयोरादैजदेङां बोधकत्वेनादृष्टावपि वैयाकरणैः स्वशास्त्रे परिभाषितौ यथा वा प्रयोगेऽसन्नेव लकार उत्प्रेक्षितस्तथैव कर्त्रादिवाचकत्वस्यापि प्रक्रियानिर्वाहाय कल्पितत्वसम्भवात्। नचैतावता व्याकरणस्मृतेरप्रामाण्यम्, अर्थवादवत्तात्पर्यविषयीभूतार्थे प्रामाण्याक्षतेः। बाध्यत इति—श्रुतिलिङ्गेति न्यायादित्यर्थः। तत्र निरपेक्षरवः श्रुतिः। स्वार्थाभिधाने पदान्तराकाङ्क्षारहितो यो रवः=शब्दः सा श्रुतिः। यथा 'व्रीहीनवहन्ति' इत्यत्र द्वितीयया श्रुत्या अवहननस्य व्रीह्यङ्गत्वम्, अवहननसंस्कार-

दर्पणव्याख्या

❀ स्यादेवेति ❀ भावनाबोधकत्वेनाख्यातस्य सूत्रकारादिभिरननुशिष्टत्वात् कर्त्तृबोधकत्वेनैव तदनुशासनादिति भावः।

मीमांसकः शङ्कते—❀ नन्विति ❀। ❀ त्वन्मते ❀ वैयाकरणमते। ❀ नानृतमिति ❀ दर्शपूर्णमासप्रकरणे हि 'नानृतं वदेत्' इति श्रूयते। तत्र किमयं प्रतिषेधः पुरुषार्थः, आहोस्वित् क्रत्वर्थ इति संश्रये, वदेदित्याख्यातात् कर्त्तृप्रतीत्या कर्त्तृवाचकत्वनिर्णयः, लः कर्मणीत्यनुशासनात्तस्य कर्त्तृपरत्वलाभाच्च। प्रत्ययार्थत्वेन वदनं प्रति प्राधान्याद् वदनं तावत् पुरुषार्थोऽतः प्रतिषेधोऽपि पुरुषार्थः। निषेधप्रतियोगित्वेन वदनक्रियामनुवदता वदेदिति शब्देन पुरुषार्थतयैव बोधनात् तादृशस्यैवानृतवदनस्यानिष्टसाधनताया विपरीतस्वभावबोधकनञा बोधनादन्यादृशानृतवदनस्य चानुपस्थितत्वात्। अत एवानारभ्याधीतस्मार्त्तवदननिषेधस्याप्येतदेव मूलं भवतीति लाघवम्। अन्यथा तन्मूलभूतः पुरुषार्थोऽन्यो निषेधः कल्प्य इति गौरवं प्रसज्येतेति पूर्वपक्षे, 'अनन्यलभ्य एव शब्दार्थः' इति न्यायाद्भावनैवाख्यातवाच्या, कर्त्ता त्वाख्यातवाच्यभावनाया अविनाभावादाक्षेपलभ्य एवेति न तत्र तस्य शक्तिः। लः कर्म्मणीत्यादिस्मृतिरपि द्वयेकयोरित्यनेनैकवाक्यतया तत्सङ्ख्यावाचित्वपरैव। 'पचति देवदत्तः' इत्यादौ च 'गौः शुक्लः' इतिवत् सामानाधिकरण्यं लक्षणयैवेति नाख्यातस्य कर्त्तृवाचित्वमिति कर्त्तुः श्रुतेरनुपस्थितत्वान्न पुरुषार्थता तस्य, किन्तु प्रकरणात् क्रत्वर्थतैवेति निर्णीतं कर्त्रधिकरणे। तत्स्थितं पूर्वपक्षमनुवदति—❀ आख्यातेनेति ❀ तिङेत्यर्थः। ❀ तच्चेति ❀ प्रकरणञ्चेत्यर्थः। ❀ श्रुतिविरोध इति ❀ निरपेक्षस्वरूपश्रुतिप्रातिकूल्य इत्यर्थः।

Sri Gargeshwari Digital Foundation

प्रभा

विशिष्टो व्रीहिर्हविःसम्पादनद्वारा यागाङ्गम्। लिङ्गम्=पदानामर्थप्रतिपादनसामर्थ्यम्। यथा-'बर्हिर्देवसदनं दामि' अस्य मन्त्रस्य कुत्र विनियोग इत्याकाङ्क्षायां दामीत्यस्य लवनार्थकदाधातुनिष्पन्नतया देवगृहभूतकुशच्छेदने विनियोगः, दापदे छेदनार्थप्रकाशनसामर्थ्यरूपाल्लिङ्गात्। वाक्यम्=समभिव्याहारः। समभिव्याहारो नाम—साध्यसाधनत्ववाचकद्वितीयादिराहित्यम्, समानाधिकरणविशेष्यविशेषणभाव इति यावत्। शेषशेषिणोः (अङ्गाङ्गिनोः) सहोच्चारणम्। यथा 'पर्णमयी जुहूर्भवति' अत्र जुह्वाः पर्णमयत्वम् अङ्गम्, समभिव्याहारात्। पर्णम्=पलाशकाष्ठम्, तस्यैव जुहूः कर्तव्या, नान्यकाष्ठस्येति सामानाधिकरण्येन सहोच्चारणरूपसमभिहारान्निर्णयः। जुहूर्नाम=चरुपात्रादुत्थापितं यद्धविश्चरुरूपं तस्य धारणपात्रम्। पर्णपदेनात्र पत्रस्य न ग्रहणम्, तत्र चरुधारणासम्भवात्। तदुक्तम्—

वैकङ्कती ध्रुवा प्रोक्ता आश्वत्थी चोपभृन्मता।
जुहूः पलाशकाष्ठस्य खदिरस्य स्रुवो मतः'॥ इति।

प्रकरणम्=उभयाकाङ्क्षा। यथा दर्शपौर्णमासौ प्रधानयागौ। तत्र श्रुतिः—'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्य दर्शपौर्णमासाभ्यां स्वर्गं भावयेदित्यर्थः। कथं भावयेदिति इतिकर्तव्यताकाङ्क्षा जायते। 'समिधो यजेत्' इत्यस्य समिद्यागेन भावयेदित्यर्थः। तत्र उपकार्य (फल) स्याकाङ्क्षा प्रतीयते, इत्युभयोः

दर्पणव्याख्या

तथाहि—श्रुत्यादयः षडिह विनियोजकाः। तत्र विरुद्धयोरेकत्रोपनिपाते समुच्चयदौर्लभ्यादेकेनापरस्य बाधो वक्तव्यः। स च बलवता दुर्बलस्येति कस्य दौर्बल्यमित्याकाङ्क्षायां पारदौर्बल्यप्रतिपादकम्—'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम्, अर्थविप्रकर्षात्' इति सूत्रं प्रणिनाय महर्षिर्जैमिनिः। श्रुत्यादीनां पठितानां समवाये एकत्रोपनिपाते पारदौर्बल्यमिति। परमेव पारम्=उत्तरपठितम्। तथाचैषां मध्ये यदपेक्षया यत्परं तद्दुर्बलमित्यर्थः। तत्र हेतुमाह— अर्थविप्रकर्षादिति—अर्थस्य = विनियोजकस्य लिङ्गादितो विप्रकर्षात् = उत्तरवर्त्तित्वात्, लिङ्गादेर्विलम्बेन पूर्वापेक्षया विनियोजकत्वावगतेरिति यावत्।

तत्र श्रुत्यादीनामुदाहरणानि—निरपेक्षो रवः श्रुतिः। इतरप्रामाण्यानधीनप्रामाण्यकत्वञ्च निरपेक्षत्वम्—यथा 'व्रीहीनवहन्ति' इति। अत्र क्रियाजन्यफलभागित्वं कर्मत्वं बोधयन्ती द्वितीया श्रुतिरितरनिरपेक्षैव व्रीहीणामवघातशेषित्वं प्रतिपादयति। १।

अर्थविशेषप्रकाशनसामर्थ्यं लिङ्गम्। यथा 'बर्हिर्देवसदनं दामि' इति। अत्र लवनार्थप्रकाशकतया लवने अस्य विनियोगः। २।

परस्पराकाङ्क्षावशादेकस्मिन्नर्थे पर्य्यवसन्नानि पदानि वाक्यम्। यथा 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् 'अग्नये त्वा जुष्टं निर्वपामि' इति। अत्र मन्त्रलिङ्गेन निर्वापे प्रयुज्यमानस्य समवेतार्थभागस्यैकवाक्यताबलेन देवस्य त्वेत्यादिभागस्यापि तत्रैव विनियोगः। ३।

लब्धवाक्यभावानां पदानां कार्य्यान्तरापेक्षावशाद्वाक्यान्तरेण सम्बन्ध आकाङ्क्षापर्यवसन्नं प्रकरणम्। यथा—'समिधो यजति' इति। अस्य हि दर्शपूर्णमासे कथम्भावाकाङ्क्षायाः प्रकरणपाठवशाच्छेषत्वम्। ४।

स्थानम्=क्रमः। स चानेकस्याम्नातस्य सन्निधिविशेषाम्नानम्। यथा—दधिरसीत्यत्राग्नेयो पांश्वग्नीषोमीययागाः क्रमेण पठिताः, एवं मन्त्रभागेऽपि क्रमेणानुमन्त्रणत्रयं पठितम्। तत्राग्नेयाग्नीषोमयोर्द्वयोर्लिङ्गेनैव विनियोगसिद्धिः। दधिरसित्यत्र तु न लिङ्गादिविनियोजकम् किन्तु यस्मिन् प्रदेशे ब्राह्मण उपांशुयागविधानं तस्मिन् प्रदेशे मन्त्रेऽप्यस्य पाठ इति क्रमादुपांशुयागानुमन्त्रेण तस्य विनियोगः। ५।

समाख्या=योगबलम्। यथा 'हौत्रमौद्गात्रम्' इत्यादि। तत्र हि—होतुरिदं हौत्रमित्यादियोगबलेन हौत्रादिसमाख्यातानि कर्माणि होत्रादिभिरनुष्ठेयानीति। ६।

SGDF Sri Gargeshwari Digital Foundation

प्रभा

साकाङ्क्षतया दर्शपौर्णमासयोरितिकर्तव्यतया समिद्यागः सम्बध्यते । स्थानम् = देशसामान्यम् । तच्च द्विविधम् = पाठसादेश्यम्, अनुष्ठानसादेश्यञ्च । मन्त्राणां क्रमः पौर्वापर्यमिति यावत्, कर्मणाञ्च बाहुल्ये केन मन्त्रेण किं कर्मेति विचारे यथासङ्ख्यं सम्बन्धो मन्त्रकर्मणोः पाठसादेश्येन । एवं प्रथमपठितस्य मन्त्रस्य कैमर्थ्याकाङ्क्षायां प्रथमविहितकर्मणा सम्बन्धोऽपि पाठसादेश्येन । सन्निधिपाठोऽपि पाठसादेश्यमेव । यथा यागो द्विविधः—प्रकृतिरूपः, विकृतिरूपश्चेति । तत्र यस्मिन् यागे इतिकर्तव्यता उपदिष्टा, यागान्तरेण उपजीव्यते सा प्रकृतिः । येनोपजीव्यते सा विकृतिः । एवञ्च ये विकृतियागाङ्गभूताः प्रकृत्यङ्गानुवादेन विहितास्तेषां विकृत्यङ्गत्वम्, सन्निधिपाठात् । अनुष्ठानसादेश्यम्—यथा—'ज्योतिःष्टोमे त्रयः पशवः समाम्नाताः—'अग्निषोमीयः, सवनीयः, आनुबन्ध्यश्च' इति । तत्र पशुधर्मा उपाकरणादयः सप्त औपवसथ्येऽहनि श्रूयन्ते । अग्निष्टोमीयस्यापि तदेव स्थानमिति समानानुष्ठानदेशत्वात्पशुधर्मा अग्निषोमीयाङ्गभूता न ज्योतिष्टोमाङ्गभूताः, विभिन्नदेशत्वात् । समाख्या = यौगिकः शब्दः । प्रकृतिप्रत्ययरूपयोगात् = अवयवादर्थप्रकाशकः । अत एव योगबलम् = अवयवबलं समाख्या इत्यप्युच्यते । ज्योतिःष्टोमयागे सोमरसो भक्षणीयो नवेति संशयः, तत्र 'प्रैतुहोतुश्चमसः' 'प्रब्रह्मणः' 'प्रोद्गातॄणाम्' 'प्रयजमानस्य प्रयन्तु सदस्यान्' इति श्रुत्या होत्रादिना सह चमसस्य सम्बन्धमात्रं प्रतीयते, नतु सोमभक्षणमिति पूर्वपक्षे सिद्धान्तसूत्रम्—'चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्वात्' इति । होत्रादेः चमसे यः सम्बन्धः स भक्षणनिमित्तक एव, कुतः, समाख्यानात् = चमसो यज्ञपात्रम्, यौगिकत्वात् । तथाहि—चमधातुर्भक्षणार्थः, चमु अदने इत्युक्तेः । तस्मात् चमति = भक्षयत्यस्मिन्निति अधिकरणे औणादिकोऽसच्प्रत्ययः । एवञ्च सोमस्य भक्षणाभावे होतुश्चमस इति सम्बन्धो नोपपद्येतेति समाख्यया सोमस्य भक्षणमावश्यकमिति निर्णीतम् । एवञ्च श्रुत्यादिषु कयोश्चित् केषाञ्चिद्वा समवाये पूर्वस्य बलीयस्त्वमुत्तरस्य दुर्बलत्वमिति बलीयसा निर्णयः ।

दर्पणव्याख्या

विरोधोदाहरणादि यथा—श्रुतिलिङ्गयोर्विरोधे श्रुतिर्बलीयसी, लिङ्गं तु दुर्बलम्, अर्थविप्रकर्षात् । यथा, कदाचनस्तरीरसीत्यादिकाया ऋचो विनियोजिका श्रुतिः 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति इन्द्रप्रकाशनसामर्थ्याल्लिङ्गादिन्द्रोपस्थापने विनियोगोऽस्याः प्रतिभाति, अन्यप्रकाशकस्यान्यत्र विनियोगायोगात् । श्रुत्या गार्हपत्योपस्थापने स प्रतीयते । गार्हपत्यमिति द्वितीया हि कर्मविभक्तितया कामपि क्रियामपेक्ष्य प्रकृत्यर्थस्य शेषित्वं बोधयति, क्रियाजन्येष्टफलभागित्वस्य तदर्थत्वात् । एवमैन्द्र्येति तृतीयाप्रकृत्यर्थस्य शेषत्वम्, क्रियां प्रति साधकतमत्वरूपकरणत्वस्य तदर्थत्वात्, तदनयोर्विरोधः ।

तत्रायं पूर्वपक्षः—सामर्थ्यज्ञानमपेक्ष्य श्रुतिर्विनियोजिका । नह्यसमर्थं श्रुतिसहस्रमपि विनियोक्तुमलम्, अतो लिङ्गस्य बलवत्त्वादिन्द्रोपस्थापनेऽस्या विनियोगः । तदनुरोधितया द्वितीया सप्तम्यर्थतया व्याख्येया । गार्हपत्यसमीपे 'इन्द्रोऽनया उपस्थातव्यः' इत्यर्थः पर्यवस्यतीति ।

सिद्धान्तस्तु—श्रुतिः स्वरूपसत्सामर्थ्यमपेक्षते, नतु तज्ज्ञानमपि, येन लिङ्गं बलवद्भवेत् । तस्य च पूर्वं सत एव विनियोगोऽन्यथानुपपत्त्या ज्ञानं पश्चादुपजायते । लिङ्गन्तु विनियोजने श्रुतिमपेक्षते । नह्यनयेन्द्र उपस्थातव्य इति लिङ्गात् स्वरसतः प्रतीयते, किन्त्विन्द्र एतादृगित्येतावन्मात्रम् । तथाच प्रकरणाम्नानसामर्थ्यादिन्द्रप्रकाशनसमर्थाया ऋचोऽन्यथानुपपत्त्या लिङ्गेनानयेन्द्र उपस्थातव्य इति श्रुतिः कल्पनीया, यया विनियोगो भवेत् । ततो यावल्लिङ्गं श्रुतिकल्पनायै प्रकान्तव्यापारं तावत् प्रत्यक्षश्रुत्या विनियोगः सिद्ध इति प्रकरणे निराकाङ्क्षे कयाऽनुपपत्त्या श्रुतिः कल्पनीया । तस्माच्छ्रुतेर्बलवत्त्वात्तदनुगुणतया सामर्थ्ये नीयमाने इन्द्रपदं परमैश्वर्याश्रयवाचकतया गार्हपत्यतात्पर्यकमित्यवधार्यत इति । श्रुतिप्रकरणयोर्विरोधोदाहरणन्तु यथा प्रतिष्ठाकामदर्शपूर्णमासयागे एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्येति श्रुत्या एकविंशति सामधेन्यनुवचनानां तदङ्गत्वावगतौ नैराकाङ्क्षान्पञ्चदशसामधेन्यनुवचनाङ्गे त्वावगमकप्रकरणस्य बाधः ।

SGDF Sarguja Digital Foundation

'तिङर्थस्तु विशेषणम्' इत्यनेन परिहृतत्वात्। नहि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकरणात् क्रत्वर्थतैव। अस्तु वा क्रतुयुक्तपुरुषधर्मः, अनुष्ठाने विशेषाभावात्।

प्रभा

ननु तिङर्थस्य कर्तुर्भावनायां विशेषणत्वेऽपि श्रुत्यर्थत्वस्य सत्त्वात् कथं न निषेधस्य पुरुषार्थत्वमित्याशङ्कां निराकरोति—**गुणभूत इति**—'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' इति न्यायेन विशेष्येऽङ्गित्वस्य न्याय्यत्वाद् विशेषणेऽङ्गिसम्बन्धे प्राधान्याप्राधान्यस्य विरुद्धस्याऽऽपत्तिः, एकत्र विशेषणतयाऽन्वितस्यापरत्र विशेषणत्वायोगाद् भावनायामन्वितस्य निषेधेऽन्वयानौचित्यम्। **प्रधानमिति**—इदं प्रथमान्तं भावनाविशेषणम्, प्रधानशब्दस्य श्रेष्ठेऽर्थे त्रिलिङ्गत्वात् 'प्रधाना' इति तूचितम्। **तम्**=निषेधम्। **ग्रहीतुम्**=प्रतियोगितया सम्बद्धुम्। एवञ्च निषेधस्य, प्रतियोगिभूतभावनायाश्च कैमर्थ्याकाङ्क्षायां क्रतुप्रकरणात् क्रत्वर्थतैव।

नन्वेवम् 'न कलञ्जं भक्षयेत्' इति निषेधस्यापि पुरुषार्थत्वं न स्यात्, कर्तुः पुरुषस्य भक्षणरूपभावनायां विशेषणत्वात्। यदि तु भावनायाः प्राधान्यान्नञर्थान्वये तद्द्वारा कर्तुरपि निषेधेऽन्वय इति बुद्ध्या पुरुषार्थत्वमुच्यते तदा प्रकृतेऽपि तथैवास्त्वित्याह— **अस्तु वेति**—क्रतुयुक्तपुरुषसंस्कारद्वारा क्रतुयुक्तपुरुषधर्मः। नच क्रतुयुक्तः प्रधानीभूतो यजमानस्तेनैव प्रधानतयाऽनृतं वर्जनीयं स्यान्नान्यैः क्रतुयुक्तैः पुरुषैः, इष्यते तु सर्वैः। भावनाया आख्यातवाच्यत्वे तु यजमानस्याप्यप्राधान्यात् प्रधानन्यायाप्रवृत्तौ सर्वैरेव क्रतुयुक्तैरनृतं वर्जनीयमिति लभ्यत इति वाच्यम्, श्रुत्या, प्रकरणेन च क्रतुसम्बद्धा ये ये पुरुषास्तत्कर्तृकानृतवदनाभावबोध एवानेन लभ्यते, नतु क्रतोः कर्ता यो यजमानस्तत्कर्तृकानृतवदनाभाव एवेत्याशयात्। **अनुष्ठान इति**—क्रतुकर्ता यजमानः क्रत्वङ्गक्रियाकर्तारश्चान्ये इति क्रियाऽनुष्ठाने **विशेषाभावात्**=भेदाभावात् श्रुतिप्रकरणाभ्यां सर्वैरेवानृतं वर्जनीयमिति सिध्यतीति भावः। क्रतुयुक्तपुरुषधर्मत्वे च क्रत्वर्थत्वे फलतीति भावः।

दर्पणव्याख्या

विरोधोदाहरणान्तराणि त्वन्यतोऽवधार्याणि, गौरवभयान्नेह प्रपञ्चितानि। तदयं निर्गलितोऽर्थः—श्रुतिर्निरपेक्षत्वात् सर्वतो बलवती, लिङ्गं तु विनियोगे एकान्तरितत्वाद् द्व्यन्तरितवाक्याद् बलवत्। एवं वाक्यादवप्यूह्यम्। समाख्या तु पञ्चान्तरितत्वात्सर्वतो दुर्बलेति प्रकृते आकाङ्क्षापर्यवसन्नप्रकरणेन वाक्यं कल्पनीयम्। तेन च लिङ्गम्, लिङ्गेन श्रुतिस्तयाऽनृतवदननिषेधस्य क्रतौ विनियोगः। यावच्च प्रकरणं वाक्यकल्पनायै प्रक्रान्तव्यापारं तावत्प्रत्यक्षया कर्त्रर्थैकाख्यातश्रुत्या तस्य पुरुषार्थत्वेन विनियोगे सिद्धे क्लृप्तमपि वाक्याद्यत्किञ्चित्करमिति श्रुतिविरोधे बाध्यत इत्यस्यार्थः, लिङ्गादीनामुक्तप्रकारेण श्रुत्यपेक्षया दुर्बलत्वादिति भावः।

समाधत्ते—❀ तिङर्थस्तु विशेषणमिति ❀ तथाचाख्यातश्रुत्या कर्तुरुपस्थापनेऽपि न भावनावत् तस्य प्राधान्येन भानम्, येन निषेधस्य पुरुषार्थता शङ्क्येत, किन्तु विशेषणतयैव, तथोपस्थितस्य च विशेषणान्तरनैराकाङ्क्ष्येण कर्तुः श्रौतनञर्थसम्बन्धाभावान्नात्र श्रुत्या प्रकरणबाध इत्याशयं विशदयति—❀ स्वाङ्गत्वेनेति ❀ स्वविशेषणतयेत्यर्थः।

नन्वेवं निषेधस्य क्वापि श्रौतपुरुषार्थता न स्यात्, 'न कलञ्जं भक्षयेत्' इत्यत्राप्युक्तरीत्या कर्त्तरि नञर्थासम्बन्धेन श्रौतत्वात्। यदि च कर्तुरप्राधान्येऽपि कर्तृवृत्तिभावनाया प्राधान्यात्तस्या नञर्थान्वये तद्द्वाराऽऽख्यातार्थकर्तुरप्यन्वयान्न तस्य श्रौतपुरुषार्थत्वानुपपत्तिरिति विभाव्यते, तदा प्रकृतेऽपि तुल्यमत आह—❀ अस्तु वेति ❀।

❀ अनुष्ठान इति ❀ नच नानृतं वदेदिति निषेधस्य क्रतुयुक्तपुरुषधर्मत्वे यजमानस्य प्राधान्यात्प्रधानीभूतकर्त्रेवानृतवदनं वर्ज्यं स्यात् क्रत्वर्थत्वे च कर्त्रनपेक्षत्वेन यज्ञप्रवृत्तेन यजमानेनर्त्विग्भिश्च वर्जनं सिध्यतीति विशेषात् कथमेतदिति वाच्यम्, श्रुतिप्रकरणाभ्यां क्रतुसम्बन्धपुरुषकर्तृकानृतवदनाभाव इति बोधेन क्रतुकर्तृकेतिबोधे मानाभाव इति क्रतुयुक्तेति वदतोऽभिप्रेतत्वादिति।

"जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति वाक्योक्तमन्त्रविधिवदित्यादि भूषणे प्रपञ्चितम् ।

प्रभा

तत्र दृष्टान्तमाह–मयि दक्षेति—दर्शपूर्णमासप्रकरणे एतत्श्रूयते –'जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू' इति, जञ्जभ्यमानः=जृम्भां कुर्वाणः, 'मयि दक्षक्रतू' इति शब्दघटितं मन्त्रमनुब्रूयादित्यर्थः । तत्र सन्दिह्यते—अस्य मन्त्रोच्चारणस्य शुद्ध (केवल) पुरुषसंस्कारकतया पुरुषार्थत्वम् , उत क्रतुसम्बद्धपुरुषसंस्कारकतया क्रत्वर्थत्वमिति, तत्र कृत्प्रत्ययेन शानचा कर्तुरुपस्थितत्वात् प्रकृतवाक्येन पुरुषसंस्कारकत्वं प्राप्नोति । क्रतुप्रकरणे पठितत्वात् प्रकरणेन क्रतूपकारकत्वस्य प्राप्तावपि प्रकरणापेक्षया वाक्यस्य बलीयस्त्वात् क्रतुधर्मत्वं न युक्तमिति पूर्वपक्षे उत्तरितम्—यत्र श्रुतिप्रकरणयोर्विरोधस्तत्र श्रुत्या प्रकरणस्य बाधः । यत्र तु विरोधाभावसम्भवस्तत्रोभयोः समावेश एव, नतु बाध्यबाधकभावः । तथाच वाक्येन (शानचा श्रुत्या) कर्त्तुरुपस्थितत्वेऽपि क्रतुसम्बद्धपुरुषसंस्कारमुखेन क्रतुसंस्कारकत्वमपि सिध्यतीति श्रुतिप्रकरणयोर्विरोधाभावाद् बाध्यबाधकभावाभावः, तथा प्रकृतेऽपि अनृतवदननिषेधस्य क्रतुयुक्तपुरुषधर्मतया क्रतूपकारकत्वमुपलभ्यते इति वाक्यप्रकरणयोः समावेश एव उचितः । तदुक्तं कुमारीलभट्टैः—

'स्त्र्युपायमांसभक्षादिपुरुषार्थत्वमपि श्रितः ।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्' ॥ इति ।

स्त्र्युपायः=स्त्र्युपगमनम् । आदिना अनृतवदनस्य संग्रहः । प्रतिषेधः='न स्त्रियमुपेयात्' 'न मांसमश्नीयात्' 'नानृतं वदेत्' इति प्रतिषेधः । मन्त्रविधिवदिति—यथा क्रतुयुक्तजञ्जभ्यमानपुरुषधर्मतया क्रत्वर्थत्वं 'मयि दक्षक्रतू' इति मन्त्रपाठस्य, तथा अनृतवदननिषेधस्यापि क्रतुयुक्तपुरुषधर्मतया क्रत्वर्थत्वमपि ।

किञ्च दर्शपूर्णमासप्रकरणपठितस्य 'नानृतं वदेत्' इति निषेधस्य शब्दानृतमर्थानृतमुभयमपि विनिगमनाविषय इत्यवधेयम् । नच निर्मूलत्वाद् व्याकरणानुरोधो नाऽऽदरणीयः, 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतेः,—

'पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन' ॥

इति पराशरोपपुराणोक्तेश्च व्याकरणस्य प्रामाण्याक्षतेः । तस्माद्धातोः फलव्यापारोभयार्थकत्वम्, तिङः कर्तृकर्मोभयार्थकत्वं स्वीकार्यमिति दिक् ।

दर्पणव्याख्या

तत्र दृष्टान्तमाह—❀ जञ्जभ्यमान इत्यादि ❀ दर्शपूर्णमासप्रकरण एवैतन्मन्त्रवचनं श्रूयते–"जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति । तत्र किमेतन्मन्त्रवचनं शुद्धपुरुषधर्मः, उत क्रतुयुक्तपुरुषसंस्कारकतया क्रत्वङ्गमिति सन्देहे, वाक्येन तावज्जञ्जभ्यमानपुरुषधर्मतयैवायं प्रतीयते, कृत्प्रत्ययस्य शानचः कर्तृवाचकत्वात् । प्रकरणेन तु क्रत्वङ्गतया, प्रकरणं च वाक्यापेक्षया दुर्बलमिति पुरुषधर्मतैव युक्ता । सत्यां च फलाकाङ्क्षायाम् "प्राणापानावेवात्मानं धत्ते" इति वाक्यशेषे श्रुतस्य फलस्य रात्रिसत्रन्यायेन कल्पनादिति पूर्वपक्षे सिद्धान्तः—वाक्य–प्रकरणयोर्विरोधे बाध्यबाधकभावो नत्वत्रास्ति विरोधः । जञ्जभ्यमानपदस्य कर्त्तृवाचकतया तादृशपुरुषस्य क्रतावपि सत्त्वात् तत्संस्कारमुखेन क्रत्वङ्गतासम्भवात् । एवञ्चार्थवादोपस्थितफलकल्पनागौरवमपि नेति । तथाच बलाबलचिन्तायामेव विरोध एवौचित्येन जञ्जभ्यमानवाक्यानुवचनस्य वाक्यप्रकरणाभ्यां क्रतुयुक्तपुरुषधर्मतावत् प्रकृतेऽप्यनृतवदननिषेधस्य श्रुतिप्रकरणाभ्यां क्रतुसम्बद्धपुरुषधर्मतैवोचिता । उक्तञ्च भट्टपादैः—

स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः ।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥ इति भावः ।

❀ प्रपञ्चितमिति ❀ प्रपञ्चस्तु उक्तः ।

SGDF
Sri Gargeshwari Digital Foundation

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात्, साधुत्वज्ञानस्य शाब्दबोधहेतुत्वात्, इत्यत आह–बोध इति—असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम, अपभ्रंशवत्। असाधुत्वन्तु स्यादेवेति भावः।

वस्तुतः साधुत्वज्ञानं न हेतुः, तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इति 'असाधुरनुमानेन' इत्यत्र वक्ष्यामः ॥ २१ ॥

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्म्मिते।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ॥ १ ॥

इति श्रीकौण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वर्थाऽऽख्यातसामान्यार्थयोर्निरूपणम् ॥ १ ॥

———***———

प्रभा

शाब्दबोधेति—साधुशब्दा एव बोधकाः। 'बोधकत्वं शक्तिः' इति मते साधुत्वं शक्तिश्चेत्यनर्थान्तरम्। साधुत्वभ्रमादिति—तिबादि भावनाविषयकबोधजनकताऽवच्छेदकधर्मवदिति भ्रमादित्यर्थः। अपभ्रंशवदिति–यथा 'घड़ा' इत्याद्यपभ्रंशानां साधुत्वभ्रमाद् बोधकत्वेऽप्यसाधुत्वम्, तथा भावनाबोधकत्वेऽपि तस्यां तिबादेरसाधुत्वं दुर्निवारम्। न हेतुरिति—हालिकानां साधुत्वज्ञानाभावेऽपि बोधदर्शनात्, अन्यथा सिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपकारणत्वस्याभावान्न हेतुरित्यर्थः। नच साधुत्वज्ञानस्य शाब्दबोधम्प्रति हेतुत्वाभावेऽपि असाधुत्वज्ञानसत्त्वे शाब्दबोधादर्शनात् तस्य तं प्रति प्रतिबन्धकत्वम्, इति भावनायां तिबादिरसाधुरिति ज्ञानदशायां कथं तद्बोध इति वाच्यम्, असाधुत्वज्ञानसत्त्वेऽपि बोधस्यानुभवसिद्धत्वादित्याह—तद्व्यतिरेकेति—यं प्रति यस्य कारणत्वं तद्व्यतिरेक-(अभाव) निश्चय एव प्रतिबन्धको भवति। प्रकृते साधुत्वज्ञानस्य शाब्दबोधं प्रति कारणत्वाभावे तद्व्यतिरेकस्य प्रतिबन्धकत्वं न स्यादिति भावः। वक्ष्याम इति—साधुत्वज्ञानरहितानां असाधुत्वज्ञानवतामपि शाब्दबोधस्यापभ्रंशेभ्योऽपि सर्वानुभवसिद्धतया तत्र साधुत्वज्ञानस्य न हेतुत्वम्, नापि असाधुत्वज्ञानस्य प्रतिबन्धकत्वमिति वक्ष्याम इत्यर्थः॥

दिवालीं जननीं तातं नीलकण्ठं नमस्यतः।
प्रभायां बालकृष्णस्य पूर्णो धात्वर्थनिर्णयः ॥ १ ॥

॥ शुभम् ॥

———***———

दर्पणव्याख्या

ननु साधुत्वज्ञानं विनाऽपि शाब्दबोधोदयेन व्यभिचारात् कथमेतत्, साधुत्वस्य शक्तत्वरूपताया निराकरिष्यमाणत्वाच्चात आह–❀ वस्तुत इति ❀ तद्व्यतिरेकनिर्णय इति ❀ असाधुत्वनिश्चय इत्यर्थः। तन्निश्चयेऽप्यपभ्रंशाद् बोधदर्शनात्। तथाचाऽऽख्याताद्भावनाबोधे बाधकाभाव इति भावः॥ २१ ॥

इति वैयाकरणभूषणसारदर्पणे धात्वाख्यातार्थनिरूपणम् ॥ १ ॥

———❀❀❀———

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ लकरार्थनिर्णयः ॥

प्रत्येकं दशलकाराणामर्थं निरूपयति—

वर्त्तमाने परोऽक्षे श्वो भाविन्यर्थे भविष्यति ।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥ २२ ॥

लडादयष्टितः षट् क्रमेणैष्वर्थेषु द्रष्टव्याः । तथाहि—वर्त्तमानेऽर्थे लट्, "वर्त्तमाने लट्" (पा० सू० ३ । १ । १८३) इति सूत्रात् । प्रारब्धापरिसमाप्तत्वम्,

प्रभा

॥ अथ लकारार्थनिर्णयः ॥

यद्यदनन्तरं निरूपणीयं तस्य तत्सङ्गतेन भवितव्यमिति व्याप्तिः, 'नासङ्गतं प्रयुञ्जीत' इत्यभियुक्तोक्तेः । सङ्गतिनिरूपकज्ञानप्रयोज्यं यद् अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानं तद्विषयस्मरणानुकूलसम्बन्धः सङ्गतिः । प्रकृते लकारार्थसामान्यनिरूपणानन्तरम् 'लकाराणां विशेषार्थज्ञानं मे जायताम्' इत्याकारिका जिज्ञासा जायते, तादृशजिज्ञासाजनकं ज्ञानञ्च—लकाराणां विशेषार्थज्ञानं मदिष्टसाधनमिति, तद्विषयो लकाराणां विशेषार्थः तत्सम्बन्धश्च स्मार्य्यस्मारकभाव इति स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गत्याऽऽह—प्रत्येकमिति—वीप्सायामव्ययीभावादेकैकस्येत्यर्थः । दशलकाराणामिति—'दिक्संख्ये संज्ञायाम्' इति कर्मधारयः । 'दशलकारः' इति लकाराणां संज्ञा । लकाराणामिति—घटकत्वं षष्ठ्यर्थः, तस्य प्रत्येकमित्यत्रान्वयः । निरूपयतीति—विशेषज्ञानञ्च सामान्यज्ञानपूर्वकमिति सामान्यज्ञाने जाते लकारविशेषार्थजिज्ञासोदयः ।

वर्तमाने इति—१–'वर्तमाने लट्, २–'परोक्षे लिट्' ३–श्वो भाविन्यर्थे = अनद्यतने भाविन्यर्थे लुट्, ४–भविष्यति = भविष्यत्सामान्ये लृट्, ५–विध्यादौ लेट्, ६–प्रार्थनादौ लोट् इत्याह—लडादय इति । षडिति—ननु यदि जातिपक्षस्तदा एकत्वमेव लकारस्य, यदि व्यक्तिपक्षस्तदाऽऽनन्त्यमिति इदमसङ्गतमिति चेन्न, इत्संज्ञकाकारादिविशिष्टटित्त्वादिरूपोपाधिगतषट्त्वारोपेण षट्त्वसम्भवात् । प्रारब्धेति—इदं क्रियागतं वर्तमानत्वम्, प्रारब्धत्वादेस्तत्रैव सम्भवात् । प्रारब्धः = तत्तत्फलानुकूलव्यापारध्वंसासमानाधिकरणस्तत्तत्फलानुकूलकृतिविषयः । अपरिसमाप्तः = तत्तत्फलानुकूलचरमक्रियाध्वंसप्रागभावाधिकरणकालवृत्तिः, ध्वंसानधिकरणकालवृत्तिर्वा यः क्रियाऽऽत्मको अर्थस्तत्त्वं वर्तमानक्रियात्वम् । तादृशक्रियाधिकरणत्वोपलक्षितकालत्वं वर्तमानकालत्वम् । इदं लक्षणं क्रियात्मककालत्वाभिप्रायेण ।

अत्र केचित्—'कालं क्रियाऽऽत्मकमाहुः', अपरे—क्षणसमूहम्, अन्ये—अखण्डमतिरिक्तं कालं वदन्ति । अखिलनयेऽपि वर्तमानकालस्य प्रत्यक्षेण निश्चेतुमशक्यत्वादनुमानगम्यत्वमेव । कालसामान्यलक्षणञ्च—

दर्पणव्याख्या

॥ अथ लकारार्थनिर्णयः ॥

लकारसामान्यार्थे निरूपिते तद्विषयकजिज्ञासानिवृत्तावावश्यवक्तव्यत्वज्ञानाद्विशेषार्थनिरूपणेऽवसरस्य सङ्गतित्वं सूचयन्नाह—❀ प्रत्येकमिति ❀ । दशलकाराणामिति ❀ लट्–लिट् इत्यादिक्रमेण पठितानामित्यर्थः । आदेशानां वाचकत्वमिति पक्षेऽपि तिङाद्यादेशनिष्ठां बोधकतारूपां शक्तिं लडादिष्वारोप्य तद्विधानात् तदर्थकत्वं तेषामक्षतमिति भावः ।

❀ प्रारब्धापरिसमाप्तत्वमिति ❀ विनष्टाद्यवयवप्रागभावकत्वे सत्यनुत्पन्नध्वंसान्यावयवकत्वमित्यर्थः । भावि-

प्रभा

कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया निमित्तकारणत्वम्। कालिकसम्बन्धेति निवेशाद्दिशि, अधिकरणतयेति निवेशादद्दष्टेश्वरयोश्च नातिव्याप्तिः।

यदि तु काललक्षणे संसर्गविधया कालस्य निवेशात् 'आत्माश्रयदोषः' इत्युच्यते तदा कार्यतायां कालिकसम्बन्धावच्छिन्नत्वमपहाय दैशिकातिरिक्तसर्वाधारतानियामकसम्बन्धावच्छिन्नत्वं देयम्। यद्वा, 'अयं ज्येष्ठः' 'अयं कनिष्ठः' इति व्यवहारोपपत्तये दैशिकातिरिक्तपरत्वापरत्वरूपज्येष्ठत्व—कनिष्ठत्वयोरसमवायिकारणताश्रयत्वं काललक्षणं बोध्यमिति पञ्चोलिनः।

वर्तमानत्वस्य कालधर्मतया इदमेव युक्तम्। अत एव 'क्रियाभेदाय कालस्तु' इति भाष्ये उक्तम्।

अत एव 'आख्यातार्थः कालः' इत्यपि संगच्छते। भाष्येऽपि 'न्याय्या त्वेषा वर्तमानकालताऽऽरम्भानपवर्गपर्यन्तं भुञ्जानो हसति, जल्पति, पिबति, निमिषति च' इत्युक्तम्, तावतीषु क्रियासु सतीष्वपि नान्तरीयकत्वात्। 'भुङ्क्ते' इति व्यवहारदर्शनाद् भुजिक्रियाया हासादिक्रिया विच्छेदिका न भवन्ति। एवं बहुदिनसाध्यपुस्तकाध्ययनसमये स्नानभोजनगमनादिक्रियाया अध्ययनविच्छेदकत्वाभावात् 'देवदत्तोऽधीते' इति व्यवहारः। यद्वा, हासादीनामपि गलबिलाधःसंयोगरूपफलानुकूलत्वाद् भुज्यादिधात्वर्थत्वविवक्षेति कैयटः। परन्तु भोजनस्नानादीनाम् अधीङ्धात्वर्थत्वकल्पनायां गौरवाज् ज्ञानजनककण्ठताल्वादिव्यापारेष्वेव धातोः शक्तिरुचिता। हासादिक्रियान्तरसत्त्वेऽपि 'भुङ्क्ते' इत्यादिप्रयोगस्तूक्तरीत्योपपाद्यः। अध्ययनारम्भक्षणतत्समाप्तिक्षणाऽन्तरालिकसमये उक्तवर्तमानत्वस्य सत्त्वाच्च नानुपपत्तिः।

यत्तु वर्तमानत्वम्—'शब्दप्रयोगाधिकरणकालवृत्तित्वम्' इति तन्न, दिनादिरूपं तादृशकालमादाय विनष्टेऽपि पाके 'पचति' इति प्रयोगापत्तेः। नापि 'शब्दप्रयोगाधिकरणक्षणवृत्तित्वरूपम्', दिनादिकालमादाय दोषाभावेऽपि पूर्वापरीभूतावयवात्मकक्रियायास्तादृशैकक्षणवृत्तित्वासम्भवात्। प्रारब्धापरिसमाप्तत्वञ्चात्र विशेषणम्, 'नतु अविद्यमानं सदपि व्यावर्तकत्वरूपमुपलक्षणम्', तेनातीतादिक्रियामादाय तत्तत्कालावच्छेदेन प्रारब्धापरिसमाप्तत्वेऽपि न 'पचति' इति प्रयोगापत्तिः। लिडादिना बाधान्न तदापत्तिरिति तु न युक्तम्, भूतत्वाद्यविवक्षायां तदप्राप्तेः। प्रारब्धेत्याद्युक्तरूपं वर्तमानत्वं कालत्वेनैव शाब्दबोधे भासते, नतु तत्तद्रूपेण, गौरवादिति केचित्, तन्न, वर्तमानकालिकी भूतानद्यतनकालिकी च पचिक्रियेत्यादिबोधस्य सर्वानुभवसिद्धत्वेन लडादिना वर्तमानत्वादिरूपेणैव कालस्य वाच्यत्वात्। वस्तुतस्तु 'तदादि'न्यायेन वक्तृबुद्धिविषयताऽवच्छेदकत्वोपलक्षिततत्तत्काले एव लडादीनां शक्तिरिति न गौरवम्।

परिष्कृतं वर्तमानत्वन्तु धातुविशिष्टत्वम्, वैशिष्ट्यञ्च—स्वाधिकरणत्वम्, स्वजन्यबोधविषयत्वेन तात्पर्यविषयीभूतक्रियाधिकरणत्वम्, स्वजन्यबोधविषययावद्व्यापारप्रतियोगिकध्वंसानधिकरणत्वम्, स्वजन्यबोधविषययावद्व्यापारप्रतियोगिकप्रागभावानधिकरणत्वमेतच्चतुष्टयसम्बन्धेन। लक्षणसमन्वयश्चेत्थम्—तत्तद्धातुवाच्याद्यक्रियामादाय चरमक्रियापर्यन्ताधिकरणीभूतः कालो वर्त्तमानत्वेन व्यवह्रियते, तत्रैव 'पचति' 'गच्छति' इत्यादिप्रयोगदर्शनात्। तथाच तादृशकाले पच्यादिधातुविशिष्टत्वमस्ति। तथाहि—स्वम्=पच्यादिधातुस्तदधिकरणत्वं 'पचति' इत्यादिप्रयोगमादाय पच्यादिधातुजन्यबोधविषयत्वेन तात्पर्यविषयीभूता क्रिया पाकादिस्तदधिकरणत्वमपि तत्र काले, पच्यादिधातुजन्यबोधविषयसकलव्यापारप्रतियोगिकध्वंसस्योक्तकालेऽसत्त्वेन तृतीयसम्बन्धोऽप्युपपद्यते। अत्र यत्किञ्चित् क्रियाप्रतियोगिकध्वंसस्य सत्त्वेनाव्याप्तिवारणाय ध्वंसे यावत्क्रियाप्रतियोगिकत्वनिवेशः।

पच्यादिधातुजन्यबोधविषयसकलव्यापारप्रतियोगिकप्रागभावाधिकरणत्वस्य तादृशकालपूर्वकाले एव सत्त्वेन तादृशप्रागभावानधिकरणत्वमपि तत्र सुलभम्।

SGDF
Sri Gargeshwari Digital Foundation

भूतभविष्यद्भिन्नत्वं वा वर्त्तमानत्वम्। 'पचति' इत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति भवति लट्प्रयोगः।

प्रभा

अत्रापि यत्किञ्चित्क्रियाप्रतियोगिकप्रागभावाधिकरणत्वस्य तत्र काले सत्त्वेनाव्याप्तिपरिहाराय प्रागभावे यावत्क्रियाप्रतियोगिकत्वनिवेश इति।

प्रथमसम्बन्धेन द्विवादनमारभ्य चतुर्वादनपर्यन्तं जातपाकाधिकरणकालमादाय न दोषः, तदानीमुच्चरितधात्वधिकरणत्वाभावात्। धातूच्चारणाधिकरणे, तद्बोद्धव्यक्रियानधिकरणे च काले 'पचति' इति प्रयोगवारणाय द्वितीयः सम्बन्धः। भूतपाकक्रियामादाय उच्चारणाधिकरणकालपर्यन्तकालस्याधिकरणत्वतात्पर्येण पचतीतिप्रयोगवारणाय तृतीयः सम्बन्धः। एवं भविष्यत्पाकाधिकरणकालमवधीकृत्य उच्चारणकालं यावत् कालमादाय तादृशप्रयोगो मा भूदिति चतुर्थः सम्बन्धः।

क्वचिद् वर्तमानसामीप्यमपि लडाद्यर्थः, तच्च—धातुविशिष्टत्वम्, वैशिष्ट्यञ्च—स्वविशिष्टत्वम्, स्वविशिष्टत्वम्, एतदन्यतरसम्बन्धेन। आद्ये वैशिष्ट्यम्—स्वोच्चारणाधिकरणक्षणप्रागभावाधिकरणक्षणोत्पत्तिकक्रियाधिकरणत्वेन विवक्षितत्वम्, स्वोच्चारणाधिकरणक्षणप्रागभावाधिकरणक्षणप्रागभावाधिकरणक्षणोत्पत्तिकक्रियानधिकरणत्वम्, एतदुभयसम्बन्धेन। द्वितीये वै०—स्वोच्चारणध्वंसाधिकरणक्षणोत्पत्तिकक्रियाधिकरणत्वम्, स्वोच्चारणध्वंसाधिकरणक्षणध्वंसाधिकरणोत्पत्तिकक्रियानधिकरणत्वम्, एतदुभयसम्बन्धेन।

यदा कुतश्चिदागत्य स्थितः केनचित्पृष्टो ब्रवीति—'एष आगच्छामि' इति। तदा आङ्पूर्वकगम्-धातूच्चारणीभूतकालाव्यवहितपूर्वकाल एवागमनमिति विवक्षितम्। तथाचेत्थं लक्षणसमन्वयः—स्वविशिष्टत्वम्, इत्यत्र स्वो धातुस्तदुच्चारणाधिकरणीभूतो यः क्षणस्तत्क्षणप्रागभावाधिकरणं क्षणस्तदव्यवहितपूर्वक्षणस्तत्र तत्क्षणोत्पत्तिकागमनक्रियाधिकरणत्वेन विवक्षितत्वमस्तीति प्रथमसम्बन्धस्तत्र। प्रथमसम्बन्धवैशिष्ट्यनियामकद्वितीयसम्बन्धेऽपि स्वो धातुस्तदुच्चारणाधिकरणक्षणस्य यः प्रागभावस्तदधिकरणं य उच्चारणक्षणाव्यवहितप्राक्क्षण आगमनाधिकरणत्वेन विवक्षितस्तत्क्षणस्य प्रागभावाधिकरणीभूताः क्षणास्ततः पूर्ववर्तिनस्तत्क्षणोत्पत्तिकागमनक्रियानधिकरणत्वमपि तत्रास्ति। भविष्यत्कालिकगमनप्रश्ने 'एष गच्छामि' इत्युत्तरे द्वितीयस्वविशिष्टत्वमादाय लक्षणसमन्वयः। तथाहि—स्वो धातुस्तदुच्चारणध्वंसाधिकरणे उत्तरक्षणे उत्पत्स्यमाना या गमनक्रिया तदधिकरणत्वं तत्र। एवं स्वो धातुस्तदुच्चारणध्वंसाधिकरणक्षण उच्चारणक्षणाव्यवहितोत्तरक्षणस्तत्क्षणध्वंसाधिकरणक्षणास्तदुत्तरास्तत्रोत्पत्स्यमाना या गमनक्रिया तदधिकरणत्वमपि तत्र। आद्यस्योदाहारणम्—'कदाऽऽगतो भवान्'? 'एष आगच्छामि' इति। द्वितीयस्य 'कदा गमिष्यसि' इति प्रश्ने 'एष गच्छामि' इति। लाघवादाह—भूतभविष्यदिति—अत्र वाशब्दोऽनास्थायाम् (अनादरे) पूर्वोक्तापेक्षया अस्यैव गुरुत्वात्। किञ्चैवं भूतत्वादेरपि वक्तुं शक्यतया अन्योन्याश्रयाऽऽपत्तिः।

ननु भूतभविष्यद्भिन्नकालत्वमिति कथनेऽपि अन्योन्याश्रयः। भूतत्वं वर्तमानध्वंसप्रतियोगित्वम्, भविष्यत्त्वं च वर्तमानप्रागभावप्रतियोगित्वमिति भूतत्वादेरपि वर्तमानघटितत्वादिति चेन्न, अत्र वर्तमानत्वस्य प्रकृतप्रयोगाधिकरणघटिकाप्रहरादिकालवृत्तित्वरूपत्वात्। अधिश्रयणम्=चुल्ल्युपरि स्थापनम्। अधःश्रयणम्=ततोऽवतारणम्। तत्=वर्तमानत्वम्।

दर्पणव्याख्या

भूतक्रिययोरतिप्रसङ्गवारणाय क्रमेण पद(दल)द्वयम्। लक्ष्ये लक्षणं ग्राहयति—❀ पचतीति ❀। ❀ अधिश्रयणादीति ❀ साध्यत्वप्रकारकप्रतीतिविषयपूर्वापरीभूतावयवसमुदायस्यैव क्रियात्वादिति भावः।

❀ तदिति ❀ उक्तवर्त्तमानत्वमित्यर्थः। यद्यपि भाव-काल-कारक-संख्याश्चत्वारोऽर्था आख्यातस्येति निरुक्तभाष्यात्

SGDF

आत्माऽस्ति पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्त्तमानत्वमूह्यम् । उक्तं हि भाष्ये—"इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्" इति,

प्रभा

ननु व्यापारसमुदायः क्रिया। 'आत्माऽस्ति' 'पर्वताः सन्ति' इत्यादौ च सत्तारूपा क्रिया एकविधा। यथा पच्यादाववयवभूतव्यापाराणां वैलक्षण्याद् व्यापारसमूहरूपक्रियात्वम्। अत्र तु अवयववैलक्षण्याभावेन तदसम्भव इत्यत आह—आत्माऽस्तीति।

राज्ञामिति—इदमुपलक्षणम्—यस्य कस्यचित् क्रियायाः। प्राधान्यात्तु राज्ञामित्युक्तिः। तथाच राजादिक्रियायां वर्तमानत्वस्यानुभूयमानत्वेन साहचर्य्यात् आत्मपर्वतादिस्थितिक्रियायामपि तद्वैशिष्ट्येन वर्तमानत्वमुपपादनीयम्। यथा जीवस्य नित्यत्वेऽपि शरीरादेरनित्यत्वेन तदवच्छिन्नजीवस्यानित्यत्वम्। तथा आत्मसत्तादेरपीति भावः। राजादिक्रियायां प्रागभावप्रतियोगित्वस्य, ध्वंसप्रतियोगित्वस्य च सत्त्वादनित्यत्वेन तद्विशिष्टसत्ताया अपि अनित्यत्वमिति भावः। भूतत्वादिभेदेन भिन्ना राजस्थितिरात्मादिस्थितेर्भेदिका, इत्यत आत्मसत्ताया अपि क्रियात्वम्, कालत्रययोगश्चोपपद्यते। तिष्ठतेरिति—कालस्य क्रियारूपत्वाभिप्रायेण क्रियाः=राजादिक्रियाः, तिष्ठतेः=आत्मादिसत्तायाः कालिकसम्बन्धेनाधिकरणमित्यर्थः। तन्मात्रपरिणामः काल इति मते तु 'क्रियाः' इति पदेन क्रियापरिच्छेदकालस्यात्मस्थितौ आधेयतासम्बन्धेनारोपाद् वर्तमानादिकालावच्छिन्नत्वव्यवहारः।

दर्पणव्याख्या

क्रियातिरिक्तकालस्यैव वर्त्तमानत्वादिकं प्रतीयते, तथापि निरुपाधिकस्य तस्य वर्त्तमानत्वादिना प्रत्येतुमशक्यत्वादुपाधिभूतक्रियामादायैव तत्र तत्त्वस्य वक्तव्यतयाऽऽवश्यकत्वात् क्रियायामेव तत्त्वमुक्तमित्यवधेयम्।

वस्तुतस्तु दण्डमुहूर्त्ताद्यात्मकः खण्डकाल एव वर्त्तमानत्वादिना लडादिवाच्यः। तद्गतं वर्त्तमानत्वं च तत्तच्छब्दप्रयोगाधिकरणत्वमेव। 'तदादि'न्यायेन शब्दप्रयोगाधिकरणत्वेनानुगमाच्च न शक्त्यानन्त्यम्।

यद्येवमपि तत्तत्कालत्वेन तत्तत्कालबोधस्यानुभवसिद्धानुपपत्तिरिति विभाव्यते तदास्तु शब्दप्रयोगाधिकरणवृत्तिकालत्वव्याप्यधर्मत्वेनोपलक्षितत्तत्कालत्वावच्छिन्न एव लटः शक्तिः। क्रियारम्भात् पूर्वं समाप्त्युत्तरं चाधीते पचतीत्यादिप्रयोगापत्तिस्तु स्ववृत्तिप्रागभावाप्रतियोगिवृत्तित्व-स्ववृत्तिध्वंसाप्रतियोगिप्रकृतक्रियानुयोगिकत्वाभ्यां विशेषितेन आधेयतासम्बन्धेनान्वयनियमोपगमेन वारणीया।

यत्र तु अखण्डक्रियैव धात्वर्थस्तत्र शुद्धाधेयतासम्बन्धेनैव तदन्वयान्नाऽऽत्माऽस्तीत्यादौ दोष इति। ❀ भूतभविष्यद्भिन्नत्वं वा ❀ इत्यत्र वाकारोऽनास्थायाम्, पूर्वलक्षणापेक्षयाऽस्य गुरुत्वाद्भविष्यत्त्वस्यापि वर्त्तमानत्वघटितत्वेन तद्ग्रहे, भविष्यत्वग्रहः, भविष्यत्वग्रहे च तदवच्छिन्नभिन्नत्वरूपवर्त्तमानत्वग्रह इत्यन्योऽन्याश्रयाच्च। एवं भूतत्वमादायाप्यन्योन्याश्रयो द्रष्टव्यः।

ननु यत्र सत्ताश्रयत्वादीनां धात्वर्थत्वं तत्रागतिः, तेषामखण्डत्वेनावयवघटितोक्तलक्षणवर्त्तमानत्वासम्भवादत आह—❀ आत्माऽस्तीति ❀। ❀ अनित्यत्वादिति ❀ सावयवत्वेन प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वादित्यर्थः। ❀ तद्विशिष्टस्य ❀ अनित्यराजक्रियादिविशिष्टसत्तादिरूपार्थस्येत्यर्थः। तथाच केवलसत्तादिरूपार्थे तदसत्त्वेऽप्युक्तविशेषणविशिष्टे तस्मिन् विशेषणांशमादाय तत्सत्त्वं नानुपपन्नमिति भावः।

यद्वा तद्विशिष्टेत्यत्र तदा अव्यवहितत्वादनित्यत्वस्यैव परामर्शात् तादृशक्रियागतं वर्त्तमानत्वमारोप्य सत्ताद्यर्थको लडित्यर्थः। तत्र स्वोत्प्रेक्षितत्वं निरस्यति—❀ उक्तं हीति ❀। तिष्ठतेरधिकरणमिति ❀ आधेयतासम्बन्धेन तादृशक्रियात्मककालविशिष्टत्वात् (तस्य)तासामिति भावः। अनेन भाष्येण, वस्तुतस्त्वित्यादिना उक्तकल्पस्यैव साधुत्वं लभ्यते। तस्मिन्नुक्तलक्षणलक्षितकालस्यैव सर्वत्र क्रियायामाधेयतयान्वयलाभात्।

SGDF Sri Gargeshwari Digital Foundation

परतो भिद्यते सर्वमात्मा तु न विकम्पते ।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ॥

इति वाक्यपदीये च । एवम्, "तम आसीत्" "तुच्छेनाभ्यपिहितं यदासीत्" "अहमेकः प्रथममासम्, वर्त्तामि च, भविष्यामि च" इत्यादिश्रुतयोऽपि योज्याः ।

तच्च वर्त्तमानत्वादि लडादिभिर्द्योत्यते, क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादे-

प्रभा

तथाचोक्तं हरिणा—परत इति । सर्वम्—सर्वभावजातं पच्यादिरूपम् । परतः = वर्तमानत्वादिकालधर्मतः । भिद्यते—वर्तमानकालिकी भूतकालिकी भविष्यत्कालिकी सत्ता इत्येवं रूपेण भिन्नतया प्रतीयते । आत्मा = आत्मसत्ता तु न विकम्पते = परतः = वर्तमानत्वादिना न भिद्यते, आत्मादिकर्तृकसत्ताया नित्यत्वात्, व्यापारसमूहरूपक्रियात्वाभावाच्च । तस्मात् = स्वतो वर्तमानत्वादिना भेदाभावात् ।

पर्वतादिस्थितिः—आदिना आत्मस्थितेर्ग्रहणम् ।

पररूपेण = परस्य राजादेर्यत्क्रियारूपम्, तेन = तद्गतवर्तमानत्वादिना आत्मादिकर्तृकसत्ताऽपि भिद्यत इत्यर्थः । तमः = अविद्या = अज्ञानमिति यावत् । विरुद्धार्थोऽत्र नञ् विद्याविरुद्धेत्यर्थः । अविद्याया अनादित्वात् सर्वदा सत्त्वेन भूतत्वासम्भवः । तुच्छेन = अज्ञानेन, अभ्यपिहितम् = आवृत्तम् । एकः = अद्वितीयः । 'आसम्'—इत्यत्र भूतत्वम्, 'वर्तामि' अत्र वर्तमानत्वम्, 'भविष्यामि च' अत्र भविष्यत्वञ्च राजादिक्रियागतं भूतत्वादि आरोप्य राजादिक्रियासाहचर्य्याद्वा वर्तमानत्वादिकमुपपादनीयम् । यदुक्तं पूर्वं 'दशलकाराणामर्थः' इति तत्रार्थशब्दो द्योत्यार्थपर इत्याह—वर्तमानत्वादीति—वर्तमानकालादीत्यर्थः ।

ननु लडादीनां द्योतकत्वम् = स्वसमभिव्याहृतधातुनिष्ठशक्त्युद्बोधकत्वरूपम् । तथाच पच्यादिषु वर्तमानत्वादिनिरूपिता शक्तिः स्वीकार्य्येति त्वनन्तानां पच्यादिनिष्ठानुपूर्वीणां शक्तताविच्छेदकत्वे गौरवम् । अतः कतिपयप्रत्ययानां तिङादीनां वाचकत्वमेव युक्तमित्याशङ्कायामाह—क्रियासामान्येति । चिन्त्यमिदम्, तत्तद्धातूनां तत्तत्क्रियावाचकत्वेन क्रियासामान्यवाचकत्वस्य दुर्लभत्वात् । धातुत्वेन क्रियासामान्यवाचकत्वेऽपि क्रियासामान्ये वर्तमानत्वादेरनन्वयात् । यद्वा क्रियात्वव्याप्यधर्मावच्छिन्नवाचकस्येत्यर्थः । वाचकस्येति—अस्य धातोरिति शेषः । तद्विशिष्टे = वर्तमानत्वादिविशिष्टक्रियायाम् ।

दर्पणव्याख्या

❀ परतो भिद्यते इति ❀ । ❀ सर्वम् ❀ पच्यादिधात्वर्थसामान्यं परतः = स्वापेक्षया अन्येन वर्त्तमान वादिना । भिद्यते = व्यावर्त्यते । आत्मा तु इत्यत्रात्मादिपदमात्मसत्ताद्यर्थकम्, ❀ न विकम्पते ❀ सनातनत्वेन निरवयवत्वादुक्तविशेषणसम्बन्धाभावेन भेदानुमितिविषयो न भवतीत्यर्थः । तथाचाऽऽत्माऽस्तीति प्रयोगानुपपत्तिरिति पूर्वार्द्धार्थः । समाधत्ते—❀ तस्मादिति ❀ विशेषातिरिक्तपदार्थस्य स्वतो व्यावृत्तत्वासम्भवादित्यर्थः । पर्वतादीत्यादिनाऽऽत्मादिपरिग्रहः ।

❀ पररूपेणेति ❀ परस्य = राजक्रियादिरूपार्थस्य, रूपेण = धर्मेण वर्त्तमानत्वादिना भिद्यते इत्युक्त एवार्थः । ❀ तम इत्यादि ❀ तम आसीदित्यादयो भूतक्रियागतभूतत्वारोपात् । ❀ भविष्यामि चेति ❀ भाविक्रियागतभविष्यत्वारोपाच्च योज्या इत्यर्थः । पक्षद्वयस्यैवाऽऽकारूढतां प्रदर्शयन् प्रथमद्योतकत्वपक्षे उपपत्तिमाह—❀ तच्चेति ❀ । ❀ क्रियासामान्येति ❀ कालसामान्यवृत्तिक्रियावाचकस्येत्यर्थः ।

❀ तद्विशिष्टे ❀ वर्त्तमानकालादिविशिष्टे, वर्त्तमानत्वादिविशिष्टे वा व्यापारे इत्यर्थः । लडादेरित्यादिना लिडादिपरिग्रहः ।

SGDF

स्तात्पर्य्यग्राहकत्वेनोपयोगात् । अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव । अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम् ।

लिडर्थमाह—परोक्षे इति—"परोक्षे लिट्" (पा० सू० ३।२।११५) इति सूत्रात् । कालस्ता-

प्रभा

तात्पर्यग्राहकत्वेनेति—'स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वमेव द्योतकत्वम्' इति भावः । तेन धातुषु वर्तमानत्वादिनिरूपितशक्तिस्वीकारप्रयुक्तं गौरवमपि निरस्तम् ।

ननु 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इति न्यायविरोधाद् युगपद्वृत्तिद्वयेन बोधानुपपत्तिरिति चेन्न, विशिष्टे लक्षणास्वीकारे तन्न्यायाविषयत्वात्, 'गङ्गायां मीनघोषौ स्तः' इत्यत्र गङ्गापदेन युगपत् तटमीनयोर्बोधस्य सर्वानुभवसिद्धत्वेन युगपद्वृत्तिद्वयजन्यबोधयोर्विरोधे मानाभावाच्च । 'लडादयो वर्तमानत्वादिवाचका एव' इतिवादिनां मतमाह—अन्वयेति—नच वाचकत्वपक्षे 'येन नाप्राप्ते' इति न्यायेन सामान्यस्य=कर्त्रर्थस्य विशेषेण=वर्तमानत्वाद्यर्थेन बाधः, 'लः कर्मणि' इति सूत्रेण कर्तरि लकारविधानवैयर्थ्यापत्तेः, शक्तावच्छेदकभेदाच्च, लत्वेन कर्त्रादिवाचकताया लट्त्वादिना वर्तमानत्वादिवाचकतायाः स्वीकारात् । अन्यथा विध्याद्यर्थैरपि लिङादिस्थले बाधापत्तिः । अन्यथा=शक्तिग्राहकयोरन्वयव्यतिरेकयोस्सतोरपि द्योतकत्वस्वीकारे ।

वस्तुतस्तु वर्तमानत्वस्य लडादेर्वाच्यत्वे 'लः कर्मणि च' इति सूत्रेण कर्तरि लकारविधानसामर्थ्यात् 'तक्र' न्यायस्य विधेयविषय एव प्रवृत्तेर्भाष्यादिसम्मतत्वाच्च वर्तमानत्वाद्यर्थेन कर्त्राद्यर्थस्य बाधाभावेऽपि वाचकतापक्षे वर्तमानत्वादेः प्रत्ययार्थतया प्राधान्यापत्तिः, तद्वारणाय 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः' इति नियमे तदतिरिक्तत्वेन संकोचकल्पने गौरवाद् द्योतकतापक्ष एव ज्यायान् । अत एवाग्रे अपिघटितया 'इत्यपि पक्षान्तरम्' इत्युक्त्या ग्रन्थकृताऽरुचिः सूचिता । द्योतकत्वपक्षे 'प्रकृतिप्रत्ययौ' इति नियमे संकोचस्तु न, 'हेतुमति च' 'स्त्रियाम्' इत्यादिसूत्रस्थभाष्यप्रामाण्यात्, लोके द्योत्यार्थस्य विशेषणत्वदर्शनाच्च तादृशनियमस्य वाच्यार्थविषयकत्वस्यावश्यकत्वात् । तद्रूपम्=वर्तमानत्वादिरूपम् । लडादीति—तिबादीनामपि आरोपितलट्त्वलिट्त्वादिनैव वर्तमानत्वादिवाचकत्वम् । अत एव 'यजेत' इत्यत्रास्ति अंशद्वयम्—आख्यातत्वम्, लिङ्त्वञ्च । आख्यातत्वेन दशलकारस्थेनार्थी भावना=क्रियारूपा तिङा उच्यते, लिङ्त्वेन च पुरुषप्रवृत्त्यनुकूलव्यापारविशेषरूपा शाब्दी भावना उच्यते, इति मीमांसकोक्तिः संगच्छते ।

वस्तुतस्तु तिबादिवृत्त्यानुपूर्वी एव वाचकताऽवच्छेदिका, लट्त्वादिना अज्ञानेऽपि बोधस्य सर्वानुभवसिद्धत्वात् । शबादिसमभिहारश्च बोधविशेषनियामक इति न दोषः ।

परोक्षे लिडिति—गतरात्रेर्निशीथादूर्द्ध्वम् आगामिरात्रेर्निशीथात्पूर्वो यावान् कालः सोऽद्यतनपदेनोच्यते । तद्भिन्नभूतकालवृत्तिः परोऽक्षा या क्रिया तद्वाचकाद्धातोर्लिडित्यर्थकात् 'परोक्षे लिट्' इति सूत्रादित्यर्थः । द्योतकत्वपक्षे इदम् । वाचकत्वपक्षे तु तादृशकाले वाच्ये लिडित्याद्यर्थः ।

दर्पणव्याख्या

❀ उपयोगादिति ❀ स च प्राक् प्रतिपादितः । तथाच लडाद्यादेशत्वेन तिबादीनां वर्त्तमानत्वादिद्योतकत्वान्न 'अपाक्षीत्' इत्यादौ वर्त्तमानक्रियाप्रतीतिः, क्रियासामान्यशक्तधातोस्तत्तद्विशिष्टे लक्षणयैव तत्तद्विशिष्टक्रियाबोधोपपत्तौ पृथग्वर्त्तमानत्वादौ तेषां शक्तिकल्पने गौरवादिति भावः । वाचकत्वपक्षमवलम्ब्याऽऽह ❀ अन्वयव्यतिरेकाभ्यामित्यादि ❀ ।

नच 'तक्रकौण्डिन्य'न्यायात् कर्त्राद्यर्थबाधः, शक्ताऽवच्छेदकभेदात् । किञ्चैवं "लः कर्मणि" इति सूत्रं निरवकाशं स्यात्, स्थलान्तरेऽपि विध्याद्यर्थैर्बाधसम्भवादिति भावः । ❀ अन्यथा ❀ अन्वयव्यतिरेकयोः शक्त्यग्राहकत्वे । ❀ विलोपापत्तिरिति ❀ सर्वत्र प्रकृत्यैव तत्तत्प्रत्ययार्थत्वाभिमतबोधसम्भवादिति भावः । अधिकं सुबर्थनिर्णये वक्ष्यते ।

वदद्यतनानद्यतनभेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्रूपः। तत्रानद्यतने भूते परोक्षे लिडित्यर्थः। तेनाद्यतने भूते, अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वञ्च-'साक्षात्करोमि' इत्येतादृशविषयताशालिज्ञानाविषयत्वम्।

नच "क्रिया नामेयमत्यन्तापर(रि)दृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति भाष्यात् तस्या अतीन्द्रियत्वेन 'परोक्षे' इत्यव्यावर्त्तकमिति शङ्क्यम्,

प्रभा

अनद्यतन इति विशेषणत्रिकस्य क्रमेण फलमाह—अनद्यतन इति—अनेनाद्यतनस्य, भूते इत्युक्तेर्भविष्यतः, परोक्षे इत्युक्त्या अपरोक्षस्य च व्यावृत्तिः। ननु परोक्षत्वं यदि 'प्रत्यक्षप्रमाणान्यप्रमाणजन्यज्ञानविषयत्वम्' तदा प्रत्यक्षक्रियाया अपि शाब्दज्ञानविषयत्वे, अनुमितिविषयत्वे वा 'पपाच' इत्यादिप्रयोगापत्तिरत आह—परोक्षत्वञ्चेति। एतादृशेति—विषयताया एतादृशत्वासम्भवादेतादृशशब्दबोध्येत्यर्थः।

नन्वेवमपि यत्र कस्यापि 'पाकं साक्षात्करोमि' इति ज्ञानं जातं तत्र 'पपाच' इति प्रयोगानुपपत्तिः, उक्तज्ञानविषयत्वादिति चेन्न, लिडाद्यन्तशब्दप्रयोक्तृसमवेत (साक्षात्करोमि) इत्येतादृशविषयताशालिज्ञानाविषयत्वस्यैव परोक्षत्वात्, वक्तुस्तादृशज्ञानाविषयत्वस्यैव लिडादिप्रयोजकत्वात्। इयमिति—पचतीतिव्यवहारविषयीभूतेत्यर्थः। अनुमानगम्येति शेषः। अत्यन्तेति—परेण = चक्षुरादिरूपप्रत्यक्षप्रमाणेनात्यन्तमदृष्टा। 'अपरिदृष्टा' इति पाठे प्रत्यक्षाविषय इत्यर्थः। तत्र हेतुगर्भितविशेषणमाह—पूर्वेति—पूर्वापरीभूतावयवा = क्रमिकव्यापारसमूहात्मिका। नन्वेवमपि प्रत्यक्षे बाधाभाव इत्याशङ्कायामाह—न शक्येति—अवयवानामाशुविनाशित्वात् पिण्डीभाव (समूहीभाव) स्यैवाभावादिति भावः। ननु तर्हि तादृशक्रियायाः सत्त्वे किं मानमिति चेन्न, विच्छित्त्यादिरूपकार्य्यानुमेयत्वात्। अव्यावर्तकमिति—क्रियायां परोक्षत्वस्य व्यभिचाराभावेन 'सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्' इति न्यायविरोधादिति भावः। शङ्क्यमिति—नच शङ्क्यमित्यर्थः।

दर्पणव्याख्या

❀ अनद्यतने भूते इति ❀ "भूते" (पा० सू० ३।२।८४) इति, "अनद्यतने लङ्" (पा० सू० ३।२।१११) इति सूत्राभ्यां तत्तत्पदानुवृत्तेरिति भावः। ❀ न लिट्प्रयोग इति ❀ उक्तार्थस्य बाधात् पपाचेत्यादिजबोधानन्तरमनद्यतनत्वादिसन्देहानुदयाद् भूतत्वादिवत्तयोरपि तद्वाक्यजबोधे क्रियांशे विशेषणतया भानमभ्युपेयम्। तच्च वाचकतां द्योतकतां वा विनाऽनुपपन्नमिति लिटस्तदभ्युपगम आवश्यक इति भावः।

ननु परोक्षत्वं प्रत्यक्षान्यज्ञानविषयत्वम्। तथाच प्रत्यक्षक्रियायामपि श्रुतानुमितत्वयोः सत्त्वात् पपाचेत्यादिप्रयोगापत्तिरत आह— ❀ परोक्षत्वञ्चेति ❀ यथाश्रुतप्रत्यक्षाविषयत्वस्योपनीतक्रियायामभावेन तत्र पपाचेत्यादिप्रयोगानुपपत्तिरत आह—❀ साक्षात्करोमीति ❀ साक्षात्करोमीत्येतत्प्रतीतिसाक्षिकलौकिकविषयत्वाभाववत्त्वमित्यर्थः।

उक्तस्थले प्रत्यक्षविषयतासत्त्वेऽपि तादृशविलक्षणविषयत्वाभाववत्त्वमक्षुण्णमिति न तदनुपपत्तिः। प्रत्यक्षं तादृशशब्दप्रयोक्तुर्ग्राह्यम्। ननु 'दशमस्त्वमसि' इत्यादौ शब्दादप्यपरोक्षज्ञानस्य दृष्टत्वेन शब्दजन्यतादृशज्ञानविषयेन्द्रियासम्बन्धक्रियायां लिडनुपपत्तिरिति चेन्न, तत्रापि शाब्दज्ञानसहकृतमनसैव दशमसाक्षात्कारः, ननु शब्दात्, लौकिकविषयतानियामकेन्द्रियसंयोगादेरभावेन शाब्दे तद्वत्त्वासम्भवात्। अत एव 'तत्त्वमसि' इत्याद्याचार्य्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने कारणमिति गीताभाष्ये उक्तमिति सर्वं समञ्जसम्।

"क्रिया नामेयम्" इति भाष्ये साऽसावनुमानगम्येति शेषः। ❀ क्रिया ❀ साध्यत्वेन प्रतीयमाना। ❀ इयम् ❀

पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवयवशः 'साक्षात्करोमि' इति प्रतीतिविषयत्वसम्भवात्। अन्यथा 'पश्य मृगो धावति' इत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति।

प्रभा

अवयवश इति—एकैकावयवस्येत्यर्थः। 'सङ्ख्यैकवचनाच्च वीप्सायाम्' इति वीप्सायां षष्ठ्यन्ताच्छस्। अन्यथा = क्रियाया एकैकावयवस्यापि साक्षात्कारानभ्युपगमे। ननु सदसदात्मकावयवसमूहरूपा क्रिया यथा प्रत्यक्षाविषयः,तथा क्रियाऽवयवा अपि प्रत्यक्षाविषया एव। अवयवानामपि समूहात्मनैव धातुवाच्यत्वम्। इन्द्रियग्राह्यत्वमपि सतामेव, ननु सदसदात्मनाम्। उक्तञ्च वाक्यपदीये—

'क्रमात् सदसतां तेषामात्मना न समूहिनः।
सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः' ॥ इति।

क्रमात् = पौर्वापर्य्यतः। पूर्वावयवस्य सत्त्वे परावयवस्यासत्ता। परावयवसत्त्वे पूर्वस्यासत्तेत्येवं क्रमतः सदसतां तेषाम् = अवयवानाम् आत्मना = स्वरूपतः सद्विषयैश्चक्षुरादिभिः समूहिनः = अवयवाः सम्बन्धं न यान्तीत्यर्थः। ननु माऽस्तु सदसतां चक्षुर्विषयत्वम्, सतोरवयवस्य चक्षुर्विषयत्वं स्यादिति चेन्न, समूहत्वेनैव धातुवाच्यतया समूहस्य च प्रत्यक्षाविषयत्वतादवस्थ्यादित्याशङ्क्याऽऽह—अवयवश इति।

वस्तुतस्तु अवयवा अपि समूहत्वेन स्वरूपतश्च प्रत्यक्षज्ञानाविषया एव। अत एव 'परोक्षे' 'इत्यव्यावर्तकम्' इति, 'अस्ति वर्तमानः कालः परन्त्वादित्यगतिवन्नोपलभ्यते' इति भाष्यम्, 'अत्यन्तापरदृष्टा' इति च भाष्यं संगच्छते। अन्यथा आदिकर्मणि अवयवगतातीतत्वस्य समूहे आरोपेण 'प्रकृतः कटं सः' इत्यादौ निष्ठाविधानवत्, अवयवगतप्रत्यक्षत्वस्य समुदाये आरोपस्थले 'परोक्षे' इत्यस्य चारितार्थ्येन भाष्यासङ्गतिः स्पष्टैव। तस्मादवयवा अपि अप्रत्यक्षा एवेति भाष्यसम्मतम्। प्रतिभातीति—अवयवानामपि प्रत्यक्षाविषयत्वमेवेतिवादिनये तु 'पश्य मृगो धावति' इत्यादिस्थले दृशिर्ज्ञानसामान्यार्थे इति 'पश्य' इत्यस्य 'अनुमिनु' इत्यर्थः। यद्वा धावतिरत्र उत्तरदेशसंयोगरूपफलपर एव। संयोगस्य च प्रत्यक्षत्वे कस्यचिद्विरोधाभावेन न कर्मत्वानुपपत्तिः।

दर्पणव्याख्या

• पचतीत्यादिव्यवहारविषयीभूता, यतः पूर्वापरीभूता = क्रमिकानेकव्यापारसमूहात्मिका, अतोऽत्यन्तापरदृष्टा = परेण = प्रत्यक्षप्रमाणेनात्यन्तमदृष्टा = तज्जन्यज्ञानाविषया इति यावत्। ❀ पिण्डीभूतेति ❀ अवयवानामाशुविनाशित्वेन पिण्डस्यैवाभावादिति भावः। ननु तर्हि तस्यां किं प्रमाणमत आह—❀ साक्षादिति ❀ विक्लित्यादिरूपकार्यानुमेयेति। ❀ अन्यथेति ❀ क्रियाया अवयवशोऽपि साक्षात्कारानभ्युपगम इत्यर्थः। ❀ प्रतिभातीति ❀ उक्तार्थ एवास्मद्बुद्धिविषयो भवतीत्यर्थः।

ननु क्रियाऽवयवा अपि क्रियावदतीन्द्रिया एव। यथा पचेरुदकसेचनादयोऽवयवास्तथा तेषामप्यवयवास्तेऽपि समूहरूपेणैव धातुवाच्याः। यस्तु क्षणावच्छिन्नस्तद्रूपोऽवयवः स तु न धातुवाच्यः, किन्त्ववयवसमूहाऽऽत्मनैव। आश्रितक्रमरूपत्वात्तद्वाच्यस्य। एवञ्च सदसद्रूपा क्रिया न सद्विषयेन्द्रियग्राह्या। तदुक्तम्—

क्रमात् सदसतां तेषामात्मना न समूहिनः।
सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः ॥ इति।

अत्यन्तापरदृष्टेति भाष्यस्याप्यवयवरूपेण समूहात्मना चादृष्टेत्येवार्थः। अत एव "वर्त्तमाने लट्" इति सूत्रे भाष्ये, "अस्ति वर्त्तमानो कालः, परन्त्वाऽऽदित्यगतिवन्नोपलभ्यते" इत्युक्तम्, तस्य प्रत्यक्षेणेति शेषः।

एवञ्च वर्त्तमानत्वाक्रान्तक्रियाणां स्पष्टमेवाप्रत्यक्षत्वं तत उपलभ्यते। पश्य मृगो धावतीत्यादौ तु दृशिर्ज्ञानार्थकः,

SGDF

व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः। 'अयं पपाच' इत्याद्यनुरोधाद् व्यापाराविष्टानामित्यपि वदन्ति।

कथं तर्हि "व्यातेने किरणावलीमुदयनः" इति, स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत्, असङ्गतमेव, व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि (बहुतरमनःप्रणिधानसाध्यशास्त्रार्थ-

प्रभा

मतान्तरमाह—व्यापाराविष्टानामिति—इन्द्रियागोचरसाधनसाधितानद्यतनक्रियावाचिनस्तु धातोर्लिडित्यर्थाद् व्यापारकाले कर्तुरदृष्टत्वे लिटः साधुत्वमिति भावः। अयं पपाचेति—'पपाच' इति प्रयोगकाले पाककर्तुः प्रत्यक्षत्वेऽपि पाककालविशिष्टकर्तुः परोक्षत्वमबाधितमेवेति भावः। तथाच व्यापाराविष्टानामिति विशेषणस्य फलमिदमेव। यद्यपि समूहतोऽवयवतश्च क्रियाया अप्रत्यक्षत्वे तद्विशिष्टसाधनानां प्रत्यक्षत्वं दुरुपपादम्, तथापि व्यापारवैशिष्ट्यसमये साधनपरोक्षत्वस्य विवक्षितत्वान्न दोषः। कथमिति—स्वकर्तृकक्रियायाः परोक्षत्वासम्भवात् लिडनुपपत्तिरिति भावः। व्यासङ्गेति—मनसो विषयान्तरसंचारो व्यासङ्गः। आदिपदेन मद्यादिजन्यविकारस्य संग्रहः। साध्येति—अस्य निर्णयेऽन्वयो रचनायां वा। बहुतरेत्यारभ्य ग्रन्थ इत्यन्तभागो लिखितपुस्तके नोपलभ्यते। तादृशपाठे व्यासङ्गो वक्तुमशक्य इति 'परोक्षत्वोपपादनेऽपि' इति ग्रन्थासङ्गतिरिति पञ्चोलिनः।

दर्पणव्याख्या

धावतिर्वा फलपर इति न कश्चिद्दोषः। किञ्च अवयवस्य प्रत्यक्षत्वे प्रकृतः कटमित्यादावावयवातीतत्वेन समुदायातीतत्वमादाय क्वाद्युपपादनवदवयवप्रत्यक्षत्वेन समुदायप्रत्यक्षत्वमादाय 'परोक्षे' इत्यस्य चारितार्थ्ये भाष्यस्थपूर्वपक्षस्य निर्दलत्वापत्तिरित्यपरितोषान्मतान्तरमाह—❀ व्यापाराविष्टानामिति ❀ एवञ्चातीतानद्यतनव्यापाराविष्टपरोक्षकर्तृकक्रियावृत्ताद्धातोर्लिडिति "परोक्षे लिट्" (पा० सू० ३।२।११५) इति सूत्रार्थः।

❀ अयं पपाचेति ❀ तदानीं कर्तुरपारोक्ष्येऽपि व्यापारदशायां पारोक्ष्यसत्त्वादुक्तप्रयोगोपपत्तिरिति भावः। ❀ इत्यपि वदन्तीति ❀ मतान्तरानादरे अत्रापिः, पूर्वोक्तार्थस्याऽऽपातरमणीयत्वं मन्वाना भाष्याऽनुसारिण इति शेषः।

अत्राहुर्नैयायिकाः—पूर्वाऽपरीभूताऽवयवसमुदायात्मकपारिभाषिकक्रियाया अप्रत्यक्षत्वं युक्तमेव, समूहस्यैवाभावात्, पिण्डीभूतेति भाष्यस्वारस्येन समूहस्यैव तत्त्वावगतेश्च। तदवयवानामपि पारोक्ष्यं तु सर्वानुभवविरुद्धम्, तत्र प्रत्यक्षकारणचक्षुःसंयुक्तसमवायादेः सत्त्वात्। अन्यथा घटपुस्तकादेरप्यप्रत्यक्षत्वाऽऽपत्तिरिति बहुव्याकोपः। अधिश्रयणं साक्षात्करोमीति सार्वजनीनप्रतीतेश्च। प्रतीतेः पदार्थासाधकत्वे व्यवहारमात्रोच्छेदाऽऽपत्तिश्च। "क्रिया नामेयम्" इति भाष्यस्यापि इयम् = सावयवपच्याद्यर्थरूपेत्यर्थान्न तद्विरोधः। सदसतां तेषामित्यस्य विद्यमानाविद्यमानावयवरूपाणामित्यर्थात् समूहात्मकक्रियायाः पारोक्ष्यप्रतिपादनपरत्वान्न हरिवाक्यविरोधोऽपि। अन्यथा 'क्रिया सदसद्रूपा' इति वदतो व्याघातः स्पष्ट एव।

कालस्य प्रत्यक्षत्वाभावेन तदनुवादकभाष्योपष्टम्भन्यासोऽपि नावयवानां पारोक्ष्योपपादकः। प्रकृतः कटमित्यत्राप्यवयवातीतत्वमादायैव प्रयोगोपपत्तौ समुदायातीतत्वारोपे मानाभावेन तद्दृष्टान्तासङ्गतिश्च। दार्ष्टान्तिकेऽवयवप्रत्यक्षत्वेन समुदायप्रत्यक्षत्वमारोप्य पूर्वपक्षस्य निर्दलत्वापादानमपि स्वाग्रहमूलकमेव। अत एव भाष्ये पश्य मृगो धावतीत्यनेन लौकिकविषयताशालयर्थकदृशिकर्मत्वं धावतेः प्रतिपादितम्। कथमन्यथा आगारान्तरस्थितस्य न तादृशप्रयोगः। मृगकर्तृकधावने ज्ञानविषयत्वरूपज्ञानकर्मत्वाऽबाधात्। धावतेः संयोगरूपफलार्थकत्वे व्यापारवाचकत्वाभावादधातुत्वप्रसङ्गश्च। स्वजनकव्यापारगतपौर्वापर्यारोपेण क्रियात्वोपपादने चाप्रत्यक्षत्वापत्तिस्तदवस्थैवेति न किञ्चिदेतत्। तस्मात् पूर्वोक्तमतमेव निराबाधम्। अत एव ग्रन्थकृताऽपि 'अपि-वदन्तिभ्यां तत्रास्वरस एव सूचित इति। ❀ व्यासङ्गादिनेति ❀ यथा "मत्तोऽहं किल विलपामि" इत्यत्र मदादिना मनोऽसन्निधानात् क्रियापारोक्ष्यं तद्वदित्यर्थः।

Sri Gargeshwari Digital Foundation

निर्णयजनकशब्दरचनात्मके ग्रन्थे) अनद्यतनत्वातीतत्वयोर्विस्तारक्रियायामसत्त्वेन अनद्यतनातीतत्वयोरभावेन तदर्थकलिडसम्भवात् ।

लुडर्थमाह—श्वो भाविनीति । अनद्यतने भाविनीत्यर्थः, "अनद्यतने लुट्" (पा० सू० ३ । ३ । १५) इति सूत्रात् । यथा "श्वो भविता" इत्यादौ ।

प्रभा

अनद्यतनेति—किरणावलीग्रन्थकर्मकविस्तारानुकूलव्यापारावच्छिन्नकाले अद्यतनभिन्नत्वस्यातीतत्वस्य (भूतत्वस्य) चासम्भवादिति भावः ।

वस्तुतस्तु क्रियावयवानामपि सावयवत्वात् सर्वाऽपि क्रिया परोक्षैव । अवयवसमुदायरूपक्रियायाः सद्वस्तुत्वासम्भवेन प्रत्यक्षत्वस्य च सद्वस्तुत्वनियतत्वात् । तदुक्तं हरिणा—

'क्रमात् सदसतां तेषामात्मना न समूहिनः ।
सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः' ॥ इति ॥

अत एव 'अत्यन्तापरदृष्टा' इति भाष्येऽत्यन्तेतिपदस्वारस्यम् । तात्त्विकं परोक्षत्वन्तु न लिडादेः प्रयोजकम्, किन्तु विवक्षैव तत्तत्प्रयोगप्रयोजिका । 'अध्यास्त सर्वर्तुसुखामयोध्याम्' इत्यादिभट्टीप्रयोगकाले परोक्षत्वादेः सत्त्वेऽपि न लिट्, किन्तु लङेव । एवञ्च 'व्यातेने किरणावलीमुदयनः' इति प्रयोगोऽप्युपपद्यते । अत्र शीघ्रतया, अनायासेन च रचितत्वप्रतीतये भूतानद्यतनत्वविवक्षायाः 'एतावता सूक्ष्मकालेन निर्मास्यामि यत्र मयापि साक्षात्कर्तुमशक्यम्' इति ज्ञानफलकपारोक्ष्यविवक्षायाश्च तात्पर्यविषयत्वसम्भवात् सङ्गतत्वमेव तस्य प्रयोगस्य । एवमत्यन्तापह्नवेऽपि लिट्, 'अत्यन्तापह्नवे लिड्वक्तव्यः' इति वचनात् । अत्रापह्नवश्च—'प्रष्टव्यविषयकनिश्चयोत्पत्तिप्रतिबन्धकज्ञानजनकशब्दप्रयोगः' । तत्रात्यन्तत्वञ्च—प्रष्टव्यविषयविपरीतकथनाभावेऽपि प्रष्टव्यविषयोपपादकाद्विपरीतार्थकथनम् । तथाच कलिङ्गेषु—

'जगन्नाथात्पूर्वभागे कृष्णातीरान्तरं शिवे । कलिङ्गदेशः सम्प्रोक्तः',

इत्युक्तदेशेषु त्वमवात्सीः, इति प्रश्ने प्रष्टव्यविषयस्य वासस्य निषेधाभावेऽपि वासोपपादकगमननिषेधाभिप्रायेण 'नाहं कलिङ्गान् जगाम' इत्युक्तिः ।

श्वो भाविनीति—अत्र श्वःपदमनद्यतनपरम्, लक्षणया । तथाचानद्यतने भविष्यति काल इत्यर्थः । भविष्यत्त्वञ्च—'वर्तमानप्रागभावप्रतियोगित्वम्' । अनद्यतनत्वञ्च—'अद्यतनभिन्नकालवृत्तित्वम्' । अद्यतनकालश्च—'अतीताया रात्रेः पश्चार्द्धेन, आगामिन्या रात्रेः पूर्वार्द्धेन च सहितो दिवस एव ।

दर्पणव्याख्या

❀ लिडसम्भवादिति ❀ । अत्रेदं चिन्त्यम्—न वास्तवं पारोक्ष्यादि लिडादिनियामकम्, 'अध्यास्त सर्वर्तुसुखामयोध्याम्' इत्यत्र लङोऽसाधुतापत्तेः । किन्तु वैवक्षिकं तत्, तथा वक्ष्यति च स्वयमेव सारकृत्—'अनद्यतनभूतत्वेन विवक्षिते लङ्, तत्रैव पारोक्ष्यविवक्षायां लिट्' इति । प्रकृते चाऽनायासनिष्पन्नत्व-शीघ्रनिष्पन्नत्व-प्रतीतिफलकभूतानद्यतनत्वविवक्षायाः, एवं सूक्ष्मकालेन करिष्यामि यत्र काले मयाऽपि साक्षात्कर्तुमशक्यमिति प्रतीतिफलकपारोक्ष्यविवक्षायाश्च सत्त्वाल्लिडुपपत्तिसम्भवादिति ।

❀ अनद्यतन इति ❀ अतीतान्यवहितरात्रिपश्चार्द्धविशिष्टाऽऽगामिरात्रिपूर्वार्द्धोपेतं दिनमद्यतनम्, एतद्भिन्नकालत्वमनद्यतनत्वमिति वृत्तिकारादयः । कैयटस्तु-लुङ्सूत्रेऽतीतरात्रेरन्त्ययामेनाऽऽगामिरात्रेराद्ययामेन सहितो दिवसोऽद्यतन इत्यूचे ।

अत्रेदमवधेयम्—अनद्यतनभूते यदा भूतत्वमात्रविवक्षा तदा लङेव । तेन ह्योऽपाक्षीदित्यादौ भूतत्वमात्रविवक्षायां लुङि, पश्चाद् ह्यःपदेन सम्बन्धे नाद्यतनत्वप्रतीतिरिति न लुङोऽसाधुता । एवमनद्यतनभविष्यति भविष्यत्त्वमात्रविवक्षया लृट् । श्वो यक्ष्यमाणे—'देवता यक्ष्यति' इत्यत्र पश्चाद्धयनद्यतनत्वप्रतीतिरिति ॥

लडर्थमाह—भविष्यतीति। भविष्यत्सामान्ये इत्यर्थः, "लृट् शेषे च" (पा० सू० ३।३।१३) इति सूत्रात्। यथा "घटो भविष्यति" इत्यादौ। तत्त्वञ्च—वर्त्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्।

प्रभा

भविष्यत्सामान्य इति—तत्त्वञ्च—'अद्यतनत्वानद्यतनत्वप्रकारकप्रतीत्यविषयभविष्यत्त्वम्। एवं भूतसामान्यत्वमपि अद्यतनत्वानद्यतनत्वप्रकारकप्रतीत्यविषयभूतत्वरूपं बोध्यम्। लृट् शेषे चेति—उक्तादन्यः शेषः, प्राक् 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्युक्तम्। तथाच शेषे=क्रियार्थायां क्रियायामसत्याम्, चशब्दात् तादृशक्रियायां सत्याञ्च भविष्यति लडित्यर्थात्। घटो भविष्यतीति—'घटाभिन्नाश्रयवृत्तिर्वर्तमानप्रागभावप्रतियोगिसमयावच्छिन्न उत्पत्त्यनुकूलो व्यापारः' इति बोधः। क्रियागतं भविष्यत्त्वमाह—वर्तमानेति—वर्तमानो यो ध्वंसः तत्प्रतियोगी यः समयस्तदधिकरणकोत्पत्तिमत्क्रियात्वमित्यर्थः।

ननु कियत्यामधिश्रयणादिक्रियायां जातायामवशिष्टफूत्कारादिव्यापाराभिप्रायेण पचतीति प्रयोगो यथा भवति, तथा यत्किञ्चित् क्रियाया भविष्यत्त्वमादाय 'पक्ष्यति' इति प्रयोगापत्तिः। नच पाकत्वावच्छेदेन भविष्यत्त्वान्वयस्य विवक्षितत्वान्न दोषः, अतीतपाकस्यापि पाकत्वावच्छिन्नत्वेन पाकत्वावच्छेदेन तदन्वयासम्भवात्। नच तत्पाकत्वावच्छेदेन भविष्यत्त्वान्वयविवक्षेति वाच्यम्, पचतिना तत्पाकत्वावच्छिन्ने शक्त्यभावेन तत्पाकत्वेनानुपस्थितेः। नच तादृशपाके लक्षणा, गौरवापत्तेरिति चेन्न, तत्तत्क्रियाबोधजनकत्वप्रकारकतात्पर्यविषयीभूतधातुसमभिव्याहृतलडादिना भविष्यत्त्वप्रकारकबोधम्प्रति तत्तत्क्रियाद्यावयवकव्यापारविशेष्यकवर्तमानप्रागभावप्रतियोगित्वप्रकारकज्ञानस्य सहकारिकारणत्वस्वीकारेणादोषात्, कियत्क्रियायां जातायाम् 'पाकक्रियाया आद्यो व्यापारः वर्तमानप्रागभावप्रतियोगी' इति ज्ञानासम्भवेन तादृशप्रयोगानापत्तेः। भ्रमात्मकज्ञानसत्त्वे चेष्टापत्तेः।

दर्पणव्याख्या

परे तु साङ्ग्यागस्य द्व्यहात्मककालसाध्यत्वात्तदधिकरणद्व्यहात्मककालस्यानद्यतनत्वाभावेन लुटोऽनवसराल्लडुपपत्तिः। 'अद्य प्रभृति मे दाश ! ब्रह्मचर्य्यं भविष्यति' इतिवदित्याहुः।

ननु 'अहमेकः प्रथममासं वर्त्तामि भविष्यामि च' इत्यत्र धात्वर्थसत्तायां वर्त्तमानप्रागभावप्रतियोगित्वस्य भविष्यत्त्वस्य बाधात् तदर्थकाद्भविष्यदर्थकप्रत्ययाप्रसक्तिरत आह ❀ तत्त्वञ्चेति ❀ वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकसमयवत्त्वमिति पाठः। तथाच तदर्थव्यापाराधिकरणस्य कालस्यानित्यराजक्रियाऽऽद्यात्मकस्य वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वसत्त्वात् तदादायैव लडुपपत्तिरिति यथाश्रुतार्थानुसारिणः।

अन्ये तु-ननु येषां मते नश्यत्यादिधातूनां नाशमात्रमर्थस्तेषां भविष्यत्त्वस्य वर्त्तमानप्रागभावप्रतियोगित्वरूपत्वे, श्वो भाविनाशके परश्वो नङ्क्ष्यतीति प्रयोगापत्तिः, वर्त्तमानप्रागभावप्रतियोगिनि तन्नाशे परश्वस्तनकालवृत्तित्वसत्त्वात्।

नच परश्वस्तनकालस्य भविष्यत्त्वघटकप्रागभावेऽन्वयाभ्युपगमात् तस्य च तत्प्रागभावे बाधान्नोक्तप्रयोगापत्तिरिति वाच्यम्, तथा सति श्वो भाविनाशकेऽपि 'श्वो नंष्टा' इति प्रयोगानुपपत्तिः। तन्नाशप्रागभावे श्वस्तनकालसम्बन्धबाधादत आह—❀ तत्त्वञ्चेति ❀ अत्र समयपदोपादानं कालो लडाद्यर्थ इत्यभिप्रेत्य, ननु तस्य लक्षणे निवेशः, प्रयोजनाभावाद् विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वस्यैव सम्यक्त्वात्। यत्र तूत्पत्तिरेव धात्वर्थस्तत्र तदघटितमेव तन्निर्वक्तव्यम्, अन्यथोत्पत्तेर्द्वैधा भानप्रसङ्गात्। एवञ्चोक्तस्थले भविष्यत्त्वघटकोत्पत्तौ परश्वस्तनकालवृत्तित्वबाधान्नोक्तप्रयोगापत्तिरितीत्थमवतारयन्ति। नश्यत्यादीनां फलव्यापारोभयार्थकत्ववादिनान्तु व्यापारे वर्त्तमानप्रागभावप्रतियोगित्वाबाधान्नानुपपत्तिरिति प्रागेवोक्तम्।

SGDF Sri Gargeshwari Digital Foundation

लेडर्थमाह—विध्यादाविति, "लिङर्थे लेट्" [पा० सू० ३ । ४ । ७] इति सूत्रात् । लिङर्थश्च विध्यादिरिति वक्ष्यते ।

लोडर्थमाह—प्रार्थनेति । आदिना विध्याद्याशिषो गृह्यन्ते, "आशिषि लिङ्लोटौ" [पा० सू० ३ । ३ । १७३] "लोट् च" इति [पा० सू० ३ । ३ । १६२] सूत्राभ्यां तथाऽवगमात् । यथा—'भवतु ते शिवप्रसादः' इत्यादौ । एतयोरर्थो लिङर्थ एव, त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः ॥२२॥

लडादिक्रमेण ङितामर्थमाह—

ह्यो भूते प्रेरणादौ च भूतमात्रे लडादयः ।

प्रभा

विध्यादाविति—आदिना निमन्त्रणादीनां सङ्ग्रहः । विध्याद्याशिष इति—विधिर्वक्ष्यते । आशीश्च—'प्रयोक्तृसमवेतहितप्राप्तिविषयकेच्छारूपैव' । हितञ्च—स्वस्य, परस्य वा । इच्छायाश्च विषयतासम्बन्धेन लोडादिप्रकृतिभूतधात्वर्थेऽन्वयः । तथाच 'भवतु ते शिवप्रसादः' इत्यनेन वक्तृसमवेतहितप्राप्तिविषयकेच्छाविषयस्त्वत्सम्बन्धिशिवप्रसादकर्तृकं भवनमिति बोधः । एतयोः = लेड्लोटोः । त्रयाणाम् = लेड्लोड्लिङाम् । तन्निर्णयेन = लिङर्थनिर्णयेन । निर्णय इति—अस्य लेडाद्यर्थस्येति शेषः । ङितामिति—लकाराणामिति शेषः ॥ २२ ॥

ह्यो भूत इति—ह्यःपदमनद्यतनपरम् । तथाच ह्यो भूते = अनद्यतनभूते लङ् इत्यर्थः । अनद्यतनत्वम् = अद्यतनभिन्नत्वम् । अद्यतनत्वञ्च—'वर्तमानध्वंसप्रतियोगिरात्रिपूर्वार्द्धविशिष्टत्वे सति वर्तमानप्रागभावप्रतियोगिरात्रिपरार्द्धविशिष्टदिनत्वम्' । आद्ये वैशिष्ट्यम्—स्वाव्यवहितोत्तरत्वसम्बन्धेन, द्वितीये वै० स्वाव्यवहितपूर्वत्वसम्बन्धेन । प्रेरणादौ = विध्यादौ लिङ् । भूतमात्रे = भूतसामान्ये लुङ् । लडादय इति—आदिना लिङ्-

दर्पणव्याख्या

अत्रेदमवधेयम्—इहाद्य घटो भविष्यतीत्यादौ देशकालविशेषादेरधिकरणत्वेन धात्वर्थोत्पत्तावेवाऽन्वयः । ननु भविष्यत्त्वघटकप्रागभावे उत्पत्तिमति वा, तथा सति कपालनाशजन्यघटनाशस्थले, इह कपाले घटध्वंसो भविष्यतीति प्रयोगाऽऽपत्तेर्घटरूपप्रतियोग्यात्मकघटध्वंसप्रागभावस्य कपाले सत्त्वादेवं श्वो भाविन्यद्य भविष्यतीति प्रयोगप्रसङ्गश्च, अद्यतनकालवृत्तित्वस्य प्रागभावे सत्त्वात् । तथा भवने श्वः समुत्पद्य प्राङ्गणे परश्वो गमिष्यति मैत्रे प्राङ्गणे परश्वो भविष्यतीति प्रयोगाऽऽपत्तिः, उत्पत्तिमतो मैत्रस्य प्राङ्गणवृत्तित्वात् , परश्वस्तनकालवृत्तित्वाच्च । यथोक्ते तु तस्य परश्वस्तनकालवृत्तित्वेऽप्युत्पत्तेस्तत्कालवृत्तित्वान्न कश्चन दोषः । 'घटो भविष्यति' इत्यादौ उत्पत्त्यर्थकधातुयोगे उत्पत्त्यघटितभविष्यत्वस्यान्वयो लाघवात् , उत्पत्त्यघटिते तस्मिन्नेव मृदादेः शक्त्यभ्युपगमात्, उत्पत्तिघटितलक्ष्यार्थस्य तु 'नङ्क्ष्यति' इत्यादौ नाशेऽन्वयादन्यमतेऽपि नानुपपत्तिः । एवञ्च 'भविष्यति' इत्यादौ उत्पत्तेर्द्वैधाभानप्रसङ्गशङ्कापि न । शाब्दबोधस्त्वत्र वर्त्तमानप्रागभावप्रतियोग्युत्पत्त्यनुकूलो घटाश्रयको व्यापार इति वैयाकरणमते बोधः ।

❀ विध्याद्याशिष इति ❀ आशीस्तु सम्बोध्यहितविषयकलोडाद्यन्तशब्दप्रयोक्त्रिच्छा । ❀ भवतु ते इति ❀ हितविषयकमदिच्छाविषयत्वसम्बन्धिशिवप्रसादकर्त्तृकं भवनमिति बोधः । ❀ एतयोरिति ❀ लेट्लोटोरित्यर्थः ❀ त्रयाणाम् ❀ लेट्लोट्लिङामित्यर्थः । ❀ तन्निर्णयेनैवेति ❀ वक्ष्यमाणलिङर्थनिर्णयेनैवेत्यर्थः ॥ २२ ॥

SGDF Sri Gargeshwari Digital Foundation

सत्यां क्रियातिपत्तौ च भूते भाविनि लङ् स्मृतः ॥२३॥

लङर्थमाह—ह्यो भूत इति । अनद्यतने भूत इत्यर्थः, "अनद्यतने लङ्" [पा० सू० ३ । १ । १११] इति सूत्रात् । यथा—'अस्य पुत्रोऽभवत्' इत्यादि ।

लिङर्थमाह—प्रेरणादाविति, "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" (पा० सू० ३ । ३ । १६१) इति सूत्रात् । तत्र विधिः = प्रेरणम् , भृत्यादेर्निकृष्टस्य प्रवर्त्तनम् । निमन्त्रणम् = नियोगकरणम् ,

प्रभा

लुङोर्ग्रहणम् । क्रियातिपत्तौ = क्रियाया अतिपत्तौ = असिद्धौ सत्याम् = गम्यमानायाम् । भूते भाविनि = भविष्यति च लङ् स्मृतः । अस्य पूर्वाचार्यैरिति शेषः । 'स्मृताः' इति विभक्तिविपरिणामेन लङादय इत्यनेनान्वयः । इति कारिकार्थः । अस्य पुत्र इति—'इदं सम्बन्धि पुत्रकर्तृकम् अनद्यतनभूतकालिकं भवनम्' इति बोधोऽनेन ।

ननु 'विधिनिमन्त्रण' इति सूत्राद् विध्यादीनां लिङर्थत्वं लभ्यते इति 'प्रेरणादौ' इत्यसङ्गतमित्यत आह—तत्र विधिरिति—घटकत्वं सप्तम्यर्थः । प्रेरणादिघटको विधिः प्रेरणारूप एवेत्यर्थः । निकृष्टस्य = प्रेरकापेक्षया अपकर्षविशिष्टस्य । प्रवर्तनम् = चिकीर्षाकृतिसाध्यताज्ञानाधीनो यः प्रयत्नः तत्प्रयोजको व्यापारः । निकृष्टस्येत्युक्त्या स्वसमानोत्तमयोः प्रवर्तनायां न व्यभिचारो लक्षणस्य । अपकर्षश्चाधिकारजात्यादिकृतः, तेनाधिकवयस्कभृत्यादिप्रेरणायां नाव्याप्तिः । प्रवर्त्याभिलषिताज्ञातोपायोपदेशः प्रवर्तनमिति फलितम् । नियोगकरणमिति—'ब्राह्मणान् निमन्त्रयते' इत्यादिना ब्राह्मणाद्याश्रयवृत्तिप्रवृत्तिजनकव्यापारबोधदर्शनात् । 'नियोगः = प्रवृत्तिः तत्करणञ्च तदनुकूलो व्यापार इत्यर्थः ।

दर्पणव्याख्या

ह्यःपदस्याव्यवहितातीतदिवसे रूढतया तदात्मककालस्य लङर्थत्वेनैकदिनान्तरितभूते लङनुपपत्तिरत आह ❀ अनद्यतन इति ❀ तथाच ह्यःपदं लक्षणयाऽनद्यतनत्वेनानद्यतनमात्रबोधकमिति नोक्तदोषावकाशः । एवं श्वो भाविनीत्यत्रापि बोध्यम् ।

❀ अस्य पुत्र इति ❀ वर्त्तमानध्वंसप्रतियोग्यनद्यतनकालवृत्तिरेतत्सम्बन्धिपुत्रकर्त्तृकोत्पत्त्यनुकूलो व्यापार इति बोधः । अध्यास्तेत्यादौ तु भूताऽनद्यतनत्वमात्रविवक्षया लङुपपत्तिः । सूत्राद् विध्यादीनां लिङर्थत्वप्रतीतेः कथं प्रेरणादेर्विध्यर्थत्वमत आह ❀ तत्रेति ❀ तेषु मध्ये इत्यर्थः । ❀ विधिः = प्रेरणमिति ❀ प्रेरणापर्यायो विधिशब्द इत्यर्थः । प्रेरणाया लिङादिशब्दस्वरूपतां वदतां मतं निराकर्त्तुं प्रेरणायाः स्वरूपं दर्शयति ❀ भृत्त्यादेरित्यादि ❀ ।

अयम्भावः—यद्विषयकत्वेन ज्ञानस्य प्रवृत्तिजनकत्वं सैव प्रवर्त्तना । तादृशविषयतानिरूपकत्वं चेष्टसाधनताया एव तद्विषयकत्वेनैव स्वपरज्ञानात्प्रवृत्तेः सर्वसम्मतत्वात् । नतु लिङादीनाम् , तद्विषयकज्ञानात् प्रवृत्त्यनुदयात् । सा यदि वक्त्रपेक्षयाऽपकृष्टोद्देश्यकप्रवर्त्तकज्ञानविषयीभूता तदा प्रेरणेत्युच्यते । अन्यादृक् तु निमन्त्रणादिपदव्यपदेश्या । तथाच स्वाभिलषितोपायाज्ञानादप्रवृत्तापकृष्टप्रयोज्यस्योपायविषयकप्रवृत्त्यनुकूलो व्यापारः प्रेरणेति पर्यवस्यतीति । अधिकमग्रे वक्ष्यते ।

तत्र वैदिकमुदाहरणम्—'स्वर्गकामो यजेत' इत्यादि । स्वर्गकामाभिन्नकर्त्तृकयागभावना स्वर्गादीष्टसाधनमिति वैयाकरणमते बोधः । भावनायामिष्टसाधनत्वं तु प्रत्यासत्त्या स्वर्गकामस्यैव । तादृशश्चाहमिति अभिसन्धाय यागादौ नियोज्यस्य प्रवृत्तिर्निर्वहति । लौकिकं तु 'जलमाहर' इत्यादि । बोधः स्वयमूह्यः ।

निमन्त्रणादि स्वमतेन व्याचष्टे—❀ नियोगकरणमिति ❀ 'विप्रं निमन्त्रयते' इत्यादितो विप्राश्रयकप्रवृत्तिजनकभावनाबोधेन प्रकृते नियोगपदार्थः = प्रवृत्तिस्तत्करणम् = तदनुकूलो व्यापार इत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

आवश्यके (श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्) प्रेरणेत्यर्थः । आमन्त्रणम् = कामचारानुज्ञा । अधीष्टम् = सत्कारपूर्वको व्यापारः । सम्प्रश्नः = सम्प्रधारणम् ।

एतच्चतुष्टयानुगतप्रवर्त्तनात्वेन वाच्यता, लाघवात् । उक्तञ्च—

प्रभा

आवश्यक इति—श्राद्धभोजनादाविति शेषः । कामचारेति—कामः = इच्छा तेन चरति = प्रवर्तते इति कामचारः = स्वेच्छया चरणप्रवृत्तिशीलः, तस्य अनुज्ञा = प्रवृत्तिविघाताकरणेनानुमितिः । यद्वा—कामचारः = इच्छयाऽऽचरणम् । कामचारश्च प्रवर्तनीयस्यैव, तेन अनुज्ञेत्यर्थः । अधीष्टमिति— अधिपूर्वकादिष्यतेर्भावे क्ते अधीष्टमिति । 'अधीष्टः' इति त्वपपाठः, भावे निष्ठाप्रत्ययान्तस्य 'निष्ठा' इति लिङ्गानुशासनसूत्रेण नपुंसकत्वविधानात् । अत एव 'अधीष्टन्नाम सत्कारपूर्विका व्यापारणा' इति भाष्ये उक्तमिति पञ्चोलिनः ।

अधीष्टमेवाभ्यर्थनाऽप्युच्यते । सम्प्रश्नश्च सम्प्रधारणम् = 'तद्वा कर्त्तव्यमिदं वा कर्त्तव्यम्' इत्येवं विचाररूपम् । स्वाभिलषितार्थदानादिविषयकेच्छा प्रार्थनम् । तच्च न प्रवृत्तिजनकम् , अन्यथासिद्धत्वादित्यत उक्तम्— चतुष्टयेति । यदि तु स्वाभिलषितवस्तुदानादिप्रवर्तिकोक्तिः प्रार्थनम् , तदा चतुष्टयेत्यस्य प्रार्थनसहितचतुष्टयेत्यर्थः । एवं कारिकायामपि प्रार्थनसहितानां चतुर्णामित्यर्थः । एतच्चतुष्टयेति—विध्यादिचतुष्टये अनुगतम् = एकरूपेण स्थितं यत्प्रवर्तनात्वं तदेव विध्याद्यर्थनिष्ठशक्यताऽवच्छेदकम्, नतु विधित्वादिकम्, तेषामनेकत्वेन

दर्पणव्याख्या

❀ आवश्यक इति ❀ श्राद्धभोजनादिश्च तथा ❀ प्रेरणेति ❀ प्रवर्त्तनेत्यर्थः । अस्य दौहित्रादेरित्यादिः । तत्राप्रवृत्तस्य प्रवृत्त्यनुकूलव्यापार इति यावत् । यथा 'इह भुञ्जीत भवान्' इत्यादि । ❀ कामचारानुज्ञेति ❀ स्वेच्छया प्रवृत्तस्येतरत्र प्रवृत्तिप्रतिबन्धफलकस्वाभिलषितविषयकप्रवृत्त्यनुकूलो व्यापार इत्यर्थः । यथा 'इहासीताऽऽरब्धं कुरुत तत्कुरुष्व यथा हितम्' इत्यादि । उपवेशनादिव्यापार इष्टसाधनताज्ञानात् प्रवृत्तावितरत्राप्रवृत्तिरर्थतः फलति । ❀ सत्कारपूर्वको व्यापार इति ❀ अध्यापनादिव्यापारे सम्मानपूर्वकप्रवृत्त्यनुकूलो व्यापारोऽधीष्टपदार्थ इत्यर्थः । अ (इ)यमेवाऽभ्यर्थनेत्युच्यते । यथा 'माणवकमध्यापयेद् भवान्' इति । उक्तेष्विष्टसाधनत्वे अनुकूलत्वञ्च प्रवृत्तिजनकताऽवच्छेदककोटिप्रविष्टतया बोध्यम् ।

❀ सम्प्रधारणमिति ❀ उपस्थितक्रिययोर्मध्ये एकतरक्रियाधर्मिकेष्टसाधनत्वनिर्णयेच्छेत्यर्थः । यथा किं भो वेदमधीयीयोत तर्कमिति । स्वोद्देश्यकत्वसम्बन्धेन सम्बोध्यविशिष्टा मन्निष्ठा च वेदाध्ययन-तर्काध्ययनान्यतरभावनेष्टसाधनत्वप्रकारकनिर्णयेच्छाविषय इति बोधः । एवमग्रेऽपि । ❀ विधिः प्रेरणमिति ❀ प्रेरणम् = प्रवर्त्तनमित्यर्थः । अप्रवृत्तप्रयोज्यस्याज्ञातस्वाभिलषितोपाय इष्टसाधनताबोधनमिति यावत् । अपकृष्टोद्देश्यकताद्दशेष्टसाधनत्वबोधविषयाप्रयुक्तं लिङादिघटितं वाक्यमेवाऽऽज्ञोपदेशपदाभ्यां व्यपदिश्यते । तदेवाऽऽह—❀ भृत्यादेरिति ❀ आदिना शिष्यादिपरिग्रहः । तत्र लौकिकमुदाहरणम्—भवाञ्जलमानयेदित्यादि । वैदिकम्- स्वर्गकामो यजेतेत्यादि । ❀ नियोगकरणमिति ❀ निमन्त्र्यते = नियुज्यतेऽनेनेति व्युत्पत्त्या नियोगानुकूलो व्यापारो निमन्त्रणपदार्थ इत्यर्थः ।

[❀ आवश्यक इति ❀ श्राद्धभोजनादावित्यर्थः । प्रेरणेत्यस्य दौहित्रादेरित्यादिः । तथाचावश्यके श्राद्धभोजनादौ दौहित्रादेरिष्टसाधनताबोधनं निमन्त्रणमिति फलितम् । यथेह भुञ्जीत भवानिति । ❀ कामचारेति ❀ स्वाभिलषिते कामचारेण प्रवृत्तस्येष्टसाधनताबोधनमित्यर्थः । ❀ यथेहासीतेति ❀ अनुज्ञातुः प्रवृत्तिप्रयोजनस्येतरप्रवृत्तिप्रतिबन्धेनैतत्प्रवृत्तिविषय इष्टसाधनताबोधनम् । यथारब्धं कुरुत, तत्कुरुष्व यथा हितमिति च । एतदादि सर्वोपलक्षणम् ।

❀ सत्कारपूर्वको व्यापार इति ❀ सम्मानपूर्वकमध्यापनादिव्यापार इष्टसाधनताबोधनमित्यर्थः । अयमेव चाऽभ्यर्थनेति व्यवह्रियते । उदाहरणम्—माणवकमध्यापयेद्भवानिति ।] सम्प्रश्नः = सम्प्रधारणम् । प्रार्थना तु स्वाभिलषितवस्तुदानादौ स्वीयेच्छाबोधनम् । यथा—भोजनं लभेयेति । ❀ एतच्चतुष्टयेति ❀ विध्यादिचतुष्टयेत्यर्थः । ❀ लाघवादिति ❀ तस्य

अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।
विद्ध्यादीनामुपादानं चतुर्णामादितः कृतम् ॥ इति ।

प्रवर्त्तनात्वञ्च— प्रवृत्तिजनकज्ञानविषयताऽवच्छेदकत्वम् ।

प्रभा

गौरवात्, शक्यताऽवच्छेदकभेदेन शक्तेर्नानात्वप्रसङ्गाच्चेति भावः। प्रवर्तनारूपमिति—यद्विषयकत्वेन ज्ञानस्य प्रवृत्तिजनकत्वं सैव प्रवर्तना। ज्ञानस्य प्रवृत्तिजनकत्वञ्च—इष्टसाधनताविषयकत्वेन 'इदं मदिष्टसाधनम्' इतिज्ञानादेः प्रवृत्तिदर्शनात्। तथाच 'इष्टसाधनत्वमेव प्रवर्तना। नच लिङ्-तव्यदादिप्रत्ययज्ञानादपि प्रवृत्तिदर्शनात् लिङादयोऽपि प्रवर्तनेति वाच्यम्, लिङादिशब्दमात्रज्ञानेन प्रवृत्तेरदर्शनात्। सा प्रवर्तना यदि आज्ञापकापेक्षयाऽपकृष्टोद्देश्यकप्रवर्तकज्ञानविषयीभूता तदा प्रेरणेत्युच्यते। प्रवर्तनाया रूपम्= धर्मं प्रवर्तनात्वमित्यर्थः। अनुस्यूतम्=सम्बद्धम्, अनुपूर्वकात्सीव्यतेः क्ते ऊठि अनुस्यूतमिति। तत्रैव=प्रवर्तनायामेव। यद्यपि तत्पदेन प्रवर्तनात्वस्य ग्रहणमुचितम्, पूर्वत्र प्रवर्तनात्वस्यैवोक्तत्वात्, तथापि लिङादिना विध्यादेरेव बोधदर्शनात्तदाश्रयस्य ग्रहणम्। आकृत्यधिकरणन्यायेन धर्ममात्रे शक्तिरिति स्वीकारे 'तत्र' इत्यस्य प्रवर्तनात्वे एवेत्यर्थः। भेदस्य=विधित्वादिविशेषस्य।

न्यायेति—'विशेषधर्मव्यापको हि सामान्यधर्मः' इति न्यायः। तस्य व्युत्पादनार्थम्=अव्यभिचरितत्वप्रदर्शनार्थम्। 'विधित्वादिरूपव्याप्यधर्मस्य प्रवर्तनात्वं व्यापकम्' इति न्यायविषयस्य ज्ञानं सम्यग् यथा स्यात् तदर्थमित्यर्थः। प्रपञ्चार्थमिति—प्रवर्तनात्वस्य शक्यताऽवच्छेदकत्वे तेन रूपेण विध्यादिष्वेव शक्तिरिति विस्तरेण ज्ञानार्थमिति भावः। आदित इति—आदावित्यर्थः। आद्यादित्वात् सप्तम्यन्तात्तसिः। एवञ्च 'प्रवर्तना-सम्प्रश्नयोर्लिङ्' इत्येव सूत्रं कर्त्तव्यमिति भावः। प्रवर्त्यतेऽनयेति प्रवर्तना 'ण्यासश्रन्थ' इति करणयुच्प्रत्ययान्तप्रवर्तनाशब्देन प्रवृत्त्यनुकूलज्ञानविषयस्य प्रवर्तनात्वाभिप्रायेणाह—प्रवर्तनात्वञ्चेति। प्रवृत्तिजनकेति—प्रवृत्तिजनकं यज्ज्ञानम्—'इदं मदिष्टसाधनम्' इति तद्विषयताऽवच्छेदकमित्यर्थः। 'स्वर्गकामो यजेत' इत्यनेन 'यागो मदिष्टसाधनम्' इति ज्ञानं प्रवर्तकं भवति। तज्ज्ञानीया विषयता विशेष्यतारूपा यागनिष्ठा तन्निरूपितप्रकारता इष्टसाधनत्वनिष्ठा इति विशेष्यतानिरूपकत्वरूपमवच्छेदकत्वमिष्टसाधनत्वस्य। यद्यपि साक्षाद्विशेष्यतानिरूपकता प्रकारतायामेव, तथापि 'तन्निरूपकाश्रयोऽपि तन्निरूपकः' इति न्यायेन प्रकारताश्रयस्येष्टसाधनत्वस्यापि तन्निरूपकत्वम्। एतेनेष्टसाधनत्वज्ञानविषयताया यागनिष्ठविशेष्यतारूपाया इष्टसाधनत्वे स्वरूपसम्बन्धरूपमवच्छेदकत्वं न सम्भवतीति परास्तम्, विशेष्यताऽवच्छेदकत्वरूपावच्छेदकत्वस्य तत्राक्षतत्वात्।

दर्पणव्याख्या

शक्यताऽवच्छेदकत्वकल्पने लाघवादित्यर्थः। विधिवाक्याद्विध्यादीनां बोधस्य सर्वसिद्धत्वेऽपि तत्तद्रूपस्य शक्यतावच्छेदकत्वकल्पने गौरवादुक्तानुगतरूपस्यैव शक्यताऽवच्छेदकत्वमुचितमिति भावः। तत्र हरिसम्मतिमाह—❀ उक्तञ्चेति ❀। ❀ किम्भेदस्येति ❀ तत्तद्रूपेण (शक्तिभेदस्य) पार्थक्यस्येत्यर्थः, तत्तद्रूपेण शक्तेरनङ्गीकारादिति भावः। तर्हि तथोपादानं सूत्रकृता किमिति कृतमत आह—❀ न्यायेति ❀ न्यायः=शक्तिः, तद्व्युत्पत्तये तद्ग्रहायेत्यर्थः।

ननु प्रवर्त्तनात्वेन प्रवर्त्तनायां शक्तिग्रहो विध्यादिसमस्तधर्मिक एवेत्यत आह ❀ प्रपञ्चार्थमिति ❀ प्रवर्त्तना=प्रवृत्तिकरणमिति व्युत्पत्तेर्ण्यन्ताद् युचि निष्पन्नप्रवर्त्तनाशब्दात् प्रवृत्त्यनुकूलव्यापारलाभ इत्याह ❀ प्रवर्तनात्वञ्चेति ❀। ❀ विषयताऽवच्छेदकत्वमिति ❀ प्रकारताऽवच्छेदकत्वमित्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः ।

प्रभा

तच्च = उक्तविधप्रवर्तनात्वञ्च ।

इष्टसाधनत्वस्येति—प्रवृत्तित्वावच्छिन्नम्प्रति इष्टसाधनत्वज्ञानस्य प्रयोजकत्वेन तद्विषयताऽवच्छेदकत्वमिष्टसाधनत्वेऽक्षतमिति भावः । तदेव = इष्टसाधनत्वमेव । एवकारेण कृतिसाध्यत्वव्यवच्छेदः । विध्यर्थ इति—विधिबोधकप्रत्ययार्थ इत्यर्थः । तत्रेष्टत्वञ्च इच्छाविषयत्वम् , प्रकृते लिङादिसमभिव्याहृतपदोपस्थापितकामनाविषयत्वं वा । नच इष्टत्वावच्छिन्नसाधनताज्ञानमात्रेण प्रवृत्तिर्नहि सम्भवति, किन्तु इष्टत्वव्याप्यस्वर्गत्वादिधर्मावच्छिन्नविषयकज्ञानत्वेनैव प्रवर्तकत्वमिति व्याप्यधर्मस्य स्वर्गत्व-पुत्रत्वादेर्नानात्वाल्लिङादेर्नानार्थत्वापत्तिरिति वाच्यम् , इष्टत्वावच्छेदकत्वोपलक्षितस्वर्गत्वाद्यवच्छिन्ने विधेः शक्तिस्वीकारेण 'तदादि'न्यायेनोपलक्षणीभूतधर्मस्यैकत्वेन शक्तेरैक्यात् , स्वर्गत्वादिरूपेण प्रवर्तकज्ञानस्य सिद्धेश्च ।

एवञ्च इष्टसाधनत्वस्येत्यस्येष्टत्वोपलक्षितस्वर्गत्वाद्यवच्छिन्नसाधनत्वस्येत्यर्थो बोध्यः । यत्र तु 'अहरहः सन्ध्यामुपासीत' 'अहरहः श्राद्धमुपासीत' इत्यादौ फलविशेषा श्रुतिः, तत्रार्थवादवाक्योक्तफलसाधनताज्ञानेनैव प्रवर्तकत्वं लिङादेः कल्प्यम् । नच नित्यकर्मणः फलकल्पने नित्यत्वहानिः, ग्रहणश्राद्धादौ नित्यत्व-काम्यत्वयोः सर्वसम्मतत्वेन सन्ध्यादिष्वपि नित्यकर्मसु फलकल्पने विरोधाभावात् । अर्थवादवाक्यञ्च—

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ।
सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ॥

इत्यादिवाक्यात् श्राद्ध-पितृतृप्त्योः, सन्ध्या-ब्रह्मलोकावाप्त्योश्च कार्यकारणभावकल्पनात् । नच श्राद्धकर्मणः पुत्रादिस्थत्वात् , तृप्तेश्च पित्रादिस्थत्वादितिवैयधिकरण्यात् कथं कार्यकारणभाव इति वाच्यम् , उद्देश्यत्वसम्बन्धस्यैव कारणताऽवच्छेदकत्वेन पितॄणामुद्देश्यत्वेन तेन सम्बन्धेन श्राद्धादेरपि पित्रादिस्थत्वात् सामानाधिकरण्याक्षतेः । पितॄणां मुक्तत्वे तु श्राद्धकर्तुरेव तत्फलम् । 'असति वचनान्तरे शास्त्राऽऽदेशितं फलं कर्तरि'

दर्पणव्याख्या

❀ तच्चेति ❀ निरुक्ताऽवच्छेदकत्वञ्चेत्यर्थः ।

❀ तदेवेति ❀ इष्टसाधनत्वमेवेत्यर्थः । एवकारेण कृतिसाध्यत्वादिव्यवच्छेदः । इष्टत्वञ्च समभिव्याहृतपदोपस्थापितकामनाविषयत्वम् । स्वर्गकामो यजेतेत्यत्र स्वर्गकामपदोपस्थापितकामनाविषयत्वस्य स्वर्गे सत्त्वादिष्टत्वं तस्याक्षतम् । तेनैव च स्वर्गादीष्टानामनुगमः । यदि च सामान्यत इष्टसाधनत्वज्ञाने प्रवृत्त्यनुदयात् तत्तद्रूपेण स्वर्गत्वादिना स्वर्गसाधनताज्ञानं तथा वाच्यम् , तथाच तेन रूपेणेष्टसाधनत्वस्य श्रुतेरनवगमाद्विधिवाक्यात् कथं प्रवर्त्तकज्ञाननिर्वाह इति विभाव्यते तर्हीष्टताऽवच्छेदकत्वेन स्वर्गत्वादीननुगमस्य तदवच्छिन्नसाधनत्वे विधेः शक्तिरूपगन्तव्या, एवञ्च न विधेर्नानार्थत्वमपि, तदादिवत् । इष्टताऽवच्छेदकत्वस्योपलक्षणत्वोपगमाच्च न स्वर्गत्वादीनां तद्रूपेण भानाऽऽपत्तिः ।

अथ 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इत्यत्र श्रुत्या स्वर्गसाधनत्वं ज्योतिष्टोमे बोधनीयम्, तच्च न सम्भवति, वाजपेयादपि स्वर्गोत्पत्तेर्व्यभिचारात्, वैजात्यस्य चोत्तरकालकल्प्यत्वेन पूर्वमनुपस्थितत्वादिति चेन्न, 'घटं द्रव्यत्वेनैव जानाति' इत्यादौ घटत्वोपलक्षिततद्व्यक्तिविशेष्यकद्रव्यत्वप्रकारकज्ञानावगमवत् स्वर्गत्वाश्रययत्किञ्चिद्व्यक्तिसमानाधिकरणाभावाप्रतियोगित्वमेव श्रुत्या यागेऽवगम्यते । अथवा यागानुत्तरकालावृत्तित्वमेव स्वर्गत्वसामानाधिकरण्येनेति न कश्चिद्दोषः । अत एव साध्येष्टकत्वस्य विध्यर्थत्वमामनन्ति । तत्र अन्यथासिद्धत्वं तु विधेः प्रवृत्तितात्पर्य्यकत्वावधारणादुत्तरकालकल्प्यम् ।

प्रभा

इति वृद्धोक्तेः। नचेष्टसाधनत्वस्य लिङर्थत्वे आख्यातेनोक्तत्वात् 'अग्निष्टोमेन यजेत' इत्यत्र तृतीयाया अनुपपत्तिः, स्वर्गादिरूपेष्टसाधनत्वस्याऽऽख्यातेनोक्तत्वेऽपि लिङ्निष्ठशाब्दभावनाभाव्या या पुरुषनिष्ठा यज्यर्थकृतिरूपा आर्थी भावना तन्निर्वर्तकत्वरूपपारिभाषिककरणत्वस्यानभिधानेन तत्र तृतीयासिद्धेः।

अयम्भावः—'अग्निष्टोमेन यजेत' इत्यादिस्थले देवतोद्देशेन द्रव्यत्यागरूपं फलम्, पुरुषनिष्ठा कृतिश्च यज्यर्थः। तत्र कृतौ त्यागरूपफलस्य करणतया इष्टसाधनत्वरूपलिङर्थस्य च स्वरूपसम्बन्धेनान्वयः। तथाच देवतोद्देशेन द्रव्यत्यागकरणिका लिङर्थेष्टसाधनत्वविशिष्टा या पुरुषनिष्ठा कृतिरूपा भावना तयाऽदृष्टं भावयेदिति बोधः। अत्र लिङा यज्यर्थकृतिरूपा भावनानिष्ठस्वर्गादीष्टसाधनत्वरूपकरणत्वस्योक्तत्वेऽपि पुरुषनिष्ठयज्यर्थकृतिरूपभावनानिरूपितद्रव्यत्यागरूपफलनिष्ठस्य लिङर्थभावनाभाव्यपुरुषनिष्ठकृतिरूपभावनानिर्वर्तकत्वरूपपारिभाषिककरणत्वस्यानुक्तत्वेन तत्समानाधिकरणार्थवाचकाद् ज्योतिष्टोमशब्दात् तृतीया सिद्ध्यतीति।

नन्विष्टसाधनत्वस्य लिङर्थत्वे नञ्समभिव्याहारे 'न कलञ्जं (विषाक्तशरविद्धमृगमांसम्) भक्षयेत्, 'नागम्यां गच्छेत्' इत्यादाविष्टसाधनत्वस्यानुपपत्तिः, धात्वर्थव्यापारे इष्टसाधनत्वस्य बाधादिति चेन्न, तत्र लक्षणया अनिष्टसाधनत्वस्यैव लिङर्थत्वात्। तथाच 'कलञ्जकर्मकं भक्षणमनिष्टसाधनम्' इति बोधः। नन्विष्टसाधनताज्ञानस्येव कृतिसाध्यत्वज्ञानस्यापि प्रवृत्तिप्रयोजकत्वम्, सुमेरुशिखरानयनं मदिष्टसाधनमिति

दर्पणव्याख्या

इत्थञ्च ग्रहणश्राद्धादौ नित्यत्व—नैमित्तिकत्वयोरिव नित्यश्राद्धसन्ध्यादौ नित्यत्वकाम्यत्वयोरप्यविरोधाल्लाघवाद्रात्रिसत्रन्यायेन—

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्।
सन्ध्यामुपासते ये तु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥

इत्याद्यर्थवादोपस्थितपितृतृप्तिब्रह्मलोकाऽवाप्त्यादिकमेव फलं कल्प्यते। यद्यप्यन्यत्र समवायघटितसामानाधिकरण्येनैव याग-स्वर्गयोः कार्यकारणभावः क्लृप्तस्तथाप्युक्तवाक्यप्रामाण्याच्छ्राद्धपितृतृप्त्योरुद्देश्यत्वसमवायघटितसामानाधिकरण्येन स कल्पनीयः। कर्तृनिष्ठादृष्टस्य तु न पितृतृप्तिजनकत्वम्, व्यधिकरणत्वात्, श्राद्धानन्तरकृतकर्मनाशाजलस्पर्शादिना तन्नाशेन पित्रादिस्वर्गानापत्तेश्च। पितॄणां मुक्तत्वे तु अनुष्ठातर्य्येव तत्कल्प्यताम्। अत एव शास्त्राऽऽदेशितं फलमनुष्ठातरीत्युत्सर्ग इति वृद्धाः।

स्वतः पुरुषार्थो दुःखप्रागभावः, प्रत्यवायानुत्पादो वा तथा कल्पनीयः। तत्साधनत्वञ्च योगक्षेमसाधारणम्। नित्ये कृते प्रत्यवायानुत्पादनियमात्, तत्सत्त्वे दुःखप्रागभावावश्यम्भावाच्च। तथाच सर्वशक्तौ प्रवृत्तिः स्यात् तथा भूतोपदेशादिति सर्वशक्त्यधिकरणपूर्वपक्षसूत्रे पुरुषार्थस्य भाव्यस्योभयत्र तौल्येन यथा काम्यं फलाय अलं तथा नित्यमपीति व्याख्यातं भाट्टैः।

नन्विष्टसाधनत्वस्य विध्यर्थत्वे साधनत्वस्याऽऽख्यातेनाऽभिधानाज्ज्योतिष्टोमेनेत्यत्र तृतीयाऽनुपपत्तिरिति चेन्न, 'द्रव्यं कारकम्' इति पक्षे शङ्काऽनवकाशात्। 'शक्तिः कारकम्' इति पक्षेऽपि यज्यर्थव्यापारनिष्ठभावनाभाव्यनिर्वर्तकत्वरूपकरणत्वस्याभिधानेऽपि यागनिष्ठस्य तस्यानभिधानेन तत्समानाधिकरणज्योतिष्टोमपदात्तदुपपत्तेः। 'न कलञ्जं भक्षयेत्' इत्यादेर्निषेधविधित्वोपपत्तये नञ्समभिव्याहारे विधेरनिष्टसाधनत्वे शक्तिरूपगन्तव्या। तस्यापि धात्वर्थेऽन्वयः। नञ् तात्पर्य्यग्राहकः। कलञ्जकर्मकभक्षणमनिष्टसाधनमिति तु बोधः।

यद्वा नञर्थाभावविशेष्यक एव बोधः, नञा विधेर्निवृत्तितात्पर्यकत्वावधारणात्। तेन च स्वप्रतियोगिन्यनिष्टसाधनत्वाक्षेपात्ततो निवृत्त्युपपत्तिरिति भावः। बलवदनिष्टाजनके इष्टसाधने चन्द्रमण्डलानयने बलवदनिष्टाननुबन्धिनि साध्ये निष्फले, तृप्तिरूपेष्टसाधने कृतिसाध्यमधुविषसंपृक्ताऽन्नभोजने च प्रवृत्त्यदर्शनात् प्रवर्त्तकज्ञाने विषयताऽवच्छेदककोटौ तेषां निवेशस्याव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यप्येतत् कृतिसाध्यत्वस्यापि अस्ति, तज्ज्ञानस्यापि प्रवर्त्तकत्वात्, तथाऽपि यागादौ सर्वत्र तल्लोकत एव लभ्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्।

प्रभा

ज्ञानसत्त्वेऽपि प्रवृत्तेरदर्शनादिति तस्यापि लिङर्थत्वमस्त्वित्याशङ्क्य निरसितुमाह—यद्यपीति—'अनन्यलभ्यो (प्रमाणान्तरालभ्यः) हि शब्दार्थः' इति न्यायेन कृतिसाध्यत्वस्य लोकतः = अनुमानतो लभ्यत्वान्न लिङर्थत्वं तस्य। अनुमानप्रयोगश्च—'यागो मत्कृतिसाध्यः, मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वात्, मदीयग्रामादिगमनवत्' इत्यनुमानरूपलोकप्रमाणादिति भावः। यद्वा विधिवाक्यजन्यशाब्दबोधानन्तरम् 'यागो मत्कृतिसाध्यः, मत्कृतिं विनाऽनुपपद्यमानत्वे सति मदिष्टसाधनत्वात्'। स्वर्गादीष्टसाधनत्वं तु न लोकतः सिद्धम्, लिङादिरूपशब्दैकगम्यत्वादिति तस्य लिङ्वाच्यत्वमावश्यकम्।

परे तु कृतिसाध्यत्वं न प्रवृत्तिप्रयोजकम्, कृत्यसाध्यत्वज्ञाने सति इष्टत्वाभावेन वृथा श्रमजनकतया द्वेषात्। द्वेषस्य च प्रवृत्तिप्रतिबन्धकतायाः सर्वसम्मतत्वात्। तदिति—कृतिसाध्यत्वमित्यर्थः। मधुविषसम्पृक्तान्नभक्षणे, लोभादिना कस्मैचिद् विषादिद्वारा मारणादिषु च प्रवृत्तिवारणाय बलवदनिष्टाजनकत्वमपि प्रवृत्ति-

दर्पणव्याख्या

श्यकतया विधिवाच्यत्वं श्रुतेः प्रवर्त्तकत्वनिर्वाहार्थमावश्यकमिति नैयायिकमतं निराकर्तुमाशङ्कते—❀ यद्यपीति ❀। ❀ एतत् ❀ प्रवर्तकज्ञानविषयताऽवच्छेदकत्वम्। तत्सत्वे युक्तिमाह ❀ तज्ज्ञानस्येति ❀ कृत्यसाध्येऽपि तज्ज्ञानात् प्रवृत्तिदर्शनादिति भावः। निराचष्टे—❀ तथापीति ❀।

❀ लोकत एवेति ❀ लौकिकप्रमाणादेवेत्यर्थः। ❀ न तच्छक्यमिति ❀ 'अनन्यलभ्यो हि शब्दार्थः, इति न्यायादिति भावः। वस्तुतस्तु उक्तन्यायस्य पदान्तरलभ्यैव शक्तिः, अन्यथा कस्यापि पदस्य शक्तिर्न सिद्ध्येत्, सर्वस्यापि शब्दातिरिक्तप्रमाणगम्यत्वात्। किञ्च, इष्टसाधनत्वादीनां स्वातन्त्र्येण यदि शक्यत्वं स्यात् तदा स्यादप्युक्तरीतिर्निराकरणक्षमा, किन्तु प्रवर्त्तकज्ञानविषयताऽवच्छेदकत्वोपलक्षणानुगतीकृतेषु तेषु सा। उपलक्षणस्य च कृतिसाध्यत्वसाधारणतया तत्रापि सिध्यन्ती शक्तिः केन प्रतिषेध्येति सन्त एवाऽधारयन्तु।

यत्तु कृतिसाध्यत्वे वेदादवगतेऽप्यशक्तस्य यागादौ प्रवृत्त्यनुदयात् मदंशविशिष्टतज्ज्ञानस्यैव प्रवृत्तिहेतुत्वं वाच्यम्। तस्य च 'यागो मत्कृतिसाध्यः', मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वात्, मत्कृतिसाध्यपाकवत्, इत्यनुमानेनैवावगमान्नास्य शक्यत्वमित्याशय इति तन्न, इष्टसाधनताज्ञानस्याऽपि मदंशविषयकस्यैव प्रवर्त्तकतया तस्य विधिवाक्यादलाभेनेष्टसाधनत्वे शक्यत्वभ्युपगमेऽपि प्रवर्त्तकत्वानुपपत्तेरपरिहारात्।

यदि तु प्रतिपुरुषं विधेरावृत्त्या बोधकत्वात्तेनैव तत्पुरुषीयेष्टसाधनबोधकत्वात्प्रवर्तकत्वोपपत्तौ नानुमानावश्यकत्वमिति विभाव्यते तथा कृतिसाध्यत्वेऽपि तुल्यमिति बलवदनिष्टाननुबन्धित्वस्य विध्यशक्यत्वे, "न कलञ्जं भक्षयेत्" इत्यत्र भक्षयेदित्यस्य भक्षणेऽनिष्टसाधनत्वाबोधकतया निषेधविधित्वानुपपत्तिरिति तत्रापि विधिशक्तिरभ्युपेया। अनिष्टे बलवत्त्वं चेष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तत्वम्। तेन नाऽऽयाससाध्ये कर्मणि प्रवृत्त्यनुपपत्तिः। 'कष्टं कर्म' इति न्यायेन सुखमात्रजनककर्मासम्भवाच्च नोक्तार्थस्य सिद्धिः। यदि च कदाचित्तत्सम्भवस्तदेष्टोत्पत्त्यनान्तरीयकत्वमेव तद्वाच्यम्।

एतेन बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवर्त्तकत्वमते (मेव) बह्वायाससाध्ये कर्मणि प्रवृत्त्यनापत्तेः, बहुतरदुःखस्य जायमानत्वादल्पदुःखस्यापि कुतश्चित् बलवत्त्वेनानुगतबलवत्त्वस्य निर्वक्तुमशक्यत्वाच्चेति न (क) तस्य विधिशक्यत्वसम्भावनेति केषाञ्चित् प्रलपितं प्रत्युक्तम्।

अथोक्तयुक्तयाऽनिष्टत्वेनानिष्टसाधनत्वाभावज्ञानस्य न प्रवर्त्तकत्वम्, किन्तु 'अगम्यां न गच्छेत्' 'शाकं न

बलवदनिष्टाननुबन्धित्वज्ञानञ्च न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्,

प्रभा

कारणम् इति प्राचीननैयायिकैः स्वीकृतं तन्निराकुर्वन्नाह— बलवदनिष्टेति—अनिष्टे बलवत्त्वञ्च—इष्टोत्पत्तावावश्यकदुःखातिरिक्तत्वम्। तेन व्यापारमात्रे किञ्चिद्दुःखजनकत्वेऽपि न प्रवृत्त्यनुपपत्तिः। अत्रापि अनिष्टत्वज्ञानस्य नरकत्व-रोगादित्वविशेषविषयकत्वेनैव प्रवृत्तिप्रतिबन्धकतया तादृशानिष्टाजनकत्वस्य लिङर्थत्वे शक्तेरानन्त्येन गौरवात् 'द्वेषविषयताऽवच्छेदकत्वोपलक्षितनरकत्वाद्यवच्छिन्नसाधनतात्वावच्छिन्नप्रतियोगिताकाभावकूटस्यैव प्राचीननैयायिकैः लिङर्थत्वं स्वीकृतम्', इति न गौरवमित्यपि तन्मतेन द्रष्टव्यम्। न हेतुरिति—कार्य्यमात्रम्प्रति प्रतिबन्धकाभावस्य कारणतया द्वेषस्य च प्रवृत्तिम्प्रति प्रतिबन्धकत्वस्य सर्वसम्मतत्वेन प्रतिबन्धकाभावविधयैव अवश्यक्लृप्तनियतपूर्ववर्तितावद् द्वेषाभावरूपकारणेनैव तादृशस्थले प्रवृत्तिवारणसम्भवे बलवदनिष्टाजनकत्वज्ञानस्य न प्रवृत्तौ कारणत्वम्। प्रवृत्तिजनकतावच्छेदकस्यैव लिङर्थतयेति न तस्य लिङर्थत्वमिति भावः। बलवदनिष्टाननुबन्धित्वज्ञानाभावेऽपि 'अगम्यागमनं नरकादिसाधनम्' इति ज्ञानस्य सत्त्वेऽपि आस्तिक (शास्त्रबोधितार्थं प्रामाणिकत्वेन मन्यमान) कामुकस्य प्रवृत्तिदर्शनात् कार्यसमानाधिकरणात्यन्ताभावीयप्रतियोगिताऽनवच्छेदकधर्मवत्त्वस्यैव कारणत्वेन अगम्यागमनस्थले प्रवृत्तिरूपकार्यसमानाधिकरणोऽभावो बलवदनिष्टानुबन्धित्वज्ञानरूपो बलवदनिष्टाननुबन्धित्वज्ञानाभावः तत्प्रतियोगित्वमेव बलवदनिष्टाननुबन्धित्वज्ञाने इत्यकारणत्वमेव तस्य। अन्यथासिद्धत्वादिति—कारणत्वस्यान्यथासिद्धिशून्यत्वघटिततयाऽस्य चान्यथासिद्धिविशिष्टत्वेन कारणत्वासम्भव इति भावः। अन्यथासिद्धत्वञ्च लघुनियतपूर्ववर्तिभिन्नत्वम्। लघुत्वञ्च स्वरूपकृतम्, उपस्थितिकृतम्, सम्बन्धकृतञ्चेति त्रिविधम्। तत्र स्वरूपकृतम्—प्रत्यक्षम्प्रति महत्त्वस्य कारणत्वम्, अनेकद्रव्यत्वस्य वेति विचारे महत्त्वापेक्षया अनेकद्रव्यत्वस्यानेकपदार्थघटितत्वेन

दर्पणव्याख्या

भुञ्जीत' इत्यादिवाक्यानां प्रामाण्योपपत्तये विशिष्य नरकत्वादिरूपेण तदसाधनत्वस्य ज्ञानस्य तथात्वं वाच्यम्। तथाच शक्तयाऽऽनन्त्यम्, शक्तिग्रहाऽनुपपत्तिश्चेति चेन्न, द्वेषविषयताऽवच्छेदकत्वोपलक्षितनरकत्वाद्यवच्छिन्नसाधनतात्वावच्छिन्नाऽभावकूटे तादृशाऽभावत्वेनानुगते एकैव विधिप्रत्ययस्य शक्तिः। उपलक्षणत्वादेव च द्वेषविषयताऽवच्छेदकत्वं परित्यज्य नरकत्वाद्यवच्छिन्नाऽसाधनत्वमात्रं प्रतीयते। क्वचिच्च नरकासाधनत्वम्, क्वचिद्भोगाऽसाधनत्वं प्रतीयते इत्यत्र तात्पर्यमेव नियामकम्।

नचातिप्रसक्तस्योपलक्षणत्वाभ्युपगमे प्रमेयत्वस्यैव तथात्वमस्तु, साम्यादिति वाच्यम्, सुखाद्यसाधनत्वस्य विध्यर्थताविरहेण तत्साधारणप्रमेयत्वस्योपलक्षणत्वासम्भवात्। अत्यन्ताजनकसाधारणरूपस्य कारणतावच्छेदकत्ववद् (अ) द्विष्टसाधारणरूपस्यापि द्विष्टोपलक्षणताकल्पनानौचित्यात्। तात्पर्याभावादेव सुखाद्यसाधनताबोधानापत्तौ तस्य विध्यर्थत्वेऽपि न क्षतिरिति तु न युक्तम्, तथा सति तु तत्तात्पर्येणाऽऽधुनिकानां न भुञ्जीतेति प्रयोगापत्तेः।

तस्माद् द्वेषविषयतावच्छेदकत्वोपलक्षितनरकत्वाद्यवच्छिन्नसाधनतात्वावच्छिन्नप्रतियोगिताकाभावत्वेनानुगते तादृशाभावे विधिप्रत्ययस्य शक्तिरिति परिष्कृतं प्राचीननैयायिकमतं नव्यरीतिमवलम्ब्य दूषयति— ❀ बलवदनिष्टेति ❀ निरुक्तबलवदनिष्टाजनकत्वाज्ञानञ्चेत्यर्थः। ❀ न हेतुः ❀ = न प्रवृत्तिहेतुः। क्वचित् तथैव पाठः। तथाच न तद्विषयस्य विधिवाच्यत्वमिति भावः। तस्य प्रवृत्त्यजनकत्वे हेतुमाह—❀ द्वेषाभावेनेति ❀ मधुविषसंपृक्तान्नभोजने द्विष्टसाधनताज्ञानात् द्वेषविषये प्रवृत्तिवारणाय तद्विषयकप्रवृत्तिम्प्रति तद्विषयकद्वेषस्य क्लृप्तप्रतिबन्धकतया प्रतिबन्धकाभावविधयाऽवश्यक्लृप्तनियतपूर्ववर्तिताकद्वेषाभावेनैवोपपत्तौ बलवदनिष्टासाधनत्वज्ञानस्य न हेतुत्वम्, तेनान्यथासिद्धिरित्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छाया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च । तस्मादिष्टसाधनत्वमेव प्रवर्त्तना । उक्तञ्च मण्डनमिश्रैः—

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्म्मञ्च प्रवदन्ति प्रवर्त्तनाम् ॥ इति ।

प्रभा

गुरुतया अन्यथासिद्धत्वम् । उपस्थितिकृतं लघुत्वञ्च—गन्धं प्रति गन्धप्रागभावस्य कारणत्वम् , रूपप्रागभावस्य वेति संशये कार्यविधया गन्धस्योपस्थितत्वेन गन्धप्रागभावस्य शीघ्रोपस्थितिकतया रूपस्य चानुपस्थितत्वेन रूपप्रागभावस्य ज्ञाने रूपस्य, प्रागभावस्य च ज्ञानमपूर्वमेव कर्तव्यमिति गुरुत्वं रूपप्रागभावे । सम्बन्धकृतं लघुत्वञ्च दण्डादौ । घटं प्रति दण्डस्य कारणत्वम् , नतु दण्डत्वस्य । दण्डत्वस्य कारणत्वे स्वाश्रयजन्यभ्रमिवत्त्वसम्बन्धो वाच्यः, दण्डस्य हेतुत्वे च स्वजन्यभ्रमिवत्त्वमिति आश्रयस्यानिवेशेन सम्बन्धकृतं लाघवं दण्डे इत्यन्यत्र विस्तरः । प्रकृते बलवदनिष्टाननुबन्धित्वज्ञाने स्वरूपकृतगौरवरूपान्यथासिद्धिः ।

तस्मादिति—कृतिसाध्यत्वस्य लोकतोऽवगतत्वाद् बलवदनिष्टाननुबन्धित्वस्य च प्रवृत्त्यजनकत्वादित्यर्थः । इष्टसाधनत्वमेवेति—नन्विदमसङ्गतम् , कृतिसाध्यत्वस्य लोकतोऽवगतत्वेऽपि तत्र प्रवृत्तिकारणत्वस्य सर्वसम्मतत्वेन 'इष्टसाधनत्वमेव प्रवर्तना' इत्यसङ्गतमिति चेन्न, इष्टसाधनत्वमेव प्रवर्तनात्वेन लिङ्वाच्यमिति तदर्थात् । एवञ्च कृतिसाध्यत्वस्य प्रवृत्तिप्रयोजकत्वेऽपि लिङ्वाच्यत्वं नास्तीति भावः ।

पुंसामिति—स्त्रिया अपि प्रवृत्तिदर्शनात् 'पुंसाम्' इत्युपलक्षणम्-प्राणिमात्रस्य । इष्टाभ्युपायत्वात् = इष्टसाधनत्वाद् । इष्टसाधनत्वात् अन्यः = कृतिसाध्यत्वादिः क्रियासु प्रवर्तको न । चो हेतौ, यतः प्रवृत्तिहेतुं धर्मं प्रवर्तनां प्रवदन्ति आचार्याः । एतन्मते कृतिसाध्यत्वस्य प्रवर्तकत्वमेव नास्तीति प्रतीयते । नच सुमेरुशिखरानयनादौ प्रवृत्त्यापत्तिः, कृत्यसाध्यत्वेन निश्चिते वृथाश्रमजनकत्वाद् द्वेषेण द्वेषाभावरूपकारणान्तरस्याभावात् । प्रवृत्तीति—प्रपूर्वकाद् हेतुमण्ण्यन्तवृणातेर्भावे युचि निष्पन्नप्रवर्तनापदं प्रवृत्तिप्रयोजकव्यापारपरम् । करणे

दर्पणव्याख्या

नन्वन्वयव्यतिरेकसहचारज्ञानस्य कारणत्वस्योभयत्र साम्यात् तेनैवास्यान्यथासिद्धिर्दुर्वारेत्यत आह ❀ आस्तिकेति ❀ स च परलोकाङ्गीकारवान् । तदनङ्गीकर्त्तुर्नरकसाधनताज्ञानासम्भवात्तद्विशेषणमुपात्तम् । आस्तिकस्य नरकसाधनताज्ञानेन तत्र द्वेषावश्यम्भावेन प्रवृत्त्यसम्भवादाह—❀ कामुकेति ❀ । तत्रवञ्चोत्कटरागवत्त्वम् । रागे उत्कटत्वं जातिविशेषः, विषयिताविशेषो वा । प्रवृत्तेरित्यस्यागम्यागमने इत्यादिः । द्वेषाभावदशायामित्यनेन द्वेषसामग्रीवैकल्यं दर्शितम् । तच्च विषयतया द्वेषम्प्रति उत्कटेच्छासामग्रीविरहविशिष्टद्विष्टसाधनताज्ञानस्य हेतुतया तादृशसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकतया बोध्यम् ।

❀ व्यभिचाराच्चेति ❀ न हेतुरिति पूर्वेणान्वितम् । अत एव "श्येनेनाभिचरन् यजेत" इत्यत्र न विध्यर्थबाधः, बलवदनिष्टाननुबन्धित्वज्ञानस्याप्रवर्त्तकत्वेन तद्विषयस्य तस्य विध्यर्थत्वस्यैवाभावादिति भावः । उपसंहरति—❀ तस्मादिति ❀ । ❀ इष्टसाधनत्वमेव ❀ इत्येवकारेण कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वयोर्व्यवच्छेदः । आद्यस्य लौकिकप्रमाणेनैवावगमादन्त्यस्य प्रवर्त्तकज्ञानाविषयत्वादिति भावः ।

❀ प्रवर्त्तनेति ❀ लिङाद्यर्थ इत्यर्थः । ❀ इष्टाभ्युपायत्वादित्यादि ❀ इष्टसाधनत्वात् । ❀ अन्यः ❀ कृतिसाध्यत्वादिः । ❀ क्रियासु ❀ यागादिरूपासु । ❀ पुंसां प्रवर्त्तको न ❀ ज्ञाननिष्ठप्रवृत्तिजनकतायां विषयतयाऽवच्छेदको नेत्यर्थः । यजेतेत्यादिवाक्यान्तर्गतलिङादिशक्यो नेति यावत् । चो हेतौ । यतः प्रवृत्तिहेतुं तद्धेतुतावच्छेदकमेव प्रवर्त्तनापदेन

प्रपञ्चितं चैतद् वैयाकरणभूषणे ।

प्रभा

युचि च इष्टसाधनत्वादिपरम्। नच 'राज्ञा प्रवर्तितोऽहं करोमि' इति व्यवहारात् प्रवर्तना प्रवर्तकपुरुषनिष्ठा सैव विधिपदेनोच्यते। अत एव 'विधिर्नियोगः' इति यास्कः। इष्टसाधनत्वन्तु प्रवर्तनीयपुरुषनिष्ठमिति न तल्लिङादिशक्यमिति वाच्यम्, इष्टसाधनत्वस्यापि स्वज्ञापनवत्त्वसम्बन्धेन प्रवर्तकनिष्ठत्वात्। प्रवर्तनीयस्येष्टसाधनत्वं ज्ञात्वैव प्रवर्तकवाक्यप्रयोगकरणात्, इष्टसाधनताज्ञानस्यापि प्रवर्तकनिष्ठत्वात्, वेदे पुरुषाभावाल्लाघवाच्च प्रवृत्त्यनुकूलधर्मस्यैव प्रवर्तनापदार्थत्वम्, न तु प्रवर्तकनिष्ठत्वस्य तत्रान्तर्भाव इत्यस्यापि वक्तुं शक्यत्वाच्च।

नचैवं लिङादीनां णिचश्च पर्यायताऽऽपत्तिः, ततश्च 'पृच्छतु भवान्' इति वक्तव्ये 'पृच्छयति भवान्' इति णिच् स्यादिति वाच्यम्, सक्रियस्य प्रेरणायामेव णिचो विधानात्, निष्क्रियस्य प्रेरणायां लिङादिरिति भेदात्। अत एव 'हेतुमति च' इति भाष्ये 'इह कश्चित् कञ्चिदाह—'पृच्छतु मा (माम्) भवान्' 'अनुयुङ्क्तां मा (माम्) भवान्' इति। अत्र णिच् कस्मान्न भवति, अकर्तृत्वात्' इति उक्तम्। अयमाशयः—प्रश्नस्थले त्वं प्रश्नक्रियायाः कर्ता भव इति कर्तृत्वमेवाधीयते, न तु कर्तृत्वं तत्रास्ति। यथा 'राजा भव' इत्यनेन

दर्पणव्याख्या

व्यपदिशन्तीत्यर्थः।

परे तु—बलवदनिष्टाननुबन्धित्वज्ञानस्य द्वेषाभावेनान्यथासिद्धतयाऽप्रवर्तकत्वेऽपि कृतिसाध्यताज्ञानस्य प्रवर्त्तकतायाः सर्वसिद्धत्वेन तद्विषयस्य तस्य विध्यर्थत्वमावश्यकम्। नच तद्धेतुतायामेव मानाभावः, कृत्यसाध्ये प्रवृत्तिस्तु कृत्यसाध्यताज्ञानस्य प्रतिबन्धकतया तत्र तदभावादेव नेति वाच्यम्, कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वे कृतिसाध्यत्वाऽभावतद्व्याप्यतदवच्छेदकधर्मदर्शनादीनां प्रतिबन्धकत्वस्य वक्तव्यतया तावदभावानां प्रवृत्तिं प्रति हेतुता कल्पनाऽपेक्षया कृतिसाध्यताज्ञानत्वेन हेतुतायां लाघवस्य स्फुटतरत्वात्, कृतिसाध्यताज्ञानाभावस्य सर्वदा सत्त्वेन प्रवृत्त्यापत्तेश्च।

अपिच कृतिसाध्यताज्ञानस्य प्रवर्तकत्वे कृतिसाध्यत्वप्रकारकपाकविशेष्यकज्ञानत्वावच्छिन्नाभावमानसं प्रति पाकादिगोचरप्रवृत्तिसामग्र्याः प्रतिबन्धकत्वं न कल्प्यते इति लाघवम्, तादृशप्रवृत्तिसामग्रीकाले पाकविशेष्यककृतिसाध्यत्वप्रकारकनिर्णयस्याऽऽवश्यकत्वेन, तस्य च स्वरूपसत एवोक्तज्ञानाभावमानसे क्लृप्तप्रतिबन्धकतयैवं पपत्तेः।

भवन्मते तादृशमानसे तादृशप्रवृत्तिसामग्र्याः, प्रतिबन्धकत्वकल्पनेन गौरवं स्पष्टमेव। एवमप्रामाण्यविशिष्टपाकविशेष्यककृतिसाध्यत्वप्रकारकज्ञानवानहमिति मानसे पाकगोचरप्रवृत्तिसामग्र्याः प्रतिबन्धकत्वाऽकल्पनेनापि लाघवम्। तादृशविशिष्टविषयिताशालिमानससामग्रीकाले अप्रामाण्यज्ञानास्कन्दितोक्तज्ञानस्याऽऽवश्यकत्वेनाप्रामाण्यज्ञानानास्कन्दितपाकादिविशेष्यककृतिसाध्यत्वप्रकारकज्ञानघटिततादृशप्रवृत्तिसामग्रीतादृशमानससामग्र्योर्मेलनस्यैवाभावात्।

भवन्मते कृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानाभावघटिततादृशप्रवृत्तिसामग्रीतादृशमानससामग्र्योर्मेलने बाधकाभावेन तादृशमानसे तादृशप्रवृत्तिसामग्र्याः प्रतिबन्धकत्वस्यावश्यकल्पनीयत्वेन गौरवस्यातिस्फुटत्वादनयैव दिशाऽनिष्टसाधनत्वज्ञानाभावादीनामपि हेतुता निरसनीयेत्याहुः।

गुरवस्तु—नेष्टसाधनत्वं विध्यर्थः, क्षणिकतयाऽवगते यागे तस्य बोधयितुमशक्यादेवं परम्परासाधनत्वमपि तथा द्वाराऽनुपस्थितेः शाब्दबोधप्रयोजकान्वयप्रयोजकत्वरूपवत्त्वयोग्यतायास्तत्राभावात्। साधनतासामान्यबोधस्त्वेकविशेषबोधे तदितरप्रकारकत्वनियमादसम्भवदुक्तिकः। किञ्च यागो न कर्तव्यतया प्रतीयते काम्यादन्यत्काम्याव्यवहितपूर्ववर्त्तिसाधनमेव कामी कर्तव्यतयाऽवैतीत्यस्यान्यत्र क्लृप्तत्वात्। तस्माद् द्वारीभूतं काम्याव्यवहितपूर्ववर्तिसाधनमपूर्वमेव कार्य्यत्वेन शक्यम्।

प्रभा

राजत्वमेवाधीयते। यस्तु प्रवृत्तक्रियः, सम्भावितक्रियो वा तत्र प्रयोज्यस्तस्य प्रेरणायां णिच्, प्रकृते तदभावान्न णिजिति। तदुक्तं हरिणा—

'द्रव्यमात्रस्य तु प्रैषे पृच्छयादेर्लोड्विधीयते।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः'॥ इति।

दर्पणव्याख्या

कार्य्यत्वञ्च कृत्युद्देश्यत्वम्। तत्र विशेषणीभूतकृतेराश्रयविषययोराकाङ्क्षायां विषयतया याग आश्रयतया स्वर्गकामः सम्बध्यते। सुखदुःखाभावादेर्लौकिकप्रमाणेनैवापूर्वस्यापि वेदेन कृत्युद्देश्यत्वबोधनादपौरुषेये तस्मिन्नप्रामाण्यशङ्कानवकाशात् तस्य तत्त्वम्। तथाच स्वर्गकामो यजेतेत्यत्र स्वर्गकामकृत्युद्देश्यो यागविषयको नियोग इति बोधः।

अत्रापूर्वस्य यागविषयककृत्युद्देश्यत्वमेव यागविषयकत्वम्। यागस्य तादृशकृतिविषयत्वे पुरुषस्याऽऽश्रयत्वे चान्वयिताऽवच्छेदकमपूर्वकारणत्वम्। सैव योग्यता। यथा 'घटेन जलमाहर' इत्यत्र छिद्रेतरघटत्वं योग्यतावच्छेदकोपस्थितिर्घटेनेत्यादावर्थाध्याहारात्। प्रकृते चौपादानिकप्रमाणवशात्तच्छक्त्यैव। तच्छक्त्यैवाशक्योपस्थित्यभ्युपगमे लक्षणोच्छेद इति न सांप्रतम्, स्वशक्त्याऽन्वयबोधकस्यैव स्वोपपादकसकलपदार्थबोधकत्वोपगमात्।

नच 'गङ्गायां घोषः' इत्यादौ गङ्गादिपदानां स्वशक्त्यान्वयबोधकत्वम्, येन तदुपपादकसकलपदार्थबोधनायौपादानिकप्रमाणावकाशः स्यात्। 'अजहत्स्वार्थलक्षणा' तु नास्मन्मतसिद्धा। तथाच स्वीयत्वेन कार्य्यबोधो नियोज्यः, समभिव्याहृतपदोपस्थापितफलकामश्च तथेति काम्ये स्वर्गकामो नियोज्यः।

एवञ्च वेदबोधितमपूर्वमुद्दिश्य पुरुषप्रवृत्त्युपपत्तौ नेष्टसाधनत्वं विध्यर्थः। इच्छाविषयसाधनतात्वेन तत्र शक्तौ प्रवर्त्तकज्ञानानिर्वाहः, स्वर्गजनकतात्वेन शक्तौ नानार्थतापत्तेरिति तन्मतस्य विकल्पग्रस्तत्वाच्च।

अपिच नित्यनैमित्तिकस्थले शुचित्वकालजीविनो राहूपरागवतश्च मम सन्ध्यास्नानविषयको नियोग इति बोधान्न फलापेक्षा, भवन्मते तु 'चन्द्रसूर्य्यग्रहे स्नायात्' 'अहरहः सन्ध्यामुपासीत' इत्यादौ फलाश्रवणाद्विध्यर्थबाधः प्रसज्ज्येत। मम तु वैदिके कर्मणि वेदबोधितमपूर्वमुद्दिश्यैव पुरुषः प्रवर्त्तते, तस्यैव वेदेन पुरुषार्थत्वबोधनात्। काम्ये फलावाप्तिरानुषङ्गिक्येव। अत एव नित्येऽपि तदुद्देशेन प्रवृत्तिरुपपद्यते इत्याहुः।

तदपरे तु न क्षमन्ते, लोके प्रवर्त्तकत्वेन सर्वसम्मतं यदिष्टसाधनत्वज्ञानं तद्विषयेष्टसाधनत्वे विधिशक्तिकल्पनयैव विधेः प्रवर्त्तकत्वोपपत्तौ नियोगस्य विधिवाच्यत्वे मानाभावात्, वेदबोधितस्वर्गसाधनत्वानुपपत्त्या हि तत्कल्पनात्। नच तस्य पूर्वमुपस्थितिरस्ति येन तत्र शक्तिग्रहः। एकविशेषबाधे सामान्यज्ञानस्य तदितरप्रकारकत्वनियमेऽपि साक्षात्साधनतातिरिक्तसाधनतात्वेन बोधे बाधकाभावात्। तादृशसाधनत्वे योग्यतावच्छेदकं च परम्पराघटकमपूर्वम्। तथाच स्वर्गसाधनत्वशक्त्यैव निर्वाहे औपादानिकप्रमाणवशादपूर्वोपस्थितावपि न तद्वाच्यम्। अपूर्वानुपस्थितौ परम्परासाधनत्वमपि कथं वेदो बोधयेदिति त्वनुपस्थितेऽपूर्वे कथं शक्तिग्रह इत्यनेन तुल्ययोगक्षेमम्।

एवं काम्याव्यवहितापूर्वसाधनं कामी कर्त्तव्यतयाऽवैतीत्यपि न, काम्यसाधनताज्ञानस्यैव प्रवर्त्तकत्वान्न तु तत्राव्यवहितत्वनिवेशोऽपि, गौरवान्मानाभावाच्च। दृश्यते च तृप्त्यर्थिनस्तत्प्रयोजके जलाऽऽहरणादौ प्रवृत्तिः। इष्टसाधनत्वे यथा शक्तिग्रहस्तथोक्तम्। अपूर्वस्याशक्यत्वेऽपि यथा नित्यनैमित्तिके प्रवृत्तिस्तथोपपादितम्।

प्रत्युत तत्र तवैव सा दुरुपपदा, निष्फलत्वात्, दुःखैकफलत्वाच्च। प्रवृत्तिमात्रे इष्टसाधनताज्ञानस्य हेतुत्वावधारणात्। प्रवृत्तिविषयसाध्यत्वे सतीष्टत्वरूपसाध्यत्वमपि नापूर्वस्य, येन तदुद्देशेनापि प्रवृत्तिः सम्भाव्येत। निष्फलतयाऽवगते प्रवृत्तिस्तु श्रुतिसहस्रेणाप्युत्पादयितुमशक्येति वेदबोधितत्वान्नित्ये प्रवृत्तिरिति छात्रप्रतारणामात्रम्।

अत एव यज्ञो दानं तपः कर्म' इत्यादिनाऽनिर्दिष्टोऽपि प्रत्यवायपरीहारः स्वर्गादिफलमनुद्दिश्य क्रियमाणानामेषां फलं भवतीत्यर्थकेनाष्टादशाध्याये भगवद्गीतासु पावनत्वमुक्तम्। किञ्च पचेतेत्यादिलौकिकविधेरिष्टसाधनत्वबोधकत्वेन प्रवर्त्तकत्ववद् वैदिकविधेरपि तच्छक्त्यैव प्रवर्त्तकत्वात् ज्ञाननिर्वाहे तस्यानुपस्थितापूर्वे शक्तिकल्पनं निष्प्रमाणकमेवेति।

दर्पणव्याख्या

परेतु—लिङादिश्रवणे 'अयं मां प्रेरयति' इति नियमेन प्रतीतेरभिधानामकः प्रेरणापरपर्य्यायो व्यापारो लिङादिवाच्यः। सा च लिङ्गसङ्ख्यानन्वयित्वाद् व्यापारपदेन प्रवर्त्तकनिष्ठत्वात् प्रवर्त्तनापदेन च व्यवह्रियते। प्रेरणात्वेन तस्याः सविषयत्वमपि शक्यताऽवच्छेदकं च प्रेर्य्यादिधात्वर्थतावच्छेदकतया सिद्धं प्रेरणात्वमखण्डोपाधिः।

स च व्यापारः सम्भवाल्लोके प्रवर्त्तकपुरुषनिष्ठोऽभिप्रायविशेष एव। तत्प्रवर्तकत्वे च लिङाद्युच्चारयितृत्वम्। वेदे तु प्रयोक्तुरसम्भवाल्लिङाद्यन्तशब्दस्वरूप एव, प्रवर्त्तकत्वञ्च लिङाद्युच्चारयितृत्वे सति स्वतन्त्रत्वम्। राजादिप्रेरितपदातेर्लिङाद्युच्चारयितृत्वेऽपि प्रवर्त्तकत्वेनाव्यवह्रियमाणत्वात्। ❀ स्वतन्त्रेति ❀ अद्विष्टयाऽऽप्तोक्त्या च तया स्वविषय इष्टसाधत्वानुमानम्। ततश्च प्रयोज्यप्रवृत्तिः। शत्रूक्ताद्विषं भुङ्क्ष्वेत्यतो विषभोजने इष्टसाधनत्वानवगते ❀ आप्तोक्तयेति ❀ आप्तोक्तयापि 'विषं भुङ्क्ष्व' 'मा चास्य गृहे भुक्ङ्थाः' इत्यादिकयापि तस्मिन्निष्टसाधनत्वाननुमानात् ❀ अद्विष्टेति ❀ तत्र विषभोजनविषयकाभिप्रायस्य तदीयद्वेषविशिष्टत्वान्न व्यभिचारः।

भवतु वा लिङादिसमभिव्याहारे व्यापारान्तरस्याननुभवात् सर्वत्र लिङाद्यन्तशब्दस्वरूपैव सा। अत एव "हेतुमति च" इति (पा० सू० ३।१।२६) सूत्रे भाष्ये लिङादिशब्दप्रयोगरूपप्रयोजककर्तृव्यापारस्य सत्त्वादित्याशयेन 'पृच्छतु मां भवान्' इत्यत्र णिच् कस्मान्न भवतीति प्रश्ने, अकर्तृत्वादित्युत्तरम्। सक्रियप्रेरणायां णिच्, निष्क्रियप्रेरणायां लोडादि। 'तत्प्रयोजकः' इत्यत्र तत्पदेन व्यापाराविष्टः कर्त्तोच्यते इति तद्भावः।

अथापि कथञ्चित् कर्त्ता स्यात्, एवमपि न दोषः, लोटोक्तत्वात् प्रेषणस्य णिज् न भविष्यतीत्युक्तम्। तत आहत्यैव प्रेरणाया विध्यर्थत्वं लभ्यते। विधिनिमन्त्रेति सूत्रभाष्येऽपि विधिः = प्रेरणमित्युक्तेश्च। तस्मान्नेष्टसाधनत्वादि विध्यर्थः।

किञ्चेदं ते इष्टसाधनम्, तस्मात् त्वं कुर्विति स्वारसिकव्यवहारादपि न तस्य विध्यर्थत्वम्, पौनरुक्त्यापत्तेः, पौनरुक्त्यस्य सर्वथेष्टसाधनत्वबोधनतात्पर्य्यकत्वेऽपि तस्मादित्यस्यानन्वयापत्तेश्चेत्याहुः। स च प्रायशो भट्टमतानुवाद एव। यतो भट्टमते लिङर्थोऽभिधाख्यो व्यापारः। स च लोके प्रयोक्तृपुरुषनिष्ठोऽभिप्रायविशेष एवेत्यादि प्राग्वत्। वेदे त्वन्यस्याऽसम्भवाल्लिङाद्यन्तशब्दनिष्ठ एव सः, समवेतश्चात एव सा 'शाब्दी भावना' इति व्यवह्रियते।

भावनायाः शब्दार्थभेदेन द्वैविध्यादाख्यातवाच्याऽऽर्थीति व्यवह्रियते। भावनात्वेन लिङर्थशाब्दभावनायाः सविषयत्वमपि भावनाया भाव्यकरणेतिकर्त्तव्यतारूपांशत्रयविशिष्टत्वादभिधाभावनायाः सविषयकत्वेनावगतायाः किं भावयेदिति भाव्याकाङ्क्षायां समानप्रत्ययोपात्तत्वप्रत्यासत्त्यांऽशत्रयविशिष्टा स्वविषयप्रवृत्तिरूपाख्यातवाच्यार्थी भावना विषयत्वेनोपतिष्ठते। इयमेव साध्याकाङ्क्षेति व्यवह्रियते, साध्यताख्यविषयतयैव तस्याः सविषयत्वात्।

एवञ्च तस्याः साध्यत्वावगते केनेति करणाकाङ्क्षायां लिङादिपदज्ञानं करणत्वेनाऽन्वेति। करणत्वञ्च भावनाभाव्यनिर्वर्त्तकत्वमेव, कुठारादेरपि पुरुषव्यापारनिर्वर्त्यच्छिदा निर्वर्त्तकत्वेनैव करणत्वात्। इयमेव भावना करणाकाङ्क्षेत्युच्यते।

'कष्टं कर्म' इति न्यायादुपाये द्वेषेणाऽऽलस्यादिना वा अप्रवर्त्तमानं पुरुषं प्रति प्रशस्तफलवत्ताबोधनेन द्वेषाद्यपसारणेनार्थवादवाक्यजन्या प्राशस्त्यरूपा स्तुतिः सहकारिकारणमितीयमितिकर्त्तव्यतेत्युच्यते। एवमार्थीभावनाया अप्यंशत्रयवैशिष्ट्येन तदवगतौ किं भावयेदित्याकाङ्क्षायां स्वर्गकामादिपदसन्निधानात् स्वर्गो भाव्यतयाऽन्वेति स्वर्गं भावयेदिति। यदपि स व्यापारस्त्यागविषयोऽपि तथाऽपि तस्याऽसुखरूपतयाऽपुरुषार्थत्वेन करणत्वेनैवोपस्थित्या च न भाव्यत्वम्।

अत एव तत्समानाधिकरणज्योतिष्टोमादिपदात्तृतीया। केनेत्याकाङ्क्षायां यागः करणत्वेनाऽन्वेति। करणत्वं तूक्तमेव। सहकार्याकाङ्क्षारूपे कथं भावाकाङ्क्षायां च "समिधो यजति" इत्यादिवाक्यावगतसमिन्नामकयागादिक्रियाजातमितिकर्तव्यतयाऽन्वेतीत्यधिकमन्यतोऽवधार्य्यम्। तदुक्तम्—

अभिधाभावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सा चाख्यातस्य गोचरः॥

SGDF
Sri Gargeshwari Digital Foundation

दर्पणव्याख्या

लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः ।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाऽङ्गतया प्रयुज्यते ॥ इति ।

उक्तोऽर्थः । तत्र पूर्वोक्तमते भट्टमतादियान् विशेषः—यद्भट्टमतेऽभिधाख्यो वैदिकलिङर्थो व्यापारः शब्दसमवेतस्तदतिरिक्तश्च । तस्मिंस्तु लिङाद्यन्तशब्दात्मक एव लोकवेदसाधारणश्च । सविषयकत्वं तु मतद्वयेऽप्यविशिष्टमिति ।

अत्र वदन्ति—अभिधा—लिङादिनिरूपिता शक्तिरेव, नतु तदतिरिक्तः कश्चन शब्दसमवेतो व्यापारः, मानाऽभावात् । विधेः प्रवर्त्तकत्वस्य पूर्वमुपपादनात् तदनुपपत्तेरप्यभावात् । अन्यथा शब्दाऽतिरिक्तः शब्दसमवेत एको व्यापारः कल्पनीयः । तस्य च स्वप्रवृत्तौ परप्रवृत्तौ वा कारणत्वेनाऽक्लृप्तस्य तत्त्वेन कारणत्वम् । प्रवर्त्तनात्वेन परनिष्ठव्यापारबोधकत्वेन क्लृप्तस्य शब्दस्य स्वनिष्ठव्यापारबोधकत्वं सविषयकत्वं च भट्टैः कल्पनीयमिति गौरवस्य स्फुटत्वाच्च ।

प्रेरणाया विध्यर्थत्वेऽपि सामान्यस्य विशेषे पर्य्यवसानात् कोऽसौ व्यापार इति विशेषगवेषणायां समीहितसाधनत्वमेव स इत्येव वक्तुमुचितम् । लिङस्तदर्थकत्वं विना प्रवर्त्तकत्वस्यैवाऽसम्भवात् । प्रेरणाविषयः पाक इति बोधस्येष्टसाधनत्वाद्यविषयकस्य प्रवर्त्तकत्वं लोकविरुद्धमेव । न खल्वागमसहस्रप्रेरितोऽपि स्वेष्टसाधनत्वमज्ञात्वा प्रवर्तते कश्चिदित्यपि सर्वसिद्धमेव । मखकरणस्य स्वनिष्ठव्यापारद्वारैव फलजनकत्वमिति नियमस्तु नास्त्येव व्याप्तिज्ञानादौ व्यभिचारात् । तस्माल्लिङादिजन्यबोधविषयाऽभिधाया इष्टसाधनत्वादिज्ञाननिरपेक्षायाः प्रवर्त्तकत्वं निर्युक्तिकमेव ।

शब्दरूपप्रेरणावादिनाऽपि तद्विषय इष्टसाधनत्वानुमितिद्वारैवोक्तयुक्त्या प्रवर्त्तकत्वं वाच्यम् । तच्च वैदिकविधिस्थले न सम्भवति । "तस्यैव महाभूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदः" इति श्रुत्युपष्टम्भेन निःश्वसितवद्वेदे तैर्जन्यत्वाऽङ्गीकारेण यथार्थज्ञानवदुच्चरितत्वरूपाऽऽप्तोक्तत्वरूपविशेषणवैकल्येनोक्तानुमानाप्रवृत्तेः । एवं सविषयत्वमप्यात्मविशेषगुणातिरेकिण्यास्तस्या सर्वतन्त्रविरुद्धम् ।

नच प्रेरणैव स्वातन्त्र्येण प्रवृत्तिहेतुः, स्वतन्त्रप्रवृत्तौ व्यभिचारात्, "सर्व इमे स्वभूत्यर्थं प्रवर्त्तन्ते" इति समीहितसाधनताज्ञानप्रवर्त्तकताप्रतिपादकहेतुमतिचेतिसूत्रभाष्यविरोधाच्च । "कः प्रयोज्यस्य प्रेरणयाऽर्थो यदभिप्रायेषु सज्जते" इति तत्सूत्रस्थभाष्येण णिजर्थप्रेरणाया अपि स्वातन्त्र्येणाप्रवर्त्तकत्वबोधनाच्चेति वैदिकविधेः प्रेरणाऽर्थकत्वासम्भवेन प्रवर्त्तकत्वानुपपत्त्येष्टसाधनत्वाऽर्थकत्वमेवाऽङ्गीकरणीयम् ।

एवञ्च लौकिकविधेरपि तच्छक्त्यैव प्रवर्त्तकत्वोपपत्तौ न तदर्थोऽपि सा । अभिप्राय एव तत्र विध्यर्थ इति कल्पस्तु वक्ष्यमाणाऽऽचार्यमतनिरासेनैव निरस्तः । विधिः प्रेरणमिति भाष्यं तु प्रेर्य्यते प्रवर्त्यतेऽनेनेति व्युत्पत्त्या प्रवर्त्तकज्ञानविषयेष्टसाधनत्वपरम् । ज्ञानस्य तद्विषयकत्वेनैव प्रवर्त्तकत्वात् ।

यदपि तदुपष्टम्भकतया 'पृच्छतु मां भवान्' इत्यादिभाष्योपन्यसनं तदपि नाऽस्माकं प्रतिकूलम्, यतस्तेन प्रवर्त्तकज्ञानजनकत्वेन प्रवर्त्तनापदव्यपदेश्याया लोडाद्यन्तशब्दप्रयोगरूपायाः प्रेरणाया णिजर्थत्वं प्रतिपाद्यते, नतु विध्यर्थत्वमपि, अर्थभेदस्य दर्शितत्वात् । अकर्त्तृत्वादित्यनेनाऽपि गमयत्यादेर्गच्छन्तं प्रेरयतीतिवत्, पृच्छत्वित्यस्य पृच्छन्तं प्रेरयतीति 'विग्रहस्याऽदर्शनेन कर्त्रसम्बद्धधात्वर्थविषयकप्रवृत्तिजनकज्ञानाऽनुकूलायास्तस्या णिजर्थत्वाऽभावप्रतिपादनात् तद्विरोधाभावात् ।

अथाऽपीत्याद्युक्तिस्त्वेकदेशिनः, विध्यर्थकप्रत्ययकृत्यर्थस्य स्वाभाव्येन भविष्यत्तयैव प्रतीतेः । तदानीं प्रयोज्यस्य निर्व्यापारत्वेन कर्तृत्वासम्भवात्, एवं लोटा प्रेषणस्य उक्तत्वादित्यपि लोडर्थप्रेषणस्य धात्वर्थविशेषणतयैव भानात् तद्विशेष्यतया प्रेरणाविवक्षायां णिचो दुर्वारत्वात्, लोडन्ताद्धात्वर्थविशेष्यतया प्रेरणाया अप्रतीतेः पूर्वपक्षस्यैव निर्दलतापत्तेश्च । इदं ते इष्टसाधनमित्याद्युक्तिस्तु सर्वथेष्टसाधनत्वबोधनपरैव, इष्टसाधनत्वस्य प्रवर्त्तनात्वेन विधिवाच्यत्वमिति पक्षे पौनरुक्त्यसम्भवात्, नैयायिकमते कृत्यात्मकव्यापारस्य पच्याद्यर्थत्वाभावेन तन्मते इष्टसाधनतात्वेनेष्टसाधनत्वस्य विध्यर्थत्वे पौनरुक्त्यापादनानवकाशाच्चेति ।

आदिना "हेतुहेतुमतोर्लिङ्" (पा० सू० ३ । ३ । १५६) "आशिषि लिङ्लोटौ" (पा० सू० ३ । ३ । १७३) इति सूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते । "यो ब्राह्मणायावगुरेत्तं शतेन यातयेत्" इति यथा ।

लुङर्थमाह—भूतमात्र इति—भूतसामान्ये इत्यर्थः, भूते लुङ् (भूते इत्यधिकृत्य "लुङ्" (पा०

प्रभा

नच सक्रियस्य प्रेरणा व्यर्था, आलस्यादिना विरामाऽऽशङ्कया तत्सार्थक्यात् । प्रेरणादौ चेति कारिकास्थाऽऽदिपदग्राह्यमाह—आदिनेति । हेतुहेतुमद्भावादयः—हेतुः = कारणम् , हेतुमत् = कार्यम् । तथाच कार्यकारणभावादयः । हेतुहेतुमद्भावस्योदाहरणमाह—ब्राह्मणायेति—अवगोरणम् = हननार्थं दण्डाद्युत्थापनम्, अक्षिविकासो वा, 'गुरी उद्यमने' इत्युक्तेः । 'पत्ये शेते' इतिवत् सम्प्रदाने चतुर्थी । एवञ्च यत्कर्तृकं ब्राह्मणोद्देश्यकं दण्डाद्युत्थापनं तद्धेतुकतादृशपुरुषकर्मकयमदूतकर्तृकशतवर्षयातना (तीव्रवेदना) इति वाक्यार्थबोधः । अत्र दण्डाद्युदमनक्रियाया यातनक्रियायाश्च हेतुहेतुमद्भावसम्बन्धेनान्वय इत्यत्रैव तात्पर्यको लिङ्, नतु तत्र शक्तिः, गौरवात् । वाच्यत्वाभिप्रायेण तु मूलम् ।

भूतमात्र इति—मात्रपदं कार्त्स्न्यपरम् । तथाच भूतत्वमात्रविवक्षायां लुङ्, नतु तद्विशेषविवक्षायाम् ।

दर्पणव्याख्या

वस्तुतस्तु भाष्ये बहुषु स्थलेषु प्रेरणाया विध्यर्थकत्वकथनात् तत्प्रामाण्याल्लिङाद्यन्तशब्दप्रयोगरूपाया एव तस्या विध्यर्थत्वमुचितम् । श्रुतेस्तु "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे" "धाता यथापूर्वमकल्पयत्" इत्यादिश्रुतिबलात् पौरुषेयत्वमभ्युपेत्यैकरूपेणैव लोकवेदयोस्तद्विषये इष्टसाधनत्वाऽनुमानेन विधेः प्रवर्त्तकत्वं निर्बाह्यमिति सर्वं चतुरस्रमिति ॥

आचार्यास्तु—आत्माऽभिप्रायो विध्यर्थः, पाकं कुर्याः, पाकं कुर्यामिति मध्यमोत्तमपुरुषयोर्लिङ इच्छाविशेषात्मकाज्ञाऽध्येषणानुज्ञाप्रश्नप्रार्थनार्थकतया प्रथमपुरुषेऽपीच्छायामेव शक्तेरुचितत्वात् । तत्र भयजनिकेच्छा आज्ञा । अध्येषणीये प्रयोक्तुरनुग्रहद्योतिका साऽध्येषणा । निषेधाभावव्यञ्जिकेच्छाऽनुज्ञा । उत्तरप्रयोजिका तु प्रश्नः । प्राप्तीच्छा प्रार्थनेति विवेकः । तथाच 'स्वर्गकामो यजेत' इत्यत्र यागः स्वर्गकामनिष्ठतयाप्तेच्छाविषय इति बोधः ।

यद्वा कर्त्तव्यत्वेनेच्छैव विध्यर्थः । तथाचेष्टसाधनत्वाऽनुमानम् । तद्यथा स्वर्गकामस्य मम याग इष्टसाधनम्, कर्त्तव्यत्वेनाऽऽप्तोक्तलिङ्बोध्येच्छाविषयत्वात् , मत्पित्रेष्यमाणमन्नभोजनवत् । विषभोजनादेरपि कस्यचित्कृतिसाध्यतया कर्त्तव्यत्वेनेश्वररूपाप्तेच्छाविषयत्वेन तत्रेष्टसाधनत्वरूपसाध्याभावात् व्यभिचारवारणाय लिङ्पदबोध्येति । आप्तस्तु वैदिकस्थले ईश्वर एव । तस्मिन् विधिरेव तावत्, कुमार्या गर्भ इव पुंयोगे मानमित्याहुः ।

तदपि न, कृत्यसाध्यनिष्फलाऽनिष्टे प्रवृत्तिवारणायेष्टसाधनतादिज्ञानहेतुताया आवश्यकत्वेन तद्विषयेष्टसाधनत्वादीनां विध्यर्थत्वोपगमेनैव प्रवृत्तिनिर्वाहे आप्ताभिप्रायस्य विध्यर्थत्वे मानाभावात् । नहीष्टसाधनत्वज्ञानमन्तरेणाप्तेच्छाविषयत्वज्ञानमात्रात् प्रवृत्तिः कस्याऽपि दृश्यते । स्वतन्त्रप्रवृत्तौ व्यभिचारेणाप्ताऽभिप्रायज्ञानस्य प्रवर्तकत्वाऽसम्भवाच्चेत्यलम् । प्रकृतमनुसरामः । ❀ प्रपञ्चितञ्चैतदिति ❀ बलवदनिष्टाऽननुबन्धित्वज्ञानस्य प्रवर्तकतानिराकरणमिष्टसाधनताज्ञानस्य प्रवर्तकत्वाऽवधारणं चेत्यर्थः । प्रपञ्चस्तूक्तप्रायः ।

❀ आदिनेति ❀ प्रेरणादौ चेत्यत्रोपात्तादिशब्देनेत्यर्थः । ❀ यो ब्राह्मणायाऽवगुरेदिति ❀ यत्कर्तृको ब्राह्मणोद्देश्यको वधोद्यमस्तत्कर्मिका तादृशवधोद्यमजन्या शतसंवत्सरयातनेति बोधः, "हेतुहेतुमतोर्लिङ्" (पा० सू० ३ । ३ । १५६) इत्यनेन प्रकृत्यर्थयोर्भावे लिङो विधानात् । प्रवर्तकत्वेन निवर्तकत्वेन वा वेदस्य प्रामाण्यात्तेन वधोद्यमनिवृत्तिपरत्वग्रहे तस्मान्नावगुरितव्यमिति विधिः कल्प्यत इति भावः । मात्रपदं कृत्स्नार्थकमित्यभिप्रायवानाह—❀ भूतसामान्य इति ❀ तेन

SGDF Sri Gargeshwari Digital Foundation

सू० ३।२।११०) इति सूत्रात्)। अत्र 'विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्'। तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे, घटोऽभूदिति प्रयोगः। विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः।

अयमत्र संग्रहः—कालो द्विविधः, अद्यतनोऽनद्यतनश्च। आद्यस्त्रिविधः, भूतभविष्यद्वर्त्तमानभेदात्। अन्त्यो द्विविधः—भूतो भविष्य(ष्यँ)श्च। तत्र वर्त्तमानत्वे लट्। भूतत्वमात्रे लुङ्। भविष्यत्तामात्रे लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ्। अनद्यतने भूतत्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षायां लिट्। तादृशे भविष्यति लुट्, इति द्रष्टव्यः।

प्रभा

ननु नाशस्य विद्यमानत्वेऽपि 'नष्टो घटः' इत्यादिप्रयोगानुरोधेन भूतत्वम् = 'विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वम्' वाच्यम् इत्युत्पत्त्यर्थकधातुसमभिव्याहारे उत्पत्तेर्द्वैधाभानप्रसङ्ग इत्युत्पत्त्यघटितं लक्षणमाह—अत्रेति—तथाच ध्वंसप्रतियोगित्वस्य व्यापारेऽन्वयेन नाशादिस्थलेऽपि नाशानुकूलव्यापारस्य ध्वंसप्रतियोगितया नोक्तदोष इति भावः। भूतविशेषविवक्षायां लङादेः सावकाशत्वात् न बाध्यबाधकभावः। अत्र 'भूते लुङ्' इत्येव मूले पाठ इत्यनुमीयते, दर्पणे तथा व्याख्यानादिति पञ्चोलिनः। विद्यमान इति—'अभूत्' इति प्रयोगाधिकरणक्षणे विद्यमान इत्यर्थः। नच यत्किञ्चित्क्रियाध्वंसमादाय उक्तभूतत्वस्य सत्त्वाद् 'अपाक्षीत्' इत्यादिप्रयोगापत्तिरिति वाच्यम्, 'तद्विक्लित्त्यनुकूलचरमक्रिया विद्यमानध्वंसप्रतियोगिनी' इति चरमक्रियाविशेष्यकस्य तादृशातीतत्वज्ञानस्य तादृशप्रयोगं प्रति कारणत्वकल्पनेनादोषात्। क्रियायामिति—इदमुपलक्षणम्—क्रियाधिकरणसमयस्यापि, घटे तु नान्वयः, कालस्य क्रियापरिच्छेदकत्वात्, घटस्य ध्वंसाप्रतियोगित्वेन तादृशप्रयोगानापत्तेः। द्विविध इति—अद्यतनभिन्नकालस्य वर्तमानत्वासम्भवाद् द्विविध इत्यर्थः। भेदादिति—भूताद्यतनः, वर्तमानाद्यतनः, भविष्यदद्यतनभेदादित्यर्थः। भविष्यश्चेति—पृषोदरादित्वात्तलोपः। तथाच प्रयोगः 'यद्भविष्यो विनश्यति' इति, 'भविष्यति गम्यादयः' 'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्यादिनिर्देशात् वैकल्पिकस्तलोपः।

वस्तुतस्तु 'भविष्यँश्च' इत्येव पाठो युक्तः, पाणिनिना कुत्रापि अदन्तस्याप्रयुक्तत्वादिति पञ्चोलिनः।

भविष्यत्तामात्रे = भविष्यत्सामान्ये। अनयोः = भूतभविष्यतोः, उभयत्रापि लृङ्। तत्रैव = अनद्यतने एव। तादृशे = अनद्यतने।

दर्पणव्याख्या

विशेषविवक्षायां लङादीनामवकाशं सूचयति—❀ भूते लुङिति ❀। 'भूते' इत्यधिकृत्य, "लुङ्" इति सूत्रादित्यर्थः। ननु वर्त्तमानध्वंसप्रतियोग्युत्पत्तिकत्वं भूतत्वम्। अत एव घटनाशस्य विद्यमानतादशायामपि, विनष्टो घट इति प्रयोगः, तदुत्पत्तेर्वर्तमाननाशप्रतियोगित्वात्। तथाच यत्रोत्पत्तिरेव धात्वर्थस्तत्रोत्पत्तेर्द्वैधाभानप्रसङ्गोऽत आह ❀ अत्रेति ❀ भूत इति सूत्रे इत्यर्थः। ❀ वर्त्तमान इत्यादि ❀। नचोक्तदोषः, अस्मन्मते नश्यत्यादेर्नाशानुकूलव्यापारार्थकतया कालान्वयस्यापि व्यापार एव समर्थितत्वेन च तदप्रसक्तेरुत्पत्त्यघटितत्वेन द्वैधाभानाऽसम्भवाच्च। वस्तुतस्तु 'आत्मा आसीत्' इति प्रयोगोपपत्तये भविष्यत्त्ववद् भूतत्वस्यापि उत्पत्तिघटितस्य लङर्थत्वमावश्यकमिति बोध्यम्। ❀ क्रियायामिति ❀ फलानुकूलायां तस्यामित्यर्थः ❀ विद्यमानेऽपि ❀ इत्यपिना समानप्रत्ययोपात्तत्वप्रत्यासत्त्याऽऽख्यातार्थकारके कालान्वयोपगम उक्तप्रयोगानुपपत्तिः सूच्यते।

नैयायिकास्तु—उत्पत्त्यघटितत्वेन लाघवादुक्तार्थ एव भूतपदस्य शक्तिः। परन्तु नश्यत्यादौ नाशातिरिक्तस्य व्यापारान्तरस्याननुभवात्तत्रोत्पत्तिघटिते प्रत्ययस्य लक्षणाऽऽवश्यकीत्याहुः।

Sri Gargeshwari Digital Foundation

लङर्थमाह—सत्यामिति—क्रियाया अतिपत्तिः = अनिष्पत्तिस्तस्यां गम्यमानायाम्, भूते भाविनि हेतुहेतुमद्भावे सति लङित्यर्थः। "लिङ्निमित्ते लङ् क्रियाऽतिपत्तौ" (पा० सू० ३ । ३ । १३९) इति सूत्रात्। लिङो निमित्तं हेतुहेतुमद्भावादि। यथा—'सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्'। 'वह्निश्चेत् प्राज्वलिष्यद् ओदनमपक्ष्यत्' इत्यादौ। अत्र वह्न्यभिन्नाऽऽश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयोज्य-ओदनाभिन्नाश्रयकविक्लित्त्यनुकूलव्यापाराभाव इति शाब्दबोधः।

प्रभा

अनिष्पत्तिरिति—असम्भावनमित्यर्थः। पद्यतेरत्र सम्भावनमर्थः। यद्वा—अतिपत्तिः = अनुपपत्तिरेव। हेतुहेतुमद्भावादीति—आदिना 'विभाषा कथमि लिङ् च' इत्यादीनां लिङो निमित्तानां ग्रहणम्। तत्र 'उताप्योः समर्थयोः' इत्यतः प्राग् यानि लिङ्निमित्तानि तेषु भविष्यति क्रियातिपत्तौ सत्त्यां नित्यं लङ्। भूते तु क्रियातिपत्त्यभावेऽपि, क्रियातिपत्तावित्यस्याननुवृत्तेः विकल्पेन लङ्, 'भूते' इत्यधिकृत्य 'वोताप्योः' इत्युक्तेः। भविष्यति—'कथं नाम भवान् धर्ममत्यक्ष्यत्, भूते—त्यजेत् त्यजति, अत्यक्ष्यत्, अत्याक्षीद्वा इति चतुर्णां प्रयोगः। 'उताप्योः' इत्यत आरभ्य परेषु लिङ्निमित्तेषु भूते भविष्यति च क्रियातिपत्तौ सत्त्यां नित्यं लङ्। यथा 'कामो मेऽभोक्ष्यत भवान् यद्यहमजीविष्यम्' इति। हेतुहेतुमद्भावादि स्वरूपसन्निमित्तम्, नतु लङः शक्यम्। एवं क्रियातिपत्तिरपि यथाकथञ्चिद्गम्या अपेक्ष्यते, नतु वाच्या। सुवृष्टिश्चेदिति—ननु सुवृष्टिभवनसुभिक्षभवनयोः सामग्रीवैकल्यान्नियमेनानुत्पत्तिः, अनुत्पत्तिं स्वयमवगम्य यत्र प्रतिपाद्यते तत्र भविष्यत्वादेवानुत्पत्तिक्रियायाः। उत्पन्ने एव भूत इत्युच्यते। सामग्रीसमवधाने सम्भावितोत्पत्तिकश्च भविष्यन्नित्युच्यते। अत्र च साधनाभावात् सम्भावितोऽपि न क्रियोत्पत्तिरिति भूतत्वभविष्यत्त्वयोरसम्भवात् कथं लङिति चेन्न, अभूतेऽपि भूतत्वम्, अभविष्येऽपि भविष्यत्वमारोप्य क्रियाया अनुत्पत्तेः समर्थनीयत्वात्, सुभिक्षभवने सुवृष्टिभवनं हेतुं सम्भावयत एव तादृशोक्तेः। एवमेव क्रियातिपत्तिः समर्थनीया। अत्र भूतत्वभविष्यत्त्वयोरभावनिश्चयसत्त्वेऽपि भूतत्वादिप्रकारकबोध आहार्यारोपात्मक एव बोध्यः।

वस्तुतस्तु शाब्दबोधम्प्रति बाधनिश्चयस्य प्रतिबन्धकत्वाभाव एव। अत एव 'एष वन्ध्यासुतो याति' इत्यादितो बोधः। 'वह्निना सिञ्चति' इत्यतो बोधाभावे 'अद्रवेण वह्निना कथं सेकं ब्रवीषि' इति उपहासानुपपत्तिश्च स्यात्। तथाच लङाद्यन्तेनानाहार्य्यारोपात्मक एव बोधः। बाधज्ञानं ज्ञाने अप्रमात्वं बोध्यते, नतु शाब्दबोधस्य प्रतिबन्धकम्। लङ्समभिव्याहारे धातोर्लङो वा अभावोऽप्यर्थः। तथाच सुवृष्ट्यभिन्नाश्रयकोत्पत्त्यनुकूलव्यापाराभावप्रयोज्यसुभिक्षाभिन्नाश्रयकोत्पत्त्यनुकूलव्यापाराभाव इति सुवृष्टिश्चेदित्यादिना बोधः। अभावार्थकत्वमेव विशदयन्नाह—वह्न्यभिन्नाश्रयकेति।

दर्पणव्याख्या

❀ भूते भाविनीति ❀। कार्यकारणभावापन्नप्रकृत्यर्थयोर्भूतत्वे भविष्यत्त्वे वा गम्यमान इत्यर्थः। ❀ हेतुहेतुमद्भावादीति ❀ आदिना शक्त्यादिपरिग्रह। तत्र भविष्यदर्थे उदाहरणमाह—❀ सुवृष्टिश्चेदिति ❀ अत्रैकस्यैव धात्वर्थस्य कर्तृरूपोपाधिभेदेन कार्य्यकारणभावावगतिः, उत्तरत्र तु स्वरूपतो भिन्नयोस्तयोरिति विशेषः। ❀ व्यापाराभाव इति ❀ धात्वर्थयोर्भविष्यत्त्वप्रदर्शनार्थं परमभावविशेष्यकबोधोत्कीर्तनम्। वह्न्यभिन्नाश्रयकभाविप्रज्वलनजन्यौदनाऽऽश्रयकविक्लित्त्यनुकूलव्यापार इति शाब्दबोधस्तूचितः। ❀ प्रयोज्य इति ❀ व्यापाराभावान्वयि प्रयोज्यत्वोत्कीर्तनं च वह्निप्रज्वलनौदनपाकयोः कार्य्यकारणभावप्रदर्शनाय, 'यदभावो यदभावप्रयोज्यः स तज्जन्य' इति नियमात्। तथाच प्रकृते ओदनपाकाभावे वह्निप्रज्वलनाभावप्रयोज्यत्वेऽवगते तत्प्रतियोगिनोस्तयोः कार्य्यकारणभावः सुबोधो भवतीति भावः। एवं भूते—

SGDF Sri Gargeshwari Digital Foundation

एवंरीत्या द्रष्टव्यम् । अयञ्च अर्थनिर्देश उपलक्षणम्, अर्थान्तरेऽपि बहुशो विधानदर्शनात् । प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम् । एतेषां क्रमनियामकश्चानुबन्धक्रम एव । अत एव पञ्चमो लकार इत्यनेन मीमांसकैर्लेट् व्यवह्रियत इति दिक् ॥ २३ ॥

इति वैयाकरणभूषणसारे लकारविशेषार्थनिरूपणं समाप्तम् ॥ २ ॥

———*———

प्रभा

अर्थान्तरेऽपीति—अर्ह प्रशंसाप्राप्तकालादिष्वित्यर्थः । एष्वेवेति—वर्तमानत्वादिष्वेवेत्यर्थः । शक्तिः = सङ्केतरूपा = 'इदं पदमेतदर्थविषयकबोधजनकं भवतु' इति पदविशेष्यिका, 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्यर्थविशेष्यिका वा इच्छैव संकेतस्तद्रूपा, पदार्थान्तररूपा वा। अन्यत्र = गर्हादिष्वर्थेषु । मतान्तररीत्या = नैयायिकमीमांसकादिरीत्या । बोधकत्वं शक्तिरिति वादिनः शाब्दिकस्य मते तु येष्वर्थेषु बोधोऽनुभवसिद्धस्तत्र शक्तिरेव, नो चेत्प्रयोगोपाधित्वम्, (प्रकरणादिना यथाकथञ्चिद्गम्यमानत्वमेव) अन्यथा गम्यमानस्यार्थस्य शाब्दत्वेन प्रतीतिविषयत्वमिति यावत्, यथा—स्फटिके लौहित्यम् । कारिकायां 'क्रमाज् ज्ञेया लङादयः' इत्युक्तम् । तत्र क्रमनियामकः क इत्यपेक्षायामाह—क्रमनियामक इति—अष्टाध्याय्यां लिट एव 'छन्दसि लिट्' (३।२।१०५) इत्यनेन प्रथमं विहितत्वाल्लिडादय इति वक्तुमुचितमित्याशङ्कायामाह—अनुबन्धक्रम एवेति—तथाच वर्णसमाम्नायक्रमेणोक्ता अकारादयोऽनुबन्धा एव क्रमनियामकाः । अत एव कौमुद्यामपि प्रथमं 'वर्तमाने लट्' (३।२।१४) इत्यनेन लडेवोक्तः । अत्र मीमांसकव्यवहारमपि प्रमाणयति—अत एवेति—अकाराद्यनुबन्धानां क्रमनियामकत्वादेवेत्यर्थः ।

नन्वेवमपि लङादय इत्येव वक्तुम् पाणिनिना प्रथमम् 'अनद्यतने लङ् (३।२।९) इत्यस्यैवोपादानादिति चेन्न, वर्तमानकालस्योपस्थितत्वेन तदनुरोधाल्लडादय इत्युक्तेः । दिगिति—दिगर्थस्तु उच्चारितस्यैव शब्दस्य द्योतकत्ववाचकत्वयोर्वक्तुं शक्यतया यत्र 'इयान्' 'व्यतिध्वे' इत्यादौ प्रत्ययमात्रस्य दर्शनं तत्र प्रकृतेः, यत्र 'गर्गाः' 'भव' इत्यादौ प्रकृतिमात्रस्योपलब्धिस्तत्र प्रत्ययस्य च द्योतकत्व-वाचकत्वयोरुभयोरप्यसम्भव इति पदस्फोटस्य, वाक्यस्फोटस्य वा वाचकत्वं स्वीकरणीयम् । तथाच पदवाक्ययोः स्वरूपप्रत्यायनायैव प्रकृति-प्रत्ययादीनां कल्पनया पदवाक्ययोः शक्तिबोधने एव तात्पर्यम् । अतो वाक्यैकदेशन्यायेन, 'यः शिष्यते स

दर्पणव्याख्या

परस्परेण स्पृहणीयशोभं नचेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत् ॥

'मन्न उन्नो वेत्यवक्ष्यत्' यणञ्चान्ववर्तयिष्यदित्यादि बोध्यम् । यदि देवदत्तो नाभविष्यदित्यादि बोध्यमित्याह ❀ एवंरीत्येति ❀ । ❀ अयञ्चेति ❀ वर्तमाने लडित्यादिनोपात्त इत्यर्थः ❀ अर्थान्तरेऽपि ❀ अर्ह प्रशंसाप्राप्तकालाद्यर्थेऽपीत्यर्थः । एषु वर्तमानत्वादिषु शक्तिः सङ्केतरूपा, पदार्थान्तररूपा वा ❀ अन्यत्र ❀ अर्हाद्यर्थे । ❀ मतान्तररीत्या चेति ❀ बोधकत्वमेव शक्तिरिति वदतामस्माकं तु केषाञ्चित् प्रयोगोपाधित्वमितरेषां शक्यत्वमेवेति भावः ❀ अनुबन्धक्रम इति ❀ अकाराद्यनुबन्धक्रम इत्यर्थः । ननु यत्र प्रत्ययस्य तिबादेरदर्शनं तत्र द्योतकत्वं वाचकत्वं वेति पक्षद्वयेऽप्यनुपपत्तिः, वाचकस्य द्योतकस्य वाऽसत्त्वेन वर्तमानत्वादिबोधस्योपपादयितुमशक्यत्वादत आह ❀ दिगिति ❀ तदर्थस्तु 'पदं वाचकम्' इति पक्षे प्रकृतिप्रत्ययविभागकल्पनया वाचकत्वं तत्रारोप्य पदशक्तिरेव व्युत्पाद्यते । यत्र प्रकृतेर्वा प्रत्ययस्य अश्रूयमाणत्वं

अथ सुबर्थनिर्णयः

सुबर्थमाह—

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥ २४ ॥

प्रभा

लुप्यमानार्थाभिधायी' इति न्यायेन च पदसंज्ञकस्य प्रकृतिरूपस्य, प्रत्ययरूपस्य वा लुप्यमानार्थबोधकत्वमङ्गीकरणीयमिति ।

व्याख्या भूषणसारस्य कृता पञ्चोलिना प्रभा ।
समाप्तिमगमत्तत्र लकारार्थस्य निर्णयः ॥
॥ शुभम्भूयात् ॥

'सर्वं नाम च धातुजमाह' इति निरुक्तान्नाम्नो मूलभूतधातोस्तत्प्रकृतिप्रत्ययानाञ्चार्थनिर्णयानन्तरं वक्तव्यत्वरूपावसरसङ्गत्या तिङः पदत्वप्रयोजकतया, क्रियया कारकस्याकाङ्क्षितत्वेन च स्मृतत्वात्सुबर्थं निरूपयन्नाह—आश्रय इति—कर्मद्वितीयायाः, कर्तृकरणतृतीयायाः, अधिकरणसप्तम्याश्च आश्रयोऽर्थः । अवधिः पञ्चम्यर्थः । उद्देश्यः सम्प्रदानचतुर्थ्यर्थः । सम्बन्धः शेषषष्ठ्यर्थः । एतेन उपपदद्वितीयादिविभक्तीनाम्, कारकषष्ठ्याश्च आश्रयादिनार्थ इत्यपास्तम् । शक्तिरेवेति—आश्रयत्वम्, अवधित्वम्, उद्देश्यत्वम्, सम्बन्धत्वम् एव वा उक्तविभक्त्यर्थ इति पक्षान्तरम् । यथायथम्—तत्तद्विभक्तीनां यद्यदात्मीयमर्थस्वरूपं तद्यथायथं विभक्त्यर्थ इत्यर्थः । 'यथास्वे यथायथम्' इत्युक्तेः ।

सुपां कर्मेति—

सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ॥ १ ॥

अयं भावः—'कर्मणि द्वितीया' इत्यादेः प्रकरणस्य, 'बहुषु बहुवचनम्' इत्यादेश्च सुबादिविधायकसूत्रेण सहैकवाक्यता । तथाच प्रातिपदिकादेकत्वविशिष्टे कर्मणि द्वितीयैकवचनमित्येवं रूपेण प्रत्ययविधाने सङ्ख्याकर्मादयश्च सुपामर्था भवन्ति, तथैव तिङामपि सङ्ख्याकर्मादिश्चार्थः, तत्रार्थनियमः प्रसिद्ध इत्यर्थः । नियमः प्रकृतेषु वेति—प्रकृतेषु अर्थेषु वा नियमः, तुल्यजातीयस्यार्थस्य तुल्यजातीयेन नियमेन व्यावृत्तिः क्रियते, इत्यव्ययानां सङ्ख्याद्यर्थैकत्वाभावान्नियमसजातीयत्वाभावेन तेभ्यः स्वादयः सिद्ध्यन्तीति स्पष्टं 'बहुषु बहुवचनम्' (१।४।२१) इति सूत्रे भाष्ये ।

दर्पणव्याख्या

तत्र श्रूयमाणस्यैव तदर्थकत्वं कल्प्यते । तदाहुः "शिष्यमाणं लुप्यमानाऽर्थाभिधायि" इति । अत एव, 'व्यतिसे' इयानित्यादौ प्रत्ययमात्रात्प्रकृत्यर्थविषयको बोध इत्यादिः ॥ २३ ॥

॥ इति भूषणसारदर्पणे लकारार्थनिर्णयः ॥ २ ॥

अवसरसङ्गत्या सुबन्तार्थे निरूपणीये प्रातिपदिकार्थविशेष्यत्वात् क्रियाकाङ्क्षितत्वाच्चादौ (कारक) विभक्त्यर्थनिरूपणमित्यभिप्रायवानाह ❀ सुबर्थमिति ❀ ।

SGDF
Sri Gargeshwari Digital Foundation

द्वितीया-तृतीया-सप्तमीनामाश्रयोऽर्थः। तथाहि—"कर्मणि द्वितीया" (पा० सू० २।३।२)। तच्च कर्त्तुरीप्सिततमम्—क्रियाजन्यफलाश्रय इत्यर्थः, क्रियाजन्यफलवत्त्वेन कर्मण एव कर्त्तुरीप्सिततमत्वात्।

प्रभा

आश्रयोऽर्थ इति—आश्रयतावानित्यर्थः, आश्रयनिष्ठा वाच्यता न किञ्चिद्धर्मावच्छिन्ना, आश्रयत्वस्य भूतलादावपि सत्त्वेनातिप्रसक्तया द्वितीयादिवाच्यतानवच्छेदकत्वात्। फलादिनिरूपितत्वविशिष्टमाश्रयत्वमपि नावच्छेदकम्, गौरवात्, 'वैकुण्ठमध्यास्ते' इत्यादौ तदभावेन न्यूनवृत्तित्वाच्च। तच्च = कर्म च। ननु कर्तृनिष्ठा या प्राप्तीच्छा तद्विशेष्यं कर्मेत्येव सूत्राल्लभ्यते इत्याश्रयार्थत्वमसङ्गतमित्याशङ्कायामाह—क्रियाजन्येति—कर्तुरित्यत्र 'क्तस्य च वर्तमाने' इत्यनेन कर्तरि षष्ठी। सा चाऽऽश्रयमात्रबोधिका। षष्ठीप्रकृतिकर्तृपदार्थश्च प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयरूपस्वतन्त्रपदार्थः। तस्य चाभेदसम्बन्धेन षष्ठ्यर्थाश्रयेऽन्वय इति न 'घटो घटः' इतिवदभेदान्वयबाधः, 'नीलघटो घटः' इत्यत्र विधेयांशेऽधिकावगाहिज्ञानस्य दर्शनेन विधेयीभूतस्य विशिष्टाऽऽश्रयस्याभेदेनाऽऽश्रयान्वये बाधकाभावात्। सङ्केतसम्बन्धेन कर्तृपदवाँस्तु न प्रकृते कर्तृपदार्थः, 'सार्थाद्धीयते' इत्यत्र सार्थपदार्थस्यापादानतया सङ्केतसम्बन्धेन कर्तृपदवत्त्वाभावेन चैत्रादेः कर्मत्वानुपपत्त्या 'हीयते' इत्यत्र कर्मणि लकारानापत्तेः। नच कर्तृसंज्ञया अपादानसंज्ञाया बाधः, 'अपादाने चाहीयरुहोः' इति ज्ञापकेन कर्तृसंज्ञया अपादानसंज्ञाया बाधाभावकल्पनात्। आप्तिश्चात्र सम्बन्धः। सन्नन्तात्कर्मणि क्ते सम्बन्धविषयकेच्छाविषय ईप्सितपदार्थः। 'केन सम्बन्धुमिष्टः' इत्याकाङ्क्षायामुपस्थितत्वात्कर्तृपदार्थविशेषणीभूतव्यापारेण। सम्बन्धश्चोपस्थितत्वात् स्वजन्यफलाश्रयत्वरूप एव। फलाश्रयत्वञ्च—फलतावच्छेदकसम्बन्धेन। तथाच 'प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयनिरूपितफलतावच्छेदकसम्बन्धावच्छिन्नाऽऽधेयतावत्फलाश्रयः कर्मसंज्ञकः' इति सूत्रतो लाभात् अनुभवानुरोधात् कर्तृनिष्ठेत्यादीनां सूत्रार्थबोधविषयत्वेऽपि आश्रयमात्रस्य शक्यत्वं शेषस्योपलक्षणत्वमिति क्रियाजन्यफलाश्रयः कर्म इत्युक्तिर्नासङ्गता।

दर्पणव्याख्या

❀ आश्रयोऽर्थ इति ❀ किञ्चिद्धर्मानवच्छिन्नाश्रयतावानित्यर्थः। तेन चतुर्थी-पञ्चम्योरर्थयोरुद्देश्यावध्योराश्रयात्मकत्वेऽपि न क्षतिः। तत्र द्वितीयाया आश्रयार्थकत्वे मानमाह—❀ तथाहीत्यादिना ❀।

ननु यथाश्रुते 'कर्त्तुरीप्सिततमम्' इत्यनेन कर्त्तृसम्बन्धिप्राप्तीच्छाविशेष्यस्यैव कर्मत्वं प्रतिपाद्यते, नतु क्रियाजन्यफलाश्रयस्येत्यत आह ❀ क्रियाजन्यफलवत्त्वेनेति ❀ अयं भावः—सूत्रे 'ईप्सिततम'शब्द आप्नोतेरिच्छासन्नन्तात् कर्मक्तान्तात् प्रकृत्यर्थातिशय्योतके तमपि निष्पन्नः। तद्योगाच्च कर्त्तृशब्दात्, "क्तस्य च वर्त्तमाने" (पा० सू० २।३।६७) इति कर्त्तरि षष्ठी। तथाच कर्त्रोपस्थितत्वात् स्वीयव्यापारेण व्याप्तुमिष्यमाणतमं व्यापारजन्यफलसम्बन्धित्वप्रकारककर्त्तृनिष्ठोत्कटेच्छाविषयः कर्मेति पर्य्यवसानात् क्रियाजन्यफलाश्रयस्य कर्मतालाभ इति। नचेच्छाकर्मीभूतार्थधातोरेव "धातोः कर्मणः" इति सूत्रेणेच्छायां सनो विधानाद् व्याप्तीच्छार्थकसन्नन्तधातुना व्याप्तिरूपकर्मोपसंग्रहाज्जीवत्यादिवदकर्मकतया ततः कथं कर्मक्तोपपत्तिरिति वाच्यम्, धात्वर्थोपसङ्गृहीतकर्मत्वमित्यत्र कर्मणा तद्धात्वर्थीयकर्मान्तरानाकाङ्क्षत्वविशेषेण सन्प्रकृतिधात्वर्थकर्मणः कर्मान्तरसाकाङ्क्षत्वेनोक्ताकर्मकत्वस्य सन्नन्ते असम्भवात्। एवं सन्नन्तस्य वृत्तितया तद्घटककर्माऽऽदाय कर्मसंज्ञकान्वय्यर्थकत्वरूपसकर्मकत्वाभावेऽपि तद्बहिर्भूतकर्मान्वयित्वमादायैव सकर्मकत्वं बोध्यम्। एवं फलतावच्छेदकसम्बन्धेन तद्धात्वर्थफलव्यधिकरणव्यापारवाचकत्वरूपं तदपीति नेप्सत्यादितः कर्मप्रत्ययानुपपत्तिः। जिघ्रतेरपि स्वार्थान्तरभूतकर्मणस्तदीयपुष्पादिकर्मान्तरसाकाङ्क्षत्वमस्त्येव। गन्धनिरूपितलौकिकविषयितायां पुष्पादेः स्वनिष्ठाधेयत्वीयसांसर्गिकविषयतानिरूपितप्रकारतानिरूपकत्वेनान्वयेनाकर्मत्वात्।

Sri Gargeshwari Digital Foundation

"तथायुक्तञ्चानीप्सितम्" (पा० सू० १ । ४ । ५०) इत्यादिसंग्रहाच्चैवमेव युक्तम्। ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगः, नतु वाच्यकोटौ तत्प्रवेशः।

प्रभा

ननु इच्छाकर्मीभूतार्थकधातोरिच्छायां सनो विधानादाप्धात्वर्थसम्बन्धरूपकर्मणो धात्वर्थेऽन्तर्भावादकर्मकत्वापत्तिरिति कथं सन्नन्तात्कर्मणि क्त इति चेन्न, तादृशकर्मणः सन्नन्तधात्वर्थेनोपसङ्ग्रहेऽपि बहिर्भूतकर्मादाय जिघ्रतेर्गन्धरूपकर्मणो धात्वर्थकुक्षिगतत्वेऽपि पुष्यादिकर्मणा सकर्मकत्ववत्सन्नन्ते सकर्मकत्वस्य वक्तुं शक्यत्वात्, सन्प्रकृतेः सकर्मकतया कर्मणि प्रत्ययस्य सुलभत्वाच्च।

ननु सना इच्छायाः प्रतीतेः फलाश्रयत्वेनेच्छोद्देश्यस्यैव 'कर्तुरीप्सिततमम्' इति सूत्रेण लाभात् क्रियाजन्यफलाश्रयस्य कर्मत्वोक्तिरसङ्गतेत्याशङ्कायामाह—तथायुक्तञ्चेति—तादृशफलाश्रयत्वेनेच्छोद्देश्यत्वं कर्मसंज्ञायामेवोपयोगि, नतु तावतो वाच्यकोटौ निवेशः। 'तथायुक्तञ्चानीप्सितम्' इति सूत्रारम्भेण कर्मपदघटिते 'कर्मणि द्वितीया' इत्यादिशास्त्रे सर्वविधकर्मणो ग्रहणस्यावश्यकतया फलाश्रयत्वेनैव कर्मणो द्वितीयादिवाच्यत्वम्।

वस्तुतस्तु—'अधिशीङ्स्थासां कर्म' 'दिवः कर्म च' इत्यादिसूत्रबोधितकर्मणः सङ्ग्रहाय कारिकायामाश्रयपदेन 'कर्मणि द्वितीया' इत्यादौ कर्मपदेन च कर्मत्वशक्त्याऽऽश्रय इत्यर्थ एवोचितः। कर्मत्वशक्तिश्च यस्य यस्य कर्मसंज्ञा तत्र तत्र बोध्या, संज्ञाया एव तद्द्योतकत्वात्। क्रियाजन्यफलाश्रयस्यैव कर्मपदेन ग्रहणे तु 'वैकुण्ठमधिशेते' इत्याद्यसिद्ध्यापत्तिरिति पञ्चोलिनः।

इत्यादीति—आदिना 'गतिबुद्धि' इत्यादेः परिग्रहः। एवमेव = इच्छया अघटितमेव। नन्वेवं 'हरिं भजति' इत्यादौ कर्मण ईप्सितत्वेन भानं न स्यादित्यत आह—ईप्सितानीप्सितत्वयोरिति। नन्वेवमपि क्रियाजन्यफलाश्रये एव शक्तिर्नतु आश्रयमात्रे इत्यत आह—

दर्पणव्याख्या

'कृष्णाय राध्यति' इत्यस्य 'कृष्णस्य शुभाशुभं पर्यालोचयति' इत्यर्थान्न धात्वर्थान्तर्भूतशुभाशुभकर्मणः कर्मान्तरसाकाङ्क्षमिति न तत्रातिप्रसङ्गः। बुभूषत्यादीनां तु भवनाऽऽदिकर्मणः कर्मान्तरानाकाङ्क्षस्य धात्वर्थतावच्छेदककोटिप्रविष्टत्वादकर्मकत्वं व्यक्तमेव। एवं 'स्वर्यते' इति भाष्यप्रयोगस्थस्वरवद्रूपविकृतिकर्मणः सन्निहितशब्दरूपप्रकृतिकर्मसाकाङ्क्षतया करोत्यर्थणिजन्तात् कर्मप्रत्ययोपपत्तिरिति बोध्यम्। केचित्तु-सनाद्यन्तस्य धात्वर्थोपसङ्गृहीतत्वेनाकर्मकत्वेऽपि तत्प्रकृतेः सकर्मकत्वमादाय तस्मात् कर्मप्रत्ययोपपत्तिमाहुः।

ननु तथापीष्टाघटितस्य भवदुक्तस्य कथं कर्मलक्षणत्वमत आह—❀ तथायुक्तमिति ❀ कर्मव्यवहारस्य द्वेषोदासीनयोरप्यविशिष्टत्वात्तत्साधारणस्यैव लक्षणत्वमुचितम्। इच्छाघटितस्यैव तस्य लक्षणत्वे तु द्वेष्यादिकर्मण्यव्याप्तिः स्यात्। तथाच तत्साधारण्यायेदमेवाश्रयितुं युक्तमिति भावः। ❀ एवमेवेति ❀ इत्थमेवेत्यर्थः। ननु द्वितीयाया उक्तकर्मार्थकत्वे 'हरिं भजति' इत्यादौ हर्य्यादेरीप्सितत्वादिना शाब्दबोधे भानानुपपत्तिरत आह—❀ ईप्सितानीप्सितत्वयोरिति ❀। ❀ भानाभावेनेति ❀ सार्वजनीनतयाऽनुभवाभावेनेत्यर्थः। ननु तर्हि क्रियाजन्यफलाश्रयः कर्मेत्येव सूत्र्यतामत आह—❀ संज्ञायामेवेति ❀

अयमाशयः—क्रियाजन्यफलाश्रयः कर्मेति सूत्रप्रणयने यद्यपीप्सितानीप्सितयोरविशेषेण संज्ञा सिद्ध्यति, तथाप्यग्नेर्माणवकं वारयतीत्यादौ क्रियाजन्यफलभागित्वेनेष्टस्य माणवकस्यापि विशेषविहितेन "वारणार्थानाम्" (पा० सू० १ । ४ । २७) इत्यनेनापादानसंज्ञा प्रसज्येत। सूत्रन्तु 'हरिं भजति' इत्यादौ चरितार्थम्। तत्परिहारायेप्सिततमत्वस्य संज्ञाकोटौ निवेशे अप्राप्तद्वेषोदासीनसंज्ञाविधानार्थमुत्तरसूत्रमिति तथा नोक्तमिति। ननु तथापि पञ्चम्या इव न द्वितीयाया अप्याश्रयमात्रार्थकता, किन्तु विशिष्टस्यैवेत्यत आह—

Sri Gargeshwari Digital Foundation

तथाच क्रियायाः, फलस्य च धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः। तत्त्वञ्चाखण्डशक्तिरूपमवच्छेदकम्। 'ओदनं पचति' इत्यत्र विक्लित्त्याश्रयत्वात् कर्म्मता।

प्रभा

तथाचेति—क्रियाजन्यफलाश्रयस्य कर्मत्वे चेत्यर्थः। ननु आश्रयत्वस्य निरूपकादिभेदेन भेदात् शक्त्यानन्त्यमित्यत आह—तत्त्वञ्चेति—आश्रयत्वञ्चेत्यर्थः। अखण्डशक्तिरूपम् = अखण्डोपाधिरूपम्। उपाधित्वञ्च—'विशेषणत्वे सति जातिभिन्नत्वम्'। तत्राखण्डत्वञ्च—'इतरपदार्थघटितस्वरूपकधर्मभिन्नत्वम्'। तथाच फलाश्रयत्वरूपस्य सखण्डस्योपाधित्वेऽपि शक्त्यानन्त्यतादवस्थ्यमित्यपास्तम्। अखण्डत्वे घटत्वादिवदेकत्वमेव तस्येति भावः। अत एवैकस्य तस्य शक्यतावच्छेदकत्वे लाघवम्। अर्थस्वरूपभेदेऽपि 'आश्रयः' 'आश्रयः' इत्यनुगतव्यवहारनियामकत्वादपि एकमेवाऽऽश्रयत्वम्।

नचैवं विभुषु आकाशादिषु 'विभुः' विभुरित्यनुगतप्रतीत्या एकं विभुत्वं सिध्येदिति वाच्यम्, इष्टापत्तेः। 'ग्रामं गच्छति' इत्यादौ ग्रामस्याभेदेन द्वितीयार्थाश्रयेऽन्वयः, तस्य 'स्वनिष्ठाऽऽश्रयतानिरूपकत्व' सम्बन्धेन संयोगादिरूपे फलेऽन्वयः। नचाऽऽश्रयत्वस्य निरूपकभेदेन भेदान्नानात्वापत्तिः, समवायस्य प्रतियोग्यनुयोगिभेदेऽपि एकत्ववन्निरूपकभेदेऽपि तद्भेदाकल्पनात्। नच 'स्वनिष्ठाश्रयतानिरूपकत्व'स्य वृत्त्यनियामकतया तस्य प्रतियोगिताऽनवच्छेदकत्वेन 'विहगो भूमिं गच्छति न महीरुहम्' इत्यादौ संयोगे आश्रयाभावबोधानापत्तिः, वृत्त्यनियामकस्यापि प्रतियोगिताऽवच्छेदकत्वोपगमात्। नचातिरिक्ताभावस्वीकारे गौरवम्, मन्मते तु तादृशाभावाप्रसिद्धिरेवेति वाच्यम्, 'स्वनिष्ठाश्रयतानिरूपकत्वसम्बन्धस्य स्वरूपसम्बन्धेन योऽभावः स च नैयायिकसम्मत इति तस्य स्वनिष्ठाश्रयतानिरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य च समनियततया समनियततयोरैक्यादभावान्तरस्वीकारकृतगौरवाभावात्। वृत्त्यनियामकसम्बन्धावच्छिन्ना प्रतियोगिताऽतिरिच्यते इति गौरवमित्यपि न, वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वे बहुविधलाघवस्य सत्त्वेनेदृशगौरवस्याकिञ्चित्करत्वात्। कर्मतेति—कर्मसंज्ञेत्यर्थः।

दर्पणव्याख्या

❀ तथाचेति ❀। ❀ आश्रय एव ❀ इत्येवकारेण विशिष्टार्थस्य शक्यत्वव्यवच्छेदः। नन्वाश्रयत्वस्य तत्तत्स्वरूपात्मकस्य तत्तदाश्रयभिन्नत्वात् कथं तस्य शक्यतावच्छेदकत्वम्, अनुगतधर्मस्यैव तत्त्वादत आह—❀ तत्त्वञ्चेति ❀ आश्रयत्वं चेत्यर्थः। ❀ अखण्डशक्तिरूपमिति ❀ शक्तिः = धर्मः; इतरपदार्थघटितमूर्त्तिकधर्मरूपमिति यावत्। आश्रय इत्यनुगतव्यवहारादाश्रयपदे शक्यतावच्छेदकत्वाच्च तत्सिद्धिर्द्रव्यत्वादिवदिति भावः।

नैयायिकास्तु—आश्रयताया नियतान्यनिरूपितस्वरूपाया अनुगमकत्वाऽसम्भवः। शक्यतावच्छेदकत्वस्यापि विभुत्वान्यतरत्वादौ व्यभिचारेण नाखण्डत्वसाधकत्वमिति न द्वितीयाया आश्रयोऽर्थः, तस्य प्रकृत्यैव लाभात्, प्रकृत्यर्थभिन्नत्वेन तत आश्रयस्याननुभवाच्च। किन्तु फलान्वयिनी वृत्तिरेव तदर्थः। कर्मणि द्वितीयेत्यस्य फलनिष्ठाऽऽधेयत्वान्वये प्रकृतितात्पर्य्ये तदुत्तरं द्वितीयेत्यर्थात् न तद्विरोधोऽपि। अनादितात्पर्यग्राहकत्वेन परम्परया शक्तिग्राहकत्वाच्च न तद्वैय्यर्थ्यम्। आश्रयत्वन्तु न तच्छक्यम्, तस्य निरूपकतासम्बन्धेनैव फलान्वयित्वस्याभ्युपगन्तव्यतया निरूपकत्वस्य च वृत्त्यनियामकतयाऽभावप्रतियोगिताऽनवच्छेदकत्वेन 'विहगो भूमिं गच्छति, न महीरुहम्' इत्यादौ धात्वर्थफले संयोगे महीरुहनिष्ठाश्रयतायास्तेन सम्बन्धेनाभावस्याप्रसिद्धतया तत्राबोधत्वासम्भवात्। नच सूत्रस्वरसभङ्गः, 'शक्तिः कारकम्' इति पक्षे तदयोगात्। आधेयताया अपि निरूपकतया कारकधर्मत्वादित्याहुः।

❀ विक्लित्त्याश्रयत्वात् कर्मतेति ❀ कर्मसंज्ञेत्यर्थः। एतेन कर्त्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यतद्व्यधिकरणप्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमुक्तं भवति। यद् वक्ष्यति 'उक्तप्रायत्वात्' इति। 'अग्नेर्माणवक वारयति' इत्यादावग्न्यादावति-

प्रभा

एतेन स्वतन्त्रनिष्ठप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यतादृशव्यापारानधिकरणवृत्तिप्रकृतधात्वर्थफलाश्रयत्वं कर्मसंज्ञाप्रयोजकमिति सूचितम्। 'अग्नेर्माणवकं वारयति' इत्यत्र वारयतेः संयोगानुकूलव्यापाराभावानुकूलव्यापारवाचकतया अग्निवृत्तिसंयोगस्य प्रधानीभूतव्यापारप्रतिबन्ध्यत्वेन कर्मत्वाप्राप्त्या तत्र 'वारणार्थानाम्' इत्यस्य चारितार्थ्येन न माणवकस्य अपादानत्वम्, किन्तु परत्वात्कर्मत्वमेव। अग्निसंयोगे माणवकव्यापारप्रयोज्यत्वसत्त्वेन कर्मत्ववारणाय व्यापारे प्रधानत्वविशेषणम्। 'ग्रामं गच्छति' इत्यादौ संयोगस्य व्यापाराधिकरणभिन्नग्रामवृत्तितया नाव्याप्तिः, कर्त्रादौ प्राप्तापि कर्मसंज्ञा कर्तृसंज्ञया बाध्यते। 'चैत्रः शेते' इत्यादौ निद्रारूपफलस्य व्यापारानधिकरणावृत्तितया नातिव्याप्तिः।

निद्रा तु—

"यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः" ॥ १ ॥

इत्युक्तेर्विषयेभ्यः कर्मेन्द्रियाणां व्यापारविरमरूपा।

योगसूत्रे तु "अभावप्रत्ययालम्बना वृत्तिर्निद्रा", जाग्रत्स्वप्नवृत्तीनामभावस्य प्रत्ययः=कारणं बुद्धिसत्त्वाच्छादकं तम एवाऽऽलम्बनम्=विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा। सा च निद्रा प्रत्ययविशेष एव, नतु निरोधकैवल्ययोरिव वृत्त्यभावः। अत एव 'सुखमहमस्वाप्सम्' इति प्रत्ययोपपत्तिः।

'माषेष्वश्वं बध्नाति' इत्यत्र माषस्य प्रकृत (उच्चरितवाक्यघटक) धात्वर्थप्रधानीभूतबन्धनप्रयोज्यभक्षण-(गलबिलाधःसंयोग) रूपफलाश्रयत्वसत्त्वेन कर्मत्ववारणाय फले प्रकृतधात्वर्थत्वविशेषणम्। भक्षणस्य प्रकृतधात्वर्थत्वाभावान्न दोषः। फलताऽवच्छेदकसम्बन्धेन फलाऽऽश्रयत्वनिवेशात् 'तण्डुलं पचति' इत्यादौ कालस्य कालिकसम्बन्धेन विक्लित्त्याश्रयत्वेऽपि न कर्मत्वम्।

फलतावच्छेदकसम्बन्धश्च न फलनिष्ठकार्यताऽवच्छेदकः। कालिकसम्बन्धेन फलोत्पत्तिं प्रति तादात्म्येन कालस्य कारणतया तण्डुलं पचति देवदत्ते 'काष्ठं पचति' इत्यादेरप्यापत्तेः। समवायेन संयोगविभागौ प्रति तादात्म्येन द्रव्यस्य कारणतया फलतावच्छेदकसम्बन्धेन व्यापारानधिकरणवृत्तिफलवाचकत्वेन सकर्मकत्वम्, फलतावच्छेदकसम्बन्धेन व्यापारानधिकरणवृत्तिफलवाचकत्वेनाकर्मकत्वं वोभयोरपि विभाग-संयोगरूपफलवाचकयोस्त्यजति-विभजत्योः स्यात्। अतस्तत्तद्धातुनिष्ठशक्तिविषयत्वं स्वरूपसम्बन्धविशेषरूपेऽनुकूलत्वे, स्वेच्छाधीनेच्छाविषयत्वे च स्वीकर्त्तव्यम्। प्रयोगानुसारादनुकूलत्वम्, स्वेच्छाधीनेच्छाविषयत्वञ्च व्यापारे भासते। स्वः=कर्त्ता। तथाच कर्तृनिष्ठेच्छीयफलनिष्ठाऽऽधेयतावच्छेदको यः सम्बन्धः स एव फलतावच्छेदकस्तेन सम्बन्धेन फलाश्रयस्य कर्मत्वं बोध्यम्। एवञ्च 'तण्डुलं पचति' इत्यादौ समवायेन 'विक्लित्त्याश्रयस्तण्डुलो भवतु' इति कर्तृनिष्ठेच्छीयफलनिष्ठाऽऽधेयताया अवच्छेदकः सम्बन्धः समवाय इति तेन सम्बन्धेन फलाऽऽश्रयस्य तण्डुलादेरेव कर्मत्वम्, नतु कालिकादिसम्बन्धेन फलाश्रयत्वमादाय कालादेः, पाषाणादेर्वा।

एवं विपूर्वकभज्धातुसमभिव्याहारे 'अनुयोगित्वेन विभागाश्रयोऽहं भवेयम्' इतीच्छाया एव कर्तृनिष्ठत्वेनात्रेच्छीयफलनिष्ठाऽऽधेयताऽऽख्यविषयताया अनुयोगित्वसम्बन्ध एव फलताऽवच्छेदक इति तेन सम्बन्धेन तत्प्रतियोगिभूतग्रामादौ विभागस्यासत्त्वेन न तस्य कर्मत्वम्, सम्बन्धानुयोगित्वस्य तत्सम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतारूपतया तादृशविशेष्यतायाश्चास्मदर्थे एव सत्त्वात्। नचास्मदर्थस्य कर्मत्वापत्तिः, कर्तृसंज्ञया परत्वाद्बाधादिति 'ग्रामाद्विभजते' इत्यादौ न दोषः। एवमेव 'वृक्षं त्यजति खगः' इत्यादौ 'प्रतियोगित्वेन विभागाश्रयो वृक्षो भवतु' इतीच्छाया एव खगे सत्त्वेन तत्र प्रतियोगित्वरूपफलतावच्छेदकसम्बन्धेन विभागरूपफलवत्त्वस्य वृक्षे सत्त्वात्कर्मत्वम्। खगस्य तादृशेच्छायां बीजन्तु सर्वाभिमत उक्तप्रयोग एव।

'घटं करोति' इत्यत्र उत्पत्त्याश्रयत्वात्, उत्पत्ते-

प्रभा

एवञ्च 'व्यापारानधिकरणनिरूपितफलताऽवच्छेदकसम्बन्धावच्छिन्नाधेयतावत्फलवाचकत्वं सकर्मकत्वम्'। त्यजतेः व्यापाराधिकरणाभिन्ननिरूपितफलतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभाववत्फलवाचकत्वमकर्मकत्वञ्च विभजतेः सिद्ध्यति।

नन्वेवमपि प्रतियोग्यनुयोग्युभयकर्मजविभागस्थले उभयत्रापि प्रतियोगित्वस्य, अनुयोगित्वस्य च सत्त्वेन 'चैत्रान्मैत्रो विभजते' इत्यादौ चैत्रे, मैत्रे चानुयोगितासम्बन्धेन विभागरूपफलवत्त्वात्कर्मत्वापत्तिरिति चेन्न, अत्र 'अनुयोगित्वेन विभागाश्रयो मैत्रो भवतु' इतीच्छाया एव कर्तृनिष्ठत्वेन चैत्रस्य कर्तृवृत्तीच्छोद्देश्यत्वाभावेन कर्मसंज्ञाया अप्राप्तेः। नच फलताऽवच्छेदकसम्बन्धेन फलाश्रयत्वमात्रेण 'तथायुक्तम्' इत्यनेन कर्मत्वापत्तिः, अत्रेच्छोद्देश्यत्वस्यानपेक्षणादिति वाच्यम्, अनेन सूत्रेण फलनिष्ठविशेष्यतानिरूपितफलतावच्छेदकसम्बन्धावच्छिन्नबोधीयप्रकारताऽऽश्रयत्वप्रकारकतात्पर्यविषयस्य कर्मसंज्ञाविधानात्। तादृशतात्पर्यविषयश्च कर्तैव नतु चैत्रः। नन्वेवमपि 'स्तोकं पचति' इत्यादौ विक्लित्त्यादेः फलस्य फलताऽवच्छेदकसमवायादिसम्बन्धेन फलाश्रयत्वाभावात्कर्मत्वानापत्तिः, 'क्रियाविशेषणानां कर्मत्वम्' इत्यभियुक्तोक्त्या व्यपदेशिवद्भावेन फलाऽऽश्रयत्वकल्पनात्, फलाऽऽश्रयस्यैव फलताऽवच्छेदकतावच्छेदकसम्बन्धेन फलताऽवच्छेदकधर्माश्रयस्यापि कर्मसंज्ञाविधानाच्चेति दिक्।

ननु 'काशीमगच्छन् काशीं गतः' इत्यत्र काश्याः फलाऽऽश्रयत्वेनेच्छोद्देश्यत्वाभावात् कर्मत्वानापत्तिरिति चेन्न, क्वचित्प्रसिद्धस्य काश्यभिन्नकर्मोद्देश्यकगमनकर्तृत्वस्याभावबोधनेन काश्यभिन्नकर्मोद्देश्यकगमनकर्तृत्वाभाववान् काशीकर्मकगमनकर्तेति बोधेनाऽऽद्यस्य कर्तुरिति, द्वितीयस्य 'तथायुक्तम्' इति कर्मत्वेनादोषात्।

एवम् 'ग्रामं न गच्छति चैत्रः' इत्यत्र बाह्यसंयोगानुकूलव्यापारस्यासत्त्वेऽपि "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति पतञ्जल्युक्तरीत्या बौद्धव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वमादाय ग्रामस्य कर्मत्वं बोध्यम्।

यद्वा 'मातुः स्मरति' इत्यादौ मातुः फलाश्रयत्वेऽपि कर्मत्वशक्तिमत्त्वेन विवक्षायां कर्मत्वादर्शनात् 'विवक्षातः कारकाणि भवन्ति' इत्यस्यावश्यं स्वीकरणीयतया कर्तृ (स्वतन्त्र) वृत्तिप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वनिष्ठविशेष्यतानिरूपितनिष्ठत्वसम्बन्धावच्छिन्नप्रकारताश्रयत्वेन विवक्षितं कारकं कर्मसंज्ञकमिति 'कर्तुः' इत्यनेन विवक्षितत्वात् तादृशफलाश्रयत्वप्रकारकग्रामनिष्ठोद्देश्यत्वाभाववद्गमनस्य, तादृशोद्देश्यत्ववद्गमनाभावस्य वा विवक्षितत्वेनोद्देश्यत्वनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वस्य ग्रामे सत्त्वात् कर्मत्वं सिध्यतीत्यन्यत्र विस्तरः।

उत्पत्त्याश्रयत्वादिति—अस्य कर्मतेति शेषः। उत्पत्तेरिति—उत्पत्त्यनुकूलव्यापारस्येत्यर्थः, धातुमात्रस्य

दर्पणव्याख्या

व्याप्तिनिरासाय व्यापारे कर्तृगतत्वमुपात्तम्। वारयतेश्च संयोगानुकूलव्यापाराभावानुकूलव्यापारोऽर्थः। 'चैत्रो ग्रामं गच्छति' इत्यादौ चैत्रादेर्वारणाय व्यधिकरणेति। वैयधिकरण्यञ्च—तदनधिकरणवृत्तित्वम्, नतु तदधिकरणावृत्तित्वम्, तस्य संयोगे असत्त्वेन ग्रामादावव्याप्तेः। तादृशवैयधिकरण्यविशिष्टाधिकरणतायाश्चैत्रादावसत्त्वान्नातिप्रसङ्गसम्भावनाऽपि। 'माषेष्वश्वं बध्नाति' इत्यादौ बन्धनप्रयोज्यभक्षणाऽऽश्रयमाषाणां तत्त्ववारणाय प्रकृतधात्वर्थत्वं फलविशेषणम्। प्रकृतत्वञ्च—तत्र तत्र विशिष्योपादेयम्। 'पयसौदनं भुङ्क्ते' इत्यादौ तु कर्मत्वाविवक्षणान्न द्वितीया, कृतभोजनस्य पयोलोभेन प्रवृत्तावीप्सिततमत्वस्यापि पयसि सम्भवादिति।

ननु परैः कृञो यत्नमात्रार्थकत्वाभ्युपगमात् कथमुत्पत्तेः प्रकृतधात्वर्थत्वमत आह—❀ उत्पत्तेरिति ❀ तथाच, कृञ

Sri Gargeshwari Digital Foundation

धात्वर्थत्वात्। 'जानाति' इत्यत्र आवरणभङ्गरूपधात्वर्थफलाऽऽश्रयत्वात्। अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्याऽऽवश्यकत्वात्। अन्यथा 'यथापूर्वं न जानामि' इत्यापत्तेः।

प्रभा

फल-व्यापारोभयार्थकत्वस्य पूर्वोक्तप्रमाणैः साधनात्। एवञ्च नैयायिकोक्तं जानातेर्ज्ञानमात्रार्थकत्वमसङ्गतमिति ध्वनयन्नाह—जानातीत्यत्रेति। आवरणम्=अज्ञानम्, तस्य भङ्गः=नाशः, तदनुकूलो व्यापारः=विषयाकारान्तःकरणवृत्तिरूपः। तथाच अभावरूपस्यावरणभङ्गरूपफलस्य फलताऽवच्छेदकस्वरूपसम्बन्धेन घटादौ सत्त्वात्कर्मत्वोपपत्तिः। नचाज्ञानस्य ज्ञानात्यन्ताभावरूपतया नित्यत्वेन तद्भङ्गासम्भव इति वाच्यम्, अज्ञानस्य मायापरिणामरूपत्वेन ज्ञानविरोधिभावरूपत्वात्। आवरणभङ्गानुकूलव्यापारार्थकत्वोक्तिः प्राचां मतेन। ज्ञानानुकूलव्यापार एवार्थः। ज्ञानमेव फलम्, विषयता च फलताऽवच्छेदकः सम्बन्धः, तेन सम्बन्धेन घटादेर्ज्ञानरूपफलाश्रयत्वात्कर्मत्वम्। ननु भूतभविष्यद्घटस्थले आश्रयाभावात् 'अतीतं घटं जानामि' 'भविष्यन्तं घटं जानामि' इति प्रयोगानुपपत्तिरित्यत आह—अतीतानागतादीति—अतीतम्=भूतम्। अनागतम्=भविष्यत्। अतीतानागतयोरावरणभङ्गरूपफलाश्रयत्वानुपपत्तिः, असत आश्रयत्वायोगात्।

ननु ज्ञानकाले ज्ञानजन्यावरणभङ्गरूपफलस्यातीतादिघटेऽसत्त्वेऽपि तद्घटादिकालावच्छेदेन आवरणभङ्गरूपफलाश्रयत्वमक्षतमेवेति चेन्न, व्यापारस्य स्वशून्योत्तरकालिकफलाऽऽरम्भकत्वस्य स्वशून्यपूर्वकालिकफलारम्भकत्वस्य च क्वाप्यदृष्टत्वेन व्यापारशून्यपूर्वोत्तरकालिकघटकालावच्छेदेन आवरणभङ्गरूपफलाश्रयत्वासम्भवादित्यत आह—तस्येति—वृत्तिरूपज्ञानजन्यस्य तस्य=आवरणभङ्गरूपफलस्य। आवश्यकतामेव दर्शयति—यथापूर्वमिति—अयम्भावः—अतीतानागतस्थले जानातेर्ज्ञानमात्रार्थकत्वस्वीकारे ज्ञानकाले घटस्य विद्यमानतायां ज्ञानेनावरणभङ्ग उत्पद्यत इति तस्मिन्काले आवरणभङ्गविशिष्टं ज्ञानं जातम्। घटस्यातीतादिदशायां जानातिना उत्पन्नज्ञानेन घटादिरूपाऽऽश्रयाभावादावरणभङ्गो नोत्पद्यते इति घटकालोत्पन्नं ज्ञानमिदं ज्ञानमतिक्रामति। तथाच पूर्वकालाद्भूतज्ञानकर्मकातिक्रमणस्य ज्ञाने सत्त्वेनाव्ययीभावेन प्रतीयमानस्यानतिक्रमणस्याभावाक्षततया पूर्वकालिकज्ञानमनतिक्रम्य ज्ञानाभावाश्रयोऽहमिति तव (नैयायिकस्य) मते प्रयोगापत्तिर्दुर्वारा।

मन्मते तु पूर्वकालिकज्ञानस्यैतत्कालिकज्ञानस्य चावरणभङ्गविशिष्टतया अनतिक्रमसद्भावात् 'यथापूर्वं जानामि' इत्येव व्यवहारः। ननु शाब्दिकनयेऽपि असतो घटस्य फलाश्रयत्वाभावात्कथं कर्मत्वमिति चेन्न, यथा नैयायिकनये घटस्यासत्त्वेऽपि विषयतासम्बन्धेन ज्ञानाश्रयत्वमादाय कर्मत्वं तथाऽस्मन्नयेऽपि वक्तुं शक्यत्वात्। व्यवहारानुरोधेन विषयतासम्बन्धेनावरणभङ्गातिरिक्तफलं प्रत्येव सत आश्रयस्य कर्मत्वप्रयोज-

दर्पणव्याख्या

उत्पत्तिरूपफलार्थकत्वस्य प्रागुपपादनान्नार्थासङ्गतिरिति भावः। ❀ धात्वर्थत्वात् ❀ इत्युक्त्या कृञः केवलयत्नार्थकत्वे घटादीनां कर्मत्वानुपपत्तिरपि दोषत्वेन ध्वन्यते। ❀ आवरणभङ्गेति ❀ प्राचीनमतानुसारेणेदम्। निष्कृष्टमते तु ज्ञानरूपफलस्य विषयतया घटादौ सत्त्वात्कर्मतेति बोध्यम्। नचाकर्मकताऽऽपत्तिः, फलतावच्छेदकसम्बन्धेन सामानाधिकरण्याभावात्। नैयायिकमते त्वेतादृशस्थले यथा घटादीनां कर्मत्वं तथोपपादित धात्वर्थनिरूपणावसरे।

ननु विद्यमानघटे ज्ञानजन्यावरणभङ्गस्य सम्भवेऽपि भाविविनष्टघटे निराश्रयस्य तस्यासम्भवेन तस्य कर्मत्वानुपपत्तिरत आह—❀ अतीतानागतेति ❀। तत्राऽऽश्रयताङ्गीकारे युक्तिमाह—❀ अन्यथेति ❀ तत्रावरणभङ्गास्वीकारे इत्यर्थः। ❀ यथापूर्वमिति ❀ जानातिक्रियाविशेषणम्। पदार्थानतिवृत्तावव्ययीभावः। पूर्वमनतिक्रम्येत्यर्थः। पूर्वज्ञानानतिक्रमो यस्मिँस्तदिति यावत्। घटस्य विद्यमानतादशायां तात्कालिकज्ञानस्य तद्घटे आवरणभङ्गजनकतयाऽतीतदशायामाधुनिकाज्ञानस्य

अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया नैयायिकानामिव सत्कार्य्यवादसिद्धान्ताद्वोपपद्यते इति। उक्तञ्च—

तिरोभावाभ्युपगमे भावानां सैव नास्तिता।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते॥ इति।

प्रभा

कत्वात्। शास्त्रपुराणादिजन्यज्ञानानन्तरम् 'अतीतं रामं भविष्यन्तं कलङ्किनञ्च जानामि' इत्यनुव्यवसायानुरोधेन समानकालिकयोरेवाधाराधेय इति नियमे विषयतासम्बन्धस्य यत्राधारतावच्छेदकत्वं तद्विषयातिरिक्तत्वेन सङ्कोच इत्याह—अतीतादेराश्रयता चेति। तथाचानुभवानुरोधाद्विभिन्नकालिकस्यापि घटादेरावरणभङ्गाश्रयत्वं कल्प्यते इति भावः। साङ्ख्यमतानुसारेणाह—सत्कार्येति—कारणे सूक्ष्मरूपेण स्थितस्य सत एव घटादेर्दण्डचक्रादिसामग्रीसमवधानेन स्थूलरूपेणाभिव्यज्यते। सर्वथा असत एवोत्पत्तौ तु सर्वत्र सर्वमुत्पद्येतेति भावः। स्थूलरूपेण स्थितस्य स्वकारणे सूक्ष्मरूपेण स्थितिरेव विनाशः साङ्ख्यानामिति सत्कार्यवादः।

ननु नाशस्यासत्त्वात्मकतया कथं सत्कार्यवाद इति चेदाह—तिरोभावेति—अयम्भावः—अभावो नाम न भावाद्व्यतिरिच्यते, किन्तु सत्तैव तिरोभूय स्वकारणेषु शक्तिरूपतया स्थिता वस्तूनां नाश इत्युच्यते। 'सैव तिरोभावावस्था साधनसम्पर्कात् क्रमवत्त्वेन प्रतीयमाना नश्यती' इति व्यवह्रियत इति। तथाच सूक्ष्मरूपेण स्थितस्य घटस्य भूतभविष्यत्काले आवरणभङ्गरूपफलस्याऽऽश्रयतेति न दोषः। अत एव 'घटो जायते' 'घटं करोमि' इत्यादावुत्पत्तिम्प्रति घटस्य कर्तृत्वादिकारकत्वञ्चोपपद्यते। अन्यथाऽसतस्तदनुपपत्तिरेव। साङ्ख्यमते हर्य्युक्तमपि प्रमाणयति—तिरोभावेति—दण्डाद्यभिघातादिरूपतिरोभावकसामग्रीसमवधाने भावानाम् = पदार्थानां सैव = तिरोभाव एव नास्तितेति—विधेयानुरोधेन स्त्रीलिङ्गनिर्देशः। नास्तिता = 'नष्टः' इति-व्यवहारविषयता। तिरोभावकसामग्र्याः क्रमेण समवधानकाले 'नश्यति' इति व्यवहारः। अभिव्यक्तेः प्राक् सूक्ष्मरूपेण स्थितौ 'नङ्क्ष्यति' इति भविष्यत्त्वेन व्यवहारः। वस्तुतस्तु बौद्धघटमादाय आश्रयत्वादि सर्वमुपपन्नमेव। सूक्ष्मावस्थातः प्रच्युतोऽपि अभिव्यक्तिमप्राप्तो 'जायते' इत्युच्यते। यदा तु सम्यगभिव्यक्तिस्तदा 'अस्ति' इतिव्यवहारः।

दर्पणव्याख्या

तदजनकत्वेन पूर्वातिक्रमस्य तत्त्वात् पूर्वानतिक्रान्तज्ञानाभावस्य विषयस्याबाधात्तादृशप्रयोगस्य प्रामाण्यात्तेरित्यर्थः। अतीतघटे आधुनिकज्ञानेनावरणभङ्गोत्पादाभ्युपगमे तु तेन पूर्वज्ञानानतिक्रमात् तदभावस्य बाधाद्भवति तस्याप्रामाण्यमिति भावः।

ननु विनष्टे घटे वास्तवतदाश्रयतैव कथमत आह—❀ अतीतादेरिति ❀ आदिना भाविपरिग्रहः। ❀ नैयायिकानामिवेति ❀ यथाऽनुभवानुरोधेन तस्मिन् विषयतया ज्ञानाश्रयताङ्गीकारस्तेषां तथास्माकमपीति भावः। नन्वतीतो घटो ज्ञानविषय इति प्रतीतेरस्तु नाम तादृशघटस्य विषयतया ज्ञानाश्रयता; आवरणभङ्गाश्रयतायान्तु न तथा साधकोपलब्धिरत आह—❀ सत्कार्य्येति ❀। तमेव दर्शयति—❀ उक्तञ्चेति ❀ "सदेव सोम्येदमग्र आसीत्" इति श्रुतेः कार्य्यजातं सूक्ष्मरूपेण प्रागवस्थितमेव। परमते जनकत्वेनाभिमतसामग्रीसमवधानात्तु तदभिव्यक्तिर्भवति। कारणे सूक्ष्मरूपेणावस्थानमेव तत्प्रागभावः। तस्यामेवावस्थायां स भविष्यतीति व्यवह्रियते। ततः प्रच्युतमभिव्यक्तिलक्षणं धर्मम्प्राप्तं जायत इति प्राप्ताभिव्यक्तिस्त्वस्तीति।

ननु सर्वदैव सति तस्मिन् कथं नास्ति नश्यतीति व्यवहारोऽत आह—❀ तिरोभावाभ्युपगम इति ❀ तिरोभावाभिव्यञ्जकसामग्र्या तिरोभावेऽभिव्यञ्जिते सति, 'नास्ति' 'नष्टः' 'इति व्यवहारः। लब्धक्रमायान्तु तस्यां नश्यतीति सत्कार्यवादसिद्धान्तः। प्रकृते घटस्य तिरोधानेऽपि सूक्ष्मरूपेण सत्त्वात्तत्रावरणभङ्गरूपफलाश्रयत्वं सुलभमिति भावः। उक्तनिष्कृष्ट

SGDF Sri Gurudev Digital Foundation

ननु 'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात् कर्मताऽऽपत्तौ 'चैत्रश्चैत्रं गच्छति' इत्यापत्तिः, प्रयागतः काशीं गच्छति चैत्रे 'प्रयागं गच्छति' इत्यापत्तिश्च, क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य प्रयागेऽपि सत्त्वात्, इति चेन्न, ग्रामस्येव चैत्रस्यापि फलाऽऽश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्म्मसंज्ञाया बाधेन 'चैत्रश्चैत्रम्' इति प्रयोगासम्भवात्, द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात्। अन्यथा 'गमयति कृष्णं गोकुलम्' इत्यत्रेव 'पाचयति कृष्णेन' इत्यत्रापि कृष्णपदाद् द्वितीयाऽऽपत्तेः।

शाब्दबोधः 'चैत्रश्चैत्रम्' इत्यत्र स्यादिति चेन्न, तथाव्युत्पन्नानामिष्टाऽऽपत्तेः। उच्यतां वा 'प्रकारता-

प्रभा

चैत्रश्चैत्रमिति—चैत्रकर्तृकश्चैत्रनिष्ठसंयोगानुकूलो वर्तमानो व्यापार इत्येकस्मादेव चैत्रपदात् स्यात्। 'चैत्रश्चैत्रम्' इति बोधकारः। यद्वा कर्तृसंज्ञया कर्मसंज्ञाया बाध इति अजानन्नाह—चैत्रश्चैत्रमिति। अत एव वक्ष्यमाणप्रयोगापत्तिरित्युक्तिः सङ्गच्छते। गच्छति चैत्र इति—गच्छतिपदं सप्तम्यन्तम्। संयोगस्येति—एकस्या एव गमिक्रियायाः संयोगो विभागश्च फलमित्यर्थः। प्रयागेऽपीति—फले धात्वर्थविशेषणानिवेशाभिप्रायेणेदम्। विभागरूपफलाश्रयत्वात्प्रयागस्य कर्मत्वापत्तिरिति भावः। बाधेनेति—अस्य परत्वादिति शेषः। ननु कर्तृसंज्ञया कर्मसंज्ञाया बाधेऽपि वस्तुतः कर्मत्वलक्षणाक्रान्तत्वाद् द्वितीया स्यादत आह—द्वितीयोत्पत्ताविति। अन्यथा=संज्ञाया अभावेऽपि कर्मत्वलक्षणसत्तामात्रेण द्वितीयोत्पत्तौ। द्वितीयापत्तेरिति—णिजर्थव्यापारे विशेषणीभूतविक्लित्त्यनुकूलव्यापाररूपफलस्य कृष्णे सत्त्वादिति भावः। द्वितीयायाः संज्ञया नियम्यत्वे तु 'गतिबुद्धि' इति सूत्रस्य नियमार्थतया पचत्यादियोगे फलाश्रयत्वेऽपि कर्मसंज्ञाया अभावेन न द्वितीयापत्तिरिति भावः। ननु णिजन्तभिन्नधात्वर्थव्यापारप्रयोज्यफलाश्रयस्यैव द्वितीयोत्पत्तौ नियामकत्वाभ्युपगमान्नेयमापत्तिरित्यत आह—शाब्दबोध इति—चैत्रकर्तृकं चैत्रकर्मकं गमनमित्याकारकशाब्दबोध इत्यर्थः। इत्यत्रेति—'चैत्रश्चैत्रं गच्छति' इत्यत्रेत्यर्थः। ननु कर्तृसंज्ञया कर्मसंज्ञाबाधे इदं वाक्यमसङ्गतमिति चेन्न, अत्र कर्तुः तादृशफलशालित्वपक्षे चैत्रश्चैत्रमित्याकारकः शाब्दबोध इत्यर्थात्।

ननु विषयाबाधसत्त्वात् चैत्रनिष्ठसंयोगानुकूलश्चैत्रनिष्ठो वर्तमानकालावच्छिन्नो व्यापार इति बोधः स्यादत आह—तथाव्युत्पन्नानामिति—व्युत्पत्तिः=कार्यकारणभावज्ञानम्; 'समवायसम्बन्धेन धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधम्प्रति आश्रयोपस्थितिः कारणम्' इति ज्ञानवतामित्यर्थः। तादृशवाक्यादुक्तशाब्दबोधस्याननुभवादिष्टापत्तेरयुक्तत्वादाह—उच्यतां वेति। प्रकारतेति—'चैत्रनिष्ठसंयोगानुकूलो

दर्पणव्याख्या

कर्मत्वं विशदीकर्तुमाशङ्कते—❀ नन्विति ❀। ❀ विभागस्य ❀ इत्यस्य क्रियाजन्येत्यादि। ननु कर्मसंज्ञायाः परया कर्तृसंज्ञया बाधनेऽपि वास्तवकर्मत्वस्य तत्राबाधात् स्यादेव तादृशप्रयोगोऽत आह—❀ द्वितीयोत्पत्ताविति ❀ इदञ्च प्रकृताभिप्रायेण। कारकविभक्त्युत्पत्तिमात्रस्यैव तन्नियम्यत्वात्। ❀ अन्यथेति ❀ संज्ञाया अनियामकत्वे इत्यर्थः।

❀ द्वितीयाऽऽपत्तेरिति ❀ 'गमयति कृष्णं गोकुलम्' इत्यत्र णिजर्थव्यापारजन्यसंयोगानुकूलव्यापाररूपधात्वर्थफलाश्रयत्वस्येव, 'पाचयति कृष्णेनौदनम्' इत्यत्रापि तादृशव्यापारजन्यविक्लित्त्यनुकूलव्यापाराश्रयत्वस्य तत्र सत्त्वादिति भावः। ❀ शाब्दबोध इति ❀ चैत्रनिष्ठसंयोगानुकूलश्चैत्रकर्तृको वर्तमानो व्यापार इति शाब्दबोध इत्यर्थः, तद्विषयस्याबाधादिति भावः। ❀ तथाव्युत्पन्नानामिति ❀ सामान्यतो धात्वर्थफलविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधे आश्रयोपस्थितेर्हेतुत्ववादिनामित्यर्थः। बोधस्य स्वस्वव्युत्पत्त्यनुसारित्वादिति भावः।

चैत्रकर्मकचैत्रकर्तृकव्यापारशाब्दबोधस्य 'चैत्रो ग्रामं गच्छति' इत्यादावननुभवादाह—❀ उच्यतां वेति ❀

सम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाऽऽश्रयोपस्थितिर्हेतुः' इति कार्य्यकारणभावान्तरम् । प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः । प्रयागस्य कर्मत्वन्तु सम्भावितमपि न, समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्य उक्तप्रायत्वात् ।

नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वम् ,

प्रभा

व्यापारः' इति बोधे चैत्रे प्रकारता, संयोगे विशेष्यता । तथाचोक्तशाब्दबोधनिष्ठा या कार्य्यता तदवच्छेदकः धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धः । धात्वर्थव्यापारानधिकरणविशेष्यतासम्बन्धः कारणतावच्छेदक इति कारणतावच्छेदकसम्बन्धेन चैत्रे उपस्थितेरभावाच् शाब्दबोधाभावः, चैत्रस्य धात्वर्थव्यापाराधिकरणतयोक्तसम्बन्धेनोपस्थितेरभावादिति भावः ।

आश्रयोपस्थितिरिति— विभक्तिजन्याऽऽश्रयोपस्थितिरित्यर्थः । सम्बन्धे व्यापारानधिकरणत्वनिवेशेन विभक्त्या आश्रयत्वेनैवाश्रयोपस्थित्या व्यापाराधिकरणत्वानधिकरणत्वयोस्तत्राभानादिदमसङ्गतमित्यपास्तम् , कारणतावच्छेदकसम्बन्धस्याऽऽकाङ्क्षाभास्यतया तत्र तथात्वसम्भवात् । 'चैत्रो ग्रामं गच्छति' इत्यत्र विभक्त्युपस्थिताऽऽश्रयाभिन्ने ग्रामे धात्वर्थव्यापारानधिकरणविशेष्यतासम्बन्धेनोपस्थितेः सत्त्वात्तादृशबोधः सूपपादः । उपस्थितौ विभक्तिजन्यत्वनिवेशाद् व्यापारजन्यसंयोगाश्रयो ग्राम इत्येतदर्थके 'गम्यमानो ग्रामः' इत्यादौ धात्वर्थव्यापारानधिकरणविशेष्यतासम्बन्धेन शानजर्थाश्रयोपस्थितेः सत्त्वेऽपि फलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधाभावान्नान्वयव्यभिचारः । चैत्रश्चैत्रमित्यत्रातिप्रसङ्गं वारयति—प्रकृत इति । सम्भावितमिति— कर्मत्वासम्भवोक्तिर्विभागो नात्र गम्यर्थ इत्यभिप्रायेण । अपादानस्थले 'प्रयागात्काशीं गच्छति' इत्यादौ विभागोऽपि गम्याद्यर्थ इत्यस्य वक्ष्यमाणतया प्रयागस्य कर्मत्वन्तु न, निरवकाशत्वादपादानसंज्ञया बाधात् । उक्तप्रायत्वादिति—'तच्च कर्तुरीप्सिततमम्—क्रियाजन्यफलाश्रय इत्यर्थः' इति पूर्वग्रन्थेनोक्तप्रायत्वादित्यर्थः । तत्र फले धात्वर्थेति विशेषणस्यानुक्तत्वात्प्रायपदोपादानम् ।

वस्तुतस्तु अत्र फलपदस्य धात्वर्थप्रयोज्यत्वविशिष्टधातुजन्योपस्थितिविषयताऽऽश्रये सङ्केतिततया फलपदेनैव धात्वर्थत्वे लब्धे फले धात्वर्थेति विशेषणं व्यर्थमेवेति पञ्चोलिनः ।

प्रायपदोपादानन्तु फलपदेन तत्प्रतीतावपि धात्वर्थेतिशब्देनानुक्तत्वाभिप्रायेण । नैयायिकमतं प्रदर्श्य दूषयितुमाह—नैयायिका इति । आद्येति—'चैत्रश्चैत्रं गच्छति' इति दोषवारणाय परसमवेतत्वं विशेषणमुपाददते इत्यर्थः । परसमवेतत्वमिति—द्वितीयाप्रकृतित्वेन विवक्षितार्थभिन्नसमवेतव्यापारजन्यं यत्फलं तादृशफलाश्रयस्यैव कर्मत्वमिति भावः । प्रकृते द्वितीयाप्रकृतित्वेन विवक्षितचैत्रार्थप्रतियोगिकभेदस्य चैत्रेऽस-

दर्पणव्याख्या

❀ कार्य्यकारणभावान्तरमिति ❀ सामान्यतः कार्य्यकारणभावकल्पने उक्तातिप्रसङ्गेनाऽश्रयं प्रकृतधात्वर्थव्यापारानधिकरणत्वेन विशेष्य तादृशाश्रयोपस्थितेर्हेतुत्वस्य कल्पनान्न तादृशशाब्दबोधापत्तिरिति भावः । ❀ समभिव्याहृतेति ❀ प्रकृतेत्यर्थः । ❀ उक्तप्रायत्वादिति ❀ धात्वर्थविक्लित्याश्रयत्वात् कर्मतेत्यादिग्रन्थेनेत्यस्याऽदिः । गमेस्तत्र पार्थक्येनानुपादानादुक्तम्— ❀ प्रायेति ❀ वस्तुतस्तु फलव्यापारयोरित्यत्र फलत्वस्य तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वरूपस्य निर्वचनाद्(तद्)व्यापारव्यधिकरणफलाश्रयत्वरूपकर्मत्वोक्तयैवानतिप्रसङ्गेनोक्तविशेषणस्य पार्थक्येन निवेश इति ध्येयम् ।

नैयायिकमतं दूषयितुमुपन्यस्यति—❀ नैयायिकास्त्विति ❀ । ❀ आद्यदोषेति ❀ 'चैत्रश्चैत्रं गच्छति' इति

द्वितीयदोषवारणाय धात्वर्थताऽवच्छेदकत्वं फले विशेषणं द्वितीयावाच्यमित्युपाददते। परसमवेतत्वं धात्वर्थक्रियायामन्वेति, तथैव कार्यकारणभावान्तरकल्पनात्। परत्वञ्च द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते।

प्रभा

त्वात्तत्समवेतव्यापारजन्यसंयोगरूपफलाश्रयस्य न कर्मत्वम्। ग्रामप्रतियोगिकभेदवच्चैत्रसमवेतव्यापारजन्यफलाश्रयत्वाद् ग्रामस्य कर्मत्वं सिध्यति। **द्वितीयेति**—'प्रयागात्काशीं गच्छति' इत्यत्रेत्यर्थः।

धात्वर्थताऽवच्छेदकेति—धात्वर्थता=धातुजन्योपस्थितीयविशेष्यता तदवच्छेदकेत्यर्थः। **धात्वर्थविशेष्यविशेषणमिति** यावत्। तथाच संयोगानुकूलव्यापारस्य गम्यर्थत्वाद् व्यापारनिष्ठविशेष्यताया अवच्छेदकत्वं विशेषणीभूतसंयोगे एवास्ति, नतु विभागे, विभागस्य धातुवाच्यत्वाभावात्। **द्वितीयावाच्यमिति**—परसमवेतत्वम्, धात्वर्थताऽवच्छेदकत्वञ्च द्वितीयार्थ इत्यर्थः। तन्मते द्वितीयायाः कर्मत्वे विधानाद् धात्वर्थतावच्छेदकफलशालित्वस्यैव कर्मतया फलस्य धातुलभ्यत्वेन 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायेनाऽऽधेयत्वमात्रं द्वितीयार्थः। तथाच संयोगरूपे धात्वर्थताऽवच्छेदके 'प्रयाग'निरूपिताऽऽधेयत्वाभावान्न द्वितीयावाच्यत्वं तदाधेयत्वस्येति भावः। तत्र परसमवेतत्वस्य स्वरूपसम्बन्धेन धात्वर्थव्यापारेऽन्वयः। धात्वर्थतावच्छेदकत्वस्य च स्वरूपसम्बन्धेनैव धात्वर्थफलेऽन्वयः।

ननु परसमवेतत्वस्य विनिगमनाविरहात् फलेऽन्वये चैत्रभिन्नग्रामसमवेतफलाश्रयत्वाद्दोषतादवस्थ्यमत आह—**धात्वर्थक्रियायामिति**। **कार्यकारणभावेति**—'स्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन परसमवेतत्वप्रकारकबोधम्प्रति भावनात्वावच्छिन्नविशेष्यतासम्बन्धेन धातुजन्यभावनोपस्थितिः कारणम्' इति कार्यकारणभावान्तरमित्यर्थः। ननु परसमवेतत्वम्=भेदाश्रयसमवेतत्वम्। तच्च यत्किञ्चिद्भेदस्य सर्वत्रैव सत्त्वात् केवलान्वयि। तथा 'मैत्रात्परश्चैत्रः' इति चैत्ररूपपरसमवेता या क्रिया तज्जन्यधात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वाच्चैत्रस्य कर्मत्वापत्तिस्तदवस्थैवेत्यत आह—**परत्वमिति**—द्वितीयया स्वप्रकृत्यर्थापेक्षया यत्परत्वं तदेव बोध्यत इत्यर्थः। **द्वितीययेति**—इदमुपलक्षणं कर्मार्थकप्रत्ययस्य। तेन 'चैत्रश्चैत्राय गच्छति' 'चैत्रेण चैत्रस्य गमनम्' इत्याद्यापत्तेः परिहारः। **स्वप्रकृत्यर्थापेक्षया**—स्वप्रकृतित्वेन विवक्षितार्थापेक्षयेत्यर्थः। तेन नान्योन्याश्रयः।

दर्पणव्याख्या

प्रयोगापत्तिरूपेत्यर्थः। ❀ द्वितीयेति ❀ प्रयागात् काशीं गच्छति चैत्रे 'प्रयागं गच्छति' इति प्रयोगापत्तिरूपेत्यर्थः। ❀ धात्वर्थताऽवच्छेदकत्वमिति ❀ फलावच्छिन्नव्यापारस्य धात्वर्थत्वमितिवादिनां मतेनेदम्। तथाच तन्मते धात्वर्थताऽवच्छेदकफलशालित्वं कर्मत्वं द्वितीयार्थः पर्यवस्यति। ❀ कार्य्यकारणभावेति ❀ द्वितीयार्थपरसमवेतत्वस्य स्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति भावनात्वावच्छिन्नविशेष्यतासम्बन्धेन धातुजन्योपस्थितेर्हेतुत्वान्तरकल्पनादित्यर्थः।

ननु भेदस्य केवलान्वयितया सर्वस्यैव परत्वेन चैत्रक्रियाया अपि मैत्रान्यसमवेतत्वात् तद्वाच्यताङ्गीकारेऽप्युक्तदोषतादवस्थ्यमत आह—❀ परत्वञ्चेति ❀ व्युत्पत्तिवैचित्र्यात्तु पदार्थैकदेशेऽपि परत्वे प्रतियोगितया प्रकृत्यर्थान्वयः, प्रकृते चैत्रसंयोगजनकक्रियायां चैत्रभिन्नसमवेतत्वबाधान्न 'चैत्रश्चैत्रं गच्छति' इति प्रयोगः। यत्र चोभयकर्मण्यां मल्लयोः संयोगस्तत्र मल्लान्तरक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेऽपि तादृशक्रियायाः स्वस्मिन् बाधान्न 'मल्लः स्वं गच्छति' इति प्रयोगः, स्वनिष्ठसंयोगजनकस्वक्रियायां स्वभिन्नसमवेतत्वस्यायोग्यत्वेनाभानेऽप्यबाधितसंयोगजनकत्वं विषयीकृत्य 'अभिचरन्

SIDDHANTA Digitized by Siddhanta eGangotri Gyaan Kosha

प्रभा

ननु द्वितीयार्थैकदेशे भेदे प्रकृत्यर्थस्य प्रतियोगितानिरूपकत्वसम्बन्धेनान्वये चैत्रघटोभयभेदस्यापि प्रतियोगितानिरूपकत्वसम्बन्धेन चैत्रविशिष्टतयोक्तदोषतादवस्थ्यम्। नच प्रतियोगितावच्छेदकपर्याप्तावच्छेदकतानिरूपितावच्छेद्यतावत्प्रतियोगितासम्बन्धेनान्वयान्नोक्तदोष इति वाच्यम्, एवम् 'मल्लो मल्लं गच्छति' 'चैत्रो द्रव्यं गच्छति' इत्यादौ कर्मत्वानापत्तेः, तत्र मल्ले, चैत्रे च तादृशभेदस्यासत्त्वात्। नच द्वितीयाप्रकृत्यर्थनिष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगितासम्बन्धेनान्वयान्न दोषः, प्रकृतिनिष्ठवृत्त्यविषयधर्मावच्छिन्नप्रतियोगितायाः सम्बन्धत्वविरहात् तद्व्यक्तित्वस्यानुपस्थितिदशायामपि शाब्दबोधस्य सर्वानुभवसिद्धत्वादिति चेन्न, भेदप्रतियोगिताऽवच्छेदकत्वस्यैव द्वितीयार्थत्वाभ्युपगमात्। तथाच भेदे प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेनान्वयः; प्रतियोगितावच्छेदकत्वस्य तु धात्वर्थव्यापारेऽन्वयः, कर्मीभूतमल्लादौ गम्यर्थक्रियावान्नेति भेदस्य सत्त्वेनोक्तापत्तेरभावात्। उभयकर्मजैकसंयोगस्थलेऽपि क्रियाया भेदान्न क्षतिः।

यदि तु फलानन्वितक्रियाया धात्वर्थे क्रियात्वेनैव प्रवेशात् 'मल्लो मल्लं गच्छति' इत्यादौ दोषतादवस्थ्यमित्युच्यते, तदा द्वितीयाप्रकृत्यर्थस्य तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन भेदेऽन्वयाङ्गीकारेणोक्तदोषो निरसनीयः। 'अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैव संसर्गत्वम्' इति नियमस्तु यत्र नञुपस्थाप्याभावविषयकशाब्दबोधस्तद्विषयक एव। एतेन विहगादिप्रकृत्यर्थवृत्तित्वविशिष्टसंयोगादेः जनकत्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन क्रियायामन्वयोपगमाद् भूमिं प्रयाति विहगे उदासीननिष्क्रियविहगनिष्ठम् 'अयं विहगः संयोगजनकक्रियावान्न' इति भेदमादाय विहगनिष्ठसंयोगजनकक्रियायास्तादृशभेदप्रतियोगितावच्छेदकतया 'विहगो विहगं गच्छति' इत्यापत्तिर्निराकरणीयेत्यपास्तम्, उभयकर्मजैकसंयोगस्थले 'विहगो विहगं गच्छति' इतीष्टस्यासिद्ध्यापत्तेरुक्तनिवेशेऽपि तादवस्थ्यात्।

दर्पणव्याख्या

यजेत' इत्यादाविव शाब्दबोधसम्भवात् तदर्थतात्पर्य्येण स्वं गच्छतीति प्रयोगो दुर्वार इति तु नाशङ्कनीयम्, परसमवेतत्वांशाविषयकस्य द्वितीयाऽधीनफलजनकत्वबोधस्य कुत्राप्यनभ्युपगमेन तादृशबोधे तज्ज्ञानसामग्र्या अप्यपेक्षणात् तस्याश्च प्रकृतेऽसत्त्वात्।

अथ स्वस्यापि द्वित्वावच्छिन्नभिन्नत्वात् 'स्वं गच्छति' इतिप्रयोगवारणाय द्वितीयाप्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयो वाच्यः। तथाच 'चैत्रो द्रव्यं गच्छति,' 'मल्लो मल्लं गच्छति' इत्यादिवाक्यानामप्रामाण्यापत्तिः, चैत्र—मल्लादिनिष्ठक्रियाया द्वितीयाप्रकृत्यर्थताऽवच्छेदकद्रव्यत्व–मल्लत्वावच्छिन्नाभिन्नासमवेतत्वात् तद्व्यक्तित्वानुपस्थितावपि शाब्दबोधस्यानुभवसिद्धतया तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितयान्वयासम्भवात्, तद्व्यक्तित्वोपस्थापकपदाभावाच्च। एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मावच्छिन्नसंसर्गत्वे मानाभावाच्च प्रतियोगिविशेषिताभावबुद्धेर्विशिष्टवैशिष्ट्याऽवगाहित्वनियमात्।

तदुक्तं दीधितिकृता—'प्रतियोगिविशेषिताभावभानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते' इतीति चेत् तर्हि क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थः। भेदे प्रकृत्यर्थस्यावेयतयाऽन्वयान्न पूर्वोक्तापत्त्यनुपपत्तौ। नञ्समभिव्याहारे च नञा तात्पर्य्यवशाच्चैत्रश्चैत्रं न गच्छतीत्यादौ द्वितीयाप्रकृत्यर्थवृत्तित्वविशिष्टतदपरार्थभेदप्रतियोगितावच्छेदकत्वाभावः। क्वचिच्च चैत्रो ग्रामं न गच्छतीत्यादौ द्वितीयाऽर्थवृत्तित्वविशिष्टधात्वर्थसंयोगजनकत्वाभावः क्रियायां बोध्यते।

ये तु प्रकृत्यर्थवृत्तित्वविशिष्टसंयोगादिरूपफलस्यैव जनकत्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन क्रियायामन्वयोपगमाद् भेदप्रतियोगितावच्छेदकत्वस्य द्वितीयार्थत्वमन्तरेणाप्युक्तापत्तिमुद्धरन्ति, तन्मते वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगिताऽनवच्छेदकतयोक्तस्थले उक्तसम्बन्धेन नञा संयोगाभावबोधानुपपत्तिः, 'परसमवेतत्वं द्वितीयार्थः' इति दीधितिविरोधश्च।

Sri Gargeshwari Digital Foundation

प्रभा

यद्वा—भेदः, आधेयत्वञ्च कर्मप्रत्ययार्थः। तत्र भेदे प्रकृत्यर्थस्य पूर्ववदेवान्वयः। भेदस्य सामानाधिकरण्यसम्बन्धेन व्यापारेऽन्वयः। आधेयत्वे च निरूपितत्वसम्बन्धेन प्रकृत्यर्थस्य, आधेयत्वस्य च स्वरूपसम्बन्धेन संयोगेऽन्वयः। तथाच 'ग्रामं गच्छति चैत्रः' इत्यतः ग्रामवृत्तिसंयोगजनको ग्रामप्रतियोगिकभेदसमानाधिकरणो यो व्यापारस्तज्जनककृतिमाँश्चैत्र इति बोधः। नचैवमपि 'चैत्रश्चैत्रं न गच्छति' इत्यस्याप्रामाण्यापत्तिः; चैत्रनिष्ठः चैत्रभिन्नसमवेतक्रियाजन्यसंयोगजनको यो व्यापारस्तस्याप्रसिद्धत्वादिति वाच्यम्, नञ्समभिव्याहारे धात्वर्थव्यापारे चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावस्य भानोपगमेनादोषात्। चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वञ्च मैत्रत्वादौ प्रसिद्धमेव। तथाच 'चैत्रश्चैत्रं न गच्छति' इत्यतः चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वाभाववान् यः चैत्रवृत्तिसंयोगानुकूलो व्यापारस्तज्जनककृतिमाँश्चैत्र इति बोध इत्यन्यत्र विस्तरः।

दर्पणव्याख्या

एवञ्च 'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामवृत्तिसंयोगजनिका ग्रामवृत्तिभेदप्रतियोगितावच्छेदिका च या क्रिया तदनुकूलकृतिमाँश्चैत्र इति नैयायिकमतपरिष्कारः।

अत्र प्रत्यवतिष्ठन्ते— नञर्थप्रसज्यप्रतिषेधस्य प्रतियोगितया क्रियाऽन्वयित्वमिति व्यवस्थापनात् कथं 'चैत्रो ग्रामं न गच्छति' इत्यादौ नञः संयोगजनकत्वाभावबोधकत्वम्। उक्तञ्च—

पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।
प्रसज्ज्यप्रतिषेधस्तु क्रियया सह यत्र नञ्॥ इति।

यत्र नञर्थाभावः क्रियया = धात्वर्थव्यापारेण प्रतियोगितया सम्बद्धो भवतीत्युत्तरार्द्धार्थः। तस्मात् तिङन्ते नञ्समभिव्याहारे क्रियाप्रतियोगिकाभावबोध एव न्याय्यः, नतु क्रियायां फलाभावस्य विभक्त्यर्थाभावस्य वा प्रथमान्तार्थे वा तिङर्थाभावस्य, क्लृप्तकारणविरहादिति।

अत्र वदन्ति—यद्धर्म्मावच्छिन्ने यद्धर्म्मावच्छिन्नत्वं येन संसर्गेण नञ्समभिव्याहारे प्रतीयते तद्धर्म्मावच्छिन्ने तद्धर्म्मावच्छिन्नस्य तत्संसर्गावच्छिन्नप्रतियोगिताकाभावो नञ्समभिव्याहारे बुध्यते इति सकललोकानुभवसिद्धोऽयमर्थः। 'प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ' इति वदता दीधितिकृतोपनिबद्धः। एवञ्च चैत्रो ग्रामं गच्छतीत्यत्र नञसमभिव्याहारे क्रियायां द्वितीयाऽर्थवृत्तित्वविशिष्टसंयोगजनकत्वस्य बोधात् तत्समभिव्याहारे तत्र तदभावस्य बोधो जायमानः केन वारणीयः। नच कारणाभावः, नञर्थाभावप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे प्रतियोग्यन्वययोग्यार्थोपस्थितेर्हेतुतया तस्याश्च क्रियायां सत्त्वात्। नतु नञर्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन बोधे धातुजन्यभावनोपस्थितेर्हेतुता, 'चैत्रश्चैत्रं न गच्छति' इत्यादिवाक्यानामप्रामाण्यापत्तेः, चैत्रकर्मकचैत्रकर्तृकगमनक्रियारूपप्रतियोगिनोऽप्रसिद्ध्या नञा तदभावस्य बोधयितुमशक्यत्वात्।

मन्मते तु चैत्रकर्तृकक्रियायां चैत्रवृत्तिसंयोगजनकत्वेऽपि चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य तस्यामसत्त्वेन नञा तदभावस्य प्रत्यायनात् प्रामाण्योपपत्तेः। अत एव परसमवेतत्वस्य द्वितीयार्थत्वमप्यावश्यकम्। नच त्वन्मतेऽपि चैत्रस्याकर्मत्वात् कथं तद्वाचकाद् द्वितीयोपपत्तिरुक्तस्थले इति वाच्यम्, मैत्रो गच्छति चैत्रम् न चैत्र इत्यत्र मैत्रक्रियाऽवच्छिन्नप्रतियोगिताकभेदवत्त्वतदीयसंयोगाश्रयत्वयोरुभयोर्द्वितीयार्थयोरबाधेन तदुपपत्तेः। अधिकमग्रे वक्ष्यते।

तस्माच्चैत्रो गच्छतीत्यादौ चैत्रो न कर्मेति व्यवहाराच्च, सर्वथा कर्तृव्यावृत्तधात्वर्थव्यापारप्रयोज्यतद्व्यधिकरणधात्वर्थफलाऽऽश्रयत्वं कर्मत्वं निर्वाच्यम्। तत्र फलव्यापारयोर्धातुलभ्यत्वेऽपि वृत्तित्वे भेदप्रतियोगितावच्छेदकत्वपर्य्यवसिते वैयधिकरण्ये च द्वितीयादेः शक्तिरनन्यलभ्यत्वात् स्वीकरणीयेति; प्रकृतमनुसरामः।

SGDF Sri Gargeshwari Digital Foundation

तथाच 'चैत्रस्तण्डुलं पचति' इत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थताऽवच्छेदकविक्लित्तिशालित्वात् तण्डुलस्य कर्म्मता। शाब्दबोधस्तु तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमाँश्चैत्र इत्याहुः,

तन्न रोचयामहे, परसमवेतत्वादेर्गौरवेणावाच्यत्वात्। अतिप्रसङ्गः किम् द्वितीयायाः, शाब्दबोधस्य वा? नाद्यः, तावद्वाच्यकथनेऽपि तत्तादवस्थ्यात्, 'गमयति कृष्णं गोकुलम्' इतिवत् 'पाचयति कृष्णं गोपः' इति द्वितीयाऽऽपत्तेः, 'तण्डुलं पचति चैत्रः' इतिवत् 'तण्डुलं पच्यते स्वयमेव' इत्यापत्तेश्च,

प्रभा

'चैत्रेण ग्रामो गम्यते' इत्यतश्च चैत्राऽऽश्रयको ग्रामप्रतियोगिकभेदसमानाधिकरणो यो व्यापारस्तत्प्रयोज्यसंयोगाश्रयो ग्राम इति बोधः। इत्थञ्च न 'चैत्रश्चैत्रं गच्छति' इत्यापत्तिः। नापि 'मल्लो मल्लं गच्छति' 'चैत्रो द्रव्यं गच्छति' इत्यादेरसिद्धिः। तथाच 'द्वितीयाप्रकृतित्वेन विवक्षितं यत्पदं तदर्थप्रतियोगिकभेदाधिकरणवृत्तिक्रियाजन्यधात्वर्थतावच्छेदकफलाश्रयत्वं कर्मत्वम्' नैयायिकमते फलितम् इत्याशयेनाह—तथाच चैत्र इति। शाब्दबोध इति—अत्र धात्वर्थतावच्छेदकेत्युक्तिर्विक्लित्तेर्धातुशक्यत्वद्योतनाय, नतु तेन रूपेण शाब्दबोधे भानम्, अननुभवाद् गौरवाच्च। तन्नेति—तत्=परसमवेतत्वादेर्द्वितीयावाच्यत्वम्। रोचयामह इति—अस्य तार्किकेभ्य इति, वयमिति च शेषः। तावद्वाच्येति—तावान्=परसमवेतत्वादिघटितो यो वाच्यः=शक्योऽर्थः तस्य कथनेऽपि=कर्मपदेनोक्तावपि। तदिति—तस्य=अतिप्रसङ्गादेस्तादवस्थ्यात्=तथैव स्थितेः। पूर्वोक्तातिप्रसङ्गस्योक्तरीत्या वारितत्वादतिप्रसङ्गान्तरमाह—पाचयति कृष्णमिति—प्रयोज्ये कृष्णे स्वभिन्न (कृष्णभिन्न) प्रयोजक (गोप) समवेता या संयोगानुकूलव्यापारानुकूला प्रवर्तनारूपा णिजन्तधात्वर्थक्रिया तज्जन्यधात्वर्थताऽवच्छेदकीभूतं यद् गम्यर्थव्यापाररूपं फलं तच्छालित्वरूपकर्मत्वसत्त्वाद् द्वितीयाऽऽपत्तिरित्यर्थः।

ननु 'गतिबुद्धि' इत्यादिसूत्रोपात्तातिरिक्तधातुप्रकृतिकणिज्विषये प्रयोज्यस्य कर्मत्वाविवक्षाया बोधनान्नायमतिप्रसङ्ग इत्यत आह—तण्डुलं पच्यत इति—'तण्डुलम्' इत्यापाद्यमानद्वितीयान्तपदघटितयादृच्छिकवाक्यमेतत्, नतु तादृशं पदं साधु, वैयाकरणनये कर्मणः कर्तृत्वविवक्षया धात्वर्थव्यापाराश्रयत्वेन परत्वात् कर्तृसंज्ञया कर्मसंज्ञाया बाधात्। यगादिकन्तु कर्मणः कर्तृत्वविवक्षयाऽत्र कर्तरि लटः सत्त्वेऽपि भवत्येव,

दर्पणव्याख्या

❀ विक्लित्त्यनुकूलेति ❀ इदं तण्डुलान्यसमवेतक्रियाऽन्वयि।

यथाश्रुतं दूषयति—❀ तन्न रोचयामहे ❀ इत्यादिना। ननु परसमवेतत्वस्य द्वितीयार्थत्वं विनाऽतिप्रसङ्गानिरासाद् गौरवं न दोषायेत्यत आह—❀ अतिप्रसङ्गः किमिति ❀। ❀ तावदिति ❀ परसमवेतक्रियाजन्यधात्वर्थताऽवच्छेदकफलशालित्वरूपकर्मत्वस्य द्वितीयार्थत्वस्वीकारेऽपि द्वितीयाऽतिप्रसङ्गस्य तादवस्थ्यादित्यर्थः। तमेवाह—❀ गमयति कृष्णमित्यादिना ❀। ❀ द्वितीयापत्तेरिति ❀ द्वितीयोत्पत्तावुक्तकर्मत्वस्य तन्त्रत्वे, 'गमयति गोकुलं कृष्णम्' इत्यत्र णिजर्थनिरूपितनिरुक्तकर्मत्वस्येव पचिप्रकृतिकणिजर्थकर्मत्वस्य कृष्णे सत्त्वेन पाचयत्यादिप्रयोगेऽपि प्रयोज्यकर्तृवाचकाद् द्वितीयापत्तेरतः संज्ञाया एव द्वितीयोत्पत्तौ प्रयोजकताऽङ्गीकरणीया। एवञ्च तत एवातिप्रसङ्गभङ्गे कृतं तत्र द्वितीयाशक्त्येति भावः।

ननु तादृशकर्मत्वमेव द्वितीयानियामकम्। निरुक्तस्थले कृष्णे तत्सत्त्वेऽप्युपात्तगत्यर्थकाद्यतिरिक्तणिजन्तधातुयोगे "गतिबुद्धि" इति सूत्रेण तदविवक्षाबोधनान्नोक्तापत्तिः, विवक्षाया एव विभक्त्युत्पत्तौ नियामकताया वक्ष्यमाणत्वादत आह—❀ तण्डुलं पच्यत इति ❀ तण्डुले भवदुक्तद्वितीयानियामककर्मत्वस्य सत्त्वात्तदापत्तिः, मन्मते तु कर्तृसंज्ञया कर्मसंज्ञाया

विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाऽऽश्रयत्वात् । शाब्दबोधातिप्रसङ्गोऽप्युक्तरीत्यैव निरस्तः, परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य, परसमवेतत्वस्य च इष्टान्वयलाभायानेकशः

प्रभा

"कर्मवत्कर्मणा तुल्यक्रियः' इत्यतिदेशेन कर्मप्रत्ययप्रयोज्यकार्यस्यातिदेशात् । नचातिदेशबलाद् द्वितीयाऽपि स्यादिति वाच्यम् , एकगतानेकशक्त्योर्मध्ये एकस्या उक्तत्वे उभयोरप्युक्तत्वमिति सिद्धान्तात् । तदुक्तम्—

"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥ १ ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते" ॥ २ ॥ इति ।

नच तण्डुले परसमवेतक्रियाजन्यफलाभावान्न द्वितीयेति वाच्यम् , अग्निसंयोगस्यापि पच्यर्थतया तण्डुलभिन्नकाष्ठवृत्त्यग्निसंयोगरूपक्रियाजन्यफलाश्रयतया द्वितीयापत्तेः सुवचत्वात् । धात्वर्थाश्रयत्वादिति—णिजन्तधात्वर्थक्रियाजन्यपच्धात्वर्थविक्लित्त्यनुकूलव्यापाररूपफलाश्रयत्वादित्यर्थः । धात्वर्थाश्रयत्वादित्युक्त्या कर्तृसंज्ञाया अवस्थितिः सूचिता । 'अग्निसंयोगो धात्वर्थतया विवक्ष्यते' इति वक्ष्यमाणाभिप्रायेणेदं दूषणम् । कर्मकर्त्तरि फलमात्रस्य; विक्लित्त्यनुकूलकर्ममात्रवृत्तिव्यापारस्य वा धात्वर्थत्वमिति मते नेदं दूषणम् , तार्किकमते उभयत्रापि तण्डुलनिष्ठस्य फलमात्रार्थस्य, तज्जनकतण्डुलमात्रवृत्तिव्यापारस्य वा धात्वर्थतावच्छेदकफलत्वाभावात् ।

तण्डुलान्यसमवेतेति—तण्डुलान्यकाष्ठसमवेतेत्यर्थः । उक्तरीत्यैवेति—विपरीतव्युत्पत्तिमतां तथा बोधस्येष्टापत्तिरीत्येत्यर्थः । यदि तु नेष्यते शाब्दबोधस्तदा 'द्वितीयाप्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति विशेष्यतासम्बन्धेन धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिः सहकारिकारणमिति रीत्येत्यर्थः । प्रकृते तण्डुलस्य कर्तृत्वोपपत्तये धात्वर्थव्यापाराश्रयत्वस्याप्यावश्यकतयोक्तापत्तिर्निरसनीया । ननु कर्मकर्तृप्रत्ययस्थले कर्मण एव कर्तृत्वेन फलव्यधिकरणव्यापारस्याविवक्षा, फलसमानाधिकरणव्यापारस्य च विवक्षाऽभिप्रेता "फलव्यापारयोर्धातुः" इत्युक्त्या फलं व्यापारश्च पृथगेव धात्वर्थस्तथाच फलस्य धात्वर्थतावच्छेदकत्वाभावान्नोक्तदोष इत्यत आह—परसमवेतत्वस्येति । परत्वम्—'द्वितीयाप्रकृत्यर्थप्रतियोगिकमेव नान्यप्रतियोगिकम्' ।

इष्टान्वयेति—धात्वर्थताऽवच्छेदकस्य फले, परसमवेतत्वस्य धात्वर्थक्रियायाम् , द्वितीयाप्रकृत्यर्थस्याऽऽधेयत्वे परत्वे चेष्टान्वयलाभायेत्यर्थः ।

दर्पणव्याख्या

बाधान्न तदापत्तिरिति भावः । तण्डुलान्यसमवेतेत्यनेन परसमवेतक्रियाजन्यत्वं विक्लित्तावस्तीति बोधितम् । धात्वर्थाश्रयत्वादित्यनेन कर्तृसंज्ञासत्त्वमावेद्यते । ❀ उक्तरीत्यैवेति ❀ तथाव्युत्पन्नानामित्याद्युक्तरीत्यैवेत्यर्थः, धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिरूपहेत्वभावादिति भावः । ननु नास्मन्मतेऽप्युक्तप्रयोगापत्तिः, तत्र व्यापारत्वेनैव, फलस्य भानाङ्गीकारेण तण्डुलस्य धात्वर्थतावच्छेदकफलशालित्वाभावात्, निष्कृष्टभवन्मतेऽपि व्यापारगतपौर्वापर्यारोपेण फलस्य व्यापारतायाः स्वीकाराच्चेत्यतो दूषणान्तरमाह—❀ परसमवेतत्वस्येति ❀ ।

❀ इष्टान्वयेति ❀ इष्टस्य = प्रकृत्यर्थस्य प्रतियोगितासम्बन्धेन परसमवेतत्वस्यैकदेशे परत्वे परसमवेतत्वस्य चाश्रयतया क्रियायामन्वयस्य लाभाय = भानायेत्यर्थः । ❀ अनेकश इति ❀ प्रकृत्यर्थप्रकारकशाब्दबुद्धिं प्रति द्वितीयाऽधी-

SGDF SGDF Sri Gargeshwari Digital Foundation

कार्य्यकारणभावाभ्युपगमे गौरवान्तरत्वादिति स्पष्टं भूषणे ।

एतच्च सप्तविधम्—

निर्वर्त्यञ्च विकार्य्यञ्च प्राप्यञ्चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म्म चतुर्द्धाऽन्यत्तु कल्पितम् ॥
औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥

इति वाक्यपदीयात् ।

प्रभा

कार्यकारणभावेति—'द्वितीयार्थधात्वर्थतावच्छेदकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति धातुजन्यफलोपस्थितिः कारणम्'; परसमवेतत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति क्रियात्वावच्छिन्नविशेष्यतासम्बन्धेन धातुजन्योपस्थितिः कारणम्'; द्वितीयाप्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति द्वितीयार्थाऽऽधेयत्वोपस्थितिः, द्वितीयार्थपरत्वोपस्थितिश्च कारणम्' इत्येवं कार्यकारणभावकल्पने गौरवान्तरत्वादिति भावः ।

ननु शाब्दिकनयेऽपि द्वितीयार्थाऽऽश्रयस्य फले, फलस्य च व्यापारांशे प्रकारतया कार्यकारणभावद्वैविध्यस्यावश्यकतया साम्यमेवेति चेन्न, भवन्मते (नैयायिकमते)ऽपि द्वितीयार्थाऽऽधेयत्वस्य फले, तस्य च व्यापारे प्रकारत्वमादाय कार्यकारणभावकल्पनया साम्येन पूर्वोक्तकार्यकारणभावाधिक्याक्षतेः ।

'विशेषज्ञानञ्च सामान्यज्ञानपूर्वकम्' इतिनियमेन सामान्यप्रकारकज्ञानस्य विशेषरूपेण जिज्ञासाहेतुत्वाद्विशेषरूपेण ज्ञानेच्छायां प्रसङ्गसङ्गत्या कर्म विभजते—एतच्चेति—ईप्सितं कर्म निर्वर्त्यादिभेदेन त्रिधा । तदाह—निर्वर्त्यमिति । तत् = क्रियाजन्यफलशालिकर्म द्विविधम्—ईप्सिततम्, अनीप्सिततमञ्च । ईप्सिततमं कर्म निर्वर्त्यम्, विकार्यम्, प्राप्यञ्चेति त्रिधामतम् । अन्यत्तु = अनीप्सिततमम् कर्म तु । चातुर्विध्यमाह—औदासीन्येनेति—औदासीन्येन प्राप्यम् = तृणादि । अनीप्सितम् = विषादि । संज्ञान्तरैः = अपादानादिभिः, अनाख्यातम् = 'अकथितञ्च' इति सूत्रविहितम् । अन्यपूर्वकम् = 'अधिशीङ्' 'क्रुधद्रुहोः' इत्यादिसूत्रविहितम् ।

दर्पणव्याख्या

नाधेयत्वोपस्थितेरिव तदधीनपरसमेवतत्वोपस्थितेः प्रकारतासम्बन्धेन, एवं परसमवेतत्वप्रकारकबुद्धिं प्रति धातुजन्योपस्थितेर्व्यापारत्वावच्छिन्नविशेष्यतासम्बन्धेन हेतुत्वकल्पने चातिगौरवादित्यर्थः । मन्मते तु फलप्रकारकशाब्दबोधक्लृप्तहेतुताकव्यापारोपस्थितिविषयव्यापारांशे द्वितीयाप्रकृत्यर्थावृत्तित्ववैशिष्ट्यनिवेशेनैव नातिप्रसङ्ग इति भावः ।

ननु 'चैत्रो मैत्रश्च परस्परं गच्छतः' इत्यादौ धात्वर्थव्यापारस्य द्वितीयाप्रकृत्यर्थवृत्तित्वात् तत्र फलानन्वय प्रसङ्गोऽत आह—❀ स्पष्टमिति ❀ तथाच द्वितीयाप्रकृत्यर्थावृत्तीत्यनेन द्वितीयाप्रकृत्यर्थवृत्तिभेदप्रतियोगिताऽवच्छेदकत्वस्याविवक्षणात् 'परस्परं गच्छतः' इत्यादौ क्रियायाः परस्परावृत्तित्वबाधेऽपि परस्परनिष्ठभेदप्रतियोगितावच्छेदकत्वस्याबाधान्न फलान्वयानुपपत्तिरित्यादि तत्रोक्तमिति ।

हरिकृतं कर्मविभागमाह—❀ तच्चेति ❀ क्रियाजन्यफलाऽऽश्रयरूपं कर्मेत्यर्थः ।

SGDF Gangeshwari Digital Foundation

यदसज्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म्म व्यवस्थितम् ॥

प्रभा

निर्वर्त्यादीप्सितकर्मणो लक्षणमाह—यदसदिति—इदं नैयायिकमतेन, तैरसतः कार्य्यस्योत्पत्तिस्वीकारात् । सद्वेति—साङ्ख्यमतेनेदम्, तैः सत एव आविर्भाव-तिरोभावस्वीकारात् । जन्मना = आविर्भावकसामग्र्या । प्रकाशते = आविर्भवति । निर्वर्त्यमिति—निर्वर्त्यते = निष्पाद्यते यत्तन्निर्वर्त्यम् । एवञ्च 'यत्नविशेषप्रयोज्योत्पत्तिमत्त्वम्' निर्वर्त्यत्वं लब्धम् । यथा 'तण्डुलं पचति' इत्यत्र तण्डुलरूपं कर्म । नच 'तण्डुलान् ओदनं पचति' इत्यत्रौदनरूपविकार्येऽतिव्याप्तिः, प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति यत्नविशेषप्रयोज्योत्पत्तिमत्त्वस्य तल्लक्षणत्वात् । प्रकृते च ओदनस्य प्रकृतिवाचकतण्डुलपदसमभिव्याहृतौदनपदोपस्थाप्यत्वात् । तदुक्तं वाक्यपदीये—

"सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाऽऽश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते" ॥ इति ॥

'घटं करोति' इत्यत्र यस्य = घटस्य कर्मणो मृद्रूपा प्रकृतिः सत्यपि परिणामिनी नाश्रीयते = परिणामित्वेन यदा न विवक्ष्यते तदा घटस्य निर्वर्त्यत्वं प्रचक्षते । 'भस्म करोति' इत्यत्र यस्य भस्मरूपस्य कर्मणः प्रकृतिः काष्ठरूपा भस्मदशायामविद्यमाना एव यस्य = भस्मरूपस्य कर्मणः परिणामित्वेन नाश्रीयते = न विवक्ष्यते तदा अस्य निर्वर्त्यत्वमेव । एवञ्च प्रकृतेः परिणामित्वेनाविवक्षायां निर्वर्त्यत्वम्, परिणामित्वेन विवक्षायाञ्च विकार्य्यत्वम् इत्येकस्यापि कर्मणो विवक्षाभेदेनोभयं वक्तुं शक्यमिति भावः । विकार्य्यमिति—कार्यकाले विद्यमानाऽविद्यमाना वा प्रकृतिः परिणामित्वेन विवक्ष्यते तदा कर्मणो विकार्य्यत्वम् ।

दर्पणव्याख्या

❀ यदसज्जायत इति ❀ असत्कार्य्यवादमवलम्ब्य । सद्वेत्यादि तु साङ्ख्यमतेन । प्रकाशत इत्यनन्तरम्—

"प्रकृतेस्तु विवक्षायां विकार्य्यं कैश्चिदन्यथा ।

तन्निर्वर्त्यम्" इत्येव वाक्यपदीयपाठः, अन्यथा सामान्यधर्मेण अलक्षितस्य विकार्य्यस्य विशेष्यरूपेण प्रदर्शनेऽर्थान्तरतापत्तेः । तदर्थस्तु कैश्चित् प्रसिद्धैराचार्य्यैः प्रकृतिविवक्षायां निष्पाद्यं विकार्य्यमित्युच्यते । अन्यथा तदविवक्षायां तन्निष्पाद्यं निर्वर्त्यमिति तदर्थः । तत्र घटं करोतीत्यादौ सत्या अपि मृदादिप्रकृतेः परिणामित्वेनाविवक्षा । भस्म करोतीत्यादौ त्वसत्या एव तस्यास्तत्त्वेन सा ।

यद्यपि निर्वर्त्यते = निष्पाद्यते इति व्युत्पत्त्या निर्वर्त्यत्वं तण्डुलानोदनं पचतीत्यादावोदनादौ विकार्य्यकर्म्मण्यप्यस्ति तथापि प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यत्वरूपपारिभाषिकनिर्वर्त्यत्वस्य विवक्षणान्न दोषः ॥ तदुक्तम्—

सती वा विद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाऽऽश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥ इति ।

यस्य = विकृतिकर्म्मणः, नाश्रीयते = न प्रयुज्यते, न विवक्ष्यत इति यावत् । अन्यत् = उक्तार्थम् । ❀ विकार्य्यन्त्विति ❀ तल्लक्षणं तु प्रतीयमानप्रकृतिविकृतिभावकत्वे सति क्रियानिर्वाह्यविशिष्टासत्त्वोत्पत्त्यन्यतरफलवत्त्वम् । घटं करोतीत्यादिनिर्वर्त्ये क्रियानिर्वाह्योत्पत्तिमत्यपि प्रकृतिविकृतिभावाभानान्नातिप्रसङ्गः । प्रकृतिकर्मणस्तादृशविशिष्टासत्त्वाद् विकृतिकर्मणश्च तादृशोत्पत्त्याश्रयत्वाल्लक्षणसङ्गतिः । ईदृशस्थले फलद्वयप्रयोजकव्यापारार्थकत्वं धातोरावश्यकम् । उक्तञ्च भाष्ये—'ह्यर्थः पचिः' इति, अन्यथैकफलैकव्यापारार्थकत्वस्याकर्मकेष्वपि सत्त्वाद् विशेषोपादानानर्थक्यप्रसङ्गात् ।

SGDF Sri Gargeshwari Digital Foundation

प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।

प्रभा

विकार्यं कर्म द्वेधा व्यवस्थितम् । तस्य द्वैविध्यमाह—प्रकृत्युच्छेदेति—प्रकृतेः=कारणस्य उच्छेदः=नाशः । स च अत्यन्ताप्रतीयमानप्रकृतिस्वरूपफलकः, तेन सम्भूतम्=उत्पत्तिशालि ।

इदञ्च काष्ठादिभस्मवदित्यन्वितम् । काष्ठादिभस्मवदिति समस्तपदम् । यत्तु 'काष्ठादि' इति पृथक् पदम्, ननु भस्मना सह समासः, समासे काष्ठस्य तुरीयकर्मतापत्तेः । तन्न, असमासे एव तुरीयतापत्तेर्दोषात् । तथाहि—'काष्ठादि' इत्येकम्, 'भस्म' इत्यपरम्, 'सुवर्णादि' इत्येकम्, 'कुण्डलम्' इत्यपरमिति पञ्चोलिनः । मम तूभयोः काष्ठ-भस्मनोर्विकार्यत्वमेव ।

दर्पणव्याख्या

परे तु—"द्वयर्थः पचिः" इति भाष्याद् विक्लेदनं निर्वर्त्तनं च पचेरर्थः, 'तण्डुलानोदनं पचति' इत्यस्य 'तण्डुलान् विक्लेदयन्नोदनं निर्वर्त्तयति' इति विवरणात् । तथाच प्रकृते तण्डुलाश्रयविक्लित्त्यनुकूलव्यापाराश्रयाश्रयक ओदनाश्रयकोत्पत्त्यनुकूलो व्यापार इति बोधः । एवं 'काष्ठं भस्म करोति' इत्यादावप्यूह्यमित्याहुः ।

तदसत्, भावनाप्रकारकबोधे हेतुत्वेन कृसायाः कृद्धात्वन्यतरजन्योपस्थितेर्विशेष्यतासम्बन्धेनाख्यातार्थेऽभावेन तादृशबोधासम्भवात्, एकयैव क्रियया फलद्वयोत्पत्तिसम्भवेन तद्वाक्यजन्यबोधस्य व्यापारद्वयविषयकत्वकल्पनानौचित्यादाख्यातशब्दान्निवृत्तभेदाया एव क्रियाया अवगमादिति रूपप्सूत्रीयकैयटाच्च । किञ्च पचेर्व्यापारद्वयार्थकत्वे नव्यमते क्रियायां द्वित्वाबाधेन 'चैत्रो तण्डुलान् ओदनं पचतः' इति द्विवचनापत्तिर्दुर्वारा ।

वस्तुतस्तु विक्लेदनम् = विक्लित्तिः, निर्वर्त्तनम् = उत्पत्तिरेव, उक्तपदयोर्भावल्युडन्तत्वात् । तथाच फलद्वयानुकूल एक एव व्यापारो धात्वर्थतया भाष्यकृत्सम्मतः । व्यापारद्वयार्थकत्वोक्तिस्तु केषाञ्चित् तत्पदयोर्णिजन्तप्रकृतिकल्युडन्तत्वभ्रमनिबन्धनैवेत्यवधेयम् । यद्यपि विकार्य्यं द्वेधा—प्रकृतिर्विकृतिश्चेत्येव वक्तुमुचितम्, तथापि विकृतिद्वैविध्येऽवगते प्रकृतावपि विकार्यत्वं ज्ञातप्रायं भवतीत्याशयेन तदनुक्त्वैव विकृतिकर्म विभजते—❀ प्रकृत्युच्छेदेति ❀ एतेन क्रियानिर्वाह्याभावः प्रतियोगितावच्छेदकधर्मवत्त्वं प्रकृतिकर्मत्वमिति ध्वनितम् ।

काशान् कटं करोति' 'कुसुमानि स्रजं करोति' 'सुवर्णं कुण्डलं करोति' 'मृदं घटं करोति' 'काष्ठं भस्म करोति' 'तण्डुलानोदनं पचति' इत्यादौ क्रियानिर्वाह्यो यः पूर्वभावविशिष्टकाशकाष्ठादिप्रतियोगिकाभावो विशिष्टासत्त्वरूपस्तत्प्रतियोगितावच्छेदकवैशिष्ट्यवत्त्वं काशकाष्ठादेरिति तत्तत्प्रकृतौ लक्षणसङ्गतिः । सर्वत्र विशिष्टाभावप्रतियोगिनि तादृशप्रतियोगितावच्छेदकवैशिष्ट्यसत्त्वादतिप्रसङ्गवारणाय क्रियानिर्वाह्येति प्रकृतधात्वर्थव्यापारनिर्वाह्यार्थकम् । क्वचित् काष्ठतण्डुलादिधर्मिनाशादेव विशिष्टाभावो भस्मौदनादिसम्पादकः । क्वचिद्धर्मिणः सत्त्वेऽपि कटस्रगादिसन्दर्भविशेषविरहरूपपूर्वभावविशिष्टासत्त्वं कटसन्दर्भादिनिष्पादकं क्रियातो निर्वहति ।

❀सम्भूतमिति❀ प्रकृतिनाशप्रयोज्योत्पत्तिमदित्यर्थः । इदञ्च भस्मवदित्यन्वयि 'काष्ठादि' इति पृथक् पदम्, अन्यथा काष्ठसुवर्णादेस्तुरीयतापत्तेः । ❀ भस्मवदिति ❀ तत्तौल्येन वर्त्तमानमन्यदपि विकारजातमित्यर्थः । सादृश्यञ्च प्रकृतिनाशप्रयोज्योत्पत्तिमत्त्वेनैव । एवमग्रेऽपि । तथाच प्रकृतिविकृतिभावापन्नकाष्ठभस्मादिविकार्य्यमित्यर्थः पर्य्यवस्यति । एवञ्च 'काष्ठं भस्म करोति' इत्यत्र करोतेः (प्रतियोगित्वविशिष्ट) नाश उत्पत्तिश्च फलद्वयम्, तदनुकूलव्यापारश्चार्थः । नाशे प्रतियोगितया काष्ठस्योत्पत्तौ भस्मन आधेयतयाऽन्वयात् काष्ठप्रतियोगिकनाशानुकूलो भस्मोत्पादको वर्त्तमानो व्यापार इति बोधः । एवं 'तण्डुलानोदनं पचति' इत्यादावपि ।

नैयायिकास्तु—'तण्डुलानोदनं पचति' इति विकार्य्यस्थले प्रकृतिकर्मोत्तरद्वितीयाया नाशकत्वमर्थः । विकृतिकर्मोत्तरद्वि-

किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥

प्रभा

किञ्चिद्गुणान्तरोत्पत्त्येति—'प्रतीयमानप्रकृतिविकृतिभावकत्वे सति पूर्वकालिकावयवसंस्थानविजातीयावयवसंस्थानविशिष्टत्वम्, विलक्षणोत्पत्तिमत्त्वञ्चैतदन्यतरवत्त्वरूपं विकार्य्यकर्मत्वम्'। 'काष्ठम्' सुवर्णञ्च प्रकृतिः, भस्म कुण्डलञ्च विकार इति प्रकृति-विकृतिभावः भस्मनि, कुण्डले च वर्तते। एवं सुवर्णे यादृशं विकारात्पूर्वमवयवसंस्थानमासीत् ततो विजातीयमवयवसंस्थानवैशिष्ट्यं कुण्डले जातम्, तथा प्रकृत्युच्छेदपूर्वकविलक्षणोत्पत्तिमत्त्वञ्च भस्मनि सम्पन्नमित्यन्यतररूपवत्त्वादुक्तलक्षणमुपपन्नम्। एतादृशस्थले कृन्नर्थश्च विकारपूर्वकोत्पत्त्यनुकूलव्यापाररूपः।

काशिकाकारास्तु—काष्ठसुवर्णयोरेव विकार्यकर्मत्वम्। भस्मकुण्डलयोस्तु निर्वर्त्यत्वमेवाहुः। तन्मते 'काष्ठं भस्म करोति' इत्यतः 'काष्ठं विकुर्वन् भस्म उत्पादयति' इति बोधः। एवं 'सुवर्णं कुण्डलं करोति' इत्यतोऽपि 'सुवर्णं विकुर्वन् कुण्डलमुत्पादयति' इति च बोधः। इयान् विशेषः पूर्वत्र उच्छेदरूपो विकारः। द्वितीये आकारविशेषात्मकः।

दर्पणव्याख्या

तीयायाश्चोत्पादकत्वम्। तण्डुलाद्यन्वितं नाशकत्वं च पाकेऽन्वेति। ओदनान्वितोत्पादकत्वस्य नाशकत्वविशिष्टे पाकेऽन्वयः। नाशे चोत्पत्तेः प्रयोजकत्वमुद्देश्यविधेयभावमहिम्ना भासते। तेन पाकस्य तण्डुलारम्भकसंयोगनाशकत्वेऽपि 'संयोगमोदनं पचति' इति न प्रयोगः, तण्डुलारम्भकसंयोगनाशस्यौदनोत्पत्तौ तण्डुलनाशेनान्यथासिद्धतया अप्रयोजकत्वात्।

वस्तुतस्तु विकृतिकर्मासमभिव्याहृते 'तण्डुलं पचति' इतिवत् 'संयोगं पचति' इति प्रयोगवारणाय नाशद्वारा नाशकत्वमेव द्वितीयार्थो वाच्य इति प्रकृते प्रयोज्यप्रयोजकभावाभानेऽपि न क्षतिः। तथाच तण्डुलनाशक ओदनोत्पादको यो व्यापारस्तदनुकूलकृतिमानिति बोधः। ईदृशस्थले च कर्माख्यातेन प्रकृतेः कर्मत्वमेवाभिधीयते। अत एव 'काष्ठानि भस्मराशिः क्रियन्ते' इत्यादौ काष्ठपदसमानवचनत्वमाख्यातस्य, नतु भस्मादिविकारवाचकपदसमानवचनत्वम्, भावनान्वयिनि सङ्ख्यान्वयनियमात्।

ननु प्रधानाप्रधानकर्मवाचककर्मपदसमभिव्याहृतनी—वहादि (दुहादि) प्रकृतिककर्माख्यातस्यैवाप्रधाने दुहादीनाम् 'प्रधाने नीहृकृष्वहाम्' इत्यनुशासनात् कर्मत्वद्वयानभिधायकत्वानियमेन प्रकृते कर्मत्वद्वयस्यैव तुल्यतया विकृतिगतकर्मत्वस्यापि लकारेणाभिधाने बाधकाभावः। आख्यातस्य विकृतिसमानवचनत्वप्रसङ्गस्तु—

"गृह्णाति वाचकः सङ्ख्यां प्रकृतेर्विकृतेर्न हि"।

इत्यनुशासनसिद्धविकृतिसङ्ख्यान्वयबुद्धिं प्रति प्रकृतिसङ्ख्यान्वयपरत्वेनागृह्यमाणाख्यातजन्योपस्थितेर्हेतुत्वकल्पनया निरसनीयः। कथमन्यथा "भस्मीभवन्ति काष्ठानि" इत्यादिप्रयोगा इति चेन्न, 'घटपटौ दृश्येते' इत्यत्र द्वित्वस्यैवोभयसाधारणविशेष्यतावच्छेदकापरिचयेन विकारविकारिणोर्द्वयोरेवाख्यातार्थविशेष्यत्वे वा वाक्यभेदापत्तेः। नचेष्टापत्तिः, तथा सति 'काष्ठं नाश्यते = भस्म क्रियते' इति वाक्यजबोधस्येव 'काष्ठं भस्म क्रियते' इति वाक्यजबोधस्यापि भस्म काष्ठविकृतिरन्यविकृतिर्वेति संशयनिवर्त्तकत्वानुपपत्तेः, समूहालम्बनबोधजनकत्वाविशेषेण काष्ठभस्मनोः प्रकृतिविकृतिभावस्योक्तवाक्यादलाभात्। सत्यामेवैकवाक्यतायां कर्त्तृप्रत्यये प्रयोज्यप्रयोजकभावस्य विशिष्टान्वयविवक्षानियमेन लाभ इव कर्मप्रत्ययस्थलेऽपि तथा विवक्षाया नियमवशादेव कर्मात्मनेपदेन भस्मनि काष्ठोच्छेदप्रयोज्योत्पत्तिकत्वरूपकाष्ठविकृतित्वस्य लाभात्।

नच विकृतिवाचकाद् द्वितीयापत्तिः, लकारेण विकृतिकर्मत्वस्यानभिधानेऽपि कर्मत्वान्तरविशेषणतापन्नक्रियायां तस्य विकृत्यर्थसंसर्गत्वाभ्युपगमेनैव द्वितीयापत्त्यसम्भवात्, प्रातिपदिकार्थविशेष्यतया कर्मत्वादिविवक्षायामेव द्वितीयाद्यवसरात्।

SGDF

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।

प्रभा

प्राप्यलक्षणमाह—क्रियाकृतेति—'क्रियाप्रयोज्यो योऽसाधारणो धर्मस्तत्प्रकारकप्रतीतिविषयतानाश्रयत्वे सति फलाश्रयत्वं प्राप्यकर्मत्वम्' । यथा 'रूपं पश्यति' इति । अत्र चक्षुरिन्द्रियजन्यज्ञानानुकूलो व्यापारो

दर्पणव्याख्या

नचैवम् 'घटः करोति' इत्यापत्तिः, कर्मत्वान्तरविशेषणतानापन्नक्रियायां क्रियान्तरकर्तृत्वविशेष्यतापन्नार्थकस्यैव कर्मतासंसर्गेण भानाभ्युपगमात् । अत एव 'काष्ठं भस्मराशिः करोति' इति न प्रयोगः, भस्मराशेः क्रियान्तरकर्तृत्वविशेष्यतानापन्नत्वात् । उपपद्यते च 'पश्य मृगो धावति' इत्यादिः ।

प्रकृते च 'नीलो घटो भवति' इत्यादावसाधारणधर्मरूपभवने नीलादेराधेयत्वरूपकर्तृतासम्बन्धेनान्वयवद्व्युत्पत्तिवैचित्र्येण प्रकृतिकर्मत्वविशेषणतापन्नायां कृधात्वर्थकृतौ भस्मादिरूपविकृतिकर्मणः कर्मतासम्बन्धेनान्वयोपगमेन एकवाक्यत्वोपपत्त्योक्तसंशयनिर्वर्त्तकत्वोपपत्तेः । तथाचोत्पादकत्वेन भस्मसम्बन्धिकृतिप्रयोज्यनाशप्रतियोगीनि काष्ठानीति 'काष्ठं भस्मराशिः क्रियते' इति वाक्यजो बोधः । सम्बन्धस्य प्रातिपदिकार्थविशेष्यतया अविवक्षणादेव न तत्र षष्ठ्यपि ।

एवं "मृदो न घटो न" इत्यत्रापि प्रकृतिविकृतिभावस्थले कर्मत्वान्तरविशेषणतानापन्नधात्वर्थान्वय्यर्थबोधने द्वितीयायाः साधुत्वमिति नियमोपगमे नोक्तस्थले द्वितीयाप्रसङ्गः, नापि 'दुह्यते गोः क्षीरम्' इत्यादौ तदनुपपत्तिः । एवमेकत्वावच्छिन्ने द्वित्वावच्छिन्नारोपस्थलेऽपि 'एको द्वौ ज्ञायते' इत्यादौ आरोप्यविशेष्यवाचकसमानवचनत्वमाख्यातस्य । प्रयुज्यन्ते च कवयः—"एकोऽपि त्रय इव भाति कन्दुकोऽयम्" इति । नच तत्रापि 'भान्ति' इत्येव पाठः, कथमन्यथा—

"अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम्" ।

इत्यत्रारोप्यनिजायशोयुगसमानवचनम् 'अमानि' इत्याख्यातं प्रयुक्तं श्रीहर्षेणेति वाच्यम्, तत्रापि पूर्वार्द्धसमर्थितायशोयुगस्य वास्तवत्वेन तस्मिन् फालद्वयबद्धचिकुराणामेव राज्ञ आरोप्यत्वेन कवेरुत्प्रेक्षितत्वात् । अत एव न तत्राविमृष्टविधेयांशतादोषावकाश इत्याहुः ।

अत्र केचित्—"पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः" इति महाभाष्यप्रयोगादाख्यातस्य विकृतिसमानवचनत्वमेव ।

गृह्णाति वाचकः सङ्ख्यां प्रकृतेर्विकृतेर्न हि ।

इति तु च्विप्रत्ययमात्रविषयकम् । एवञ्च 'काष्ठानि भस्म राशिः क्रियन्ते' इत्यादिप्रयोगाणामसाधुत्वमेवेति ।

अपरे तु—'खदिराङ्गारसवर्णे' इति विशेषणेन तत्र कुण्डलयोः प्रकृतित्वं गम्यते, सिद्धाया विकृतेः पाकानपेक्षणात् । 'पुनरपरयाऽऽकृत्या युक्तः' इति विशेषणेन तु सुवर्णपिण्डस्य विकृतित्वम्, आकृत्यन्तरयोगस्य प्रकृतित्वाप्रयोजकत्वात् । युज्यते चैतत् । "मृत्तिकेत्येव सत्यम्" इतिवत् संहतिमुखेन 'पुनरावृत्तः' इति विशेषणेनापि सुवर्णपिण्डस्य विकृतित्वं गम्यते ।

तथाहि—पूर्वोपक्रान्ताऽऽकृतिपरम्परायास्तत्पर्य्यवसायित्वेन सिषाधयिषितसुवर्णनित्यत्वस्य सिद्धेः, तस्मात् पूर्वनिर्दिष्टाकृतिविशिष्टसुवर्णस्य कुण्डलादिप्रकृतेरप्यनिर्दिष्टाऽपराकृतिविशिष्टस्य तस्य विकृतित्वमेव भाष्यकृत्तात्पर्यविषय इत्यस्यापि वक्तुं शक्यतया न तन्निर्देश आख्यातस्य विकृतिसमानवचनत्वे उपष्टम्भक इति ।

अत्रेदमाभाति—वैयाकरणमते प्रकृते प्रकृतिविकृत्योर्द्वयोरपि कर्तृत्वेनाख्यातेन कर्तृद्वयमेव अभिधानीयम् । एवं तद्गतसंख्याऽपि तत्रैकेनाख्यातेन विरुद्धसंख्यावतोस्तयोः संख्यायाः अभिधातुमशक्यतया भगवता कुण्डले भवत इति विकृतिसङ्ख्यैवोक्ता । नतु प्रकृतिगता नाख्यातप्रतिपाद्येति मुनित्रयस्याऽऽज्ञास्ति । एवञ्च प्रयोगवशेन पर्य्यायेणान्यतरसमानवचनत्वमाख्यातस्य निराबाधमिति ।

❀ क्रियाकृतेति ❀ क्रियाप्रयोज्यासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति फलाऽऽश्रयत्वम् । निर्वर्त्या-

दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥

इति च तत्रैवोक्तम् ।

'घटं करोति' इत्याद्यम् । 'काष्ठं भस्म करोति' इति, 'सुवर्णं कुण्डलं करोति' इति च द्वितीयम् । 'घटं पश्यति' इति तृतीयम् । 'तृणं स्पृशति' इत्युदासीनम् । 'विषं भुङ्क्ते' इति द्वेष्यम् । 'गां दोग्धि' इति संज्ञान्तरैरनाख्यातम् ।

प्रभा

दृशेरर्थः । तथाचासाधारणधर्माश्रयत्वप्रकारकप्रतीत्यविषयत्वेन, फलाश्रयत्वेन च प्राप्यकर्मत्वमुपपन्नम् । नच दृशेः चक्षुरिन्द्रियजन्यावरणभङ्गानुकूलव्यापारार्थकत्वादावरणभङ्गाश्रयो रूपमिति प्रतीत्या रूपस्यावरणभङ्गरूपासाधारणधर्मप्रकारकप्रतीतिविषयतयोक्तप्राप्यलक्षणाव्याप्तिरिति वाच्यम्, तादृशावरणभङ्गरूपफलस्य ज्ञानकर्तृभिन्नावेद्यतयोक्तापत्तेरभावात्, 'क्रियाकृतविशेषाणाम्' इति कारिकया तथैव बोधनात् । दर्शनात् = चक्षुरादिरूपप्रत्यक्षप्रमाणाद् गम्यते । अनुमानात् = अनुमितिकरणात् । यथा 'सुखमनुभवति देवदत्तः' इति मुखप्रसादादिना सुखमनुमीयते ।

क्रमेणोदाहरणमाह—घटमिति । आद्यम् = निर्वर्त्यम् । द्वितीयम् विकार्य्यम् । अत्र काष्ठसुवर्णयोरेव विकार्य्यकर्मत्वम् । भस्मकुण्डलयोस्तु निर्वर्त्यत्वमेव । वाक्यपदीयकारस्तु—यत्र प्रकृतिः परिणामित्वेन न विवक्ष्यते तत्र निर्वर्त्यत्वम् । यथा 'घटं करोति' इति 'भस्म करोति' इति च । 'मृदं घटं करोति' 'काष्ठं भस्म करोति' 'सुवर्णं कुण्डलं करोति' इत्यादौ परिणामित्वविवक्षया उभयोर्विकार्य्यत्वमेव । विकार्य्यकर्मस्थले विकारानुकूलव्यापारपूर्वकोत्पत्त्यनुकूलो व्यापारः करोतेरर्थ इति विकारः, उत्पत्तिश्च फलद्वयं धात्वर्थस्तदाश्रयत्वादुभयोः कर्मत्वम् । विकारश्च उच्छेदरूपः, आकारविशेषरूपश्च । उच्छेदस्थले भस्मादिदशायामविद्यमाना प्रकृतिः, आकारविशेषदशायां विद्यमाना प्रकृतिरिति च विशेषः । तृतीयम् = प्राप्यम् । निर्वर्त्य-विकार्य्ये च स्वरूपलाभात्मको गुणान्तरात्मको वा विशेषः । कर्तुरनीप्सितमित्यस्योदाहरणमाह—विषमिति—फलाश्रयत्वे सति फलाश्रयत्वोद्देश्यत्वेनाविवक्षितम्, कर्तुरनीप्सितमित्यर्थः । संज्ञान्तरैः = अपादानादिभिः । अनाख्यातम् = अविवक्षितम् ।

दर्पणव्याख्या

दावतिव्याप्तिवारणाय सत्यन्तम् । तत्रापि विषयतानाश्रयत्वस्य धर्मप्रकारकप्रतीतिविषयतानाश्रयत्वस्यासाधारणधर्मघटितस्य वा तस्य 'घटं जानाति' इत्यादौ घटादावसम्भव इति प्रयोज्यान्तं धर्मविशेषणम् । तत्रैव क्रियाप्रयोज्यासाधारणधर्मसंयोगप्रतीतिविषये ग्रामादिकर्मण्यव्याप्तिनिरासाय असाधारणेति । क्रियाजन्यफलानाश्रये अतिप्रसक्तिनिरासाय विशेष्यम् ।

नच 'घटं जानाति' इत्यादौ क्रियाजन्यफलाभावात् सामान्यलक्षणस्याव्याप्तिः, तद्वारणाय तत्राऽऽवरणभङ्गाभ्युपगमे तु तस्यैव क्रियाप्रयोज्यासाधारणधर्मतया 'अयं घट एतेन ज्ञातः, एतद्व्यवहारविषयत्वात्' इति अनुमानजन्यप्रमाविषयत्वेन सत्यन्ताभावाद्विशेषलक्षणाव्याप्तिरिति वाच्यम्, कर्तृभिन्नत्वे सति कर्तृकर्मोभयसाधारणक्रियाजन्यफलाश्रयत्वे उक्तलक्षणवाक्यतात्पर्य्याद्विषयतया ज्ञानरूपफलाश्रयत्वाच्च न सामान्यलक्षणाऽव्याप्तिः, आवरणभङ्गफलमादाय जानात्यादिकर्म्मणि लक्षणसङ्गमनेऽपीच्छत्यादिकर्मण्यव्याप्तिवारणायोक्तरीतेरेवानुसर्तव्यत्वादिति । निर्देशक्रमेणोदाहरणान्याह—❀ घटमिति ❀ । ❀ आद्यमिति ❀ निर्वर्त्यमित्यर्थः । एवमग्रेऽपि ।

❀ संज्ञान्तरैरनाख्यातमिति ❀ अपादानत्वादितत्तद्रूपविशेषैरविवक्षितमित्यर्थः । अकथितञ्चेत्यत्राकथितशब्दोऽविवक्षितपरः, नत्वप्रधानपरः । तथा सति 'पाणिना कांस्यपात्र्यां दोग्धि' इत्यत्र करणाधिकरणयोः कर्मसंज्ञा प्रसज्ज्येतेति दुहा-

SGDF

'क्रूरमभिक्रुद्धयति' इत्यन्यपूर्वकम् ।

प्रभा

अन्यपूर्वकम् = शास्त्रान्तरप्राप्तसंज्ञान्तरबाधकशास्त्रप्रयोज्यकर्मसंज्ञकमित्यर्थः । यथा 'क्रूरमभिक्रुध्यति' इति । अत्र 'क्रुधद्रुहोरुपसृष्टयोः' इत्यनेन सम्प्रदानसंज्ञा प्राप्ता बाध्यते । एवं 'वैकुण्ठमधिशेते' अत्रापि आधारसंज्ञा प्राप्ता 'अधिशीङ्' इत्यनेन कर्मसंज्ञया बाध्यते ।

दर्पणव्याख्या

दीनां परिगणनात् तत्संज्ञयोः करोत्यादियोगे सावकाशत्वादिति भावः । तथाच पूर्वविधिप्रसक्तिपूर्वकं तदविवक्षायां सर्वथा पूर्वविधेरप्रसक्तौ च तत्प्रवृत्तिरिति बोध्यम् । यद्यपि विभागानुकूलव्यापारानुकूलव्यापारस्यापि दुह्यर्थत्वेन कर्त्तुरीप्सिततममित्यनेनैव कर्मसंज्ञा सिद्ध्यति, कर्तृनिष्ठव्यापाराविशेषणफलाश्रयतया गोः प्रधानकर्मतया न तत्र लाद्यनुपपत्तिः, पयोनिष्ठविभागानुकूलगोनिष्ठव्यापारानुकूलव्यापारस्य शब्दतः प्राधान्यादन्यथासिद्धप्रयोजनकमेतत् सूत्रमित्याभाति, तथापि विभागानुकूलव्यापार एव यदि धात्वर्थस्तदाऽपादानत्वाद्यविवक्षायामन्यसूत्राप्राप्तकर्मत्वार्थमिदमावश्यकम् । एतस्मिन्नर्थेऽप्रधाने दुहादीनामित्यनुशासनाद् गवादावेव लादयः ।

अप्रधानकर्मत्वं चोक्तकर्मभिन्नत्वम् । तच्चोक्तार्थे गवादीनामक्षतम्, धात्वर्थफलानाश्रयत्वात् । तथाचैतत्कल्पे स्थितं द्रवद्रव्यनिष्ठविभागानुकूलव्यापारो दुहेरर्थः । तत्र गोरपादानत्वाविवक्षायामनेन कर्मत्वम्, तद्विवक्षायां पञ्चमी । गोः पयस्यन्वये तु षष्ठी । एवञ्च गोकर्मकपयोनिष्ठविभागानुकूल एककर्त्तृको व्यापार इति बोधः । विभागावधित्वमेव गोः कर्मत्वम् । आद्यकल्पे तु पयोनिष्ठविभागानुकूलगोनिष्ठव्यापारानुकूल एककर्त्तृको वर्त्तमानो व्यापार इति । तत्र विभागाश्रयत्वात् पयसः कर्मता । तदनुकूलव्यापाराश्रयत्वात्तु गोः, नतु विभागाश्रयत्वेन, पयोनिष्ठविभागीयसम्बन्धस्यैव फलतावच्छेदकत्वात् । एवमन्यत्राप्यूह्यम् ।

❀ अन्यपूर्वकमिति ❀ अन्यसंज्ञाबाधनपूर्वं शास्त्रबोधितमित्यर्थः । 'क्रूरमभिक्रुध्यति' इत्यत्र क्रुधद्रुहेर्ष्येतिप्रसक्तसम्प्रदानसंज्ञायाः "क्रुधद्रुहोरुपसृष्टयोः कर्म" (पा० सू० १ । ४ । ३८) इति बाधनात् । एवं 'वैकुण्ठमधिशेते' इत्यादावपि बोध्यम् । 'अजां ग्रामं गमयति' 'शिष्यं शास्त्रं बोधयति' 'ब्राह्मणमन्नं भोजयति' 'यजमानं मन्त्रं पाठयति' 'घटं जनयति नाशयति' इत्यादौ गतिबुद्धीति सूत्रेण गम्यादिधात्वर्थकर्तुः कर्मसंज्ञाविधानाद् गम्यादिप्रकृतिकणिजन्तधातुसमभिव्याहृतद्वितीयाया अप्याश्रयोऽर्थः । यद्यपि णिजन्तधात्वर्थप्रेरणाजन्यव्यापाररूपफलाश्रयत्वादजादीनामपि कर्मत्वं कर्त्तुरीप्सिततममित्यनेनैव सिद्धम्, तथापि णिजन्तेन आप्यमानस्य चेद्भवति गत्याद्यर्थव्यापाराश्रयस्यैवेति नियमार्थं सूत्रम् । तेन 'पाचयत्योदनं देवदत्तेन' इत्यादौ न । तदुक्तम् —

गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः ।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥ इति ।

वाचकतासम्बन्धेन स्वनिष्ठया तृतीययेत्यर्थः । यद्यपि कर्त्तृसंज्ञायाः परत्वाद्धेतुमति चेत्यनुशासनात् स्वकारकविशिष्टक्रियाया णिजर्थसम्बन्धावगतेरन्तरङ्गत्वाच्च कर्मसंज्ञायास्तया बाध एवोचितस्तथाप्यन्यानधीनत्वलक्षणार्थप्राधान्य—शाब्दप्राधान्ययोः प्रयोजकव्यापारे सत्त्वेन प्रधानकार्य्यस्य च सर्वतो बलवत्त्वस्याऽऽकडार (पा० सू० १ । ४ । १) सूत्रे कैयटेनोक्तत्वात् 'हेतुमति च' इति सूत्रस्थभाष्यप्रामाण्याच्च तदनुरोधिकर्मत्वस्यान्तरङ्गादपि कर्तृत्वाद् बलवत्त्वानियमत्वमेव साम्प्रतम् ।

परे तु—'हेतुमति च' इत्यनुशासनादन्यनिष्ठकर्तृत्वनिर्वाहकव्यापाररूपा स्वतन्त्रप्रेरणा णिजर्थः । कर्तृत्वं च क्वचित् प्रयत्नः, क्वचिदाश्रयत्वादि । यादृशधातूत्तराख्याते यादृशं कर्तृत्वमभिधीयते तादृशधातूत्तरणिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहको व्यापारोऽभिधीयते । निर्वाहकत्वं च स्वरूपसम्बन्धविशेषः, नातो 'नाशयति' इत्यादावन्वयानुपपत्तिः ।

SGDF Digital Foundation

कर्तृतृतीयाया आश्रयोऽर्थः। तथाहि—"स्वतन्त्रः कर्त्ता"। (पा० सू० १।४।५४) स्वातन्त्र्यञ्च—

प्रभा

कारकद्वितीयार्थं निरूप्य कारकतृतीयार्थमाह—कर्तृतृतीयाया इति—करणतृतीयाया व्यापारोऽप्यर्थ इत्युक्तम्—कर्तृतृतीयाया इति। आश्रयार्थे प्रमाणमाह—तथाहीति। ननु स्वतन्त्रस्यैव कर्तृसंज्ञाविधानेन 'स्वतन्त्रस्तृतीयाऽर्थः' इति वक्तुमुचितमित्याशङ्कायामाह—स्वातन्त्र्यमिति।

दर्पणव्याख्या

एवञ्च पाकादिकर्तुस्तत्कर्मत्वविरहेऽपि ण्यन्तधातुप्रतिपाद्यतावच्छेदककर्तृत्वस्य फलत्वेन तदाश्रयत्वात् पाकादिकर्तुः कर्तृत्वं तादृशकर्तृत्वविशेषणतया सहायादिरूपस्वतन्त्रकर्तृवृत्तित्वविवक्षायां 'पाचयत्योदनं सहायम्' इत्यपि प्रयोगः साधुरेव। अत एव "अजिग्रहत्तज्जनको धनुस्तत्" इति भट्टिप्रयोगः स्वरसतः सङ्गच्छते। ग्रहेर्ज्ञानलाक्षणिकतया तदुपपादनं त्वगतिकगतिः। यदा तु णिच्प्रकृत्यर्थव्यापारे स्वतन्त्रकर्तृवृत्तित्वस्य विशेषणतया विवक्षा तदा सहायेनेत्येव। 'गतिबुद्धि' इति सूत्रं तु गत्याद्यर्थकधातुयोगे तादृशकर्तृत्वविशेषणतया स्वतन्त्रकर्तृवृत्तित्वविवक्षा नियता नान्यत्रेत्यर्थबोधनद्वारा तत्र कर्तृप्रत्ययासाधुत्वज्ञापकम्। तेन 'पाचयत्योदनं सहायेन' इतिवत् 'अजया ग्रामं गमयति' इति न।

एवञ्च 'अजां ग्रामं गमयति' इत्यत्र ग्रामनिष्ठसंयोगानुकूलव्यापारस्य यदजानिष्ठकर्तृत्वं निर्वाहकत्वसम्बन्धेन तद्विशिष्टो यो व्यापारस्तदनुकूलकृतिमानिति बोधः। 'पाचयत्योदनं सहायेन' इत्यत्र सहायकर्तृको यो विक्लित्त्यनुकूलो व्यापारो निर्वाहकत्वसम्बन्धेन तत् कर्तृत्वसम्बन्धेन तत्कर्तृत्वविशिष्टव्यापारानुकूलकृतिमानिति बोधः।

'चैत्रेण ग्रामं गम्यते अजा' इत्यत्र कर्माख्याते तु तादृशव्यापारनिर्वाह्यकर्तृतानिरूपकस्तादृशधात्वर्थः कर्मात्मनेपदोपस्थितकर्तृत्वेऽन्वेति, संयोगफले च द्वितीयार्थग्रामवृत्तित्वान्वयः। एवञ्च चैत्रकर्तृकव्यापारनिर्वाह्यकर्तृत्वनिरूपकं यद् ग्रामवृत्तिसंयोगानुकूलं गमनं तत्कर्त्र्यजेति बोधः। 'सहायेन पाच्यते तण्डुलश्चैत्रेण' इत्यत्र तु चैत्रकर्तृकप्रेरणानिर्वाह्यकर्तृत्वनिरूपको यः सहायरूपस्वतन्त्रकर्तृवृत्तिव्यापारस्तज्जन्यविक्लित्त्याश्रयस्तण्डुल इति बोधः। अर्थविवेकः स्वयमूह्यः।

ये त्वनुकूलव्यापार एव णिजर्थस्तदन्वयिनी गमनादिक्रियैव धात्वर्थतावच्छेदकं फलं, तच्छालितयाऽजादीनां प्राप्तमेव कर्मत्वं "गतिबुद्धि" (पा० सू० १।४।५२) इति सूत्रेण नियम्यते इति वदन्ति। तेषां मते 'पाचयत्योदनं सहायेन' इत्यादौ द्वितीयातृतीययोर्नियामकाभावः। अधिकमन्यत्रानुसन्धेयमित्याहुः।

'वैकुण्ठमधितिष्ठति' इत्यादावपि द्वितीयाया आधार एवार्थः, अध्याद्युपसृष्टशीङादियोगे "अधिशीङ्" (पा० सू० १।४।४६) इत्यादिसूत्रैराधारस्य कर्मसंज्ञाविधानात्। यदपि कृञर्थव्यापारान्तर्भावेणाध्याद्युपसृष्टशीङादीनां लक्षणामुपगम्य 'कर्तुरीप्सिततमम्' इत्यनेनैव कर्मसंज्ञा सुसाधा, तथापि मुख्यार्थकतद्योगेऽपि कर्मप्रत्ययसाधुत्वबोधनार्थम् 'अधिशीङ्स्थासाम्' इत्यादिसूत्राणामप्यावश्यकतेति। कर्मप्रवचनीययोगविहितविभक्तेस्तु यथायथं लक्ष्यलक्षणभावादिः सम्बन्धो द्योत्य इति वक्ष्यते।

उपपदविभक्तीनां तु षष्ठ्यपवादकत्वात् सम्बन्ध एवार्थः। "कालाध्वनोरत्यन्तसंयोगे" (पा० सू० २।३।५) इति विहितद्वितीयाया व्यापकत्वमर्थः, 'मासमधीते' इत्यादौ मासव्यापकाध्ययनमिति बोधात्, द्वितीयादीनामाश्रयोऽर्थ इत्यत्र विभक्तिपदस्य कारकविभक्तिपरत्वेन तदविरोधादित्यन्यत्र विस्तरः।

क्रमप्राप्तं तृतीयार्थं निरूपयति—❀ कर्तृतृतीयाया इति ❀ करणतृतीयाया व्यापारार्थत्वस्यापि वक्ष्यमाणत्वादुक्तम्—❀ कर्त्रिति ❀। ❀ आश्रय इति ❀ आश्रयमात्रमित्यर्थः। आश्रयार्थकत्वे मानमुपन्यस्यति ❀ तथाहीत्यादिना ❀। ननु स्वातन्त्र्यमितरव्यापारानधीनव्यापारवत्त्वम्, तच्च 'काष्ठं पचति' इत्यादौ काष्ठादावप्रसक्तम्, तद्व्यापारस्य चेतनव्यापाराधीनत्वादत आह—❀ स्वातन्त्र्यञ्चेति ❀ व्यापाराश्रयत्वस्य करणे, धात्वर्थाश्रयत्वस्य कर्मण्यतिप्रसक्तत्वात् तद्व्यावृत्तये

धात्वर्थव्यापाराऽऽश्रयत्वम् ।

धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ।

प्रभा

धात्वर्थेति—प्रधानधात्वर्थव्यापाराश्रयत्वमित्यर्थः । अत्र प्राधान्यञ्च—कारकान्तराप्रयोज्यत्वेनाविवक्षितत्वम् । तेन 'काष्ठं पचति' इत्यादौ काष्ठस्य कर्तृत्वविवक्षायां काष्ठव्यापारस्यान्यप्रयोज्यत्वेऽपि नाव्याप्तिः । एवञ्च स्वतन्त्रपदमत्र पारिभाषिकमिति भावः ।

अत्रार्थे प्रमाणमाह—धातुनोक्तेति—प्रकृतधातूपात्तेत्यर्थः, यत्किञ्चिद्धातूक्तत्वस्याव्यभिचरितत्वात् । व्यापारश्च—धात्वर्थनिष्ठविशेष्यतानिरूपितशाब्दबोधीयानुकूलत्वसम्बन्धावच्छिन्नप्रकारतानाश्रयो ग्राह्यः । तेन 'ग्राममजां नयति' इत्यादौ संयोगानुकूलव्यापारस्याऽऽश्रयत्वेऽपि अजाया न कर्तृत्वम्, तद्व्यापारस्य द्वितीयनयत्यर्थव्यापारे प्रकारीभूतत्वात् । 'पक्वस्तण्डुलो देवदत्तेन' इत्यत्रापि न दोषः, व्यापारस्य धात्वर्थफले प्रकारत्वेऽप्यनुकूलत्वसम्बन्धावच्छिन्नप्रकारत्वानाश्रयत्वात्, तत्र जन्यत्वसम्बन्धावच्छिन्नप्रकारताया एव सत्त्वात् । नचैवमपि 'चैत्रेण पाचयति मैत्रः' इत्यादौ चैत्रीयव्यापारस्य प्रयोजकव्यापारप्रयोज्यत्वेन कारकान्तराप्रयोज्यत्वेनाविवक्षितत्वाभावात् कर्तृत्वं न स्यादिति वाच्यम्, तद्धात्वर्थव्यापाराप्रयोज्यत्वस्य विवक्षितत्वेन पचधात्वर्थव्यापाराप्रयोज्यत्वस्याक्षतेः, णिजन्तधात्वर्थव्यापारप्रयोज्यत्वस्याकिञ्चित्करत्वात् ।

निर्दुष्टकर्तृत्वञ्च—धातुनिष्ठशक्तिविशिष्टार्थाऽऽश्रयत्वम् , अर्थे शक्तिवैशिष्ट्यञ्च—स्वज्ञानप्रयोज्यशाब्दबोधीयानुकूलत्वसम्बन्धावच्छिन्नप्रकारतात्वावच्छिन्नप्रतियोगिताकाभाववत्त्व-स्वज्ञानीयविषयताश्रयत्वैतदुभयसम्बन्धेन । प्रतियोगिता च—स्वाश्रयत्व—स्वावच्छेदकताऽऽश्रयत्वान्यतरसम्बन्धावच्छिन्ना ग्राह्या । यथा—'घटं करोति चैत्रः' इत्यत्र 'कृञ्पदम् उत्पत्त्यनुकूलव्यापारत्वावच्छिन्नविषयकबोधजनकतावत्' इतिशक्तिज्ञानम् । तत्र व्यापाररूपोऽर्थः शक्तिविशिष्टस्तथाहि—स्व—(शक्ति) ज्ञानप्रयोज्यानुकूलत्वसम्बन्धावच्छिन्ना प्रकारता उत्पत्तौ तादृशप्रकारतात्वावच्छिन्नप्रतियोगिताभावश्च व्यापारे, स्व (शक्ति) ज्ञानीयविषयताश्रयत्वमपि व्यापारे, व्यापारस्य शक्तिज्ञानीयविषयत्वात् । उक्ता प्रकारता चाऽऽश्रयत्वसम्बन्धेनोत्पत्तौ, अवच्छेदकत्वसम्बन्धेनोत्पत्तित्वे चास्ति, व्यापारे च नास्ति, इत्यन्यतरसम्बन्धावच्छिन्ना प्रकारतानिष्ठा प्रतियोगिता जातेति तादृशव्यापाराश्रयत्वेन चैत्रस्य कर्तृत्वं सिद्धम् ।

दर्पणव्याख्या

क्रमेणोभयम् ।

अन्ये तु—कर्तृप्रत्ययसमभिव्याहारे व्यापारतावच्छेदकसम्बन्धेन धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वं स्वातन्त्र्यम् । तदेव च कर्तृत्वम् । कालिकसम्बन्धेन व्यापाराश्रयेऽतिप्रसङ्गवारणाय व्यापारतावच्छेदकसम्बन्धेनेति । 'ग्रामं गच्छति' इत्यादावुत्तरसंयोगात्मके फले तादृशधात्वर्थत्वाभावान्न तदाश्रयेऽतिप्रसङ्गः । 'पक्वस्तण्डुलो देवदत्तेन' इत्यादौ फलस्य विशेष्यत्वेन देवदत्तेऽव्याप्तिपरिहाराय कर्तृप्रत्ययसमभिव्याहार इति । सामग्रीसाध्यायां क्रियायां सर्वेषां स्वस्वव्यापारे स्वातन्त्र्येऽप्युक्तस्वातन्त्र्यस्य युगपत्सर्वेष्वभावान्न सूत्रानर्थक्यमिति । तत्तु कर्मप्रत्ययसमभिव्याहृतकर्तृव्यावृत्तत्वाद् धात्वर्थव्यापाराश्रयत्वस्यैव सम्यक्त्वे गुरुविशेषणस्यानतिप्रयोजनकत्वाच्चोपेक्ष्यम् । कर्मकर्त्तरि तु नव्यमते फले व्यापारत्वाऽऽरोपान्नाऽव्याप्तिः । व्यापारत्वेन कृतेरपि सङ्ग्रहान्न तदनाश्रयेऽचेतने स्वरसतः कर्तृव्यवहारः । तदतिरिक्तव्यापारस्य धातुना विवक्षायां तु क्वचित् कर्तृत्वव्यवहारोऽपि । वक्ष्यति च—'यदा यदीयो व्यापारः' इत्यादि । एवमेव 'मत्तो भूतं न तु मया कृतम्' इत्याद्युपपाद्यमिति भावः । तत्र हरिवाक्यं प्रमाणयति ❀ धातुनेति ❀ । ❀ उक्तक्रिय इति ❀ विशेषणादस्मदुक्तमेव स्वातन्त्र्यं हरिसम्मतमिति सूचयति ❀ ।

Sri Gargeshwari Digital Foundation

इति वाक्यपदीयात्। अत एव 'यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्ता' इति 'स्थाली पचति' 'अग्निः पचति' 'एधांसि पचन्ति' 'तण्डुलः पच्यते स्वयमेव' इत्यादि सङ्गच्छते।

नन्वेवम् "कर्म्मकर्तृव्यपदेशाच्च" (ब्र० सू० १।२।४) इति सूत्रे "मनोमयः प्राणशरीरः" इति वाक्यस्थमनोमयस्य जीवत्वे वाक्यशेषे तस्य "एतमितः

प्रभा

प्रतियोगितायाम् अवच्छेदकत्वसम्बन्धानिवेशे 'अग्नेर्माणवकं वारयति' इत्यत्र माणवकनिष्ठसंयोगानुकूलव्यापारस्यापि वारिधातुनिष्ठशक्तिविशिष्टतया माणवकस्य, 'विप्राय गां ददाति' इत्यत्र स्वस्वत्वध्वंससमानाधिकरणपरस्वत्वोत्पत्तीच्छाबोधानुकूलव्यापारनिरूपितदाधातुनिष्ठशक्तेर्वैशिष्ट्यस्योत्पत्तौ सत्त्वेन तदाश्रयस्य गवादेश्च कर्तृत्वापत्तिः, इति तद्वारणाय प्रतियोगितायामवच्छेदकत्वसम्बन्धावच्छिन्नत्वनिवेश आवश्यक इति दिक्।

नन्वेवमपि 'चैत्रः पचति' इत्यादौ कर्तृत्वानापत्तिः, फुत्कारादिव्यापारस्य पच्यर्थयत्नप्रयोज्यत्वेन विवक्षितत्वादिति चेन्न, चैत्रीयपच्धात्वर्थयत्नप्रयोज्यत्वस्य विवक्षितत्वेऽपि कारकान्तरव्यापाराप्रयोज्यत्वविवक्षायाः सत्त्वात्। अत एव = कर्तृत्वस्योक्तस्वातन्त्र्यस्वरूपत्वादेव। क्रमजन्मनामेषां व्यापाराणां समूहः संकलनात्मिकयैकत्वबुद्ध्या प्रकल्पितः, स च समूहः स्वभावतो गुणभूतैरवयवैर्युक्तः। एवञ्च सर्वेषां कारकाणां व्यापारा धातुवाच्याः। यदा यो व्यापारो यस्य बुद्धिस्थस्तदा स धातुनाऽभिधीयते, तदैव तदाश्रयः कर्त्ता। तदाह—यदा यदीयेति—एवञ्च 'काष्ठेन पचति' इत्याद्यपि नानुपपन्नम्, तदा तद्व्यापारस्य धात्वर्थत्वेनाविवक्षणात्।

विवक्षायाः प्रयोगनियामकत्वमिति द्रढयितुं शङ्कते—नन्वेवमिति। एवम्—विवक्षाया एव प्रयोगनियामकत्वे। इति सूत्रे इति—अस्य 'निर्णीतम्' इत्यनेनान्वयः। तथाच 'इति सूत्रे' निर्णीतं कथं सङ्गच्छतामित्यन्वयः। वेदे ब्रह्मपराणि द्विविधानि वाक्यानि, स्पष्टब्रह्मलिङ्गानि, अस्पष्टब्रह्मलिङ्गानि च। तत्र अस्पष्टब्रह्मलिङ्गेषु 'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः' इत्यादिविस्तृतं वाक्यम्। अस्यान्ते 'एष मे आत्माऽन्तर्हृदय एतद् ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मि' (छा० ३-१४-१-२-३) इति। अस्यार्थः—नायं शब्दादिरिव श्रवणादिग्राह्यः, किन्तु मनसैव ग्राह्यः। मनोयोगप्राचुर्य्यान्मनोमय इत्युक्तिः। विशुद्धमनोग्राह्य इति यावत्। प्राणशरीरः = प्राणाऽऽख्यवायुः शरीरं यस्य सः। भारूपः = भा = दीप्तिरेव रूपम् = असाधारणस्वभावो यस्य सः। दीप्तिश्चेह ज्ञानप्रकाशः। सत्यसङ्कल्प इत्यादेरर्थः स्पष्ट एव।

अत्र सन्दिह्यते—किमिह मनोमयत्वादिधर्मैर्जीव उपास्यत्वेनोपदिश्यते आहोस्वित्परं ब्रह्म इति? जीवस्य मन आदिभिः सम्बन्धः प्रसिद्धो न ब्रह्मणा इति जीव एवोपास्य इति पूर्वपक्षे, उत्तरसूत्रम् 'अनुपपत्तेस्तु न शारीरः' इति तद्वाक्योक्तसत्यसङ्कल्पादिगुणानां जीवेऽनुपपत्तेर्न शारीरः (जीवः) उपास्यः, किन्तु ब्रह्मैव।

दर्पणव्याख्या

अत एवेति ❀ उक्तस्वातन्त्र्यस्य कर्तृत्वादेवेत्यर्थः।

❀ सङ्गच्छत इति ❀ कृत्याश्रयत्वादेस्तत्त्वे तु तदसङ्गतिरिति भावः। उक्तविवक्षायाः प्रयोगनियामकत्वं द्रढयितुं पृच्छति—❀ नन्वेवमिति ❀ एवं विवक्षाया एव प्रयोगनियामकत्वे मनोमयस्य = मनोमयशब्दप्रतिपाद्यस्येत्यर्थः। ❀ जीवत्वे ❀ = संकल्पकर्तृरूपत्वे = ब्रह्मभिन्नत्वे इति यावत्। ❀ एतमितः ❀ इत्यादेरितः = शरीरात् ❀ प्रेत्य ❀ = निःसृत्य = एतच्छरीरं परित्यज्येति यावत्। ❀ एतम् ❀ स्वप्रकाशत्वादिगुणविशिष्टं पूर्वोक्तमात्मानम्।

SGDF Sri Gargeshwari Digital Foundation

प्रेत्याभिसम्भविताऽस्मि" इति प्राप्तिकर्म्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम् ? उच्यते—जीवस्यैव ज्ञेयत्वे प्राप्तिकर्म्मत्वमपि वाच्यम्, कर्तृत्वञ्च तस्य आख्यातेनोक्तम् । नचैकस्यैकदा संज्ञाद्वयं युक्तम्, कर्तृसंज्ञया कर्म्मसंज्ञाया बाधात् । तथाच 'एतम्' इति द्वितीया न स्यात् । कर्म्मकर्तृतायाञ्च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः ।

प्रभा

अत्र 'मनोमयः प्राणशरीरः' इत्यादिषु द्वितीयार्थे प्रथमा । तथाच मनोमयत्वादिगुणविशिष्टं हृदये ध्यात्वा, एतम् = मनोमयत्वादिगुणविशिष्टम् । अभिसम्भविताऽस्मि = प्राप्तास्मि । प्राप्त्यर्थकाऽऽत्मनेपदिनो भवतेर्व्यत्ययेन परस्मैपदम् ।

एवञ्च 'एतम्' इत्यनेन जीवः कर्मत्वेनोच्यते । 'अभिसम्भविताऽस्मि' इति तिङा स एव कर्तृत्वेनोच्यते । नच सत्यां गतावेकस्य कर्मकर्तृव्यपदेशो (व्यवहारो) युक्तः, कर्मकर्तृव्यपदेशाच्च न मनोमयत्वादिगुणविशिष्टो जीव इत्याह—मनोमय इति । मनोमयस्य = मनोमयपदस्य । जीवत्वे = जीवपरत्वे । वाक्यशेषे = 'मनोमयः प्राणशरीरः' इत्यादिपदसमुदायात्मकवाक्यस्यान्ते । तस्य = जीवस्य । अस्य कर्मकर्तृव्यपदेश इत्यत्रान्वयः । इतीति—इतिवाक्यबोधितकर्मकर्तृव्यपदेश इत्यर्थः । विरुद्ध इति—युगपज्जीवस्य कर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इत्यर्थः । एतेन समयभेदेन संज्ञाद्वये न विरोध इत्यपास्तम् । तथाच जीव एवोपासकः, जीव एवोपास्यश्चेत्येकस्य कर्तृत्वम्, कर्मत्वञ्च विरुद्धमापद्येतेति भाष्योक्तिविरोध इति भावः । कथमिति—शाब्दिकनये कर्तृत्व-कर्मत्वयोः वैवक्षिकतया एकस्मिन्नेककालेऽपि तयोः सत्त्वे विरोधाभावादिति भावः ।

एकस्मिन् कर्तृत्वकर्मत्वयोः सत्त्वे विरोधाभिप्रायकं न शाङ्करभाष्यम्, किन्तु युगपत्संज्ञाद्वयविरोधपरं तदित्याशयेन समाधत्ते—उच्यत इति । ज्ञेयत्वे = उपास्यत्वेन ज्ञानविषयत्वे । प्राप्तिकर्मत्वमिति—उपास्यत्वेन ज्ञानविषयस्यैव प्राप्तिकर्मत्वादिति भावः । आख्यातेनेति-'अभिसम्भविताऽस्मि' इत्येतद्घटकाख्यातेनेत्यर्थः । बाधादिति-कर्तृकर्मसंज्ञयोराकडारीयत्वेन 'आकडारादेका संज्ञा' इत्युक्तेः परत्वादिति भावः । तथाच = परत्वात्कर्तृसंज्ञया कर्मसंज्ञाया बाधे च । कर्मकर्तृतायामिति—'एतं ध्यात्वा ध्यायेद् वा' इत्यत्र कर्मत्वेन निर्दिष्टस्य 'एषोऽहमभिसम्भविताऽस्मि' इत्यत्र कर्तृत्वविवक्षया न युगपद्विषयकबाध्यबाधकभाव इति भावः । यगाद्यापत्तिरिति—अभ्युपगमवादेन (वादिबलनिरीक्षणार्थं निर्दिष्टस्य स्वीकरणवादेन) इयमुक्तिः, यगादेस्तासिना बाधात्, प्राप्ये कर्मणि कर्मवद्भावाभावाच्च । तथाच कर्मकर्तृतायामपि भाष्यविरोध एव दोषो बोध्यः । शब्दविरोधद्वारा = संज्ञाद्वयप्रयुक्तकर्त्रर्थकतिङ्कर्मार्थकद्वितीयारूपशब्दविरोधद्वारा । सः = कर्मकर्तृव्यपदेशः । भेदहेतुः = उपास्योपासकयोः कर्मकर्त्रोर्भिन्नत्वे कारणम् । एकदा संज्ञाद्वयाभावे विभक्तिद्वयाभावेन विभक्तिद्वयदर्शनं विरुध्येतेति भावः ।

दर्पणव्याख्या

❀ अभिसम्भविताऽस्मि ❀ प्राप्तास्मीत्यर्थः । ❀ कथं सङ्गच्छतामिति ❀ भवन्मते वैवक्षिकयोः कर्तृत्वकर्मत्वयोरेकस्मिन्नपि सम्भवादिति भावः ।

संज्ञानिबन्धनविरोधं समर्थयन् कर्तृत्वकर्मत्वयोर्वास्तवाविरोधं दर्शयति—❀ उच्यत इत्यादिना ❀ । ❀ जीवस्यैव ज्ञेयत्व इति ❀ 'स क्रतुं कुर्वीत' इत्यनेन जीवस्यैवोपास्यत्वबोधने इत्यर्थः । ❀ प्राप्तिकर्मत्वमिति ❀ अन्योपासनाया अपरप्राप्त्यफलकत्वादिति भावः । ❀ आख्यातेनेति ❀ अभिसम्भविताऽस्मीत्येतद्घटकेनेत्यर्थः । ❀ बाधादिति ❀ संज्ञयोराकडारीयतया समावेशासम्भवेन परया कर्तृसंज्ञया बाधादित्यर्थः । ❀ यगाद्याऽऽपत्तिरिति ❀ । अभ्युच्चयवादः, प्राप्ये कर्मणि कर्मवद्भावाप्रसक्तेः । ❀ शब्दविरोधद्वारा ❀ = एकदा संज्ञाद्वयप्रयुक्तकार्य्यानुत्पत्तिद्वारा, ❀ सः ❀ = संज्ञाद्वयविरोधस्तत्र कर्तृकर्मत्वव्यवहारहेतुरित्यर्थः । नतु कर्तृत्वकर्मत्वयोः पारमार्थिकं भेदमादायेति भावः ।

एवञ्च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः। कारकचक्रप्रयोक्तृत्वम्, कृत्याश्रयत्वं वा 'दण्डः करोति' इत्यत्राव्याप्तम्।

प्रभा

एवञ्च = धातूपात्तव्यापाराश्रयत्वेन विवक्षितस्य कर्तृत्वे च। नैयायिकाभिमतं कर्तृत्वं दूषयति—**कारकचक्रेति**—कर्मादिकारकाणां चक्रम् = समुदायस्तत्प्रयोक्तृत्वम् = प्रवर्तकत्वम्। तच्च 'चैत्रः काष्ठैस्तण्डुलान् स्थाल्यां पचति' इत्यादौ चैत्रे एव न काष्ठादौ। लाघवादाह—**कृत्याश्रयत्वमिति**—प्रकृतधात्वर्थव्यापारानुकूलकृत्याश्रयत्वं तद्धात्वर्थकर्तृत्वमित्यर्थः। तेन यत्किञ्चित्कृतिमादाय नातिप्रसङ्गः। कृत्याश्रयत्वञ्च समवायेन ग्राह्यम्, तेन कालिकादिना कृत्याश्रयत्वमादाय 'घटः पचति' इति न प्रयोगः। **अव्याप्तमिति**—प्रवर्तनायाः, कृतेश्च चेतनधर्मत्वेनाचेतने तद्बाधादिति भावः। 'कृत्याश्रयत्वं कर्तृत्वम्' इति मतेऽपि कृतेर्धातुनैव लाभादाश्रयत्वमात्रं कर्तृतृतीयार्थ इति शाब्दिकमतसाम्यमेवेति चेन्न, फलानुकूलकृतेर्धातुलभ्यत्वेऽपि फलानुकूलव्यापारानुकूलकृतेर्धात्ववाच्यत्वेन तत्र विभक्तिवाच्यत्वसम्भवात्। यद्वा फलप्रयोजककृतेर्धातुवाच्यत्वाभिप्रायेण तत्कृतेरपि धातुलभ्यत्वादाह—**दण्डः करोतीति**।

परे तु 'कारकचक्रप्रयोक्तृत्वमेव स्वातन्त्र्यम्' भाष्यसम्मतम्। तच्च चेतने वास्तविकम्, अचेतने चारोपितम् इति 'दण्डः करोति' इत्यादौ नाव्याप्तिः। अत एव 'भिक्षा वासयति' इत्यादिप्रयोगनिर्वाहः। अत एव "प्रधानेन समवाये स्थाली परतन्त्रा, किं पुनः प्रधानम्? कर्त्ता। कथं ज्ञायते कर्ता प्रधानमिति? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति इति" इति 'कारके' इति सूत्रस्थं भाष्यं सङ्गच्छते।

एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वतन्त्रत्वम्। चेतनेऽनारोपितम्, अचेतने चारोपितमिति 'स्वतन्त्रः कर्ता' इति सूत्रे भाष्ये उक्तम्। 'प्रधानधात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यम्' इति तु न भाष्यसम्मतम्, क्वचिदपि तादृशस्वातन्त्र्यस्यापरिभाषणात्, लोके पूर्वोक्तार्थे एव तत्पदप्रवृत्तेः प्रसिद्धत्वाच्च। अत एव प्रयोज्यस्य कर्तृत्वानुपपत्तिशङ्कायां स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वरूपं स्वातन्त्र्यं साधितं भाष्ये। एतादृशस्वातन्त्र्याश्रयनिष्ठो व्यापारो धातुवाच्यः। तदभिप्रायेणैव 'धातुनोक्तक्रिये नित्यम्' इति हर्य्युक्तिः। अत एव—

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि।
तदधीनप्रवृत्तत्वात् प्रवृत्तानां निवर्तनात्॥
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात्।
आरादप्युपकारित्वात् स्वातन्त्र्यं कर्तुरुच्यते॥

इति वाक्यपदीये उक्तम्। अस्यायमर्थः—करणादिकारकात्प्रागेवान्यतः = अर्थित्वादेरेव निमित्तात् शक्तिलाभात् = कर्तृत्वशक्तिलाभात् कर्ता प्रवर्तते। करणादिकन्तु तदधीनप्रवृत्तिनिवृत्तिकम्। तदाह—**न्यग्भावापादनादिति**—अन्येषां कारकाणां स्वाधीनप्रवृत्तिनिवृत्तिकत्वापादनादित्यर्थः। किञ्च करणादेरभावे प्रतिनिधिर्दृश्यते, व्रीह्यभावे यववत्। कर्तुरभावे प्रतिनिधिर्न दृश्यते। कर्तृभेदे क्रियान्तरत्वमेव। प्रविवेके च = कारकान्तराणामभावे च कर्तुर्दर्शनात्। आरादप्युपकारित्वात् = आरात् = दूरत उपकारित्वात् = कारकान्तरव्यापारे परम्परया उपकारित्वात्। कर्तुः स्वातन्त्र्यमुच्यते वृद्धैरिति।

दर्पणव्याख्या

ननु विशिष्टाश्रयस्य तावता तृतीयाऽर्थत्वमायातमत आह—❀ **एवञ्चेति** ❀ धातूपात्तव्यापाराश्रयस्य कर्तृत्वे चेत्यर्थः ❀ **आश्रयमात्रमिति** ❀ अनन्यलभ्यत्वादिति भावः। मतान्तरं दूषयति—❀ **कृत्याश्रयत्वमित्यादिना** ❀। ❀ **अव्याप्तमिति** ❀ अचेतने तस्मिंस्तद्बाधादिति भावः।

SGDF
Sri Gargeshwari Digital Foundation

दर्पणव्याख्या

अत्र वदन्ति—दण्डादिनिष्ठव्यापारस्य धात्वर्थत्वविवक्षया भवदुक्तस्वातन्त्र्यवद् वास्तवकारकचक्रप्रयोक्तृत्वस्य दण्डादावभावेऽपि तदारोपात् कर्तृत्वव्यवहारस्तस्मिन् सूपपादः। अत एव हरिणा—

प्रागन्यतः शक्तिलाभान्न्यग्भावाऽऽपादनादपि ।
तदधीनप्रवृत्तत्वात् प्रवृत्तानां निवर्त्तनात् ॥
अदृष्टत्वात्प्रतिनिधेर्व्यतिरेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते ॥

इत्यनेन करणादिव्यापारात् पूर्वं करणादिसम्पादकशक्तिमत्त्वेन करणादीनामात्माधीनत्वसम्पादनेन च तदायत्तव्यापारत्वेनातिप्रवृत्तानां निवर्त्तनेन कर्तुः फलप्राप्तौ स्वत एव निवृत्त्या प्रतिनिध्यभावेन कारकान्तराभावेऽप्यस्त्यादौ कर्तुर्दर्शनेन च आरा (दूरा)दप्युपकारित्वे स्वातन्त्र्यमित्यर्थकेन कारकचक्रप्रयोक्तृत्वमेव स्वातन्त्र्यमभिहितम्।

वस्तुत एषां धर्माणामभावेऽपि शब्देन यस्यैते प्रतिपाद्यन्ते स कर्त्तेति तदाशयः। 'पाचयति चैत्रेण मैत्रः' इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनत्वेऽपि णिच्प्रकृत्यर्थसाधनान्तरविषये उक्तस्वातन्त्र्यस्य सत्त्वात् कर्तृत्वोपपत्तिः, धातुवाच्यक्रियाकृतस्वातन्त्र्यस्यैव विवक्षणात्, कर्तृपरतन्त्रकरणादेर्न स्वव्यापारमादाय कर्तृत्वम्, प्रयोज्यस्य स्वार्थसिद्ध्यर्थमपि प्रवृत्त्या करणादीनां कर्त्रधीनत्ववत् प्रयोज्यस्य प्रयोजकानधीनत्वाच्च। नहि फलोद्देशाधीना करणादीनां व्यापारवत्ता। प्रयोज्यस्य तु तादृशप्रवृत्तौ "सर्व इमे स्वभृत्यर्थं प्रवर्त्तन्ते" इति, हेतुमति चेति सूत्रस्थं भाष्यमनुभवश्च सार्वजनीनः प्रमाणमित्याहुः।

कृत्याश्रयत्वं दण्डादावव्याप्तमित्युक्तया नैयायिकोक्तकर्तृत्वस्योपेक्षणीयत्वमावेदितम्। तेषां त्वयमाशयः—कर्तृत्वं मुख्यं पूर्वोक्तमेव, आश्रयप्रतियोगित्वादिरूपं तु गौणम्, उभयमपि कर्तृतृतीयया प्रतिपाद्यते।

तथाहि—'चैत्रेण पच्यते' इत्यादौ कृतिमदभेदेन तज्जन्यत्वं वा क्रियाविशेषणतया तृतीयाऽभिधीयते। अचेतनकाष्ठादेरपि कर्तृत्वविवक्षायां तु 'काष्ठं पचति' इतिवत् 'काष्ठेन पच्यते तण्डुलः' इत्यपि प्रयोगाद् व्यापाररूपे कर्तृत्वे तज्जन्यत्वरूपे सकर्तृकत्वे वा तस्य लक्षणा। एवं 'चैत्रेण ज्ञायते' इत्यादावाश्रयत्वरूपे कर्तृत्वे आधेयत्वरूपे कर्तृमत्त्वे वा, नश्यते घटेनेत्यादौ प्रतियोगित्वात्मककर्तृत्वेऽनुयोगित्वरूपकर्तृमत्त्वे वा लक्षणा। चैत्रः पचतीत्यादावुक्तस्थले कर्तृत्वमेव मुख्यं गौणं वा क्रियाविशेष्यतयाऽऽख्याते न बोध्यते। अचेतने स्वरसतः कर्तृव्यवहाराभावेन तत्र कर्तृपदमपि भाक्तमेव।

नच यत्नवत एव मुख्यकर्तृत्वे तदादायैव "कर्तृकरणयोः" (पा० सू० २।३।१८) इत्यादेश्चारितार्थ्ये गौणकर्तृत्वे तृतीयाद्यनुपपत्तिरिति वाच्यम्, तत्सूत्रस्थकर्तृपदस्य पारिभाषिककर्तृपरत्वात्, तत्सूत्रप्रणयनस्यैव तस्य तत्परत्वे मानत्वात्। सूत्रे स्वातन्त्र्यञ्च—समभिव्याहृतकारकान्तरानधीनत्वे सति कारकत्वम्। पुरुषव्यापाराधीनक्रियानुकूलव्यापारवतामेव काष्ठादीनामन्यानधीनत्वविवक्षया काष्ठं पचतीत्यादौ कर्तृत्वम्। अनधीनत्वान्तविशेषणं च, चैत्रः काष्ठैः स्थाल्यां पचतीत्यत्र चैत्रः काष्ठानि स्थाली पचन्तीति प्रयोगवारणाय। चैत्रः पचति, स्थाली पचतीत्यादौ यत्र कारकान्तराप्रसिद्धिस्तत्रानधीनान्तविशेषणं न प्रतीयत एव, तन्निर्वाहश्च स्वतन्त्रशक्तिकल्पनात्। विशिष्टशक्तेर्विशेषणाविषयकविशेष्यबोधाजनकत्वात्, विशिष्टशक्त्या निर्वाहात्। चैत्रेण पाचयतीत्यादौ हेतुकर्तृसमभिव्याहारे प्रयोज्यस्य हेतुकर्त्रधीनत्वेऽपि ण्यन्तप्रतिपाद्यपाचनादिक्रियायामेव प्रयोजकस्य कारकतया प्रयोज्यस्य पच्याद्यर्थक्रियाकारकानधीनताया अत्रैकल्येन न तद्वाचकपदोत्तरं तृतीयानुपपत्तिः, स्वतन्त्रकर्तृप्रयोजकव्यापारस्य तण्डुलक्रयणादिवत् पाकादावन्यथासिद्धत्वादैकारणत्वेन तस्य पाकादिप्रयोजकव्यापारवत्त्वेऽपि तत्क्रियाकारकत्वाभावाच्च। अत एव चैत्रेण मैत्रः पाचयतीत्यत्र, मैत्रः पचतीति न।

नन्वस्तूपदर्शितरीत्या चैत्रादेः स्वतन्त्रकर्तृतानिर्वाहस्तथापि तद्वाचकपदोत्तरं तृतीयाऽनुपपत्तिः, कर्तृत्वनिर्वाहकव्यापारस्य णिजर्थत्वेन स्वतन्त्रनिष्ठस्य तस्य णिचाऽभिधानादिति चेन्न, कर्तृत्वनिर्वाहकत्वसम्बन्धेन पाकाद्यन्वितहेतुकर्तृव्यापारस्य णिजर्थतापक्षेऽदोषात्। कर्तृत्वरूपफलावच्छिन्नव्यापारस्य णिजर्थतामतेऽपि तदुपरक्ताश्रयस्यान्यतो भानानिर्वाहेणानभिधानस्याक्षतत्वात्, अबोधनस्यैव तत्रानभिधानपदार्थत्वादभिधानस्य "तिङ्कृत्तद्धितसमासैः" इति परिगणनाच्च।

अयञ्च त्रिविधः—शुद्धः, प्रयोजको हेतुः, कर्म्मकर्त्ता च। 'मया हरिः सेव्यते' 'कार्य्यते हरिणा' 'गमयति कृष्णं गोकुलम्'

प्रभा

कर्तारं विभजते—अयमिति—धातूपात्तप्रधानव्यापाराश्रय इत्यर्थः। व्यापारे प्राधान्यञ्च—'तद्धात्वर्थनिष्ठविशेष्यतानिरूपितानुकूलत्वसम्बन्धावच्छिन्नप्रकारत्वानाश्रयत्वरूपम्'। त्रिविध इति—त्रैविध्यञ्च धर्मगतत्रित्वस्य कर्तरि आरोपाद् बोध्यम्। एतेन व्यक्तिपक्षे व्यक्तीनामानन्त्यात् जातिपक्षे च जातेरैक्यात् त्रिविधत्वमनुपपन्नमित्यपास्तम्। शुद्ध इति—शुद्धत्वञ्च—'हेतुत्वानाश्रयत्वे सति सामानाधिकरण्येन कर्मत्वविशिष्टकर्तृत्वानधिकरणत्वरूपम्'। मयेति—अत्र मदर्थः शुद्धकर्ता। कार्य्यत इति—अत्र हरिर्हेतुकर्ता। गमयतीति—अत्राणौ कर्तुः कृष्णस्य 'गतिबुद्धि' इत्यादिकर्मसंज्ञाविधानात् कर्तृसंज्ञाया बाधेऽपि प्रकृतधातूपात्तप्रधानव्यापाराश्रयत्वरूपकर्तृत्वलक्षणस्य सत्त्वात् कृष्णः कर्मकर्ता। नचैकत्र कर्मत्वकर्तृत्वसत्त्वे—

'कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणमित्याहुः कारकाणि षट्'॥

इति विभागानुपपत्तिः, 'स्वसमभिव्याहृतपदार्थत्वावच्छेदकीभूतधर्मव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकबोधानुकूलव्यापारस्यैव विभागपदार्थत्वादिति वाच्यम्, सङ्केतसम्बन्धेन कर्मपदवत्त्वादीनामेव कारकविभाजकोपाधित्वादेकदा संज्ञाद्वयासत्त्वेन तत्त्वाक्षतेः। नच 'दिवः कर्म च' इत्यनेनैकदा कर्मकरणसंज्ञयोर्वि-

दर्पणव्याख्या

आख्यातस्य धर्म्यवाचकत्वेऽपि कृत्यादिविशिष्टकर्तृबोधकत्वरूपाभिधानस्य तत्र सत्त्वान्न चैत्रः पचतीत्यादौ तृतीयाऽऽपत्तिः। 'चैत्रः पचति भवति' इत्यादौ मुख्यविशेष्यतया तद्विवक्षायां चैत्रेण पचतीत्यादिप्रयोगापत्तिरित्यपि न, आश्रयातिरिक्ते विशेषणतया कृतिबोधनस्यैवानभिधानपदार्थत्वात्। तथाभिधानं च 'लकृत्तद्धितसमासैरेव' इति त एवाभिधायकतया वृत्तिकृतोपात्ताः।

यद्यपि स्वतन्त्रव्यापार एव तृतीयादेरनुशासनम्, तथापि कृतिरूपकर्तृत्व एव लाघवाच्छक्तिः, व्यापारादौ तु लक्षणेत्युक्तमनुशासनस्यानादितात्पर्य्यमात्रग्राहकत्वाल्लाघवसहकृतस्यैव तस्य शक्तिकल्पकत्वात्, व्यापारे तत्सत्त्वेऽपि गौरवेण तदसिद्धेः।

एवञ्च कृतिरूपकर्तृत्वबोधस्थले कारकान्तरव्यापारानधीनत्वं न प्रतीयत एवेति न तदन्तर्भावेण शक्तिः, प्रमाणाभावात्, व्यापारलाक्षणिककर्तृप्रत्ययेन लक्षणया तदन्तर्भावेण व्यापारबोधनादेव पूर्वोक्तातिप्रसङ्गस्य वारणात्, अन्यथा तदन्तर्भावेण कृतौ शक्तावपि पूर्वोक्तातिप्रसङ्गस्य दुष्परिहरत्वात्। 'घटो जायते' 'ओदनः सिद्ध्यति' इत्यादौ घटादेः कारकत्वं कर्तृत्वं च सत्कार्यवादमवलम्ब्यैवोपपादनीयम्।

मुख्यं क्रियाकर्तृत्वं च न तदनुकूलकृतिमात्रम्, एककियाविषयककृतेर्यत्र नान्तरीयककियानिर्वाहस्तत्र तत्क्रियाकर्तृत्वाव्यपदेशात्। किन्तु तत्क्रियाविषयकत्वे सति तदनुकूलकृतिस्तत्कर्तृत्वम्। गुरुतरभारोत्तोलनादौ तु यत्र क्रियाया अनिष्पत्तिस्तत्र गतिरुक्तैव। अन्योद्देशेन नाराचक्षेपाद् यत्र ब्राह्मणवधस्तत्र मरणानुकूलनाराचक्षेपरूपव्यापारस्य कृतिविषयत्वेऽपि हिंसालक्षणस्योद्देश्यताघटिततया तस्य विप्रमरणानुकूलव्यापारत्वेनानभिसंहितत्वात्तेन रूपेण कृतिविषयत्वस्य तादृशव्यापारे अभावेन न ब्राह्मणत्वविशिष्टवधकर्तृत्वं तादृशव्यापारकर्तुरिति न सम्पूर्णं प्रायश्चित्तं तस्येति।

कर्तृविभागमाह—❀ अयञ्चेति ❀ अनुपदं तृतीयार्थत्वेन निरुक्तः, कर्त्तेत्यर्थः। ❀ शुद्ध इति ❀ हेतुत्वकर्मकर्तृत्वानधिकरणमित्यर्थः। प्रेरणार्थकणिच्प्रकृतिधातूपात्तव्यापाराश्रय इति यावत्। ❀ हेतुरिति ❀ णिजर्थप्रेरणाश्रय इत्यर्थः। ❀ कर्मकर्त्तेति ❀ धातूपात्तव्यापाराऽऽश्रयत्वे सति णिजर्थव्यापारेणाऽऽप्यमानत्वेन विवक्षित इत्यर्थः। क्रमेणोदाहरणान्याह—❀ मया हरिः सेव्यत इत्यादिना ❀ अत्र व्यापारविशेष्यकबोधोत्कीर्त्तनं तु कैयटानुसारेण। तत्त्वं तु प्रागे-

मदभिन्नाश्रयको हरिकर्म्मकसेवनानुकूलो व्यापारः, हर्य्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः, गोकुलकर्मकगमनानुकूलकृष्णाश्रयकतादृशव्यापारानुकूलो व्यापार इति शाब्दबोधाः । करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ । तथाहि—"साधकतमं करणम्" (पा० सू० १ । ४ । ४९) । तमबर्थः प्रकर्षः । स चाव्यवधानेन फलजनकव्यापारवत्ता ।

प्रभा

धानाद्दोषतादवस्थ्यम्, तथाच कर्मत्वत्वादीन् धर्मानादाय विभागपदार्थोपपत्तेः, उपधेयसाङ्कर्येऽपि उपाधीनामसाङ्कर्यात् । मदभिन्नेति—आश्रयस्तृतीयार्थस्तत्राभेदेन मदर्थस्यान्वयः । आश्रयस्य च निष्ठत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वयः । कर्मप्रत्ययार्थोऽप्याश्रयस्तत्र हरेरभेदेनान्वयः, आश्रयस्य च वृत्तित्वसम्बन्धेन सेवायाम्, सेवायाश्चानुकूलत्वसम्बन्धेन व्यापारेऽन्वय इत्याह—मदभिन्नेति । एवमग्रेऽप्यूह्यम् । कर्मणि प्रत्यये फलमुख्यविशेष्यक एव बोध इति नव्यमते मदभिन्नाश्रयनिष्ठव्यापारजन्या हर्यभिन्नाश्रयनिष्ठा च सेवेत्यादिरूपेण बोधः । सेवा = पादसंवाहनादिरूपा, प्रीतिरूपा वा ।

ननु करणतृतीयाया आश्रयव्यापारयोर्वाच्यत्वे मानाभावः, साधकतमस्यैव करणसंज्ञाविधानादित्याशङ्कायामाह—तथाहीति । प्रकर्ष इति—प्रकर्षश्च कारकान्तरापेक्षया, नतु करणान्तरापेक्षया, कारकसामान्यवाचकसाधकशब्दात्तमपो विधानात् । तेन 'देवदत्तोऽश्वेन दीपिकया पथा गच्छति' इति प्रयोगः सिध्यति । करणान्तरापेक्षया प्रकृष्टस्य करणत्वे तु युगपदेकस्यैव करणत्वं स्यात्, एकस्यैव कस्यचित्प्रकृष्टत्वात् । स च = प्रकर्षश्च । अव्यवधानेनेति—अव्यवधानेन फलजनको यो व्यापारस्तद्वत्तेत्यर्थः । ननु सर्वेषां कारकाणां विवक्षया करणपरत्वमिति 'करणम्' इत्येव सूत्रमस्तु कारकपदानुवृत्त्या कारकं करणसंज्ञं स्यादित्यर्थेनैव साधकत्वे लब्धे साधकग्रहणमेव प्रकर्षपरं भविष्यतीति तमब्ग्रहणं व्यर्थमिति चेन्न, तेनैव व्यर्थेन सता 'कारकाधिकारे शब्दसामर्थ्यलभ्यः प्रकर्षो नाश्रीयते' इति ज्ञापनात् । तेन गौणाधारस्यापि अधिकरणसंज्ञा सिध्यति । एवञ्च यद्व्यापाराव्यवधानेन फलनिष्पत्तिस्तत्त्वं करणत्वं फलति । तथाच सर्वाण्यपि कारकाणि विवक्षया करणानि । तदुक्तं हरिणा—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥
वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥ इति ॥

दर्पणव्याख्या

वावोचामः । ❀ आश्रयव्यापाराविति ❀ आश्रयविशिष्टव्यापारशक्तौ तु एकदेशान्वयप्रसङ्ग इति भावः ।

ननु व्यापारस्य धातुत्वेनैव लाभात् तत्र शक्तिकल्पनमपार्थमित्याशङ्क्यैकस्य कर्तृनिष्ठव्यापारस्य धातोर्लाभेऽप्यनुभूयमानकरणनिष्ठव्यापारस्य पदार्थत्वमन्तरेण शाब्दविषयतानुपपत्त्या शक्तिरावश्यकी । आख्यातान्निवृत्तिभेदाया एव क्रियाया अवगमाद् व्यापारद्वयस्य धात्वर्थत्वासम्भवाच्चेत्यभिप्रेत्य स्वोक्तार्थस्य संप्रमाणतां दर्शयितुं करणसंज्ञाप्रतिपादकं सूत्रमुपन्यस्यति —❀ तथाहीत्यादिना ❀ । साधकतममिति सूत्रस्य कारकाधिकारीयत्वात् सूत्रोपात्तसाधकशब्दादेव प्रकर्षलाभेऽपि गौणाधारे अधिकरणसंज्ञाफलकस्य 'कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते' इत्यर्थस्य बोधनाय तमबुपादानमिति सूचयन्नाह ❀ तमबर्थ प्रकर्ष इति ❀ प्रकर्षश्च—कारकान्तरापेक्षः, नतु करणान्तरापेक्षः, कारकसामान्यवाचिसाधकशब्दादुत्पन्नेन तमपा तदवधिकप्रकर्षस्यैव द्योतनात् । तेनाश्वेन दीपिकया व्रजतीति प्रयोगोपपत्तिः, अन्यथा करणान्तरापेक्षिकप्रकर्षस्य करणान्तरे अभावेन तदनुपपत्तेः ।

तादृशव्यापारवत्कारणञ्च करणम् । उक्तञ्च वाक्यपदीये—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥ इति ॥

'विवक्ष्यते' इत्यनेन सकृदनेकेषां तदभावाद् द्वितीयासप्तम्यादेरवकाशं सूचयति ।

प्रभा

नच व्यापारस्यापि करणतृतीयार्थत्वे कारिकायामाश्रयमात्रकथनमसङ्गतमिति वाच्यम्, आश्रयपदस्य व्यापारोपलक्षणत्वात् । तादृशेति—अव्यवधानेन फलजनकेत्यर्थः । अव्यवधानेनेत्यस्य फलन्तु यत्र राजा चक्षुषा चारपुरुषान् शत्रुसैनिकान् द्रष्टुं प्रवर्तयति तत्र 'राजा चक्षुषा शत्रुसैनिकान् पश्यति' इति प्रयोगवारणम्, चक्षुर्व्यापाराव्यवधानेन दर्शनरूपफलाभावात् । किन्तु 'राजा चारैश्शत्रुसैनिकान् पश्यति' इत्येव प्रयोगः । क्रियाया इति—फलस्येत्यर्थः । धात्वर्थफलस्य साध्यत्वेन प्रतीयमानत्वात्, क्रियते या सा क्रियेति व्युत्पत्त्या क्रियात्वेन व्यवहारः । तथाच 'रामेण वाणेन हतो वाली' इत्यतः 'रामाभिन्नाश्रयवृत्तिव्यापारजन्यो वाणाभिन्नाश्रयवृत्तिव्यापारजन्यश्च यः प्राणवियोगस्तदाश्रयो वालीति बोधः । वाणस्याभेदेन तृतीयार्थाश्रये तस्याधेयतया तृतीयार्थव्यापारे तस्य जन्यत्वसम्बन्धेन प्राणवियोगे फले तस्याश्रयतया वालिन्यन्वयः । रामस्याभेदेन तृतीयार्थाश्रये तस्याधेयतया धात्वर्थव्यापारे तस्य जन्यतया फले तस्याश्रयतया वालिन्यन्वयः ।

परे तु करणतृतीयाया अपि आश्रय एवार्थः । आश्रयस्य च स्ववृत्तिव्यापारजन्यत्वसंसर्गेण फलेऽन्वयमाहुः । करणत्वशक्तिमानस्यार्थ इति नव्याः । यत्र स्थले यदा यद्व्यापारानन्तरं फलनिष्पत्तिर्विवक्ष्यते तदा तत् = करणत्वादिषट्कं करणं स्मृतम् आचार्यैः । सर्वाणि कारकाणि तादृशविवक्षया करणानि भवन्तीति भावः । वस्तुत इति—वस्तुतः = वस्तुविशेषे, सप्तम्यन्तात्तसिः । अनिर्देश्यम् = स्वरूपतो निर्देष्टुमशक्यम् । तत्र हेतुमाह—नहीति—हि = यस्माद्धेतोस्तत्करणत्वं वस्तु व्यवस्थितं न = गोत्वादिवद्व्यक्तिविशेषे नियमेन विद्यमानं न । वस्तुविशेषमात्रे वृत्तित्वाभावे हेतुमाह—स्थाल्येति—अधिकरणत्वेन निश्चितापि स्थाली तनुतरावयवतया झटिति तप्तत्वेन स्वव्यापाराव्यवहितोत्तरपाकनिष्पादकतया विवक्षितत्वेन वैवक्षिकं करणत्वं तत्र जायते । सकृदिति—एककालमित्यर्थः । तदिति—करणत्वविवक्षाया अभावादित्यर्थः । अवकाशमिति—यदा काष्ठानामेव करणत्वविवक्षा न स्थाल्यास्तदा 'चैत्रः काष्ठैः स्थाल्यां पचति' इत्यादावधिकरणादिसंज्ञा

दर्पणव्याख्या

❀ तादृशेति ❀ फलोत्पत्त्यव्यवहितपूर्ववर्त्तीत्यर्थः । परे तु—फलायोगव्यवच्छिन्नकारणत्वम् करणत्वम् । स्वव्याप्येतरयावत्कारणसमवधाने सति यदव्यवहितोत्तरक्षणे फलनिष्पत्तिस्तत्त्वमिति यावत् । स एव तृतीयार्थः । सत्यन्तनिवेशाच्चक्षुषोऽन्धकारे फलायोगेऽपि न तत्राप्रसङ्गः । प्रयोजकेऽतिप्रसङ्गनिरासायाव्यवहितेति वदन्ति ।

तत्र हरिसम्मतिमप्याह ❀ उक्तञ्चेति ❀ । अत्र क्रियापदं फलपरम् । 'वाणेन हतः' इत्यत्र वाणव्यापाराव्यवहितोत्तरक्षणे प्राणवियोगरूपफलावश्यम्भावाल्लक्षणसमन्वयः । ❀ विवक्ष्यते ❀ इत्यनेन विवक्षैव विभक्तौ प्रयोजिका, न वास्तवकरणत्वादिसत्तेत्युक्तम् । अत एव दात्रानादरेण बलस्य तत्त्वविवक्षायां बलेन लुनातीति प्रयोगः । ❀ वस्तुत इति ❀ यत इदमेव वस्तु करणमिति न नियमोऽत एव निश्चिताधिकरणत्वापि स्थाली तनुतरकपालत्वाद्वैवक्षिककरणत्ववतीत्यर्थः । ❀ अवकाशमिति ❀ तण्डुलं स्थाल्यां पचतीत्यादौ करणत्वाविवक्षायां तत्तत्संज्ञाप्रयुक्तद्वितीयादेरवकाशमित्यर्थः । तथाच काष्ठैः पचतीत्यादौ प्रकृत्यर्थकाष्ठादेरभेदेनाश्रयरूपतृतीयार्थेऽन्वयः । तस्य च व्युत्पत्तिवैचित्र्येण समानप्रत्ययोपात्त-

नचैवम् "कर्त्ता शास्त्रार्थवत्त्वात्" (ब्र० सू० २ । ३ । ३३) इत्युत्तरमीमांसाधिकरणे

प्रभा

लब्धावकाशेति भावः। उक्तरीत्या सर्वेषां करणत्वेऽपि कारकान्तरविवक्षाकाले करणत्वविवक्षाया अभावेन न सर्वेभ्यस्तृतीयापत्तिः।

सर्वकारकाणां विवक्षया करणत्वे मीमांसाधिकरणविरोधमुद्भाव्य परिहरति—नचैवमिति। एवम् = विवक्षाया एव नियामकत्वे। कर्तेति—तत्र हि कर्मणि कर्तृत्वं जीवस्य, बुद्ध्यात्मकविज्ञानस्य वेति सन्देहे जीवस्यैव कर्तृत्वमित्युत्तरपक्षसाधकमिदं सूत्रम्—'कर्ता शास्त्रार्थवत्त्वात्' इति। अस्यायमर्थः—प्रवृत्ति-निवृत्त्यात्मककर्मणो जीव एव कर्त्ता। शास्त्रार्थवत्त्वात् = शास्त्रस्य = विधिनिषेधात्मकस्यार्थवत्त्वात् = उपपन्नत्वात्। जीवस्य कर्तृत्वे हि विधिनिषेधात्मकं शास्त्रमुपपन्नं भवति।

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसो येनोपदिश्येत शास्त्रं शास्त्रविदो विदुः॥

इति शास्त्रलक्षणम्। नित्येन = वेदात्मकेन। कृतकेन = स्मृत्यात्मकेन। जीव एव विहितं कर्म कर्तुम्, निषिद्धं कर्म च हातुं प्रभवेत्। उत्तरमीमांसेति— मीमांसाशास्त्रस्य कर्मकाण्डात्मको भागः पूर्वमीमांसाशब्देन, ज्ञानकाण्डात्मको भाग उत्तरमीमांसा (वेदान्त) शब्देनोच्यते। अधिकरण इति—पूर्वोत्तरमीमांसाप्रसिद्ध एकार्थप्रतिपादको न्यायसमुदायः। अधिक्रियते निर्णयार्थो विचारोऽस्मिन्नित्यधिकरणम्। तच्च विषय-संशय-पूर्वपक्ष-सिद्धान्त-निर्णयात्मकपञ्चाङ्गबोधकवाक्यसमुदायात्मकम्। तत्र विचारार्हं वाक्यं विषयः। १। तदर्थविषये अयमर्थोऽस्य न वेति विकल्पः संशयः। २। सन्दिह्यमानयोः पक्षयोरसत्पक्षे युक्तिप्रदर्शकं वाक्यं पूर्वपक्ष। ३। पूर्वपक्षोक्तयुक्तिं खण्डयित्वा सत्पक्षे युक्तिप्रदर्शकं वाक्यं सिद्धान्तः। ४। ततश्चेत्यादिहेतु-प्रदर्शकशब्देन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णयः। ५। यद्यपि वाक्यात्मकमेव पञ्चाङ्गम्, तथापि

दर्पणव्याख्या

त्वप्रत्यासत्त्या व्यापाररूपतदर्थान्तरे आधेयतासम्बन्धेन फलोपहिततादृशव्यापारस्य च अनुकूलतासम्बन्धेन विक्लित्त्यनुकूल-व्यापारे। एवञ्च काष्ठाभिन्नाश्रयको यः फलोपहितव्यापारस्तद्विशिष्टो विक्लित्त्यनुकूल एकाश्रयको वर्त्तमानो व्यापार इति बोधः। वैशिष्ट्यं च धात्वर्थव्यापारे जन्यजनकभावसम्बन्धेन बोध्यम्। अत्र च 'यत्सन्निहितेषु सर्वेषु कारकेषु कर्त्ता प्रवर्त्तयिता भवति" इति सकलकारकव्यापारस्य कर्त्रधीनत्वप्रतिपादकम् "कारके" इति सूत्रस्थं भाष्यं प्रमाणम्।

अपरे तु—'क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्' इति वाक्यस्थानन्तरपदस्वारस्यात् तृतीयार्थव्यापारस्य जन्यतासम्बन्धेन फलेऽन्वयः। तथाच जन्यतासम्बन्धेन काष्ठाश्रयकव्यापारविशिष्टविक्लित्त्यनुकूलो व्यापार इति बोधमाहुः। तृतीयार्थकरणत्वस्य व्यापार एवान्वयः, शब्दशक्तिस्वभावान्न फलांशे। अत एव मत्वर्थलक्षणया सोमादिपदस्य नामधेयत्वं सिद्धान्तितम्। अन्यथा व्यापारं प्रति करणत्वेनान्विते फलांशे करणत्वेनान्वयोपपत्तौ लक्षणाया अप्रसङ्ग एव। अत एव सोमेन यजेतेत्यत्र सोमपदस्य मत्वर्थे लक्षणेति मीमांसका इत्यन्ये।

वस्तुतस्त्वाश्रयोऽवधिरुद्देश्य इति मूलस्वारस्यात् करणतृतीयाया अप्याश्रयमात्रमर्थः। प्रकृत्यर्थान्वितस्य तस्य स्वनिष्ठव्यापारजन्यत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वय इत्येव ज्यायः।

नैयायिकास्त्वसाधारणं कारणं करणम्। कारणे असाधारण्यं च व्यापारवत्त्वमेव, नतु फलायोगव्यवच्छिन्नत्वम्, तस्य यावत्कारणघटिततया गौरवेण तद्धर्मावच्छिन्ने शक्त्यसिद्धेः। स एव च प्रकर्षस्साधकतममिति तमपा बोध्यते। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकत्वरूपः। एवञ्च जनकत्वस्याव्यवधानाघटितत्वेन लाभस्यान्तरीयकत्वान्न तत्र पृथक्शक्तिरिति व्यापारमात्रं करणतृतीयार्थस्तस्मिन् प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः। शेषं पूर्ववदित्याहुः।

❀ एवमिति ❀ एकस्मिन्नपि धर्मिणि कर्तृत्व-करणत्वयोरङ्गीकार इत्यर्थः। कर्त्तृकरणशक्त्योरविरोध इति यावत्।

SGDF Sri Gargeshwari Digital Foundation

"शक्तिविपर्य्ययात्" इति सूत्रेणान्तःकरणस्य कर्तृत्वे करणशक्तिविपर्य्ययापत्तिरुक्ता न युज्येतेति वाच्यम्, "तदेवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्य्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात्।

प्रभा

तदर्थोऽपि तत्तच्छब्देन व्यवह्रियते, इत्यलं प्रासङ्गिकेन।

जीवस्य कर्तृत्वं प्रसाध्य विज्ञानस्य कर्तृत्वाभावसाधिकां युक्तिमाह—शक्तिविपर्य्ययादिति—'इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति। यदि पुनर्विज्ञानपदवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्ययः स्यात्। करणशक्तिर्बुद्धेर्हीयेत। सत्याञ्च बुद्धेः कर्तृत्वशक्तौ तस्या एवाहम्प्रत्ययविषयत्वमभ्युपगन्तव्यम्' इति शङ्काभाष्यम्। योऽहं धीगम्यः स कर्ता। अन्तःकरणस्येति—ननु बुद्धेरेव कर्तृत्वं भाष्ये आशङ्कितमित्यन्तःकरणस्येत्यसङ्गतमिति चेन्न, अन्तःकरणं बुद्धिपरिणामः, 'परिणामपरिणामिनोरभेदाद् बुद्धेरप्यन्तःकरणत्वादित्युक्तमन्तःकरणस्येति। शक्तिविपर्य्ययेति—विज्ञानस्य कर्तृत्वे करणत्वशक्तेर्विपर्य्ययः=व्यतिक्रमः स्यात् करणस्य कर्तृत्वात्। न युज्येतेति—भवन्मते करणस्यापि काष्ठस्य यथा 'काष्ठं पचति' इति कर्तृत्वं भवति इति न करणत्व—कर्तृत्वशक्तेर्विरोधस्तथेहापि बुद्धौ कर्तृत्व—करणत्वयोरविरोधे भाष्या- सङ्गतिः स्पष्टैव।

तदेतेषामिति—'यत्रैषः सुप्तोऽभूद्य एषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति। (बृ० अ० २ ब्रा० १ मा० १७) य एष पुरुषो विज्ञानमयो यत्र काले सुप्तोऽभूत् तदा (स्वापकाले) एषां प्राणानाम्=चक्षुरादीन्द्रियाणां विज्ञानम्=विज्ञानजननशक्तिं विज्ञानेन=मनसा=तज्जन्यबुद्ध्यात्मकवृत्त्या आदाय य एषोऽन्तर्हृदय आकाशः=परमात्मा तस्मिञ्छेते इत्यर्थः। अत्र श्रुतौ करणतया क्लृप्तस्य विज्ञानस्य कर्तृत्वे शक्तिविपर्य्ययः स्यादिति भावः। तथाच क्लृप्तायाः करणत्वशक्तेस्त्यागः, कर्तृत्वशक्तेः कल्पनञ्चायुक्ते निष्प्रमाणके च स्यातामित्याशयः, नत्वेकत्रोभयशक्तेरसम्भवाभिप्रायेण तदुक्तिरिति तत्त्वम्।

एकत्र श्रुतौ करणतया क्लृप्तत्वेऽप्यन्यत्र श्रुतौ तत्कर्तृत्वविवक्षायां न किञ्चिद् बाधकमित्याशङ्कायामाह—

दर्पणव्याख्या

❀ शक्तिविपर्य्ययादिति ❀ "कर्ता शास्त्रार्थवत्त्वात्" इति सूत्रेण 'एष हि द्रष्टा श्रोताऽनुमन्ता बोद्धा विज्ञानाऽऽत्मा पुरुषः' इत्यादीनां तथा कर्त्तुः कर्त्तव्यविशेषप्रतिपादकानाम् 'यजेत' 'जुहुयात्' इत्यादीनां च सार्थक्याय जीवस्य कर्तृत्वबोधिते बुद्धिपदव्यवहार्य्यविज्ञानमेवास्तु कर्त्रित्याशङ्कायां विज्ञानशब्दवाच्यबुद्धेः कर्त्तृत्वाभ्युपगमे लोके समर्थस्यापि कर्तुः सर्वार्थकारिकरणान्तरसापेक्षस्यैव कार्य्यकारित्वदर्शनेन विज्ञानपदव्यपदेश्यत्वबुद्धेः करणशक्तिहान्यापत्तिरतस्तदतिरिक्तजीवस्यैव कर्तृत्वमुचितमित्यर्थप्रतिपादकेन "शक्तिविपर्ययात्" इति सूत्रेणेत्यर्थः।

❀ न युज्येतेति ❀ कर्तृकरणशक्त्योरविरोधस्यैव भवद्भिरभिधानादिति भावः। समाधत्ते—❀ तदेवैतेषामिति ❀। ❀ प्राणानाम् ❀ इन्द्रियाणाम्। ❀ विज्ञानम् ❀ ग्रहणशक्तिम्। ❀ विज्ञानेन ❀ विज्ञानशब्दवाच्येन मनसा तज्जन्यबुद्ध्यात्मकवृत्त्येति यावत्। ❀ आदाय ❀ गृहीत्वा हृदयं स्वापे गच्छतीति श्रुत्यर्थः।

❀ करणतयेति ❀ विज्ञानेनेत्यत्र करणतया क्लृप्तस्येत्यर्थः। निष्प्रमाणेत्यादेः कर्त्तरि करणशक्तिस्वीकारेऽपि द्वयोः शक्त्योरेकदा विवक्षायामसम्भवेन "विज्ञानं यज्ञं तनुते" इत्यादौ कर्तृत्वविवक्षायां करणे शक्तिविवक्षाप्रयुक्तविज्ञानेनेति तृतीयान्तनिर्देशादपादनासम्भवेन तद्विपर्ययप्रसङ्गाभावादित्याशयादित्यर्थः।

नन्विदमयुक्तम्, आपादनप्रतिपादकग्रन्थस्यैवापत्तावप्रामाण्यप्रतिपादकत्वासम्भवात्, आपत्तेः प्राक्तनसूत्रादप्रक्रान्त-

SGDF Sri Gurudev Digital Foundation

वस्तुतस्तु अभ्युच्चयमात्रमेतदिति "यथा च तक्षोभयथा" (ब्र० सू० २ । ३ । ४०) इत्यधिकरणे भाष्य एव स्पष्टमित्यादि प्रपञ्चितं भूषणे ॥

प्रभा

वस्तुतस्त्विति । अभ्युच्चयमात्रमिति—प्राधान्येन तात्पर्य्यविषयीभूतार्थप्रसङ्गाद्यत्रार्थान्तरस्यापि सम्बन्धप्रतीतिः सोऽभ्युच्चयोऽन्वाचयो वा । प्रकृते जीवस्य कर्तृत्वं साधितम्, तत्स्वाभाविकम्, उपाधिनिमित्तं वेति विचार्य्यते—न स्वाभाविकं कर्तृत्वमात्मनः सम्भवति, अनिर्मोक्षप्रसङ्गात् । कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः सम्भवति, अग्नेरिवौष्ण्यात् । तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकम् । तथाच श्रुतिः—'ध्यायतीव लेलायतीव' इति ।

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः । इति ।

'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' एभिर्वैदिकवाक्यैः सोपाधिकस्यैव कर्तृत्वं लभ्यते ।

अत्र दृष्टान्तमाह—यथेति—'यथा च तक्षा' इति सूत्रं दृष्टान्तपरम् । चशब्दस्त्वर्थे । यथा तु तक्षा लोके वास्या (वसिला) दिकरणहस्तः कर्ता दुःखीभवति; स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थः निर्वृत्तो निर्व्यापारः सुखीभवति । एवमद्वैतप्रत्युपस्थापितद्वैतसम्पृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता = दुःखीभवति । स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातोऽकर्ता = सुखीभवति सम्प्रसादावस्थायाम् । तथा मुक्त्यवस्थायामविद्याध्यस्तं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृत्तः सुखी भवति । तक्षदृष्टान्तश्चैतावतांशेन द्रष्टव्यः । तक्षा हि—तक्षणादिव्यापारेषु अपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्ता भवति, स्वशरीरेण त्वकर्तैव । एवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मन आदीनि करणानि कर्ता भवति, स्वात्मना त्वकर्तैव । एवञ्च शक्तिहान्यापत्तिरूपदूषणम् । 'वटो ! भिक्षामट गाञ्चानय' इत्यत्र प्राधान्येन तात्पर्याविषयगवानयनवत्तादृशतात्पर्याविषय एव शक्तिहान्यापत्तिरूपं दूषणम् इति तद्विरोधोऽकिञ्चित्कर एव । प्रकृते जीवस्यौपाधिकं कर्तृत्वं नतु स्वाभाविकमित्येव प्राधान्येन तात्पर्यविषयीभूतं नतु शक्तिविपर्य्ययापत्तिरूपं दूषणमिति तस्यान्वाचयशिष्टत्वं स्पष्टमेवेति भावः । यद्वा बुद्धेः करणत्वशक्तिविपर्यासे न भाष्यतात्पर्यम्, किन्तु पराभ्युपगतबुद्धिकर्तृत्वनिरास एवेति दिक् ।

दर्पणव्याख्या

त्वाच्चेत्यत आह—❀ वस्तुतस्त्विति ❀ । ❀ अभ्युच्चयमात्रमेतदिति❀ एतत् = शक्तिहान्यापत्तिरूपं दूषणम् । मात्रपदेन तात्पर्यविषयत्वस्य व्यवच्छेदः । अभ्युच्चयत्वञ्च तात्पर्य्यज्ञानविषयार्थसन्निहितत्वम्, उपेक्षाविषयत्वं वा । तच्च बुद्धेः करणशक्तिविपर्ययेऽस्ति । दृष्टान्तप्रतिपादकसूत्राद् बुद्धेः कर्तृत्वनिरासस्यैव मुख्यत्वावगतेरिति भावः ।

भूषणे तु तदेवैतेषामित्याद्यभिप्रायादित्यन्तः पाठो नास्त्येव । नन्वेवं कर्त्तेत्यादिर्न युज्येतेति चेत् सत्यम्, "अन्वाचयमात्रमेतद्" इति पाठः । अन्वाचयेति विज्ञानशब्दार्थस्य जीवत्वे शक्तिविपर्य्ययापत्तिः सम्भाव्यते, नतु निर्भरस्तत्रेत्यर्थः । उपाधिवशेन परमात्मन्येव तत्सम्भवादिति भावः । तदेव विशदयति—❀ यथा चेति ❀ सूत्रे चशब्दस्त्वर्थे, पराभिमतबुद्धिकर्तृत्वनिरासार्थः । नहि परमात्मनोऽन्यो जीवो नाम कर्त्ता भोक्ता वा सम्भवति, नित्यशुद्धमुक्तात्मनः कर्तृत्वाद्यसम्भवात्, अनिर्मोक्षप्रसङ्गाच्च ।

किन्तु "ध्यायतीव लेलायतीव" इति श्रुतेरध्यस्तं तत्तत्र वाच्यम्, अविद्योपस्थापितं तु तत् परस्यापि सम्भवति, "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इति श्रुतेः । विद्याऽवस्थायां तु तदभावः "यत्र तु सर्वमात्मैव स्यात् किं केन पश्येत्" इति श्रुतेः । यथा तक्षा वास्यादिकरणहस्तः कर्त्ता दुःखीभवति, स एव गृहस्थो विमुक्तवास्यादिनि-

SGDF Sri Gurgeshwari Digital Foundation

सप्तम्या अप्याश्रयोऽर्थः। "सप्तम्यधिकरणे च" (पा० सू०२ । ३ । ३६) इत्यधिकरणे सप्तमी। तच्च "आधारोऽधिकरणम्" (पा० सू० १ । ४ । ४५) इति सूत्रादाधारः। तत्त्वञ्चाश्रयत्वम्। तत्राश्रयांशः शक्यः, तत्त्वमवच्छेदकम्। नचाश्रयत्वमात्रेण कर्मकर्त्तृकरणानामाधारसंज्ञा स्यात्, स्यादेव, यदि ताभिरस्या न बाधः स्यात्। "कारके" (पा० सू० १ । ४ । २३) इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तात्पर्य्यम्, तथाप्यत्र कर्त्तृकर्म्मद्वारा तदाश्रयत्वम-

प्रभा

सप्तमीति—यतोऽधिकरणे सप्तमी अत आश्रयोऽर्थ इत्यध्याहारेणान्वय उपपाद्यः। अन्यथा अनन्वयापत्तिः। तच्च=अधिकरणञ्चाधारः, 'आधारोऽधिकरणम्' इति सूत्ररूपप्रमाणात्। नन्वेवमपि सप्तम्या आधार एव शक्यो नत्वाश्रय आधारत्वाश्रयत्वयोर्भेदादित्यत आह—तत्त्वञ्चेति। तत्त्वञ्च=आधारत्वञ्च। आधारत्वमाश्रयत्वञ्चैकमेव, नतु तयोर्भेद इति भावः। आश्रयस्याधेये साकाङ्क्षतया 'कारके' इत्यधिकृतपदेनोपस्थितक्रिया एवाधेयतया सम्बध्यते। सा च धातुलभ्येति अनन्यलभ्य आश्रय एव शक्य इत्याह—आश्रयांशः शक्य इति। तत्त्वम्=आश्रयत्वम्। अवच्छेदकम्=शक्यतावच्छेदकम्। ननु क्रियाधारमात्रस्याधिकरणसंज्ञायां फलरूपक्रियाया आधारत्वेन कर्मणः, व्यापाररूपक्रियाया आधारत्वेन करणस्य कर्तुश्चाधिकरणसंज्ञा स्यादित्यत आह—नचेति। आधारसंज्ञेति—नचाधारसंज्ञायाः केनाप्यविहितत्वादिदमसङ्गतमिति वाच्यम्, आधारस्य विधीयमाना या अधिकरणसंज्ञा सा स्यादित्यर्थकत्वेनादोषात्। ताभिः=कर्म-कर्तृ-करणसंज्ञाभिः।

तथाच निरवकाशाभिस्ताभिरधिकरणसंज्ञाया बाधान्न तेषामधिकरणसंज्ञा। अत एव 'गृहं प्रविशति' 'मोक्षमिच्छति' इत्यादौ नाधिकरणसंज्ञा। 'ग्रामं गच्छति' इत्यादौ संयोगरूपक्रियायाः 'स्वाश्रयाश्रयत्वसम्बन्धेन ग्रामवृत्तित्वेऽपि नाधिकरणत्वम्, ग्रामस्य संयोगरूपफलाधारत्वं विना चैत्रादिरूपकर्तृद्वारा क्रियाश्रयत्वासम्भवादन्तरङ्गत्वात्कर्मत्वेन बाधात्। नचाधिकरणसंज्ञयैव तासां बाधोऽस्त्विति वाच्यम्, अनेकशास्त्रबाधकल्पने गौरवात्, कर्म-कर्तृसंज्ञयोः परत्वेन विप्रतिषेधशास्त्रस्यापि बाधकल्पनायामतिगौरवाच्च। क्रियाश्रय इति—साक्षात् क्रियाश्रय इत्यर्थः। एवेन कर्तृकर्मद्वारा क्रियाश्रयकटादेर्व्यावृत्तिः। तथाच साक्षात्क्रियाश्रययोः कर्तृकर्मणोरेवाधिकरणसंज्ञा स्यान्न तु कटादेरिति तात्पर्य्यम्। साक्षात्क्रियाश्रययोः कर्तृकर्मसंज्ञाभ्यां बाधाद् अधिकरणसंज्ञाविधानसामर्थ्यात् परिशेषात् साक्षात् क्रियाश्रयौ ये कर्तृकर्मणी तयोराश्रयस्य कट-स्थाल्यादेरेवाधिकरणसंज्ञा अनेन विधीयते इत्याह—तथापीति। तदाश्रयत्वमिति—कर्तृकर्मवृत्तिव्यापारफलान्यतराश्रयत्वमि-

दर्पणव्याख्या

व्यापारः सुखीभवतीति तदर्थः। तथाच शक्तिविपर्य्ययादित्यस्य पराभ्युपगतबुद्धिकर्तृत्वनिरासे तात्पर्यम्, नतु बुद्धेः कर्तृत्वेन करणशक्तिपरित्याग इति न तद्विरोध इति भावः।

सप्तम्यर्थं निरूपयति—❀सप्तम्या अपीति❀। ननु तावता सूत्रादाधारस्य वाच्यत्वं लभ्यते, नाश्रयस्येत्यत आह—❀ तत्त्वञ्चेति ❀ आधारत्वञ्चेत्यर्थः। ❀ आश्रयत्वमिति ❀ आश्रयत्वविशिष्टत्वमित्यर्थः। विशिष्टे सूत्रेण शक्तिबोधनेऽप्याश्रयांऽशे एव सा, नतु विशेषणीभूताश्रयत्वेऽपि। तत्प्रकारकशाब्दबोधे आश्रयशक्तिज्ञानस्य हेतुताकल्पनयैव तज्ज्ञानोपपत्तेरित्याशयेनाह—❀ तत्राश्रयांशः शक्य इति ❀। यद्वा—ननु तावता परम्परया क्रियाऽऽश्रयस्य सप्तम्यर्थत्वं लब्धम्, नाऽऽश्रयमात्रस्येत्यत आह—❀ आश्रयांश इति ❀ पूर्वोक्तरीत्या क्रियाया धातोरेव लाभादनन्यलभ्याश्रय एव शक्य इत्यर्थः। ❀ तत्त्वमिति ❀ आश्रयत्वमित्यर्थः। ❀ आश्रयत्वमात्रेणेति ❀ शक्यताऽवच्छेदकस्य कर्त्रादिसाधारण्यात् करणतृतीयायाश्च व्यापारोऽपीत्यपिना आश्रयार्थत्वप्रतिपादनादिति भावः। ❀ कर्त्तृकर्मद्वारेति ❀ एतादृशार्थलाभश्च तत्सूत्रसामर्थ्यादेव।

SGDF Sri Gargeshwari Digital Foundation

स्त्येव । (नचैवमपि साङ्कर्यमेव स्यादिति वाच्यम् , निरूपकभेदेन भेदात् । फलनिरूपिताधारो द्वितीयार्थः, व्यापारनिरूपितस्तु तृतीयार्थः, कर्तृकर्मव्यापारफलनिरूपितः सप्तम्यर्थः) । स्थाल्यादेर्भूतलकटादेश्चेति, 'स्थाल्यां पचति' 'भूतले वसति' 'कटे शेते' इत्याद्युपपद्यते । उक्तञ्च वाक्यपदीये—

कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ इति ।

एतच्च त्रिविधम् औपश्लेषिकम् ,

प्रभा

त्यर्थः । उक्तार्थे हरिं प्रमाणयति—'कटे शेते' इत्यत्र कर्तृनिष्ठशयनरूपक्रियायाः साक्षादधिकरणं कर्ता । एवम् 'स्थाल्यां तण्डुलान् पचति' इत्यत्र विक्लित्त्यात्मकफलरूपक्रियायाः साक्षादधिकरणं कर्म एव । परन्तु कर्तृद्वारा अधिकरणं कटः, कर्मद्वारा अधिकरणञ्च स्थाली चाधार इति तयोरेवाधिकरणसंज्ञा, नतु साक्षात्क्रियाऽऽधारयोः कर्तृकर्मणोः, उक्तरीत्या ताभ्यामधिकरणसंज्ञाया बाधात्, तदाह—कर्तृकर्मव्यवहितामिति—कर्तृकर्मद्वारा क्रियाधारभूतामित्यर्थः । असाक्षादिति—स्वा (क्रिया) श्रयाश्रयत्वसम्बन्धेनेत्यर्थः । उपकुर्वदिति—परम्परया स्वस्मिन् वर्तमानक्रियया कर्तृनिष्ठप्रधानक्रियासिद्धौ उपकुर्वत् = सहायकमित्यर्थः । शास्त्रे = व्याकरणशास्त्रे । स्मृतमिति—हर्यादिभिरिति शेषः ।

ननु कालस्य साक्षात्क्रियाधारत्वेन 'समये तण्डुलान् पचति चैत्रः' इति न स्यादिति चेन्न, अत्र सूत्रे स्वरितत्वप्रतिज्ञया कालस्यापि परम्परया क्रियाश्रयत्वविवक्षायामेवाधिकरणत्वात् । साक्षादाधारत्वविवक्षायां 'समयः पचति' इत्येवेष्टम् , 'भूतानि कालः पचति' इतिवत् ।

अत्र कैयटदीक्षितादिप्राचीनमते अधिकरणकारकस्य परम्परासम्बन्धेन (स्ववृत्तिवृत्तित्वसम्बन्धेन) साक्षात्क्रियायामन्वयः । नव्यमते अधिकरणस्य साक्षात् कर्तृकर्मणोरेवान्वयः, तद्द्वारा क्रियायामन्वयः नतु साक्षात्क्रियायामिति विशेषः । तथाच प्राचीनमते 'अक्षेषु शौण्डः' इत्यत्र अक्षपदार्थस्य शौण्डेऽन्वयाभावात् समासो न स्यादिति शौण्डपदस्य आसक्तशौण्डे लक्षणां कृत्वा आसक्तिक्रियारूपे लक्ष्यार्थे शौण्डपदार्थैकदेशे साक्षादन्वयमादाय समास उपपाद्यः । नवीनमते तु अक्षस्य शौण्डरूपे कर्तरि अन्वयः, शौण्डस्य चास्त्यादिक्रियायामन्वय इति न दोष इत्यन्यत्र विस्तरः । एतच्च = अधिकरणञ्च । औपश्लेषिकमिति—उपगतः श्लेष उपश्लेषः = संयोग इति यावत् । अत्र 'उप' इत्यविवक्षितम् । यद्वा—उप = समीपे श्लेषः = संयोग उपश्लेषस्तत आगतमौपश्लेषिकम् । 'तत आगतः' इत्यर्थेऽध्यात्मादित्वाट्ठञ् । यद्यपि उपश्लेषादागतमधिकरणत्वं न त्वधिकरणं तथापि धर्मधर्मिणोरभेदमादायाधिकरणेऽपि तथात्वम् । उपश्लेषः = संयोग इति मते 'वटे गावः शेरते' 'गुरौ वसति' इति न स्यात् संयोगाभावादिति चेन्न, गोसंयुक्तदेशसंयोगस्य संयोगरूपतया तस्य च वटादौ सत्त्वेना-

दर्पणव्याख्या

तथाहि—कारकाधिकारीयेणैतेन क्रियाऽन्वय्याधारस्याधिकरणसंज्ञा विधीयते । क्रिया च धात्वर्थः । साक्षात्तदाधारयोः पराभ्यां कर्तृकर्मसंज्ञाभ्यामाक्रान्तत्वादिदं सूत्रमनवकाशं सत् परम्परया धात्वर्थाश्रयस्याधिकरणसंज्ञाविधानेन चरितार्थम्, परम्पराघटके च कर्तृकर्मणी एवेति भावः । परया कर्मसंज्ञया बाधादेव 'मोक्षे इच्छारित' इतिवन्मोक्षे इच्छति भवतीति न प्रयोगः ।

❀ औपश्लेषिकमिति ❀ संयोगसम्बन्धनिबन्धनमित्यर्थः । साम्मीप्यस्यापि संयुक्तसंयोगरूपतया संयोगपदेन तस्यापि सङ्ग्रहात् आधेयस्याप्यताऽवच्छेदकयत्किञ्चिदवयवकमित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

वैषयिकम्, अभिव्यापकञ्च। 'कटे शेते' 'गुरौ वसति' 'मोक्षे इच्छास्ति' 'तिलेषु तैलम्' इति। एतच्च "संहितायाम्" (पा० सू० ६।१।७२) इति सूत्रे भाष्ये स्पष्टम्।

प्रभा

दोषात्। समीपे श्लेष इति पक्षेऽपि सामीप्यस्य संयुक्तसंयोगरूपतया तदवच्छेदेन संयोगस्य सत्त्वाद् गुर्वादावधिकरणत्वोपपत्तिः। 'इको यणचि' इत्यादावपि इङ्निरूपितकालिकसामीप्यावच्छेदेन संयोगस्याचि सत्त्वादौपश्लेषिकाधिकरणत्वम्। शब्दस्य गुणत्वपक्षे तु श्लेषपदेन सम्बन्धमात्रस्य ग्रहणात् 'स्वाव्यवहितोत्तरत्व' सम्बन्धेनौपश्लेषिकाधिकरणत्वं बोध्यम्। एकदेशावच्छेदेन श्लेषेऽप्यौपश्लेषिकम्। तत्र श्लेषस्य समीपमुपश्लेषम्। आरोपितश्लेष इत्यर्थः। तत आगतमौपश्लेषिकम्। एकदेशावच्छेदेन सम्बन्धस्यावयविनि आरोपः। यथा 'कटे शेते' इत्यत्रावयववृत्तिसंयोगस्य अवयविनि कटे आरोपः। तत्कृतं कटात्मकमौपश्लेषिकमधिकरणम्।

वैषयिकमिति—विषयात्= विषयत्वसम्बन्धादागतं वैषयिकम्। औपश्लेषिकाभिव्यापकभिन्नाधिकरणमात्रं वैषयिकपदेन गृह्यते। अत एव तत्र तत्र घटकत्वं सप्तम्यर्थ इत्यादि सङ्गच्छते। अस्योदाहरणम्—'मोक्षे इच्छास्ति' इत्यादि।

अभिव्यापकमिति—सर्वावयवावच्छेदेनाधेयसम्बन्धाश्रय इत्यर्थः। 'अवच्छेदकत्वसम्बन्धावच्छिन्नाधेयत्वनिष्ठव्याप्यतानिरूपितसमवायसम्बन्धावच्छिन्नव्यापकताशालित्वम् अभिव्यापकत्वम्'। अवच्छेदकता यावदवयवनिष्ठा ग्राह्या, यथा 'तिलेषु तैलम्' इत्यत्र यावदवयवावच्छेदेन तिले तैलस्य सत्त्वात्। तैलनिष्ठाऽऽधेयता अवच्छेदकतासम्बन्धेन यावदवयवेषु; तत्रैव समवायसम्बन्धेन तिलस्यापि सत्ता; अवयवावयविनोः समवायनियमात्। तिलः समवायसम्बन्धावच्छिन्नव्यापकताशालीत्यभिव्यापकत्वं तस्मिन्। संयोगसम्बन्धेनौपश्लेषिकस्योदाहरणम्—'कटे शेते' इति। संयुक्तसंयोगेनोदाहरणम् 'गुरौ वसति' इति। छात्रसंयुक्तदेशसंयोगो गुरौ। वैषयिकस्य 'मोक्षे इच्छास्ति' इति। अभिव्यापकस्य 'तिलेषु तैलम्' इति 'दध्नि सर्पिः' इति च। यावत्तिल-दध्यवयवावच्छेदेन तैल-सर्पिःसम्बन्धस्य सत्त्वेनाभिव्यापकत्वोपपत्तिः। इदमेव मुख्यमधिकरणम्। एतद्भिन्नं सर्वं गौणम्। तदुक्तम् 'स्वरितेनाधिकारः' (१-३-११) इति सूत्रे भाष्ये—'अधिकरणमाचार्यः किं न्याय्यं मन्यते, यत्र कृत्स्न आधारात्मा व्याप्तो भवति, तेनेहैव स्यात्—'तिलेषु तैलम्' 'दध्नि सर्पिः इति।'गङ्गायां गावः' 'कूपे गर्गकुलम्' इत्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति' इति। भाष्ये स्पष्टमिति—तत्र हि अयं योगः शक्योऽवक्तुम्, कथम् 'अधिकरणं नाम त्रिप्रकारकम्—व्यापकमौपश्लेषिकं वैषयिकमिति। शब्दस्य च शब्देन कोऽन्यः सम्बन्धो भवितुमर्हति अन्यदत उपश्लेषात्। तत्र 'इको यणचि' 'अचि उपश्लिष्टस्येति' इति।

दर्पणव्याख्या

❀ वैषयिकमिति ❀ विषयतासम्बन्धनिबन्धनमित्यर्थः। ❀ अभिव्यापकमिति ❀ आधेयव्याप्यतावच्छेदकयावदवयवकमित्यर्थः। तत्राद्यस्य कटे शेते, गुरौ वसतीत्युदाहरणे। द्वितीयस्य मोक्षे इच्छास्तीति, अन्त्यस्यान्त्यम्। 'कटे शेते' इत्यत्र परम्परया कटाभिन्नाश्रयकः शयनानुकूलो व्यापार इति बोधः। एवमन्यत्राऽप्यूह्यम्।

❀ भाष्ये स्पष्टमिति ❀ तत्र हि संहिताधिकारखण्डनाय "अयं योगः शक्योऽवक्तुम्। अधिकरणं नाम त्रिप्रकारम्—व्यापकमौपश्लेषिकं वैषयिकमिति। इक्शब्दस्य अच्शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्। "इको यणचि" उपश्लिष्टस्येति तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति" इत्युक्तम्। अत्रोपश्लिष्टपदाध्याहारेण सप्तमीत्यर्थे इदमेव भाष्यं मानम्। संहितायामित्युपलक्षणम्—"तत्र च दीयते कार्यं भववत्" इत्यादिसूत्रस्थभाष्यस्यापि

अवधिः पञ्चम्यर्थः, "अपादाने पञ्चमी" (पा० सू० २ । ३ । २९) (इति) । सूत्रात् । तच्च "ध्रुवमपायेऽपादानम्" (पा० सू० १ । ४ । २४) इति सूत्रात् । अपायः = विश्लेषस्तज्जनकक्रिया, तत्रावधिभूतमपादानमित्यर्थकादवधिभूतमिति भावः । उक्तञ्च वाक्यपदीये—

अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।

प्रभा

अपादाने पञ्चमीति—अस्य 'सूत्रात्' इति शेषः । तथाच अपादाने कारके पञ्चमी भवतीत्यर्थकात् 'अपादाने पञ्चमी' इति सूत्रादित्यर्थः । ननु सूत्रेण अपादानस्य पञ्चम्यर्थत्वलाभेऽप्यवधेः कथं तदर्थत्वलाभ इत्यत आह—तच्चेति—अपादानञ्चेत्यर्थः । अस्य 'अवधिभूतम्' इति वक्ष्यमाणेनान्वयः । अपाय इति—अत्र सूत्रे अपायपदं विश्लेषजनकक्रियापरम् । तदाह—अपायः = विश्लेषः = विभागः । तज्जनकक्रिया = विभागजनकक्रिया । तत्र = विभागजनकक्रियायाम् 'अवधिभूतमपादानम्' इत्यर्थकादपादाने पञ्चमीति सूत्रादवधिभूतम् । अनाश्रयः = विभागजनकधात्वर्थक्रियानाश्रयः । चलम् = जङ्गममश्वादि । अचलम् = स्थावरं ग्रामादि । एतेन ध्रुवपदं नात्र निश्चलार्थकम् , किन्तु अवधिभूतपरमिति सूचितम् । भूषणकारमते 'प्रकृतधात्वर्थप्रधानीभूतव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वम्' इष्टम् । नागेशमते च अपाये = गतिविशेषे सति यद् ध्रुवम् = अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तावधित्वोपयोगिव्यापारानाश्रयत्वं ध्रुव-

दर्पणव्याख्या

तत्राधिकरणत्रैविध्यप्रतिपादनादिति ।

नैयायिकास्तु—'संयोगेनाऽऽधारः' समवायेनाऽऽधारः' इत्याद्यनुगतप्रतीतिबलादाधारत्वमखण्डोपाधिः । संयोगादिरूपं तु न तत् , कुण्डसंयोगिनो बदरादेरपि कुण्डाऽऽधारतापत्तेः ।

ननु बदरप्रतियोगिकत्वविशिष्टसंयोगानुयोगितायाः कुण्डाधारताव्यवहारनियामकत्वाभ्युपगमान्नोक्तदोषः, न वा कुण्डे कुण्डसंयोगानुयोगितासत्त्वेऽपि कुण्डे कुण्डमिति प्रतीत्यापत्तिः, कुण्डप्रतियोगिकत्वविशिष्टसंयोगानुयोगितायास्तत्र विरहादिति चेदेवमपि मल्ले मल्लान्तरसंयोगसत्त्वे उक्तानुयोगिताद्यौव्यान्मल्ले मल्ल इति व्यवहारापत्तेरशक्यवारणत्वेनोक्तप्रकारस्यैवानुसर्त्तव्यत्वात् । तथाच तादृशमाधारत्वम्, आधेयत्वं वा सप्तम्यर्थः । कस्याधारत्वं इत्याकाङ्क्षायां क्रियानिरूपितस्य तस्य बाधादुपस्थितत्वात् कर्तृकर्मणोराधार एव सेति तयोरेव तदन्वयः ।

एवञ्च 'भूतले घटः' इत्यादौ न यत्र क्रियाश्रवणं तत्रापि कारकत्वनिर्वाहाय तदध्याहारस्याऽऽवश्यकता । ईदृशस्थले परम्परासम्बन्धस्यापि क्रियाऽन्वयित्वरूपकारकत्वघटकता, शास्त्रप्रामाण्यात् । अत एव 'अक्षशौण्डः' इत्यादौ सामर्थ्योपपत्तिः । एवञ्च भूतले घटोऽस्तीत्यत्र भूतलवृत्तिर्घटो वर्त्तमानसत्ताऽऽश्रय इति बोधः । नञ्समभिव्याहारे तु तादृशसप्तम्यर्थाभावो घटांशे भासते इत्याहुः ।

पञ्चम्यर्थं निरूपयति—❀ अवधिः पञ्चम्यर्थ इति ❀ । ❀ विश्लेष इति ❀ विभाग इत्यर्थः । अवधित्वञ्च प्रकृतधात्वर्थविभागजनकतत्क्रियानाश्रयत्वे सति प्रकृतधात्वर्थजन्यविभागाश्रयत्वम् । करणादिकारकेऽतिव्याप्तिवारणाय विशेष्यम् । यत्किञ्चित्क्रियाजन्यविभागस्य तत्रापि सत्त्वादतिप्रसङ्गतादवस्थ्यमतस्तद्विशेषणम् ❀ प्रकृतेति ❀ । एवञ्च वृक्षात् पततीत्यादौ विभागजनकक्रिया पतत्यर्थः । यद्वक्ष्यति—यत्र धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयमिति । अधिकं हरिपद्यव्याख्याऽवसरे ग्रन्थकृतैव स्फुटीकरिष्यते ।

❀ उदासीनम् ❀ = विभागजनकक्रियानाश्रयः । यद्द्वैविध्यमाह—❀ चलमित्यादि ❀ । चलः = अश्वादिः, अचलः = ग्रामादिः ।

SGDF Sri Gargeshwari Digital Foundation

ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्म्मजे (के) ।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते (व्यवस्थिते) ॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक् ॥ इति ।

अस्यार्थः—अपाये = विश्लेषहेतुक्रियायाम्, उदासीनम् = अनाश्रयः, अतदावेशात् = तत्क्रियानाश्रयत्वात् । एवञ्च 'विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वम्' फलितम् । 'वृक्षात् पर्णं पतति' इत्यत्र पर्णस्य तद्वारणाय सत्यन्तम् ।

प्रभा

त्वम् । अतएव "गतियुक्तेष्वपादानसंज्ञा नोपपद्यते—'रथात् प्रवीतात् (प्रचलितात्) पतितः' 'अश्वात् त्रस्तात् पतितः' 'सार्थाद् गच्छतो हीनः' इति । किं कारणम् ? अध्रुवत्वात् । नवा ध्रौव्यस्याविवक्षितत्वात् । नवैष दोषः, किं कारणम्, अध्रौव्यस्याविवक्षितत्वात्, नात्राध्रौव्यं विवक्षितम्, किन्तर्हि ध्रौव्यम्" इति भाष्यं सङ्गच्छते । धात्वर्थव्यापारानाश्रयत्वस्य ध्रुवत्वे तु तदसङ्गतं स्यात्, धात्वर्थव्यापाराश्रयत्वरूपस्य त्वदभिमताध्रुवत्वस्य रथादिष्वभावेन 'सतोऽध्रौव्यस्याविवक्षा' इति भाष्यस्यासङ्गत्यापत्तेरिति दिक् ।

अतदावेशात् = तत्क्रियानाश्रयत्वात् = तद्धात्वर्थक्रियानाश्रयत्वात् । शेखरमते तु 'अतदावेशात्' इत्यस्यावधित्वोपयोगिव्यापारस्याविवक्षितत्वादित्यर्थः । तदपादानमिति—तत् = ध्रुवम् = अवधिभूतमपादानमुच्यत इत्यर्थः । एवञ्चेति—अपाये ध्रुवमित्यनेन विश्लेषजनकक्रियानाश्रयत्वविवक्षणे चेत्यर्थः । विश्लेषाश्रयत्वमिति—धात्वर्थविभागाश्रयत्वमित्यर्थः । अपादानसमभिव्याहारे विभागोऽपि धात्वर्थो बोध्यः । करणादिकारकेऽतिव्याप्तिवारणाय विश्लेषाश्रयत्वमिति विशेष्यदलम् । नच परत्वात्करणसंज्ञया बाधः, अपादानात् करणसंज्ञायाः पूर्वत्वात् । करणस्यापि यत्किञ्चिद्विभागाश्रयत्वेऽतिव्याप्तिवारणाय विश्लेषे प्रकृतधात्वर्थक्रियाजन्यत्वं विशेषणं देयम् । तथाच यत्किञ्चित्क्रियाजन्यविभागाश्रयत्वेऽपि करणस्य प्रकृतधात्वर्थक्रियाजन्यविभागाश्रयत्वाभावान्न दोषः ।

यत्तु 'प्रयागतः काशीं गच्छति' इत्यत्र काश्या अपादानत्ववारणाय धात्वर्थविभागाश्रयत्वमिति विभागस्य गम्यर्थत्वाभावान्न दोष इति तन्न, परत्वात्कर्मसंज्ञया बाधात् । यद्वा धात्वर्थविभागसमानाधिकरणापादानत्वशक्तिरिति बोधनायैव तदुपादानम् । नच विभागस्यापादानविषये धात्वर्थत्वस्वीकारे धात्वर्थफलशालित्वात् प्रयागादेः कर्मत्वापत्तिः, तत्रानुयोगितायाः एव फलतावच्छेदकत्वेन प्रयागस्य प्रतियोगित्वेन फलतावच्छेदकसम्बन्धेन फलाश्रयत्वाभावात् । अनुयोगितया कर्तुः फलाश्रयत्वेऽपि कर्तृसंज्ञया परत्वाद् बाधान्न दोषः । तद्वारणाय = अपादानत्ववारणाय । सत्यन्तमिति—तथाच पर्णस्य विभागानुकूलव्यापाराश्रयत्वात् नातिप्रसङ्गः । यद्यपि परत्वात्कर्तृसंज्ञया बाधान्नातिप्रसङ्गस्तथापि विभागसमानाधिकरणापादानत्वशक्तिरिति बोधनतात्पर्य्येणैव तन्निवेशः । यद्वा सत्यन्तविशेषणाभावे कर्तृसंज्ञाया अपवाद एवेयं स्यात्, अपायविषये यत्कारक-

दर्पणव्याख्या

❀ तत्क्रियानाश्रयत्वादिति ❀ तद्विभागजनकतत्क्रियाऽनाविष्टत्वादित्यर्थः । ❀ क्रियाश्रयत्वादिति ❀ तथाचाव्याप्तिरिति भावः ।

SGDF
Sri Gargeshwari Digital Foundation

'धावतोऽश्वात् पतति' इत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेत्विति । 'कुड्यात् पततोऽश्वात् पतति' इत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याह—यस्मादश्वादिति । तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयमिति भावः । एवमश्वनिष्ठक्रियानाश्रयत्वात् कुड्यादेरपि ध्रुवत्वमित्याह—तस्यापीति ।

उभयकर्मजविभागस्थले विभागस्यैक्यात् तद्विश्लेषजनकक्रियानाश्रयत्वाभावात् 'परस्परान्मेषा-

प्रभा

मुक्तापायरूपक्रियाश्रयः तदपादानमित्यर्थात् । कर्तृसंज्ञा तु पचत्यादियोगे चरितार्था । ननु अपायशब्दो विभागार्थक एवास्तु, नतु तज्जनकक्रियापरः । 'अपाये' इति च सती सप्तमी । तथाच प्रकृतधात्वर्थविभागाश्रयत्वे सति यत्कारकं तदपादानमित्यर्थेनेयं संज्ञा कर्तृसंज्ञाया अपवादिका न स्यात्, प्रयगादौ चरितार्थत्वात् । एवञ्च परया कर्तृसंज्ञया बाधान्न कर्तर्य्यतिव्याप्तिरिति चेन्न, विभागसमानाधिकरणापादानत्वशक्तिरिति तात्पर्यबोधनद्वारा तस्य स्पष्टार्थत्वात् ।

विश्लेषहेतुत्वनिवेशस्य फलमाह—धावत इति—क्रियानाश्रयत्वमात्रस्य लक्षणे निवेशेऽश्वस्य धावनक्रियाश्रयत्वेनापादानत्वं न स्यात् । क्रियायाम् 'विश्लेषहेतु' इति विशेषणे तु पतधात्वर्थक्रियाया एव विश्लेषहेतुत्वात्, तस्याश्च चैत्रादौ सत्त्वाद् धावनक्रियाश्रयत्वसत्त्वेऽप्यश्वस्यापादानत्वसिद्धिः । धावनन्तु न विभागे हेतुः, तदभावेऽपि विभागदर्शनादन्यथासिद्धत्वाच्च । ध्रुवपदस्य तादृशार्थतात्पर्यग्राहकत्वार्थमेव सूत्रे 'अपाये' इत्यस्योपादानम् । अन्यथा ध्रुवपदेन स्थिरस्यैव ग्रहणापत्त्या उक्तप्रयोगानुपपत्तिः । कुड्यात् पततो यस्मादश्वादसौ चैत्रादिः पतति सोऽश्वो ध्रुव एव । नच विश्लेषहेतुपतनक्रियाश्रयत्वादपादानत्वानापत्तिः, विश्लेषस्य तदव्यक्तित्वेनैव लक्षणे निवेशेन चैत्रादिनिष्ठपतनक्रियाजन्यविश्लेषजनकव्यापारस्य चैत्रादावेव सत्त्वेन तत्क्रियानाश्रयत्वस्याश्वे सत्त्वेनापादानत्वोपपत्तेः । एवमश्वनिष्ठपतनक्रियाजन्यविभागस्य, तज्जनकक्रियानाश्रयत्वस्य च कुड्ये सत्त्वेन कुड्यस्याप्यपादानत्वसिद्धिः । तत् = अपादानत्वम् । न विरुद्धम् = पतत्यप्यश्वे न बाधितम्, विश्लेषसामान्यस्य लक्षणेऽप्रवेशात् । तद्विश्लेषेति—यद्विश्लेषावधित्वं तद्विश्लेषव्यक्तिरित्यर्थः । अश्वनिष्ठेति—अश्व-कुड्यनिष्ठविभागजनिका क्रियाऽश्वनिष्ठेति तद्विभागजनकक्रियानाश्रयत्वात्कुड्यस्यापादानत्वम् । अश्वचैत्रनिष्ठविभागजनकक्रियायाः चैत्रवृत्तित्वेनाश्वस्य तदनाश्रयतयाऽपादानत्वम् ।

उभयकर्मजेति—मेषद्वयनिष्ठक्रियाद्वयजन्यो विभागो यत्र एक एव तत्र मेषद्वयस्यापि एकविश्लेषव्यक्तिहेतुक्रियाया उभयत्र मेषे सत्त्वेनापादानत्वानापत्तिरित्याशङ्क्य परिहरति—उभावपीति । उभयकर्मजे = उभयनिष्ठक्रियाजन्ये । विभागे = एकस्मिन् विभागे । उभावपि मेषावध्रुवौ = तद्विश्लेषजनकक्रियानाश्रयत्वाभाववन्तौ = तादृशक्रियाश्रयत्ववन्तावेवेत्यपादानत्वानापत्तिरित्याशङ्का । प्रविभक्ते तु क्रिये तत्र विवक्षिते—तत्र = एकस्मिन् विभागे सति । क्रिये तु प्रविभक्ते = पृथग्भूते एव विवक्षिते । वाक्यपदीये

दर्पणव्याख्या

❀ विशेषणीयमिति ❀ तथाच विभागस्तत्तद्व्यक्तित्वेन निवेशनीय इति भावः । समाधत्ते—❀ प्रविभक्ते त्वित्यादिना ❀ तत्तन्मेषवृत्तित्वविशिष्टत्वेन भिन्नतयाऽवगते इत्यर्थः । ❀ व्यवस्थिते इति ❀ तत्तन्मेषवृत्तित्वविशिष्टविभागजनकक्रिये तत्तन्मेषानाश्रिते भवत एवेत्यर्थः । तदेवाऽऽह ❀ मेषान्तरक्रियापेक्षमित्यादीति ❀ । ❀ अवधित्वम् ❀ तद्विभागजनकतत्क्रियानाश्रयमित्यर्थः । परस्परपदोपात्तयोरपादानत्वम्, तत्तत्क्रियाश्रयत्वान्मेषपदोपात्तयोः

वपसरतः' इति न स्यादित्याशङ्क्य समाधत्ते—उभावपीति । मेषान्तरेति—यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वम्, तथात्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति । तथाच 'विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वम्' वाच्यम् । क्रिया चात्र धात्वर्थः, नतु स्पन्दः । तेन वृक्षकर्म्मजविभागवति वस्त्रे, 'वृक्षाद् वस्त्रं पतति' इति सङ्गच्छते ।

प्रभा

भूषणे च 'विवक्षिते' इत्येव पाठः । 'व्यवस्थिते' इति पाठे तु प्रविभक्ते=तत्तन्मेषवृत्तित्वविशिष्टत्वेन भिन्नतया प्रतीते । एकमेव ब्राह्मणत्वं यथा चैत्रवृत्तित्वविशिष्टत्वेन चैत्रे एव । एवमेकाऽपि क्रिया तत्तद्वृत्तित्वविशिष्टत्वेन व्यवस्थिता एव तत्तदनाश्रितैव । एतन्मेषवृत्तित्वविशिष्टक्रियाया मेषान्तरेऽभावेनापादानत्वं सूपपादमेवेति भावः । निश्चलमेषादिति—यत्र एको मेषो निश्चलः=विश्लेषजनकक्रियाया अनाश्रयस्तस्मान्मेषात् अपसरन्=विभागजनकक्रियाश्रयो यो मेषस्तत्क्रियामादाय निश्चलमेषस्य ध्रुवत्वम् । तथा तत्तन्मेषवृत्तिक्रियाया व्यक्तेः तद्व्यक्तित्वेन भिन्नतयोभयोस्तत्क्रियानाश्रयत्वेनापादानत्वम् । तद्विश्लेषजनकक्रियात्वावच्छिन्नप्रतियोगिताकाभावस्यासत्त्वेऽपि तद्विश्लेषजनकक्रियानिष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावस्य 'तत्क्रिया नास्ति'इत्याकारकस्य तत्तन्मेषे सत्त्वान्न कश्चिद्दोष इति भावः । तथाच=तत्तत्क्रियायास्तद्व्यक्तित्वेन लक्षणे निवेशे च । तज्जनक=विश्लेषजनक । तत्क्रिया=सा चासौ क्रियाच तद्व्यक्तिरूपा या क्रिया तदनाश्रयत्वम् । तथाच तद्विश्लेषजनकक्रियाव्यक्तिं तद्व्यक्तित्वेनादाय तदनाश्रयत्वनिवेशादेकमेषस्य तद्विश्लेषजनकमेषान्तरसमवेतक्रियाव्यक्त्यनाश्रयत्वान्नानुपपत्तिरपादानत्वस्येति बोध्यम् ।

वस्तुतस्त्वाश्रयभेदेन क्रियाभेदसत्त्वेऽपि न तद्व्यक्तित्वेन क्रियायाः प्रतीतिः । अत एव सरूपसूत्रे भाष्ये 'न वै तिङन्तानि एकशेषारम्भं प्रयोजयन्ति' इत्युक्तम् । तथाच तिङन्ते निवृत्तिभेदाया एव क्रियाया धातुनोपस्थापनान्नोक्तरीत्या 'परस्परान्मेषावपसरतः' इत्यत्र दोषपरिहारसम्भवः । तस्मात् शब्दभेदेनार्थभेदमाश्रित्य मेषशब्दविशिष्टयोरर्थयोर्विभागानुकूलधात्वर्थव्यापाराश्रयत्वेन विवक्षितत्वात्कर्तृत्वम् । परस्परपदविशिष्टमेषार्थस्य विश्लेषजनकक्रियानाश्रयत्वेन विवक्षितत्वादपादानत्वमित्येव न्याय्यम् । अन्तःकरणादिरूपोपाधिभेदेनाऽऽत्मभेदवत् शब्दभेदेनापि भेदस्य वक्तुं शक्यत्वादित्यलम् । ननु वृक्षकर्मणैव विभागोत्पत्तिस्थले 'वृक्षाद् वस्त्रं पतति' इत्यस्यानुपपत्तिः, वृक्षस्य विभागजनकक्रियाश्रयत्वादत आह—क्रिया चात्रेति । धात्वर्थ इति—प्रकृतधातुवाच्यैव क्रिया अत्र गृह्यते, नतु स्पन्दः=यथाकथञ्चित् प्रतीयमानव्यापारमात्रम् । तथाच वृक्षक्रियाया विभागजनकत्वेऽपि धात्ववाच्यत्वाद् धातुवाच्यक्रियानाश्रयत्वादपादानत्वोपपत्तिः ।

अत्रेदमप्यवधेयम्—वृक्षमजहत्यपि पर्णे यत्र फलभारेण शाखाया न्युब्जत्वेन पर्णभूमिसंयोगस्तत्र 'वृक्षस्य पर्णं भूमिं पतति' इति प्रयोग इष्यतेऽतः पतधात्वर्थोऽधःसंयोगानुकूलक्रियामात्रम्, नतु विभागोऽपि

दर्पणव्याख्या

कर्तृत्वञ्चोपपद्यत इत्यर्थः । तत्तद्व्यक्तित्वेनापि धात्वर्थक्रियाविशेषणीयेत्याह—❀ क्रिया चेति ❀ । ❀ धात्वर्थ इति ❀ प्रकृतधात्वर्थ इत्यर्थः । ❀ नतु स्पन्द इति ❀ यथाकथञ्चित्प्रतीयमानक्रियाऽपीत्यर्थः । वृक्षकर्मजविभागवति वस्त्रे इत्युक्त्या वस्त्रद्वारकसम्बन्धेन क्रियाऽन्वयित्वं वृक्षस्य सूच्यते । 'क्रियाजनकत्वं कारकत्वम्' इति मते तु तत्र वृक्षस्याऽपादानत्वं दुरुपपादमेव । ❀ सङ्गच्छत इति ❀ तादृशवृक्षनिष्ठक्रियायाः प्रकृतपतधात्वर्थत्वाभावेन तद्वति वृक्षे नात्याप्तिरिति भावः ।

Sri Gargeshwari Digital Foundation

वस्तुतो नैतावत् पञ्चम्या वाच्यम्,

प्रभा

पतत्यर्थः। 'वृक्षात् पर्णं पतति' इत्यत्र विभागप्रतीतिस्तु पञ्चम्या विभागे, आश्रये च शक्तिकल्पनयैव। अत एव त्यजति-पतत्योर्न पर्य्यायत्वम्। अधोदेशस्य धात्वर्थान्तरगतत्वाज्जीवत्यादिवदकर्मकत्वन्तु न, अधोदेशस्योपलक्षणत्वेन धातुवाच्यत्वात्। पञ्चमीप्रकृत्यर्थस्याश्रयेऽभेदेनाश्रयस्य च विभागे आधेयत्वेनान्वयः। एकपदोपात्तत्वेऽपि परमते कृतीष्टसाधनत्वयोर्लिङर्थयोरिव व्युत्पत्तिवैचित्र्येणान्वयोऽनुभवबलादेव। विभागस्य

दर्पणव्याख्या

अत्र वदन्ति—पञ्चम्या आश्रय इव विभागोऽप्यर्थोऽविभागार्थकपतत्यादिसमभिव्याहारे करणतृतीयाया व्यापारवद् अनेकधातूनां विभागे शक्तिकल्पनापेक्षया एकस्याः पञ्चम्यास्तत्र शक्तिकल्पनायां लाघवात्। विभागस्य धात्वर्थत्वे द्वितीयादिस्थले इव विभागस्य धातुना लाभादाश्रयमात्रं पञ्चम्यर्थं इत्येव ब्रूयात्, अवधेराश्रयात् पृथगुपादानवैयर्थ्यात्, त्यजिपत्योः पर्यायतापत्तेश्च। प्रकृतेऽधोदेशसंयोगानुकूलक्रियैव पतत्यर्थः। अधोदेशश्च—संयोगांशे उपलक्षणम्, गम्युपात्तसंयोगफल उत्तरदेशवत्, विभागाधीनपूर्वदेशसंयोगनाशमन्तरेण क्रियायाः संयोगजनकत्वासम्भवात्। तस्याविभागजनकत्वमक्षुण्णमेव। समानप्रत्ययोपात्तत्वप्रत्यासत्त्या व्युत्पत्तिवैचित्र्येणाश्रयरूपपञ्चम्यर्थस्य विभागरूपापरतदर्थे आधेयतयान्वयः, तस्य चानुकूलतासम्बन्धेन पतत्यर्थक्रियायाम्। एवञ्च विभागस्य धात्वर्थत्वाभावान्न कर्मताप्रसङ्गलेशोऽपि।

यद्वा—अवधिरित्यनुगतव्यवहारादवधित्वमाश्रयत्वव्याप्यमखण्डोपाधिस्तदवच्छिन्न एव पञ्चम्यर्थः। अत एवावधेराश्रयात् पृथगुपादानम्। तस्य च स्वनिष्ठावधित्वनिरूपकविभागजनकत्वसम्बन्धेन क्रियायामन्वयः। एवञ्च पूर्वकल्पे 'वृक्षात् पर्णं पतति' इत्यत्र वृक्षाभिन्नाश्रयकविभागजनकपर्णाऽऽश्रयकसंयोगानुकूलव्यापार इति बोधः। द्वितीये तु वृक्षाभिन्नावधिविशिष्टा तादृक् क्रियेति विभागजन्यसंयोगो विभागजनकक्रियाया न पतत्यर्थः, 'पत्लृ गतौ' इत्यनुशासनाद् गतिशब्दस्य गम्लृ गतावित्यादौ संयोगानुकूलव्यापार एव प्रसिद्धेः, त्यजर्थे गतिव्यवहाराभावाच्च, फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च धातोः शक्तिमङ्गीकुर्वतः स्वोक्तफलत्वानाक्रान्तविभागस्य धात्वर्थव्यापारावच्छेदकत्वासम्भवाच्च।

पततेः संयोगरूपफलार्थकत्वे ग्रामं गच्छतीतिवद् ग्रामं पततीत्यापत्तिरिति तु न, शब्दशक्तिस्वाभाव्येन तदुपस्थितसंयोगस्याधोदेश एवान्वयात्। ग्रामस्य तत्त्वे तु 'विहगो ग्रामं पतति' इति त्विष्टमेव। अत एव 'नरकं पतितः' इति विग्रहे 'द्वितीया श्रित' इति पतितशब्दयोगे द्वितीयासमासविधानं सङ्गच्छते। नच वृक्षमजहत्यपि पर्णे भूमिं स्पृशति, वृक्षात् पर्णं पततीत्यापत्तिः, तदुपस्थाप्यक्रियाजन्यदेशान्तरविभागे वृक्षावधिकत्वानुपगमात्। अन्यथा क्रियाजन्यसंयोगमात्रस्यैव विभागजन्यत्वेन भूमिपर्णसंयोगस्यापि तथात्वात् त्वन्मतेऽपि तादृशप्रयोगस्य दुर्वारतापत्तेः। अत एव

गतिर्विना त्ववधिना नापाय इति कथ्यते।
वृक्षस्य पर्णं पततीत्येव भाष्ये निदर्शितम्॥

इत्यवध्यन्वययोग्यविभागानुकूलत्वं विना संयोगजनिका क्रिया नापायः। अत एव पर्णविशेषणतया वृक्षविवक्षायामपायस्याविवक्षणाद् वृक्षस्य पर्णं पततीत्यत्र भाष्ये षष्ठ्युक्तेत्येतदर्थकं हरिणोक्तम्। (विभागजन्यसंयोगस्य पूर्वापरीभूतानवयवकत्वेन च व्यापारत्वाभावेन विभागस्य तदुक्तफललक्षणानाक्रान्तत्वेन तदुभयार्थकस्य पततेर्धातुत्वानापत्तेश्च)।

यत्र च गृहादपसरतीत्यादौ विभाग एव धात्वर्थस्तत्राश्रयः, अवधिमात्रं वा पञ्चम्यर्थः। तस्याधेयतया स्वनिष्ठावधित्वनिरूपकत्वेन वा यथायथं विभागेऽन्वयः। परस्परस्मान्मेषावपसरत इत्यादौ तु मेषपदवाच्यत्वावच्छेदेनैव कर्तृत्वविवक्षा, न परस्परवाच्यत्वावच्छेदेनेति न पञ्चम्यनुपपत्तिरिति।

उक्तापादानत्वस्य पञ्चमीवाच्यतावच्छेदकत्वे गौरवं मनस्याधायाऽऽह—❀ वस्तुत इति ❀।

SGDF Digital Foundation

किन्तु अवधेर्लक्षणमात्रम्, द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासम्भवेन वाच्यकोटौ प्रवेशस्य गौरवेणासम्भवाद् इति तु प्रतिभाति। नचैवमपि 'वृक्षात् स्यन्दते' इति स्यादिति शङ्क्यम्, 'आसनाच्चलितः' 'राज्याच्चलितः' इतिवद् इष्टत्वात्। एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः।

प्रभा

जनकत्वसम्बन्धेन धात्वर्थक्रियायामन्वयः। लक्षणमात्रमिति—अवधित्वस्य परिचायको धर्मः। किन्तु अवधिमात्रं पञ्चम्यर्थः, नतु तद्विश्लेषहेतुरित्यादि, गौरवात्। अवधित्वञ्चात्राखण्डोपाधिरूपम्। प्रकृत्यर्थस्यावधौ अभेदेनान्वयः; अवधेश्च 'स्वनिष्ठावधितानिरूपकत्व' सम्बन्धेन क्रियायामन्वयः। ग्रामस्याधोदेशत्वे तु 'ग्रामं पतति पतङ्गः' इतीष्टमेव, 'द्वितीया श्रित' इति भाष्ये 'नरकं पतितः' इतिवत्। ननु विभागाश्रययोः पञ्चम्यर्थत्वे पर्णस्यापि विभागाश्रयत्वात्पञ्चम्यापत्तिरित्यत आह—द्वितीयार्थोक्तरीत्येति—कर्त्रादिसंज्ञया बाधात् तदापत्तिः परिहरणीयेति भावः। एवम्=विभागाश्रयत्वस्यापादानसंज्ञानियामकत्वे 'वृक्षात् स्यन्दते' इति वृक्षस्य विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वस्य सत्त्वादिति भावः।

स्यन्दते=स्रवति। अस्य जलमिति शेषः। इष्टापत्त्या दोषं परिहरति—आसनाच्चलित इत्यादिदृष्टान्तेन। चल्धातोर्विभागानुकूलव्यापारार्थकत्वोपगमेन यथाऽवधित्वादपादानत्वं तथा स्यन्देरपि विभागानुकूलव्यापारार्थकत्वेनापादानत्वस्येष्टत्वमेवेति भावः। 'स्यन्दते' इति पाठे 'वस्त्रम्' इति शेषो बोध्यः। एतेन=इष्टत्वाङ्गीकारेण। अपादानत्वप्रकारकेति 'अपादानत्वनिष्ठप्रकारतानिरूपितविशेष्यता' सम्बन्धेन शाब्दबोधे इत्यर्थः। हेतुत्वमिति—विशेष्यतासम्बन्धेनेत्यर्थः। तथाच शाब्दबोधोपस्थित्योः सामानाधिकरण्यमुपपद्यत इति भावः। नच तादृशसमाधानाभासवादिनये 'वृक्षात् पर्णं पतति' इत्यस्यानुपपत्तिः, अकर्मकत्वादिति वाच्यम्, अधोदेशानुयोगिकसंयोगानुकूलव्यापारार्थकत्वेन पतेरपि सकर्मकत्वात्। अत एव 'कूपपतितः' इत्यादि 'द्वितीया श्रित' इति सूत्रे भाष्योक्तोदाहरणमुपपद्यते। विशेष्यतासम्बन्धेन धातुजन्योपस्थितेः कारणत्वम्, फलविशिष्टव्यापारवाचकत्वं धातूनामिति मतेन। फल-व्यापारयोः पृथक्शक्तिरिति नये तु भावनाख्यविषयतासम्बन्धेनोपस्थितेः कारणत्वं बोध्यम्। अपास्त इति—'वृक्षात् स्यन्दते' इति प्रयोगवारणाय तादृशहेतुहेतुमद्भाव-

दर्पणव्याख्या

लक्षणमात्रमिति ❀ मात्रपदेन शक्यतावच्छेदकत्वव्यवच्छेदः। तथाच व्यावृत्त्यादिफलकं निरुक्तावधित्वमेव। पञ्चम्यर्थस्तु विभागाश्रयमात्रमेवेति भावः। ❀ द्वितीयार्थोक्तरीत्येति ❀ चैत्रो ग्रामं गच्छतीतिवच्चैत्रः स्वं गच्छतीति वारणाय परया कर्त्तृसंज्ञया बाधादित्युक्तरीत्येत्यर्थः। नन्वेवं वृक्षात् पर्णं पततीत्यत्र पर्णेऽपि विभागाश्रयत्वस्यावैकल्यात् तदुत्तरं पञ्चम्यापत्तिरत आह ❀ अतिप्रसङ्गस्येति ❀ स्यन्दस्य प्रस्रवणजन्यविभागाश्रयत्वस्य वृक्षे सत्त्वादतिप्रसङ्गमाशङ्क्य निषेधति—❀ नचेति ❀। एवमिति ❀ विभागाश्रयत्वमात्रस्यापादानसंज्ञानियामकत्वे इत्यर्थः।

❀ स्यादिति ❀ प्रस्रवणस्याधोदेशसंयोगानुकूलद्रवद्रव्यक्रियारूपतया विभागस्य धात्वर्थाभावेन परमते आपत्त्यसम्भवादित्याशयः। ❀ इष्टत्वादिति ❀ चलत्यर्थक्रियाजन्यविभागाश्रयत्वस्येवैतदर्थक्रियाजन्यविभागाश्रयत्वस्यापि पञ्चमीनियामकत्वे क्षतिविरहादित्यर्थः। चलतेर्गत्यर्थकत्वेऽपि 'राज्याच्चलितः' इति प्रयोगे विभागानुकूलक्रियापरत्ववत् स्यन्देरपि तदर्थत्वमुपगम्याऽऽपत्तेरिष्टत्वमिति भावः। जलमत्र कर्त्तृ, वृक्षस्यैव कर्त्तृत्वविवक्षायान्तु परया कर्त्तृसंज्ञया बाधेनोक्तापत्तेरसम्भवादिति भावः।

Sri Gargeshwari Digital Foundation

नचैवमपि 'वृक्षात् त्यजति' इति दुर्वारम्, कर्मसंज्ञया अपादानसंज्ञायाः बाधेन पञ्चम्यसम्भवात्। भ्रमात् कृते तथा प्रयोगे यदि बोधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यजादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम्। 'बलाहकाद् विद्योतते' इत्यादौ निःसृत्येत्यध्याहार्य्यम्। 'रूपं रसात् पृथक्' इत्यत्र तु

प्रभा

स्वीकारे इष्टस्य 'आसनाच्चलितः' इत्यादिप्रयोगस्यासिद्धिरित्युक्तसमाधानाभासो नाभ्युपेय इति भावः। परे तु स्यन्देः कम्पनमात्रार्थकतया विभागानुकूलव्यापारावाचकत्वेन 'वृक्षात् स्यन्दते' इत्यनिष्टमेवेत्याहुः।

पञ्चोलिनस्तु—प्रस्रवणार्थकस्य 'स्यन्दते' इति प्रयोगे इष्टत्वं ग्रन्थकाराभिमतमिति गुरव इत्याहुः। एवमिति—उक्तप्रयोगस्येष्टत्वमित्यर्थः। दुर्वारमिति—अस्य वाच्यमिति शेषः; तत्रैव 'नच' इत्यस्यान्वयः। नच वाच्यमित्यर्थः। कर्मतयेति—त्यजेर्विभागानुकूलव्यापारार्थकत्वेन प्रतियोगितारूपफलतावच्छेदकसम्बन्धेन विभागरूपफलाश्रयत्वेन कर्मतयेत्यर्थः। 'ग्रामादागच्छति' इत्यादौ तु न ग्रामादेः कर्मत्वम्, अनुयोगित्वस्य, अनुयोगित्वसमानाधिकरणसमवायस्य वा फलतावच्छेदकत्वेन फलतावच्छेदकसम्बन्धेन फलाश्रयत्वाभावात्। कर्मसंज्ञया बाधेन पञ्चम्यास्तत्र साधुत्वाभावेऽपि अपादानत्वभ्रमेण तत्र तादृशप्रयोगादवधित्वप्रकारकशाब्दबोधापत्तिरित्याशङ्कां परिहरति—भ्रमादित्यादिना। बुद्धेः=उपस्थितेः। हेतुत्वं वाच्यमिति—नचैवं त्यजि-पत्योः पर्यायत्वभ्रमदशायां तादृशप्रयोगादपादानत्वबोधानुपपत्तिरिति वाच्यम्, इष्टापत्तेरिति तदाशयात्, पतत्यादिपर्य्यायत्वेनागृहीतत्यजिजन्योपस्थितित्वेन हेतुत्वमित्यत्र वा ग्रन्थतात्पर्य्यात्। त्यजेः पतत्यर्थे शक्तिभ्रमे, लक्षणाग्रहे वा 'वृक्षात् त्यजति' इत्यतस्तादृशबोधस्य सर्वसम्मतत्वेनेष्टत्वमेवेति 'यदि' इत्यनेन सूचितम्।

ननु 'बलाहकाद् विद्योतते' इति न स्यात्, विभागस्यानुपस्थितत्वादत आह—बलाहकादिति। अध्याहार्य्यमिति—अत्राध्याहारः—निःस्मरणपूर्वकविद्योतने धातोर्वृत्तिरूप एव। बलाहको नाम—धूमज्योतिःसलिलमरुतां सन्निपातः। तादृशसमुदायात्मकमेघादवयवभूतज्योतीरूपविद्युतो भेदविवक्षया निःसरणावधित्वं मेघस्य। यदा तु विद्युत आश्रयत्वेन मेघो विवक्ष्यते तदाधिकरणे सप्तमी—'बलाहके विद्योतते विद्युत्' इति। 'रूपं रसात् पृथक्' इत्यत्र रूपे विभागपूर्वकसंयोगानुकूलव्यापाररूपनिःसरणस्य बाधमाशङ्क्य निराकरोति—रूपमिति—अत्र बौद्धसंश्लेषपूर्वको बौद्धो यो विश्लेषस्तज्जनको रूपाश्रयको बौद्धव्यापारः

दर्पणव्याख्या

❀ नचैवमपीति ❀ एवमपि=धात्वर्थविभागाऽऽश्रयत्वस्यापादानसंज्ञानियामकत्वेऽपीत्यर्थः। ❀ दुर्वारमिति ❀ वृक्षस्य त्यज्यर्थक्रियाजन्यविभागाश्रयत्वादिति भावः। ❀ कर्मसंज्ञयेति ❀ वृक्षस्य त्यजर्थव्यापारजन्यविभागाश्रयत्वादिति भावः। पूर्वमतिप्रसङ्गः कर्तृसंज्ञामादायैवोक्तः। इदानीं तु कर्मसंज्ञामादाय प्राप्तः स निवारित इति बोध्यम्। ❀अनुभवसिद्ध इति❀वस्तुतो विभागावधित्वस्य वृक्षे अबाधात्तज्जन्यबोधस्य प्रमात्वमिष्टमेव, धात्वर्थव्यापारजन्यविभागाश्रयस्यैव पूर्वग्रन्थेनावधित्वोक्तेः। त्यजतेः पतत्यर्थे शक्तिभ्रमदशायां लक्षणाग्रहदशायां वा 'वृक्षात् पर्णं त्यजति' इति प्रयोगस्य प्रामाणिकत्वेन कारणतावच्छेदककोटौ त्यजादिभिन्नत्वस्य धात्वंशे निवेशयितुमशक्यत्वादित्यभिप्रेत्योक्तम्—❀ यदीति ❀ ❀ बलाहकादिति ❀ धूममरुज्ज्योतिःसमूहो बलाहकः। ततोऽवयवभूतज्योतिषामेव विभागविवक्षणात् सोऽवधिः द्युतिश्च लक्षणया निःसरणपूर्वकविद्योतनबोधकः। तथाच बलाहकावधिकनिःसरणोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः। ❀ निःसृत्येति ❀ निःसरणपूर्वके विद्योतने धातोर्वृत्तिमुपगम्य पञ्चम्युपपाद्येत्यर्थः। अत एवोपात्तविशेष्यस्वान्त भावो वक्ष्यमाणः सङ्गच्छते।

Sri Gargeshwari Digital Foundation

बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्, पृथग्विनेति पञ्चमी वा। इदञ्च—

निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।
अपेक्षितक्रियञ्चेति त्रिधाऽपादानमुच्यते॥

इति वाक्यपदीयात् त्रिविधम्। 'यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्'। यथा 'अश्वात् पतति'। 'यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम्'। यथा—'बलाहकाद् विद्योतते'। निःसरणाङ्गे विद्योतने द्युतिर्वर्त्तते। अपेक्षिता क्रिया यत्र तदन्त्यम्। यथा—'कुतो भवान्' 'पाटलिपुत्रात्'। अत्रागमनमर्थमध्याहृत्यान्वयः कार्य्यः।

प्रभा

कल्पनीयः। एवं कल्पनायां भवत्येतादृशस्थलेऽपादानत्वम्। परिकल्पितमिति—अयम्भावः—'ध्रुवमपाये' इति सूत्रेऽपायशब्देन भेदस्यापि ग्रहणम्, 'पञ्चमी विभक्तेः' इति सूत्रे विभागार्थकविभक्तशब्देन भेदस्यापि ग्रहणात्। 'भिदिर् विदारणे' इत्यत्र भेदज्ञानविषयत्वमपि विदारणम्, एकत्वेन ज्ञातस्य तथाबोधे बुद्धिविदारणस्य सत्त्वात्। अत एव 'घटाद् भेदः' इत्यत्रापादानत्वम्। एवञ्च पृथक्पदार्थोऽपि भेद एव, नतु गुणान्तरम्, उक्तप्रयोगदर्शनात्। 'घटाद् भिन्नः' इत्यत्रापि 'ध्रुवमपाये' इत्यनेनैवापादानत्वम्। नच 'अन्यारादितर्ते' इत्यनेनात्र पञ्चमी, अर्थग्रहणे प्रमाणाभावेनान्यशब्दमात्रयोगे पञ्चमीविधानात्। अत एव 'इतर' ग्रहणं चरितार्थम्। नच पृथक्शब्दस्य क्रियावाचित्वाभावात्कारकत्वानुपपत्तिः, 'भवति' इत्यध्याहारेण भेदात्मकपृथग्भावस्य भवत्यर्थेनादोषात्। बुद्धिपरिकल्पनगौरवमपेक्ष्य लाघवादाह—पृथग्विनेति। इदञ्चेति—अपादानत्वञ्चेत्यर्थः।

निर्दिष्टः=साक्षाद् धातुना बोधितो विषयो निरूपकोऽर्थो यस्य तत् 'निर्दिष्टविषयम्'। उपात्तः=धातुना धात्वन्तरार्थगर्भितः विषयोऽर्थो यस्य तत् 'उपात्तविषयम्'। अपेक्षिता=धातोरनुपादानेनाऽऽकाङ्क्षिता गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका यस्य तत् 'अपेक्षितक्रियम्' इति भावः। कुतो भवानिति—'कुतो भवान्' इति 'पाटलिपुत्रात्' इति च द्वेऽपि प्रश्नोत्तरवाक्ये अपेक्षितक्रिये। अर्थमध्याहृत्येति—उच्चरितं वाक्यैकदेशरूपमेव तदर्थपरमित्यर्थः। पदाध्याहारवादे तु अनुपात्तसाकाङ्क्षक्रियावाचकपदकम्। अनुपात्तं साकाङ्क्षा या क्रिया तद्वाचकं पदं यत्र तदित्यर्थः। 'क्रियार्थोपपदस्य' इति सूत्रबलादर्थाध्याहारः, तत्र स्थानिनः (अप्रयुज्यमानस्य) इत्युक्तेः। 'स्पृहेरीप्सितः' इत्यादिसूत्रबलात् शब्दाध्याहारः।

दर्पणव्याख्या

❀ बुद्धिपरिकल्पितमिति ❀ बौद्ध (आरोपित) विभागावधित्वमाश्रित्येत्यर्थः। तादृगपादानत्वाश्रयणे प्रमाणशैथिल्यं मत्वाऽऽह—❀ पृथगिति ❀। ❀ साक्षादिति ❀ मुख्यवृत्त्येत्यर्थः। धातुनेत्यस्य समभिव्याहृतेत्यादिः। ❀ गतिरिति ❀ विभागजनकक्रियेत्यर्थः। ❀ उपात्तविषयमिति ❀ समभिव्याहृतधातुनोपात्तः लक्षितो गतिरूपो विषयो यत्रेत्यर्थः। ❀ अपेक्षितक्रियमिति ❀ अनुपात्तधात्वर्थक्रियासाकाङ्क्षमित्यर्थः।

❀ अध्याहृत्येति ❀ अर्थाध्याहाराभिप्रायेण। पदाध्याहारवादे तु आकाङ्क्षितक्रियावाचकपदानुसन्धानेऽप्यनुपात्तत्वरूपविशेषणघटितलक्षणावैकल्यं बोध्यम्। प्रमाणं तत्र शब्दाध्याहारवादे 'पुष्पेभ्यः स्पृहयति' इत्यादौ स्पृहयत्यादियोगे सम्प्रदानादिसंज्ञाविधायकानि "स्पृहेरीप्सितः" (पा० सू० १।४।३६) इत्यादिसूत्राणि, तैस्तत्तद्धातुयोग एव तद्बोधनात्। अर्थाध्याहारे तु 'क्रियार्थोपपदस्य' इत्यादिसूत्रम् "ल्यब्लोपे" इत्यादिवार्त्तिकानि च।

अन्ये त्विदमित्थं व्याचक्षते—यत्र विभागस्तज्जनकक्रिया चोभयं धातुनाऽभिधीयते तदाद्यम्। यत्र विभागोऽध्याहृत-

SGDF

उद्देश्यश्चतुर्थ्यर्थः । तथाहि—'सम्प्रदाने चतुर्थी'। तच्च "कर्मणा यमभिप्रैति स सम्प्रदानम्" (पा० सू० १ । ४ । ३२) इति सूत्रात् कर्मणा = करणभूतेन यमभिप्रैति = ईप्सति तत् कारकं सम्प्रदानमित्यर्थकादुद्देश्यम् ।

प्रभा

उद्देश्य इति—प्रकृते उद्देश्यत्वञ्च—'तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयत्वम्' । चतुर्थ्यर्थ इति—कारकचतुर्थ्यर्थ इत्यर्थः । तेन उपपदचतुर्थ्यर्थस्य भिन्नार्थत्वेऽपि न दोषः । चतुर्थीति—इतिसूत्रादिति शेषः । 'सम्प्रदाने' इत्यत्र वाचकत्वं सप्तम्यर्थः । तथाच सम्प्रदानवाचिका चतुर्थी इत्यर्थबोधकसूत्रप्रमाणादित्यर्थः । तच्च = सम्प्रदानञ्च । अस्य वक्ष्यमाणेन 'उद्देश्यम्' इत्यनेनान्वयः । कर्मणेति—करणे तृतीया । तथाच 'क्रियाया यत् कर्म तत्सम्बन्धजन्यफलाश्रयत्वेनेच्छाविषयत्वम्' उद्देश्यत्वम् । 'विप्राय गां ददाति' इत्यत्र क्रिया स्वस्वत्वध्वंसविशिष्टपरस्वत्वानुकूलेच्छारूपा, तत्कर्म स्वस्वत्वध्वंसविशिष्टपरस्वत्वरूपफलाश्रयः गौः । कर्मणः करणत्वञ्च अभिसम्बन्धक्रियाम्प्रति, करणस्य च व्यापारवत्त्वनियमात् कर्मत्वप्रयोजकत्वेनोपस्थितस्य फलस्यैव व्यापारत्वं कल्प्यते । गोपदोत्तरद्वितीयाया आश्रयोऽर्थः । तथाच विप्रस्याभेदेनोद्देश्ये तस्य (उद्देश्यस्य) स्वनिष्ठोद्देश्यतानिरूपकत्वसम्बन्धेन 'दा' धात्वर्थेच्छायामन्वयः । गोपदार्थस्य द्वितीयार्थाश्रयेऽभेदेन तस्याधेयतासम्बन्धेन स्व (कर्ता) स्वत्वध्वंससमानाधिकरणपरस्वत्वरूपफले तस्य (फलस्य) विषयितारूपानुकूलत्वसम्बन्धेनेच्छायामन्वयः । एवञ्च विप्रोद्देश्यिका गवाभिन्नाश्रयनिष्ठस्वस्वत्वध्वंससमानाधिकरणपरस्वत्वानुकूला राजाभिन्नाश्रयनिष्ठा वर्तमानकालावच्छिन्नेच्छा इति 'राजा विप्राय गां ददाति' इत्यनेन बोधः । कामनाविषयत्वन्तु नोद्देश्यत्वम् , तस्य कर्मण्यतिव्याप्तेः, कर्मणोऽपि इच्छाविषयत्वात् ।

नन्वेवमपि 'चैत्रो ग्रामं गच्छति' इत्यत्रापि 'ग्रामसम्बन्धजन्यं सुखं मे जायताम्' इति यदि चैत्रस्येच्छा, तदा चैत्रस्य गमनक्रियाकर्मग्रामसम्बन्धजन्यसुखरूपफलाश्रयतया सम्प्रदानत्वापत्तिरिति चेन्न, ग्रामसंयोगस्य चैत्रीयसुखं प्रति अन्यथासिद्धत्वेनाजनकत्वात्, उद्देश्यवृत्तिफलस्य सुखादेर्धात्वर्थफलद्वारैव कर्मरूपकरणजन्यत्वस्यापेक्षणात् । क्रियाकर्मसम्बन्धजन्यं फलं नानाविधम् । तथाहि—'शिष्याय चपेटां ददाति' इत्यत्र दुःखं फलम् । ददातिरत्र संयोगविशेषानुकूलव्यापारार्थकः । तथाच 'चपेटासंयोगजन्यदुःखाश्रयः शिष्यो भवतु' इतीच्छया दुःखरूपफलाश्रयत्वेन शिष्यस्य सम्प्रदानत्वम् । 'रजकाय वस्त्रं ददाति' इत्यत्र दाधातोरधीनीकरणमर्थः । अधीनीकरणत्वञ्चात्र मलनाशानुकूलं स्थापनम् । 'वस्त्रनिष्ठमलनाशरूपफलसम्बन्धेन भृतिमान् रजको भवतु' इतीच्छया भृतिरूपफलाश्रयत्वेन सम्प्रदानत्वं रजकस्येत्येवं सर्वत्रोह्यम् । ईप्सति = सम्बन्धुमिच्छति । अभिप्रैतिरत्र सम्बन्धविषयकेच्छापरः ।

दर्पणव्याख्या

धातुना तथा तद्द्वितीयम् । यत्र तूभयमप्यध्याहृतधात्वभिधेयं तत्तृतीयमिति । अधिकमन्यतोऽवधार्य्यम् ।

चतुर्थ्यर्थं निरूपयति—❀ उद्देश्य इति ❀ ननूद्देश्यत्वं कामनाविषयत्वम् , तच्च 'विप्राय गां ददाति' इत्यत्र क्रियाजन्यफलभागितया कामनाविषये गवादावतिप्रसक्तमतस्तद्व्यावृत्तम् , तत्सूत्रप्रामाण्येन दर्शयति—❀ तच्च कर्मणेत्यादि ❀ कर्मणेत्यनन्तरं सम्बन्धुमिति शेषः । कर्म चात्र पारिभाषिकम् , "कर्मणा यमभिप्रैति" (पा० सू० १ । ४ । ३२) इति क्रियाव्याप्यमानस्य सम्प्रदानसंज्ञाविधानात् । अत एव तदकर्मकविषयम् ।

ननु 'ग्रामं गच्छति' इत्यत्र ग्रामरूपकर्मजन्यसुखादिफलभागितयोद्देश्ये कर्त्तरि अतिप्रसङ्गोऽत आह—❀करणभूतेनेति❀ करणत्वञ्च सम्बन्धक्रियाऽपेक्षम् , क्रियाव्यवहितव्यापारवत एव करणतया व्यापारे कर्मवृत्तित्वलाभेन तद्वृत्तित्वस्य धात्वर्थ-

SGDF

दर्पणव्याख्या

तावच्छेदकफल एव सम्भवात् । कर्मवृत्तितज्जन्यत्वस्य ग्रामजन्यसुखे असत्त्वान्नोक्तातिप्रसङ्ग इति भावः । यमित्यस्यानुपादाने योऽभिप्रैतीत्यर्थस्यापि लाभात् प्रथमान्तार्थकर्त्तर्यतिप्रसङ्गः स्यादतस्तदुपात्तम् ।

यद्यपि 'गौर्ब्राह्मणस्य भवतु' इतीच्छाविशेष्यतया गामेवावगाहते तथापि सूत्रस्य फलितार्थपरत्वान्न दोषः । तथाच कर्मजन्यतद्वृत्तिफलभागित्वप्रकारको यद्विशेष्यकोऽभिप्रायः स सम्प्रदानमिति सूत्रार्थः । तादृशफलसम्बन्धित्वप्रकारतानिरूपितविशेष्यताश्रय इति यावत् ।

'विप्राय गां ददाति' इत्यादौ परस्वस्वजनकस्वस्वत्वध्वंसावच्छिन्नेच्छात्मकस्त्यागो दाधात्वर्थः । उद्देश्यत्वं चतुर्थ्यर्थः । (निरुक्तविशेष्यताश्रयरूपस्य तस्य स्ववृत्तिविशेष्यतानिरूपकत्वसम्बन्धेन त्यागेऽन्वयः) गोरूपकर्मणश्चाऽऽश्रयत्वेन स्वत्वरूपफले । तथाच गोवृत्तिस्वत्वजनकस्वस्वत्वध्वंसानुकूलो विप्राभिन्नोद्देश्यकस्त्याग इति वैयाकरणमते बोधः । उद्देश्यत्वं च विप्रे गोजन्यस्वत्वभागितयेच्छाविषयत्वमेव, एवं वृक्षायोदकमासिञ्चतीत्यत्राप्युदकनिष्ठक्रियाजन्यसंयोगफलभागितयेच्छाविषयत्वात् सम्प्रदानत्वमूह्यम् ।

नैयायिकास्तु—परस्वत्वेच्छाधीनस्वस्वत्वध्वंसेच्छात्याग इति मते स्वस्वत्वध्वंसावच्छिन्नत्यागो ददात्यर्थः । विशेष्यत्वं चतुर्थ्यर्थः । तस्य स्वनिरूपकनिरुक्तेच्छाजन्यत्वसम्बन्धेन ददात्यर्थत्यागे गोरूपकर्मणस्त्वाधेयतया स्वस्वत्वध्वंसरूपफले । तथाच गोवृत्तिस्वस्वत्वध्वंसजनको निरुक्तसम्बन्धेन विप्रनिष्ठविशेष्यताविशिष्टो यस्त्यागस्तदाश्रयश्चैत्र इति 'विप्राय गां ददाति चैत्रः' वाक्याद् बोधः ।

यदि तु गौर्विप्रस्य भवतु न ममेतीच्छैव त्यागः, स च गवि स्वस्वत्वध्वंसमिव परस्वत्वमपि अवगाहते तदा स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागो दाधात्वर्थः । एवञ्च उक्तस्थले निरूपितत्वेनेच्छाविषयत्वं चतुर्थ्यर्थः । तस्य च स्वस्वत्वध्वंसेऽन्वयाद् विप्रनिरूपितत्वेन इच्छाविषयगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागाऽऽश्रय इति बोधः । जन्यस्वत्वस्य गोवृत्तित्वेऽवगतेऽर्थात्तस्मिंस्तज्जन्यत्वं लभ्यते एवेति गोजन्यस्वत्वनिरूपकत्वेनेच्छाविषयत्वरूपमुद्देश्यत्वं विप्रस्याक्षतम् । वृक्षायोदकमासिञ्चतीत्यत्र तु संयोगावच्छिन्नद्रवद्रव्यक्रियावच्छिन्नव्यापारो धात्वर्थः । वृत्तित्वेनेच्छाविषयत्वं चतुर्थ्यर्थः । स च धात्वर्थतावच्छेदकसंयोगान्वयी । द्वितीयार्थवृत्तित्वं तु द्रवद्रव्यक्रियान्वयि । तथाच वृक्षवृत्तित्वेनेच्छाविषयो यः संयोगस्तदवच्छिन्ना या उदकाभिन्नद्रव्यवृत्तिक्रिया तदवच्छिन्नव्यापारानुकूलकृतिमानिति बोधः ।

नचैवं सिचधात्वर्थतावच्छेदकद्रवद्रव्यक्रियायां द्वितीयार्थवृत्तित्वान्वये पयसा वृक्षं सिञ्चतीति न स्यात्, तादृशक्रियाया वृक्षावृत्तित्वादिति वाच्यम्, तत्र संयोगावच्छिन्नद्रव्यक्रियाया एव धात्वर्थतया तदवच्छेदकीभूतसंयोग एव वृक्षवृत्तित्वान्वयान्नानुपपत्तिरित्याहुः ।

अपरे तु—विजातीयत्यागजन्यफलभागितयोद्देश्यत्वं सम्प्रदानत्वं चतुर्थ्यर्थः । एवञ्च विप्राय गां ददातीत्यादौ त्यागजन्यफलभागित्वप्रकारकब्राह्मणवृत्त्युद्देश्यताकगोविषयकत्यागाश्रय इति बोधः । रुद्राय गां ददातीत्यत्र रुद्रस्य त्यागजन्यफलभागितयोद्देश्यत्वमस्त्येव । स्वत्वं तु तस्य जायते न वेत्यन्यत् । त्यागजन्यं फलं तु स्वत्वरूपं ग्राह्यम् । तेन पितृस्वर्गमुद्दिश्य दत्तायां गवि ब्राह्मणस्य सम्प्रदानत्वोपपत्तिः । पितुः स्वत्वरूपं फलं नोद्देश्यम्, किन्तु स्वर्गः ।

पितृभ्यो दद्यादित्यादौ तु रुद्राय गां ददातीतिवत् सम्प्रदानत्वमस्त्येव । त्यागे वैजात्यनिवेशाच्च न क्रेतुः सम्प्रदानत्वम् । वृक्षायोदकमासिञ्चतीत्यादौ तु चतुर्थ्यर्थे गौणसम्प्रदानत्वम् । तत्र सिचेर्द्रव्यवृत्तिसंयोगानुकूला क्रिया । उदकादिपदसमभिव्याहारे च संयोगानुकूलक्रियामात्रमर्थः । चतुर्थ्यर्थस्तु वृत्तित्वम् । इत्थञ्च वृक्षवृत्त्युदकीयसंयोगावच्छिन्नक्रियेत्यादिबोधः ।

अत्र चतुर्थीद्वितीयाभ्यां तुल्यबोधजननात्तत्र द्वितीया मा भूदिति सम्प्रदानसंज्ञानुशिष्यते । वृक्षं पयसा सिञ्चतीत्यादौ तु वृक्षशब्दात् द्वितीया भवत्येव । तत्र तृतीयार्थोऽभेदस्तस्य द्रवद्रव्येऽन्वयः । द्वितीयार्थवृत्तित्वस्य तु संयोगेऽन्वयः । तथाच वृक्षवृत्तिसंयोगानुकूलोदकाभिन्नद्रव्यक्रियेति बोधः ।

SGDF
Sri Gargeshwari Digital Foundation

इदमेव शेषित्वम् । तदुद्देश्यकेच्छाविषयत्वं च शेषित्वमित्येव पूर्वतन्त्रे निरूपितम् । अत एव "प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्" (अ० ४ पा० २ अ० ६) इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय 'दण्डं प्रयच्छति' इति विहितं दण्डदानं न प्रतिपत्तिः,

प्रभा

इदमेवेति—धात्वर्थक्रियाया यत्कर्म तद्वृत्ति यद्धात्वर्थफलं तत्सम्बन्धजन्यफलाश्रयत्वकेच्छाविशेष्यत्वमेवेत्यर्थः। 'दानकर्मगोवृत्तितादृशस्वत्वसम्बन्धजन्यसुखाश्रयो विप्रो भवतु' इत्याकारिका या इच्छा तादृशेच्छाविशेष्यत्वरूपं शेषित्वं विप्रस्य । तादृशेच्छाप्रकारताश्रयत्वरूपं शेषत्वं गोः, गवि इच्छीयप्रकारतायाः सत्त्वात् । तदाह—तदुद्देश्यकेति—विप्राद्युद्देश्यकेच्छाविषयत्वमित्यर्थः । विषयत्वञ्चात्र प्रकारत्वरूपं ग्राह्यम्, नातो विप्रादावतिव्याप्तिः । पूर्वतन्त्रे=पूर्वमीमांसायाम् । चतुर्थाध्यायस्य द्वितीयपादे षष्ठाधिकरणे निरूपितम् । प्रासनवदिति—अग्निष्टोमप्रकरणे 'नीतासु दक्षिणासु कृष्णविषाणं चात्वाले प्रास्यति' इति श्रुतिः। अयमर्थः—यदा यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्नीता तदा यजमानो यज्ञे गात्रकण्डूयनाय स्वहस्ते धृतं कृष्णमृगशृङ्गं चात्वालनामके यज्ञीयगर्ते प्रास्येत्=प्रक्षिपेत् इति । तत्र सन्दिह्यते—चात्वाले कृष्णमृगशृङ्गप्रक्षेपणं प्रतिपत्तिकर्म उत अर्थकर्म इति । प्रतिपत्तिकर्म च—प्रधानकर्मणि यज्ञादौ कृतोपयोगस्य वस्तुनः संस्कारकं कर्म उच्यते, यथा इडाभक्षणादि । इडा नाम दर्शपूर्णमासयोः पुरोडाशविशेषस्तद्भक्षणस्य 'यजमानपञ्चमा इडां भक्षयन्ति' इति श्रुत्या विधानात् । यजमानः पञ्चमो येषु ऋत्विक्षु ते यजमानपञ्चमाः। चत्वारः ऋत्विजः पञ्चमो यजमानः । नचोपयुक्तस्य संस्कारे फलाभावः, यज्ञीयभूमिसङ्कीर्णतानिवृत्तेरेव फलत्वकल्पनात् ।

दर्पणव्याख्या

'शत्रवेऽस्त्रं मुञ्चति' अत्र दुःखोद्देश्यकत्वं चतुर्थ्यर्थः । मोचनं विभागावच्छिन्नक्रिया, क्रियानुकूलव्यापारो वा । प्रकृत्यर्थस्य वृत्तित्वेन चतुर्थ्यर्थैकदेशे दुःखेऽन्वयः । एवं मित्राय दूतं प्रेषयतीत्यत्र वार्त्तादानोद्देश्यकत्वम् । पुत्राय धनं प्रेषयतीत्यत्र प्रीत्युद्देश्यकत्वं चतुर्थ्यर्थ इत्याद्युह्यमित्याहुः ।

तन्न सम्यक्, सम्प्रदाने हि चतुर्थी । नच भवदुक्तसम्प्रदानत्वे किञ्चिन्मानम्, येन वृक्षायेत्यत्र चतुर्थी स्यात् । किञ्च संयोगरूपधात्वर्थान्वयित्वाविशेषादुदकपदादपि चतुर्थ्यापत्तिः । बाधकं कर्मत्वं तु वृक्षेऽप्यक्षतमिति न किञ्चिदेतत् । ❀ इदमेवेति ❀ निरुक्तोद्देश्यत्वमेवेत्यर्थः । ❀ पूर्वतन्त्रे ❀ मीमांसायाम् । ❀ अत एवेति ❀ शेषित्वस्यार्थकर्मप्रयोजकत्वादेवेत्यर्थः ।

❀ प्रासनवदिति ❀ "प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात्" इत्यधिकरणे इत्यर्थः । प्रासनदृष्टान्तश्चैवम् ज्योतिष्टोमे श्रूयते "नीतासु दक्षिणासु चात्वाले कृष्णविषाणं प्रास्यति" इति । यदा यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्नीतास्तदा यजमानः स्वहस्ते धृतं कृष्णमृगशृङ्गं चात्वालनामकगर्त्ते प्रक्षिपेदिति तदर्थः । तत्रैवं सन्दिह्यते—किमेतत् प्रासनमर्थकर्म, प्रतिपत्तिकर्मेति वा ? अर्थकर्मैव भवितुमर्हति, सप्रयोजनत्वात् । प्रतिपत्तितायां तु अपूर्वाभावे निरर्थकमेव स्यादिति पूर्वपक्षे—"कृष्णविषाणया कण्डूयति" इति श्रुत्या कृतार्थस्य प्रतिपत्त्यपेक्षत्वात् प्रतिपत्तिकर्मतैव युक्ता । नचानर्थक्यम्, प्रासनक्रियाप्रयुक्तापूर्वाभावेऽपि चात्वाल एवेति नियमापूर्वसद्भावादिति सिद्धान्तितम् । तद्वद्दण्डदानं न प्रतिपत्तिरिति योजना । ❀ इत्यधिकरण इति ❀ चतुर्थाध्याय इति शेषः ।

ज्योतिष्टोमं प्रकृत्यैव सोमे दीक्षिताय दण्डं प्रयच्छतीति दण्डस्य दीक्षाभिव्यञ्जकत्वं विधायक्रीते सोमे 'मैत्रावरुणाय दण्डं प्रयच्छति" इति श्रूयते । तत्र दण्डदानस्यार्थप्रतिपत्तिकर्मभावसन्देहेऽध्वर्युणा दीक्षासिद्ध्यै दत्तदण्डस्यासोमक्रयाद्यजमानधारणेन कृतार्थत्वादुपयुक्तस्य तस्य दानं प्रतिपत्तिकर्मैवेति पूर्वपक्षे, "दण्डी प्रैषानन्वाह" इति श्रवणान्मैत्रावरुणस्य

SGDF

किन्तु चतुर्थीश्रुत्यार्थकर्मेति तत्र निर्णीतम्। 'रजकाय वस्त्रं ददाति' इत्यपि 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाति' इति भाष्योदाहरणादिष्टमेव।

प्रभा

अर्थकर्म = उपयोक्ष्यमाणस्य संस्कारः, यथा—उपयोक्ष्यमाणस्य व्रीह्यादेरुपयोगात्पूर्वमेव प्रोक्षणादिसंस्कारः। अत्र संस्कृतेन द्रव्येण यज्ञस्वरूपसिद्धिस्तद्द्वारा अदृष्टञ्च फलम्। प्रतिपत्तौ संस्कारजन्यं न किञ्चित्फलमित्युपयुक्तस्य संस्कारापेक्षया उपयोज्यस्य संस्क्रिया गरीयसी, इत्यर्थकर्मत्वं यथा प्राशनस्य न प्रतिपत्तिकर्मत्वम्। एवं यज्ञे 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति श्रुत्या विहितसोमक्रयणाय, गोनयनार्थं दीक्षासिद्धये च दीक्षिताय यजमानाय दण्डो दीयते। 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति विहितं दण्डदानं प्रतिपत्तिकर्म (उपयुक्तस्य वस्तुन अदृष्टाजनकः संस्कारविशेषः) अर्थकर्म (करिष्यमाणोपयोगस्य वस्तुन उपयोगात्पूर्वं क्रियमाणोऽदृष्टजनकः संस्कारविशेषः) वेति सन्दिह्य गोनयनोपयुक्तस्य दण्डस्य दानरूपं कर्म प्रतिपत्तिकर्मैव भवितुमर्हति, प्रतिपत्तिकर्मण उपयुक्तस्य संस्कारकत्वरूपत्वादिति पूर्वपक्षे मैत्रावरुणायेति चतुर्थीश्रुत्या अर्थकर्मैव स्यात् चतुर्थ्यर्थस्योद्देश्यत्वादुद्देश्यस्य सफलत्वात् उपयुक्तापेक्षया उपयोक्ष्यमाणेऽत्यादरात्। उपयोक्ष्यमाणस्य संस्काराभावेऽसंस्कृतद्रव्येण यज्ञस्यानिष्पत्तिः। उपयुक्तसंस्काराभावे तु अङ्गविशेषस्यानिष्पत्तिरित्यादरबीजम्। अत एव 'दण्डी प्रैषा नन्वाह' इति श्रुते प्रैषानुवादेऽवलम्बनाय मैत्रावरुणस्य दण्डोऽपेक्ष्यत इति सफलत्वादर्थकर्मैव, नतु प्रतिपत्तिः, निष्फलत्वादिति निर्णीतम्। स्वस्वत्वध्वंसविशिष्टपरस्वत्वानुकूलव्यापारवाचकधातुसमभिव्याहारे एव सम्प्रदानत्वमिति न नियमः, किन्तु अर्थान्तरवाचकदाधातुसमभिव्याहारेऽपीत्याशयेनाह—रजकायेति—अत्र दाधात्वर्थमलापकर्षणाय कियत्कालिकस्वत्वेच्छा। अत्र स्वत्वनिरूपकत्वसम्बन्धजन्यभृतिमान् रजको भवत्वितीच्छया रजकस्योद्देश्यत्वम्। खण्डिकोपाध्यायः = क्रुद्धोपाध्यायः, बालकोपाध्याय इति वा। चपेटा = करतलम्। ददातिरत्र संयोगविशेषानुकूलेच्छा। तथाच क्रियाकर्म (चपेटा) संयोगसम्बन्धजन्यदुःखाश्रयः शिष्यो भवतु इतीच्छया शिष्यस्य सम्प्रदानत्वम्। 'न शूद्राय मतिं दद्यात्' इत्यादौ उपदेशो धात्वर्थः। मतिपदञ्च ज्ञानजनकवेदपरम्। सम्यक् प्रदीयते इति—तदुक्तम्—

दर्पणव्याख्या

प्रैषानुवादेऽवलम्बनाय दण्डोपेक्षितः। एवञ्च भविष्यदुपयोगसद्भावात् दानव्याप्यमानदण्डव्याप्यमानत्वेन मैत्रावरुणस्य प्राधान्याच्च दण्डदानस्य प्रतिपत्तिकर्मण उपयुक्तसंस्काररूपादर्थकर्मैवोपयोक्ष्यमाणसंस्काररूपत्वेन प्राशस्त्याच्चार्थकर्मतैवोचिता, उपयोजयितुमेव सर्वत्र संस्कारप्रवृत्तेः। उपयुक्ते तु प्रतिपत्तिरूपसंस्कारस्य सत्कारमात्रपर्यवसायित्वेन कार्यपर्यवसानाभावादप्रशस्तत्वमतो मैत्रावरुणसंस्काराय तद्दानमर्थकर्म। तथा सति निरूढपशौ असत्यपि दीक्षिते दण्डसम्पादनस्यैवैतद् दानप्रयोजकमिति सिद्धान्तितम्।

अर्थकर्मत्वे च शेषित्वं प्रयोजकम्। तच्च चतुर्थीश्रुत्या मैत्रावरुणस्य बोध्यत इत्याह—❀ चतुर्थीश्रुत्येति ❀ ननु यत्र दाधातुरधीनीकरणाद्यर्थकस्तत्राधीनत्वादिरूपफलनिरूपकतयेच्छाविषयत्वरूपसम्प्रदानत्वस्य रजकादावपि सम्भवात् "रजकाय वस्त्रं ददाति" "होत्रे उष्ट्रं ददाति" इत्यादिप्रयोगाः प्रसज्ज्येरन्नित्याशङ्कामिष्टापत्त्या परिहरति—❀ रजकायेति ❀। तत्र प्रमाणमुपन्यस्यति—❀ खण्डिकोपाध्याय इति ❀। ❀ ददातीति ❀ दाधात्वर्थसंयोगसम्बन्धित्वेनेच्छाविषयत्वरूपोद्देश्यत्वस्य तत्र सत्त्वादिति तद्भावः। अस्मिन् प्रयोगे ददातिः संयोगानुकूलव्यापारार्थकः। चपेटापदार्थस्तु प्रसृतकरतलम्। "न शूद्राय मतिं दद्यात्" इत्यत्र ददातिर्बोधनार्थकः। मतिपदार्थश्च तज्जनकं वेदादिशास्त्रमिति बोध्यम्।

Digitized by Siddhanta eGangotri Gyaan Kosha Foundation

वृत्तिकारास्तु—सम्यक् प्रदीयते यस्मै तत् सम्प्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तः 'रजकस्य वस्त्रम्' इत्येवाहुः ।

प्रभा

ददाति दण्डं पुरुषो महीपतेर्नचातिभक्त्या नच दानकाम्यया ।
यद्दीयते दानतया सुपात्रे तत्सम्प्रदानं कथितं मुनीन्द्रैः ॥ इति ।

निवृत्तिपर्यन्तमिति—स्वस्वत्वध्वंसानुकूलव्यापारपर्यन्तमित्यर्थः । ईदृशार्थस्तु दानेन न परस्वत्वोत्पत्तिः, किन्तु प्रतिग्रहेण (स्वीकारेण) इत्यभिप्रायेण । यदि दानमेव परस्वत्वोत्पादकं तदा परस्वत्वोत्पत्तिविशिष्टस्वस्वत्वध्वंसानुकूलव्यापार एव दानम् । व्यापारश्चात्र सङ्कल्पादिरूपः । संसृष्टिधने=सम्मिलितधने दातुः प्रतिग्रहीतुश्च 'ददाति' इत्यप्रयोगाद् धात्वर्थे परमात्रेति निवेशनीयम् । तथाचोभयस्वत्वसत्त्वे ददातीति न प्रयोगः । नच तत्र परमात्रेति निवेशाभावेऽपि न दोषः, स्वस्वत्वध्वंसाभावादिति वाच्यम्, परस्वत्वोत्पत्तौ स्वस्वत्वध्वंसस्यावश्यकत्वेन स्वस्वत्वध्वंसस्य तत्र सत्त्वात् । अर्थमिति—'कर्मणा यमभिप्रैति' इति सूत्रस्यार्थमित्यर्थः । 'आहुः' इत्यनेनारुचिः सूचिता । तद्बीजन्तूक्तभाष्यप्रयोग (खण्डिकोपाध्यायः शिष्याय चपेटां ददाति) विरोध एव । तथाच 'सम्प्रदानम्' इति महासंज्ञाकरणं नान्वर्थत्वाय, किन्तु सर्वनामस्थानादिसंज्ञावत् प्राचामनुरोधात् ।

दर्पणव्याख्या

❀ स्वस्वत्वनिवृत्तीति ❀ परस्वत्वोत्पत्त्यवच्छिन्नस्वस्वत्वध्वंसेच्छारूपं व्यापारम् । ❀ अर्थम् ❀ दाधात्वर्थमित्यर्थः । तथाचोक्तार्थकदाधात्वर्थकर्मनिष्ठफलभागितयेच्छाविषयत्वमेव सम्प्रदानत्वम् । अन्वर्थमहासंज्ञाकरणसामर्थ्यादुक्तस्थले च ददातेस्तदर्थकत्वाभावेन रजकस्य वस्त्रं ददातीत्येवेति तेषामाशयः । उक्तभाष्यप्रामाण्यादन्वर्थत्वमेवासिद्धम् । महासंज्ञाकरणं तु प्राचामनुरोधादेव, सर्वनामस्थानसंज्ञावदित्यस्वरसादाह ❀ आहुरिति ❀ ।

नन्वजां ग्रामं नयतीत्यत्राजायां निरुक्तसम्प्रदानस्य सत्त्वात्तद्वाचकाच्चतुर्थ्यापत्तिरिति चेत् स्यादेव यदि परया कर्मसंज्ञया सम्प्रदानत्वस्य न बाध इति । 'यूपाय दारु' इत्यादौ न सम्प्रदानचतुर्थी, अपि तु तादर्थ्ये । तादर्थ्यञ्च—स एवार्थः प्रयोजनमस्य तत्त्वम् । समभिव्याहृतार्थे तादर्थ्यविवक्षायां तद्वाचकाच्चतुर्थीति 'तादर्थ्ये चतुर्थी वाच्या' इति वार्त्तिकार्थः ।

प्रयोजनत्वञ्च न जन्यत्वम्, दुःखाय पापमित्यस्याप्यापत्तेः । नापि जन्यतयेच्छाविषयत्वम्, स्वर्गादेः पुण्यादिजन्यतयेच्छाविषयत्वेन स्वर्गाय पुण्यमित्यापत्तेः । नचेष्टापत्तिः, तथा सति पक्तुं व्रजतीत्यर्थे 'पाकाय व्रजति' इति प्रयोगनिर्वाहाय "तुमर्थाच्च" (पा० सू० २ । ३ । १५) इतिसूत्रप्रणयनवैयर्थ्यापत्तेः, पाकादेर्निरुक्तव्रजनाद्यर्थतयैव तद्वाचकाद्वार्त्तिकेन चतुर्थ्युपपत्तेः । अपि तु समभिव्याहृतपदार्थनिष्ठव्यापारेच्छानुकूलेच्छाविषयत्वम् । तत्प्रयोजनकत्वरूपं तादर्थ्यं तु तदिच्छाधीनेच्छाविषयव्यापाराश्रयत्वम् । दारुणो यूपेच्छाधीनेच्छाविषयतक्षणादिरूपव्यापारवत्तया यूपार्थत्वात्तद्विवक्षया यूपपदाच्चतुर्थी । तदर्थश्चेच्छाधीनेच्छाविषयव्यापाराश्रयत्वम् । प्रथमेच्छायां यूपादेः प्रकृत्यर्थस्य विषयित्वेनान्वयः । तस्याऽऽश्रयतया दार्वादौ, एवं रन्धनाय स्थालीत्यादावप्यूह्यमिति केचित् ,

तन्न मनोरमम्, तादर्थ्यस्योक्तरूपत्वे मुक्तये हरिं भजतीत्यत्र चतुर्थ्यनुपपत्तेः । न हि भजनस्य मुक्तीच्छाधीनेच्छाविषयव्यापारवत्ता नापि मुक्तेः सम्प्रदानता, कर्मजन्यफलभागितयानुद्देश्यत्वात् । तस्मात्तदिच्छाधीनेच्छाविषयत्वमेव तत्तादर्थ्यम् । स्वर्गाय पुण्यमित्यादयस्त्विष्यन्त एव । वार्त्तिकं दृष्ट्वा सूत्रकृतोऽप्रवृत्तेर्न "तुमर्थात्" इतिसूत्रानुपपत्तिरपीति । नमःस्वस्त्यादिशब्दयोगेऽपि तदर्थविशेषणवाचकात् "नमः स्वस्ति" (पा० सू० २ । ३ । १६) इति सूत्रेण चतुर्थी विधीयते । तत्र नमःपदार्थस्त्यागो नतिश्च । तत्र नतिः स्वापकर्षबोधनानुकूलो व्यापारः । 'हरये नमः' 'एषोऽर्घः

इदञ्च—

अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम् ॥

प्रभा

इदञ्चेति—सम्प्रदानञ्चेत्यर्थः । अनिराकरणादिति—उद्देश्ये सूर्यादौ प्रवृत्तिनिवृत्त्यन्यतरानुकूलव्यापाराभावादित्यर्थः । कर्तुरिति—अत्र कर्मणि षष्ठी । कर्मत्वञ्च निराकरणक्रियानिरूपितम् । त्यागाङ्गम् = दानपदार्थघटकीभूतं क्रियाकर्मसम्बन्धजन्यफलाश्रयत्वेनेच्छोद्देश्यम् । प्रेरणा = प्रवर्तना = दानेऽप्रवृत्तस्येष्टसाधनत्वादिबोधनम् । अनुमतिः = स्वाभिलषिते स्वयं प्रवृत्तस्येष्टसाधनताबोधनम् । तथाच कर्तुरनिराकरणात् = अप्रत्याख्यानात्, 'प्रेरणानुमतिभ्याञ्च त्यागाङ्गं कर्मणेप्सितं सम्प्रदानतां लभते' इत्यन्वयः । अथवा सम्प्रदानतायामेव हेतुत्रयम् ।

दर्पणव्याख्या

शिवाय नमः' इत्यादौ त्यागः । चतुर्थ्या च तत्रोद्देश्यत्वं प्रत्याय्यते । त्यागश्च यदि शिवस्यायं भवत्विति फलेच्छाधीनो न ममेत्याकारकः स्वस्वत्वेच्छाभावरूपस्तदा तदुद्देश्यत्वं त्यागजनकेच्छायाः स्वत्वभागितया विषयत्वम् । यदि त्यागरूपेच्छैवान्यदीयत्वेन त्यज्यमानगतं स्वत्वमपि विषयीकरोति तदा स्वत्वभागितया विषयत्वमेव तदुद्देश्यत्वम्, नतु स्वीकाराश्रयत्वम्, शिवादेर्विग्रहवतोऽपि स्वीकाराभावात्तदाकारकतया ध्यातस्य मन्त्रस्य त्यागोद्देश्यतामते तदभावाच्च ।

त्यज्यमानोपचारादौ शिवादिनिरूपितस्वत्वाभावेऽपि तदीयत्वेन तत्र द्रव्ये स्वत्वावगाहिनीच्छाविसंवादिरूपैव । अन्यदीयस्वत्वे बाधितं शिवादिनिरूपितत्वं शिवादिनिरूपितप्रसिद्धस्वत्वान्तरे वा बाधितं तद्द्रव्यसम्बन्धमवगाहते ।

तत्र प्रथमे स्वत्वप्रकारकेच्छाजन्यत्वं जन्यतासम्बन्धेन तादृशेच्छावत्त्वं वा चतुर्थ्यर्थः । तत्र प्रकृत्यर्थस्य शिवादेर्विषयताविशेषसम्बन्धेनान्वयः । द्वितीये विषयताविशेष एव सः । तत्र च प्रकृत्यर्थशिवादेर्निरूपितत्वसम्बन्धेनान्वयः । नमःपदार्थत्यागस्य विषयताविशेषसम्बन्धेनार्घादिद्रव्येऽन्वयः । द्रव्यस्यैव वा विशेष्यतया भासमानत्यागेऽन्वयः । शिवायोत्सृजतीत्यादाविव नात्रानिराकर्त्तृसम्प्रदानता, नमःपदस्याधातुत्वात् ।

नमःपदेन च स्वप्रयोक्तृपुरुषकर्त्तृकत्वोपरागेणैव त्यागो बोध्यते, अन्योच्चरितनमःपदेनान्यदीयत्यागाबोधनात्, तत्पुरुषोच्चारितनमःपदात्त्यागबोधे त्यागे त्यज्यमानद्रव्ये च तदीयत्वसंशयानुदयात् । अत एव तदीयत्वबोधनायाहं ददे इतिवत्, 'अहं नमः' इत्यादि न प्रयुज्यते । ऋत्विजा च यजमानरूपपुरुषान्तरीयद्रव्यत्यागे स्वीयत्वमारोप्यैव पूजायां नमःपदं प्रयुज्यते । स चारोपस्तस्मिन् विशेषदर्शनदशायामाहार्यतयोपपद्यते । प्रतिनिधिप्रयुक्तदानवाक्यस्येव पूजायां नमःपदघटितवाक्यस्य बाधितार्थकत्वेऽप्यदृष्टजनकत्वं न विरुद्धम्, शास्त्रप्रामाण्यादित्याद्यन्यत्र विस्तरः ।

तद् विभजते ❀ इदमिति ❀ "कर्मणा यमभिप्रैति" (पा० सू० १ । ४ । ३२) इति सङ्केतितं सम्प्रदानं चेत्यर्थः त्रिविधमित्यनेनान्वितम् । त्यागाङ्गं कर्मणेप्सितं कर्तुरनिराकरणादित्रिभ्यः सम्प्रदानव्यपदेशं लभत इति योजना । स्वनिष्ठोद्देश्यतानिरूपकत्वसम्बन्धेन त्यागे समभिव्याहृतधात्वर्थे विशेषणतया प्रतीयमानत्वं तदङ्गत्वम् । तेन वृक्षायोदकमासिञ्चतीत्यादौ न वृक्षादेराधिक्यम् । वस्तुतस्तु वृत्तिकृन्मते नायं विभागः । तेन वृक्षादेरसंग्रहेऽपि न क्षतिः । तथाच समभिव्याहृतधात्वर्थे इति न व्याख्येयम् ।

इदं च विशेष्यं तद्भेदनियामकमाह—❀ अनिराकरणादिति ❀ प्रवृत्तिनिवृत्त्यन्यतरानुकूलव्यापारशून्यत्वादित्यर्थः । ❀ कर्मणेप्सितमिति ❀ कर्मजन्यफलभागितयेच्छाविषयः । ❀ प्रेरणेति ❀ अप्रवृत्तस्य कर्तुस्त्यागादाविष्टसाधनताबोधनं प्रेरणा, जातेष्टसाधनताबोधे अप्रामाण्यशङ्का शिथिलस्य कर्तुस्तादृशशङ्काविधूननक्षमप्रमाणोपन्यासेन प्रवर्त्तनं कर्मानिष्टस्वत्वादिफलाभ्युपगममात्रानुकूलव्यापारवत्त्वं वानुमतिस्ताभ्यामित्यर्थः । एवञ्च 'प्रकृतधात्वर्थकर्मजन्यफ-

इति वाक्यपदीयात् त्रिविधम् । "सूर्यायार्घ्यं ददाति" इत्याद्यम् । नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति । प्रेरकम्—"विप्राय गां ददाति" । अनुमन्तृ—"उपाध्यायाय गां ददाति" । अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः,

प्रभा

त्रिविधमिति—अनिराकर्तृ, प्रेरयितृ, अनुमन्तृ, त्रिविधं सम्प्रदानमित्यर्थः । आद्यम् = अनिराकर्तृ । सर्वत्र = कारकविभक्तिस्थले । अभेदः संसर्ग इति—एवञ्च 'अभेदसम्बन्धावच्छिन्न (सम्बन्धानवच्छिन्न) प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति विशेष्यतासम्बन्धेन कारकविभक्तिजन्योपस्थितिः कारणम्' इति कार्यकारणभावः फलितः ।

दर्पणव्याख्या

लभागितयेच्छाविषयत्वे सति कर्त्तृप्रवृत्तिनिवृत्त्यन्यतरानुकूलव्यापाराभाववत्त्वम्' अनिराकर्त्तृत्वम् । निरुक्तविषयवत्त्वे सति कर्त्तृसम्बन्धित्यागादिविषयकेष्टसाधनताबोधौपयिकव्यापारवत्त्वं प्रेरकत्वमित्याद्यूह्यम् ।

❀ सूर्यायार्घ्यं ददातीति ❀ अत्र मतभेदेन दाधातोः परस्वत्वेच्छाधीनस्वस्वत्वाभावेच्छारूपः । परस्वत्वगोचरस्वस्वत्वाभावेच्छारूपो वा त्यागोऽर्थः । अन्वयबोधस्तु "नमः स्वस्ति" (पा० सू० २ । ३ । १६) इतिसूत्रोक्तदिशोहनीयः । ❀ सर्वत्रेति ❀ न तत्सूत्रविहितद्वितीयाद्यन्तप्रयोगेष्वित्यर्थः । ❀ अभेदः संसर्ग इति ❀ अभेदात्मकः संसर्गो विशिष्टबुद्धिनियामको विशेष इत्यर्थः । अभेदसंसर्गकप्रकृत्यर्थप्रकारकबोधं प्रति सम्बन्धार्थकविभक्तिभिन्नप्रत्ययजन्योपस्थितेर्हेतुत्वादिति भावः ।

यत्तु सम्बन्धस्य सम्बन्धिभेदनियतत्वादभेदस्य सम्बन्धत्वे मानाभावादभेदसंसर्ग इत्यस्य अभेदेऽपि संसर्ग इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभाव इति, तन्न, विशेष्यविशेषणभावस्यापि सम्बन्धनियततत्वेन तदसत्त्वे तस्याप्यसम्भवात् । अत एव भासमानवैशिष्ट्यप्रतियोगित्वं विशेषणत्वमिति टीकाकृतः । कथमन्यथा 'द्विष्ठोऽप्यसौ परार्थत्वात्' इति विशेषणत्वेन विवक्षितस्य सम्बन्धं विना विशेषणत्वासम्भवेन तदाकाङ्क्षित्वादिति स्वयं व्याख्यातम् ।

नच तस्य सम्बन्धत्वे 'नीलो घटः' इत्यादौ षष्ठ्यापत्तिरिति वाच्यम् , 'राहोः शिरः' इत्यादावौपाधिकभेदसम्बन्धमादाय षष्ठ्युपपादनपरस्यानेकावस्थायुक्तराहोः "इदमेकावस्थायुक्तं शिरोऽवयवः" इति भाष्यप्रामाण्येन भेदमूलकसम्बन्ध एव षष्ठीत्यर्थलाभात् अभेदसम्बन्धे तदापादनासम्भवात् ,

तादृशभाष्येणाभेदसम्बन्धस्य प्रातिपदिकार्थविशेष्यत्वाविवक्षणाद्वा , सम्बन्धस्य सम्बन्धिभेदनियतत्वं त्वसिद्धमेव । यदि भेदनियतत्वमेवेत्याग्रहस्तदा सर्वसाधारण्याय सम्बन्धितावच्छेदकभेद एव नियामकत्वेनाभ्युपेयताम् ।

नच तत्सम्बन्धत्वे मानाभावः, सर्वसिद्धनीलादिविशिष्टबुद्धेरेव मानत्वात् । शाब्दबोधे तद्भाननियामिका च प्रकृतिप्रत्ययविशेषयोः समानाधिकरणप्रातिपदिकार्थयोश्च समभिव्याहाररूपाकाङ्क्षा । अत एव "अर्थवत्" (पा० सू० १ । २ । ४५) सूत्रे भाष्ये "एषां पदानां सामान्ये वर्त्तमानानां यद्विशेषे पर्यवसानं स वाक्यार्थः" इत्युक्तम् ।

अन्विताभिधानवादिमतेन चेदम् , तन्मतेऽन्वितस्यैव पदार्थत्वात् । तथाच सामान्यरूपेण सम्बन्धवाचकानां पदानां यद्विशेष इत्यादेस्तत्तदनुयोगिप्रतियोगिकत्ववैशिष्ट्यबोधकत्वम् । आकाङ्क्षादिसमवधानात् स एव वाक्यार्थो वाक्यजन्यबोधविषय इत्यर्थः । वाक्यशक्त्यभिप्रायेण वा तथाभिधानम् । प्रातिपदिकार्थसूत्रे भाष्ये "पदसामानाधिकरण्यमुपसङ्ख्यानमधिकत्वात्" इत्यस्य तु 'वीरः पुरुषः' इत्यादौ विशेष्यविशेषणभावप्रयोजकप्रातिपदिकार्थातिरिक्ताभेदसंसर्गस्यापि भानात् प्रातिपदिकार्थमात्राभावात् प्रथमा न प्राप्नोतीत्यतः प्रथमाया उपसङ्ख्यानमारब्धव्यमित्यर्थान्न तद्विरोधोऽपि ।

कैयटेनापि न वाक्यार्थत्वादिति तत्प्रत्याख्यानावसरे वीरप्रातिपदिकादनपेक्षितशब्दान्तरोहितविशेषणभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते इत्यत्र प्रतिपादितपदमपहायोहितशब्दं प्रयुञ्जानेन विशेष्यविशेषणभावनियामकत्वमितर-

विभक्तीनां धर्मिवाचकत्वात्, धर्ममात्रवाचकत्वे "कर्मणि द्वितीया" (पा० सू० २।३।२) इति सूत्रस्वरसभङ्गापत्तेः, कर्मार्थककृत्तद्धितादौ तथादर्शनाच्च, द्वितीयाद्यर्थकबहुव्रीहौ 'प्राप्तोदकः' इत्यादौ धर्मिवाचकत्वलाभाच्च ।

प्रभा

विभक्तीनाम्=कारकविभक्तीनाम् । धर्मिवाचकत्वादिति—कर्मादिवाचकत्वादित्यर्थः, नतु कर्मत्वादिरूपधर्मवाचकत्वम् । कारकविभक्तिद्वितीयादीनां कर्मत्वादिधर्ममात्रमर्थस्तत्र स्वरूपसम्बन्धेन प्रकृत्यर्थस्यान्वयः । तस्य च निरूपकतासम्बन्धेन धात्वर्थफले व्यापारे वा यथार्हमन्वय इति मतं निराकर्तुमाह—धर्ममात्रेति । कर्मणि द्वितीयेति—वाचकत्वं सप्तम्यर्थः । तथाच कर्मवाचिका द्वितीयेत्यर्थकसूत्रस्य स्वः=स्वकीयो यो रसः=अभिप्रायः=तात्पर्यमिति यावत् तस्य भङ्गापत्तेरित्यर्थः । कृदिति—'कृतः कटः' इत्यादौ । तद्धितेति—'शत्योऽश्वः' इत्यादौ । धर्ममात्रवाचकत्वे 'नामार्थयोरभेदान्वयः' इति व्युत्पत्तिविरोधाद् भेदसम्बन्धेन कर्मत्वादेः कटादावनन्वयापत्तिरिति भावः । तथेति—अभेदेनान्वयदर्शनादित्यर्थः । ननु कृत्तद्धितादौ कटादिना सामानाधिकरण्यदर्शनाद् धर्मिवाचकत्वमस्तु 'कर्मणि द्वितीया' इत्यस्य च कर्मणि बोधनीये सति लाघवात्कर्मत्वे द्वितीयेत्येवार्थ इत्यत आह—द्वितीयाद्यर्थकेति—'प्राप्तोदकः' इत्यादौ उदककर्तृकप्राप्तिकर्माभिन्नो ग्राम इति शाब्दबोधदर्शनाद् द्वितीयायाः कर्मणि शक्तिरावश्यकी । अन्यथा द्वितीयाद्यर्थे विहितसमासस्यापि कर्मत्वादिबोधकत्वापत्त्या ग्रामादावन्वयाना-

दर्पणव्याख्या

सम्बन्धस्यैवाङ्गीकृतम् ।

वस्तुतस्तु प्रकृते विशेष्यविशेषणभावस्य सम्बन्धतानुपपन्नैव, सम्बन्धस्य सम्बन्धिभेदनियतत्वादिति त्वदुक्तेः । विशेष्यविशेषणयोर्भाव इति व्युत्पत्त्या तस्य विशेष्यत्वविशेषणत्वमात्रपर्यवसायितया प्रत्येकं तयोरद्विष्ठत्वाच्चानुयोगित्वप्रतियोगित्वाभ्यां द्विष्ठत्वोपपादनेऽप्येकस्यैव सा स्यान्न समुदितयोर्द्वयोः । स्वस्वामिभाववत् शब्दानुगममात्रस्यार्थापरिच्छेदकत्वात् सम्बन्धान्तरे षष्ठी, न विशेष्यविशेषणभावसम्बन्धे इत्यत्र मानाभावाच्च । तस्माद्यथोक्तमेव रमणीयमिति ।

ननु विभक्तीनां धर्मवाचकत्वस्य तन्त्रान्तरसिद्धतया कथं तत्र प्रकृत्यर्थस्याभेदेनान्वयः, अयोग्यत्वादत आह ❀ विभक्तीनामिति ❀ कारकविभक्तीनामित्यर्थः । ❀ धर्मिवाचकत्वात् ❀=शक्तिमच्छक्तत्वादित्यर्थः ।

नन्वस्तु शक्तिरेवार्थोऽत आह ❀ धर्मवाचकत्व इति ❀ । ❀ सूत्रस्वरसभङ्गापत्तेरिति ❀ तद्घटककर्मादिपदानां धर्मपरतां विनोक्तार्थालाभात्तत्परत्वे तद्भङ्गः स्पष्ट एवेत्यर्थः । तथार्थस्य सूत्रकारसम्मतत्वे, कर्मत्वे द्वितीयेत्याद्येव ब्रूयादिति भावः ।

ननु कर्मणीत्यादौ विषयसप्तमीबोध्य इत्यर्थः । तथाच विभक्तीनां धर्मवाचकत्वेऽपि तस्याश्रयतया प्रकृत्यर्थेऽन्वयेन कर्मबोधात् तत्फलान्वयिनी वृत्तिरेव द्वितीयार्थ इतिमतेऽपि तुल्यवित्तिवेद्यतया तण्डुलादीनां फलाश्रयकर्मत्वादिना भानान्न सूत्रस्वरसभङ्गोऽत आह—❀ कर्मार्थकेति ❀ । ❀ कृति ❀='पक्वस्तण्डुलः' इत्यादौ । ❀ तद्धिते ❀='शत्योऽश्वः' इत्यादौ । आदिपदात् 'पच्यमानस्तण्डुलः' इत्यादौ लडादेशशानच्संग्रहः ।

❀ तथादर्शनादिति ❀ धर्मिवाचकतादर्शनादित्यर्थः । तथाच कर्मपरामर्शकतच्छब्दघटितयोरित्यादिसूत्रविहितक्तादीनां धर्मिवाचकत्ववदत्रापि तद्वाचकत्वमेव न्याय्यमिति भावः । ननु तत्र पदार्थान्तरसामानाधिकरण्यानुपपत्त्यास्तु तथात्वमत्र तूक्तापत्त्यभावेनास्तु धर्मवाचकत्वमेवेत्यत आह ❀ द्वितीयाद्यर्थकेति ❀ द्वितीयादिविभक्तीनां धर्मवाचकत्वे तदर्थविहितसमासस्यापि धर्मवाचकत्वापत्त्या "प्राप्तोदकः" इत्यादौ उदककर्तृकप्राप्तिकर्मत्वस्य समासार्थस्य समानविभक्तिक-

सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम् ।

इति भाष्याच्चेति दिक् ।

प्रभा

पत्तिरिति भावः । ननु शेषषष्ठ्याः सम्बन्धार्थकत्वस्य सर्वसम्मतत्वेन तदर्थे विहितबहुव्रीह्यर्थस्य पीताम्बर-सम्बन्धस्याभेदेनान्वयबाधेन लक्षणया, विशिष्टशक्त्या वा सामानाधिकरण्योपपादनवदत्रापि तथैव निर्वाहः स्यादत आह—भाष्याच्चेति—'बहुषु बहुवचनम्' इतिसूत्रस्थभाष्यादित्यर्थः । द्वितीयादीनां धर्मवाचकत्वे

'कर्मत्वादिः सुपामर्थः सङ्ख्या चैव तथा तिङाम्'

इत्येव भाष्यकृतो वदेयुरिति भावः ।

ननु धर्मिवाचकत्वेऽभेदेनान्वयो न सम्भवति, अभेदस्य सम्बन्धत्वाभावात् । तथाहि- 'सम्बन्धो हि सम्बन्धिभ्यां भिन्नो द्विष्ठो विशिष्टबुद्धिनियामकश्च भवतीति नियमः । अभेदे च सम्बन्धिभिन्नत्वस्य बाधादिति चेन्न, सम्बन्धिप्रतियोगिकभेदस्योभयभेदमादाय सर्वत्र सत्त्वादव्यावर्तकत्वात् । सम्बन्धिता-नवच्छेदकानवच्छिन्नविषयताश्रयत्वरूपः पारिभाषिक एवात्राभेद इति वाच्यम्, स चाभेदस्य संसर्गत्वेऽपि सम्भवत्येव । अभेदस्य सम्बन्धत्वादेव 'नीलो घटः' इत्यादिवाक्यानां विशिष्टबुद्धिजनकत्वमुपपद्यते । ये तु अभेदस्येतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभावरूपत्वमुपयन्ति तेऽपि चिन्त्या एव, विशेष्यविशेषणभाव-स्यापि सम्बन्धनियततया इतरसम्बन्धानवच्छिन्नस्य तस्य क्वाप्यदर्शनात् । किञ्च इतरसम्बन्धानवच्छिन्न-विशेष्यविशेषणभाव एवाभेदः संसर्ग इत्यप्यनादेयमेव, तादृशाभेदेऽपि सम्बन्धिभिन्नत्वासिद्धेः । यत्र संसर्ग-तावच्छेदके प्रतियोगितावच्छेदकानुयोगितावच्छेदकभिन्नत्वं तत्र संसर्गत्वमित्यभेदस्य संसर्गत्वे बाधकाभाव इत्यन्यत्र विस्तरः ।

नन्वत्र भाष्येऽपि कर्मपदं कर्मत्वपरमेवास्तु, इति चेन्न, सर्वत्र लक्षणाऽऽश्रयणस्यानौचित्यात् । ननु 'कर्मणि द्वितीया' इत्यादौ कर्मादिपदे लक्षणाऽऽपत्तावपि द्वितीयादिविभक्तीनां लाघवाद् धर्ममात्रवाच-कत्वमेव स्यात् । नचैवं बहुव्रीहेरपि धर्ममात्रवाचकत्वम्, सामानाधिकरण्येनान्वयस्य लक्षणयोपपाद्य-मानत्वादिति वाच्यम्, इष्टापत्तेः । कर्मत्वादिरूपे मुख्यार्थे बहुव्रीहेः प्रयोगाभावस्तु न शङ्क्यः, सत्तामात्र-बोधनाभिप्रायेण 'प्राप्तोदकोऽस्ति' इत्यादिप्रयोगासम्भवादत आह—दिगिति—तदर्थस्तु एवं सति 'पक्तव्यास्त-ण्डुलाः' 'शत्योऽश्वः' इत्यादौ कृत्तद्धितादीनां धर्मिवाचकत्वासिद्धिः । नच तेषु सामानाधिकरण्येनान्वय-दर्शनाद् धर्मिवाचकत्वम्, धर्ममात्रवाचकत्वेऽपि लक्षणया तथासम्भवात् । 'पक्तव्यः' इत्यादितः कर्मत्वमात्र-बोधोऽनुभवविरुद्ध इति चेत्, 'प्राप्तोदकः' इत्यादावपि तथात्वस्य वक्तुं शक्यत्वादिति भाव इति ।

ननु द्वितीयादीनामाश्रयेऽपि न शक्तिः, फलव्यापारयोर्धातुलभ्यत्ववदाश्रयस्यापि द्वितीयादिप्रकृतिलभ्य-

दर्पणव्याख्या

पदोपस्थाप्यग्रामादावभेदान्वयानुपपत्तेरत्रापि जागरूकतया द्वितीयादिविधायकसूत्रस्थकर्मादिपदानां धर्मिवाचकत्वमा-वश्यकमिति भावः ।

ननु त्वन्मतेऽपि षष्ठ्याः सम्बन्धार्थकतया तदर्थविहितबहुव्रीहेः पदार्थान्तरसामानाधिकरण्यानुपपत्तेस्तौल्येन तत्र लक्षणया विशिष्टशक्त्या वा सामानाधिकरण्यस्योपपाद्यतयान्यत्रापि तथैव रीत्या निर्वाहे कृतं सुपां धर्मिवाचकत्वेनेत्यत आह—❀ सुपां कर्मादयोऽप्यर्था इति ❀ ।

यदि कर्मत्वादिधर्मो द्वितीयादिवाच्यतया विवक्षितोऽभविष्यत् तदा कर्मत्वादयोऽप्यर्था इत्येवावक्ष्यत् । तदनुक्त्या तु तेषां द्वितीयाद्यर्थत्वमप्रामाणिकम्, मुनित्रयानुक्तत्वादिति भावः ।

SGDF Sri Gargeshwari Digital Foundation

आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता, किन्त्वाश्रयत्वमात्रं वाच्यम् । तदेव च तादात्म्येनावच्छेदकम् । करणतृतीयायाश्च व्यापारोऽपि, पञ्चम्या विभागमात्रम्, चतुर्थ्या उद्देश्यत्वमात्रम् ।

प्रभा

त्वात् । किन्तु आश्रयत्वरूपधर्ममात्रे शक्तिः । धर्मधर्मिणोश्चाभेदात् 'कर्मणि द्वितीया' इत्यादिसूत्रविरोधोऽपि न । शक्तिमदभेदापन्नाया एव शक्तेर्विभक्तिवाच्यतया प्राप्तोदकादिबहुव्रीहावपि न दोषः । तिङ्कृदादेस्तु पचति, पक्ता, पक्वः, इत्यादौ सामानाधिकरण्यदर्शनात्, 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इति सूत्रप्रामाण्याच्च अस्त्वाश्रयवाचकत्वम् । अत्राश्रयवाचकत्वे प्रमाणाभाव इत्यत आह—**आश्रयस्यापीति । विभक्तिवाच्यतेति**—'अनन्यलभ्यो हि शब्दार्थः' इति न्यायान्न द्वितीयादिविभक्तिवाच्यतेत्यर्थः । नन्वाश्रयत्वस्य वाच्यत्वे आश्रयत्वत्वस्य शक्यतावच्छेदकत्वं वाच्यम्, तस्य च तदाश्रयातिरिक्तावृत्तित्वे सति सकलतदाश्रयवृत्तित्वरूपत्वाद् गौरवमत आह—**तदेवेति**—आश्रयत्वमेवेत्यर्थः । एवेनाश्रयत्वत्वस्य शक्यतावच्छेदकत्वव्यवच्छेदः ।

ननु शक्यतासमानाधिकरणधर्मस्यैवावच्छेदकतया आश्रयत्वस्य शक्यतासामानाधिकरण्येनावच्छेदकत्वानुपपत्तिरत आह—**तादात्म्येनेति**—तथाचाश्रयत्वस्य तादात्म्येन शक्यतासामानाधिकरण्यमिति भावः । तादात्म्यस्य वृत्त्यनियामकत्वेऽपि तादात्म्येनाश्रयत्वसम्बन्धित्वमाश्रयत्वस्यास्तीति तादात्म्येन स्वसम्बन्धितया न स्वनिष्ठशक्यतावच्छेदकत्वानुपपत्तिः । यद्यप्याश्रयतात्वस्याखण्डोपाधित्वं स्वीकृत्य शक्यतावच्छेदकत्वस्वीकारे न गौरवम्, तथापि फलाश्रयत्वव्यापाराश्रयत्वादेरेव विभक्तिवाच्यतया आश्रयतात्वस्याश्रयत्वमात्रवृत्तित्वेन नावच्छेदकत्वसम्भवः । नापि फलाश्रयतात्वस्यावच्छेदकत्वम्, अनेकपदघटितत्वेन गौरवतादवस्थ्यात्, आश्रयतात्वविशिष्टे शक्तिस्वीकारे धर्मधर्मिणोरुभयत्र शक्तिकल्पनायां लाघवाभावाच्च । **व्यापारोऽपीति**—'व्यापारवत्कारणं करणम्' इति करणपदार्थघटकव्यापारोऽपीत्यर्थः । अपिना आश्रयस्य संग्रहः, आश्रयत्वस्य वा । 'विभागमात्रम्' 'उद्देश्यत्वमात्रम्' उभयत्र मात्रशब्देनाश्रयस्य विभक्त्यर्थत्वव्यवच्छेदः ।

वस्तुतस्तु अवधित्वमेव पञ्चम्यर्थः । विभागस्य तदर्थत्वे धातुनापि विभागस्योपस्थित्या विभागस्य द्वेधाभानप्रसङ्गात् । अवधित्वस्य च निरूपकतया धात्वर्थे विभागेऽन्वयः ।

दर्पणव्याख्या

शक्तिवादपक्षमवलम्ब्याह— ❀ आश्रयस्यापीति ❀ आश्रयत्वेन भानं त्वसिद्धमेवेति भावः । ❀ आश्रयत्वमात्रमिति ❀ द्वितीयातृतीयासप्तमीनामिति शेषः । मात्रपदेनाश्रयव्यवच्छेदः ।

नन्वाश्रयत्वस्य शक्यत्वे आश्रयत्वत्वं शक्यतावच्छेदकं वाच्यम्, तच्चाश्रयत्वेतरावृत्तित्वघटितत्वाद् गुर्विति शक्यतावच्छेदकगौरवमेवैतस्मिन् कल्पे दोष इत्यत आह ❀ तदेवेति ❀ आश्रयत्वमेवेत्यर्थः । 'एव'कारेण निरुक्ताश्रयत्वत्वव्युदासः । तस्याखण्डत्वस्योपपादितत्वान्नानाव्यक्तिविशेष्यकशक्तिग्रह एव स्वेतरधर्मस्यावच्छेदकत्वापेक्षणादिति भावः । कर्तृतृतीयाया आश्रय(त्व)मात्रार्थकत्वादाह—❀ करणेति ❀ । व्यापारोऽपीत्यपिनाश्रय(त्व)समुच्चयः ।

वस्तुतस्तु अत्रापि 'व्यापारमात्रमर्थः' इत्येव वक्तुमुचितम्, अपिशब्दस्यावधारणार्थकत्वात् ।

❀ विभागमात्रमिति ❀ मात्रपदेनाश्रयत्वव्यवच्छेदः, विभागस्याश्रयतयान्वयादेव वृक्षादाववधित्वलाभादिति भावः । वस्तुतस्तु वृक्षादेरवधित्वरूपस्वरूपसम्बन्धेन पञ्चम्यर्थविभागेऽन्वय इत्युक्तम् । उद्देश्यत्वमात्रमित्यनेनाप्याश्रयत्वस्य

SGDF Sri Gargeshwari Digital Foundation

अत एवाकृत्यधिकरणमपि न विरुद्ध्यत इत्यभिप्रेत्याह—शक्तिरेव वेति। षण्णामपीति शेषः। "शेषे षष्ठी" (पा० सू० २। ३। ५०) इति सूत्रात् तस्याः सम्बन्धमात्रं वाच्यम्।

प्रभा

अत एव = कर्मत्वादिधर्ममात्रस्य वाच्यत्वादेव। न विरुद्ध्यते—शक्तिग्रहे जातिव्यक्त्योरुभयोर्भानेऽपि न व्यक्तिः शक्या, आनन्त्याद् व्यभिचारात्, 'नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते' इति न्यायात्,

'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'

इति न्यायाच्च। किन्तु विशेषणीभूते धर्मे एव शक्तिरिति तत्र निर्णीतम्।

षण्णामिति—षण्णां कारकविभक्तीनामित्यर्थः। कारकाणां षट्त्वेन तद्विभक्तीनामपि षट्त्वाभिप्रायेणेयमुक्तिः। एतेन षष्ठीवर्जितविभक्तीनां षट्त्वेऽपि कारकषष्ठ्या अपि सत्त्वेन तदसङ्ग्रहापत्तिः। सप्तानामित्युक्तौ सम्बन्धषष्ठ्या अपि ग्रहणापत्तिरित्यपास्तम्। सम्बन्धमात्रमिति—अत्र न धर्म-धर्मिवाच्यत्वप्रयुक्तमतभेद इति मात्रपदेन सूचितम्।

अत्रायं विवेकः—शेषषष्ठ्या क्वचित् सम्बन्धसामान्यरूपेण सम्बन्धवाचकता। यथा-'मातुः स्मरति' इत्यादौ। क्वचिद्विशेष्यरूपेण स्वत्वत्वादिना। यथा 'राज्ञः पुरुषः' इत्यादौ। सर्वत्र सम्बन्धसामान्येनैव बोधकत्वे तु चैत्रेण रक्षिते मैत्रीयहस्त्यादौ 'नेदं चैत्रस्य धनम्' इति प्रयोगः सङ्गच्छते। अन्यथा चैत्रसम्बन्धस्यापि तत्र हस्त्यादौ सत्त्वेन निषेधानुपपत्तिः। स्वत्वत्वेन स्वत्वस्य भाने तु चैत्रीयस्य पाल्य-पालकभावसम्बन्धस्य सत्त्वेऽपि तदीयस्वत्वस्याभावान्निषेधोपपत्तिः। सम्बन्धश्च सर्वोऽपि क्रियाकारकभावमूलक एव। तदुक्तम्—

सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते॥

भाष्येऽपि "नहि कर्मादिभ्योऽन्ये अर्थाः सन्ति। इह तावद् राज्ञः पुरुष इति, राजा कर्ता पुरुषः सम्प्रदानम्, राजा पुरुषाय सम्प्रददाति इत्यर्थसम्प्रत्ययाद् 'वृक्षस्य शाखा' इति वृक्षः शाखाया अधिकरणम् (वृक्षे शाखेति लोकप्रसिद्धेः) यदेतत्स्वन्नाम (स्वत्वन्नाम) चतुर्भिरेतत्प्रकारैर्भवति—क्रयणात्, अपहरणात्, याञ्चायाः, विनिमयात्, इति। अत्र सर्वत्र कर्मादयः सन्ति। एवन्तर्हि कर्मादीनामविवक्षा शेषः, कथन्नाम सतो नाम अविवक्षा स्यात्; सतोऽप्यविवक्षा भवति—तद् यथा—'अलोमिका एडका' 'अनुदरा कन्या' इति। असतश्च विवक्षा भवति, तद्यथा—'समुद्रः कुण्डिका' 'विन्ध्यो वर्धितकम्' इति" अनेन भाष्येण क्रियाकारकभावसम्बन्धस्य तदितरसम्बन्धस्थले सर्वत्र सत्त्वेऽपि क्रियाकारकभावमूलकस्वस्वामिभावादेः सम्बन्धत्वेन विवक्षायां क्रियाकारकभावसम्बन्धस्याविवक्षा। तदुक्तम् भाष्यकृता—कर्मादीनामविवक्षा शेष इति। यदा राज्ञः स्वत्वविवक्षा तदा राजपदादेव, यदा तु पुरुषस्य स्वत्वविवक्षा तदा पुरुषपदात्

दर्पणव्याख्या

सः। ❀ अत एवेति ❀ कर्मत्वादिशक्तेस्तत्तद्विभक्तिवाच्यत्वकथनादेवेत्यर्थः।

❀ न विरुद्ध्यत इति ❀ शक्तिग्रहे जातिव्यक्त्योरुभयोर्भानाविशेषेऽपि जातिरेव शक्या, 'नागृहीतविशेषणन्यायात्', 'विशेष्यं नाभिधा गच्छेत्" इतिन्यायाच्च। व्यक्तिशक्तौ व्यभिचारात् तासामानन्त्याच्चेति तत्र सिद्धान्तितमिति भावः। कारकविभक्त्यर्थं निरूप्य प्रसङ्गात् षष्ठ्यर्थं निरूपयति मूले—❀ सम्बन्ध इति ❀। "शेषे षष्ठी" (पा० सू० २। ३। ५०) इति सूत्रात् कारकप्रातिपदिकार्थभिन्नः स्वस्वामिभावादिसम्बन्धश्च तत्र शेषपदार्थः। तत्रान्यविभक्तीनां मतभेदेन धर्मिधर्मवाचकत्ववदेतस्यास्तथा भ्रमो मा भूदित्याशयेनाह सारे ❀ सम्बन्धमात्रमिति ❀ पक्षद्वयेऽपीति शेषः।

SGDF Sri Gargeshwari Digital Foundation

प्रभा

षष्ठी—'राज्ञः पुरुषः' 'पुरुषस्य राजा' इति। तदुक्तं हरिणा—

द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपचर्य्यते॥ इति।

एतदर्थश्चायम्—यद्यप्यसौ सम्बन्धो द्विष्ठः = प्रतियोग्यनुयोग्युभयवृत्तिस्तथापि परार्थत्वात् = अन्यम्प्रति गुणानां विशेषणत्वाद् विशेषणत्वेन विवक्षितस्य सम्बन्धं विना विशेषणत्वासम्भवात् सम्बन्धो व्यतिरिच्यते = उद्भूततया प्रतीयते इति विशेषणवाचकादेव षष्ठी। विशेष्यस्य तु पदान्तरासमभिव्याहारस्थले स्वरूपत एव प्रतीत्या उद्भूतसम्बन्धो नास्ति इति न ततः षष्ठी, सम्बन्धस्य द्विष्ठत्वेऽपि तत्र = विशेषणे, अभिधीयमानः = षष्ठ्या प्रतीयमानः प्रधाने = विशेष्येऽपि उपचर्य्यते = पुरुषनिष्ठराजनिरूपितविशेष्यतायाः राजपदसन्निधाने प्रतीयमानाया उपकारको भवति इति।

ननु सम्बन्धस्योभयनिरूप्यत्वाद् विशेषणाद् यथा षष्ठी भवति तथा विशेष्यवाचकादपि राजनिरूपितस्वत्ववान्पुरुष इत्यर्थे षष्ठी स्यादिति चेन्न, उक्तार्थे विशेष्यवाचकात् षष्ठ्युत्पत्तौ 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्' इति न्यायविरोधात्, उक्तार्थे प्रत्ययार्थस्य स्वत्वस्य पुरुषरूपप्रकृत्यर्थम्प्रत्यप्रधानत्वात्। किञ्च यदपेक्षया यस्य लघुभूतसम्बन्धेन क्रियान्वयित्वं तद्वाचकप्रकृतिकविभक्तेः कारकविभक्तित्वम्। गुरुभूतसम्बन्धेन क्रियान्वयिवाचकप्रकृतिकविभक्तेस्तदपेक्षयोपपदविभक्तित्वमिति सिद्धान्तात्, 'राज्ञः पुरुषः' इत्यत्र प्रथमायाः कारकविभक्तित्वात् 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायेन शेषषष्ठ्याः प्रथमया कारकविभक्त्या बाधात्। एतादृशकारकविभक्त्युपपदविभक्त्योर्मानन्तु 'सहयुक्तेऽप्रधाने' इति सूत्रस्थभाष्यमेव। तत्र हि—'पुत्रेण सहागतः पिता' इत्यादौ पितृशब्दात्तृतीयावारणाय कृतमप्रधानग्रहणमुपपदविभक्तेरिति न्यायेन प्रथमां प्रसाध्य 'अप्रधाने' ग्रहणं प्रत्याख्यातम्। नच तद्भाष्येण प्रथमाया एव कारकविभक्तित्वं कल्प्यते इति वाच्यम्, पुत्रेण सहागतस्य पितुर्धनमित्यादौ पित्रादिशब्दात् तृतीयावारणायाप्रधाने ग्रहणस्यावश्यकतया प्रत्याख्यानपरभाष्यासङ्गत्यापत्तेः। उक्तकारकविभक्तित्वकल्पने तु न दोषः, तृतीयापेक्षया षष्ठ्या अपि कारकविभक्तित्वेनोक्तन्यायेन तृतीयायाः षष्ठ्या बाधात्।

दर्पणव्याख्या

स च क्वचित् सम्बन्धत्वेन सामान्यधर्मेण वाच्यः, क्वचिच्च विशेषरूपेणैव। तत्र सामान्यरूपेण "मातुः स्मरति" इत्यादौ, विशेषरूपेण विवक्षायां स्वस्वविषये तत्तद्विभक्तीनां प्रसरात्। "राज्ञः पुरुषः" इत्यादौ तु विशेषरूपेणैव। अनेकसम्बन्धसत्त्वेऽपि सम्बन्धविशेषविवक्षया 'नेदं चैत्रस्य' इति प्रयोगात्। सम्बन्धश्च सर्वत्र क्रियाकारकभावमूल एव। "षष्ठी शेषे" इति सूत्रे 'राज्ञः पुरुषः' इत्यत्र राजा पुरुषाय ददातीति सम्प्रत्ययाद्राजा कर्त्ता पुरुषः सम्प्रदानम्, वृक्षस्य शाखेत्यत्र वृक्षे शाखेति लौकिकप्रसिद्ध्या वृक्षः शाखाया अधिकरणम्। "यदेतत् स्वं नाम चतुर्भिः प्रकारैरेतद्भवति—क्रयणादपहरणाद्याच्छायाः परिवर्तनरूपाद्विनिमयादित्यनेन यत्राश्रूयमाणा क्रिया तत्रापि तत्फलसम्बन्धानुमितकरणत्वादिशक्तेर्वस्तुतः सत्त्वादित्यर्थकेन भाष्येण शेषपदार्थाप्रसिद्धिमाशङ्क्यैवं तर्हि कर्मादीनामविवक्षा शेष इति शेषोक्तेः"। क्रियाकारकसम्बन्धस्य वस्तुतः सर्वत्र सत्त्वेऽपि तन्निमित्तस्य स्वस्वामिभावादेः सम्बन्धत्वेन विवक्षणे तस्याविवक्षणात् शेषपदार्थसौलभ्यमिति तद्भावः।

नच सम्बन्धस्योभयनिरूप्यत्वात् 'राज्ञः पुरुषः' इत्यत्र राजपदोत्तरमिव पुरुषपदोत्तरं षष्ठ्यापत्तिरिति चेन्न, यदा राज्ञः उपकारकत्वविवक्षा तदा राजपदादेव। यदा तु पुरुषस्य तद्विवक्षा तदा पुरुषपदादपि, पुरुषस्य राजेति। नचैकदोभयत्र सेति नोक्तातिप्रसङ्गः। तदुक्तं हरिणा—

द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपचर्य्यते॥ इति।

SGDF Gargeshwari Digital Foundation

कारकषष्ठ्यास्तु शक्तिरेवेत्यलम् ।

"सप्तमीपञ्चम्यौ कारकमध्ये" (पा० सू० २ । ३ । ७) इति सूत्रे 'शक्तिः कारकम्' इति-पक्षस्य भाष्ये दर्शनात् ।

प्रभा

कारकषष्ठ्या इति—कारकत्वव्याप्यकर्तृत्वाद्यवच्छिन्ननिमित्तक 'कर्तृकर्मणोः कृति' इत्यादिसूत्र-विहितषष्ठ्या इत्यर्थः, शेषषष्ठ्याः सम्बन्धरूपधर्मवाचकतया कारकषष्ठ्या अपि तथात्वस्यौचित्यादिति भावः। शक्तिरेवेति—कर्मत्वादिशक्तिरेवेत्यर्थः।

ननु कर्मादौ विहितविभक्तीनां धर्मवाचकत्वे मानाभाव इत्यत आह—सप्तमीपञ्चम्याविति—धर्मस्य = कारकत्वस्य कारकत्वव्याप्यकर्तृत्वादेश्च भाष्यसम्मतत्वेन तेषां विभक्तिवाच्यत्वमपि न्याय्यमेवेति भावः।

भाष्य इति—तत्र हि 'क्रियामध्य इति वक्तव्यम्' इहापि यथा स्यात्। अद्य देवदत्तो भुक्त्वा द्व्यहाद् भोक्ता द्व्यहे भोक्ता। अयम्भावः—द्रव्यं कारकम्। तच्च देवदत्तरूपम्, अद्य द्व्यहानन्तरञ्चैकमेव। भेदनि-बन्धनो हि मध्यव्यवहार इति द्व्यहस्य द्वयोः कारकयोर्मध्यवाचकत्वाभावात् सप्तमीपञ्चम्यौ न प्राप्नुतः। 'क्रियामध्ये' इति कथने तु भुजिक्रियायाः कालभेदेन भेदात् भुजिक्रिययोर्मध्ये द्व्यहरूपो कालो भवतीति न दोषः। 'कारकमध्ये' इतीयत्युच्यमाने इहैव स्यात्—इहस्थोऽयमिस्वासः क्रोशाल्लक्ष्यं विध्यति क्रोशे लक्ष्यं विध्यति। यं च विध्यति, यतश्च विध्यति तयोः (कर्मापादानयोः) तन्मध्यं भवति'। अत्र भाष्ये (यं यतश्च) इत्युक्त्या कर्मापादानयोर्मध्यत्वं भाष्यकृदभिप्रेतं प्रतीयते। तदुक्तं कैयटेनापि—'लक्ष्य-प्रदेशयोः कर्मापादा-नयोर्भेदान्मध्यव्यपदेशसद्भावः' इति। कौमुद्यान्तु 'कर्तृकर्मशक्त्योर्मध्येऽयं देशः' इत्युक्तम्।

ततः 'क्रियामध्य इति वक्तव्यम्' इति वार्तिकप्रत्याख्यानाय 'तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति। क्रियामध्यं चेत्कारकमध्यमपि भवति' इत्युक्तम्भाष्ये। तस्यायमाशयः—'नान्तरेण साधनम्' इत्यत्र साधनपदं शक्तिपरम्। तथाच कालभेदभिन्नभुजिक्रियानुमितयोर्द्वयोः कर्तृत्व-शक्त्योर्मध्यव्यपदेशोऽस्त्येवेति। शक्तिमत एव कारकत्वे कर्तृत्वशक्तिमतो देवदत्तस्यैक्यात् पदार्थ-

दर्पणव्याख्या

परार्थत्वात् = परं प्रति गुणानां विशेषणत्वात्, विशेषणत्वेन विवक्षितस्य सम्बन्धं विना विशेषणत्वासम्भवेन सम्बन्धो व्यतिरिच्यते = उद्भूततया प्रतीयते इति तत्रैव षष्ठी। विशेष्यस्य तु पदान्तरासमभिव्याहारे स्वरूपेणैव प्रतीय-मानत्वान्न विशेष्यतानियामकसम्बन्धाकाङ्क्षा। तत्र = विशेषणे, अभिधीयमानः = षष्ठ्या प्रतीयमानः प्रधाने = विशेष्येऽपि उपयुज्यते, तस्य द्विष्ठत्वस्वभावाद्राजनिरूपितविशेष्यताया राजपदसन्निधाने प्रतीयमानाया उपकारको भवतीति तदर्थः।

❀ कारकषष्ठ्या इति ❀ "कर्तृकर्मणोः कृति" (पा० सू० २ । ३ । ६५) इत्यादिसूत्रविहितषष्ठ्या इत्यर्थः। शेषविहितषष्ठ्याः सम्बन्धरूपधर्मवाचकतया षष्ठीत्वेनैतस्या अपि तद्वाचकत्वस्यैव न्याय्यत्वादिति भावः। ननु कर्तृकर्मादि-कारकविहिततृतीयादीनां कथं कर्त्रादिधर्मवाचकत्वमत आह ❀ सप्तमीपञ्चम्याविति ❀। तथाच धर्मस्यापि कारकत्वस्य भाष्यसम्मतत्वेन तासां तद्वाचकत्वे न दोष इति भावः।

❀ दर्शनादिति ❀ तत्र हि द्रव्यं कारकमिति पक्षे 'अद्य भुक्त्वाऽयं द्व्यहे भोक्ता' इत्यादौ देवदत्तरूपकर्तृकारकस्यै-क्यान्मध्यव्यपदेशासम्भवादप्राप्तसप्तमीपञ्चम्योरुपपादनाय प्रवृत्तस्य 'क्रियामध्य इति वक्तव्यम्' इति वार्तिकस्य खण्डना-योक्तम्। नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति। क्रियामध्यं च कारकमध्यमपि भवति। तत्र कारकमध्ये इत्येव सिद्धमिति तत्र साधनमित्यस्य शक्तिमित्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

प्रभा

द्वयनिरूपितं मध्यत्वं न स्यादिति वार्तिकप्रत्याख्यानं विरुद्ध्येत। शक्तेः कारकत्वे तु कर्तृत्वशक्तिनिरूपकभुजिक्रियाया भेदात् कर्तृत्वशक्तेरपि भेदेन अद्यतनभुजिनिरूपितकर्तृत्वशक्तेर्भेदात् तयोः शक्त्योर्मध्ये द्व्यहरूपः कालो मध्यः सम्पद्यते इति सूत्रेणैव कारकमध्यत्वमादायैव लक्ष्यं सिध्यतीति 'क्रियामध्य इति वक्तव्यम्' इति वार्तिकप्रत्याख्यानं सङ्गच्छते।

'अनभिहिते' (२-३-१) इति सूत्रभाष्यादपि 'शक्तिः कारकम्' इति पक्षः प्रतीयते। तथाहि—'द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्त्यभावप्रसङ्गः। द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्तिर्न प्राप्नोति। क्व? 'प्रासादे आस्ते' 'शयने आस्ते' इति। किं कारणम्? सदिप्रत्ययेनाभिहितमधिकरणमिति कृत्वा सप्तमी न प्राप्नोति, नवाऽन्यतरेणानभिधानात्। नवा एष दोषः। किं कारणम्? अन्यतरेणानभिधानात्। अन्यतरेणात्रानभिधानम्। सदिप्रत्ययेना (घञा) भिधानम्। आसिप्रत्ययेना (लटा) नभिधानम्। यतोऽनभिधानं तदाश्रया सप्तमी भविष्यति।' कुतो नु खल्वेतत् सत्यभिधाने चानभिधाने चानभिहिताश्रया सप्तमी भविष्यति, न पुनरभिहिताश्रयः प्रतिषेध इति 'अनभिहिते' हि विधानम्। अनभिहिते सप्तमी विधीयते। नाभिहिते प्रतिषेधः' इति। पर्युदासनञम्, 'शक्तिः कारकम्' इति पक्षञ्चाश्रित्य समाधत्ते भाष्यकारः—अत्राधिकरणत्वशक्तिद्वयम्—सदिनिरूपितम्, आसिनिरूपितञ्च। तत्राभिहितं यत् सदिनिरूपितमधिकरणत्वं तद्भिन्नं यदासिनिरूपितमधिकरणत्वं तदाश्रया सप्तमी निर्बाधा। शक्तिमतोऽधिकरणत्वे पर्युदासे प्रसज्ये च दोष इति उक्तपरिहारो न सम्भवेदित्यभिप्रायेणाह भगवान्—'किं पुनर्द्रव्यं साधनम् (कारकम्), आहोस्विद् गुणः (शक्तिः)? किञ्चातः। यदि द्रव्यं साधनं नैतदन्यद् भवत्यभिहितात्' इति पर्युदासपक्षेऽपि दोष एव। अथ हि गुणः साधनम्, भवत्येतदन्यदभिहितात्। अन्यो हि सदिगुणः (शक्तिः), अन्यश्चासिगुणः (शक्तिः)। किं पुनः साधनं न्याय्यम्? गुण इत्याह—कथं ज्ञायते? एवं हि कश्चित् कञ्चित् पृच्छति—क्व देवदत्त इति। स तस्मा आचष्टेऽसौ वृक्ष इति। कतरस्मिन्? यस्तिष्ठति इति। स वृक्षोऽधिकरणं भूत्वाऽन्येन शब्देनाभिसम्बध्यमानः कर्ता सम्पद्यते। 'वृक्षे आस्ते' इत्यत्राधिकरणम्। 'यः (वृक्षः) तिष्ठति' इत्यत्र कर्ता इति भावः। 'द्रव्ये पुनः साधने सति यत्कर्म तत्कर्मैव स्यात्, यत्करणं करणमेव, यदधिकरणमधिकरणमेव' इति भाष्येण कण्ठत एव 'शक्तिः कारकम्' इति पक्षस्य न्याय्यत्वं समर्थितं भवति, इत्यन्यत्र विस्तरः।

दर्पणव्याख्या

तथाच देवदत्तादिरूपकर्तृद्रव्यस्यैक्येऽपि कालभेदभिन्नभुजिक्रियानुमितकारकपदार्थकर्तृत्वशक्त्योर्भेदात् तन्निमित्तमध्यव्यपदेशाबाधाद्यथोक्तेऽनुपपत्त्यभावात् 'क्रियामध्ये' इति वार्त्तिकं नारम्भणीयमिति तद्भावः।

इदमुपलक्षणम्—अनभिहितसूत्रभाष्यस्य। तत्र 'संख्या विभक्त्यर्थः' इति पक्षेणानभिहिताधिकारं समर्थ्य द्वयोः कारकयोरन्यतराभिधाने विभक्त्यभावप्रसङ्गः, क्व? 'प्रासादे आस्ते' 'शयने आस्ते', किं कारणम् यदि प्रत्ययेनाभिहितमधिकरणमिति कृत्वा सप्तमी न प्राप्नोतीत्याशङ्क्य, नवान्यतरेणाभिधानात्, 'अनभिहिते विधानम्'इत्यादिना प्रसज्ज्यप्रतिषेधे, पर्य्युदासे वा नञर्थे दूषणं परिहृत्य यदि साधनं द्रव्यं स्यात् तदेकमेव, तच्चाभिहितमिति पूर्वोक्तपरिहारो न सम्भवति। अथ शक्तिः साधनं तदा तस्याभेदादनभिहितत्वसम्भवाद्भवत्युक्तपरिहार इत्यभिप्रेत्य किं पुनर्द्रव्यं साधनमाहोस्विद् गुण इत्याशङ्क्योक्तम्, किं पुनः साधनं न्याय्यम्? गुण इत्याह। कथं ज्ञायते, एवं हि कश्चित् कञ्चित् पृच्छति, क्व देवदत्त इति?। स तस्मायाचष्टेऽसौ वृक्षे इति, कतरस्मिन् यस्तिष्ठति स वृक्षोऽधिकरणं भूत्वाऽन्यशब्देनाभिसम्बध्यमानः कर्त्ता सम्पद्यते। द्रव्ये साधने यत् कर्म कर्मैव स्याद्यत् करणं करणमेव यदधिकरणमधिकरणमेव"इति।

SGDF Digital Foundation

एवञ्च 'देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां हस्तेन मया दीयते'

प्रभा

एवञ्चेति—उक्तप्रकारेण धर्मिणो विभक्तिवाच्यत्वसिद्धौ चेत्यर्थः। देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां हस्तेन मया दीयते इति—स्वस्वामिभावः षष्ठ्यर्थस्तत्र देवदत्तरूपप्रकृत्यर्थस्योक्तसम्बन्धेन गवि, गोश्चाभेदसम्बन्धेन 'दीयते' इत्येतद्घटकाख्यातार्थाश्रये, तस्य च स्वस्वत्वध्वंससमानाधिकरणपरस्वत्वरूपफले स्वरूपसम्बन्धेन, फलस्य चानुकूलत्वसम्बन्धेन व्यापारेऽन्वयः। 'ब्राह्मणाय' इत्यत्रोद्देश्यः चतुर्थ्यर्थः, तत्राभेदेन ब्राह्मणस्य, तस्य निरूपकतासम्बन्धेन धात्वर्थव्यापारे, 'गेहात्' इत्यत्राधेयतासम्बन्धेन, गेहस्य पञ्चम्यर्थविभागे, तस्य जनकतासम्बन्धेन, 'गङ्गायाम्' इत्यत्र प्रकृत्यर्थस्य सप्तम्यर्थाधिकरणेऽभेदेन, अधिकरणस्य निरूपकत्वेन, 'हस्तेन' इत्यत्र हस्तस्याभेदेन तृतीयार्थकरणे, तस्य निरूपकतया, 'मया' इत्यत्रास्मदर्थस्याभेदेन तृतीयार्थाश्रये, तस्य चाधेयतया व्यापारेऽन्वयः।

दर्पणव्याख्या

कैयटेनापि "यदि द्रव्यं साधनं स्यात् तदा तस्यैकरूपत्वात् तन्निबन्धनाबाधितप्रत्यभिज्ञाविषयान् नानार्थक्रियाकरणनिबन्धनः 'घटेन जलमाहर' 'घटं कुरु' 'घटोऽस्ति' इति व्यपदेशो न स्यात्, दृश्यते चासौ। तस्मान्नानाशक्तिभावावगमः सिद्धः" इति तद्विवृतम्।

एवञ्च शक्तिपक्षस्याऽऽकरसम्मततया द्वितीयादीनां कर्मत्वादौ शक्तिरिति वदतां मतमपि सम्यगेवेति भावः। प्रातिपदिकार्थेतिसूत्रविहितप्रथमाया यथायथं प्रातिपदिकार्थः, लिङ्गम्, परिमाणं चार्थः।

कर्माद्याधिक्ये प्रथमा मा भूदिति तत्र मात्रग्रहणम्। द्वन्द्वान्ते श्रूयमाणस्य तस्य प्रत्येकं द्वन्द्वघटकपदार्थेऽन्वयात् प्रातिपदिकार्थमात्रे प्रथमेत्यादिवाक्यभङ्गः। प्रातिपदिकार्थत्वञ्च—नामनिष्ठशक्त्यवच्छिन्नजनकतानिरूपितजन्यताश्रयोपस्थितित्वव्यापकविषयिताप्रतियोगित्वम्। उच्चैरित्याद्यर्थविषयितायास्तादृशोपस्थितित्वव्यापकत्वात् तत्र प्रथमोपपत्तिः।

एवं कृष्ण इत्यादौ कृष्णादिविषयिताया इव पुँल्लिङ्गादिविषयिताया अपि तदुपस्थितित्वनैयत्यं व्यक्तमेव। यद्यपि 'द्विकं प्रातिपदिकार्थः' इति पक्षे लिङ्गस्योपस्थितिविषयत्वं दुर्घटम्, तथाप्यनुभवानुरोधेन शक्यार्थोपस्थितेः प्राग् लिङ्गोद्बोधकसमवधानस्य नियमेन कल्पनात् तस्य तत्त्वं बोध्यम्। एवञ्चालिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणानि। तटादिशब्दजन्योपस्थितौ तु पुँल्लिङ्गादिभानस्यानैयत्यात्तत्राप्राप्तप्रथमाविधानाय लिङ्गग्रहणम्।

'सिंहो माणवकः' इत्यादौ सादृश्याद्यधिकार्थस्य प्रतीतावप्यन्तरङ्गत्वात् स्वार्थमात्रनिष्ठात् तस्मात् प्रथमा सुलभैव। तत्र प्रथमार्थलिङ्गस्य विशेषणतया प्रकृत्यर्थेऽन्वयः, योग्यताबलादनुभवाच्च, तथैव कार्य्यकारणभावकल्पनात्। एवं द्रोणो व्रीहिरित्यादौ द्रोणप्रातिपदिकार्थातिरिक्तद्रोणपदात् परिमाणस्याधिक्येन भानात्तत्र परिमाणग्रहणम्।

नच व्रीह्यादिपदसमभिव्याहारात् तद्भानेऽप्यन्तरङ्गत्वात् प्रातिपदिकार्थमात्र एव साऽस्त्विति वाच्यम्, तथा सति द्रोणपदार्थस्य परिमाणस्य भेदसम्बन्धेनान्वयानुपपत्तेः। प्रथमार्थस्य तस्य तु भेदेनान्वये न किञ्चिद् बाधकमिति सम्प्रदायः।

नव्यास्तु—प्रातिपदिकार्थः—तत्तत्पदप्रवृत्तिनिमित्तम्, तदाश्रयश्च। अत एव लिङ्गग्रहणं चरितार्थम्, अन्यथा "स्वमोर्नपुंसकात्" (पा० सू० ७।१।८३) इति सूत्रप्रामाण्यात् तस्यापि प्रातिपदिकार्थतया तदुपपादनवैयर्थ्यापत्तेः। आश्रयत्वं च वैज्ञानिकम्, शक्यतावच्छेदकारोप एव लक्षणेत्यन्यत्र व्यवस्थापितत्वात्। गोपीत्यादौ प्रकृत्यर्थस्य लाक्षणिकत्वेऽपि न क्षतिः। तटादिशब्दानां लिङ्गं वाच्यमेव। विसर्गादयस्तद्द्योतकाः।

एवञ्च प्रातिपदिकार्थ इत्यस्यालिङ्गा लिङ्गप्रवृत्तिनिमित्तकाव्ययस्त्रीपुंसादिशब्दाश्चोदाहरणम्। इतरे लिङ्गमात्राद्याधि-

इत्यत्र देवदत्तसम्बन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः। यथायथम् = उक्तप्रकारेण।

अत्र मानमुपदर्शयन् 'घटं जानाति' इत्यादौ द्वितीयाया विषयतायां लक्षणेति बह्वाकुलं वदतो नैयायिकादीन् प्रत्याह—सुपां कर्मेति।

प्रभा

तथाच देवदत्तत्वावच्छिन्नस्वस्वामिभावसम्बन्धावच्छिन्नप्रकारतानिरूपितगोत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्ना गोत्वावच्छिन्नाऽभेदसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिताऽऽश्रयत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्ना आश्रयत्वावच्छिन्ना स्वरूपसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता स्वस्वत्वध्वंससमानाधिकरणपरस्वत्वत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्नोक्तस्वत्वत्वावच्छिन्नाऽनुकूलत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता, (१) ब्राह्मणत्वावच्छिन्ना अभेदसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता उद्देश्यत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्ना उद्देश्यत्वावच्छिन्ना निरूपकत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता, (२) गेहत्वावच्छिन्नाऽऽधेयत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता विभागत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्ना विभागत्वावच्छिन्ना जनकत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता, (३) भगीरथखातावच्छिन्नजलप्रवाहत्वावच्छिन्ना (गङ्गात्वावच्छिन्ना) अभेदसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता अधिकरणत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्ना अधिकरणत्वावच्छिन्ना निरूपकत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता, (४) हस्तत्वावच्छिन्नाभेदसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता करणत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्ना करणत्वावच्छिन्ना निरूपकत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता, (५) अस्मदर्थत्वावच्छिन्नाऽभेदसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिताऽऽश्रयत्वावच्छिन्ना या विशेष्यता तादृशविशेष्यत्वावच्छिन्नाऽऽश्रयत्वावच्छिन्नाऽऽधेयत्वसम्बन्धावच्छिन्ना या प्रकारता तादृशप्रकारतानिरूपिता (६) च वर्तमानकालावच्छिन्नव्यापारत्वावच्छिन्नविशेष्यताशालीति परिष्कृतो बोध इति पञ्चोलिनः।

दर्पणव्याख्या

क्यस्य। द्रोणत्वादिप्रवृत्तिनिमित्तकद्रोणादिशब्दानां परिमाणत्वेन परिमाणमपि लिङ्गवद् विशेष्यान्वय्यर्थः। एवञ्च लिङ्गवत् प्रातिपदिकार्थत्वाभावात् परिमाणग्रहणम्। "वीरः पुरुषः" इत्यादौ पुरुषादिपदसन्निधाने विशेष्यविशेषणभावस्याधिकस्य भानेऽपि तत्समभिव्याहारात् पूर्वं स्वार्थमात्रनिष्ठात्तस्मात् सेत्याहुः।

"सम्बोधने च" (पा० सू० २। ३। ४७) इति विहितप्रथमायास्तु सम्बोधनमर्थः। प्रातिपदिकार्थापेक्षया तस्याधिक्येन भानात् पूर्वसूत्राविषयत्वात् तत्सूत्रारम्भः। तच्चाभिमुखीभवनानुकूलो व्यापारः क्रियान्वय्येवेति प्रतिपादितं प्राक्। 'यथायथं विभक्त्यर्थाः' इत्यत्रत्य—यथायथपदं व्याचष्टे—❀ उक्तप्रकारेणेति ❀ यदर्थबोधे या विभक्तिः समर्था तस्याः सोऽर्थोऽवसेयः। तथैवोक्तं प्राग्, द्वितीयातृतीयासप्तमीनामित्यादिनेति भावः।

❀ अत्रेति ❀ सुपां कर्मादिवाचकत्व इत्यर्थः। ❀ नैयायिकान् प्रतीति ❀ प्राचीनान् प्रतीत्यर्थः। यथा तन्मतं तथाख्यातशक्तिनिरूपणावसरे प्रतिपादितम्।

ननु 'सुपां कर्मादयोऽप्यर्थाः' इति भाष्यात् सिध्यतु तु तेषां कर्मादौ शक्तिः। विषयत्वादौ लक्षणायां तु किं बाधकम्। क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वबाध एव तत्प्रसरादत उत्तरार्द्धप्रदर्शितनियमं बाधकत्वेनोपदर्शयिष्यन्नाशयं प्रकाश-

SGDF Digital Distribution

अयं भावः—

सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ॥
वार्त्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः ।

प्रभा

'सक्तून् जुहोति' इत्यत्र द्वितीयया करणत्वम्, 'अग्निहोत्रं जुहूयात् स्वर्गकामः' इत्यत्र च द्वितीयया साधनत्वम्, 'घटं जानाति' इत्यत्र तिङा आश्रयत्वम्, द्वितीयया विषयत्वम्, 'रथेन गम्यते' इत्यत्र तृतीयया व्यापारश्च लक्ष्यते, इत्येवं सुपां तिङाञ्च नैयायिकमीमांसकाद्युक्तां लक्षणां निराचिकीर्षुः कर्मादयो विभक्त्यर्था इत्यत्र प्रमाणोपदर्शनव्याजेनाह—

सुपां कर्मादय इति—आदिना कर्त्रादीनां संग्रहः । अपिना कर्मत्वादीनाम् । **तथेति**—तिङामपि कर्मत्वादयः, सङ्ख्या चार्थः । **तत्र**=सुप्तिङ्क्षु । सुपस्तिङश्चापेक्ष्य **नियमः**='कर्मणि द्वितीयैव' 'करणे तृतीयैव' 'अभिहिते कर्मादौ प्रथमैव' 'एकत्वे एकवचनमेव नान्यत्' इत्यर्थनियमः । येन नियमेन अर्थो नियम्यते सोऽर्थनियमः । उक्तनियमेन कर्मरूपार्थो द्वितीयामेव लभते नान्यां सुब्विभक्तिम् । द्वितीया तु यद्यन्यत्रापि प्राप्नोति तर्हि तत्रापि स्याद्यथा—'स्वौजसमौट्' इत्यनेन कर्माद्यभावेऽप्यत्र पक्षे द्वितीयादयः सप्तविभक्तयोऽव्ययेभ्यो जायन्ते ।

अयम्भावः—'स्वौजसमौट्' इति सूत्रेण सर्वेभ्यः प्रातिपदिकेभ्य अर्थविशेषमनपेक्ष्य सर्वा विभक्तयो विधीयन्ते इति कर्मणि सर्वा विभक्तयस्तेन स्युरिति कर्मणि द्वितीयायास्तेन सिद्धतया 'कर्मणि द्वितीया' 'द्व्येकयोर्द्विवचनैकवचने' इत्यादीनि सूत्राणि नियामकानि स्युः । तथाच कर्मणि द्वितीयैवेति नियमसामर्थ्यात् 'स्वौजस्' इति सूत्रेण कर्मणि विहितानां द्वितीयेतरविभक्तीनां निवृत्तिः स्यात् । यत्र (अव्ययादौ) कर्मणि द्वितीयेत्यादिसूत्राणां विषयो नास्ति तत्र सामान्यसूत्रेण विहितानां विभक्तीनां न निवृत्तिरित्यव्ययेभ्यः सर्वा विभक्तयः स्युरेव । अत्र च नियमे द्वितीयादिविभक्तिमपेक्ष्यार्थो नियम्यते इत्यर्थनियमः । **प्रकृतेषु**= प्रकरणप्राप्तेषु कर्मादिषु वा नियमः । प्रत्ययनियमो यथा—'कर्मण्येव द्वितीया' एकत्वे एव एकवचनम्, अभिहिते एव प्रथमा' एवमादिः । अत्रार्थमपेक्ष्य विभक्तयो नियम्यन्ते यथा 'कर्मण्येव द्वितीया' 'प्रातिपदिकार्थे एव प्रथमा' इति नियमेन कर्मत्वसत्त्वे एव द्वितीया, न तु तदसत्त्वे; इत्यव्ययेभ्यो प्रथमादयः का अपि विभक्तयो न स्युः । सामान्यसूत्रेण विहितानां सर्वासां निवृत्तिः स्यात्, इत्यव्ययेभ्यः 'अव्ययादाप्सुपः' इत्यादिसूत्रसामर्थ्यादेव विभक्तिः साध्या स्यान्नतु न्यायतः इत्ययम् 'प्रत्ययनियमः' इत्युच्यते, इत्याह—**कर्मादेरिति** । अयं नियमः स्वातन्त्र्येण, नत्वेकवाक्यतया । एवमेव 'तिप्तस्झि' इत्यादिना कर्तरि,

दर्पणव्याख्या

यति—❀ अयं भाव इत्यादि ❀ "स्वौजसमौ" (पा० सू० ४ । १ । २) इत्यत्र कारकविभक्तिष्वादौ द्वितीयाया उपादानाद् वार्तिकेऽपि तदर्थकर्मणः प्राङ्निर्देशः । कर्मादीत्यादिना कारकान्तरसंग्रहः । अपिना शक्तिः कारकमिति पक्षोक्त-कर्मत्वादिशक्तीनां समुच्चयः ।

❀ तथा तिङामिति ❀ तद्वत्तिङामपि सङ्ख्याकर्माद्यर्थ इत्यर्थः । ❀ तत्र ❀ सुप्तिङ्क्षु । ❀ प्रकृतेषु ❀ अर्थेष्वित्यर्थः । ❀ वार्तिकतद्भाष्येति ❀ लोकादेव बहुत्वादिषु बहुवचनादि भविष्यति, किमर्थम् "बहुषु बहुवचनम्" । (पा० सू० १ । ४ । २१) इत्यादिसूत्रमित्याक्षेपे सुप्तिङ्ङामविशेषेण विधानाद् दृष्टविप्रयोगत्वाच्च नियमार्थं वचनमिति समाधाय नियमाऽऽकारप्रदर्शकमिदं श्लोकवार्त्तिकम् ।

Sri Gargeshwari Digital Foundation

तथाहि—"स्वौजसमौट्" (पा० सू० ४ । १ । २) "कर्मणि द्वितीया" (पा० सू० २ । ३ । २) इति "द्व्येकयोर्द्विवचनैकवचने" (पा० सू० १ । ४ । २२) इत्यादेः; (लः कर्मणि च) "लस्य" (पा० सू० ३ । ४ । ७७) "तिप्तस्झि" (पा० सू० ३ । ४ । ७९) "तान्येकवचन-द्विवचन" (पा० सू० १ । ४ । १०१) इत्यादेरेकवाक्यतया कर्मादेस्तत्सङ्ख्यायाश्च वाच्यता लभ्यते। तथा तन्नियमश्च द्विविधो लभ्यते—द्वितीया कर्मण्येव, तृतीया करण एवेत्येवमादिः शब्दनियमः। कर्मणि द्वितीयैव, करणे तृतीयैवेत्येवमर्थनियमश्च। उभयथापि सिद्धनियमविरुद्धं

प्रभा

कर्मणि च अनुदात्तङित:, स्वरितञित:, तद्भिन्नेभ्यश्च सर्वेभ्यो धातुभ्योऽष्टादशाऽपि तिङ्प्रत्ययाः स्युरिति 'अनुदात्तङित आत्मनेपदम्' 'स्वरितञितः कर्त्रभिप्राये' 'तङ्भावकर्मणोः' 'शेषात्कर्तरि परस्मैपदम्' 'तान्येकवचन' इत्यादीनि सूत्राणि नियमार्थानि स्युः। 'भावकर्मणोस्तङेव' 'तङ् भावकर्मणोरेव' वा इत्येवं पूर्ववन्नियमो ज्ञेयः। 'स्वौजसमौट्' 'कर्मणि द्वितीया' 'द्व्येकयोर्द्विवचनैकवचने' इति त्रयाणामेकवाक्यत्वेन च न नियमः, किन्त्वेकवाक्यतया विधानम्। **एकवाक्यतयेति**—वाक्यैकवाक्यतयेत्यर्थः, नतु पदैकवाक्यतया। तथा सति 'कर्मत्वादियोग्यार्थकप्रातिपदिकार्थमात्रगते एकत्वे प्रथमैकवचनं सुः, कर्मत्वादिशक्तिसमानाधिकरणे एकत्वे द्वितीयाद्येकवचनममादि' इत्येवं बोधः स्यात्। एवञ्च कर्मत्वादियोग्यतारहिताव्ययेभ्यो विभक्तिर्नैव स्यात्, विधायकवचनान्तराभावात्। वाक्यैकवाक्यतायान्तु प्रातिपदिकात् स्वादयो भवन्ति, ते च प्रातिपदिकार्थमात्रगते एकत्वादौ भवन्ति, इत्येवं वाक्यार्थबोधे प्रथमवाक्येनाव्ययेभ्योऽपि विभक्तिः सिध्यति। किञ्च पदैकवाक्यतायाम् अर्थनियम—प्रकृत्यर्थापेक्षप्रत्ययनियम—शुद्धप्रत्ययनियमानामुच्छेदापत्तिः।

किञ्चात्र पक्षे एकवचनादिसंज्ञाऽनापत्तिः, एकवचनेत्यादिमहासंज्ञया एकत्वादिबोधकानां प्रत्ययानामेकवचनादिसंज्ञाविधानेन पदैकवाक्यतया विधाने तादृशप्रत्ययस्य विधायकसूत्रान्तराभावेनाभावादेकवचनादिसंज्ञाऽनापत्तिः, अन्योन्याश्रयदोषग्रस्तत्वात्। सूत्रशाटकवद् भाविसंज्ञाश्रयणे तु गौरवमित्येकवाक्यतापदेन वाक्यैकवाक्यतैव बोध्येति दिक्।

प्रत्ययनियमोऽपि द्विधा—अर्थसामान्यापेक्षः, तद्विशेषापेक्षश्च। 'प्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव' इति सामान्यार्थापेक्षः। "कर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव न करणादौ" इत्यर्थविशेषापेक्षः। **शब्दनियम इति**—प्रत्ययनियम इत्यर्थः। **उभयथाऽपीति**—अर्थापेक्षत्वेन, प्रत्ययापेक्षत्वेन वा सिद्धो यो नियमस्तद्विरुद्धं लक्षणादिकमसाधुत्वप्रयोजकम्। निष्प्रमाणेषु लक्ष्यार्थेषु सुप्तिङ्-

दर्पणव्याख्या

अथवा प्रकृतार्थानपेक्ष्य नियमः। के च प्रकृताः, एकत्वादयः एकस्मिन्नेवैकवचनम्, न द्वयोर्न बहुषु इत्यादि तद्भाष्यं च ताभ्यामित्यर्थः।

नियमाकारमाह—❀ द्वितीया कर्मण्येवेति ❀। प्रकृताभिप्रायम्। निष्कृष्टनियमस्य त्वेकत्वविशिष्टे कर्मण्येव द्वितीयैकवचनमित्याकारो बोध्यः। एवमुत्तरत्रापि। ❀ उभयथापीति ❀ विभक्त्यपेक्षया अर्थापेक्षया चेत्यर्थः। विभक्तिनियमोऽपि द्विधा—अर्थविशेषापेक्षस्तत्सामान्यापेक्षश्च।

तत्राद्यः—कर्मार्थयोग्यप्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव, न करणादौ। कर्मादियोग्ये तद्रहितप्रातिपदिकार्थे एव प्रथमा, न कर्मादौ। संख्यावदर्थयोग्यप्रातिपदिकाच्चेदेकवचनं तदा एकत्वे एव न द्वित्वादावित्याकारकः। द्वितीयस्तु—प्रातिपदिकाच्चेद् द्वितीया कर्मण्येवेत्याकारकः। अर्थनियमस्तु— कर्मार्थयोग्यप्रातिपदिकाच्चेत् कर्मणि विभक्तिस्तदा द्वितीयैव। कर्मादिरहिते तद्योग्यप्रातिपदिकार्थे प्रातिपदिकात्प्रथमैवेत्याकारक इति। सिद्धेत्यस्यैकवाक्यताबलेनेत्यादिः। तथाच विषयत्वस्य

लक्षणादिक्रमसाधुत्वप्रयोजकमिति याज्ञे कर्मणि "नानृतं वदेत्" इति निषेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिकैव । अत एव 'विभक्तौ न लक्षणा' इत्यादिर्नैयायिकवृद्धानां व्यवहार इति दिक् ॥ २४ ॥

इति श्रीवैयाकरणभूषणसारे सुबर्थनिर्णयः ॥ ३ ॥

—***—

प्रभा

प्रयोगे याज्ञे कर्मणि अनृतवदनमनिष्टसाधनमिति निषेधविषयता स्यात् । विभक्तौ = विभक्तिविषये । अप्रयोजिका = नास्ति प्रयोजकम् = प्रमाणं यत्र सा, अप्रमाणिकेत्यर्थः । अत एव = स्वेच्छया लक्षणाया असाधुत्वप्रयोजकत्वादेव । नैयायिकवृद्धानामिति—एतेन नव्यनैयायिकानां केवलव्याकरणविरोध एव न, किन्तु स्वकीयवृद्धसिद्धान्तविरोधोऽपीति सूचितम् ॥ २४ ॥

पूर्णा भूषणसारस्य बालकृष्णकृता प्रभा ।
सुबर्थनिर्णये भागे महेशः प्रीयतां ततः ॥
॥ शुभम्भूयात् ॥

—***—

दर्पणव्याख्या

निरुक्तकर्मत्वानात्मकत्वेन तत्र द्वितीयादेः शास्त्रेणाविधानात् तदर्थतात्पर्य्येण तदुच्चारणस्यानृतत्वादित्यर्थः । ❀ अत एवेति ❀ विभक्तौ लक्षणाया अप्रयोजकत्वादेवेत्यर्थः ।

ननु व्याकरणस्य शक्तिनिरूढलक्षणान्यतरप्रतिपादकत्वेन यत्र मुख्यार्थबाधप्रतिसन्धानादि तत्र शक्यसम्बन्धिनि लक्षणास्वीकारे बाधकाभावः । घटं जानातीत्यादितो घटादिविषयकज्ञानबोधस्य सर्वानुभवसिद्धस्य द्वितीयाया वृत्तिं विनानुपपन्नस्यैव लक्षणाकल्पकत्वाच्च "विभक्तौ न लक्षणा" इति प्रवादस्त्वेकविभक्तेरपरविभक्त्यर्थे न लक्षणेत्येतत्परोऽत एव न व्यत्ययानुशासनवैयर्थ्यम् । 'सुपां कर्मादयोऽप्यर्थाः' इत्यत्र कर्मादिपदस्य गौणमुख्यसाधारणकर्मत्वपरतयाऽप्युपपत्तेर्न तद्विरोधोऽपीत्यत आह—❀ दिगिति ❀ ।

तदर्थस्तु मुख्यार्थमादाय शास्त्रचारितार्थ्ये गौणे तद्व्यापारे मानाभावः । नच घटं जानातीति प्रसिद्धप्रयोगानुरोधेन गौणेऽपि तद्व्यापारकल्पनावश्यिकेति वाच्यम्, जानातेर्ज्ञानविषयत्वापत्त्युपसर्जनविषयत्वापादनार्थकतया मुख्यकर्मतयैवास्मन्मते प्रयोगोपपत्तिसम्भवात् । स्वानुभवैकगम्येऽर्थे लक्षणाभ्युपगमेऽर्थनिर्देशस्य वैयर्थ्यापत्तेश्चेत्यादिः ।

अत्र वदन्ति—शास्त्रस्य गौणे प्रवृत्त्यनभ्युपगमे स्थादीनां फलत्वेनाभिमते गत्यभावे धात्वर्थव्यापारजन्यत्वाभावेन तद्घटितमुख्याकर्मकत्वाभावात्ततो भावे कर्त्तरि च प्रत्ययानुपपत्तिः, एवं वारयतेः संयोगानुकूलव्यापाराभावानुकूलव्यापारार्थकतायाः सर्वसम्मततया तस्यापि मुख्यसकर्मकत्वाभावेन ततोऽपि कर्त्तरि कर्मणि च लकाराद्यनुपपत्तिरतो गौणेऽपि शास्त्रविषयतावश्यमभ्युपेतव्येति न घटं जानातीत्यादीनां विषयत्वलक्षणायामप्यसाधुता ।

वस्तुतस्तु शक्तिः कारकमिति पक्षस्य तन्मते तिङ्सुप्सु व्यवस्थितत्वेन द्वितीयाया विषयत्वान्वय्याधेयत्वबोधकत्वेऽपि न क्षतिः, तादृशस्थले विषयरूपफलस्य धात्वर्थपरतायाः प्रागुपपादनात् तन्मतेऽप्युक्तनियमविरोधस्य निषेधविषयतायाश्चासम्भवादित्यलम् ॥ २४ ॥

इति श्रीभूषणसारदर्पणे सुबर्थनिर्णयः ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ नामार्थनिर्णयः ॥

नामार्थमाह—

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥ २५ ॥

एकम् = जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात्, अनेकव्यक्तीनां वाच्यत्वे गौरवात् ।

॥ नामार्थनिर्णयः ॥

प्रभा

सुपां प्रातिपदिकप्रकृतिकत्वात् प्रत्ययेन प्रकृतिस्मरणात् प्रसङ्गसङ्गत्या नामार्थं निरूपयति—नामार्थमिति—नाम = प्रातिपदिकम्, तदर्थमित्यर्थः । एकशब्दस्य एकत्वगुणविशिष्टार्थकतया तस्य चानियतत्वादाह—एकं जातिरिति—जातिरुपलक्षणम्—तत्तत्प्रवृत्तिनिमित्तस्य । तेनाकाशत्वाभावत्वादीनां जातित्वाभावेऽपि न क्षतिः । प्रवृत्तिनिमित्तत्वञ्च—'वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारतावत्त्वरूपम्' । घटत्वरूपे घटशब्दस्य प्रवृत्तिनिमित्ते वाच्यत्वस्य, वाच्यो यो घटस्तद्वृत्तित्वस्य, समवायेन घटत्वविशिष्टघटोपस्थितौ उपस्थितीयप्रकारतावत्त्वस्य च सत्त्वेन लक्षणसमन्वय इति नैयायिकाः ।

नन्वेवमपि घटशब्देन पुंस्त्वत्वेन पुंस्त्वोपस्थितौ पुंस्त्वत्वेऽतिव्याप्तिरिति चेन्न, प्रातिपदिकविशिष्टत्वं प्रवृत्तिनिमित्तत्वमिति परिष्कारेणादोषात् । वैशिष्ट्यञ्च स्ववाच्यत्व–स्ववाच्यवृत्तित्व–स्वजन्यशाब्दबोधीयमुख्यविशेष्यतासमानाधिकरणोपस्थितीयविशेष्यतानिरूपितप्रकारताश्रयत्वैतत्त्रितयसम्बन्धेन । निरूपितत्वञ्च साक्षात्परम्परासाधारणम् । पुंस्त्वत्वे तृतीयसम्बन्धाभावान्नातिव्याप्तिः, 'पुंस्त्वविशिष्टो घटः' इत्येव बोधात् । यद्यपि जातेर्नामार्थत्वे 'जात्याख्यायाम्' इति सूत्रम्, 'सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्' इति भाष्यञ्च मानमस्ति तथापि पराभिमतां युक्तिमाह—लाघवेनेति । लाघवस्य गौरवसापेक्षत्वादाह—गौरवादिति—अनन्तव्यक्तिषु शक्तिकल्पने, जातौ शक्तेः शक्यतावच्छेदकत्वस्य च कल्पनागौरवादिति भावः । नच जातिशक्तिवादेऽपि गोत्वस्य शक्यत्वे तन्निष्ठशक्यतावच्छेदकं गोत्वत्वं वाच्यम्, गोत्वत्वञ्च 'गवेतरासमवेतत्वे सति

दर्पणव्याख्या

क्रमप्राप्तं नामार्थनिरूपणमित्याशयेनाह—❀ नामार्थमिति ❀ । ❀ जातिरिति ❀ तत्तत्पदार्थासाधारणो धर्म इत्यर्थः । तेनाभावत्वाकाशत्वादीनां नित्यानेकसमवेतत्वरूपजातित्वाभावेऽपि न क्षतिः । एतस्यैव शास्त्रे 'स्वार्थ' पदेन व्यवहारः । जातेः पदार्थत्वे मानन्तु—"जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" (पा० सू० १ । २ । ५९) इति सूत्रम्, "सवर्णेऽण्ग्रहणमपरिभाष्यम्, आकृतिग्रहणात् सिद्धम्" इति वार्त्तिकम्, "आकृतिं वाजप्यायनः" इति सरूपसूत्रस्थं भाष्यञ्च । युक्तिमप्याह—❀ लाघवेनेति ❀ एकाश्रयकशक्तेरेकस्या एव सम्भवादिति भावः ।

ननु शक्तिग्राहकशिरोमणिना व्यवहारेण व्यक्तावेव तत्परिच्छेदात् कथं जातौ तत्सिद्धिरत आह—❀ अनेकव्यक्तीनामिति ❀ पूर्वं व्यवहारेण व्यक्तौ शक्तिग्रहेऽप्यानन्त्यात् तावतीषु शक्तिग्रहासम्भवात्तत्तदाश्रयभेदभिन्ननानाशक्तिकल्पने गौरवात् पश्चाज्जातावेव निर्द्धार्य्यते इत्यर्थः ।

एकव्यक्तिविषयकशक्तिज्ञानादपरव्यक्तिविषयकशाब्दबोधाभ्युपगमे तु गोव्यक्तिविषयकशक्तिज्ञानादश्वविषयकबोधापत्त्या तद्व्यक्तिविषयकशक्तिज्ञानस्य तद्व्यक्तिविषयकबोधे हेतुताया अवश्यकल्प्यतयैकविषयकज्ञानादपरव्यक्तिबोधानुदयापत्त्या सकलव्यक्तिभानार्थं तावद्व्यक्तिषु शक्तिकल्पनायां गौरवस्य स्फुटतया जातावेव शक्तिकल्पनोचिता ।

SGDF Sarvajnik Digital Foundation

नच व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः, एवं हि एकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम्, जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवम्।

किञ्चैवं विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्यायाज्जातिरेव वाच्येति युक्तम्,

प्रभा

सकलगोसमवेतत्वरूपम्। तथाच तस्य व्यक्त्याद्यनेकपदार्थघटिततया अतिगौरवमिति वाच्यम्, तादात्म्येन गोत्वरूपाया जातेरेवं शक्यतावच्छेदकत्वात्, शब्दार्थयोस्तादात्म्याङ्गीकारे शब्दगतजातेर्गोत्वत्वस्याखण्डधर्मरूपत्वस्वीकारेण तस्यैवावच्छेदकत्वे गौरवाभावाच्च। किञ्च जातेः शक्यत्वे शक्तिनिरूपिकाया जातेरैक्येन शक्तेरेकत्वम्। ननु व्यक्तेः शक्यत्वेऽपि एकव्यक्तिनिरूपितैव शक्तिरस्तु। तथात्वेऽपि शक्तिनिरूपिकाया व्यक्तेरैक्येनैकैव शक्तिः सिद्ध्येदित्याह—नचेति—शक्तिनिरूपिकाया जातेः, प्रत्येकं व्यक्तेश्चैकत्वाद् विनिगमनाविरहात्=एकतरपक्षसाधिका युक्तिर्विनिगमना तस्या विरहात्=अभावाद् व्यक्तिरपि वाच्या स्यादिति भावः। ननु नात्र विनिगमनाविरहः, जातिशक्तिसाधकलाघवरूपविनिगमनायाः सत्त्वादित्याह—एवं हीति—यत्किञ्चिदेकव्यक्तिनिरूपितशक्तौ स्वीकृतायामपि व्यक्त्यन्तरस्य शाब्दबोधविषयतोपपत्तये लक्षणा स्वीकार्या। जातेः शक्यत्वेऽपि 'गामानय' इत्यादिव्यवहारस्य व्यक्तिविषयकतया व्यक्तिबोधाय लक्षणा स्वीकार्या इति लक्षणास्वीकारसाम्येऽपि जातिशक्तिवादे व्यक्तिबोधाय स्वा (जाति) श्रयत्वरूपः शक्यसम्बन्धः। व्यक्तिशक्तिवादे स्व (व्यक्ति) समवेता (जाति) श्रयत्वरूपः शक्यसम्बन्धः। 'शक्यसम्बन्ध एव लक्षणा' इति व्यक्तिशक्तिवादिनो लक्षणास्वरूपे गौरवम्, जातिशक्तिवादिनश्च लक्षणास्वरूपे लाघवरूपं विनिगमकमस्तीति भावः। 'शक्यसम्बन्धमूलिका लक्षणा' 'नतु शक्यसम्बन्धरूपा' इति मतेऽपि लक्षणाप्रयोजकसम्बन्धे लाघवं जातेः शक्यत्वे बोध्यम्।

नन्वेकव्यक्तिनिरूपिता शक्तिरिति मते एतद्व्यक्तिनिरूपिता शक्तिरुत व्यक्त्यन्तरनिरूपितेत्यत्र विनिगमनाविरहाद् जात्याश्रयत्वेन अनुगतीकृतासु सर्वासु व्यक्तिषु शक्तिरिति न लक्षणाऽवसरः, नाप्यानन्त्यादिदोष इत्यरुचेराह—किञ्चेति—जात्यानुगतीकृतासु व्यक्तिषु शक्तिरिति स्वीकारे जातिविशिष्टव्यक्तौ शक्तिरिति लभ्यते। तथाच विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वेनोपजीव्यत्वाद् विशेषणीभूतजातावेव शक्तिरुचिता। तदुक्तम्—'नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते' इति,

'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'। इति च।

दर्पणव्याख्या

यद्यपि 'गौर्गोपदवाच्यः' इति शक्तिग्रहो व्यक्तिविषयकोऽपि, तथापि 'सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यबाधे' इति न्यायेन जातावेव सत्तां परिच्छिनत्ति। यद्वा जातिविशेष्यक एव शक्तिग्रहः 'गौर्गोपदशक्यः' इति जातिशक्तिवाद एवमेवाभिलापात्। व्यक्तिभानस्य त्वग्रे उपपादयिष्यमाणत्वान्न तदनुपपत्तिरिति भावः।

❀ विनिगमनेति ❀ एकतरपक्षपातियुक्तिरूपेत्यर्थः। तथाचेयं व्यक्तिः शक्या, न जातिरित्येवं प्रत्येकव्यक्तिग्रहे विनिगमकाभावः। पूर्वत्र तु व्यक्तिसमुदायस्यैव कोटितया गौरवज्ञानस्यैव बाधकस्य विनिगमकत्वान्न तदभाव इति भावः। तत्पक्षेऽपि गौरवमेव बाधकमित्याह—❀ एवं हीत्यादि ❀।

ननु उक्तविनिगमनाविरहेण सर्वास्वपि व्यक्तिषु शक्तिसिद्धावशक्यव्यक्तेरभावेन न तज्ज्ञानाय व्यक्तिवृत्तिकल्पनेति व्यक्तिशक्तिवादपक्षो निर्दुष्टोऽत आह—❀ किञ्चैवमिति ❀। यद्वा ननु गोत्वादिजात्यनुगतीकृतयावद्व्यक्तिषु शक्तिस्वीकारान्नानन्त्यादिदोषोऽत आह—❀ किञ्चैवमिति ❀ एवम्=विशिष्टे शक्त्यभ्युपगमे। ❀ नागृहीतेति ❀ 'नागृहीतविशेषणा

व्यक्तिबोधस्तु लक्षणया। एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक्।

प्रभा

ननु जातिमात्रे शक्तौ व्यक्तिबोधो न स्यात्। नच 'दिवाऽभुञ्जानो देवदत्तः पीनः' इत्यत्र रात्रिभोजनवद् व्यक्तेराक्षेप इति वाच्यम्, प्रकृतिनिष्ठवृत्त्या अनुपस्थिततया 'गां ददाति' इत्यादौ व्यक्तौ प्रत्ययार्थकर्मत्वान्वयानुपपत्तेः, 'प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्' इति व्युत्पत्तेः। यथाकथञ्चिदुपस्थितार्थे प्रत्ययार्थान्वये 'घटं पश्यति' इत्यादौ शब्दाश्रयतया उपस्थिताकाशेऽपि दर्शनकर्मत्वान्वयापत्तेः। यदपि समानवित्तिवेद्यत्वमेवाक्षेप इति गुरवः। तथाचोक्तं तैरेव—"यावती हि जातिधीर्व्यक्तिं विषयीकरोति अतो जातिभासकसामग्र्या एव व्यक्तिभासकत्वम्।" इत्थञ्च जातिशक्तिज्ञानमेव जातिप्रकारकव्यक्तिविशेष्यकबोधं प्रति कारणमिति, तदपि न, 'गोत्वमस्ति' इत्यतो जातिविशिष्टव्यक्तिबोधापत्तेरित्यत आह—**व्यक्तिबोधस्त्विति**। **लक्षणयेति**—निरूढलक्षणयेत्यर्थः। एवञ्च 'गौरस्ति' इत्यादौ अन्वयानुपपत्त्यभावेऽपि न दोषः, निरूढलक्षणायां तदनपेक्षणात्। **एवञ्च** = लक्षणाङ्गीकारे च। **विभक्त्यर्थान्वय इति**—व्यक्तेः प्रकृतिनिष्ठलक्षणाऽऽख्यवृत्त्या उपस्थितत्वात् प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिविरोधाभावः।

ननु सर्वत्रैव गोपदाज्जातिव्यक्त्युभयविषयको बोधः सर्वसम्मतः। तदुपपत्तये युगपद्वृत्तिद्वयमङ्गीकार्यम्, तच्च न युक्तम्, युगपद्वृत्तिद्वयविरोधात्, इति चेन्न, 'गङ्गायां मीनघोषौ स्तः' इति वाक्यात् प्रवाहे मीनस्य, तटे घोषस्य चान्वयबोधस्य सर्वसम्मतत्वेन युगपद्वृत्तिद्वयविरोधे मानाभावात्, शक्तिः, तात्पर्याविषये लक्षणा च युगपन्नेत्येतत्तात्पर्यस्यैव तन्न्यायविषयत्वाच्च। प्रकृते तात्पर्यविषये एव लक्षणा इति न तन्न्यायविरोधः। 'गौरस्ति' इत्यत्र गोत्वस्यापि सत्तायामन्वयसम्भवेनान्वयानुपपत्तिरूपबीजाभावाल्लक्षणाया अभावेन व्यक्तिबोधानुपपत्तिरिति तु न युक्तम्, तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वात्। अन्यथा 'गङ्गायां घोषः' इत्यत्र घोषपदस्य मीने लक्षणाऽऽपत्तिः, तावताऽपि अन्वयानुपपत्तेः परिहारात्।

दर्पणव्याख्या

बुद्धिर्विशेष्यमधिगच्छति' इति न्यायशरीरम्। विशेषणाविषयकबुद्धिर्विशेष्यं नावगाहत इति तदर्थः, विशेष्यविषयकत्वस्य विशेषणविषयकत्वनियतत्वमिति यावत्। तथाच विशिष्टशक्तिवादे विशिष्टशक्तिग्रहस्य विशेषविषयकत्वावश्यकतया तदुभयविषयकत्वस्य पदार्थोपस्थित्यादिकारणतावच्छेदकत्वकल्पनापेक्षया विशेषणविषयकत्वमात्रस्यैव तदवच्छेदकत्वकल्पना लाघवादुचितेति जातावेव शक्तिः सिद्ध्यतीति भावः।

नन्वेवम् 'गां दद्यात्' 'व्रीहीनवहन्ति' इत्यादौ दानावहननकर्मत्वाद्यन्वयानुपपत्तिः, जातेस्तदन्वयायोग्यत्वादिति चेदत्र केचित्—जात्याऽऽक्षिप्तव्यक्तावेव दानादिकर्मत्वान्वय इति तन्न, 'प्रत्ययानाम्' इति व्युत्पत्तेरप्रकृत्यर्थव्यक्तौ तदन्वयासम्भवात्। तदुक्तम्—

'गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत्'॥ इति।

किञ्चायमाक्षेपोऽर्थापत्तिः, समानसंवित्संवेद्यत्वं वा। नाद्यः, अनुपपत्तिमन्तरेणापि 'गौरस्ति' इत्यतो गोत्वविशिष्टबोधात्। नान्त्यः, जातिविषयकशक्तिग्रहस्य विशिष्टविषयकबोधहेतुत्वाभ्युपगमेन जातिविषयताया व्यक्तिविषयतानैयत्यरूपो वाच्यः, अन्यस्यासम्भवात्। स च 'गोत्वमस्ति' इत्यत्र गोत्वविशिष्टाप्रत्ययाद् व्यभिचरित इत्युक्तानुपपत्तिर्दुर्वारैवेत्यत आह—❀ **व्यक्तिबोधस्त्विति** ❀। ❀ **लक्षणयेति** ❀ स्वशक्यगोत्वाश्रयत्वसम्बन्धरूपलक्षणयेत्यर्थः। तथाच पदवृत्तिजन्योपस्थितेरेव शाब्दबोधे हेतुतया व्यक्तेरशक्यत्वेऽपि लक्षणावृत्त्युपस्थितायां तस्यां नावघातादिकर्मत्वान्वयानुपपत्तिरिति भावः। ❀ **एवञ्चेति** ❀ लक्षणाभ्युपगमे चेत्यर्थः। ❀ **तत्र** ❀ लक्षितव्यक्तौ। ❀ **उपपद्यत इति** ❀ अन्यथा प्रत्ययानामिति व्युत्पत्तेः स नोपपद्येतेति भावः। ननु व्यक्तिलक्षणाभ्युपगमे युगपद्वृत्तिद्वयविरोध इति सिद्धान्तभङ्गः, गौरस्तीतिवाक्यादनुभूयमानव्यक्तिबोधानुपपत्तिश्च, लक्षणाबीजस्यान्वयानुपपत्तेस्तत्राभावादत आह—❀ **दिगिति** ❀।

SGDF Sri Gargeshwari Digital Foundation

यद्वा, केवलव्यक्तिरेव एकशब्दार्थः,

प्रभा

नचैवमपि गोशब्दात् गोत्वमात्रस्य भानासम्भवेन प्रातिपदिकार्थमात्रे विद्यमानप्रातिपदिकाभावात् प्रथमाया असिद्धिः, प्रातिपदिकनिष्ठजनकतानिरूपितोपस्थितिनिष्ठा या जन्यता तद्व्यापिका या विषयिता तत्प्रतियोगिनोऽर्थस्यैव प्रातिपदिकार्थमात्रपदेन ग्रहणाद् व्यक्तेरपि तथात्वेनादोषात्। अथवा मास्तु व्यक्तौ लक्षणा, केवलायां जातावसम्भवन्ती आनयनादिक्रिया व्यक्तिसाहित्येन निष्पादिता स्यात्। तदुक्तम्—'तद्धितार्थोत्तरपद' (पा० सू० २।१।५१) इति सूत्रे भाष्ये—'आकृतावालम्भनादीनां सम्भवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणादीनि क्रियन्ते' इति, 'अव्यतिरेकाद् द्रव्याऽऽकृत्योः' इति च। लक्ष्य—लक्ष्यतावच्छेदकयोरेकस्याः शक्यसम्बन्धरूपलक्षणाया असम्भवेन लक्ष्यतावच्छेदकज्ञानं प्रति लक्ष्यार्थोपस्थितिः कारणमितिवत् 'शक्यतावच्छेदकज्ञानं प्रति शक्यार्थोपस्थितिः कारणम्' इति कार्यकारणभावेनैव जातिबोधसम्भवे न तत्र शक्तिरित्याशङ्कायामाह—यद्वेति।

केवलव्यक्तिरेवेति—एवेन जातिर्व्यावर्त्यते। केवलपदेनैव तद्व्यावृत्तिसिद्धौ 'एव' पदं स्पष्टार्थम्। जातिविशिष्टव्यक्तौ शक्तिरिति मते 'तत्तज्जातिप्रकारकतदाश्रयविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति तज्जा-

दर्पणव्याख्या

तदर्थस्तु सति तात्पर्य्ये 'गङ्गायां घोषमत्स्यौ स्तः' इत्यत्र वृत्तिद्वयस्य सर्वैरेवाभ्युपगमात्तादृशन्यायः, युगपच्छक्तिस्तात्पर्याविषये लक्षणा च नेत्येवंपर इति न तद्विरोधः। तात्पर्यानुपपत्तिसत्त्वाच्च न व्यक्तिलक्षणाऽनुपपत्तिः, तद्विरोधाभ्युपगमे तु जातिव्यक्त्योरभेदपक्षमुपगम्य विभक्त्यर्थान्वय उपपाद्यः। तदुक्तम्—

'तेन तल्लक्षितव्यक्तेः क्रियासम्बन्धचोदनात्।
जातिव्यक्त्योरभेदो वा वाक्यार्थेषु व्यवस्थितः'॥ इति।

वस्तुतस्तु जातिधर्मिकशक्तिग्रहस्य जातिविशिष्टव्यक्तिशाब्दबोधे हेतुत्वकल्पनान्न व्यक्तिभानानुपपत्तिः, नाप्यशक्यभानाऽऽपत्तिः, तस्य तद्वैशिष्ट्याभावादिति जातिशक्तिवादनिष्कर्षः। वक्ष्यते चाधिकमुपरिष्टात्।

अन्ये तु जातिशक्तिवादमित्थमुपपादयामासुः—माऽस्तु व्यक्तेर्भानम्, आनयनादिक्रिया केवलायां जातावसम्भवन्ती व्यक्तिसाहित्येन निष्पाद्यते, समाहारे पाणिपादसाहित्येन वादनक्रियावत्। तदुक्तम्—"तद्धितार्थे" (पा० सू० २।१।५१) इति सूत्रे भाष्ये—"आकृतावालम्भनादीनां सम्भवो नास्तीति कृत्वा तत्सहचरिते द्रव्ये भविष्यति यथा—'अग्निरानीयताम्' इत्युक्ते केवलस्याग्नेरानयनासम्भवादचोदितमपि पात्रमानीयते। एतदेवाग्नेरानयनं यत्पात्रस्थस्य। तथाऽऽकृतावालम्भनादीनि चोद्यमानानि सामर्थ्यात् साहचर्य्याद् द्रव्यमभिनिविशन्ते। सर्व एवाऽऽकृतेर्योगोऽन्तर्भावितद्रव्याया इति द्रव्यद्वारकः सम्बन्धः सम्पद्यते" इति। साहचर्य्यम् = सम्बन्धः। सरूपसूत्रे भाष्येऽपि स्फुटोऽयमर्थः। हरिरप्याह—

व्यक्तौ कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते। इति।

गोत्वादिपदानां तु गोत्वादिधर्मिवृत्तिधर्म एव शक्तिरिति न तत्र गोविशेष्यको बोधः। जातेराश्रयावियोगेऽपि केवलायास्तस्याः शब्दवाच्यत्वं नानुपपन्नम्, जलादौ दृश्यमानस्य मुखस्य स्वस्थानावियोगेऽपि मुखादिपदबोध्यवत्। शक्यतावच्छेदकता तु जातिगतधर्मस्यैवेति।

इदमपि मतं जात्या व्यक्त्याक्षेपे पर्य्यवस्यति। तच्च नचापदार्थे प्रत्ययान्वय इति दूषणग्रस्तम्। विनापि सङ्केतविषयतां सामान्येन सम्बन्धनियमादर्थाध्याहारन्यायेनोपस्थितां व्यक्तिं पुनर्जातिविशिनष्टि, रूपादिज्ञानाविषयाणां चक्षुरादीनां चाक्षुषयामीति प्रतीत्या विषयीकरणवदित्यपि केचित्।

शक्यसम्बन्धरूपाया लक्षणाया एकस्या लक्ष्य-लक्ष्यतावच्छेदकयोरसम्भवेऽपि लक्ष्यार्थप्रतीतौ लक्ष्यताऽवच्छेदकभानवच्छक्यतावच्छेदके शक्त्यभावेऽपि तादृशकार्य्यकारणभावलादेव गोत्वादिभाननिर्वाहे कृतं तत्र शक्तिकल्पनयेत्याशयेनैकपदमन्यथा व्याचष्टे—❀ यद्वेति ❀ ❀ व्यक्तिरेवेति ❀ एवेन जातिव्यवच्छेदः।

SGDF Sri Gargeshwari Digital Foundation

केवलव्यक्तिपक्षे एवाण्ग्रहणस्य, एकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात्। युक्तञ्चैतत्—व्यवहारेण व्यक्तावेव तद्ग्रहणात्। सम्बन्धितावच्छेदकस्य (सम्बन्धितावच्छेदिकायाः) जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि।

नचैवं घटत्वमपि वाच्यं स्यात्, शक्यतावच्छेदकत्वात्, तथाच 'नागृहीतविशेषण'न्यायात्

प्रभा

त्यवच्छिन्नविशेष्यताकशक्तिज्ञानस्य कारणत्वेन 'अ' इत्यादिपदेनैव अत्वजात्यवच्छिन्नसकलव्यक्तिभानसम्भवेन 'अणुदित्सवर्णस्य' इति सूत्रेऽण्ग्रहणस्य वैयर्थ्यापत्तिः। केवलजातिशक्तिवादेऽपि जातिशक्तिज्ञानस्यैव विशिष्टबोधे कारणतया, लक्षणया, अव्यतिरेकेण (अविनाभावेन) वा व्यक्तिबोधसम्भवेऽण्ग्रहणवैयर्थ्यं तदवस्थमेवेत्याह—केवलव्यक्तिपक्ष एवेति—अण्ग्रहणस्य, सरूपसूत्रेणैकशेषस्य चारम्भेणेत्यर्थः। तस्यापीति—'व्यक्तिमात्रं शक्यार्थः' इति पक्षस्यापीत्यर्थः। अण्ग्रहणस्य भाष्यकृता प्रत्याख्यानात् सरूपसूत्रस्य च शास्त्रीयप्रक्रियामात्रोपयोगित्वस्याकरे सिद्धान्तितत्वात्तयोः प्रामाण्यासङ्गतिरित्यत आह—युक्तमिति—सयुक्तिकमित्यर्थः। एतदिति—व्यक्तिरेवैकशब्दार्थ इति मतमित्यर्थः। व्यवहारेणेति—'गामानय' इति वाक्यप्रयोगानन्तरं प्रयोज्यवृद्धस्य गवानयनेन प्रवृत्तिदर्शनात् व्यक्तावेव शक्तिर्गृह्यते इत्यर्थः।

ननु व्यक्तौ गृहीताऽपि शक्तिर्लाघवादग्रे बाधिता स्यादिति चेन्न, बाधो नाम—अप्रामाण्यज्ञानम्। चन्द्रमण्डलादिप्रमाणं पूर्वमिन्द्रियेण गृहीतमपि ज्योतिःशास्त्रेण बाध्यते, नतु लाघवेनेत्यदोषात्। पूर्वं जातस्य लाघवमात्रेण बाधायोगात्, 'निषादस्थपतिं याजयेत्' इत्यादौ पूर्वं जातस्यापि कर्मधारयनिश्चयस्यापूर्वविद्याकल्पनभिया बाधापत्तेश्च, व्यक्तौ शक्तिबाधे 'गां दद्यात्' इत्यत्रानुपपत्तिः, गोत्वादेर्दानाद्यसम्भवात्। लक्षणया तु न निर्वाहः, व्यक्त्यन्तरे शक्यसम्बन्धाग्रहात्। ननु व्यक्तीनामानन्त्यात् शक्त्यानन्त्यप्रसङ्ग इत्याशङ्कामपाकुर्वन्नाह—सम्बन्धितावच्छेदकस्येति—शक्यतावच्छेदकस्येत्यर्थः। विशेष्यभूताया जातेः स्त्रीत्वेऽपि 'दृढं भक्तिः' इतिवत् 'सामान्ये नपुंसकम्' इति नपुंसकनिर्देशः। क्वचित् 'सम्बन्धितावच्छेदिकायाः' इत्येव पाठः। शक्तिरप्येकैवेति—शक्यतावच्छेदकभेदे एव शक्तेर्भेद इति भावः। ननु गोत्वादेः शक्यतावच्छेदकत्वे शक्यत्वे सति शक्यविशेषणस्यैव शक्यतावच्छेदकत्वनियमेन गोत्वादिकमपि शक्यं स्यादित्याशङ्कां निराकुर्वन्नाह—नचेति। एवम् = जातेः शक्यतावच्छेदकत्वे। तथाच = जातेः शक्यत्वे च। विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वेनोपजीव्यत्वात् 'नागृहीत' इति न्यायात्।

दर्पणव्याख्या

ननु 'सवर्णेऽण्ग्रहणम्' इत्यादिप्रामाण्यादस्तूक्तः पक्षः, 'व्यक्तिः पदार्थः' इत्यत्र तु किम्मानमत आह—❀ केवलव्यक्तीति ❀। ❀ एकशेषस्य चेति ❀ जातिपक्षे एकेनैव शब्देन द्वयोर्बहूनां वा प्रत्यायनसम्भवात् तदनर्थकं सद् व्यक्तिपक्षज्ञापकमित्यर्थः। अण्ग्रहणस्य भाष्यकृता प्रत्याख्यानात् सरूपसूत्रस्य च शास्त्रीयप्रक्रियामात्रोपयोगित्वस्याऽऽकरे व्यवस्थापनात् कथमुक्तार्थे तयोः प्रामाण्यमत आह—❀ युक्तञ्चैतदिति ❀ सयुक्तिकमप्येतदित्यर्थः। अपिना 'द्रव्याभिधानं व्याडिः' इति सरूपसूत्रस्थभाष्यप्रामाण्यं समुच्चीयते। युक्तिमेवाह—❀ व्यवहारेणेति ❀।

एतत्तत्त्वं शक्तिवादे वक्ष्यते। एतत्कल्पे पूर्वोक्तं शक्त्याऽऽनन्त्यदोषं समुद्धरति—❀ सम्बन्धितावच्छेदकस्येति ❀ शक्तिग्रहे धर्म्मितावच्छेदकस्येत्यर्थः। सम्बन्धितावच्छेदकपदस्य लिङ्गसर्वनामनपुंसकत्वादुद्देश्यसमर्पकत्वाद्वा न तत्त्वानुपपत्तिः। तथाच सम्बन्धितावच्छेदकजात्यनुगतीकृतनानाव्यक्तिष्वेकधर्मावच्छिन्नाया एकस्या एव शक्तेरुपगमान्न तन्नानात्वप्रयुक्तगौरवमिति भावः।

❀ एवमिति ❀ विशिष्टे शक्तित्वस्वीकारे इत्यर्थः। घटत्वादेर्घटादिनिष्ठशक्यतावच्छेदकत्वाभ्युपगम इति यावत्

तदेव वाच्यमस्त्विति शङ्क्यम्, अकारणत्वेऽपि कारणतावच्छेदकत्ववत्, अलक्ष्येऽपि लक्ष्यतावच्छेदकत्ववत्तथात्रापि सम्भवात्। उक्तञ्च—

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो नच व्यभिचरिष्यति॥ इति।

प्रभा

तदेव = घटत्वादिरूपशक्यतावच्छेदकमेव वाच्यमस्त्विति भावः। एवकारेण व्यक्तेर्व्यवच्छेदः। शक्यतावच्छेदकीभूतधर्मस्य शक्यतां विना अवच्छेदकत्वानुपपत्तेः पदार्थोपस्थितिम्प्रति जाति—व्यक्त्युभयविषयकशक्तिज्ञानत्वेन कारणत्वकल्पनापेक्षया प्रवृत्तिनिमित्तविषयकशक्तिज्ञानत्वेन कारणत्वे लाघवमिति भावः। अकारणत्वेऽपीति—दण्डत्वस्यान्यथासिद्धत्वेन घटं प्रत्यकारणत्वेऽपि यथा कारणतावच्छेदकत्वम्। तटत्वतटयोरेकविधशक्यसम्बन्धरूपाया लक्षणाया असम्भवेन तटत्वस्यालक्ष्यत्वेऽपि लक्ष्यतावच्छेदकत्वं यथाऽङ्गीक्रियते तथाऽत्रापि घटत्वादेरशक्यत्वेऽपि शक्यतावच्छेदकं स्यादिति भावः। उक्तञ्चेति—हरिणेति शेषः।

आनन्त्येऽपीति—भावानाम् = व्यक्तीनामानन्त्येऽपि एकम् = जातिरूपं धर्ममुपलक्षणं कृत्वा सुकरसम्बन्धः = सुकरशक्तिग्रहः शब्दः। सम्बन्धपदं शक्तिग्रहपरम्। नच व्यभिचरिष्यति = नासम्बद्धां व्यक्तिं बोधयिष्यति। तद्धर्मप्रकारकोपस्थितिम्प्रति तद्धर्मावच्छिन्ननिरूपितशक्तिमच्छब्दज्ञानं कारणमिति कार्य्यकारणभावेन पदार्थोपस्थितिनिष्ठकार्यतानिरूपिता या तद्धर्मावच्छिन्ननिरूपितशक्तिमच्छब्दज्ञाननिष्ठा कारणता तन्निरूपिता या शक्त्यवच्छिन्ना शब्दनिष्ठा कारणतावच्छेदकता तस्या न व्यभिचरिष्यतीति यावत्। ननु जातौ शक्तिरिति, व्यक्तौ शक्तिरिति च पक्षद्वयमप्यनुपपन्नम्। तथाहि—जातौ शक्तिरिति पक्षे जातिविशिष्टव्यक्तिविषयकोपस्थितिम्प्रति जातिशक्तिज्ञानस्य कारणत्वं वाच्यम्, तथाच 'गोत्वपदं गोत्वे शक्तम्' इति शक्तिज्ञानस्यापि जातिशक्तिज्ञानरूपत्वेन ततोऽपि गोत्वविशिष्टगवबोधापत्तिः। नच किञ्चिद्धर्मानवच्छिन्नजातिनिष्ठविषयताकशक्तिज्ञानं जातिविशिष्टव्यक्तिबुद्धौ कारणमिति कल्प्यते। उक्तशक्तिग्रहे तु जातिनिष्ठा विषयता गोत्वत्वावच्छिन्नैव, उल्लिख्यमानजातेः येन केनापि रूपेण भाननियमादिति वाच्यम्।

तथाहि—गोपदस्य जातावेव शक्तौ 'गां दद्यात्' 'व्रीहीनवहन्ति' इत्यादितो दानादौ जातेरन्वयायोग्यत्वेन शाब्दबोधानुपपत्तिः। नच जात्याक्षिप्तव्यक्तेस्तत्रान्वयान्नानुपपत्तिरिति वाच्यम्, 'प्रकृतिनिष्ठवृत्त्युपस्थापितार्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्' इति व्युत्पत्त्याऽऽक्षिप्तव्यक्तेर्विभक्त्यर्थकर्मत्वादावन्वयानुपपत्ते-

दर्पणव्याख्या

❀ तदेव ❀ घटत्वाद्येव ❀ वाच्यम् ❀ शक्यमित्यर्थः। शक्यत्वे हेतूपन्यसनम्—❀ न्यायादिति ❀। ❀ अकारणत्वेऽपीति ❀ दण्डत्वाऽऽदीनामन्यथासिद्धत्वेनाकारणत्वेऽपि तीरत्वादीनां प्रवाहाद्यसम्बन्धितया लक्ष्यत्वेऽपि च तत्र तन्निष्ठावच्छेद्यतानिरूपितस्वरूपसम्बन्धाऽऽत्मिकायाः, विषयिताविशेषाऽऽत्मिकाया वावच्छेदकताया अभ्युपगमवदशक्यस्यापि घटत्वादेस्तादृशशक्यतावच्छेदकत्वसम्भवात्। शक्यत्वे सति शक्यविशेषणताऽऽपन्नस्य शक्यतावच्छेदकत्वमिति नियमे मानाभावादिति भावः।

उक्तेऽर्थे सम्मतिमाह—❀ उक्तञ्चेति ❀। ❀ आनन्त्येऽपीति ❀ ❀ भावानाम् ❀ = व्यक्तीनां नानात्वादपरिच्छेद्यत्वेऽपि, ❀ एकम् ❀ अनुगतजात्यादिधर्मम् ❀ उपलक्षणम् ❀ अशक्यत्वेऽपि शक्यव्यावर्त्तकम् ❀ कृत्वा ❀ अभ्युपगम्य शक्यतावच्छेदकतयाऽभ्युपेत्येति यावत् ❀ शब्दः ❀ गवाद्यात्मकः ❀ सुकरसम्बन्धः ❀ सुग्राह्यगवादिनिष्ठवाच्यतासम्बन्धः। ❀ नचेति ❀ शक्तिग्रहाविषयव्यक्तिं न बोधयिष्यतीति तदर्थः। गोत्वादिसामान्यलक्षणया सर्वास्वेव व्यक्तिषु

SGDF

प्रभा

स्तादवस्थ्यात्। तदुक्तं वाक्यपदीये—

गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत्॥ इति।

यथा धूमेनाक्षिप्तवह्न्यभिप्रायेण 'वह्निर्ज्वलति' इत्यर्थे 'धूमोऽयं ज्वलति' इति न प्रयुज्यते। तथा गोत्वेनाक्षिप्तव्यक्तेर्दानादावन्वयो न स्यादिति भावः।

किञ्चात्राक्षेपोऽर्थापत्तिरूपः, समानसंवित्संवेद्यत्वरूपो वा? नाद्यः, उपपाद्यज्ञानेनोपपादककल्पनारूपैवार्थापत्तिः। उपपाद्यत्वञ्च 'तदभावव्यापकीभूताभावप्रतियोगित्वरूपम्'। तदभावव्याप्यीभूताभावप्रतियोगित्वरूपञ्चोपपादकत्वम्। यथा पीनत्वम् उपपाद्यम्=साध्यमिति यावत्। रात्रिभोजनम् उपपादकम्=साधकमिति यावत्। यथा दिवाऽभुञ्जानत्वसमानाधिकरणरात्रिभोजनाभावव्यापकीभूतः पीनत्वाभावस्तत्प्रतियोगित्वमुपपाद्ये पीनत्वे। एवं पीनत्वाभावव्याप्यीभूतो दिवाऽभुञ्जानत्वसमानाधिकरणरात्रिभोजनाभावस्तत्प्रतियोगित्वमुपपादके रात्रिभोजने। प्रकृते व्यक्तिज्ञानेन विना जातिज्ञानं नोपपद्यते इति जातिज्ञानमुपपाद्यम् व्यक्तिज्ञानञ्चोपपादकं वाच्यम्। तच्चात्र नैयत्वं न सम्भवति, व्यक्तिज्ञानमन्तरेणापि 'गोत्वमस्ति' इति वाक्यतो जातिज्ञानसम्भवात्। जातिसत्ताया व्यक्तिसत्तासापेक्षत्वेऽपि जातिज्ञाने व्यक्तिज्ञानानपेक्षणात्।

नान्त्यः, जातेर्हि व्यक्तिसमानसंवित्संवेद्यता यदि स्यात्तदा जातिभासकजातिशक्तिग्रहरूपसामग्र्या व्यक्तिभानं स्यात्, जातिविषयताया व्यक्तिविषयतानियतत्वात्। तन्नियतत्वञ्च न सम्भवति, 'गोत्वमस्ति' इति वाक्यजन्यप्रत्यये जातिविषयतायाः सत्त्वेऽपि गोत्वविशिष्टव्यक्तेरबोधेन व्यभिचारात्। जातिविषयकशक्तिज्ञानस्य व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधाभाववति वृत्तित्वादिति यावत्। समानसंवित्संवेद्यत्वमित्यस्य जातिसम्बन्धिनी या व्यक्तिस्तस्याः समाना=एका संवित्=संविद्यतेऽनयेति करणे क्विपि संवेदन (ज्ञान) सामग्री। जातिभासकजातिशक्तिज्ञानरूपा तया जन्यं यज्ज्ञानं जातिविषयकशाब्दबोधरूपं तद्विषयत्वं व्यक्तेरपि, व्यक्तिविशेष्यकजातिप्रकारकबोधं प्रति जातिविषयकशक्तिज्ञानत्वेन हेतुत्वादिति तत्त्वम्। तच्च न उक्तस्थले, व्यभिचारादिति भावः।

दर्पणव्याख्या

शक्त्यवधारणादिति भावः। अधिकमग्रे वक्ष्यते।

व्यक्तिरेवात्र द्रव्यपदेन व्यवह्रियते, सर्वनामपरामर्शयोग्यत्वात्। उक्तञ्च—

'वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः'। इति।

स्वभावादेव बुद्धिविषयताऽवच्छेदकत्वोपलक्षिततद्धर्मावच्छिन्नबोधकं सर्वनाम यस्मिन् धर्मिणि तादृशधर्मं प्रवृत्तिनिमित्तीकृत्य प्रयुज्यते। 'इदम्' 'तत्' इति परामर्शयोग्यमिति यावत्। द्रव्यपदेन व्यवह्रियत इत्यर्थः। भेद्यत्वेन=विशेष्यत्वेनेत्यादि तु लक्षणान्तरपरम्, एतत्पक्षे तु जात्यादेरपि विशेष्यत्वविवक्षायां द्रव्यत्वमिष्टमेव। तिङन्तार्थक्रियायाः किमादिभिः परामर्शात् स्तोकाद्यर्थनिरूपितविशेष्यतावत्त्वाच्च द्रव्यत्वमस्त्येव। "विप्रतिषिद्धम्" (पा० सू० २ ४ । १३) इत्यादौ च सामर्थ्यात्तन्त्रान्तरप्रसिद्धद्रव्यग्रहणम्। "चादयोऽसत्त्वे" (पा० सू० १ । ४ । ५७) इत्यत्र प्रथमकल्पोक्तद्रव्यस्यैव पर्युदासो बोध्यः।

शक्यतावच्छेदकत्वञ्च—शक्यनिष्ठविशेष्यताऽवच्छेदकतया भासमानत्वम्। घटादिपदे शक्तिग्रहे च घटत्वादेरेव तत्त्वम्, न पृथिवीत्वादेरिति न तेभ्यः पृथिवीत्वादिबोधः। आकाशशब्दस्य शब्दाऽश्रयत्वे शक्त्यभावेऽपि ततस्तद्रूपेणैव बोधः, तद्विशिष्टशक्तिग्रहस्य तद्बोधहेतुत्वात्। यद्वाऽऽकाशत्वमखण्डोपाधिः। वृद्धिसूत्रोक्तरीत्या तत्पदं वाऽऽकाशशब्दशक्यतावच्छेदकमिति न 'आकाशः शब्दाश्रयः' इति प्रयोगानुपपत्तिरिति द्रव्यवादनिष्कर्षः।

SGDF Gurgaon Digital Foundation

प्रभा

किञ्च जातिशक्तिवादिनये गोशब्दवद् गोत्वादिशब्दाद् गोत्वविशिष्टबोधापत्तिः, विशिष्टबोधौपयिकस्य जातिशक्तिग्रहस्य सत्त्वात्। नच निर्धर्मितावच्छेदकशक्तिग्रहः स्वरूपतो गोत्वविशिष्टबोधे हेतुः, गोत्वत्वधर्मितावच्छेदककशक्तिग्रहश्च गोत्वत्वेन गोत्वोपस्थितौ तत्त्वेन गोत्वविशिष्टशाब्दबोधे च कारणमिति न गोत्वपदात्स्वरूपतो गोत्वविशिष्टबोधापत्तिरिति वाच्यम्, 'गोत्वत्वेन गोत्वं न गोत्वपदशक्यम्' इति बाधग्रहकाले गोत्वपदेऽपि निर्धर्मितावच्छेदककशक्तिग्रहसम्भवेन गोत्वपदात् तत्र स्वरूपतो विशिष्टबोधापत्त्या गोत्वपदेऽपि गोत्वत्वधर्मितावच्छेदककशक्तिग्रहस्यापि स्वरूपतो गोत्वप्रकारकबोधं प्रति हेतुताया आवश्यकत्वात्। बाधग्रहकाले च तादृशशक्तिग्रहाभावेन स्वरूपतो गोत्वविशिष्टबोधापत्तिः।

यदि च बाधग्रहकाले निर्धर्मिता वच्छेदकक एव न शक्तिग्रहः, किन्तु शक्तिसम्बन्धेन गोत्वप्रकारकं गोपदत्वविशिष्टविषयकं यत् 'गौरित्याकारकं गोपदम्' इति शक्तिज्ञानं तद् स्वरूपतो गोत्वविशिष्टबोधे कारणम् इति कार्य्यकारणभावस्वीकारे बाधग्रहकालिकस्य शक्तिसम्बन्धेन गोत्वप्रकारकस्य गोत्वपदत्वविशिष्टविषयकस्य शक्तिग्रहस्य गोपदत्वविशिष्टविषयकत्वाभावेन न गोत्वपदाद्विशिष्टबोधापत्तिरित्युच्यते तदा गोशब्दस्य गोत्वमात्रे शक्तिस्वीकारे ततः कदाचित्समवायेन गोत्वविशिष्टस्य, कदाचित्कालिकादिना गोत्वविशिष्टस्य बोध इति व्यवस्थानुपपत्तिः, उभयविधबोधकारणीभूतस्य गोत्वविषयकशक्तिज्ञानस्य सत्त्वात्। गोत्वविशिष्टव्यक्तौ शक्तिरिति वादे तु समवायेन गोत्वविशिष्टविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति समवायेन गोत्वविशिष्टविषयकशक्तिज्ञानम्, कालिकादिना गोत्वविशिष्टविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति कालिकादिना गोत्वविशिष्टविषयकशक्तिज्ञानं कारणमिति कार्य्यकारणभावग्रहस्य हेतुतया नोक्तव्यवस्थानुपपत्तिः। 'गोत्वपदं गोत्वम्' इत्याकारकशक्तिग्रहात् स्वरूपतो गोत्वप्रकारकबोधाननुभवाद् गोत्वादिपदानां गोत्वत्वे शक्तिरित्यपि न, प्रकृतिजन्यबोधे प्रकारीभूतार्थे भावार्थकत्वतलादिविधानेन गोत्वशब्दाद्धितस्य त्वप्रत्ययस्य गवेतरासमवेतत्वसमानाधिकरणसकलगोसमवेतत्वरूपगोत्वत्वार्थकत्वे गौरवापत्त्या लाघवमूलकस्य जाति शक्तिवादस्य सिद्धान्तस्य भङ्गापत्तेः।

एवं केवलव्यक्तिवादोऽपि न विचारसहः, सकलपदानां व्यक्तिमात्रबोधकतया 'गौश्चलो नीलः' इत्यादौ पुनरुक्तिभिया सहप्रयोगानुपपत्तेरित्यन्यत्र विस्तरः।

दर्पणव्याख्या

ननूक्तपक्षद्वयमपि न विचारसहम्, तथाहि—जातिशक्तिवादे गोत्वादिपदात्तद्विशिष्टबोधापत्तिः, गोत्वशक्तिग्रहस्य तद्विशिष्टबोधौपयिकस्य सत्त्वात्। नच निर्धर्मितावच्छेदकशक्तिग्रहो गोत्वविशिष्टबोधे हेतुर्गोत्वत्वधर्मितावच्छेदकशक्तिग्रहश्च गोत्वत्वेन तदुपस्थितौ शाब्दबोधे च हेतुरिति वाच्यम्, गोत्वं न गोपदशक्यमिति गोत्वत्वधर्मितावच्छेदकबाधग्रहकाले निर्धर्मितावच्छेदकशक्तिग्रहसम्भवेन गोत्वविशिष्टबोधापत्त्या गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य तादृशबोधहेतुताया आवश्यकत्वात्।

यदि च गोत्वे निरवच्छिन्नैव शक्तिः—गोपदं गौरित्याकारकं शक्तिसम्बन्धेन गोत्वप्रकारकं गोपदत्वविशिष्टविषयकं शक्तिज्ञानं गोत्वविशिष्टबोधहेतुरिति विभाव्यते, तथापि कदाचित् समवायेन गोत्वविशिष्टबोधः, कदाचित् कालिकादिसम्बन्धेनेति व्यवस्थाऽनुपपत्तिः, गोत्वविषयकशक्तिज्ञानस्याविशिष्टत्वात्। मन्मते तु समवायेन गोत्वविशिष्टविषयकशाब्दबुद्धिं प्रति तेन सम्बन्धेन गोत्वविशिष्टशक्तिग्रहस्य, एवमितरसम्बन्धेन तादृशविशिष्टविषयबोधे तेन सम्बन्धेन तादृशविशिष्टशक्तिज्ञानस्य हेतुतया तन्नियमोपपत्तेः। गोपदं गौरित्याकारकशक्तिग्रहात्, तादृशबोधाननुभवाच्च गोत्वादिपदानां गोत्वत्वे शक्तिरित्यपि न, प्रकृतिजन्यबोधप्रकारे भावप्रत्ययविधानात्। गवेतरासमवेतत्वविशिष्टसकलगोसमवेतत्वरूपस्य गुरोः शक्यत्वाऽभ्युपगमे, लाघवमूलकाकृतिवादस्य मूलशैथिल्यापत्तेश्च। व्यक्तिवादेऽपि पदमात्रस्यैव व्यक्तिबोधकत्वाविशेषत्वात्। 'गौश्चलो

वस्तुतस्तु "नह्याकृतिपदार्थस्य द्रव्यं न पदार्थः" इति ।

भाष्याद् विशिष्टं वाच्यम् ।

प्रभा

विशिष्टशक्तिवादे तु समवायेन गोत्वविशिष्टविषयकं शक्तिज्ञानं समवायेन गोत्वप्रकारकबोधे, कालिकेन गोत्वविशिष्टविषयकशक्तिज्ञानं कालिकेन गोत्वविशिष्टबोधे च कारणमिति व्यवस्था सम्भवति । किञ्च केवलव्यक्तिवादोऽपि न युक्तः, 'गौः शुक्लः चलो डित्थः' इति सहप्रयोगानुपपत्तेः, चलशुक्लादिशब्देनैव व्यक्तेर्बोधात् । नच गोपदस्य गोत्वं शक्यतावच्छेदकं शुक्लपदस्य शुक्लत्वमिति शक्यतावच्छेदकभेदात् सहप्रयोगो नानुपपन्न इति वाच्यम् , अशक्यस्य शक्यतावच्छेदकत्वायोगात् ,अन्यथा द्रव्यत्वादेरपि गोपदशक्यतावच्छेदकत्वापत्तेः । किञ्च यस्मिन् हस्तिपके हस्तिनः सम्बन्धो गृहीतस्तस्यैव हस्तिपकस्य हस्तिनि दृष्टे स्मरणं जायते, नतु हस्तिपकान्तरस्येति सर्वानुभवसिद्धम् । एवञ्च तद्व्यक्तिविषयकस्मृतौ तद्व्यक्तिविषयकसम्बन्धज्ञानं कारणमिति कार्य्यकारणभावो वाच्य इति यत्किञ्चिद्व्यक्तौ सम्बन्धग्रहाद् व्यक्त्यन्तरस्य बोधानापत्तिस्तत्र सम्बन्धग्रहाभावादतो विशिष्टशक्तिवादपक्ष एव ज्यायानित्याह—वस्तुतस्त्विति । विशिष्टमिति— जातिविशिष्टं द्रव्यम्, द्रव्यविशिष्टा जातिर्वा । मूले सामान्ये नपुंसकम् । यद्यपि सरूपसूत्रे भाष्ये 'नह्याकृतिः पदार्थस्य द्रव्यं न पदार्थः, द्रव्यपदार्थस्याकृतिर्न पदार्थ इत्युभयोरुभयं पदार्थ इत्युक्त्या जातिव्यक्त्योः पृथगेव वाच्यता लभ्यते, तथापि कस्यचित् किञ्चिद्गुणभूतम् , किञ्चित्प्रधानमिति भाष्योक्त्या विशिष्टशक्तावेव भाष्यतात्पर्यं प्रतीयते । यदि विशकलितयोर्जातिव्यक्त्योः शक्यत्वं स्यात्तदा गोपदात् 'गोत्वम्' इत्याकारकनिर्विकल्पकस्मरणापत्तिस्स्यात्, अनुभव-स्मरणयोः समानविषयताकत्वनियमात् । तत्र यदि जातेः प्राधान्यविवक्षा तदा द्रव्यगते द्वित्व—

दर्पणव्याख्या

नीलः' इत्यादीनां सह प्रयोगानुपपत्तिः ।

किञ्च हस्तिपकव्यक्त्यन्तरे सम्बन्धग्रहे यत्र हस्तिपके सम्बन्धो न गृहीतस्तस्यापि हस्तिदर्शने स्मरणापत्त्या तद्व्यक्तिविषयकसम्बन्धग्रहस्य तदुपस्थितिनियामकत्वस्यावश्यकतया कथमेकविषयकशक्तिज्ञानादपरविषयकोपस्थितिः । सामान्यलक्षणा त्वापातरमणीयैवेत्यभिप्रायवानाह—❀ वस्तुतस्त्विति ❀ । ❀ विशिष्टमिति ❀ जातिविशिष्टा व्यक्तिः, व्यक्तिविशिष्टा जातिर्वेत्यर्थः ।

यद्यपि "आकृतिपदार्थस्य द्रव्यं न पदार्थो द्रव्यपदार्थकस्य चाकृतिर्न पदार्थ इत्युभयोरुभयं पदार्थः" इति भाष्याद्विशकलितयोरेवाकृतिव्यक्त्योः शक्तिग्रहविषयता लभ्यते । तथापि "कस्यचित् किञ्चिद्गुणभूतं किञ्चित् प्रधानम्" इत्युत्तरभाष्यपर्यालोचनया तत एव विशिष्टे शक्त्यवधारणात् तथोपादानमविरुद्धम् , अन्यथा तृतीयोपात्तैकत्व—करणत्वयोरिव विशेष्यविशेषणभावानापन्नजाति—व्यक्त्योः शक्यत्वे गोर्यद् गोत्वं व्यक्तिश्चेति समूहालम्बनबोधापत्तेः शक्तिज्ञानपदार्थोपस्थिति शाब्दबोधानां समानप्रकारत्वनियमात् ।

एवमेवावयवसंयोगरूपाकृतौ । तथाच सूत्रितं गौतमेन "जात्याकृतिव्यक्तयः पदार्थः" इति त्रिष्वेकैव शक्तिरिति बोधनाय च तत्रैकवचनम् , गुणभूतमिति भाष्यस्य च स्वारसिकतयेति शेषः । जातेः कदाचित् प्राधान्येन भानं तु तात्पर्यग्रहसापेक्षमिति तदाशयः । जातेः प्राधान्येऽपि द्रव्यसंख्यामादाय तत्र द्विवचनाद्युपपत्तिर्बोध्या । तदुक्तं कैयटेन—"यथा 'भवतः' इत्यादौ क्रियाप्राधान्येऽपि साधनकृतो वचनभेदः, एवमाकृतिप्राधान्येऽपि द्रव्यसङ्ख्याकृत इत्यदोषः" इति । द्रव्यप्राधान्येऽपि क्वचिज्जातिसङ्ख्यामादाय वचनम्, 'ब्राह्मणं न हन्यात्' इत्यादौ यथा । जातेः प्राधान्ये च निरवच्छिन्नाया एव व्यक्तेः प्रकारताविशेष्यीभूतजात्या च तदनुगमः 'नहि प्रकारीभूतमेवानुगमकमिति नियमः' इति तत्कल्पपरिष्कारः ।

वस्तुतस्तु जातिविशिष्टव्यक्तिरेव शक्या, गवादिपदाद्गोविशिष्टगोत्वबोधस्याननुभवेनोक्तकल्पासम्भवात् । अत एव

प्रभा

बहुत्वे आदाय द्विवचनादिप्रयोगः। व्यक्तिविशिष्टजातिबोधे व्यक्तौ निरवच्छिन्नैव प्रकारता। नचैकव्यक्तेः प्रकारत्वे व्यक्त्यन्तरे कार्य्यान्वयानुपपत्तिः, व्यक्तिनिष्ठप्रकारताया जात्या अनुगतीकृतत्वेन तत्र कार्यान्वयसम्भवात्। नच विशेष्यार्थगतसङ्ख्याया एव विभक्त्याऽभिधानादनेकव्रीहितात्पर्येण 'सम्पन्नो व्रीहिः' इति वाक्यं न स्यादिति वाच्यम्, तत्र स्वर्थैकत्वस्य स्वा (एकत्व) श्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन व्रीहावन्वयेनादोषात्।

दर्पणव्याख्या

तथैव व्याख्यातम्। जात्यतिरिक्तपदार्थस्य किञ्चिद्धर्मावच्छिन्नत्वमिति नियमेन निरवच्छिन्नायास्तस्या जात्यंशे भानायोगात्, गोत्वस्यान्वयितावच्छेदकरूपेणानुपस्थित्या तत्तत्कर्मत्वाद्यन्वयासम्भवाच्च। 'सम्पन्नो व्रीहिः' इत्यादौ तु स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थव्यक्तावेवैकत्वान्वयः। उक्तस्थले एकवचनोपस्थितानि नानैकत्वानि न व्रीहिष्वन्वीयन्त इति तु न सत्, सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वस्यैवैकवचनार्थत्वेन तत्र तस्य बाधात्, संख्यारूपैकत्वस्य द्रव्यमात्रसाधारण्येनार्थत एव लाभादनुपयोगात्तस्यैकवचनार्थत्वाभावाच्च।

अत एव 'पशुना यजेत' इत्यत्र तादृशैकत्वस्यैकवचनेन विवक्षितत्वान्नानेकपशुकरणकयागादृष्टसिद्धिः, समभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थताऽवच्छेदकरूपेण साजात्यस्य विवक्षणाच्च नात्र 'घटोऽस्ति' इत्यादौ घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धिः, एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैव तत्र बोधेन तस्योक्तरीत्या प्रसिद्धिसम्भवात्। एवञ्च व्यक्तिविशेष्यकबोधाभ्युपगमे क्वाप्यनुपपत्तेरभावेन तस्य चैतद्विशेष्यकशक्तिग्रहमन्तरेणासम्भवाद्गवादिपदानां जातिविशिष्टव्यक्तावेव शक्तिः। व्यक्तिमात्रविषयकस्य, जातिमात्रविषयकस्य वा शक्तिज्ञानस्य जातिविशिष्टव्यक्तिशाब्दबोधहेतुतायामुक्तदोषस्य दुरुद्धरत्वादिति सारनिष्कर्षः।

अन्ये तु—"उभयोरुभयं पदार्थः" इति भाष्याज्जातौ, व्यक्तौ च गवादिपदानां शक्तिः। परन्तु व्यक्तिशाब्दबोधेऽपि जातिविषयकत्वेन जातिशक्तिज्ञानस्यैव हेतुता। व्यक्तिशक्तिस्तु स्वरूपसत्युपयुज्यते। अशक्यस्यापि शाब्दे भानाभ्युपगमे गवादिपदादशक्यगवादिव्यक्तेरिवाशक्यघटादीनामपि भानापत्त्या व्यक्तिशक्तिरावश्यकी। अयमेव 'कुब्जशक्तिवादः' इति व्यवह्रियते, शाब्दबोधकारणतावच्छेदककोटौ व्यक्तिविषयकत्वस्यानिवेशात्। तथाच गोत्वप्रकारकगोविषयकशाब्दबोधे गोत्वविषयकगोपदशक्तिमती गौरित्याकारकशक्तिज्ञानं कारणम्, नतु गोत्वविशिष्टविषयकगोपदशक्तिमती गौरित्याकारकम्। 'गोत्वमस्ति' इत्यादौ तादृशगोत्वप्रकारकशक्तिज्ञानाभावान्न गोत्वविशिष्टबोधप्रसङ्ग इत्याहुः।

तदप्यापातमनोरमम्, गोत्वविषयकगोपदशक्तिमती गौरित्याकारकशक्तिग्रहे कारणतावच्छेदककोटौ गोत्वविषयकत्वस्य प्रवेशे गौरवात्।

ननु मास्तु तद्विषयकत्वस्यावच्छेदककोटौ निवेशः, गोपदशक्तिमती गौरित्याकारकशक्तिग्रहस्य गोत्वप्रकारकत्वेन गोत्वविशिष्टविषयकशाब्दबुद्धिहेतुत्वे व्यक्तिविषयतायाः कारणतावच्छेदककोटावनिवेशेन लाघवात्। देशान्तरस्थव्यक्तिविशेष्यकबोधानुपपत्त्या समानविशेष्यकत्वेन कार्यकारणभावासम्भवेन समानप्रकारकत्वेनैव कार्य्यकारणभावोपगमादिति चेत्,

मैवम्, व्यक्तिविषयतायाः कारणतावच्छेदककोटावनिवेशे व्यक्तिशक्तिस्वीकारस्य वैयर्थ्यापत्तेः। नच तदस्वीकारे गोत्वप्रकारकशक्तिज्ञानत्वेन हेतुत्वासम्भवः, व्यक्तौ शक्त्यभावेन तादृशशक्तिज्ञानस्य भ्रमत्वादिति वाच्यम्, शक्तिर्हि न स्वरूपसती शाब्दबोधहेतुः, अपभ्रंशादपि बोधोदयात्, अगृहीतशक्तिकाच्छाब्दबोधापत्तेश्च। किन्तु ज्ञाता। तथाच यदंशे शक्तिज्ञानहेतुस्तदेव शक्यमिति जातिवद् व्यक्तिरपि शक्यैव, एवं तद्वैशिष्ट्यमपि तथा। अन्यथा व्यक्तावेव शक्तिः, व्यक्तिशक्तिज्ञाने जातेरप्रकारकत्वात् समानप्रकारत्वेन शक्तिज्ञानपदार्थोपस्थितिशाब्दबुद्धीनां कार्य्यकारणभावादिति जातावपि शक्तिरुच्छिद्येत।

नच यद्विषयकत्वेन शक्तिज्ञानं कारणं तदवश्यं शक्यमिति नियमाज्जातौ शक्तिः सेत्स्यतीति वाच्यम्, तर्हि व्यक्तिविषयकत्वेन शक्तिज्ञानस्य हेतुतया व्यक्तिशक्तिस्वीकारस्यावश्यकत्वादुक्तेऽर्थे भाष्योपन्यसनं तु "कस्यचित् किञ्चित् प्रधानभूतं किञ्चित् गुणभूतम्" इत्युपसंहारभाष्यानालोचनमूलकमेवेत्यास्तां तावत्।

SGDF Sri Gargeshwari Digital Foundation

त्रिकमिति—जाति-व्यक्ति-लिङ्गानीत्यर्थः। सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्। आधिक्यं पुंस्त्वम्। अपचयः स्त्रीत्वम्। तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यञ्च,

प्रभा

इत्यादिनोक्तमवयवसंस्थानविशेषरूपं लिङ्गं न शास्त्रीयप्रक्रियानिर्वाहकम्, 'दारान्' 'स्वसा' इत्यादौ नत्व-टापोरभावप्रसङ्गात्। उक्तवचने केशपदं योनिपरम्, 'लोमशः' इतिपदं लिङ्गपरम्, केशादिपरत्वे गवादिष्वव्याप्तेः। नचाहार्य्यारोपेण तत्प्रतीत्या नत्वादिकार्योपपत्तिः, आरोपाभावेऽपि तादृशप्रयोगाणामिष्टत्वात्। आहार्यारोपश्च बाधसमकालिकेच्छाजन्यज्ञानरूपः। 'रक्तः स्फटिकः' इत्यत्र यथा 'स्फटिको रक्तत्वाभाववान्' इति बाधसत्त्वेऽपि 'रक्तत्ववान् स्फटिकः' इतीच्छाजन्यज्ञानं जायते। अत एव भाष्यकृता निर्णीतं लिङ्गमाह—सत्त्वरज इति—पदार्थमात्रस्य सत्त्वरजस्तमस्त्रितयात्मकप्रकृतेरेवोत्पत्तिः। तथाच सर्वेषु पदार्थेषु कस्यचिद्गुणस्याधिक्यम्, कस्यचिन्न्यूनत्वम्, स्थितिश्च। तत्राधिक्यं पुंस्त्वम्, न्यूनत्वं स्त्रीत्वम् स्थितिमात्रं नपुंसकत्वम्। गुणानामुत्कर्षापकर्षसाम्यावस्थात्रयसाधारणस्थितिमात्रं नपुंसकत्वमिति यावत्। साम्यावस्थेति—साम्यावस्थायां सृष्टेरभावेन व्यवहाराभावाद् गुणत्रयस्य स्थितिमात्रमित्यर्थः। अपचय इति—न्यूनत्वमित्यर्थः। इदञ्च लिङ्गमर्थनिष्ठं केवलान्वयी=सर्वं लिङ्गं सर्वेष्वर्थेषु वर्तते। अत एव एकस्मिन्नपि 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति लिङ्गत्रयप्रतीतिः। ननु लिङ्गस्यार्थनिष्ठत्वे 'पुँल्लिङ्गः शब्दः' इत्यादिव्यवहारानुपपत्तिः, तादृशव्यवहारस्यारोपनिमित्तकत्वात्, पुंस्त्वादिकं लिङ्गं प्रतीयतेऽस्मादिति यौगिकत्वाद्वा।

अन्ये तु उपचयापचयादेर्विरुद्धस्य एकत्रार्थे आत्मा, ब्रह्म इत्यादिनिर्विकारिणि चासम्भवात् शब्दनिष्ठमेव तदित्याहुः, पुंस्त्वविशिष्टोऽयमर्थ इति त्वारोपात्। तस्मात्—

तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः।
अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः॥

इति वाक्यपदीयाज्जातिरेव लिङ्गमित्याहुः। ननु तस्य केवलान्वयित्वेनाव्यावर्तकतया लौकिकस्त्रीत्वविशिष्टया छाग्याऽपि 'पशुना यजेत' इति श्रुतिबोधितयागापत्तिरिति चेन्न, 'छागो वा मन्त्रवर्णनात्' इति मीमांसकोक्तेन मन्त्रेषु पुंस्त्वस्य वर्णनरूपलिङ्गेन लौकिकपुंस्त्वविशिष्टेनैव याग इति निर्णयसम्भवात्। किञ्च नियतपुँल्लिङ्गादिशब्दानां लौकिकलिङ्गविशिष्टे शास्त्रीये लिङ्गे शक्तिस्वीकारेणानतिप्रसङ्गाच्च। अर्थनिष्ठत्वे चाचेतनचेतनवाचकानां मध्वादिशब्दानां मक्षिकादौ पुन्नपुंसकत्वे, वसन्ते च पुंस्त्वमिति व्यवस्थाया अनुपपत्तिः। एवं 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्त्रियां धने' इत्यादिष्वप्यर्थनिष्ठत्वे नियमोच्छेदापत्तिः। शब्दनिष्ठत्वे च ह्रस्वत्वदीर्घत्वोदात्तत्वानुदात्तत्ववत् स्त्रीत्वपुंस्त्वविरुद्धधर्मवत्त्वात् शब्दा भिद्यन्ते। केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन तेषां तन्त्रेणानुकरणादुपपद्यते। एवञ्च समानानुपूर्वीकेषु तटादिषु लिङ्गत्रयम्, छागादिषु लिङ्गद्वयम्, पदार्थादिष्वेकमिति सर्वत्र मुख्य एव लिङ्गव्यवहारः। तत्तच्छब्देति—जात्यादिभेदेन भिन्ना ये शब्दास्तेषु शब्देषु स्थितं यल्लिङ्गं तत् स्वा (लिङ्ग) श्रयशब्दवाच्यम्।

दर्पणव्याख्या

❀ लिङ्गानीति ❀ लिङ्गत्वञ्च—प्राकृतगुणवतो धर्मविशेषः। तद्विशेषश्च नपुंसकत्वादीत्याशयेनाह—❀ सत्त्वेति ❀। ❀ साम्यावस्थेति ❀ उपचयापचयराहित्येनावस्थानमित्यर्थः। उपचयः=वृद्धिः, अपचयः=तन्न्यूनत्वम्। ❀ तत्तच्छब्दनिष्ठमिति ❀ जाति—गुण—क्रियादिभेदभिन्नशब्दनिष्ठम्। ❀ तत्तच्छब्दवाच्यञ्चेति ❀ स्वाश्रयशब्दवाच्यञ्चेत्यर्थः, 'पुँल्लिङ्गः शब्दः' इति व्यवहारात्, "तस्माच्छसो नः" (पा० सू० ६।१।१०३) "स्त्र्यतस्त-

तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते।

केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्।

एवञ्च पदार्थपदे पुँस्त्वमेव। व्यक्तिपदे स्त्रीत्वमेव। वस्तुपदे नपुंसकत्वमेव इति सर्वत्रैव 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति व्यवहारः, 'तटः' 'तटी' 'तटम्' इति चोपपद्यते।

प्रभा

तमेव=शब्दनिष्ठं पुंस्त्वादिकमेव। भिद्यन्त इति—'तटः' इति शब्द इतरेभ्यो भिद्यते पुंस्त्वादिति तटरूपशब्दे पक्षे पुंस्त्वादिलिङ्गेन हेतुना इतरभेदविधेयकानुमितेरुद्देश्यता सम्पद्यते। ननु लिङ्गभेदेन भेदे 'उभयलिङ्गकोऽयं शब्दः' 'त्रिलिङ्गकोऽयम्' इति व्यवस्थानुपपत्तिर्लिङ्गभेदेन भेदादित्याशङ्कायामाह—केषाञ्चिदिति। समानेति—हेतौ तृतीया। हेतुत्वञ्चारोपनिरूपितम्। समानानुपूर्वीकत्वेन हेतुना अभेदारोप इत्यर्थः।

वस्तुतस्तु शब्दस्यार्थस्य च सत्त्वादिगुणत्रयात्मकतया तत्र कस्यचिद् गुणस्योपचयः कस्यचिदपचय इत्येवंरूपस्योपचयापचयस्यैकत्रैककालावच्छेदेन सम्भवात् आत्मादिनिरवयवपदार्थेषु उपचयादेरभावेऽपि तद्वाचकगुणत्रयात्मकशब्दगतोपचयादिमादाय दोषाभावाच्च केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपादिति मूलोक्तिश्चिन्त्येति गुरुवः। आरोपादिति—वस्तुतस्तु लिङ्गभेदेन भिन्न एव शब्दोऽभेदस्त्वारोपित एव। अन्ये तु सर्वेषामर्थानां त्रिगुणात्मकतया अवस्थाभेदेन भेदस्य सर्वसम्मतत्वेनार्थभेदेन शब्दानां भेदः। तदुच्यते—'अर्थभेदात् शब्दभेदः' इति। एवञ्चेति—शब्दनिष्ठस्य पारिभाषिकस्य गुणत्रयोपचयादिरूपस्य लिङ्गस्य व्यवहारोपयोगित्वे चेत्यर्थः। तथाच यः शब्द एकावस्थाविशिष्टः सन्नर्थमभिधत्ते स नियतलिङ्गः। यश्चावस्थाद्वयविशिष्टः सन्नर्थमभिधत्ते स उभयलिङ्गकस्तदाह—पदार्थपद इति। लिङ्गस्य केवलान्वयित्वं दर्शयति—सर्वत्रेति।

दर्पणव्याख्या

नपुंसकात्" (पा० सू० ७।१।२३) इत्यादिसूत्रप्रामाण्याच्चेति भावः। ❀ तमेवेति ❀ समानानुपूर्वीकत्वेऽप्युपचयाद्यवस्थारूपं परस्परसमानाधिकरणं लिङ्गमादायैवेत्यर्थः। ❀ भिद्यन्ते इति ❀ पुँस्त्वादिलिङ्गकेतरव्यावृत्तिविधेयकानुमित्युद्देश्या भवन्तीत्यर्थः।

ननु लिङ्गस्योक्तावस्थारूपत्वे तासां परस्परविरुद्धानामेकत्रावस्थानासम्भवेन केषुचिच्छब्देष्वनेकलिङ्गकत्वव्यवहारः किंनिबन्धनोऽत आह— ❀ केषाञ्चिदिति ❀ तटादिशब्दानामित्यर्थः।

वस्तुतस्तेषां विरुद्धत्वेऽपि शब्दानां समानानुपूर्वीकत्वनिबन्धनाभेदाध्यासादनेकलिङ्गकत्वव्यवहारोपपत्तिरित्यर्थः। अर्थनिष्ठम्—

"स्तनकेशवती नारी लोमशः पुरुषः स्मृतः।"

इत्यादिस्मृतिलक्षितं लिङ्गं तु नात्राश्रययितुं शक्यम्, 'दारान्' इत्यादौ शस्प्रकृत्यर्थे तदभावेन नत्वाद्यनापत्तेः। तथाच भाष्यम्—"एकार्थशब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च" इति। एकस्मिन्नर्थे पुष्यः, तारका, नक्षत्रम्' इति लिङ्गनानात्वदर्शनात्, 'कुटीरः' इत्यादौ रेफस्यावयवस्योपजनेऽपि लिङ्गभेददर्शनाच्चान्यदेव शब्दनिष्ठं लिङ्गमिति तदर्थः। अर्थनिष्ठत्वे तु 'पुँल्लिङ्गः शब्दः' इति सामानाधिकरण्यानुपपत्तिश्चेति भावः।

❀ एवञ्चेति ❀ पारिभाषिकशब्दनिष्ठलिङ्गस्य व्यवहारौपयिकत्वे चेत्यर्थः। ❀ व्यवहार इति ❀ अर्थनिष्ठस्य तस्य तन्नियामकत्वे तु स्त्रीव्यक्तिर्वस्तुपदार्थपदाभ्यां न व्यक्तिविषये, नैवं पुरुषादिरपि। व्यक्त्यादिशब्दैः स्तनकेशादिरूपलौकिकलिङ्गस्य खट्वादावभावेन तद्वाचकात् स्त्रीप्रत्ययाद्यनापत्तेश्चेति भावः। ❀ तटस्तटीति ❀ अर्थे लौकिकलिङ्गाभावेऽपि

SGDF

तच्च लिङ्गमर्थपरिच्छेदकत्वेन अन्वेति, इति पश्वादिशब्दोक्तम्—'पशुः स्त्रियां नास्ति' इति, 'पशुना' इत्यादिविधिर्न छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। नच व्यक्त्यादिशब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं शङ्क्यम्, व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा सम्भवेऽपि पशुशब्दस्य नित्यपुंल्लिङ्गत्वे प्रमाणाभावात्।

प्रभा

ननु नियतलिङ्गकस्य पदार्थादिशब्दस्य लौकिकलिङ्गानादरेण लौकिकस्त्रीत्वादिविशिष्टेऽपि यथा प्रवृत्तिस्तथा पशुशब्दस्य शास्त्रीयपुंस्त्ववैशिष्ट्यमादाय लौकिकपुंस्त्वानादरेण लौकिकस्त्रीत्वविशिष्टपशावपि प्रवृत्तिः स्यादिति कथं नाभावदर्शनमात्रेण निर्णय इत्याशङ्कायामाह—तच्चेति—शब्दनिष्ठमित्यर्थः। अर्थपरिच्छेदकत्वेनेति—शब्दार्थयोस्तादात्म्यात् लिङ्गस्य जातिरूपत्वे तु समवायेन, भिन्नत्वे स्वरूपसम्बन्धेनार्थपरिच्छेदकत्वेनेत्यर्थः। शब्दार्थयोर्भेदे तु स्वाश्रयवाच्यत्वसम्बन्धेन परिच्छेदकत्वं बोध्यम्। पश्वादिशब्दोक्तमिति—पश्वादिशब्दोक्तं लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पूर्वेणान्वयः। स्त्रियां नास्तीति—'पशुना यजेत' इति वाक्यान्तर्गतः पशुशब्दः नाभावेन पुंस्त्वबोधनात् स्त्रियां नास्ति इति हेतोः 'पशुना यजेत' इति विधिर्न छाग्यादीनङ्गत्वेन = यज्ञाङ्गत्वेन प्रयोजयति = बोधयतीत्यर्थः। ननु पुँल्लिङ्गः पशुशब्दो यदि लौकिकपुंस्त्वविशिष्टव्यक्तेरेव वाचक इति नियमः स्यात्तदा छाग्यादेर्यज्ञाङ्गत्वं न स्यात् स नियम एव तु नास्तीत्याशङ्कते— नचेति—व्यक्त्यादिशब्दोक्तशास्त्रीयलिङ्गस्य यथा साधारण्येन स्ववाच्यत्वसम्बन्धेन पुंस्त्रीनपुंसकव्यक्तिसम्बद्धत्वेन बोध्यतया अव्यावर्तकत्वं तथा पशुशब्दोक्तशास्त्रीयलिङ्गस्यापि स्वाश्रयवाच्यत्वसम्बन्धेन पुंस्त्रीसम्बद्धतया अर्थपरिच्छेदकत्वेनान्वयेऽप्युक्तदोषतादवस्थ्यमित्याशङ्कां निराकरोति—

व्यक्तिशब्दस्येति—व्यक्तिशब्दस्य क्तिन्नन्तत्वेन नित्यस्त्रीलिङ्गत्वात् साधारण्येऽपि पशुशब्दस्य नित्यपुँल्लिङ्गत्वे प्रमाणाभावान्न साधारण्यम्। नादेशस्य पुँल्लिङ्गत्वे प्रामाण्येऽपि नित्यपुँल्लिङ्गत्वे न प्रामाण्यमिति भावः।

दर्पणव्याख्या

परस्परासमानाधिकरणपारिभाषिकलिङ्गवत्त्वेन विभिन्नानां तटादिशब्दानां तत्तत्कार्यभाक्त्वमुपपद्यते इत्यर्थः।

ननु शब्दनिष्ठोक्तलिङ्गस्यैव स्त्रीपुंसादिव्यवहारौपयिकत्वे तस्य स्त्रीवाचकपशुशब्देऽपि सत्त्वात् 'पशुना यजेत' इत्यत्र पशुस्त्रीकरणकयागादप्यदृष्टसिद्धिः स्यात्, तद्द्रव्यात्तल्लिङ्गस्य व्यक्त्यादिशब्दोक्तलिङ्गवत् स्त्रीपुंसादिसाधारण्येनार्थापरिच्छेदकत्वादत आह—❀ तच्चेति ❀ शब्दनिष्ठमेवेत्यर्थः। ❀ अर्थेति ❀ अर्थमपि परिच्छिनत्तीत्यर्थः। तदेवाह—❀ पश्वादिशब्दोक्तमिति ❀ लिङ्गमिति शेषः। यदि स्त्रीपशुर्यागाङ्गत्वेन विवक्षितोऽभविष्यत्तदा अस्त्रीविहितनाभावं विभक्त्यन्ते न प्रायोक्ष्यत्। तदन्तपशुशब्दप्रयोगात्तु पुम्पशुरेव यागाङ्गमिति निर्णीयते इत्यर्थः।

स्त्रीलिङ्गार्थकपशुशब्दात् 'आङो नाऽस्त्रियाम्'' (पा० सू० ७। ३। १२०) इति विहितनाभावस्य तृतीयैकवचनेऽसम्भवेन तदन्तपशुशब्दप्रयोगात् तदर्थस्य पुंस्त्वावगतेरिति भावः। ननु व्यक्त्यादिशब्दानामर्थनिष्ठलिङ्गानादरेण प्रवृत्तिवत्पशुशब्दस्य तथा प्रवृत्तौ बाधकाभावादुक्तदोषो दुरपह्नव इत्याशङ्क्य निराचष्टे—❀ नचेति ❀ व्यक्त्यादीत्यादिना वस्त्वादिपदसङ्ग्रहः। साधारण्यं स्वाश्रयवाच्यत्वसम्बन्धेन, स्त्रीपुंवृत्तित्वं नित्यस्त्रीलिङ्गत्वेनेति, ''स्त्रियां क्तिन्'' (पा० सू० ३। ३। ८४) इत्यनुशासनादिति भावः।

Sri Gargeshwari Digital Foundation

'पश्वा न तायुं गुहा चतन्तम्' (ऋ० वे० म० १ अनु० १२ सू० ६५)।

प्रभा

किञ्च वेदादपि नित्यपुँल्लिङ्गत्वाभाव एवोपलभ्यत इत्याह—पश्वा न तायुमिति—'पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तं सयोषा धीराः पदैरनुग्मन्नुप त्वा सीदन्विश्वे ययत्राः' कुतश्चित्कारणादग्नेरप्सु, अश्वत्थे च प्रवेशः तैत्तिरीये श्रूयते—'स निलायत सोऽपः प्राविशत्' 'अग्निर्देवेभ्यो निलायत अश्वो रूपं कृत्वा सोऽश्वत्थे संवत्सरमतिष्ठत्' तद्वृत्तमाश्रित्येयमृक् प्रवृत्ता । अस्या अर्थः—हे अग्ने ! धीराः=मेधाविनो देवाः, सयोषा=समानं युषन्ते इति सयोषाः, युषतेरसुनि 'सुपां सुलुक्' इति जसः सुः, समानप्रीतयः सन्तस्त्वां पदैः=मार्गे पादकृतैश्चिह्नैः, अनुग्मन्=('मन्त्रे घस्' इति लेर्लुक्) अन्वग्मन्, हे अग्ने ! ययत्राः=यजनशीलाः, (यजेरौणादिके त्रनि ययत्रा इति) विश्वे=सर्वे देवाः, गुहा चतन्तम्=अब्रूपगुहायां गच्छन्तम्, 'गुहा' इत्यत्र ('सुपां सु' इतिङेर्लुक्) चततिर्गतिकर्मा, नमः=हविर्लक्षणमन्नम्, युजानम्=आत्मना संयुजानम्, नमः=देवेभ्यः प्रत्तं हविः, वहन्तं त्वा=त्वाम्, उपसीदन्=समीपं प्राप्नुवन्, 'छन्दस्यमाङ्योगेऽपि' इत्यडभावः । यथा धीराः=मेधाविनः, हृतेन पशुना समं वर्तमानं तायुम्=स्तेनम्, न=इव उपसीदन्ति । नशब्द इवार्थे ।

अयं भावः—यथा बुद्धिमन्तः पुरुषाः परकीयपश्वादिधनमपहृत्य दुष्प्रवेशे गिरिगह्वरे गतं चौरं मार्गे स्थितैस्तदीयपदचिह्नैरनुगत्य प्राप्नुवन्ति, तथा देवा अपि स्वेभ्यो यजमानेन दत्तं हविरादाय अब्रूपगुहायाम्, अश्वरूपं धृत्वा पिप्पले च स्थितमग्निं प्राप्नुवन्, अश्वरूपस्याग्नेः स्थितत्वाद् बोधिवृक्षस्य 'अश्वत्थ' इति नाम प्रसिद्धम्, अनयैव ऋचा जलस्य 'विद्युन्मय' शक्तिमत्त्वं सूचितम् । एतन्मूलमाश्रित्यैवाऽऽधुनिकवैज्ञानिकैर्जलाद् विद्युच्छक्तिं प्रादुर्भाव्य प्रकाशादिकं सर्वं कार्यं विधीयते । एनाम् ऋचमाश्रित्यैवाश्वत्थरूपस्याग्नेः प्रवेशात्समुद्रे 'वाडवानल' इति प्रसिद्धिरित्यपि अनुमातुं शक्यते । एवमेव सर्वं विज्ञानं तत्र तत्र वेदे निहितम् । यश्च सम्प्रति 'परमाणुबम' (ऐटम) इति वैज्ञानिकैरुद्भावितः, सोऽपि—

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः ।
छायाऽऽतपतमः शब्दभावेन परिणामिनः ॥
(वाक्यप० का० १ कारि० १११)

इति कारिकया हरिणा परमाणोः सर्वशक्तिमत्त्वं वदता उक्तविस्फोटकपदार्थजनकत्वं सूचितमेव । एवमेव शब्दस्य नित्यत्वं सर्वदेशव्यापित्वं यद् वैयाकरणैरुद्घोषितं तत् किञ्चिद् यन्त्रं दूरदूरदेशात् सम्भाषणादिकं कुर्वद्भिर्वैज्ञानिकैरङ्गीकृतमेव । एवमेव जलाकाशमहीधरेषु गमनशीला रथाः—

वसिष्ठमन्त्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु ।
मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ॥ रघु० स० ५ श्लो० २७ ।

इतिपद्येन कालीदासेन प्रदर्शिताः साम्प्रतं येन केनापि रूपेण प्रकाशं नीता दृश्यन्ते ।

आधुनिकवैज्ञानिकैर्यद् यदाविष्क्रियते तत्सर्वं वेदादिरूपे संस्कृतसाहित्ये येन केनापि रूपेण स्थितमेव मूलमाश्रित्य रूपान्तरेण परिणतमुपलभ्य स्वकीयकौशलेन लोका आश्चर्ये निमज्ज्यन्ते । संस्कृतविद्वद्वरेण्यैस्तु एते बाह्यप्रपञ्चकरा लोकविनाशकाः परस्परागद्वेषादिना वैरभावप्रयोजका इति मत्वा उपेक्ष्यन्ते, इत्याधुनिकानां तेषु ज्ञानशून्यत्वाभिधानमुन्मत्तप्रलपितमेवेत्यलं पल्लवितेनेति पञ्चोलिनः ।

दर्पणव्याख्या

ननु 'पशुना यजेत' इति वैदिकप्रयोग एव तस्य नित्यपुंस्त्वे मानं स्यादत आह—❀ पश्वेति ❀ तथाच वेदे पशुश-

SGDF Sri Gargeshwari Digital Foundation

"पश्वे नृभ्यो यथा गवे" (ऋ० वे० अ० १ अ० ३ व० २६) इत्यादिवेदे दर्शनाच्च, मीमांसायां चतुर्थे "पशुना यजेत' इत्यत्रैकत्व—पुँस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः, पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च।

वस्तुतस्तु विशेषविध्यभावे उप्रत्ययान्तानां पुँस्त्वस्य व्याकरणेन निर्णीतत्वाद् वेदभाष्येऽपि 'जसादिषु छन्दसि वा वचनम्' इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुँस्त्वनिर्णयात्। प्रकृते

प्रभा

'पश्वा' आङीदं रूपम्। पुल्लिँङ्गत्वे नाभावो दुर्वारः स्यादिति भावः। पश्वे इति 'यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे यथा तोकाय रुद्रियम्' अस्यार्थः—अदितिः=भूमिः, यथा नः=अस्माकं रुद्रियम्=रुद्रसम्बन्धिभेषजम्, यथा=येन प्रकारेण सिध्यति, करत्=तथा करोतु। किञ्च यथा पश्वे=अस्मदीयाश्वमहिषादिपशवे, नृभ्यः=अस्मदीयपुरुषेभ्यो गवे=विशेषेण गोजातये हितं रुद्रियं सिध्यति तथा करोतु। किञ्च तोकाय=अस्मदीयापत्याय रुद्रियं यथा सिध्यति तथा करोतु इति, भेषजस्य रुद्रसम्बन्धित्वं तैत्तिरीये (४।५।१०।१) (१।८।६।१। उक्तम्। पशुशब्दस्य नित्यपुल्लिँङ्गत्वे स्त्रीवाचकत्वाभावेन 'ङिति ह्रस्वश्च' इति नदीत्वाप्राप्तौ घित्वे 'घेर्ङिति' इति गुणापत्तिर्दुर्वारेति भावः। पशुशब्दस्य स्त्रीलिङ्गत्वस्यापि स्वीकारे तु नदीत्वेन घित्वाभावाद् गुणाभाव इति भावः। नच स्त्रीलिङ्गत्वास्वीकारेऽपि जसादिषु 'छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः' इति वार्तिकबलान्नाभावगुणादीनां वैकल्पिकत्वेन 'पश्वा' 'पश्वे' इत्यादीनां सिद्धिरिति वाच्यम्, वार्तिकेन 'आङो ना' 'घेर्ङिति' इत्यनयोर्बाधकल्पनापेक्षया स्त्रीलिङ्गत्वस्वीकारस्यैवौचित्यात्। नच नदीत्वे आडागमापत्तिः 'सागरं तर्तुकामस्य' इत्यादिलक्ष्योपपत्तये आगमानित्यत्वस्यावश्यकत्वेनैव सिद्धेः। तथाच पशुशब्दस्यानियतलिङ्गतया शास्त्रीयपुंस्त्वलिङ्गविशिष्टलौकिकपुंस्त्वलिङ्गविशिष्टस्यैव ग्रहणेन न पशुस्त्रिया याग इति भावः। तत्र मीमांसकसम्मतिमप्याह—मीमांसायामिति—मी० द० अ० ४ पा० १ सू० १७ 'तथाच लिङ्गम्' संख्यावत् लिङ्गमपि विवक्षितमिति हि तदर्थः। वेदभाष्येऽपीति—चिन्त्यमिदम्, वेदभाष्ये 'पश्वे' इत्यत्र 'संज्ञापूर्वको विधिरनित्यः' इति वचनमाश्रित्य गुणाभावस्योपपादितत्वात्। ननु 'पशुशब्दस्य नित्यपुल्लिँङ्गत्वे प्रमाणाभावात्' इत्यसङ्गतम्, 'उकारान्तः' (५१) पुंसि उकारान्त इत्यर्थकेन शिक्षासूत्रेण नित्यपुंस्त्वस्य व्याकरणेनैव निर्णीतत्वादिति प्रकारान्तरेण पुंस्त्वविशिष्टस्यैव पशोर्ग्रहणमिति साधयति—प्रकृत इति। 'अग्निषोमीयं पशुमालभते' इत्यनेन ज्योतिष्टोमं प्रकृत्य पश्वालम्भनं विधीयते। तत्र पशुपदोपादानात् 'पशुचोदनायामनियमोऽविशेषात्' (मी० अ० ६ पा० ८ सू० ३०) इति सूत्रेण यस्य कस्यचित् पशोर्ग्रहणमाशङ्क्य 'छागो वा मन्त्रवर्णात्' (मी० अ० ६ पा० ८ सू० ३१) इत्यनेन छागस्यैव ग्रहणं नान्यपशोरिति निर्णीतम्। तत एव 'छागस्य' इति पुंस्त्वश्रवणात् पुंस्त्वविशिष्टस्यैव ग्रहणमिति निर्णयः। छागप्रकाशन-

दर्पणव्याख्या

ब्दस्य स्त्रीलिङ्गत्वस्यापि दर्शनेन न तस्य व्यक्त्यादिशब्दसाम्यमिति भावः। स्वोक्तेऽर्थे मीमांसकसम्मतिमाह—❀ मीमांसायामिति ❀।

वक्ष्यमाणास्वरसादाह—❀ वस्तुतस्त्विति ❀। ननु उप्रत्ययान्तानां नित्यपुंस्त्वे पश्वेत्यादिस्त्रीलिङ्गप्रयोगानुपपत्तिरत आह—❀ वेदभाष्येऽपीति ❀ तथाच व्यक्त्यादिशब्दोक्तलिङ्गस्येव पशुशब्दोक्तलिङ्गस्यापि स्त्रीपुंससाधारण्यान्न तत्स्वार्थपरिच्छेदकत्वमिति भावः।

SGDF Sri Gargeshwari Digital Foundation

"छागो वा मन्त्रवर्णात्" इति न्यायेनैव निर्णयः । मन्त्रवर्णे हि 'छागस्य वपाया मेदसः' इति श्रूयते । तत्र छागस्येति छाग्यामसम्भावितम्, इति भवति ततः पुंस्त्वनिर्णय इति विस्तरेण प्रपञ्चितं भूषणे ।

प्रभा

समर्थो वाक्यविशेषो मन्त्रवर्णः । स च 'छागस्य वपायाः' इत्येव । न्यायेनैवेति—न्यायोऽत्र युक्तिमूलकदृष्टान्तः । पशुविशेषनिर्णय इव पुंस्त्वस्यापि तेनैव निर्णय इत्यभिप्रायः । लिङ्गस्य प्रातिपदिकवाच्यत्वे मानन्तु 'स्वमोर्नपुंसकात्' 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यादिशास्त्रमेव । नच ब्रह्मात्मादिशब्दार्थस्यात्मनो नित्यतया तत्र सत्त्वादिगुणानामुपचयापचयोरभावाल्लिङ्गबोधानापत्तिरिति वाच्यम्, सर्वस्यैव प्रपञ्चस्य ब्रह्मण्यध्यस्तत्वेन लिङ्गस्याप्यध्यासेनोपपत्तेः । अध्यासश्च शुक्तौ रजतप्रतीतिरिव ब्रह्मणि प्रपञ्चप्रतीतिरूप एव । यद्वा—गुणानामुत्कर्षविवक्षीयविषयतारूपस्य पुंस्त्वस्यापकर्षविवक्षीयविषयतारूपस्य स्त्रीत्वस्योत्कर्षापकर्षयोर्विवक्षीयविषयत्वाभावरूपसाम्यस्य नपुंसकत्वस्य च एकत्रैकदा सत्त्वेऽपि न काप्यनुपपत्तिः ।

दर्पणव्याख्या

ननु कथं तर्हि पुम्पशोरेव यागाङ्गत्वनिर्णयोऽत आह ❀ छागो वेति ❀ । ❀ न्यायेनैव ❀ एवेत्येवकारेण लिङ्गस्यार्थपरिच्छेदकस्य व्युदासः । यथा "सारस्वतौ मेषौ" इत्यत्र तद्धितप्रकृतिशब्दः स्त्रीलिङ्गः पुल्लिङ्गो वेति सन्देहे "सन्दिग्धे वाक्यशेषात्" (मी० सू० १ ४।१९।२९) इति न्यायेन, "तद्वामदेव्यमिथुनम्" इत्यर्थवादाद् द्वयोरेवैकशेषेण ग्रहणं तद्वन्मन्त्रवर्णादत्र पुम्पशोर्यागाङ्गत्वनिर्णय इति भावः । ❀ तत्रेति ❀ मन्त्रवर्णे इत्यर्थः । ❀ असम्भावितमिति ❀ छागशब्दस्य व्यक्त्यादिवन्नित्यलिङ्गत्वाभावादिति भावः । ❀ प्रपञ्चितमिति ❀ लौकिकलिङ्गमेव नामार्थः । तच्चावयवविशेषसंस्थानरूपम् । 'दारान्' इत्यादौ पुंस्त्वारोपेणैव तत्प्रयुक्तकार्यम्, "रात्राह्नाहाः पुंसि" (पा० सू० २ । ४ । २९) इत्यादिलिङ्गानुशासनस्यैवोक्तार्थे मानत्वात् । अत एव न पशुस्त्रिया यागमिति । अथवा स्त्रीत्वादिर्जातिरेव ।

'तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः' ॥

इत्यादि तत्रोक्तमिति ।

परे तु— 'स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।
एतयोरन्तरं यच्च तदभावे नपुंसकम्' ॥

इति स्मृत्युक्तलक्षणलक्षितलिङ्गस्यासार्वत्रिकत्वेन 'दारान्' इत्यादौ नत्वानापत्त्या 'स्त्रियाम्' इति सूत्रे "अवश्यं कश्चित् स्वकृतान्त आस्थेयः" इत्यादिना सार्वत्रिकगुणावस्थारूपपारिभाषिकलिङ्गस्य शास्त्रीयकार्योपयोगिनो भाष्यकृताऽभ्युपगमेऽपि गुरुसंज्ञाविज्ञानान्नत्वादिशास्त्रप्रवृत्तौ लौकिकलिङ्गस्याप्याश्रयणं पुमादिसंज्ञानां सङ्ख्यासंज्ञाया इवाधिकसंग्रहार्थं प्रवृत्तत्वेऽपि मतसिद्धार्थनिरासार्थमप्रवृत्तेः । अत एव

'आविर्भावस्तिरोभावः स्थितिश्चेत्यप्यपायिनः ।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेन व्यवस्थिताः' ॥

इत्यत्रापिनाऽलौकिकलिङ्गमपि समुच्चितवान् हरिः । तत्र सति सम्भवे सामानाधिकरण्यसम्बन्धेन लौकिकपुंस्त्वविशिष्टशास्त्रीयलिङ्ग एव पुमादिशब्दानां शक्तिर्न केवलशास्त्रीये, नापि लौकिके । असम्भवे तु शास्त्रीय एव । अत एव 'पशुना यजेत' इत्यादौ पशुस्त्रिया कृते यागे वैगुण्यम् । तत्र लौकिकपुंस्त्वविशिष्टशास्त्रीयपुंस्त्वस्यैव शब्देन प्रतिपादनादित्याहुः ।

अथ लिङ्गे शक्तिग्रहविषयताया अभावेन प्रातिपदिकार्थत्वाभावात् 'त्रिकम्' इति पक्षोऽनुपपन्न इति चेन्न, "स्वमोर्नपुंसकात्" (पा० सू० ७ । १ । ८३) इत्यादिसूत्रप्रामाण्येन 'पुल्लिङ्गादिविशिष्टोऽयं घटो घटपदवाच्यः' इत्याकारकशक्ति-

चतुष्कम्—सङ्ख्यासहितं त्रिकमित्यर्थः ।

पञ्चकम्—कारकसहितं चतुष्कमित्यर्थः ।

नन्वन्वय-व्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम्, तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेत्, सत्यम्, प्रत्ययवर्जिते 'दधि पश्य' इत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते, लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्च ।

प्रभा

अन्वयेति—तत् (कारण) सत्त्वे सत्त्वम् (कार्यस्य) अन्वयः, तदभावेऽ (कारणाभावे) भावः (कार्य्याभावः) व्यतिरेकः । तथाच 'अजा' इत्यादौ टाप्सत्त्वे स्त्रीत्वप्रतीतिः, टाबाद्यभावे स्त्रीत्वप्रतीत्यभाव इत्यन्वयव्यतिरेकाभ्यामिति भावः । तत् = लिङ्गादिकम् । ततः = प्रत्ययात् । बोधादिति—लिङ्गस्येति शेषः । प्रकृतेरेवेति—नच प्रकृतेर्लिङ्गादौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि बोधदर्शनात्, प्रकृतिमात्रे गृहीतशक्तिकस्य पुंसो लिङ्गादिबोधोदयात्, प्रकृतेरेव लिङ्गानुशासनस्य दृष्टत्वाच्च । प्रकृतेर्वाचकत्वादेव 'स्वौजसमौट्' इत्यनेन 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे (प्रकृत्यर्थे) भवन्ति' इति न्यायेनैव विभक्तीनां सङ्ख्यार्थकत्वे 'द्व्येकयोः' 'कर्मणि द्वितीया' इत्यादीनां नियमार्थत्वं भाष्यकृदुक्तं सङ्गच्छते ।

केचित्तु—सङ्ख्यामात्रस्य विभक्त्यर्थत्वम्, शेषचतुष्टयस्य प्रातिपदिकार्थत्वमाहुः । तत्र घटत्वविशिष्टे घटे, लिङ्गे, सङ्ख्यायाम्, कारके च खण्डशः शक्तिः । घटे लिङ्ग-सङ्ख्ययोर्विशेषणतयाऽन्वयः । कारकस्य तु विशेष्यत्वम् । लिङ्गसङ्ख्याविशिष्टे घटादौ शक्तिकल्पनायान्तु संसर्गस्यापि शक्तिविषयतापत्त्या गौरवम्, 'राजपुरुषः' इत्यादौ सङ्ख्यानवच्छिन्नबोधासिद्धिश्च । विशकलिते शक्तिस्वीकारे तु न सङ्ख्यानवच्छिन्नबोधानुपपत्तिः, सङ्ख्याविषयकतात्पर्यग्राहकाभावेनानुपस्थितेः । परे तु घटे लिङ्गादिविशिष्टे च शक्तिरिति न सङ्ख्यानवच्छिन्नबोधानुपपत्तिः ।

ननु 'पञ्चकं नामार्थः' इति स्वीकारे 'नामार्थप्रकारकबोधम्प्रति विभक्तिजन्योपस्थितिः कारणम्' इति कार्यकारणभावविलयापत्तिः, इष्टापत्तेः, द्योत्यार्थमादाय तदुपपत्तेश्च । लिङ्गानुशासनस्येति—वक्ष्यमाणयुक्त्या

दर्पणव्याख्या

ग्रहाभ्युपगमेन सामञ्जस्यात् । 'शब्दनिष्ठमेव लिङ्गं नत्वादिप्रवृत्तौ निमित्तम्' इतिमते शब्दार्थयोरभेदे लिङ्गस्य साक्षादितरथा स्वाश्रयवाच्यत्वसम्बन्धेनार्थांशे प्रकारकत्वाद्धर्मितावच्छेदकत्वेन धर्मितावच्छेदकसमानाधिकरणत्वेन शक्तिग्रहविषयताया नियामकत्वस्य फलबलेन कल्पनात् ।

वस्तुतस्तु पारिभाषिकलिङ्गमप्यर्थं एव स्वीकर्त्तुमुचितम् । पुल्लिँङ्गः शब्द इत्यादौ पुल्लिँङ्गादिशब्दा अर्शं आद्यजन्ताः । आत्मनि सर्वस्याध्यस्तत्वेन परम्परया तत्रापि स्त्यानादिसत्त्वात् "आत्मा ब्रह्म" इत्यादिप्रयोगोपपत्तिः । स्त्यानम् = तिरोभावोऽपचय इति यावत्, उपचयादिविवक्षाया एव प्रयोगनियामकत्वेन तेषामेकत्र विरोधेऽपि क्षत्यभावात् । अत एव "सामान्ये नपुंसकम्" इति तत्र तत्रोक्तं सङ्गच्छते । उत्कर्षापकर्षसत्त्वेऽपि तदविवक्षायामिति तदर्थं इत्याद्यन्यतोऽवधार्यम् ।

लिङ्गादित्रयस्य नामार्थत्वं साधयितुं शङ्कते—❀ नन्विति ❀। ❀ अन्वयव्यतिरेकाभ्यामिति ❀ टाबादिसमभिव्याहारे अश्वादिपदात् स्त्रीत्वबोधादभावे च तदबोधादेवंरूपाभ्यामित्यर्थः । एवमन्यत्राप्यूह्यम् । तथाच ताभ्यां लिङ्गादेः प्रत्ययार्थत्वावधारणान्न लिङ्गादित्रिकस्य प्रकृत्यर्थत्वमित्यर्थः । दधि पश्यतीत्यादावित्यादिना 'अयं याति' 'इयमायाति' इत्यादिपरिग्रहः । ❀ बोधादिति ❀ कर्मत्वादिबोधादित्यर्थः । तथाच व्यतिरेकव्यभिचारेणान्यलभ्यत्वाच्च तदर्थत्वाभावान्नामार्थत्वमेव तेषामावश्यकमिति भावः । वक्ष्यमाणयुक्त्या सङ्ख्याकारकयोः प्रत्ययार्थत्वेऽपि लिङ्गस्य प्रकृत्यर्थत्वमेव युक्तमित्याशयेनाह—❀ लिङ्गेति ❀ ।

SGDF Sri Gargeshwari Digital Foundation

अत एवैषु पक्षेषु न निर्बन्धः (प्रत्ययस्यैव वाचकताया युक्तत्वात्)।

प्रभा

सङ्ख्या-कारकयोर्विभक्त्यर्थत्वेऽपि लिङ्गस्य तु लिङ्गानुशासनप्रामाण्यात्, 'गीः' 'पुः' इत्यादौ प्रत्ययं विनापि बोधदर्शनाच्च नामार्थत्वमेव युक्तम्। अत एव=प्रकृतिप्रत्ययोरन्यतरस्य वाचकत्वे तुल्यबलत्वादेव। न निर्बन्ध इति—अयमेव पक्षो युक्त इत्यत्राग्रहो नेत्यर्थः।

प्रत्ययस्यैव वाचकतेति—अनन्तप्रकृतीनां वाचकत्वे शक्तावच्छेदकत्वे गौरवादल्पतरप्रत्ययानां वाचकत्वे तु तेषां परिगणितत्वेनाल्पतरधर्मेष्वेव शक्तावच्छेदकत्वमिति लाघवमिति भावः।

अत्र प्रत्ययस्य वाचकत्वसमर्थनमयुक्तम्, पूर्वत्र 'न निर्बन्धः' इत्युक्त्वा प्रत्ययस्य वाचकत्वं समर्थ्य च पुनर्न निर्बन्ध इत्यस्यैव वाक्यपदीयकारिकया समर्थितत्वात्। अन्यथा प्रत्ययस्य वाचकत्वव्यवस्थापनानन्तरमुभयपक्षसमर्थिका 'द्योतिका वाचिका वा' इति वाक्यपदीयोक्तिरसङ्गता स्यादिति पञ्चोलिनः।

दर्पणव्याख्या

❀ अत एवेति ❀ प्रकृतिप्रत्यययोरन्यतरस्य वाचकत्वे युक्तिसाम्यादेवेत्यर्थः ❀ निर्बन्ध इति ❀ इदमेव मतं मुख्यमित्यभिनिवेश इत्यर्थः। तदेवाह—❀ प्रत्ययस्यैवेति ❀। ❀ युक्तत्वादिति ❀। अनन्तानां प्रकृतीनां शक्तत्वकल्पनापेक्षया कतिपयस्वादीनामेव तत्कल्पने लाघवादिति भावः।

केचित्तु—टाबादिकं विनापि वागादिशब्देभ्यः स्त्रीत्वस्याव्युत्पत्तिपक्षे रामज्ञानादिशब्देभ्यः पुन्नपुंसकत्वयोर्बोधस्य सार्वजनीनानुभवसिद्धत्वाल्लिङ्गस्य प्रातिपदिकार्थत्वमेव। लुप्तविभक्तिस्मरणादपि बोधाङ्गीकारेण सङ्ख्याकारकयोर्विभक्तिवाच्यतैव। उक्तञ्च—

स्वार्थो द्रव्यञ्च लिङ्गञ्च सङ्ख्या कर्मादिरेव च।
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः॥ इति।

अग्रिमाः = लिङ्गान्ता इत्याहुः।

नन्वेकवचनत्वादेरनुगतस्य दुर्वचतया कथं तेन रूपेण स्वादीनामेकत्वादिवाचकत्वम्। तथाहि—न तावदेकत्वादिवाचकत्वं तत्, वाचकतायाः शक्तारूपत्वेनात्माऽऽश्रयात्, बोधकतारूपत्वे तु द्विवचनादीनामपि शक्तिभ्रमेणैकत्वादिबोधकतयाऽतिप्रसङ्गात्,' बोधकत्वं शक्तिः'इति मते आत्माश्रयस्य दुर्वारत्वाच्च। नाप्येकवचनत्वादिकं जातिः, सुत्वादिना साङ्कर्य्यात्। नच पाणिनिसङ्केतसम्बन्धेनैकवचनादिपदवत्त्वं तत्, तादृशसङ्केतस्य सङ्केतत्वेन सम्बन्धत्वे कस्यचिदेकवचनादिपदादौजसादिर्बोद्धव्य इत्याकारकसङ्केतस्यापि सम्भवेनातिप्रसङ्गतादवस्थ्यात्। पाणिनिसङ्केतत्वेन तत्त्वे तु व्याकरणान्तरप्रणेतृपुरुषान्तरस्यापि पाणिनिसङ्केततुल्यसङ्केतसम्बन्धेन एकवचनादिपदवत्त्वस्य, 'डित्थादिपदात् स्वौजसादिर्बोद्धव्यः' इत्याकारकपुरुषविशेषीयसङ्केतसम्बन्धेन डित्थादिपदवत्त्वस्य वा विनिगमनाविरहेण शक्तावच्छेदकत्वापत्तेरिति चेन्न,

सुत्वामुत्वादिनैवैकवचनस्य शक्यत्वाभ्युपगमेनोक्तदोषानवकाशात्, कार्य्यतावच्छेदककोटावव्यवहितोत्तरनिवेशाच्च न परस्परजन्योपस्थितौ व्यभिचारः। नच 'दधि' 'मधु' इत्यादौ व्यभिचारः, तत्र लुप्तविभक्त्यनुसन्धानेनैव बोधाभ्युपगमात्। कथमन्यथा द्योतकतावादिमतेऽपि केवलप्रातिपदिकात् तदुपपत्तिः, द्योतकस्यैवाभावात्।

नचानेकसुत्वादीनां शक्तत्वावच्छेदकत्वे गौरवात् प्रातिपदिकत्वस्यैकस्य तत्त्वमुचितम्; लाघवादिति शङ्क्यम्, उक्तरीत्या प्रातिपदिकत्वस्याप्यनुगतस्य दुर्वचत्वात्, तदज्ञानेऽप्येकत्वादिबोधस्यानुभवसिद्धत्वात्। पदत्वेन वर्णत्वेन वा शक्तत्वे तु विभक्तेरपि वाचकतासिद्धेः, एकत्वाद्युपस्थितेः प्राग्वर्णत्वाद्युपस्थितेरप्यनावश्यकत्वात् तदनुरोधेन तत्कल्पने गौरवाच्च। पदार्थयोर्विशेष्यविशेषणभावेनान्वये भिन्नपदजन्योपस्थितेस्तत्र तथैकप्रकृत्युपस्थाप्यघटैकत्वाद्योस्तद्भावेन परस्परमनन्वयापत्तिश्चेति स्वादीनां सङ्ख्यादिवाचकत्वमेवेति भावः।

SGDF Sri Gargeshwari Digital Foundation

'द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः' ।

प्रभा

द्योतिकेति—अत्र 'द्वित्वादीनां विभक्तयः' इत्युक्त्या सङ्ख्याकारकयोर्वाचकत्वे एव मतभेदो दर्शितः, नतु लिङ्गांशे, इति लिङ्गं प्रातिपदिकार्थ एवेति ध्वन्यते। अत एव लिङ्गस्य टाबादिद्योत्यत्वेन विशेषणतयैव भानम्। तदुक्तम्—

स्वार्थो द्रव्यश्च लिङ्गञ्च सङ्ख्याकर्मादिरेव च।
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः ॥ इति।

ननु सङ्ख्या-कारकयोर्विभक्तिवाच्यत्वपक्षे यत्र विभक्तेर्लुक् तत्रोच्चरितशब्दाभावात् संख्या-कारकयोः शाब्दबोधो न स्यात्। नच स्मृतया विभक्त्या बोधः, 'उच्चरितशब्दः प्रत्यायको नानुच्चरितः' इति भाष्यविरोधादिति चेन्न, तत्र लुग्विधायकशास्त्रबलेन प्रकृतेरेव तत्रार्थे शक्तिकल्पनात्। 'विभक्तिस्मरणाद् बोधः' इति नैयायिकोक्तं तु न युक्तम्, 'घटं पश्य' इत्यादौ शब्दाश्रिततया स्मृतस्याकाशस्यापि शाब्दबोधापत्तेरिति पञ्चोलिनः।

ननु सङ्ख्याकारकयोरपि प्रातिपदिकार्थत्वमेवास्तु, सुप्त्वाद्यनेकधर्माणां शक्तावच्छेदकापेक्षया सङ्केतसम्बन्धेन प्रातिपदिकपदवत्त्वमेकमेव शक्तावच्छेदकमस्त्विति चेन्न, सङ्केतसम्बन्धेन नामपदवत्त्वस्य, घटादिपदवत्त्वस्य च विनिगमनाविरहेण शक्तावच्छेदकत्वे गौरवस्य दुर्द्धरत्वात्। विस्तरस्तु

दर्पणव्याख्या

द्योतकतावादिनां पुनरयमाशयः—न प्रकृतीनां घटैकत्वाद्योर्विद्.कलितयो. शक्तिर्येनोक्तदूषणावकाशः स्यात्, किन्त्वेकत्वविशिष्टे घटादौ पृथक्शक्त्यनभ्युपगमेनान्वयस्यैवाभावात्, अनन्तप्रकृतीनामेकत्वादिशक्ताकल्पनगौरवस्याप्यभावाच्च, घटपदस्यैकत्वे शक्तिभ्रमदशायाम् 'घटः प्रमेयः' इत्यादिवाक्यादेकत्वं प्रमेयमिति बोधस्य सर्वसिद्धतया तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादिपदजन्यैकत्वाद्युपस्थितेर्हेतुताया आवश्यकत्वाच्च।

किञ्च विभक्तेः सङ्ख्यावाचकत्वमते समानविषयकानुमितिसामग्रीप्रतिबन्धकतायां प्रातिपदिकजन्यघटाद्युपस्थितिः स्वादिजन्यैकत्वाद्युपस्थितिश्च निवेश्या। तथाच तयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्ध्यप्रतिबन्धकभावबाहुल्यम्। मन्मते तदुभयस्थलीयैकैकविशिष्टविषयकोपस्थितिस्तत्र निवेश्येति लाघवम्, विशिष्टविषयकोपस्थितेरप्येकत्वादिप्रकारतानिरूपितघटादिविशेष्यताशालित्वेन, घटादिविशेष्यतानिरूपितैकत्वादिप्रकारताशालित्वेन वा निवेश इत्यत्र विनिगमकाभावात् साम्यमिति तु न, भवन्मते यत्र योग्यताज्ञानघटोपस्थित्येकत्वोपस्थितीनां तिसृणां विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्ध्यप्रतिबन्धकभावषट्कम्, तत्र मन्मते योग्यताज्ञाने विशिष्टविषयकोपस्थितेः प्रत्येकं विशिष्टोभयरूपेण वैशिष्ट्यं निवेश्य द्वयम्, प्रत्येकं तादृशरूपावच्छिन्नायामुपस्थितौ योग्यताज्ञानस्य वैशिष्ट्यं निवेश्य च द्वयमिति चतुष्टयमिति लाघवात्। अतिप्रसङ्गपरिहारस्तु तत्तत्सङ्ख्याबोधे तत्तद्वचनसमभिव्याहारस्य हेतुत्वकल्पनात्।

एवम् 'कारकं विभक्त्यर्थः' इति कल्पे तत्तत्कारकबोधे स्वोत्तरतत्तद्विभक्तिसमभिव्याहारस्य हेतुत्वकल्पनात् स बोध्यः। स च 'अम्घटः' इत्यतो बोधवारणाय वाचकतावादिनामप्यावश्यकः। एवं रीत्योपसर्गाणामपि द्योतकत्वं बोध्यमिति पक्षद्वयेऽपि हरिसम्मतिमाह ❀ द्योतिका वाचिका वेति ❀।

यद्वा सङ्ख्यावतोऽर्थस्य समुदायोऽभिधायकः।

इति त्वस्योत्तरार्द्धम् 'घटः' इत्याद्याकारकानुपूर्व्यवच्छिन्नविभक्त्यन्तसमुदायो वैकत्वादिविशिष्टघटादिवाचक इति तदर्थः। पदस्फोटमवलम्ब्य चेदम्। नामार्थ—धात्वर्थयोः साक्षादभेदातिरिक्तसम्बन्धेनान्वयस्याव्युत्पन्नत्वादभिधानानभिधानव्यवस्थानुपपत्तेश्च कारकविभक्त्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात् ।

शास्त्र इति—बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम्, प्राधान्येन तु सरूपसूत्रादौ व्यक्तम् ॥२५॥

शब्दस्तावच्छाब्दबोधे भासते,

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

प्रभा

व्युत्पत्तिवादादौ द्रष्टव्यः । शास्त्र इतीति—अस्य कारिकायामुक्तिरिति शेषः । तथाच बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुं कारिकायां शास्त्रे इत्युक्तिरित्यर्थः ॥२५॥

शब्दस्य शाब्दबोधविषयत्वे विप्रतिपन्नान्नैयायिकादीन् प्रति शाब्दबोधविषयत्वं द्रढयितुमाह—शब्दस्तावच्छाब्दबोध इति । प्रत्यय इति—बोध इत्यर्थः । स च बोधो निर्विकल्पकातिरिक्त एव, तत्र शब्दभाने निर्विकल्पकत्वासिद्धेरिति गुरवः । नतु शब्दजन्यो बोध एव । शब्दानुगमात् = शब्दनिरूपितविषयितारूपसम्बन्धात् । ऋते = विना । यः = प्रत्ययः शब्दनिरूपितविषयितारूपसम्बन्धादृते भवेत् स प्रत्ययो लोके

दर्पणव्याख्या

यदि च नामार्थधात्वर्थयोर्भेदेन परस्परान्वयापादनम्, तण्डुलकर्मकपाकविशेष्यकबोधे द्वितीयान्ततण्डुलपदसमभिव्याहृतपचतीत्यादावानुपूर्वीविशेषज्ञानस्य हेतुत्वकल्पनयैव निरसितुं शक्यम् । अनभिहिताधिकारस्यापि सङ्ख्या विभक्त्यर्थः इति पक्षे एवोपयोगस्तत्पक्षे "कर्मणि द्वितीया" (पा० सू० २ । ३ । २) "द्व्येकयोः" (पा० सू० २ । २ । २२) इत्यादीनामेकवाक्यतयैव प्रवृत्तेस्तत्र विशेष्यविशेषणभावे कामचारात् । एकस्य यत्कर्म, कर्मणि यदेकत्वमिति द्विधा वाक्यार्थसम्पत्तिः प्रथमकल्पे द्वितीयादीनाम्, तिङादीनाञ्च कर्मादिवाचकतयान्यतरेणाभिधानेन्यतरस्य गतार्थत्वादनभिहितसूत्रमफलम् । द्वितीये तु कृता कर्मणोऽभिधानेऽपि तद्गतसङ्ख्याया अनभिधानात् प्राप्तां द्वितीयां वारयितुं तदवसरः । सति तस्मिन्ननभिहितकर्मगतत्वाभावान्न द्वितीयादिप्रसङ्गः । सङ्ख्यापि यदि प्रातिपदिकार्थस्तदोक्तवाक्यार्थासम्भवात् सूत्रवैयर्थ्यमेव ।

नन्वनभिहितसूत्राभावे 'भीष्मं कटं करोति' इत्यादौ भीष्मादिपदाद् द्वितीयाद्यनुपपत्तिः, विशिष्टस्यैव कटादेः क्रिययेप्सिततमत्वात् प्रातिपदिकार्थमात्रे प्रथमाप्रसङ्गात् । तत्सूत्रपक्षे त्वभिधानस्य कृदादिभिः परिगणनात् कटप्रकृतिद्वितीयायाऽभिहितेऽपि तस्मिन् भीष्मादिपदेभ्यो द्वितीयादिविभक्तेः सूपपादत्वादिति चेन्न,

विशिष्टस्य विधित्सायां धर्मिमात्रेण तोषाभावाद्धर्माणामपीप्सिततमत्वात् कर्मत्वम्, तस्य चान्यवाचकपदोत्तरद्वितीययानभिधानात् । 'कृतः कटः' इत्यादौ तु प्रत्ययस्य धातूत्तरवर्त्तित्वेन तेन प्रातिपदिकार्थविशेषनिष्ठकर्मत्वस्यानभिधानाद्विशेषाद्धर्मधर्मिनिष्ठतदभिधानमिति भीष्मादिविशेषणवाचकपदेभ्यः प्रथमोपपत्तिरिति न कापि तदनारम्भेऽनुपपत्तिः । तदुक्तं भाष्ये "कटोऽपि कर्म भीष्मादयोऽपि" इति, तदाऽस्तु कारकमपि प्रातिपदिकार्थः, अस्मिन्नपि पक्षे कारकस्य प्रकृत्यर्थव्यक्तिविशेषणतैव विभक्तिद्योत्यत्वादिति केचित् ।

नचैवं प्रातिपदिकार्थप्रकारकबोधे सुब्जन्योपस्थितेर्हेतुत्वं विलीयेतेति वाच्यम्, इष्टत्वात् । एतत्कल्पे जातिलिङ्गसङ्ख्याकारकविशिष्टद्रव्यस्य प्रातिपदिकाद् बोधनोक्तहेतुहेतुमद्भावस्य गगनकुसुमायमानत्वाद् विशेष्यतैव तु कारकस्योचितानुभवात्, क्रियान्वयानुरोधाच्चेति पञ्चकपक्षस्योपपत्तिरिति । ❀ बहुषु स्थलेष्विति ❀ भाष्याद्याकरग्रन्थेष्वित्यर्थः । तत्र पञ्चकचतुष्कपक्षौ तत्रोपपदमित्यत्र कैयटेनोपन्यस्तौ, त्रिकमिति पक्षस्तु वृत्तिकारेण । ❀ प्राधान्येनेति ❀ तत्र सर्वेषामेव पक्षाणां भाष्यकृतोपन्यासादिति भावः । सूत्रादावित्यादिनाऽनभिहितादिसूत्रसंग्रहः ॥ २५ ॥

'घटमानय' इत्यादिशाब्दबोधे घटादिशब्दस्य भाने प्रमाणाभावेन तस्य प्रातिपदिकार्थत्वसाधनमनुचितमित्याशङ्कां परिहरति—❀ शब्दस्तावदिति ❀ । तत्र हरिवाक्यं प्रमाणयति—❀ न सोऽस्तीति ❀ । ❀ प्रत्ययः— ❀ शाब्दबोधात्मकः । ❀ शब्दानुगमादिति ❀ शब्दविषयकत्वादित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इत्याद्यभियुक्तोक्तेः ।

'विष्णुमुच्चारय' इत्यादावर्थोच्चारणासम्भवेन, विना शब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः ।

प्रभा

नास्तीत्यर्थः । सर्वं ज्ञानं तादात्म्यसम्बन्धेन शब्देनानुविद्धमित्यतः शब्दोऽपि शाब्दबोधे भासते इत्यर्थः । ज्ञाने शब्दनिरूपितं तादात्म्यमारोपितमेवेति बोधयितुमिवशब्दप्रयोगः । यः शब्दः ज्ञातः सन्नर्थमुपस्थापयति स एव शब्दः प्रकारतया भासते, नतु शब्दान्तरम् ।

केचित्तु शब्दार्थयोस्तादात्म्यस्यारोपितत्वेनार्थभाने तत्तादात्म्यापन्नशब्दस्यापि भानमित्यसङ्गतम्, भ्रमस्थले शुक्तौ रजतप्रतीतावपि रजतस्याक्षतत्ववदिति शब्दार्थयोर्भेदेऽपि ज्ञानसामान्यसामग्र्या एव शब्दविषयकज्ञानजनकत्वं कल्प्यतेऽनुभवबलादतः शब्दभानोपपत्तिः । अर्थज्ञानेनोद्बोधकविधयोपस्थितस्य शब्दस्य चाक्षुषादिप्रत्यक्षेऽपि न भानानुपपत्तिरित्याहुः । तदपरे न क्षमन्ते, उपस्थापकार्थज्ञाने उपस्थाप्यस्य ज्ञानादर्शनात् । अतः 'घटादिशब्दः, तत्तच्छाब्दबोधविषयः, अभियुक्तोक्तसकलकत्वज्ञानविषयत्वात्' इति शाब्दबोधविषयत्वं साध्यते । यावज्ज्ञानविषयत्वं तदन्तर्गतयत्किञ्चिज्ज्ञानविषयत्वं विना न सम्भवतीति नाप्रयोजकत्वम् । घटादिशब्दे तत्तच्छाब्दबोधविषयत्वपुरस्कारेण 'न सोऽस्ति' इत्यभियुक्तोक्तवाक्यजन्यबोधविषयत्वमादाय न सिद्धसाधनमित्याहुः ।

वस्तुतस्तु—शब्दार्थयोर्वास्तविकतादात्म्यमादायार्थभाने शब्दभानमुपपादनीयम् । खड्गादिशब्दोच्चारणे मुखोच्छेदादिरूपदोषस्तु न, मुखोच्छेदादिकारणतावच्छेदकीभूतसंयोगादिसम्बन्धस्य शब्देऽभावादिति शाब्दिकाः । नन्वस्तूक्तरीत्या शब्दस्य शाब्दबोधविषयत्वम्, परन्तु तस्य घटादिशब्दशक्यत्वे मानाभाव इत्यत आह—विष्णुमिति—शब्देनार्थमात्रस्य बोधेऽर्थे उच्चारणकर्मताया बाधेन 'विष्णुमुच्चारय' इत्यतो बोधानापत्तिः । शब्दस्यापि शक्यत्वे तु तत्रोच्चारणकर्मत्वसम्भवेन विष्णुरूपार्थबोधकं शब्दमुच्चारय इति बोधः । अत एव

'उदेति सविता ताम्रस्ताम्र एवास्तमेति च' ।

इत्यादौ उदयास्तसमययोर्महतामेकरूपत्वबोधनाय कथितपदत्वस्यादोषत्वमालङ्कारिकैः स्वीकृतम् । शाब्दबोधे शब्दस्याभाने तूभयत्राप्येकप्रतीतेरेव सत्त्वात् पदान्तरोपादानेऽप्येकरूपत्वलाभेनात्र कथितपदत्वस्य दोषत्वं दुर्वारमेव स्यात् । शब्दभानस्वीकारे तु ताम्रपदभिन्नरक्तादिपदोपादाने पदान्तरस्यैव शाब्दबोधविषयत्वेनैकरूपत्वानापत्तिः । सोऽपि=शब्दोऽपि । प्रातिपदिकार्थ इति—शब्देऽर्थे च एकवृन्तगतफलद्वयन्यायेन खण्डशः शक्तिः । तथाच 'विष्णुमुच्चारय' इत्यादौ वाचकत्वसम्बन्धेनार्थः शब्दे विशेषणम् । 'विष्णुं पश्य'

दर्पणव्याख्या

❀ अनुविद्धमिति ❀ विशिष्टमित्यर्थः । अनुव्यवसायो यथाऽर्थेन विशिष्टज्ञानं विषयीकरोति तथा शब्देन विशिष्टमपीत्यर्थः । वैशिष्ट्यञ्चार्थद्वारकं बोध्यम् । घटपदजन्यबोधानन्तरम् 'घटं शाब्दयामि' इत्येवानुव्यवसायान्न कलशं कुम्भं वेत्यत एव "उदेति सविता ताम्रः" (भानुः) इत्यादौ न पौनरुक्त्यम्, तत्पदानुपादाने उदयास्तयोः शाब्दबोधे ऐकरूप्यानिर्वाहादिति भावः ।

ननु तावताऽपि शब्दभानं सिद्धम्, न विशेष्यत्वेनेति कथं शब्दस्य शब्दार्थत्वसिद्धिरत आह— ❀ विष्णुमिति ❀ अर्थोच्चारणासम्भवेनेति वदता लक्षणाऽवसरोऽपि सूचितः । ❀ असङ्गतिरिति ❀ अनुपपत्तिरित्यर्थः । ❀ सोऽपि ❀ = शब्दोऽपि । ❀ प्रातिपदिकार्थ इति ❀ प्रकारान्तरेणोपस्थितस्य विशेष्यत्वासम्भवादिति भावः ।

SGDF Digital Foundation

नच लक्षणया निर्वाहः, निरूढलक्षणायाः शक्त्यनतिरेकात्, 'जबगडदशमुच्चारय' इत्यादौ शक्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च ।

प्रभा

इत्यादिस्थले स्ववाच्यत्वसम्बन्धेन शब्दोऽर्थे विशेषणम्। नचैवमुपस्थितीयमुख्यविशेष्यतायाः शब्देऽर्थे च 'घटमानय' इत्यत्रार्थविशेषणीभूतशब्दे 'घटमुच्चारय' इत्यादौ शब्दविशेषणीभूतेऽर्थे च सुन्दरादिपदार्थान्तरान्वयापत्तिरिति वाच्यम्, तत्पदप्रयोज्यशाब्दबोधीयविशेष्यतानिरूपितप्रकारत्वासमानाधिकरणोपस्थितीयविशेष्यतासम्बन्धेनोपस्थितेः कारणत्वस्वीकारात्। प्रकृते विशेषणीभूते शब्दे, अर्थे च शाब्दप्रकारतासमानाधिकरणैवोपस्थितीयविशेष्यतेति न दोषः।

नन्वेवं सुन्दरादिपदार्थस्य घटरूपार्थेऽन्वयाभिप्रायेण 'सुन्दरं घटमानय' इत्यस्याप्यनापत्तिः, अर्थनिष्ठविशेष्यतायाः 'घटमुच्चारय' इत्यत्र प्रकारतासमानाधिकरणोपस्थितीयविशेष्यताया अर्थेऽपि सत्त्वादिति चेन्न, इतरपदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति तत्पदप्रयोज्यशाब्दबोधीयविशेष्यतानिरूपितप्रकारताश्रयत्वप्रकारकतात्पर्यीयविशेष्यत्वाभावसमानाधिकरणोपस्थितीयविशेष्यतासम्बन्धेनोपस्थितेः कारणत्वात्। 'सुन्दरं घटमानय' इत्यत्र च 'घटशब्दः घटपदप्रयोज्यघटार्थनिष्ठविशेष्यतानिरूपितशाब्दबोधीयप्रकारताश्रयो भवतु' इत्याकारकतात्पर्य्यीयविशेष्यतासमानाधिकरणैवोपस्थितिविशेष्यतेति न पदार्थान्तरान्वयस्तत्र। घटरूपेऽर्थे च तादृशप्रकारताश्रयत्वप्रकारकतात्पर्य्यीयविशेष्यताया अभावेन तादृशतात्पर्यीयविशेष्यत्वाभावसमानाधिकरणोपस्थितीयविशेष्यतासम्बन्धेनोपस्थितेः सत्त्वात्तत्र सुन्दरादिपदार्थान्वय उपपद्यते।

लक्षणयेति—स्ववाच्यवाचकत्वरूपसम्बन्धात्मिकया, तादृशसम्बन्धमूलिकया वा लक्षणयेत्यर्थः। निरूढेति—निरूढत्वञ्च—'स्वजन्यशाब्दबोधसमानाकारकशाब्दबोधध्वंसकालिकस्वजन्यशाब्दबोधसामान्यकत्वरूपम्'। स्वपदं लाक्षणिकशब्दपरम्। तथा च निरूढलक्षणास्थले गङ्गापदनिष्ठलक्षणाज्ञानजन्यतटविषयको यो बोधस्तादृशबोधसमानाकारकस्तटविषयको बोधः कस्यचित् ततः पूर्वं जात एव भवेत्, गङ्गापदेन तादृशबोधस्यानादित्वादिति तद्बोधध्वंससमानकालिक एव सर्वोऽपि गङ्गापदजन्यतटविषयको बोध इति लक्षणसमन्वय ऊहनीयः। एतच्चानादिलक्षणायाम्, शक्तौ चाक्षतमित्याह—शक्त्यनतिरेकादिति—शक्तिरूपत्वादित्यर्थः। निरूढलक्षणायां शक्तौ चानादितात्पर्यस्यापेक्षितत्वादिति भावः। लक्षणाया असम्भवस्थलानुरोधेनाह—जबगडेति—जबगडदशेति समुदायस्य कुत्रापि शक्त्यभावाल्लक्षणा न सम्भवतीति भावः। नन्वेकदा समुदायस्योच्चारणकर्मत्वमसम्भवि, वर्णानां क्षणस्थायित्वात्। तथा च प्रत्येकस्योच्चारणकर्मतयैव समुदाये कर्मत्वमारोपणीयमिति प्रत्येकवर्णानामर्थस्य कोशे प्रसिद्धतया शक्यसम्बन्धरूपा लक्षणा स्यादिति

दर्पणव्याख्या

❀ लक्षणया ❀ स्ववाच्यवाचकत्वसम्बन्धरूपया ❀ निर्वाह इति ❀ तावताऽपि पदवाच्यत्वासिद्धेरिति भावः। ❀ निरूढेति ❀ निरूढत्वञ्च लक्षणायामनादितात्पर्य्यग्रहाधीनत्वम्, अनादित्वञ्च तत्र स्वजन्यबोधसमानाकारपूर्वपूर्वबोधध्वंसवत्त्वम्। शक्त्यनतिरेकादित्यस्यास्मन्मत इत्यादिः। एतत्तत्त्वमग्रे वक्ष्यते। तस्या असार्वत्रिकत्वमप्याह— ❀ जबगडदशमिति ❀ तत्र समुदायस्य कुत्राप्यशक्तत्वादिति भावः। ❀ अग्रहादिति ❀ मन्मते तु तादृशसमुदायस्यैव तत्पदशक्यतयाऽनुपपत्तिरिति भावः।

ननु तत्र समुदायस्याशक्तत्वेऽपि तद्घटकजकारादिवर्णानामेकाक्षरकोशादौ जैत्रादौ शक्तिप्रतिपादनात्तत्तदर्थवाचकत्वरूप-

SGDF Sri Gurushivam Digital Foundation

अज्ञातायाश्च वृत्तेरनुपयोगात्, 'गावमुच्चारय' इति भाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेः, तेषां शक्त्यभावेन परनये लक्षणाया असम्भवाच्चेत्यभिप्रेत्य षोढाऽपि क्वचित् प्रातिपदिकार्थ इत्याह—

शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा।
नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थो व भासते ॥२६॥

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः।

प्रभा

चेन्न, शक्तावज्ञातायां शक्यसम्बन्धरूपलक्षणाया ज्ञानासम्भवादित्याह—अज्ञातायाश्चेति—प्रत्येकवर्णशक्त्यज्ञानेऽपि उक्तवाक्येन शाब्दबोधदर्शनात्तत्र शब्दस्य प्रातिपदिकार्थत्वमावश्यकम्। गावमिति—गाव इति अपशब्दः तमनुकृत्याह—'गावमुच्चारय' इति। साधुतासम्प्रतिपत्तेरिति—साधुत्वाभ्युपगमादित्यर्थः। तथाच भाष्यम्—न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति···यो हि मन्यतेऽपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति तस्यापशब्द इत्येवापशब्दः स्यात्' इति। एतेनानुकरणस्य साधुत्वं स्पष्टमेव बोधितम्। गाव इति भाषाशब्दे नैयायिकादिमते शक्तेरभावेन तस्य शक्यार्थाप्रसिद्ध्या लक्षणाया असम्भवः। शब्दस्य शक्यत्वे तु गावशब्दरूपार्थेनैवार्थवत्त्वात्प्रातिपदिकत्वेऽम्विभक्तिः सुलभा।

षोढेति—पूर्वोक्तपञ्चकसहितः शब्द इति षोढा प्रातिपदिकार्थः। क्वचिदिति—अनुकार्यानुकरणयोर्भेदविवक्षायामित्यर्थः। पटदिति कुर्वित्यादौ अनुकरणानुकार्ययोर्भेदस्य ध्वनिमयत्व-वर्णमयत्वादिरूपविरुद्धधर्मसम्बन्धेन सिद्धत्वाद् यदि अनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि तथा=प्रातिपदिकार्थः। चेद्=यदि। नो=भेदविवक्षा न। तदा श्रोत्रादिभिः=श्रवणेन्द्रियेण। आदिना शक्तिज्ञानतत्संस्काराणां संग्रहः। सिद्धोऽपि=उपस्थितोऽपि। असौ=शब्दः। अर्थो व=शक्यार्थ इव। 'शात्रवं व पपुर्यशः' इतिवत् इवार्थकोऽत्र वशब्दः। भासते=शाब्दबोधविषयो भवति।

दर्पणव्याख्या

लक्षणायास्तत्र नानुपपत्तिरत आह—❀ अज्ञाताया इति ❀। गङ्गापदस्य वस्तुतः स्वशक्यप्रवाहसामीप्यरूपसम्बन्धस्याग्रहे लक्ष्यार्थबोधस्यानुदयेन ज्ञाताया एव तस्याः पदार्थोपस्थित्यौपयिकत्वेन प्रकृते तदग्रहादुक्तानुपपत्तिस्तदवस्थैवेति भावः।

ननु शाब्दबोधाव्यवहितप्राक्काले तादृशवृत्तिग्रहासत्त्वेऽपि यदा कदाचिज्जाततादृशवृत्तिग्रहादिनोदबुद्धसंस्कारेण पदार्थोपस्थितिद्वारा तादृशशाब्दबोधोपपत्तिः सुकरेत्यत आह—❀ गावमिति ❀ गोशब्दाद्यनुकरणे साधुत्वस्य सर्वैरेवाभ्युपगमादित्यर्थः। ❀ परनय इति ❀ परः नैयायिकस्तन्मते तेषां शक्त्यभावेन तद्घटितलक्षणाया अप्यप्रसराद् वृत्तिमत्त्वात्मकार्थवत्त्वनिबन्धनप्रातिपदिकत्वाद्यनुपपत्तिरिति भावः।

❀ षोढाऽपीति ❀ पूर्वोक्तपञ्चकसहितः शब्दोऽपीत्यर्थः ❀ क्वचित् ❀ = अनुकरणस्थले। तच्चानुकरणं द्विविधम्। ध्वनेर्वर्णस्य च। तत्राद्यम्—पटत्करोतीत्यादि। द्वितीयम्—भुवो वुगित्यादि। ❀ भेदविवक्षेति ❀ पटदित्यादौ ध्वनिमयत्व-वर्णमयत्वाभ्याम्, भुवो वुगित्यादावर्थपदार्थकत्व-शब्दपदार्थकत्वाभ्यां तद्विवक्षेत्यर्थः। ❀ शब्दोऽपि प्रातिपदिकार्थ इति ❀ तथाच "मतौ छः सूक्तसाम्नोः" (पा० सू० ५।२।५९) इति सूत्रे योऽसावाम्नायेऽस्यवामशब्दः पठ्यते स छप्रकृतेरस्यवामीयमित्यादौ पदार्थोऽत एव प्रातिपदिकत्वाच्छसिद्धिरितीति भावः। मूले अर्थेऽवभासते इति पाठे अर्थे=घटादिस्वरूपे अवभासते विशेषणतया विषयो भवतीत्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

यदि न भेदविवक्षा, तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद् भासते। अपिर्हेतौ, उपस्थितत्वाद्भासते इत्यर्थः। अयं भावः—अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात् तत्सिद्धये शक्तिरुपेया, अभेदे प्रत्यक्षे विषयस्य हेतुत्वात् स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति। यद्यप्यतिप्रसङ्गवारणाय

प्रभा

तत्सिद्धये = अनुकार्योपस्थितिसिद्धये। शक्तिरिति—अनुकार्य्यनिरूपिता शक्तिरनुकरणे उपेया = स्वीकार्या।

नन्वनुकरणेनानुकार्योपस्थितये भेदेऽभेदे चोभयत्रानुकार्यनिरूपिता शक्तिरनुकरणे कल्पनीयेति भेदपक्षे एव शक्तेरावश्यकत्वकथनमयुक्तमत आह—अभेद इति। प्रत्यक्ष इति—अनुकरणस्य श्रावणप्रत्यक्षे प्रत्यक्षात्मकज्ञानस्य विषयोऽनुकरणात्मकः शब्दः स चानुकार्यादभिन्न इति स्व (अनुकार्य) प्रत्यक्षरूपां शब्दात्मकानुकरणजन्यामुपस्थितिमादाय शब्दस्य शाब्दबोधविषयतोपपत्तिः, पदप्रत्यक्षस्य विषयविधया पदजन्यत्वात्। अतिप्रसङ्गेति—घटोऽस्तीत्यादौ समवायेन शब्दाश्रयतया आकाशोपस्थितेरपि पदजन्यतया पदजन्योपस्थितिमात्रेण शाब्दबोधविषयत्वे आकाशस्यापि शाब्दबोधविषयत्वापत्तिरूपातिप्रसङ्गेत्यर्थः।

दर्पणव्याख्या

वस्तुतस्तु भूषणपर्य्यालोचनयासावर्थो व भासते इति पाठः। तत्र 'व'शब्दः सादृश्ये, तथाच भेदपक्षे यथाऽनुकार्य्यरूपोऽर्थो विशेष्यतया शाब्दबोधे भासते तथाऽभेदपक्षेऽनुकार्य्याभिन्नानुकरणशब्दोऽपीत्यर्थः। तत्रानुपस्थितस्य कथं भानमित्याकाङ्क्षायामुक्तम्—❀ श्रोत्रादिभिरिति ❀ आदिना—वृत्तिज्ञानतज्जन्यसंस्कारसङ्ग्रह इति केचित्। वस्तुतस्तु-लिप्याद्यनुसंहितस्य तस्य शाब्दे भानसम्पत्तये—आदीति। 'पदोपस्थितमेव शाब्दबोधे भासते' इति त्वसार्वत्रिकमिति भावः। अत एव सारकृता 'अर्थवद्भासते' इति तद्विवृतम्। एतेनाभेदपक्षेऽनुकरणस्यार्थाभावेन तदंशे भानवर्णनमसम्भवदुक्तिकमित्याशङ्का समाहिता। नन्वभेदपक्षेप्यनुकार्य्यस्य शाब्दे कथं भानम्, पदवृत्तिजन्योपस्थित्यभावादत आह—❀ अयम्भाव इति ❀ 'पदानुपस्थितत्वात्' इत्यस्य शाब्दबोधे भानानुपपत्त्येति शेषः। ❀ तत्सिद्धये ❀ शाब्दबोधजनकपदजन्योपस्थितये इत्यर्थः। ❀ शक्तिरिति ❀ 'असम्बद्धस्य तत्स्मृत्यजनकत्वा'दिति शेषः। तथाच पदवृत्तिज्ञानजन्योपस्थितिसद्भावात्तस्य शाब्दविषयता सुलभेति। ❀ अभेदे इति ❀ अभेदविवक्षायामित्यर्थः, तत्पक्षे निरूप्यनिरूपकत्वयोर्भेदनिबन्धनत्वेनानुकरणे तद्वृत्त्यसम्भवादिति भावः। ❀ हेतुत्वादिति ❀ उपस्थितिनिष्ठजन्यतायामन्वेति।

❀ स्वप्रत्यक्षेति ❀ अनुकरणप्रत्यक्षरूपामित्यर्थः। ❀ शाब्दबोधविषयतोपपत्तिरिति ❀ अयमाशयः—अभेदपक्षे स्वप्रत्यक्षरूपामुपस्थितिमादाय यथा शाब्दे शब्दस्य भानम्, तथैव 'घटमानय'इत्यादौ घटादिपदानामपि तां सामग्रीमादाय भानस्य दुर्वारतया शाब्दबोधमात्रस्य शब्दविषयकत्वसिद्धिः, तदुक्तं 'स्वं रूपम्' इति सूत्रे भाष्ये—"नैतद्वक्तव्यम्, किं कारणम्? शब्दपूर्वको ह्यर्थे सम्प्रत्ययः, आतश्च शब्दपूर्वः' योऽपि ह्यसौ नाम्नाऽऽह्वयते नाम च तेन यदा नोपलब्धं तदा पृच्छति—किं भवानाहेति, शब्दपूर्वकश्चार्थस्य सम्प्रत्ययः, इह शास्त्रे शब्दे सम्भवादर्थस्य निवृत्तिः' इति। तत्र—'शब्दपूर्वको हि' इत्यादिना शब्दवृत्तिज्ञानस्य पदार्थोपस्थित्यादावन्वयव्यतिरेकौ प्रदर्श्य 'शब्दपूर्वक' इत्यादिग्रन्थेन प्रकारान्तरं प्रदर्श्यते, शब्दविशेषणक इत्यर्थः। तेनार्थे असम्भवेऽर्थविशेषणतयोपस्थिते शब्दे कार्य्यमित्यर्थः। तथाचोक्तभाष्याच्छब्दतदर्थयोरुभयोरेव शब्दाद्भानम्। यत्र च लोके शब्दे इतरपदार्थान्वयबाधस्तत्रार्थांशे शब्दस्य विशेषणता। यत्र त्वर्थे "विष्णुमुच्चारय" "अग्नेर्ढक्" (पा० सू० ४। २। ३३) इत्यादौ तत्र शब्दांशेऽर्थस्य विशेषणतेति स्पष्टप्रतिपत्तेः, ❀ विषयत्वमनादृत्येति ❀ वाक्यपदीयाच्चेति। ❀ अतिप्रसङ्गेति ❀—घटोऽस्तीत्यतः समवायेनैकज्ञानविषयत्वादिना वोपस्थितस्याकाशादेः शाब्दे भानापत्तिवारणायेत्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

वृत्तिजन्यपदोपस्थितिरेव हेतुः, तथाप्यत्राश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताऽऽश्रयताऽन्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यते इत्यनवद्यम्, सम्बन्धस्योभयनिरूप्यत्वात्, पदादर्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति।

प्रभा

वृत्तिजन्येति—'विषयतया शाब्दबोधं प्रति पदविशिष्टोपस्थितिः कारणम्' इत्यर्थः। **वैशिष्ट्यञ्च**—स्वजन्यत्व—स्वनिष्ठवृत्तिविशिष्टविषयकत्वोभयसम्बन्धेन। **सम्बन्धघटकवैशिष्ट्यञ्च**—स्वाश्रयत्व-स्वनिरूपकत्वान्यतरसम्बन्धेन। तथाचाकाशोपस्थितेः घटपदजन्यत्वेऽपि घटपदनिष्ठवृत्तिविशिष्टविषयकत्वाभावेन नातिप्रसङ्ग इति भावः। तत्रैव घटपदस्य शाब्दबोधविषयतोपपत्तिः, घटपदोपस्थितेरुभयसम्बन्धेन घटपदविशिष्टत्वात्। एवञ्चाभेदानुकरणपक्षेऽनुकार्यस्य वृत्त्यानुपस्थितत्वेऽपि तदुपस्थितौ पदविषयकत्वेन पदजन्यत्वस्य स्वा (वृत्ति) श्रयपदविषयकत्वेन स्व (पद) निष्ठवृत्तिविशिष्टविषयकत्वस्य च सत्त्वेन शाब्दबोधविषयत्वोपपत्तिः। तथाच बोधनिष्ठविषयिताव्यापकविषयिताकत्वं शब्दस्य सिद्धम्, शब्दार्थयोस्तादात्म्येन ज्ञानस्यार्थविषयकत्वे शब्दविषयकत्वस्य नियतत्वात्, अनुभवबलाज्ज्ञानसामान्यसामग्र्या एव शब्दभासकत्वोपगमाच्च।

वृत्तिमत एवेति—आश्रयतासम्बन्धेन शब्दस्य, निरूपकतासम्बन्धेनार्थस्य च वृत्तिमत्तया शाब्दबोधविषयत्वम्। निरूपकतासम्बन्धेन वृत्तिमत एवार्थस्य अर्थवत्सूत्रे ग्रहणान्नाभेदपक्षेऽनुकरणस्य प्रातिपदिकत्वमिति विभक्त्यप्राप्तिः। **कल्प्यत इति**—अन्यतरसम्बन्धेन वृत्तिविशिष्टस्य शाब्दबोधविषयत्वकल्पने गौरवसत्त्वेऽप्यनुभवानुरोधात् तत्कल्प्यत इति भावः। तदुक्तम्—'स्वं रूपम्' इति सूत्रे भाष्ये—'नैतद् वक्तव्यम्। किं कारणम्। शब्दपूर्वको हि अर्थसम्प्रत्ययः। अतश्च शब्दपूर्वको योऽपि ह्यसौ नाम्नाऽऽहूयते। नाम च यदाऽनेन नोपलब्धं तदा पृच्छति किं भवानाहेति। शब्दपूर्वकश्चार्थस्य सम्प्रत्ययः। अत्र शास्त्रे शब्दे कार्यसम्भवादर्थस्य निवृत्तिरिति।' ननूक्तसम्बन्धेन वृत्तिविशिष्टस्य शाब्दबोधविषयत्वमिति कल्पनेऽपि स्व (शब्द) प्रतियोगिकत्वविशिष्टस्य वृत्तिरूपसम्बन्धस्यानुयोगिन्येव सत्त्वेन प्रतियोगिनः शब्दस्य भानानुपपत्तिरित्यत आह—**उभयनिरूप्यत्वादिति**—सम्बन्धस्य शब्दार्थोभयनिष्ठत्वादित्यर्थः। तथाच शब्दप्रतियोगिकः सम्बन्धश्चेत्तदा प्रतियोगितया शब्देऽनुयोगिताया चार्थे तद्वृत्तित्वम्। **पदादर्थस्येवेति**—अर्थस्य यथा वृत्तिरूपसम्बन्धवत्त्वं तथा **तद्बोधकत्वेन**=वृत्तिमदर्थबोधकत्वेन **स्वस्यापि**=शब्दस्यापि वृत्तिरूपसम्बन्धवत्त्वेन बोधविषयत्वमिति भावः।

दर्पणव्याख्या

❀ **वृत्तिजन्येति** ❀ वृत्तिज्ञानजन्येत्यर्थः। ❀ **पदोपस्थितिरिति** ❀ घटपदं शृण्वित्यादौ तादृशपदोपस्थितेर्हेतुताया दर्शनात् प्रकृते च तदभावेऽनुकरणस्य शाब्दविषयत्वं दुर्घटमिति भावः।

❀ **आश्रयतयेति** ❀ इदञ्च 'बोधकत्वं शक्तिः' इत्यभ्युपेत्य। 'बोध्यत्वं सा' इति पक्षे तु निरूपकतयेति बोध्यम्।

नन्वाश्रयतासंसर्गेण वृत्तिमत्त्वस्यैव शाब्दबोधविषयत्वे तन्त्रत्वे निरूपकतासंसर्गेण वृत्तिमतः शाब्दे भानानुपपत्तिरत आह—❀ **निरूपकतेति** ❀ प्रामाणिकगौरवस्यादोषत्वादिति भावः। ❀ **अनवद्यमिति** ❀ वृत्तिनिरूपकार्थबोधकत्वस्यैव प्रातिपदिकत्वे तन्त्रत्वान्नाभेदपक्षे तत्संज्ञाप्रसक्तिरिति भावः।

नन्वु स्वप्रतियोगिकत्वविशिष्टसम्बन्धाऽऽश्रयतायाः स्वस्मिन्ननभ्युपगमेन कथमनुकरणस्य वृत्तिमत्तेत्यत आह—❀ **सम्बन्धस्येति** ❀। ❀ **तद्बोधकत्वेनेति** ❀ प्रत्यक्षाऽऽत्मकशाब्दबोधजनकत्वेनेत्यर्थः। तथाच हर्य्यादिवाक्यप्रामा-

SGDF

उक्तञ्च वाक्यपदीये—

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥ इति,

प्रभा

उक्तञ्चेति—शब्दस्यापि वृत्तिमत्त्वेन ग्राह्यत्वं ग्राहकत्वञ्चोक्तमित्यर्थः । ग्राह्यत्वम् = बोध्यत्वम् । ग्राहकत्वम् = बोधकत्वम् । एते = ग्राह्यत्व-ग्राहकत्वे । 'पृथगवस्थिते' इत्युक्त्या तयोरसमनैयत्यं दर्शितम् । दीपादिरूपतेजसि विषयसन्निधाने शक्तिद्वयं लोके दृष्टम् । विषयासन्निधाने तु तेजसि ग्राह्यत्वमेव । एवं शब्दानामर्थाबाधे शक्तिद्वयम् । अर्थबाधसत्त्वे तु ग्राह्यत्वमेवेति तदर्थः । विषयत्वम् = स्व (शब्द) स्य शाब्दबोधविषयत्वम् । अनादृत्य = असम्पाद्य । शब्दैरर्थो न प्रकाश्यते = न बोध्यते इत्यर्थः ।

दर्पणव्याख्या

प्यात् प्रकृते स्वस्मिन्नपि तादृशसम्बन्धाश्रयताऽभ्युपगमान्न तस्य शाब्दे भानानुपपत्तिरित्यनयैव रीत्या शब्दमात्रस्य शाब्दे भानं निर्वाह्यमिति भावः । ननु स्वनिष्ठबोधकत्वस्य स्वनिरूप्यत्वे पदान्तरस्येवानुकरणस्यापि प्रातिपदिकत्वं दुर्वारम्, किञ्च स्वीयप्रत्यक्षाऽऽत्मकबोधजनकत्वस्य वृत्तित्वं दुरुपपादम्, शाब्दबोधजनकपदार्थोपस्थितिजनकज्ञानविषयताऽवच्छेदकसम्बन्धस्यैव तत्त्वात् । नचैतादृशज्ञानेन शाब्दबोधात् प्राक् शब्दरूपपदार्थोपस्थितिर्जन्यते । नापि बोधकत्ववदिति ज्ञानं तदानीमस्तीति येन साऽपि सम्भाव्येत, घटादावगृहीतवृत्तिकस्य घटपदं स्वप्रत्यक्षजनकमिति ज्ञानाद् घटपदशाब्दबोधाननुभवाच्च तस्मात्, कथमेतदिति चेत्,

अत्र वदन्ति—सम्बन्धस्येत्यादिग्रन्थस्य पदवृत्त्युपस्थितेनार्थेन सम्बन्धाविशेषाच्छब्दोपस्थितिस्ततः शब्दार्थयोरुभयोरपि शाब्दे भानं शब्दवृत्तिप्रयोज्यत्वस्योपस्थितिद्वये सत्त्वादित्यर्थपरत्वान्नोक्तानुपपत्तिः, तत्रार्थस्येवेत्यनन्तरं बोध्यत्वादिति शेषः । तद्बोधकत्वेनेत्यत्र तदाऽव्यहितप्रागुपस्थितार्थपदार्थपरामर्शस्यैवौचित्यादर्थबोधकत्वेनेत्यर्थात् । तदुक्तम्—

यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् ।
पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः ॥ इति ।

दृष्टः = उपस्थितः शाब्दबोधस्तु वक्ष्यमाणहर्य्यादिवाक्यप्रामाण्यात् क्षणविलम्बेनैवाभ्युपगन्तव्यः । अनुकार्य्यस्याऽभेदपक्षे भानाय तु प्रकारान्तरमेवानुसर्त्तव्यमिति ।

परेतु—उक्तमते पदार्थोपस्थितेः शाब्दबोधहेतुतायां तदवच्छेदककोटौ तत्तत्सम्बन्धावच्छिन्नवृत्तिज्ञानजन्यत्वनिवेशावश्यकत्वेन वृत्तेर्द्वैधा प्रवेशे गौरवम् । अन्यतरत्वेन सम्बन्धनिवेशे त्वन्यतरत्वघटकभेदयोर्विशेष्यविशेषणभावे विनिगमनाविरहात्तत्तादवस्थ्यमेव । तदपेक्ष्याभेदपक्षे सादृश्यसम्बन्धेनानुकरणादनुकार्य्योपस्थितिस्तथोपस्थितस्यापि तात्पर्य्यवशाच्छाब्दे भानं वृत्तिज्ञानजन्यतावच्छेदककोटौ सादृश्यज्ञानाजन्यत्वनिवेशान्न तद्धेतुतायां व्यभिचारः । अत एव गवित्ययमाहेत्यादौ न विभक्त्युत्पत्तिः, वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावेनाप्रातिपदिकत्वात् । स्पष्टश्चायमर्थः "मतौ छः सूक्तसाम्नोः" (पा० सू० ५ । २ । ५९) इत्यत्र भाष्यकैयटयोरित्याहुः ।

स्वप्रतियोगिकत्वविशिष्टसम्बन्धस्य स्वस्मिन् सत्तां तेजोदृष्टान्तव्याजेन दर्शयन् स्वोक्ते हरिसम्मतिमाह—❀ उक्तञ्चेति ❀ । ❀ ग्राह्यत्वम् ❀ = बोध्यत्वम् । ❀ ग्राहकत्वम् ❀ = बोधकत्वम् । ❀ एते ❀ = ग्राह्यत्व—ग्राहकत्वे । ❀ पृथगवस्थिते ❀ इत्यनेन तयोरसमनैयत्यं दर्शयति । दीपादिरूपतेजसो विषयसन्निधाने शक्तिद्वयं लोके प्रत्यक्षसिद्धम् । तदसमवधाने तु ग्राह्यत्वमेव यथा, तथा शब्दानामर्थाबाधे उक्तशक्तिद्वयम् । तद्बाधे तु ग्राह्यत्वमेवेति तदर्थः ।

SGDF

विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते । इति चेति ।

प्रसङ्गादनुकार्य्यानुकरणयोरभेदपक्षे साधकमाह—

अत एव गवित्याह भू सत्तायामितीदृशम् ।
न प्रातिपदिकं नापि पदं साधु तु तत् स्मृतम् ॥२७॥

'गवित्ययमाह' 'भू सत्तायाम्' इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्य्यान्न भिद्यन्ते ।

प्रभा

अयम्भावः—द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसंयोगस्य हेतुत्वमावश्यकम्, अन्यथा चक्षुःसंयोगावस्थायामन्धकारेऽपि घटादिप्रत्यक्षापत्तिः । तथाच दीपो यथा घटं प्रकाशयन्नात्मानमपि प्रत्यक्षीकरोति, तथा अर्थगोचरशब्दनिष्ठशक्तिसहकृत एव शब्दोऽर्थस्य स्वस्य च प्रत्यायकः । यथा घटाद्यभावे स एवालोकः स्वमात्रविषयकप्रत्यक्षजनकस्तथाऽर्थे तात्पर्याभावे शब्दे च तात्पर्ये सति स एव शब्दस्तद्वृत्त्यैव स्वमात्रबोधं जनयति ।

यत्तु दर्पणकारादयः—ज्ञानत्वव्यापकविषयिताकत्वं न शब्दे साधयितुं शक्यते घटादिप्रत्यक्षाद्यव्यवहितप्राक्काले घटादिपदोपस्थितेरनैयत्येन तादृशप्रत्यक्षादेः घटपदादिविषयकत्वासम्भवादिति तन्न, पदपदार्थयोस्तादात्म्यमते पदोपस्थितेर्नैयत्यात् । नच तादात्म्ये 'घटरूपोऽर्थे घटशब्दो न' इति व्यवहारासङ्गतिः, भेदाभेदघटितस्यैव तादात्म्यस्य स्वीकारेण भेदस्योद्भूतत्वविवक्षायां तथा व्यवहारसम्भवात् । पदविषयकज्ञानजनकतायाः प्रमाणचतुष्टयेऽपि स्वीकारेण ज्ञानमात्रे तद्भानस्य निराकर्तुमशक्यत्वादिति गुरवः ।

दर्पणव्याख्या

स्वं रूपमिति सूत्रभाष्यादप्युक्तार्थस्यैव लाभादिति तस्यैव पद्यान्तरमाह—❀ विषयत्वमिति ❀ स्वस्य विषयतामसम्पाद्य शब्दैरर्थो न बोध्यते इत्यर्थः, स्वजन्यार्थबोधत्वस्य स्वविषयकत्वव्याप्यत्वादिति यावत् ।

अयं भावः—शब्दार्थयोरभेदमते तन्मूलकाध्यासाच्छाब्दादर्थाऽऽकारवृत्तौ जायमानायां शब्देनापि तस्यां स्वाकारसमर्पणमिति शाब्दबोधस्य शब्दविषयकत्वसिद्धिरिति ।

अत्र वदन्ति—"न सोऽस्ति प्रत्ययो लोके" इत्युक्तत्वात् किं बोधत्वावच्छेदेन शब्दविषयकत्वं प्रतिज्ञायते, उत ग्राह्यत्वमिति पद्यद्वयाच्छब्दत्वावच्छेदेन तत्त्वम् । किं वा शाब्दत्वसामानाधिकरण्येन । नाद्यः, घटादिप्रत्यक्षाद्यव्यवहितप्राक्काले घटादिपदोपस्थितेरनैयत्येन तादृशप्रत्यक्षस्य घटादिपदविषयकत्वासम्भवात् । एवं घटाद्यनुमितावपि तज्ज्ञानं न सम्भवति, व्यापकतया तदवच्छेदकतया वा व्याप्तिग्रहे तद्भानात्, तदनन्तरम् 'घटपदं साक्षात्करोमि' 'घटपदमनुमिनोमि' इत्यनुव्यवसायाभावाच्च । न द्वितीयः, घटपदज्ञानजन्यापस्थितेस्तद्वाचकपदेऽभावेन तस्य शाब्दविषयत्वासम्भवात्, पदज्ञानस्य सम्बन्धिज्ञानविधयाऽर्थस्मारकत्वेन हस्तिपकदर्शनजन्यहस्त्युपस्थितौ हस्तिपकस्यैव तज्जन्यार्थोपस्थितावुद्बोधकतावच्छेदकपदस्य विषयत्वासम्भवाच्च । 'घटो न घटशब्दः' इति सार्वजनीनप्रतीत्या शब्दार्थयोस्तादात्म्ये मानाभावेन नार्थाकारवृत्तेः शब्दाऽऽकारतासम्भवोऽपि घटशब्दबोधानन्तरं घटपदं शाब्दयामीति प्रतीतेः सार्वजनीनत्वे क्षणविलम्बसहिष्णुतासम्भवेदपि नच तस्यास्तथात्वमिति न किञ्चिदेतत् ।

अपिच भिन्ने विषयेऽनुमितिसामग्र्या बलवत्त्वात् यत्र तादृशानुमितिसामग्रीकाले केवलघटत्वविशिष्टविषयिकाशाब्दधीर्जायतामितीच्छाबलाद् घटशाब्दधीस्तत्र घटांशे तज्ज्ञानं दुरुपपादमेव । घटशब्दशाब्देच्छाविरहविशिष्टभिन्नविषयका-

SGDF

अतस्तेषामर्थवत्त्वाभावात् 'अर्थवदधातुः' (पा० सू० १।४।४२) इत्याद्यप्रवृत्तौ न प्रातिपदिकत्वम्, नापि पदत्वम्, अथ च साधुत्वमित्युपपद्यते। अन्यथा 'प्रत्ययः' (पा० सू० ३।१।१) 'परश्च' (पा० सू० ३।१।२) 'अपदं न प्रयुञ्जीत' इति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ॥२७॥

इति श्रीमद्रङ्गोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे नामार्थनिर्णयः ॥ ४ ॥

———❀❀❀———

प्रभा

अतः = अनुकार्यानुकरणयोरभेदात्। अर्थवत्त्वाभावादिति—निरूपकत्वसम्बन्धेन वृत्तिमत एवार्थस्य 'अर्थवत्' सूत्रे ग्रहणात् प्रकृते आश्रयतासम्बन्धेन वृत्तिमतः शब्दस्य पदजन्योपस्थितिविषयत्वेन शाब्दबोधविषयत्वेऽपि वृत्त्या अर्थविषयकबोधजनकत्वाभावान्न प्रातिपदिकत्वम्। केचित्तु सादृश्यमूलकाभेदविवक्षायां सादृश्यसम्बन्धेनैवानुकरणेनानुकार्योपस्थितिः। तथाचानुकार्यविषयकबोधं प्रति अनुकरणजन्योपस्थितिः कारणमिति कार्यकारणभाववशादनुकरणेनानुकार्यबोधः। एतावानेव विशेषो यद् भेदविवक्षापक्षे वृत्त्या अर्थविषयकबोधजनकत्वात्प्रातिपदिकत्वेन सुबन्तत्वात् पदत्वम्। अभेदपक्षे प्रातिपदिकत्वाभावात् सुबन्तत्वाभावेन पदत्वाभाव इति। साधुत्वमिति शास्त्रबोधितसाधुत्वाभावेऽपि शिष्टप्रयुक्तत्वरूपं साधुत्वं युक्तियुक्तम्। अत्र च पूर्वोक्तम् 'ऋलक्' सूत्रस्थं भाष्यमेव मानम्। अन्यथा = भेदपक्षस्यैव स्वीकारे। निषेधादीति—प्रायः सर्वत्र प्रत्ययविधौ पञ्चमीनिर्देशात् 'तस्मादित्युत्तरस्य' इति परिभाषयैव षष्ठ्यंशविकलस्य परत्वस्य लाभात् पर एव प्रत्ययः स्यादिति प्रत्ययस्य प्रकृतिपरत्वलाभे सिद्धे 'प्रत्ययपरैव प्रकृतिः' इति नियमार्थत्वम् 'परश्च' इति सूत्रस्य भाष्यकृता स्वीकृतम्। तथाच भेदपक्षेऽनुकरणस्य प्रातिपदिकत्वेन प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदकधर्मवत्त्वरूपप्रकृतित्वस्यानुकरणे प्रातिपदिकत्वरूपं तादृशधर्ममादाय वक्तुं शक्यतया 'न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययः' इति नियमलभ्यनिषेधविषयतया गणपठितानां विभक्तिरहितानाम् 'भू सत्तायाम्' 'एध वृद्धौ' इत्यादीनामसाधुत्वं स्यात् प्रत्ययरहितप्रकृतेरसाधुत्वबोधनात्। अभेदपक्षे तु प्रकृतित्वाभावान्न निषेधविषयत्वमिति नासाधुत्वं विभक्तिरहितानुकरणस्य। 'अपदं न प्रयुञ्जीत' इति निषेधविषयत्वमप्यभेदपक्षे नास्ति 'भू सत्तायाम्' इति निर्देशात् 'गवित्ययमाह' इत्यादिशिष्टप्रयोगाच्च अपदपदस्य अपरिनिष्ठितपरत्वात् 'अपरिनिष्ठितं न प्रयुञ्जीत' इति तदर्थात्। परिनिष्ठितत्वञ्च—अप्रवृत्तनित्यविधुद्देश्यतावच्छेदकानाक्रान्तत्वम्। अभेदानुकरणे यत्किञ्चिच्छास्त्रीयोद्देश्यतावच्छेदकीभूतधर्मस्याभावात् परिनिष्ठितत्वमेव। साधुत्वञ्च व्याकरणगम्यः, शिष्टप्रयोगगम्यो वा जातिविशेषः, इमौ च पक्षौ जातिव्यक्तिपक्षवत् शिष्टप्रयोगानुसारिणौ। अत एव क्वचिद् विभक्तिविशिष्टाः क्वचिद्-

दर्पणव्याख्या

नुमितिसामग्र्याः प्रतिबन्धिकायाः सत्त्वात्। नापि तृतीयः, सिद्धसाधनात्, 'विष्णुमुच्चारय' इत्यादौ विष्ण्वादिपदानां लक्षणया शाब्दविषयतायाः परैरभ्युपगमात्, उक्तभाष्यादपि क्वचिच्छाब्दबोधे शब्दो विषय इत्यर्थस्यैव लाभात्, सति तात्पर्य्ये क्वचिदन्यत्रापि विशेष्यांऽशे तद्भानाभ्युपगमे क्षतिविरहाच्च। अत एव नलादीनां विशिष्य तत्तद्रूपेणानुपस्थितत्वेऽपि नलपदवाच्यः कश्चिदासीदिति सामान्यशक्तिग्रहात्तत्पदवाच्यत्वेन तेषां बोधः प्राचीनसम्मत उपपद्यते। अभेदे शब्दभानं तु परे त्वित्युक्तभाष्यसमतमतेनैव। अत एव तस्मादविकृतस्यैव बोधः। हरिवचनानि तु प्रणवब्रह्मणोरभेदोपासनश्रद्धाऽतिशयबोधकानि भवन्तीति न तैर्व्यावहारिकार्थस्य सिद्धिस्तस्माच्छाब्दबोधमात्रस्य शब्दविषयकत्वं न विचारसहमधिकमग्रे व्यक्तीभविष्यतीति ॥ २६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्रभा

विभक्तिरहिताश्चानुकरणप्रयोगाः सङ्गच्छन्ते ।

अत्रेदमाकूतम्—ज्ञानमात्रे शब्दस्य, वाच्यार्थस्य च भानमिति सिद्धान्तः शाब्दिकानाम् । यथा निर्विकल्पके विशकलितयोर्घट–घटत्वयोर्भानम्, तथा आनुपूर्व्याः, शब्दस्य च विशकलितयोर्भानम् । ततो घटशब्दवाच्यो घट इति विशिष्टवैशिष्ट्यावगाहि ज्ञानं जायते । नच चाक्षुषादिप्रत्यक्षस्थले शब्देन तन्निष्ठानुपूर्व्या जात्या वा चक्षुरादिसन्निकर्षाभाव इति वाच्यम्, इन्द्रियसम्बद्धविशेषणतायाः, इन्द्रियसम्बद्धतादात्म्यस्य वा सन्निकर्षस्योभयत्र सम्भवात् । नचैवं तद्वाचकस्य सर्वस्य भानापत्तिः, तार्किकमते चक्षुःसंयुक्तसन्निकर्षेण घटत्वस्य निर्विकल्पकज्ञानकाले द्रव्यत्वस्य भानवारणाय अदृष्टविशेषस्य, कालविशेषस्य वा हेतुत्वकल्पनवदस्मन्मतेऽपि तथाकल्पनसम्भवात् । 'वृद्धिरादैच्' इति सूत्रे सामानाधिकरण्येन निर्देशात् 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इति स्मृतेः, 'ओमित्येकाक्षरं ब्रह्म' इति श्रुतेश्च शब्दार्थयोस्तादात्म्येन अर्थनिरूपितव्याप्यत्वावगाहिपरामर्शस्यैव शब्दविषयकविशेषणतया शब्दविषयकानुमितौ कारणत्वसम्भवाच्च । शब्दार्थयोस्तादात्म्यस्य भेदाभेदरूपतया भेदस्योद्भूतत्वविवक्षायाम् 'घटं पश्यामि' 'घटरूपोऽर्थः घटशब्दो न' इत्यादिप्रयोगोपपत्तिः ।

नच पदज्ञानस्य सम्बन्धिज्ञानविधया अर्थस्मारकत्वेनार्थस्मृतौ तद्भानासम्भवः, हस्तिदर्शने हस्तिपकस्मृतौ हस्तिनो भानादर्शनादिति वाच्यम्, हस्तिपकस्मृतौ हस्तिनो भानस्येष्टत्वात् । एवं भिन्नविषयकानुमितिसामग्रीकाले 'घटशाब्दबोधो जायताम्' इति या इच्छा तस्याः शब्दविषयकत्वमपीति न सा शाब्दबोधे शब्दज्ञानप्रतिबन्धिका, इत्येवं 'ज्ञानमात्रे शब्दस्य भानम्' इति पक्षे आपतिता दोषा निराकरणीया इति दिक् ।

भूषणे बालकृष्णेन कृता व्याख्या मनोरमा
नामार्थनिर्णयस्तत्र पूर्णः प्रीयान्महेश्वरः ॥

——❀❀❀——

दर्पणव्याख्या

❀ अन्यथेति ❀ भेदपक्षस्यैवाभ्युपगमे इत्यर्थः । ❀ प्रत्ययः परश्चेति ❀ नियमशास्त्राणां निषेधमुखेनापि प्रवृत्तेः 'प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या न केवला' इति नियममूलकस्य "अपदं न प्रयुञ्जीत" इति निषेधविधेः प्रत्यययोग्यस्य प्रत्ययं विना प्रयोगेऽतिक्रमणादसाधुतापत्तेरित्यर्थः । अस्मन्मते तु तस्य प्रत्यययोग्यत्वाभावान्निषेधविषयताया एवाभावात्तदतिक्रमणा प्रसक्तेः साधुत्वादेव च तत्रावादेशादिरपि । अन्यथा भाषाशब्देष्विव न तत्प्रवृत्तिः स्यादिति भावः ॥ २७ ॥

इति श्रीभूषणसारदर्पणे नामार्थनिरूपणम् ॥ ४ ॥

——❀❀❀❀❀——

SGDF
Sri Gargeshwari Digital Foundation

अथ समासशक्तिनिर्णयः

समासान् विभजते—

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥२८॥

सुपां सुपा—पदद्वयमपि सुबन्तम् 'राजपुरुषः' इत्यादिः । सुपां तिङा—पूर्वपदं सुबन्तं उत्तरपदं तिङन्तम् 'पर्य्यभूषयत्' 'अनुव्यचलत्' ।

॥ अथ समासशक्तिनिर्णयः ॥

प्रभा

सामान्यतो नामार्थं निरूप्य समासस्यापि नामविशेषत्वात् तदर्थं निरूपयितुं प्रसङ्गात्समासभेदानाह—समासानिति—'विशेषज्ञानं सामान्यज्ञानपूर्वकम्' इति न्यायादादौ समासत्वस्यैव निरूपणीयत्वेऽपि तस्य स्पष्टत्वात्तत्रैव विप्रतिपत्तेश्च तद्भेदा एव मूलकृता प्रदर्शिताः । समासत्वञ्च पाणिन्यादिसङ्केतसम्बन्धेन समासपदवत्त्वरूपम् , एकार्थीभावापन्नपदसमुदायविशेषत्वं वा । ननु पदपदेन शक्तस्य ग्रहणे कृदन्ते तद्धितान्ते चातिव्याप्तिः, सुबन्ततिङन्तयोर्ग्रहणे कुम्भकारकटप्रवादिष्वव्याप्तिः, तत्र कृदन्तधातुभ्यामेव समासविधानेन तादृशविपदसमुदायत्वाभावादिति चेन्न, तत्र पदपदेन पदत्वयोग्यस्य ग्रहणात् । पदत्वयोग्यत्वञ्च—पदत्वप्रयोजकप्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदकधर्मवत्त्वरूपम् । तथाच कारशब्दे तादृशधर्मस्य प्रातिपदिकत्वस्य, प्रशब्दे धातुत्वस्य च सत्त्वेनादोषादिति गुरवः। एकार्थीभावश्चाग्रे वक्ष्यते।

सुपामिति—सुपा सह सुपां समासः। एवमुत्तरत्र योजनीयम् ! सुप्पदं सुबन्तपरम् तिङ्पदमपि तदन्तपरम् । तथाच सुबन्तप्रतियोगिकसाहित्यविशिष्टसुबन्तनिरूपितवृत्तित्वविशिष्टः समास एकः । तिङन्तप्रतियोगिकसाहित्यविशिष्टसुबन्तनिरूपितवृत्तित्वविशिष्टो द्वितीयः । नामप्रतियोगिकसाहित्यविशिष्टसुबन्तनिरूपितवृत्तित्व-

दर्पणव्याख्या

कृसशक्त्यैव निर्वाहान्न नामसमुदायात्मकसमासेऽतिरिक्ता शक्तिरिति मतं दूषयिष्यन् प्रसङ्गात्समासार्थं निरूपयितुमादौ तद्विभागप्रदर्शनमित्याशयेनाह—❀ समासानिति ❀ समासत्वञ्च शक्तिसम्बन्धेन समासपदवत्त्वम्, एकार्थीभावापन्नपदसमुदायविशेषो वा । एकार्थीभावे मानञ्च "किं पुनः समर्थन्नाम ? पृथगर्थानामेकार्थीभावः समर्थवचनम् ; क्व पुनः पृथगर्थानि, क्वैकार्थानि । वाक्ये पृथगर्थानि–'राज्ञः पुरुषः' इति, समासे पुनरेकार्थानि–'राजपुरुषः'' इति समर्थसूत्रस्थं भाष्यम्, तन्मूलिका वक्ष्यमाणा युक्तयश्च ।

तत्रैकार्थत्वमेकोपस्थितिविषयार्थकत्वम् । नत्वेकार्थशक्तत्वम् , घटादिपदानामपि घटघटत्वतत्सम्बन्धरूपनानार्थशक्तत्वेनैकार्थतानापत्तेः । नानोपस्थितिविषयार्थकत्वं पृथगर्थकत्वम् । यथा वाक्ये पृथक्पदार्थानाकाङ्क्षादिसहकारेण विशिष्टार्थप्रत्ययः, नैवं वृत्तौ, किन्त्ववयवशक्त्या समुदायशक्तिसहकृतया जायमाना पदार्थोपस्थितिरेव विशेष्यविशेषणभावापन्नविशिष्टार्थमवगाहते, "संस्पृष्टार्थं समर्थम्" इति भाष्यात् । राजपुरुषादिपदम्–'राजसम्बन्धवत्पुरुषादौ शक्तम्' इत्याकारकः शक्तिग्रहः । ततश्च प्राप्ताप्राप्तविवेकेन विशिष्टशक्तिः षष्ठ्याद्यर्थे पर्यवस्यति । अत एव न तत्र राजादौ सुन्दरादिपदार्थान्वयः, एकदेशत्वात् । 'देवदत्तस्य गुरुकुलम्' इत्यादौ तु गमकत्वात् स इति वक्ष्यते । जहत्स्वार्थावृत्तिः पदानामानर्थक्यमिति तु न सम्यक् , 'महाबाहुः' इत्यादावात्वाद्यनापत्तेः । भूतपूर्वगत्याश्रयणन्तु सत्यां गतावनुचितम् । तदुक्तम्–

SGDF Sri Gargeshwari Digital Foundation

'गतिमतोदात्तवता तिङाऽपि समासः' इति वार्त्तिकात् समासः। सुपां नाम्ना 'कुम्भकारः' इत्यादिः। 'उपपदमतिङ्' (पा० सू० २।२।१९) इति समासः। स च "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषया भवति सुबुत्पत्तेः प्राक्, अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात्।

प्रभा

विशिष्टस्तृतीयः। धातुप्रतियोगिकसाहित्यविशिष्टसुबन्तनिरूपितवृत्तित्वविशिष्टश्चतुर्थः। तिङन्तप्रतियोगिकसाहित्यविशिष्टतिङन्तनिरूपितवृत्तित्वविशिष्टः पञ्चमः। सुबन्तप्रतियोगिकसाहित्यविशिष्टतिङन्तनिरूपितवृत्तित्वविशिष्टः षष्ठः। अत्र साहित्यञ्च सङ्केतसम्बन्धेन समासशब्दवत्त्वरूपगुणकृतम्, अपर्याप्त्या उभयमपि समासपदवत्। तथाच 'समासान् विभजते' इत्यत्र स्व (विपूर्वकभजधातु) समभिव्याहृतपदा (समासपदा) र्थतावच्छेदकीभूत (समासत्व) धर्मव्याप्यमिथोविरुद्धधर्मसुबन्तप्रतियोगिकसाहित्यविशिष्टसुबन्तनिष्ठसमासत्व, तिङन्तप्रतियोगिकसाहित्यविशिष्टसुबन्तनिष्ठसमासत्व, नामप्रतियोगिकसाहित्यविशिष्टसुबन्तनिष्ठसमासत्व, तिङन्तप्रतियोगिकसाहित्यविशिष्टतिङन्तनिष्ठसमासत्व, सुबन्तप्रतियोगिकसाहित्यविशिष्टतिङन्तनिष्ठसमासत्वरूपषड्धर्मावच्छिन्नविषयकबोधनानुकूलो व्यापारः विपूर्वकभजधात्वर्थः प्रकृते। गतिमतेति—'कुगतिप्रादयः' (२।२।१८) इति सूत्रे भाष्ये गतेस्तिङन्तेन सह समासविधानार्थमिदं वार्तिकम्। उदात्तवता, गतिमता च तिङा गतिःसमस्यते इत्यर्थः। 'उदात्तवता' इत्यस्योदाहरणम्—'यत्परियन्ति' इति। अत्र 'निपातैर्यद्यदि' इति सूत्रेण 'तिङ्ङतिङः' इति प्राप्तस्य निघातस्य प्रतिषेधे 'यन्ति' इत्यस्य प्रत्ययस्वरेणाद्युदात्ततया परिरूपगतेरुदात्तवता 'यन्ति' इत्यनेन समासः। 'गतिमता' इत्यस्योदाहरणम्—'अनुव्यचलत्' इति। अत्र 'वि' इत्यस्य 'अचलत्' इत्यनेन 'सह' इति योगविभागात् समासः। 'व्यचलत्' इत्यनेन 'अनु' इत्यस्य 'गतिमता च' इत्यनेन समासः। अत्र परत्वात् 'तिङ्ङतिङः' इत्यनेन निघाते उदात्तवता इत्यस्याप्राप्त्या 'गतिमता च' इत्युक्तम्। 'सह' इति योगविभागेन सिद्धे वार्तिकं व्यर्थमिति केचित्। वार्तिकादिति—इदमुपलक्षणम्— 'सह' इति योगविभागस्य। तेन 'वि' इत्यस्य 'अचलत्' इत्यनेन योगविभागात् समास इत्यस्य नासङ्गतिः। अत्र समासफलन्तु समासस्वरः, 'न समासे' इत्यनेन 'इकोऽसवर्णे' इत्यस्य निषेधे 'पर्य्यभूषत्' इत्यत्र,

दर्पणव्याख्या

जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी। इति।

अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव सा, यथा। कृष्णसर्पादाविति तदर्थः। अयमेव पक्षः —

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।

इतिवदतो मूलकृतः सम्मतः, तथा सति पङ्कजशब्दादौ परैर्योगरूढ्यभ्युपगमेन तद्दृष्टान्तोपन्याससार्थक्यात्। जहत्स्वार्था वृत्तिरिति पक्षस्य तत्सम्मतत्वे स्वमते तस्य पक्षतया परैस्तत्र तदनभ्युपगमेन तदुपन्यासानुपपत्तेः स्पष्टत्वात्। अधिकमग्रे वक्ष्यत इति।

❀ गतिमतोदात्तवतेति ❀ उपलक्षणमिदम्—'सह सुपेति योगविभागस्यापि। 'अनुव्यचलत्' इत्यत्रानोर्व्यचलदित्यनेन वेश्चाचलदित्यनेन युगपत्समासः, अन्विति सुबन्तेन व्यचलदिति समुदायस्य समर्थत्वात्। सत्यां समाससंज्ञायां शाकलप्रतिषेधाद्यणादेशः, समासान्तोदात्तत्वञ्च भवति। तिङैकत्वस्योक्तत्वात् प्रकृत्यर्थव्यापारस्य सङ्ख्यान्वयायोग्यत्वाद्वा न ततः सुबुत्पत्तिः। समयपरिपालकौत्सर्गिकैकवचनस्य तु नावसरः, छन्दसि तदापादनासम्भवादिति भावः। तथा सुबन्तस्यानभिधानादेवाप्रवृत्तिरिति भावः।

Sri Gangeshwari Digital Foundation

अन्यथा 'चर्म्मक्रीती' इत्यादौ नलोपानापत्तेः ।

सुपां धातुना—उत्तरपदं धातुमात्रम्, न तिङन्तम्, 'कटप्रूः' 'आयतस्तूः', "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च" इति वार्त्तिकात् । तिङां तिङा—'पिबतखादता' 'पचतभृज्जता' इत्यादिः, "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् । तिङां सुबन्तेन—पूर्वपदं तिङन्तमुत्तरं सुबन्तम्—'जहिस्तम्बः', "जहि कर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाभिदधाति' इति मयूरव्यंसकाद्यन्तगणसूत्रात् ।

अयं षड्विधोऽपि समासः "सह सुपा" (पा० सू० २ । १ । ४) इत्यत्र योगविभागेन भाष्ये व्युत्पादितः, स्पष्टः शब्दकौस्तुभादौ ॥ २८ ॥

प्रभा

'अनुव्यचलत्' इत्यत्र च यणसिद्धिः । अन्यथा=पूर्वपदे, उत्तरपदे च सुबुत्पत्तेः प्राक् समासस्वीकारे । वार्त्तिकादिति—वार्तिके धातुसुबन्तयोर्द्वन्द्वघटकतया निर्देशेन निपातनादित्यर्थः । षड्विध इति—एकार्थीभावापन्नत्वे सति सुबन्तद्वयादिघटितत्वम् । एकार्थीभावेत्यस्य सर्वत्र वक्ष्यमाणभेदेषु सम्बन्धः । सुबन्ततिङन्तघटितसमुदायत्वम्, सुबन्तनामघटितसमुदायत्वम् । नचात्र 'राजपुरुषः' इत्यादिष्वतिव्याप्तिः, सुबन्तनामपर्य्याप्तोद्देश्यताकसमासत्वस्य तदर्थकत्वात् । सुबन्तधातुघटितत्वम्, नचैतस्य 'कष्टश्रितः' इत्यादिष्वतिव्याप्तिः, सुबन्तधातुपर्याप्तोद्देश्यताकसमासत्वस्य तदर्थकत्वात् । तिङन्तद्वयघटितत्वम्, तिङन्तपूर्वपदसुबन्तोत्तरपदघटितसमुदायत्वम् । षण्णां समासानामेतानि षड्लक्षणानि । भाष्ये व्युत्पादित इति—चिन्त्यमेतत्, उक्तषड्विधत्वस्य भाष्यकृताऽसंस्पृष्टत्वात् । तथाहि—'सहग्रहणं क्रियते सहभूतयोरेव समाससंज्ञा यथा स्यात्, एकैकस्य समाससंज्ञा मा भूदिति ।' इति सहग्रहणस्य प्रयोजनं गर्गदण्डनन्यायेन समुदाये वाक्यपरिसमाप्तिविधया संसाध्य उक्तम्—एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति तस्यैतत् प्रयोजनं योगाङ्गं (सूत्रावयवम्) यथा विज्ञायेत । सति च योगाङ्गे योगविभागः करिष्यते । सह सुप् समस्यते । केन सह ? समर्थेन । 'अनुव्यचलत्' 'अनुप्राविशत्' । ततः सुपा । सुपा च सह सुप्समस्यते । अधिकारश्च लक्षणम् (विधायकं) च ।

दर्पणव्याख्या

अन्यथेति सुबुत्पत्तेः प्राक्समाससंज्ञाऽभ्युपगम इत्यर्थः । नलोपेत्यस्यापदत्वादित्यादिः । यद्यपि 'उपपदम्' (पा० सू० २ । २ । १९) इति सूत्रे भाष्येऽनयोर्योगयोर्निवृत्तं सुप्सुपेत्युक्तम्, तथाप्युपपदमिति महासंज्ञाबलादेव पूर्वपदस्य सुबुत्पत्त्यनन्तरम् (एव) समास इति भावः । 'प्राक्सुबुत्पत्तेः' इत्येकदेशप्रयोजनप्रदर्शनमिषेण परिभाषायाः प्रयोजनमपि दर्शितम् । सुबुत्पत्तेः पश्चात् समासे हि स्वार्थ-द्रव्य-लिङ्ग-सङ्ख्या-कारकाणां क्रेमिकत्वस्यान्तरङ्ग-बहिरङ्गभावमूलकस्य "कुत्सिते" (पा० सू० ५ । ३ । ७४) इति सूत्रभाष्यसम्मतत्वेनान्तरङ्गत्वात् सुबुत्पत्तेः पूर्वं टाप्यनदन्तत्वात् "क्रीतात् करणपूर्वात्" (पा० सू० ४ । १ । ५०) इति ङीषोऽनुपपत्तेरिति दिक् ।

भाष्ये व्युत्पादित इति तत्र हि प्रत्येकं समाससंज्ञावारणरूपं सहशब्दप्रयोजनं समुदाये वाक्यपरिसमाप्तिन्यायेन परिहृत्य "एवं तर्हि सिद्धे सति यत् सहग्रहणं करोति तस्यैतत् प्रयोजनं योगाङ्गं यथा विज्ञायेत, सति योगाङ्गे योगविभागः करिष्यते । सह सुप् समस्यते । केन सह समर्थेन, अनुव्यचलत् 'अनुप्राविशत्' । ततः सुपा, सुपा च सह सुप् समस्यते । अधिकारश्च लक्षणञ्च, यस्य समासस्य अन्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति" इत्युक्तम् । तत्राधिकारप्रयोजनम्—देवदत्तः पचतीत्यादौ समानाधिकरणेन समानसंज्ञावारणं बोध्यम् ॥ २८ ॥

CC-0. Sri Gargeshwari Digital Foundation

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यतिव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं दर्शयति—

समासस्तु चतुर्द्धेति प्रायोवादस्तथाऽपरः ।

प्रभा

यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति' इति । नेदं षड्विधत्वं केनापि स्वीकृतम् । अत एव मञ्जूषाकाराः 'समासो द्विधा—विशेषसंज्ञाविर्निमुक्तः=सुप्सुपेति विहितः । तद् (विशेषसंज्ञा) युक्तश्च । अन्त्यश्चतुर्धा, अव्ययीभाव-तत्पुरुष-बहुव्रीहि-द्वन्द्वभेदात् । अव्ययीभावत्वादि च पाणिन्यादिसङ्केतसम्बन्धेनाव्ययीभावादिपदवत्त्वमेवेति नाव्याप्त्यतिव्याप्ती' इत्याहुरिति गुरवः । तद्भेदम्=समासभेदम् । लक्षणस्येति—लक्ष्यतावच्छेदकसमनियतत्वं लक्षणत्वम् । समनियतत्वञ्च—व्याप्यत्व-व्यापकत्वोभयसम्बन्धेन परस्परविशिष्टत्वम् । यथा 'गोः सास्नावत्त्वम्' लक्षणम् । सास्ना तु गलकम्बलः । लक्ष्यतावच्छेदकगोत्वसास्नावत्त्वयोरुक्तोभयसम्बन्धेन परस्परविशिष्टत्वात् । यद्यपि 'अव्ययं विभक्ति' इति सूत्रे भाष्ये 'सुमद्राः सुमगधाः' इत्यत्र समृद्धिर्गम्यते 'सपुत्रः सच्छात्रः भोक्तुमागतः' इति शेषे साकल्यं गम्यते, इत्यव्ययीभावमाशङ्क्योक्तम् 'नैष दोषः' । इह कश्चित् समासः पूर्वपदार्थप्रधानः । कश्चिदुत्तरपदार्थप्रधानः । कश्चिदन्यपदार्थप्रधानः । कश्चिदुभयपदार्थप्रधानः । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । नचात्र पूर्वपदार्थप्राधान्यं गम्यते । अथवा नेमे समासार्था निर्दिश्यन्ते । किन्तर्हि ? अव्ययार्था इति । एतेष्वर्थेषु यदव्ययं वर्तते तत्सुबन्तेन समस्यते इति । यद्यपि भूषणकृतो दूष्यत्वेनाभिमतानि लक्षणानि भाष्याभिमतानि; तथापि अव्ययीभावादिमहासंज्ञाकरणादुक्तलक्षणलक्षितेष्वेवाव्ययीभावादयः । सूत्रारम्भसामर्थ्यात्तु अन्यत्रापि ते इष्यन्ते । यथा 'सूपप्रति' 'उन्मत्तगङ्गम्' 'अर्धपिप्पली' इत्यादिषु । इति नैतानि समासलक्षणानि । अत एव 'अथवा' इत्यादिना समाधानान्तरं भाष्ये । प्रायिकत्वमिति—अत्र 'च' शब्दः प्रक्षिप्तोऽनन्वितार्थत्वात्, क्वापि लिखितपुस्तकेष्वदर्शनाच्च । प्रायोवाद इति—बाहुल्येन वाद इत्यर्थः । प्राय इति बाहुल्येऽव्ययम् । तथाऽपर इति—अपरोऽपि वादस्तथा=प्रा-

दर्पणव्याख्या

भेदमिति षाड्विध्यरूपमित्यर्थः ***प्राचीनेत्यादि*** । यद्यपि "अव्ययं विभक्ति" (पा० सू० २ । १ । ६) इति सूत्रे भाष्ये समुदायस्य संस्कार्यत्वात् प्राधान्यात्तस्यैव समृद्ध्यादयो विशेषणानीति समुदायात्—समृद्ध्यादीनां गम्यमानत्वादत्राऽप्यव्ययीभावापत्तिरित्यभिप्रायेणाह—'इह कस्मान्न भवति सुमद्राः, सच्छात्र इति' प्रश्ने 'नैष दोषः, इह कश्चित् समासः पूर्वपदार्थप्रधानः' इत्यादिसमासलक्षणान्युक्त्वा 'नचात्रपूर्वपदार्थप्राधान्यं गम्यते' इति समाहितम् । तथापि 'अथवा 'नेमे समासार्था निर्दिश्यन्ते' इत्यादिना पक्षान्तरोपन्यासेनोक्तलक्षणेष्वनिर्भरसूचनाददोष इति भावः ।

लक्षणस्येति तत्त्वञ्चासाधारणधर्मवत्त्वम् । धर्मेऽसाधारण्यञ्च—तदितरावृत्तित्वे सति सकलतद्वृत्तित्वम् । यथा—सास्नाशृङ्गवत्त्वं गोर्लक्षणम् । तत्र शृङ्गवत्त्वं गगनकृष्णरूपादीनां लक्षणत्ववारणाय सत्यन्तवृत्तित्वसाकल्यानां निवेशः । तदुक्तम्—"लक्षणे तान्येव पदानि देयानि यैरव्याप्त्यतिव्याप्त्यसम्भवदोषा वार्यन्ते" इति । तत्र लक्ष्ये लक्षणासत्त्वमव्याप्तिः । अलक्ष्ये तत्सत्त्वमतिव्याप्तिः । लक्ष्यमात्रावर्त्तनमसम्भवः । उदाहरणानि वक्ष्यन्ते । असाधारणधर्मवत्ताज्ञानात्तद्धर्माश्रय इतरभेदानुमितिव्यवहारश्च फलम् । यस्य तु धर्मस्य केवलान्वयित्वं तद्धर्मज्ञानस्य तु व्यवहारमात्रं तत् । तदुक्तम्—

व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम् । इति

प्रायोवाद इति प्रायशस्तेषामुपलभ्यमानत्वेऽपि अन्येषामपि केषाञ्चिदुपलब्धेरित्यर्थस्तदेव विशदयति—

SGDF
Sri Gargeshwari Digital Foundation

योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥ २९ ॥
भौतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः ॥ २९½ ॥

चतुर्धा, अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुव्रीहिभेदात्। अयं प्रायोवादः, 'भूतपूर्वः', 'दृन्भूः', ('काराभूः') 'आयतस्तूः', 'वागर्थाविव' इत्याद्यसङ्ग्रहात्।

तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। उभयपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहिरित्यादि लक्षणमपि प्रायिकम्, 'उन्मत्तगङ्गम्' 'सूपप्रति' 'अर्द्धपिप्पली'

प्रभा

योवाद इत्यर्थः। अपरं वादमाह—योऽयमिति। प्राधान्येति—अस्य वाद इति शेषः। दृन्भूः='दृढं भवति' इति दृन्भूः। उणादिसूत्रेण दृढशब्दस्य दृन्नादेशो निपातनात्, नृपः, वज्रम्, चक्रं वा दृन्भूशब्दार्थः। काराभूः=कारा=बन्धनागारम्, तत्र भवः काराभूः=बन्दीकृत इति यावत्। आयतस्तूः=आयतम्=दीर्घं स्तौति इति आयतस्तूः। एते 'सह' इति योगविभागात् निपातनाच्च केवलसमासाः=विशेषसंज्ञारहिता इत्यर्थः। पूर्वपदार्थ इति—उत्तरपदार्थनिष्ठप्रकारतानिरूपितपूर्वपदार्थनिष्ठविशेष्यताकोपस्थितिजनकोऽव्ययीभावः। पूर्वपदार्थनिष्ठप्रकारतानिरूपितोत्तरपदार्थनिष्ठविशेष्यताकोपस्थितिजनकस्तत्पुरुषः। पूर्वपदार्थनिष्ठविषयतया साक्षान्निरूपितत्वाभाववती या उत्तरपदार्थनिष्ठविषयता तादृशविषयताकोपस्थितिजनकः समासो द्वन्द्वः। पूर्वपदोत्तरपदभिन्नपदार्थनिष्ठविशेष्यतानिरूपितोत्तरपदार्थनिष्ठप्रकारताकोपस्थितिजनकः समासो बहुव्रीहिरित्यर्थः। अत्र पूर्वपदभिन्नत्वनिवेशात् 'अर्द्धपिप्पली' इत्यादौ नातिव्याप्तिः। परस्परेति—लक्ष्यतावच्छेदकस्य लक्षणाभाववति, लक्षणस्य च लक्ष्यतावच्छेदकाभाववति वृत्तित्वादित्यर्थः। यथा पूर्वपदार्थप्रधानत्वरूपलक्षणाभाववति 'उन्मत्तगङ्गम्' इत्यत्र लक्ष्यतावच्छेदकस्याव्ययीभावत्वस्य वृत्तित्वम्। लक्ष्यतावच्छेदकाव्ययीभावत्वाभाववति 'अर्द्धपिप्पली' इत्यत्र पूर्वपदार्थप्रधानत्वरूपलक्षणस्य वृत्तित्वमिति परस्परव्यभिचार इत्यर्थः। व्यभिचारमेव दर्शयति—तथाहीति। उन्मत्तगङ्गमिति—उन्मत्ता गङ्गा यस्मिन्देशे स देश उन्मत्तगङ्गम्। अत्र बहुव्रीहिलक्षणातिव्याप्तिरव्याप्तिश्चाव्ययीभावलक्षणस्य। सूपप्रतीति सूपस्य=द्विदलस्य लेशः=सम्बन्ध इत्यर्थः। तत्पुरुषलक्षणातिव्याप्तिरव्याप्तिश्चाव्ययीभावलक्षणस्य। अर्द्धपिप्पलीति—अव्ययीभावलक्षणस्यातिव्याप्तिरव्याप्तिश्च तत्पुरुषलक्षणस्य। भाष्ये तु 'समुदाये दृष्टाः शब्दा अवयवेऽपि दृश्यन्ते' इति न्यायेन पिप्पली-कायादिशब्दाः पिप्पल्यवयव-कायावयवपरा इति। अर्द्धपिप्पलीत्यस्यार्द्धोऽभिन्नपिप्पल्यवयवः, 'पूर्वकायः' इत्यस्य पूर्वाभिन्नकायावयव इत्यर्थेन, एवम् 'भिक्षाद्वितीयम्' इत्यस्य 'भिक्षावयवद्वितीयम्' इत्यर्थेन कर्मधारयमाश्रित्य 'पूर्वापराधरोत्तरम्' 'अर्धं नपुंसकम्' 'द्वितीयतृतीय' इति सूत्रत्रयमेकदेशिसमासविधायकं प्रत्याख्यातम्।

दर्पणव्याख्या

भूतपूर्व इत्यादि एषां वक्ष्यमाणयत्किञ्चिल्लक्षणाक्रान्तत्वेऽपि तत्तदधिकारीयसूत्राननुशिष्टत्वादसङ्ग्रहो बोध्यः, समासाधिकारीयसूत्रानुष्ठितत्वाद्विभागे तदसङ्ग्रहे इष्टापत्तेरयोगात्।

पूर्वपदार्थेत्यादि प्राधान्यञ्च समासघटकपदार्थप्रकारतानिरूपितमुख्यविशेष्यत्वम्। तथाच पूर्वपदार्थविशेष्यकबोधजनकत्वमव्ययीभावत्वमित्यर्थः। एवमग्रेऽपि। 'उपकुम्भम्' इत्यत्र कुम्भनिरूपितसामीप्यस्य विशेष्यतया बोधात् 'राजपुरुषः' इत्यादौ राजसम्बन्धिपुरुषस्योत्तरपदार्थस्य, 'पीताम्बरः' इत्यत्र पीताभिन्नाम्बरसम्बन्धिनोऽन्यपदार्थस्य, 'धवखदिरौ' इत्यत्र साहित्यापन्नधवखदिरयोः पूर्वोत्तरपदार्थयोर्विशेष्यतया भानाद् यथायथं लक्षणसमन्वयः।

SGDF
Sri Gargeshwari Digital Foundation

द्वित्राः' 'शशकुशपलाशम्' इत्यादौ परस्परव्यभिचारात्। तथाहि—'उन्मत्तगङ्गम्' इत्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः, अन्यपदार्थप्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च, "अन्यपदार्थे च संज्ञायाम्" (पा० सू० २। १। २१) इति समासात्। 'सूपप्रति' इत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिः, अव्ययीभावाव्याप्तिश्च। 'सुप् प्रतिना मात्रार्थे' (पा० सू० २। १। ९) इति समासात्। 'अर्द्धपिप्पली' इति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वाद् अव्ययीभावातिव्याप्तिः, तत्पुरुषाव्याप्तिश्च, "अर्द्धं नपुंसकम्" (पा० सू० २। २। २) इति समासात्।

एवम् 'पूर्वकायः' इत्यादौ द्रष्टव्यम्। 'द्वित्राः' इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वातिव्याप्तिः, बहुव्रीह्यव्याप्तिश्च। 'शशकुशपलाशम्' इत्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद् बहुव्रीह्यतिव्याप्तिः, द्वन्द्वाव्याप्तिश्च स्यादिति भावः।

सिद्धान्ते तु 'अव्ययीभावाधिकारपठितत्वमव्ययीभावत्वम्' इत्यादि द्रष्टव्यम्। असम्भवश्चैषामि-

प्रभा

तथाचोत्तरपदार्थप्राधान्यसत्त्वाद् व्यभिचाराभावेन 'राजान्तरम्' इत्यत्र व्यभिचारो द्रष्टव्यः, तस्य भिन्नो राजेत्यर्थात्। द्वित्रा इति—'सङ्ख्याव्ययासन्न' इत्यादिना वार्थे बहुव्रीहिः। स च न विकल्पः, पक्षद्वयस्याप्यापत्तेः। किन्तु संशयः। स चानियतसङ्ख्यावमर्शी। तत्र च त्रयोऽपि सदा भासन्त इति तदपेक्षं बहुवचनमेव। द्वौ वा त्रयो वेत्यर्थः। अत्र द्वन्द्वलक्षणातिव्याप्तिरव्याप्तिश्च बहुव्रीहिलक्षणस्य। शशकुशपलाशमिति—अत्र द्वन्द्वाव्याप्तिश्च प्राचीनमते एव। तन्मते हि इतरेतरयोगद्वन्द्वे 'धवखदिरौ' इत्यादौ 'समाहृतौ धवखदिरौ' इत्यर्थेन द्वन्द्वलक्षणसमन्वयः। 'शशकुशपलाशम्' इति समाहारे शशकुशपलाशसमाहार इत्यर्थेनाव्याप्तिः। नव्यमते तु उभयत्र समूहस्यैव विशेष्यत्वम्। उद्भूतावयवभेद इतरेतरयोगः। तिरोहितावयवभेदः समाहारद्वन्द्वः। एवञ्चोभयत्रापि समाहाररूपान्यपदार्थस्यैव प्राधान्यादुक्तद्वन्द्वलक्षणेऽसम्भव एव दोषः। अव्ययीभावाधिकारेति—अव्ययीभावाधिकारपठितशास्त्रविहितसमासत्वमित्यर्थः। तेनोपकुम्भमित्यादेरव्ययीभावाधिकारे पाठाभावेऽपि न क्षतिः, तदधिकारपठितशास्त्रविहितसमासत्वस्य सत्त्वात्। न केवलमुक्तलक्षणेष्वव्याप्त्यतिव्याप्ती दूषणे एव, किन्तूक्तलक्षणानामसम्भवश्चेत्याह—असम्भवश्चेति— एषां पूर्वोक्तलक्षणानां लक्ष्यमात्रावृत्तित्वरूपासम्भव इत्यर्थः। लक्षणासम्भवोक्तिश्च जहत्स्वार्थवृत्तित्ववादिमतेन। तन्मते विशिष्टे

दर्पणव्याख्या

व्यभिचारादिति यद्यपि व्यभिचारोऽतिव्याप्तिरेव तथापि प्रकृते दोषत्वेन व्यभिचारपदेनोभयं लक्ष्यते। यद्वक्ष्यति—*अव्याप्तिरिति*। तमेवाभिनयेन प्रदर्शयति—*तथाहीत्यादि* **पूर्वपदार्थेति*** उन्मत्तादिपदार्थेत्यर्थः। एवमग्रेऽपि। *अव्ययीभावलक्षणेति* पूर्वपदार्थविशेष्यकबोधजनकत्वरूपतल्लक्षणासत्त्वरूपेत्यर्थः। **अन्यपदार्थप्राधान्यादिति*** समासघटकसप्तम्यर्थाधिकरणविशेष्यकबोधजनकत्वादलक्ष्ये लक्षणसत्त्वरूपेत्यर्थः। **बहुव्रीहीति*** तल्लक्षणेत्यर्थः। एवमग्रेऽपि।

ननु तर्हि कान्यव्ययीभावादिलक्षणानीत्यत आह—**सिद्धान्ते त्विति*** लक्ष्यताऽवच्छेदकन्तु शक्तिसम्बन्धेनाव्ययीभावादिपदवत्त्वम्। भूतपूर्वादीनां लक्ष्यताऽवच्छेदकानाक्रान्तत्वात् तदसङ्ग्रहो न दोषायेति भावः। जहत्स्वार्थवृत्तिपक्षमवलम्ब्य मूलमवतारयति—**असम्भवश्चैषामिति*** अस्य जहत्स्वार्थावृत्तिपक्ष इत्यादिः **एषाम्*=लक्षणानाम्। **असम्भवः*=लक्ष्यमात्राऽवर्त्तनमित्यर्थः। तत्पक्षे पूर्वोत्तरपदयोस्तत्त्वेन कुत्रापि वृत्तेरभावेन तदर्थघटितानां तेषामुपकुम्भादावसम्भवादिति भावः।

Sri Gargeshwari Digital Foundation

त्याह—भौतपूर्व्यादित्यादि—रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम् । बोधकता तु तद्वदेव स्यादिति भावः ॥ २९½ ॥

ननु पूर्वपदार्थप्राधान्यादि समासे सुवचम् । तथाहि—'समर्थः पदविधिः' इति सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाऽजहत्स्वार्थपक्षयोरेवैकार्थीभाव-व्यपेक्षारूपयोः पर्य्यवसानं लभ्यते ।

प्रभा

(समुदाये) शक्तिस्वीकारेण तद्घटकपदानामानर्थक्यात् । कस्यचिन्मते विशेषणतया भासमानार्थकपदानामेवानर्थक्यमिति राजपुरुषादौ राजादिपदस्य पूर्वकायादौ कायादिपदस्य चानर्थक्यम् । एवमप्युक्तलक्षणासम्भव एव, तेषां पूर्वोत्तरपदयोः सार्थक्य एव सम्भवात् ।

भौतपूर्व्यादिति— पूर्वं भूतं भूतपूर्वम् तदेवेति भौतपूर्व्यम् । स्वार्थे ष्यञ् । वृत्तेः पूर्वकालिकभवनाश्रयीभूतात् पूर्वपदार्थप्रधानत्वादिरूपाद्धेतोः वृत्तौ तदभावेऽपि रेखागवयवत् । रेखामयप्रतिकृतौ वास्तविकपाणिपादाद्यभावेऽपि 'अयं पाणिः' 'अयं पादः' 'इदं मुखम्' इति वास्तविकव्यवहारवत् वृत्तावपि व्यवहार इति भावः । यद्वा भावे ष्यञ् । भूतपूर्वत्वादित्यर्थः । न समासलक्षणत्वमिति—रेखागवयवृत्तिलाङ्गूलादेर्वास्तवपशुगतत्वावात्ताद् यथा न वास्तवपशुलक्षणत्वम् तथा तादृशबोधजनकत्वस्य तत्तत्समासेष्वभावान्न वास्तवसमासलक्षणत्वं तेषाम् । वृत्तौ समुदाये शक्तिस्वीकारेणावयवानामानर्थक्यमिति भावः । बोधकता त्विति— रेखागवयादिनिष्ठलाङ्गूलादेरिव सादृश्येन गवयादिनिष्ठलाङ्गूलादिबोधनद्वारा वास्तवगवयादिबोधकत्ववद् वृत्तेः प्राक् विग्रहवाक्यनिष्ठतत्तदर्थबोधजनकत्वस्येव सादृश्येन समासनिष्ठतत्तदर्थबोधजनकत्वद्वारा तादृशबोधजनकत्वाश्रये तत्तत्समासत्वबोधकता तु स्यादेव ।

अयम्भावः—यद्यपि शब्दानां नित्यतया तदपेक्षप्राक्कालाभावस्तथाऽपि समाससंज्ञाप्रवृत्तिकालात्प्राक्कालोऽत्र ग्राह्यस्तस्मिन्काले समासघटकपूर्वोत्तरपदसजातीयं यत्पदं तस्य योऽर्थो ज्ञातस्तस्य समासेऽपि प्राधान्यमिति कल्पनयैवाखण्डस्य तत्तत्समुदायस्य तत्तत्समासबोधकत्वम् । पूर्वपदार्थादिप्राधान्यं यद्यपि वाक्येऽप्यस्ति वस्तुगत्या, तथापि समासे तस्यारोपेणाविद्यमानस्याश्रयणेन लक्षणत्वमिति ।

नन्वजहत्स्वार्थवृत्तिपक्षे प्राचीनोक्तं वास्तिवकं लक्षणं वक्तुं शक्यमित्याशङ्कते—नन्वित्यादिना । जहत्स्वार्थेति— जहत्=त्यजत् स्वम्=पदं यमर्थम्, स जहत्स्वोऽर्थः । स्व (पद) कर्तृकत्यागकर्मीभूतोऽर्थ इति यावत् । जहत्स्वोऽर्थो यस्यां वृत्तौ सा जहत्स्वार्था वृत्तिः । स्वशब्दोऽत्रार्थात्मीयपरः । अर्थस्यात्मीयञ्च पदमेव ।

दर्पणव्याख्या

मूले ***भौतेति*** शब्दनित्यतावादिमते यथाश्रुतभौतपूर्व्यस्याप्यव्ययीभावादावसम्भवादाह—***सोऽपीति*** व्यवहारोऽपीत्यर्थः । ***रेखेति*** । अन्यस्य कथमन्यधर्मबोधकत्वमत आशयं प्रकाशयति सारे—***रेखागवयेत्यादि*** । ***तद्वदेवेति*** रेखागवयादिवदेवेत्यर्थः । यथा गवयादावविद्यमानमपि रेखागवयादिनिष्ठं रेखाकृतिपुच्छं गवयादिपुच्छे सादृश्यमूलकाभेदाध्यवसायाद् गवयादिबोधकम् , तथा समासेऽविद्यमानमपि विग्रहवाक्यनिष्ठपूर्वपदार्थादिप्राधान्यं सादृश्याद् अव्ययीभावादिबोधकमित्यर्थः ॥ २९½ ॥

अजहत्स्वार्थवृत्तिपक्षे तु पूर्वपदार्थप्राधान्यव्यवहारो न पुनः दुरुपपाद इत्याशयेन मूलमवतारयति—***नन्विति*** । *** अनेकधोक्तष्विति *** "अथ तेषां ब्रुवतां किं जहत्स्वार्था वृत्तिराहोस्विदजहत्स्वार्था" इत्यादिनेत्यादिः । ***एकार्थीभावव्यपेक्षेति*** एकार्थीभावस्तूक्तः । व्यपेक्षा तु स्वार्थपर्यवसायिनां पदानामाकाङ्क्षावशात्परस्परार्थान्वयबोधकत्वम् । *** पर्य्यवसानं लभ्यते इति *** समर्थसूत्रभाष्यपर्य्यालोचनया तु एकार्थीभावः सामर्थ्यमिति पक्ष एव वृत्तिद्वयस्वीकारो

तत्राजहत्स्वार्थापक्षे उक्तव्यवस्था नासम्भविनीत्याशङ्कां मनसिकृत्य आह—

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ॥ ३० ॥
भेदः संसर्ग उभयं चेति वाच्यव्यवस्थिते : ॥३०½॥

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था । पदे वर्णवद् वृत्तौ पदानामानर्थक्यमित्यर्थः ।

प्रभा

तथाच जहत्स्वार्थत्वमेवैकार्थीभावः । अजहत्स्वार्थत्वं व्यपेक्षा । आद्ये समुदायस्यैव विशिष्टार्थोपस्थापकत्वेऽवयवभूतानि पदानि न स्वार्थोपस्थापकानि वैयर्थ्यात् , अनन्यलभ्यस्यैव शब्दार्थत्वात् । अजहत्स्वार्थत्वपक्षे परस्परापेक्षत्वरूपव्यपेक्षात्वस्य सम्भवात् तत्पक्षेऽवयवाः स्वार्थोपस्थापका एव । तथाच 'स्वार्थपर्यवसायिनां पदानामाकाङ्क्षावशात् परस्परान्वयो व्यपेक्षा' इति फलति । तत्रेति– घटकत्वं सप्तम्यर्थः । तद्घटकाजहत्स्वार्थपक्ष इत्यर्थः । उक्तेति– पूर्वपदार्थप्रधानोऽव्ययीभाव इत्यादिलक्षणरूपव्यवस्थेत्यर्थः । नासम्भविनी= सम्भविन्येवेत्यर्थः ।

ते=जहत्स्वार्थाऽजहत्स्वार्थे । भेद इति– भेदो वाच्यः । संसर्गो वाच्यः । उभयम्=भेदसंसर्गात्मकमुभयं वाच्यम् । इति वाच्यस्य=शक्यार्थस्य व्यवस्थितेः=व्यवस्थाया हेतोः पुनस्त्रिधा=भेदवाचिका, संसर्गवाचिका, भेदसंसर्गोभयवाचिका इति द्वयी वृत्तिस्त्रिधेत्यर्थः । स्वार्थमिति—जहति (पदानि) स्वार्थं यस्यां वृत्तौ सा 'जहत्स्वार्था' इति द्वितीयान्तस्वार्थपदप्रथमान्तजहत्पदघटितव्यधिकरणबहुव्रीहिरेव मूलग्रन्थतः प्रतीयते । स च 'सप्तमी विशेषणे' इति सप्तम्यन्तस्य पूर्वनिपातविधानेन ज्ञापितात् क्वचिद्व्यधिकरणानामपि बहुव्रीहिरिति वचनादुपपाद्यः । वस्तुतस्तु हति स्वानि (आत्मीयानि पदानि) यमर्थमिति प्राप्तोदकवद् द्वितीयान्तार्थे समानाधिकरणबहुव्रीहिं कृत्वा जहत्स्वोऽर्थो यस्यामिति समानाधिकरणबहुव्रीहिणैव व्युत्पाद्यः । वृत्ताविति— शक्तरामादिपदघटकरेफादिवर्णानामिव वृत्तिघटकपदानामप्यानर्थक्यमिति भावः । अन्यथा तत्र पदानामर्थवत्त्वस्वीकारे तुल्ययुक्त्या वर्णानामप्यर्थवत्त्वापत्तिरिति भावः । अत्र पक्षे वृत्तिघटकेषु पदेषु अर्थवच्छब्दनिमित्तकं कार्यं तु प्राग्भाविनमर्थमादाय 'प्रत्ययोत्तरपदयोश्च' इत्यादिशास्त्रारम्भसामर्थ्याद्वा भवत्येवेति बोध्यम् । तेन 'महाबाहुः' 'सुपन्थाः' इत्यादीनां सिद्धिः ।

दर्पणव्याख्या

बोद्धृभेदेन, किन्तु, अथ ये वृत्तिं वर्त्तयन्ति किं ते आहुरित्यादिभाष्याद् वाक्यादेवेयं वृत्तिर्निष्पन्नेति मतमवलम्ब्यायं विचार इति लभ्यते । ***समासशक्त्यैव*** *इत्येवकारेणावयवशक्तिव्यवच्छेदः । दृष्टान्तमाह—***वृषादिपदानामिवेति*** ।

आनुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्या एव शक्तावच्छेदकत्वेन वृषभादिपदान्तर्गतवृषादिसमवेतानुपूर्व्याः शक्ताऽनवच्छेदकत्ववत् समासान्तर्गतराजानुपूर्व्याः शक्तावच्छेदकत्वासम्भवादित्यर्थः । अन्यथा रामादिपदादग्न्यादीनामवयवार्थानामपि पदार्थोपस्थितिशाब्दबोधयोरापत्तिः, अवान्तरसुबुत्पत्त्यापत्तिः, धनं वनमित्यादौ जश्त्वाऽऽपत्तिश्च । वाक्ये तु पदान्यर्थवन्त्येव । 'राजसम्बन्धी पुरुषः' इत्याद्यर्थे राज्ञः पुरुषः, 'पुरुषो राज्ञः' इत्यादिविशिष्टानुपूर्वीद्वयस्य शक्यतावच्छेदकत्वकल्पनाऽपेक्षया पदशक्तिकल्पनाया एव लघीयस्त्वादिति भावः ।

नचैतत्कल्पे विशिष्टरूपोपादानविहितत्वाऽनापत्त्या, महाबाहुः, सुपन्थाः, इत्यादौ दोष , अनर्थकत्वात् । एवमर्थवत्त्वनिबन्धनप्रातिपदिकत्वाभावेन नलोपाद्यनापत्तिश्चेति वाच्यम् , वृत्तिप्राग्भाविनमर्थवत्त्वमारोप्य तत्तत्कार्यस्य सूपपादत्वात् । इदञ्च "प्रत्ययोत्तरपदयोश्च" (पा० सू० ७ । २ । १७) इति सूत्रभाष्ये स्पष्टम् ।

SGDF Sri Gargeshwari Digital Foundation

अयं भावः—समासशक्त्यैव राजविशिष्टपुरुषभान (बोध) सम्भवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम्, वृषभयावकादिपदेषु वृषादिपदानामिव।

प्रभा

ननु पदेषु घटकतया निविष्टानां वर्णानां कुत्रापि अर्थबोधजनकत्वस्यादृष्टतयाऽऽनर्थक्येऽपि वृत्तिघटकराजादिपदानां वाक्येऽर्थबोधजनकत्वेन दृष्टानां समासे तादृशार्थबोधोत्पादने तात्पर्यग्राहकाणामानर्थक्यमसङ्गतमत आह—अयम्भाव इति। राजविशिष्टेति—राजसम्बन्धविशिष्टेत्यर्थः, स्वत्वादिसम्बन्धस्य प्रकारविधियैव भानोपगमात्। 'राज्ञः पुरुषः' इति वाक्येऽपि संसर्गतयैव भानवादिमते तु स्वत्वादिसम्बन्धेन राजविशिष्टपुरुषेति यथाश्रुतमेव साधु। तद्बोधकत्वम्=राजादिबोधकत्वम्। कल्प्यमिति—न कल्प्यमित्यन्वयः, प्रयोजनविरहात्, बोधावृत्तिप्रसङ्गाच्च। ननु 'सम्भेदे (सम्मिल्य बोधने) नान्यतरवैयर्थ्यम्, इति न्यायेन द्वावपूपाविति वत् न बोधावृत्तिप्रसङ्गः। एवञ्च समासघटकपदानामप्यर्थबोधकत्वे क्षत्यभाव इत्यत आह—वृषभेति—शक्तावच्छेदकान्तराघटकीभूता याऽऽनुपूर्वी सैव शक्तावच्छेदिका। यथा वृषभत्वरूपशक्तावच्छेदकघटकीभूतं वृषत्वं लघुभूतमपि नावच्छेदकम्। केवलवृषशब्दप्रयोगे तु अवच्छेदकं भवत्येव, शक्तावच्छेदकान्तराघटकत्वादित्यनुभवसिद्धम्। तथैव 'राजपुरुषः' इत्यत्र समुदायनिष्ठशक्तावच्छेदकं राजपुरुषत्वम्। तद्घटकीभूतं यद्राजत्वं तद् राजरूपार्थनिष्ठशक्यतानिरूपितशक्तावच्छेदकं न स्यादिति राजपदस्यानर्थक्यं तत्पक्षे। न चास्मिन्पक्षे 'महाबाहुः' 'सुपन्थाः' इत्यादावात्वं न स्यात्, अर्थवत्परिभाषया अर्थवतोरेव महत्पथिशब्दयोरात्वविधानादिति वाच्यम्, वृत्तिप्राग्भाव्यर्थवत्त्वारोपेण तत्तत्कार्यप्रवृत्तेः। अत एव 'आन्महतः' 'प्रत्ययोत्तरपदयोश्च' इत्यादिसूत्रं सार्थकम्। 'ईदूतौ च सप्तम्यर्थे' इत्यत्र तु अर्थग्रहणसामर्थ्यादनारोपितस्यैव सप्तम्यर्थवृत्तित्वस्य ग्रहणमिति न 'वाप्यश्वः' इति प्रत्युदाहरणपरभाष्यविरोधः। नचैवं पङ्कजादिपदेषु योगरूढत्वोच्छेदः, अवयववृत्त्यानुपूर्व्याः समुदायनिष्ठशक्तावच्छेदकघटकत्वादिति वाच्यम्, योगरूढस्थलेऽनुभवबलात् शक्तावच्छेदकघटकीभूताया अपि अवयवनिष्ठानुपूर्व्या शक्तावच्छेदकत्वोपगमात्, पूर्वपदस्यानर्थक्येऽपि 'राजपुरुषः' इत्यादौ राजनि विशेषणत्वव्यवहारस्तु राजपुरुषत्वावच्छिन्नस्य बोधे राज्ञो विशेषणत्वाभिप्रायात्। 'चम्पकपुष्पवासिततिलतैल' न्यायाद्वा।

दर्पणव्याख्या

नचैवम् 'वाप्यश्वः' इत्यादौ न दोषः, जहत्स्वार्थायां वृत्तावानर्थक्यादिति "ईदूतौ च सप्तम्यर्थे" (पा० सू० १।१।१९) इति सूत्रस्थभाष्यविरोधो दुष्परिहरः, आरोपिताऽर्थवत्त्वस्य समासाऽन्तर्गतपदेषु स्वीकारादिति वाच्यम्, अर्थग्रहणसामर्थ्येनारोपितार्थस्य तत्राग्रहणादित्याशयात्। एकस्यैव पदस्य वृत्तितत्प्राक्कालयोरर्थवत्त्वानर्थवत्त्वे च प्रयोगानुरोध एव शरणम्। योगरूढिस्थले तु योगान्तर्भावेण शक्त्यभ्युपगमान्न तदुच्छेदोऽपि।

नचात्र पक्षे राजादिपदैः सर्वथा स्वार्थत्यागे तद्भानं न स्यात्तस्माच्चैकपदार्थोऽपरपदार्थे विशेषणमिति व्यवहार इति वाच्यम्, विशिष्टेनैव राजादिविशिष्टपुरुषाद्युपस्थापनेनाऽऽद्यदोषाभावात्। अथवा 'अन्वयाद् विशेषणं भवति' इति भाष्येण द्वितीयस्यापि समाधानात्। निष्कीर्णास्वपि सुमनःस्वामोदान्वयमात्रेण यथा चम्पकपुष्पव्यवहारस्तथा सदृशार्थान्वयमात्रेण राजादिपदार्थः पुरुषे विशेषणमिति व्यवहार इति तदर्थ इति जहत्स्वार्थवृत्तिपक्षोपपत्तिः। परन्त्वेवं हि दृश्यते लोके पुरुषोऽयं परकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति, तद्यथा—तक्षा राजकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति। एवं युक्तं यद्राजा पुरुषार्थे प्रवर्त्तमानः स्वमर्थं जह्यादुपगुश्चापत्यार्थे वर्त्तमानः स्वमर्थं जह्यादिति भाष्यादेतत्कल्पेऽपि पूर्वपदार्थ एव जहत्स्वार्थत्वं लभ्यते इति।

Sri Gargeshwari Digital Foundation

अन्यथा राजपदेन विग्रहवाक्य इव, राज्ञः स्वातन्त्र्येणोपस्थितिसत्त्वात्, 'ऋद्धस्य राज्ञः पुरुष इत्यत्रेव 'ऋद्धस्य राजपुरुषः' इत्यस्याप्यापत्तेरिति ।

अजहदिति—न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्था ।

अयमभिप्रायः—राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः, कल्पकाभावात्, क्लृप्तराजादिपदादेवार्थोपस्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्त्वाच्च । क्लृप्तशक्तित्यागोऽप्यप्रामाणिकः कल्प्येत । तथाचाऽऽकाङ्क्षादिवशात् क्लृप्तशक्त्यैव विशिष्टार्थबोधः ।

प्रभा

अयमत्र विशेषः—'यथा तक्षा राजादिकर्मणि प्रवर्तमानः स्वमर्थं जहाति, एवं राजादिपदमपि स्वमर्थं जह्यात् । एवं हि दृश्यते लोके पुरुषोऽपरकर्मणि प्रवर्तमानः स्वमर्थं जहातीतिवत् यदा राजा पुरुषार्थे प्रवर्तमानः स्वमर्थं जह्यात्, उपगुश्चापत्यार्थे स्वमर्थं जह्यात्' इति भाष्ये पुरुषार्थे प्रवर्तमानोऽपत्यार्थे प्रवर्तमानः इति भाष्येण पूर्वपदमेव स्वार्थं जहातीति प्रतीयते । अन्यथा—पूर्वपदस्याप्यर्थोपस्थापकत्वे । आपत्तेरिति—जहत्स्वार्थत्वे तु राजपदार्थस्य पृथगुपस्थित्यभावेन 'पदार्थः पदार्थेन' इति न्यायविरोधान्न तत्र विशेषणान्वयः । न जहतीति—शत्रन्तप्रकृतिकजसन्तं पदं जहतीति । न जहत्स्वार्था अजहत्स्वार्थेति विग्रहः । ननु समुदायशक्त्यैव राजविशिष्टपुरुषस्य बोधनिर्वाहेऽवयवशक्तिवर्णनेत्यत आह—अयमिति । अतिरिक्तेति—जहत्स्वार्थपक्षवत् समुदाये शक्तिरत्र पक्षे नाश्रीयते इति भावः । कल्पकाभावादिति—'ननुराजपुरुषः' इत्यनेन 'राजसम्बन्धवान् पुरुषः' इति सम्बन्धप्रकारकबोध एव समुदायशक्तिकल्पकः, विभक्तेरभावेन सम्बन्धोपस्थितेः समुदायशक्तिसाध्यत्वात् । नच सम्बन्धस्य संसर्गतयैव भानमाकाङ्क्षावशादिति वाच्यम्, नामार्थयोर्भेदसंसर्गेणान्वयस्य 'नामार्थयोरभेदान्वयः' इति व्युत्पत्तिविरुद्धत्वादित्यत आह—क्लृप्तशक्तिकराजादीति—क्लृप्तशक्तिकराजादिपदादेवेति पाठः । क्लृप्ता शक्तिर्यस्य राजादिपदस्य तत् क्लृप्तशक्तिकम् । क्लृप्तशक्तिकञ्च तद् राजादिपदं तस्मादित्यर्थः । तत्कल्पनस्य=समुदायशक्तिकल्पनस्य । 'नामार्थयोरभेदान्वयः' इति व्युत्पत्तिः समासातिरिक्तविषयेति स्वत्वसंसर्गको बोधो नानुपपन्न इत्यत आह—गौरवपराहतत्वादिति—व्युत्पत्तौ वृत्तिघटकातिरिक्तत्वेन निवेशे तत्र तत्र समुदायशक्तिकल्पनापेक्षया लाघवमेवेत्यभिप्रेत्याह । क्लृप्तशक्तित्याग इति । आकाङ्क्षादिवशादिति—स्वत्वसम्बन्धेन राजविशिष्टपुरुष इत्याकारकबोधं प्रति राजपदाव्यवहितोत्तर-

दर्पणव्याख्या

अन्यथेति वृत्तौ व्यपेक्षारूपसामर्थ्याभ्युपगमे इत्यर्थः । *इत्यस्यापि* इत्यपिना राज्ञः पुरुषो भार्यायाश्चेत्येकत्र द्वयमिति विषयताशालिबोधजनकस्य समुच्चयः । *आपत्तेरिति* अस्मन्मते तु पदार्थैकदेशत्वाद्भेदेऽपि शक्त्यभ्युपगमेन (अ) राजकीयभिन्नत्वेनावगते विशेषणान्तरायोगाच्च न सेति भावः । अजहत्स्वार्थवृत्तिपक्षस्य भाष्यानुसारेणाऽन्यथैवोपपादनाद् 'व्यपेक्षायां सामर्थ्यमेके' इत्येकीयमताश्रितामनुसृत्याह—*अयमभिप्राय इति* । *नातिरिक्तेति* क्लृप्तप्रत्येकवृत्त्यतिरिक्तेत्यर्थः । *कल्पकाभावादिति* कल्पकस्यान्यथानुपपत्तिरूपप्रमाणस्याभावादित्यर्थः ।

ननु विशिष्टार्थानुपपत्तिरेव तत्कल्पिका भविष्यतीत्यत आह—*क्लृप्तराजादीति* तत्कल्पनस्य—विशिष्टशक्तिकल्पनस्येत्यर्थः । ननु स्यादेवं यद्येतत्पक्षे प्रत्येकपदशक्तिकल्पना, सैव नेति क्व गौरवावसरोऽत आह—*क्लृप्तशक्तीति* वृत्तिप्राक्काले क्लृप्तायाः प्रत्येकपदशक्तिस्तत्परित्याग इत्यर्थः । कालभेदेनाप्येकस्यैव शब्दस्यार्थवत्त्वानर्थकत्वयोर्विरुद्धत्वात्, नलोपादिव्यवस्थाऽनुपपत्त्या च वृत्तिदशायां तत्स्वीकारस्यैवोचितत्वादिति भावः ।

ननु प्रत्येकशक्त्या तत्तत्पदार्थोपस्थितावपि विशिष्टे शक्त्यनङ्गीकारेण तदनुपस्थित्या कथं तस्य शाब्दविषयतेत्यत आह—*तथाचेति* । *आकाङ्क्षेति* । आदिपदाद्योग्यताऽऽदिपरिग्रहः, राजपदाव्यवहितपुरुषपदत्वादिरूपकारणसमवधा-

SGDF
Sri Gargeshwari Digital Foundation

अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः ।

नचात्र मते समासे 'ऋद्धस्य' इति विशेषणान्वयापत्तिः, "सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न" इति वार्त्तिकात् । तथाचैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वाद् पूर्वपदार्थप्रधान इत्यादिव्यवस्था सूपपदेति भावः ।

प्रभा

पुरुषपदत्वरूपाकाङ्क्षाज्ञानरूपकारणवशादित्यर्थः । नन्वत्र पक्षे प्रमाणाभाव इत्यत आह—अयमेवेति—अजहत्स्वार्थावृत्तिरिति पक्ष एव । तथाचात्र भाष्यमेव प्रमाणमिति भावः । मतान्तरत्वेनेति—तथाच भाष्यम्—'परस्परव्यपेक्षां सामर्थ्यमेके' इति । बहुव्रीहौ, द्वन्द्वे च समुदायस्यान्यपदार्थे, समूहे च शक्तिः, 'अनेकमन्यपदार्थे' 'चार्थे द्वन्द्वः' इति सूत्रबलात् । एवञ्च चित्राद्यन्विताया गोः स्वस्वामिभावसम्बन्धेनान्यपदार्थेऽन्वये चित्राभिन्नगवस्वामीति बोधः । द्वन्द्वेऽपि समूहे वर्तिपदार्थयोरवयवावयविभावसम्बन्धेनान्वय इति तयोरपि व्यपेक्षापक्षेण निर्वाहः । अन्यपदार्थे समूहे च शक्तिकल्पनेऽपि वर्तिपदार्थविशिष्टे तस्मिन् शक्त्यकल्पनेन लाघवसत्त्वात् । अन्वयापत्तिरिति—पृथगुपस्थितीयमुख्यविशेष्यतायाः सत्त्वादिति भावः । सविशेषणानामिति—'ऋद्धस्य राज्ञः पुरुषः' इति वाक्ये ऋद्धस्येति विशेषणसत्त्वात् राजपुरुष इति समासो न भवति । एवम् 'राजपुरुषः' इति वृत्तिघटकीभूतस्य राजपदार्थस्य विशेषणसम्बन्धो न भवति, ऋद्धस्येत्यादिर्विशेषणतया नान्वेतीत्यर्थः । वृत्तस्य—इत्यस्य समासघटकत्वे सति पदान्तरार्थनिष्ठविशेष्यतानिरूपितप्रकारताऽऽश्रयस्येत्यर्थः । पुरुषपदार्थे तु अन्वयविवक्षायां 'सुन्दरः राजपुरुषः' इति भवत्येव, पुरुषे प्रकारताऽऽश्रयत्वस्याभावात् । समासघटकमात्रस्य सविशेषणत्वे समासाभावे तु 'उपमितं व्याघ्रादिभिः' इति सूत्रे 'सामान्याप्रयोगे' इत्यस्य वैयर्थ्यापत्तिः, 'पुरुषो व्याघ्र इव शूरः' इत्यत्र पुरुषे शूर इति विशेषणसत्त्वात् समासाप्राप्तेरिति सामान्याप्रयोगग्रहणाज्ज्ञापकाद् विशेष्यस्य सविशेषणत्वेऽपि समासो भवत्येवेति 'राजपुरुषः सुन्दरः' इत्यादौ न दोषः । वार्तिकादिति—अनन्तसमासे शक्तिकल्पनापेक्षया वार्तिकारम्भे एव लाघवमिति भावः । एतन्मतेति—व्यपेक्षासामर्थ्यमितिवादिनां मतेत्यर्थः । सूपपदेति—अव्याप्त्यतिव्याप्तिदोषपरिहारेऽपि लक्षणसमन्वयसम्भवेनासम्भवो नेति भावः । अत एव 'सुबामन्त्रिते' इति सूत्रे 'सुबिति किमर्थम् । करोष्यटन् । नैतदस्ति, असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् ? समानाधिकरणमसमर्थवद् भवतीति' इति भाष्योक्तं सङ्गच्छते । एकार्थीभावस्यात्र ग्रहणे तु सूत्रवैयर्थ्यमेव स्यादिति व्यपेक्षासामर्थ्यस्यैवात्रावश्यकता । ननु समर्थसूत्रे एकार्थीभाव एव सामर्थ्यम्, 'सुबामन्त्रिते' इत्यत्र सूत्रारम्भसामर्थ्यात् तदनुपस्थितिरिति चेन्न, 'ऋतेन मित्रावरुणावृतावृधावृतस्पृशा' इत्यत्र 'ऋतेन' इत्यस्य पराङ्गवद्भावादाष्टमिकनिघातापत्तेः । अत्र समर्थपरिभाषोपस्थित्या व्यपेक्षारूपसामर्थ्यस्य ग्रहणे तु ऋतेनेत्यस्य 'आशाथे' इति पदोपात्तव्याप्तिक्रियायामन्वयेन सामर्थ्याभावात् पराङ्गवद्भावाभावे षाष्ठेन 'आमन्त्रितस्य' इत्यनेन आद्युदात्तसिद्धिरिति स्पष्टं चेदं वेदभाष्यादौ ।

दर्पणव्याख्या

नादित्यर्थः । तथाच प्रत्येकपदार्थोऽपस्थितिसहकृताऽऽकाङ्क्षाऽऽदिभिरेव विशिष्टबोधसम्भवेन तत्पूर्वं विशिष्टोपस्थित्यपेक्षा यस्यै सा कल्प्येतेति भावः । *अयमेवेति* अयमभिप्राय इत्यादिनोक्त एवेत्यर्थः । भाष्यकारैरित्यस्य 'परस्परव्यपेक्षां सामर्थ्यमेके' इत्यादिनेति शेषः । उक्तापत्तिमुद्धरति—*नचात्रेति* । अन्वयापत्तिरिति* यथाश्रुताभिप्रायेण सम्बन्धिलक्षणायामापत्तेरभावस्य वक्ष्यमाणत्वात् ।

प्रसङ्गाद् वृत्तिभेदमपि निरूपयति—ते पुनरिति—द्वे अपि वृत्ती त्रिविधे, वाच्यत्रैविध्यात्। वाच्यमेवाह—भेद इत्यादि। भेदः=अन्योन्याभावः। तथाच 'राजपुरुषः' इत्यादावराजकीयभिन्न

प्रभा

प्रसङ्गादिति—वृत्तिसामान्येन विशेषस्य स्मरणात् स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गतेरित्यर्थः। भेद इति—एतेषां समासवाच्यत्वे मानन्तु समर्थसूत्रस्थं भाष्यमेव। तथाहि—'सामर्थ्यन्नाम भेदः, संसर्गो वा। अपर आह—भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भेदः संसर्गो वा। इह राज्ञ इत्युक्ते सर्वं स्वं (अश्वो गृहं वा) प्रसक्तम्, 'पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः'। प्रसक्तिस्तदैव यदा प्रमाणान्तरेण पुरुषस्य पारतन्त्र्यं निर्णीतम्। अन्यथा पुरुष इत्युक्तेऽस्तीति प्रतीतिः स्यान्नतु स्वामिमात्राक्षेपः। 'इहेदानीं 'राजपुरुषमानय' इत्युक्ते राजा पुरुषं निवर्तयति—अन्येभ्यः स्वामिभ्यः। पुरुषो राजानं निवर्तयति अन्येभ्यः स्वेभ्य इति'। अत्र कैयटः—'यदि च वृत्तौ भेदसंसर्गौ न स्याताम् तदा सामर्थ्यमेव न स्यात्, तदात्मकत्वात् सामर्थ्यस्येत्यर्थः। तत्र संसर्गाविनाभावित्वादनुमीयमानसंसर्गो भेदः सामर्थ्यमिति भेदः समासवाच्यः। भेदाविनाभावित्वादनुमीयमानभेदः संसर्गो वा सामर्थ्यमिति संसर्गः समासवाच्यः। तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्य स्वार्थं जहाति। पुरुषस्त्वजहदपि स्वार्थं स्वान्तरेभ्यो राजानं निवर्तयतीति। ततश्च कृतकार्यस्य भवतु राजार्थस्य निवृत्तिः। अकृतकार्यस्य निवृत्तौ वृत्तिरेव न स्यादिति भेदो वाच्यः। एवम् 'राज्ञः' इत्युक्ते सर्वं स्वं प्रसक्तम्, पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। 'राजपुरुषः' इत्युक्ते राजा स्वत्वेन पुरुषमेव सम्बध्नाति नान्यम्, पुरुषः स्वामित्वेन राजानमेव सम्बध्नाति नान्यम्। इति संसर्गः समासार्थः। उभौ वा यौगपद्येनाश्रीयमाणौ सामर्थ्यमित्युभयं समासार्थः। भेदशब्दो विशेषार्थकोऽपि सम्भवति, यथा—'द्रव्यभेदानाह' इत्यादावत आह—अन्योन्याभाव इति। ननु 'राजपुरुषः' इत्यादौ भेदः समासार्थः' इति सत्यम्, परन्तु राजप्रतियोगिकः पुरुषानुयोगिकः, उत पुरुषप्रतियोगिको राजविशिष्टपुरुषप्रतियोगिको वा राजानुयोगिकः। नाद्यः राजपदार्थस्य पुरुषे विशेषणत्वेन 'एकत्र विशेषणतयाऽन्वितस्यापरत्र विशेषणत्वायोगात्' भेदे विशेषणत्वायोगः, राजभेदस्य राजसम्बन्धिमात्रे सत्त्वेनाव्यावर्तकत्वात् वक्ष्यमाणप्रयोजनासिद्धेश्च। न द्वितीयः, भेदस्य प्रतियोगितावच्छेदकेन सह विरोधाद् राजनि पुरुषभेदस्य वाच्यत्वे तत्र पुरुषत्वस्य सत्त्वेन पुरुषभेदस्य बाधितत्वात्। तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकपुरुषभेदस्याव्यावर्तकत्वात्, 'राजधनम्' इत्यादौ धनत्वावच्छिन्नप्रतियोगिताकभेदस्य राजनि सम्भवेऽपि तदनुपयोगाच्च। तृतीयो राजविशिष्टपुरुषभेदोऽपि वक्तुमशक्यः, प्रयोजनविरहादित्यत आह—तथाचेति। बोध इति—राजभिन्नासम्बन्धी पुरुष इति बोध इत्यर्थः। नचैवं 'राजपुरुषः' इत्यनेन 'राजसम्बन्धवान्, स्वत्वसम्बन्धेन राजविशिष्टो वा पुरुष इति बोधोऽप्यनुभवसिद्धस्तस्यानुपपत्तिरिति वाच्यम्, भेदस्य संसर्गाविनाभूतत्वेन तादृशभेदरूपहेतुना संसर्गानुमानात् तादृशबोधसिद्धेः। तादृशबोधो मानस एव, नतु शाब्द इति भावः, नतु अराजकीयभिन्नः पुरुष

दर्पणव्याख्या

प्रसङ्गादिति स्मृतिकालावच्छिन्नोपेक्षतानर्हताऽवच्छेदकधर्मवत्त्वादित्यर्थः। *वृत्तिभेदमिति* वृत्तेः=समासादिवृत्तेर्भेदम् भेदसंसर्गादिरूपार्थकृतमित्यर्थः। तदुक्तं भाष्ये—"सामर्थ्यन्नाम भेदः, संसर्गो सा। अपर आह—भेदसंसर्गौ वा सामर्थ्य।" इति। यदि वृत्तौ भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात्तदात्मकत्वात्सामर्थ्यस्य" इत्यतस्तदर्थकत्वं तस्येति तद्भावः। *भेद इति* संसर्गाविनाभावित्वादनुमीयमान (संसर्गः। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः। तदेवाह *अन्योन्याभाव इति*।

SGDF Sri Gargeshwari Digital Foundation

इति बोधः । अस्यावाच्यत्वे च 'राजपुरुषः सुन्दरः' इतिवत्, राजपुरुषो देवदत्तस्य' चेत्यपि स्यात् । वाच्यत्वे तद्विरोधान्नैवं प्रयोग इति भावः ।

'राजसम्बन्धवान्' इत्येव शाब्दं भानम्, भेदस्तूत्तरकालमुपतिष्ठते इत्याशयेनाह—संसर्ग इति । विनिगमनाविरहम्, अस्वामिकेऽपि 'राजपुरुषः' इत्यादिप्रयोगापत्तिश्च मनसि कृत्वोभयं वाच्यमित्याह—उभयं वेति । तथाच 'अराजकीयभिन्नो राजसम्बन्धवाँश्चायम्' इति बोधः ॥३०½॥

प्रभा

इति बोधः । तथा सति राजसम्बन्धिभिन्नभिन्नः पुरुष इत्येव बोधः फलितः । एवञ्च तादृशबुद्धेः राजसम्बन्धिभिन्न इत्याकारकबुद्धेः प्रतिबन्धकत्वेऽपि राजसम्बन्धिभिन्नभिन्नो राजेतरसम्बन्धी पुरुष इति बुद्धिं प्रति प्रतिबन्धकत्वाभावेन राजपुरुषो देवदत्तस्येति बोधापत्तिः । राजभिन्नासम्बन्धी इति बोधे तु राजभिन्नसम्बन्धी इति बुद्धेः प्रतिबन्ध्यतया राजपुरुषो देवदत्तसम्बन्धी, इत्यभिप्रायेण राजपुरुषो देवदत्तस्येति न प्रयोगः । एवञ्च 'राजपुरुषः' इत्यादिसमुदायस्य पूर्वपदार्थभिन्नस्य यः सम्बन्धी तद्भिन्ने शक्तिरित्येतादृशभेदबोधकत्वं समासस्य । अस्य=भेदस्य । अवाच्यत्वे त्विति—भेदस्यावाच्यत्वे राजनिरूपितसम्बन्धवति देवदत्तस्यापि सम्बन्धसत्त्वे 'राजपुरुषो देवदत्तस्य' इति प्रयोगो दुर्वार एव स्यात् तदाह–राजपुरुष सुन्दर इति—'उपमितं व्याघ्रादिभिः' इत्यत्र सामान्याप्रयोगग्रहणेन विशेष्ये विशेषणस्य दातुं शक्यत्वात् । तद्विरोधादिति—'राजपुरुषः' इति समासजन्यस्य राजभिन्नसम्बन्धिभिन्नः पुरुष इति बोधस्य राजभिन्नदेवदत्तसम्बन्धी इति बोधं प्रति प्रतिबन्धकत्वादिति तत्त्वम् । अत्र भेदप्रतीतिर्येन सम्बन्धेन सम्बन्धी पूर्वपदार्थस्योत्तरपदार्थस्तेन सम्बन्धेनेतरस्य सम्बन्धित्वं प्रतिबध्नाति ।

तथाच—प्रीतिविषयत्वादिसम्बन्धेनान्वयविवक्षायां राजपुरुषो देवदत्तस्य च इति भवत्येव । यदि तु तेनेतरस्य सम्बन्धमात्रं प्रतिषिध्यते तदा समासार्थभेदप्रतियोगिदले सम्बन्धत्वेन सम्बन्धस्य निवेश इति न राजपुरुषो देवदत्तस्य च इति प्रयोगः । भेदस्य भाने प्रतियोगितावच्छेदकधर्मघटकतया निविष्टस्य संसर्गस्य ज्ञानमावश्यकमिति प्रथमोपस्थितत्वात् तस्यैव वाच्यत्वमस्त्वित्याह—राजसम्बन्धवानिति—राजसम्बन्धविशिष्टः पुरुष इत्येव शाब्दबोध इत्यर्थः। उत्तरकालमिति—संसर्गस्य भेदाविनाभावित्वात् संसर्गेण हेतुना भेदोऽनुमीयत इति भावः । तथाचानुमानगम्य एव भेदः, न तु शाब्द इति भावः । ननु भेदोऽनुमेयः संसर्गो वाच्यः, उत संसर्गोऽनुमेयो भेदो वाच्य इत्यत्र विनिगमनाविरह इत्यत आह–उभयम्=भेदः, संसर्गश्च । ननु भेदस्यावाच्यत्वे 'राजपुरुषो देवदत्तस्य च' इति प्रयोगापत्तिरतो भेदस्य वाच्यत्वमिति चेत्तर्हि संसर्गस्याप्यवाच्यत्वे अस्वामिके पुरुषे राजभिन्नासम्बन्धित्वसत्त्वात् 'राजपुरुषः' इति प्रयोगापत्तिरत उभयं वाच्यमित्याह—अस्वामिकेऽपीति—परे तु जहत्स्वार्थावृत्तिः सैव यत्र उपसर्जनपदानां स्वार्थानुपस्थापकत्वे सति राजादिपदसन्निहितपुरुषादिपदानामेव राजसम्बन्धिपुरुषोपस्थापकत्वम् । नच राजपदस्य निरर्थकत्वे राजपदार्थः पुरुषे विशेषणमिति

दर्पणव्याख्या

संसर्ग इति भेदाविनाभावित्वादनुमीयमानभेदः=भेदमूलकः संसर्ग इत्यर्थः ।

वस्तुतस्तु "भेदसंसर्गौ वा सामर्थ्यम्" इति भाष्यस्य राजादिपदसमभिव्याहृतपुरुषादिपदेन राजादिविशिष्टपुरुषादिरूपविशिष्टार्थस्यैव बोध इत्यभिप्रायः, नतु भेदे पृथक्शक्तिबोधकं तत्, तादृशबोधाननुभवात्, 'रामकृष्णौ' इत्यादिद्वन्द्वे भेदस्य वाच्यताया दुरुपपादत्वाच्चेति ॥ ३०½ ॥

SGDF

व्यपेक्षावादस्यैवं युक्तिभाष्यविरुद्धत्वात् तन्मूलकः 'पूर्वपदार्थप्रधानः' इत्याद्युत्सर्गोऽप्ययुक्तः। किन्तु 'रेखागवय' न्यायेनोत्सर्गोऽपि परम्परयैव बोधक इत्याशयेन समाधत्ते—

प्रभा

व्यवहारानुपपत्तिरिति वाच्यम्, पुटे चम्पकाद्यसत्त्वेऽपि तत्सम्बन्धमात्रात् निष्कासितास्वपि चम्पकमल्लिकासुमनःसु 'अयं चम्पकपुटः' 'अयं मल्लिकापुटः' इति व्यवहारवद् राजपदस्यार्थानुपस्थापकत्वेऽपि विशेषणत्वव्यवहारोपपत्तेः। तदुक्तं समर्थसूत्रे भाष्ये—"अन्वयाद्विशेषणं भवत्ययं मल्लिकापुटोऽयं चम्पकपुट इति निष्कीर्णास्वपि सुमनःसु अन्वयाद्विशेषणं भवत्ययं मल्लिकापुटोऽयं चम्पकपुट इति" इति। यद्वा "भेदसंसर्गौ वा सामर्थ्यम्"। तथाहि—राजपदसन्निधानात् पुरुषपदेन राजभिन्नास्वामिकराजस्वामिकपुरुषमेव बोधयति। अतो न राज्ञः स्वान्तरेण सम्बन्धः, नापि पुरुषस्य स्वाम्यन्तरेण सम्बन्धः। तदुक्तम्भाष्ये—'भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भेदः, संसर्गो वा। इह 'राज्ञः' इत्युक्ते सर्वं स्वं प्रसक्तम्, पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानय इत्युक्ते राजा पुरुषं निवर्तयत्यन्येभ्यः स्वामिभ्यः, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः। एवमेतस्मिन्नुभयतो व्यवच्छिन्ने (उभयस्मिन्परस्परेणावच्छिन्ने) यदि स्वार्थं जहाति कामं जहातु न जातुचित् पुरुषमात्रस्यानयनं भविष्यति" इति, अनेन भाष्येण परस्परसम्बन्धाद् भेदसंसर्गौ यथाकथञ्चिद्बोधविषयौ भवत इत्येव लभ्यते, न तु वाच्यौ ताविति।

किञ्च भेदसंसर्गयोर्बोधविषयत्वे भेदे संसर्गे च प्रतियोगितासम्बन्धेनान्वयाय राजपदार्थस्यावश्यकतया जहत्स्वार्थावृत्तिरिति पक्षे राजपदेन तदर्थोपस्थित्यभावरूपत्यागकथनस्यासङ्गतिः। किञ्च द्वन्द्व—बहुव्रीह्योर्भेदसंसर्गयोः शक्यत्वं दुर्वचम्। एवञ्च पुरुषत्वेन रूपेण पुरुषपदमेव व्यक्तिविशेषं बोधयति। नापि पुरुषस्य स्वाम्यन्तरेण सम्बन्ध इति भाष्योक्तेः पुरुषत्वेन रूपेण व्यक्तिविशेषज्ञानस्यापि देवदत्तस्वामिकः पुरुष इति ज्ञानं प्रति विरोधित्वम्। अत एव कः चन्द्रः इति प्रश्ने प्रकृष्टप्रकाशः चन्द्र इत्युत्तरे चन्द्रत्वेन प्रकृष्टप्रकाशशब्दस्य बोधकत्वमिति तात्पर्यग्राहकत्वं चन्द्रशब्दस्य वेदान्तिभिः स्वीकृतम्। एवञ्चोत्तरपदे एव यत्र तादृशार्थतात्पर्यग्राहकत्वं पूर्वपदस्य तत्रैकार्थीभावः। अत एव 'एकार्थीभावः सामर्थ्यं परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति' इति भाष्ये एष एव पक्षः समीचीन इति बोधयितुं तरब्निर्देशः। ननु यथा एकार्थीभावमात्रस्य ग्रहणे 'समर्थः' इति सूत्रस्यावृत्त्या सामर्थ्यद्वयपरकत्वं न भवति, तदुच्यते—सूत्रमभिन्नतरकं भवति वाक्यभेदो न भवतीति। एवं व्यपेक्षामात्रस्य स्वीकारेऽपि सूत्रं न भिद्यते इति एकार्थीभावः सामर्थ्यमिति समीचीनमित्यत्र विनिगमकाभाव इति चेन्न, व्यपेक्षापक्षे अनेकविधगौरवस्य, भाष्ये तरब्निर्देशस्य च विनिगमकस्य सत्त्वादित्यलं विस्तरेण।

परम्परैवेति—वृत्तिवाक्यार्थबोधकवाक्ये यो राज्ञ इत्यादेरर्थो दृष्टस्तस्य सत्तामात्रेणोत्सर्गः पूर्वपदार्थप्रधान इत्यादिबोधक इत्येव परम्परा। 'राजपुरुषः' इत्यादेः समुदायस्य राजसम्बन्धविशिष्टपुरुषादावयवशक्तितो भिन्नैव शक्तिः। यथा पङ्कजादिशब्दे अवयवशक्तितो भिन्नैव पद्मत्वावच्छिन्ननिरूपिता समुदाये

दर्पणव्याख्या

व्यपेक्षावादस्येति अव्यवहितोक्तविधया वर्णितस्येति शेषः। उक्ताजहत्स्वार्थपक्षस्य तु निर्दिष्टत्वमेवेति भावः। *एवं युक्तीति*उक्तवक्ष्यमाणेत्यर्थः। *भाष्येति* "नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः" इत्यादिभाष्यदूषितत्वादित्यर्थः।

SGDF

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ॥ ३१ ॥
बहूनां वृत्तिधर्म्माणां वचनैरेव साधने ।
स्यान्महद् गौरवं तस्मादेकार्थीभाव आश्रितः ॥ ३२ ॥

प्रभा

शक्तिरित्याह—पङ्कजशब्दवदिति । वृत्तिधर्माणामिति--एकार्थीभावपक्षे स्वतः सिद्धानां वृत्तिधर्माणां व्यपेक्षापक्षे वचनै ='सविशेषणानां वृत्तिर्न' इत्यादिवार्तिकादिरूपैः । साधने=समर्थने । गौरवमिति—गौरवञ्चाग्रे मूले एव स्फुटीभविष्यति । तस्मादिति—व्यपेक्षायां गौरवादेकार्थीभाव आश्रित इत्यर्थः । एकार्थीभाव इति—शक्तिर्द्विधा—व्यपेक्षारूपा, एकार्थीभावरूपा च । तत्र स्वार्थपर्यवसायिनां शब्दानामाकाङ्क्षावशाद् यः परस्परं सम्बन्धः सा व्यपेक्षा । सा च वाक्ये एव । समासादिवृत्तौ तु एकार्थीभावरूपं सामर्थ्यम् । तदेव 'समर्थः पदविधिः' इति सूत्रे समर्थपदेन गृह्यते । तदुक्तं समर्थसूत्रे भाष्ये-'किं समर्थन्नाम । पृथगर्थानामेकार्थीभावः समर्थवचनम् । पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते । क्व पुनः पृथगर्थानि, क्वैकार्थानि । वाक्ये पृथगर्थानि—राज्ञः पुरुष इति । समासे पुनरेकार्थानि—राजपुरुष इति ।

यत्तु एकार्थत्वमेकोपस्थितिजनकत्वमिति दर्पणकारः । तच्चासङ्गतम्, घटशब्देऽपि तथात्वापत्तेः । नचेष्टापत्तिः, समासे पुनरेकार्थानीति भाष्यविरोधापत्तेरिति पञ्चोलिनः ।

एकार्थीभावत्वञ्च—'यत्किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन दृष्टानां शब्दानां विशिष्टविषयकैकशक्त्योपस्थितिजनकत्वम्' । घटपदेऽतिप्रसङ्गवारणाय दृष्टानामित्यन्तनिवेशः । औपगवादौ प्रत्ययानां तथादृष्टत्वाभावेनाव्याप्तिवारणाय यत्किञ्चित्पदेति । तथाच उपगोरपत्यमित्यादौ अपत्यपदजन्योपस्थितिविषयार्थकाणपदघटितत्वेन तत्त्वं सिद्धम् । विभक्तिघटितेषु 'रामाभ्याम्' इत्यादिषु नातिव्याप्तिः, विभक्तिवाच्यवाचकशब्दान्तराभावादिति मञ्जूषाकाराः । एतदपि चिन्त्यम्, लोमवल्लाङ्गूलावच्छिन्नवाचकपशुशब्दे —'सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः' ।

इति पारिभाषिककूकुदशब्दे चातिव्याप्तिरिति शक्तिविशिष्टत्वमेकार्थीभावत्वमिति गुरवः । वैशिष्ट्यञ्च—स्वपर्याप्त्यधिकरणघटितत्व-स्वनिरूपकार्थेतरार्थनिरूपितशक्तिपर्याप्त्यधिकरणघटितत्व-स्वज्ञानप्रयोज्यज्ञानविषयशक्तिपर्याप्त्यधिकरणत्वैतत्त्रितयसम्बन्धेन । लक्षणसमन्वयस्तु—वृत्तिघटकपदनिष्ठशक्तिमादाय विधेयः । यथा-'राजपुरुषः' इत्यत्र राजपदनिष्ठराजत्वावच्छिन्ननिरूपितशक्तिविशिष्टत्वं राजपुरुषपदस्य । स्वम्=राजत्वावच्छिन्ननिरूपिता शक्तिस्तत्पर्याप्त्यधिकरणं राजपदं तद्घटितत्वस्य, स्वनिरूपको राजरूपोऽर्थस्तदितरोऽर्थः पुरुषरूपस्तच्छक्तिपर्याप्त्यधिकरणं पुरुषपदं तद्घटितत्वस्य, स्वज्ञानं राजपदनिष्ठशक्तिज्ञानं तत्प्रयोज्यज्ञानं राजपुरुषत्वावच्छिन्ननिरूपितसमुदायनिष्ठशक्तिज्ञानं तद्विषयः समुदायनिष्ठा शक्तिस्तत्पर्याप्त्यधिकरणत्वस्य च राजपुरुष इति समुदायेऽक्षतत्वम् । 'लिट्' इत्यादावपि शक्तित्रयम्—आस्वादनत्वावच्छिन्ननिरूपिता शक्तिरेका, 'लिह आस्वादने इत्युक्तेः' । कर्तृत्वावच्छिन्ननिरूपिता शक्तिरपरा, कर्तरि क्विब्विधानात् । आस्वादनकर्तृत्वावच्छिन्ननिरूपिता शक्तिश्च, समर्थः पदविधिरित्युक्तेः । आद्यशक्तिद्वयान्यतरशक्तिमादाय लक्षणसमन्वयः । एवमेव वृत्तिमात्रे शक्तित्रयम् । नच जहत्स्वार्थायां वृत्तिघटके पदे शक्तेरभावः, घटकपदशक्तेरर्थोपस्थापकत्वाभावेऽपि शक्तताबच्छेदकानुपूर्वीसत्त्वे शक्तिसत्तायां बाधकाभावात् । नच जातिविशेषवाचकमण्डूकसरसकृष्णसर्पादौ समुदायशक्तिज्ञानस्यावयवशक्तिज्ञानाप्रयोज्यतयाऽन्त्यसम्बन्धाभावेनाव्याप्तिः, मण्डूकसम्बन्धिसरस्त्वावच्छिन्ननिरूपितायाः, कृष्णाभिन्नसर्पत्वावच्छिन्ननिरूपितायाश्च शक्तेरेकार्थीभावरूपायास्तत्र सत्त्वात् । अन्यथा 'योगाद् रूढिर्बलीयसी' इति सिद्धान्तभङ्गापत्तिः । समुदायशक्तेर्बलवत्त्वाद् अवयवशक्तेरबोधो न जायत इति त्वन्यत् ।

SGDF Sri Gargeshwari Digital Foundation

समास इति—वृत्तिमात्रोपलक्षणम्, "समर्थः पदविधिः" (पा० सू० २।१।१) इत्यत्र पदमुद्दिश्य यो विधीयते-समासादिः स समर्थः—विग्रहवाक्यार्थाभिधाने शक्तः सन् साधुरिति सूत्रार्थस्य भाष्याल्लाभात्।

प्रभा

वृत्तिमात्रेति—मात्रपदं साकल्यपरम्, एकार्थीभाववति लक्षणया सकलवृत्तेर्बोधकमित्यर्थः। पदमुद्दिश्येति—उद्देश्यता च विधेयतया साक्षान्निरूपिता, पदत्वसुबन्तत्वान्यतरधर्मावच्छिन्ना च ग्राह्या, तेन 'न पदान्ताट्टोः' इत्यादिसूत्रे 'अन्यारात्' इत्यादौ च न समर्थपरिभाषोपस्थितिः। नचैवं 'कर्मण्यण्' इत्यादि—कृद्विधायकेषु समर्थपरिभाषानुपस्थितिः, पदत्वेन, सुबन्तत्वेन वा साक्षादवच्छिन्नोद्देश्यताकत्वाभावादिति वाच्यम्, पदविधिशब्देन पदसंज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसंज्ञानिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदकसम्पादकशास्त्रविधेयस्यैव ग्रहणात्। तथाच चतसृणां वृत्तीनां पदविधित्वेन सामर्थ्यनिमित्तकत्वं सिद्धम्। तथाहि-पदसंज्ञाप्रयोजकाः प्रत्ययाः-कप्प्रत्ययावधिकयजादिभिन्नस्वादयस्तिङश्च तादृशप्रत्ययोत्पत्तिप्रयोजकसंज्ञा प्रातिपदिकसंज्ञा धातुसंज्ञा च, प्रातिपदिकादित्यधिकृत्य कप्प्रत्ययावधिकस्वादीनाम्, धातोरित्यधिकृत्य तिङश्च विधानात्। प्रातिपदिकसंज्ञा—धातुसंज्ञाऽन्यतरनिष्ठविधेयतानिरूपितोद्देश्यता कृदन्ततद्धितान्तसनाद्यन्तसमाससंज्ञावदेतदन्यतमनिष्ठा तदवच्छेदकः कृत्प्रत्ययः, तद्धितप्रत्ययः, समाससंज्ञा सनादिः तत्सम्पादकं शास्त्रं 'ण्वुल्तृचौ' 'तस्यापत्यम्' 'सुपा' 'धातोः कर्मणः' इत्यादि, तद्विधेयत्वं कृत्तद्धितसमाससन्नादिषु। एते च सामर्थ्याश्रिताः। यत्र सामर्थ्यं तत्रैव प्रवर्तन्ते। नच कृत्तद्धितसमाससंज्ञासन्नादिषु जातेषु सामर्थ्यम्, सति सामर्थ्ये कृदादय इत्यन्योन्याश्रय इति वाच्यम्, कृदादिविधायकशास्त्रारम्भसामर्थ्यात्तदुद्देश्येषु आरोपितसामर्थ्यस्य सत्त्वात्। अत एव एकार्थीभाव इति च्विप्रत्ययान्तघटित निर्देशः। आरोपितैकार्थीभाव एव च वृत्तौ निमित्तम्। सः=समाससंज्ञादिः। समर्थः=विग्रहवाक्यार्थाभिधाने शक्तः सन् साधुरिति ग्रन्थेन

दर्पणव्याख्या

वृत्तिमात्रेति मात्रपदं कृत्स्नार्थकम्। अजहत्स्वार्थलक्षणया वृत्तिपञ्चकोपस्थापकमित्यर्थः। *वाक्यार्थाभिधान इति* तथाभिधाने इत्यर्थः। भाष्यादित्यस्य 'समर्थानां पदवचनम्' इत्यादिः।

मूले *पङ्कजशब्दवदिति* सप्तम्यन्ताद्वतिः, उपमेये सप्तमीदर्शनात्। पङ्कजशब्दे यथाऽवयवशक्त्यतिरिक्तशक्तिस्तद्वत्समासेऽपीत्यर्थः। नच पङ्कजपदे रूढिस्वीकारे मानाभावः, समुदायात् पद्मत्वविशिष्टप्रतीतेरेव मानत्वात्, पदान्नियतोपस्थिते रूढ्येकसाध्यत्वात् पङ्कजपदाद् योगेन कुमुदस्यापि बोधप्रसङ्गाच्च। रूढिस्वीकारेप्युद्भिदपदेन वृक्षादेरिव योगेन पङ्कजपदेन कुमुदमपि बोध्यत इति तु न, यत्र योग-रूढिभ्यामेकार्थबोधस्तत्र केवलयौगिकार्थबोधे रूढेः प्रतिबन्धकत्वकल्पनात्।

अथवा रूढ्या नियमतः स्मृतं पद्ममेव कर्त्तृव्यक्तिशक्तडप्रत्ययेन पङ्कजनिकर्त्तृतया बोध्यते। "बाधकं विना व्यक्तिवचनानां सन्निहितव्यक्तिविशेषपरत्वम्" इति नियमाद्, व्यक्तिवचनानां यत्किञ्चिद्व्यक्तितात्पर्य्यकाणां सन्निहितो यो व्यक्तिविशेषस्तत्परत्वमिति तदर्थः। "घटेन जलमाहर" इत्यत्र सन्निहितसच्छिद्रव्यक्तिबोधवारणाय तत्र 'बाधकं विना' इति।

तथाच पद्मे तात्पर्य्यसत्त्वेन तदेव योगेनापि प्रतीयते, न कुमुदम्। प्रथमकल्पस्तु रूढिज्ञानस्य ग्राह्याभावानवगाहित्वात्, जनकज्ञानाविघटकत्वाच्च प्रतिबन्धकत्वासम्भवान्न क्षोदक्षमः, सिद्धेरनायत्या 'मणिमन्त्रादि' न्यायेन प्रतिबन्धकत्वाभ्युपगमेऽप्यन्यत्र तथाकल्पने मानाभावात्। इत्थञ्च पद्मानुभवसामग्रीसत्त्वात् तस्यैव बोधः, न कुमुदस्य। सत्यां हि सामग्र्यां फलानुत्पादे प्रतिबन्धकत्वापेक्षणादिति तार्किकाः। तद्दृष्टान्तेन वृत्तिसामान्ये समुदाये शक्तिरावश्यकीति कथने पूर्वोक्तार्थ एव पर्य्यवस्यतीति।

Sri Gangeshwari Digital Foundation

पदोद्देश्यकविधित्वञ्च—कृत्तद्धितसमासैकशेष सनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। विशिष्टशक्त्यस्वीकर्तॄणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाह—पङ्कजशब्दवदिति—पङ्कजनिकर्त्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिद्ध्येत्।

नच पद्मत्वरूपेणोपस्थितये सा कल्प्यत इति वाच्यम्,

प्रभा

समाससंज्ञादिकमुद्दिश्य सामर्थ्यं विधीयते इति प्रतीयते, तच्चासङ्गतम्, समासादिषु सामर्थ्यस्य निमित्तत्वात्। तथाच समर्थः कृदादीन् लभते। यद्वा कृदादयः सामर्थ्याश्रिता इत्येवं वक्तुमुचितम्। एकशेषेति—यद्यप्येकशेषस्योक्तपदविधित्वं नास्ति, तथाऽपि द्वन्द्वविषये एकशेषविधानात्'उत्सर्गसमानदेशा' इति न्यायेनैकशेषस्यापि सामर्थ्यविषयत्वं लभ्यते। विशिष्टशक्तिस्वीकर्तॄणामिति—अस्य वृत्ताविति शेषः। शक्तिसाधकमिति—व्यपेक्षाशक्तौ यद्दूषणं तदेवैकार्थीभावरूपशक्तिसाधकम्।

ननु समासे शक्तिसाधनाय प्रवृत्तस्य 'पङ्कजशब्दवत्' इति दृष्टान्तासङ्गतिः, तस्यापि समासत्वादिति चेन्न, ये क्वापि वृत्तौ शक्तिं नेच्छन्ति तेऽपि पङ्कजशब्दे योगरूढिं स्वीकुर्वन्ति तन्मतेनास्य दृष्टान्तस्य सत्त्वात्। योगादेवेति—योगः=अवयवशक्तिस्तस्या एवेत्यर्थः। व्युत्पत्तिवैचित्र्येण नामार्थस्यापि पङ्कस्याधिकरणतानिरूपकत्वसम्बन्धेन जनधात्वर्थोत्पत्तावन्वयः, सप्तमीस्मरणेनाधिकरणद्वारा वान्वयः। उत्पत्तेश्च धात्वर्थव्यापारे जनकतया, व्यापारस्य चाश्रयतया डप्रत्ययार्थकर्तरि अन्वय इति पङ्काधिकरणकोत्पत्त्यनुकूलव्यापाराश्रय इति बोधोपपत्तौ परमते समुदायशक्तिर्व्यर्थेति भावः। पद्मत्वरूपेणेति—तद्धर्मावच्छिन्नविषयकोपस्थितिं प्रति तद्धर्मावच्छिन्नविषयकशक्तिज्ञानस्य कारणतया पद्मत्वावच्छिन्ने शक्तिः कल्प्यत इति भावः। तत्कल्प्यत इति—तत्=एकार्थीभावरूपं सामर्थ्यम्। लिखितपुस्तकेषु 'तत्कल्प्यते' इत्येव पाठः। सा कल्प्यते इत्यपि क्वाचित्कः पाठः।

दर्पणव्याख्या

नन्वजहत्स्वार्थवृत्तिकल्पे विशिष्टशक्ते सम्बन्धांशे विरामस्योक्तत्वाद्वाक्येऽपि सम्बन्धांशे एव तैः स्वीकारात् का वृत्ति-वाक्ययोर्वैयाकरणनये विशेष इति चेदत्राहुः—तत्र हि फलबलात् पदार्थोपस्थितिकाले नियमतः सम्बन्धांश उद्बोधकासमवधानकल्पनेन पृथगुपस्थितयोः पदार्थयोः संसर्गबोधः। वृत्तौ तु पदार्थोपस्थितिसमकालमेव नियमतः संसर्गांशे उद्बोधकसमवधानकल्पनाद् विशिष्टार्थोपस्थितिरिति वैलक्षण्योपपत्तेः। अत एव प्रातोदकादौ विशेष्यविशेषणविपरीत्ये तु न बोधः, तत्राप्रयुज्यमानद्वितीयार्थः सम्बन्धश्चोभयं समुदायशक्तिसाध्यम्, अनन्यलभ्यत्वात्, क्लृप्तशक्त्यैव राजादिपदाद्राजादेरुपस्थितिसम्भवेन तत्र समुदायशक्तिकल्पने गौरवाच्च। 'नामार्थयोरभेदान्वयः' इत्यादिव्युत्पत्तयश्च पृथगुपस्थितनामार्थविषया इति।

जहत्स्वार्थवृत्तिपक्षे पङ्कजशब्दस्य पूर्वोक्तरीत्या दृष्टान्तत्वासम्भवेनाऽन्यथा मूलमवतारयति-***विशिष्टशक्त्यस्वीकर्तॄणामिति***। ***साधकमिति*** विशिष्टशक्तिसाधकमेवेत्यर्थः। व्यपेक्षावादिनये 'राजपुरुषः' इत्यादौ प्रत्येकपदवृत्त्या पदार्थोपस्थितावाकाङ्क्षादिवशात् विशिष्टार्थबोधवत् पङ्कजपदादपि तथैव विशिष्टार्थोपस्थित्या रूढेरुच्छेदापत्तिः, न च सा तवेष्टेत्याह-***पङ्कजनिकर्त्तुरपीति*** तेन रूपेण पद्मस्यापीत्यर्थः। ***योगादेवेति*** अवयवशक्तेरेवेत्यर्थः। ***तत्रापि*** पङ्कजादिपदेऽपि। तत्र तत्स्वीकारे तु किमपराद्धं समासे विशिष्टशक्त्येति भावः। * **सा** * समुदायशक्तिः।

चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनाऽऽवश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत्, पङ्कजपदेऽपि सा सुवचा। एवं रथकारपदेऽपि।

प्रभा

तत्कल्पनेति—समुदायशक्तिकल्पनेत्यर्थः। नहि चित्रग्वादिपदेन समुदायशक्तिं विना स्वामित्वेनोपस्थितिः सम्भवतीति भावः। लक्षणयेति—'बोध्यसम्बन्धो हि लक्षणा' इति मते समुदायस्य लक्षणया, शक्यसम्बन्धो लक्षणेति मते डप्रत्ययस्य लक्षणयेत्यर्थः। नच पङ्कजपदे समुदायशक्तिस्वीकारेऽप्यवयवशक्त्या कुमुदादिबोध स्यादिति वाच्यम्, केवलयौगिकार्थबोधं प्रति समुदायशक्तिज्ञानजन्योपस्थितेः प्रतिबन्धकत्वात्।

केचित्तु 'मणिमन्त्रादि' न्यायेनोक्तप्रतिबन्ध्यप्रतिबन्धकभावकल्पने गौरवात्। रूढ्यर्थतावच्छेदकावच्छिन्नविषयतानिरूपितयोगार्थनिष्ठविषयताकबोधं प्रति अवयवशक्तिसहकृतरूढिशक्तिज्ञानं कारणम्' इति न केवलं यौगिकार्थबोधः। 'रूढिर्योगापहारिणी' इति तु यत्र योगार्थरूढ्यर्थयोरभेदबाधस्तत्रैव, यथा—मण्डप—प्रवीणादिषु। तत्र प्रतिबन्ध्यप्रतिबन्धकभावोऽपि न, किन्तु रूढ्यर्थस्य शीघ्रोपस्थितिकत्वेन बोधात् सकृदुच्चरितन्याय एव तन्नियामक इत्यन्यत्र विस्तरः।

सेति—लक्षणेत्यर्थः, नतु शक्तिः। पङ्कजपदं योगरूढमात्रस्योपलक्षणमित्याह—एवमिति—पङ्कजपदवदित्यर्थः। रथकारपदेऽपीति—समुदाये जातिविशेषनिरूपिता शक्तिर्न सिध्येदिति शेषः। तथा=योगमात्रकल्पने। चशब्दो वाक्यालङ्कारे। वर्षासु रथकार इति—रथकारः=शूद्रजातीयः। तथाहि—माहिष्येण करिण्यामुत्पन्नो रथकारः। 'महिष्येण करिण्यान्तु रथकारः प्रजायते' इति स्मृतेः। माहिष्यश्च—क्षत्रियेण वैश्यायामुत्पादितः। करिणी च—वैश्याच्छूद्रायामुत्पादिता कन्या। नचास्य जात्यन्तरत्वम्, अनुलोमसङ्कराणां मातृवृत्तिजातिमत्त्वात्। अत एव 'ब्राह्मणक्षत्रियवैश्यैः क्षत्रियावैश्याशूद्रासूत्पन्नाः क्षत्रियवैश्यशूद्रा एव भवन्ति' इति शङ्खस्मृतिः सङ्गच्छते। अनुलोमसंकरश्च—निम्नजातीयस्त्रीपूच्चजातीयपुरुषेणोत्पन्नः।

अत्र मीमांसायामाशङ्कितम्—किमत्र रथकारपदं शूद्रत्वव्याप्यजात्याश्रयपरम्, उत रथकर्मकोत्पादकमात्रपरम्। को विशेषः। यदि शूद्रत्वव्याप्यजात्याश्रयपरं तदा तस्य 'अग्न्याधानं नोपपद्यते' आधानस्य मन्त्रपूर्वकत्वान्मन्त्रे च शूद्रस्याधिकाराभावः 'स्त्रीशूद्रौ नाधीयेताम्' इति निषेधात्। अतो रथकारपदेनावयवशक्त्या रथोत्पादको द्विजो ग्राह्य इत्याशङ्क्य 'योगाद् रूढिर्बलीयसी' इति न्यायेन समुदायशक्त्या शूद्रस्य शीघ्रोपस्थितिकतया ग्रहणम्। नच वेदेऽधिकाराभावः, अग्न्याधानविधायकश्रुत्या तदुपयोगिमन्त्रेषु अधिकारकल्पनमिति निर्णीतम्। नैयायिकमते च समुदायशक्तेरभावाल्लक्षणयैव शूद्रस्य ग्रहणं वक्तव्यमिति लक्षणां विनैव समुदायशक्त्या शूद्रस्याधिकारित्वं प्रकल्प्य विधानसामर्थ्यादपूर्वविधानकल्पनमयुक्तम्। निषेधकश्रुतिविरोधवारणाय रथकारकर्तृकाग्न्याधानोपयोगिमन्त्रकर्मकाध्ययनभिन्नाध्ययननिषेधपरत्वं श्रुतेर्वाच्यम्, इति संकोचादिरूपं गौरवं विनैवावयवशक्त्या ब्राह्मणादिग्रहणेनैव श्रुतिविधानोपपत्तौ तदयुक्तं स्यादिति भावः समुदायशक्तिवादिनये तु रूढिशक्त्या शूद्रस्यैवोपस्थित्या अगत्या मीमांसकानां तत्कल्पनं युक्तम्।

दर्पणव्याख्या

* तत्कल्पनस्य *=रूढिकल्पनस्येत्यर्थः। * तथोपस्थितिरिति * स्वामित्वादिना स्वाम्याद्युपस्थितिरित्यर्थः। * सुवचेति * पङ्कत्वादिनोपस्थितिरपि लक्षणयेति वक्तुं शक्यमित्यर्थः। रथकाराधिकरणविरोधमपि तत्राह—* एवमिति *।

SGDF

तथाच "वर्षासु रथकारोऽग्निमादधीत" इत्यत्रापि विना लक्षणां क्लृप्तयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्वविद्याकल्पनमयुक्तं स्यादिति भावः ।

साधकान्तरमाह—बहूनामिति—वृत्तेर्धर्म्माः विशेषणलिङ्गसङ्ख्याद्ययोगादयस्तेषां वचनैः (एव) साधने गौरवमित्यर्थः ।

प्रभा

ननु पङ्कजपदे लक्षणास्वीकारे रथकारपदेऽपि तथा स्यादिति तुप्रतिवन्दी (अनिष्टान्तरप्रसञ्जकं वाक्यं प्रतिवन्दी) प्रतिवन्दिनश्च नोत्तरत्वमत आह—साधकान्तरमिति । वृत्तेर्धर्मा इति—एकार्थीभाववृत्तेः फलानीत्यर्थः । विशेषणेति—'राजपुरुषः' इत्यत्र ऋद्धस्येति न विशेषणान्वयः । 'कुक्कुटाण्डम्' अत्र स्त्रीत्वं न प्रतीयते । 'राज्ञोः' "राज्ञाम्" वा पुरुषः' इतिवद् राजपुरुष इत्यत्र सङ्ख्या न शाब्दबोधविषयो भवति । तेषाम्= विशेषणाद्ययोगानाम् । वचनैः='सविशेषणानाम्' इत्यादिभिः ।

दर्पणव्याख्या

* लक्षणामिति * निरूढलक्षणामित्यर्थः, तस्याः शक्तिसमकक्षत्वादिति भावः । * योगेनेति * प्रत्येकपदवृत्त्युपस्थाप्यरथकर्तृत्वेनेत्यर्थः । *उपपत्तावितिं* शास्त्रसङ्कोचमन्तरेणाप्यनुष्ठाननिर्वाह इत्यर्थः । * तत्कल्पनामित्यादि * रूढिकल्पनामित्यर्थः । (प्रतिलोमजातये) रूढिं तां कल्पयित्वेति यावत् । * जातिविशेषस्येति *

रथकारस्तु माहिष्यात् करण्यां यस्य सम्भवः ।

इति स्मृतिसङ्केतितजातिविशिष्टस्येत्यर्थः । * अयुक्तमिति *, विनैव शास्त्रसङ्कोचं विधेश्चारितार्थ्यादिति भावः ।

ननु नेयं युक्तिर्विशिष्टशक्तिसाधिका, प्रतिबन्देरनुत्तरत्वात् , तदुद्धारस्य स्वयमेव वर्णयिष्यमाणत्वाच्च । किञ्च पङ्कजपदे लक्षणाऽपि न सुवचा । तथाहि—सा किं पङ्कजपदे, उत तदवयवडप्रत्यये । न तावदाद्यः, समुदाये शक्त्यभावेन तद्घटितलक्षणाया एवासम्भवात् । किञ्च जहत्स्वार्थायास्तस्यास्तत्रासम्भव एव, अवयवार्थविरोधिन्या रूढेरभावात् ।

जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी ।

इत्यभियुक्तोक्तेः । यथा 'मण्डपं भोजय' इत्यत्र मण्डपपदस्य गृहविशेषे रूढिर्योगविरोधिनी, रूढ्यर्थग्रहे मण्डपानकर्तृत्वरूपयोगार्थस्य बाधात्तत्र "रूढेर्योगापहारता" इति प्रवादादेव शक्त्या मण्डपानकर्तृबोधासम्भवान्मण्डपपदस्य मण्डपानकर्त्तरि लक्षणा । तथाच तत्र रूढ्यर्थग्रहसम्बन्धितावच्छेदकतया गृहीतचैत्रत्वादिनैव तद्बोधो न मण्डपानकर्त्तृत्वेन । नच तथा प्रकृते, पङ्कत्वेन लक्षणायामवयवार्थस्याभावेनाजहत्स्वार्थाया अप्यसम्भवाच्च । जहत्स्वार्था त्ववयवार्थप्रतीत्यनुपपत्त्या न वक्तुं शक्या । नान्त्यः, प्रकृत्यर्थस्यानन्वयापत्तेः, तदर्थे प्रत्ययस्यासाधुतापत्तेश्चेति लक्षणानवसरादनायत्या तत्र विशिष्टशक्त्यभ्युपगमः। "राजपुरुषः" इत्यादौ तु प्रत्येकपदवृत्त्याऽपि विशिष्टार्थबोधनिर्वाहे समुदायशक्तिकल्पनं तत्रानुचितमेव । नापि रथकाराधिकरणविरोधः, यौगिकार्थरथकरणनिमित्ते वर्षाभिधानस्य सङ्करस्य विशिष्टाधानापेक्षया लघुत्वेऽपि ऋभूणां त्वा देवानामिति मन्त्रवर्णाद्दभुसौधन्वन्पर्यायप्रतिलोमजातिरथकारस्यैव तदधिकारावगत्या लाघवानादरेण रूढार्थे तत्र विशिष्टाधानकल्पनात् ।

नचापूर्वविद्याध्ययनकल्पनागौरवम्, फलमुखत्वात् । प्रकृते राजपुरुषादिसमुदाये शक्तिग्राहकं न तादृशं कोशादि, येन तद्बलादवयवार्थः परित्यज्येतेत्यपरितोषान्मूलमवतारयति—*साधकान्तरमिति* *लिङ्गेति* 'कुक्कुटाण्डम्' इत्यादौ कुक्कुटपदार्थे स्त्रीत्वस्याप्रतीतेरिति भावः *सङ्ख्येति* राज्ञो राज्ञां वा पुरुष इति वाक्ये उपसर्जनपदानि सङ्ख्याविशेषयुक्तं स्वार्थमभिदधति समासे त्वन्तर्भूतस्वार्थं प्रधानार्थमभिदधतीति भाष्यात्तत्र सङ्ख्याविशेषस्याप्रतीतेरिति भावः। सङ्ख्यादीत्यादिपदात् "इमे तर्ह्येकार्थीभावकृता विशेषाः, सङ्ख्याविशेषो व्यक्ताभिधानमुपसर्जनविशेषाणाञ् चायोगे" इति भाष्योक्तस्य 'राज्ञो गवाश्वपुरुषाः' 'देवदत्तयज्ञदत्तविष्णुमित्राणां गौः' इत्यादौ चायोगस्य च सङ्ग्रहः । *वचनैरिति* "सविशेषणानां वृत्तिर्न" इत्यादिभिरित्यर्थः । उक्तार्थमेव प्रकटयति—

अयं भावः विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्रेव 'राजपुरुषः' इत्यत्रापि स्याद् विशेषणाद्यन्वयः, राजपदेन स्वतन्त्रोपस्थितिसत्त्वात्। विभाषावचनञ्च समासनियमवारणाय कार्य्यमिति।

ननु "सविशेषणानाम्" इति वचनान्न विशेषणाद्यन्वयः, विभाषावचनञ्च कृतमेवेत्याशङ्कां समाधत्ते—वचनैरेवेति। न्यायसिद्धमेव सूत्रम्। व्यपेक्षाविवक्षायां (व्यासस्य) वाक्यस्य, एकार्थीभावे समासस्येति स्वभावादेव प्रयोगनियमसम्भवात्। सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पदार्थैक-

प्रभा

विशेषणाद्यन्वय इति—'ऋद्धस्य राज्ञः पुरुषः' इतिवद् 'ऋद्धस्य राजपुरुषः' इत्यपि स्यादिति भावः। स्वतन्त्रेति—'शक्त्यभास्यसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति मुख्यविशेष्यतासम्बन्धेनोपस्थितिः कारणम्' इति कार्यकारणभावस्य राजपदार्थस्य पृथगुपस्थितौ सत्त्वेन विशेषणान्वयः स्यात्। राजसम्बन्धवत्पुरुषस्योपस्थितौ तु राजपदार्थस्य मुख्यविशेष्यतयोपस्थितेरभावेन न विशेषणाद्यन्वयः। उक्तकार्यकारणभावस्वीकारादेव घटत्वे नित्यपदार्थस्यान्वयाभिप्रायेण 'नित्यो घटः' इति न प्रयोगः, घटत्वस्य विशेष्यतयाऽनुपस्थितेः। एवं 'राजपुरुषः' इत्यत्र पुरुषेऽन्वयाभिप्रायेण 'राजपुरुषः सुन्दरः' इतिवत् 'राजपुरुषो देवदत्तस्य च' इति न प्रयोगः, राजवैशिष्ट्येनैव पुरुषपदार्थस्योपस्थित्या एकसम्बन्धेन यत्किञ्चिद्वैशिष्ट्येनोपस्थिते तत्सजातीयसम्बन्धेनेतरपदार्थान्वयस्याव्युत्पन्नत्वात्। अत एव 'घटो द्रव्यत्वस्य' इति न प्रयोगः, समवायसम्बन्धेन घटत्ववैशिष्ट्येनोपस्थिते घटे समवायसम्बन्धेन तत्र पदार्थान्तरान्वयस्य व्युत्पत्तिविरुद्धत्वात्। एवं राजपदार्थस्य पुरुषेऽन्वयवद् अश्वादावन्वयाभिप्रायेण 'राजपुरुषोऽश्वश्च' इति वाक्यस्य न प्रामाण्यम्, एकत्र (पुरुषे) विशेषणतयाऽन्वितस्यापरत्र (अश्वादौ) विशेषणत्वायोगादिति न्यायविरुद्धत्वात्। नियमवारणायेति—विभाषाधिकाराभावे व्यपेक्षापक्षमात्रवादिनो व्यपेक्षायामेव समासस्य विधानेन वृद्धिसंज्ञावन्नित्यत्वं समाससंज्ञायाः स्यात्तथाच वाक्यस्य निवृत्तिरेव स्यात्तद्वारणाय सूत्रं कार्यमिति भावः। सूत्रमिति—'विभाषा' इत्यधिकारसूत्रमित्यर्थः। एकार्थीभाववादिनये तु एकार्थीभावविवक्षायां समासस्य, व्यपेक्षायां समासाप्राप्त्या वाक्यस्य च सिद्धतया विभाषासूत्रं न कार्यमिति भावः। एवम् 'समर्थानां प्रथमाद्वा' इत्यत्र, 'धातोः कर्मणः' इत्यत्र च वाग्रहणं न कार्यम्, उक्तविवक्षाद्वयेन तद्धितसनादिवृत्तेर्वाक्यस्य च सिद्धत्वात्। तदुक्तम् 'वावचनानर्थक्यम् स्वभावसिद्धत्वात्' इति। वृत्तिघटकविशेषणे लिङ्गायोगः 'कुक्कुटाण्डम् मृगक्षीरम्' इत्यादौ क्वचिदेव, न सर्वत्र, तेन 'राज्ञीपुत्रः' इत्यादौ स्त्रीत्वस्य बोधविषयत्वेऽपि न दोषः। अन्ये तु किंजातीयं मांसमिति प्रश्ने छागस्य मांसमित्युत्तरे जात्यन्तरसम्बन्धनिवृत्तावेव वाक्यतात्पर्येण वाक्येऽपि लिङ्गविशेषबोधादर्शनान्न लिङ्गविशेषाबोध एकार्थीभावकृत इत्याहुः।

वस्तुतस्तु यत्र यत्र लिङ्गविशेषबोधादर्शनं तत्र तत्रैकार्थीभाव इति न व्याप्तिः, किन्तु असति बाधके यत्र यत्रैकार्थीभावस्तत्र तत्रौपसर्जनपदार्थे विशेषणाद्यनन्वय इत्येवेति क्वचिद्वाक्येऽपि लिङ्गविशेषानन्वयदर्शने न क्षतिरिति पञ्चोलिनः।

दर्पणव्याख्या

* अयम्भाव इति *। * न्यायसिद्धमेव सूत्रमिति * इह व्यपेक्षायां समासो न भवत्येकार्थीभावे वाक्यं न भवति, विभिन्नविषयत्वेन बाध्यबाधकभावासम्भवादिति न्यायसिद्धविभाषावचनं नापूर्वमित्यर्थः। तदुक्तं भाष्ये—"न संज्ञाया भागमावाविष्येते" इति। एकार्थानां विकल्पनान्नार्थो विकल्पेनेति तद्भावः।

SGDF

देशतयाऽन्वयासम्भवान्न्यायसिद्धमिति भावः ।

अत एव व्यपेक्षापक्षमुद्भाव्य "अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः" इति भाष्यकारेण दूषणमप्युक्तम् ॥ ३२ ॥

तथा 'धवखदिरौ' 'निष्कौशाम्बिः' 'गोरथः' 'घृतघटः' 'गुडधानाः' 'केशचूडः' 'सुवर्णालङ्कारः' 'द्विदशाः' 'सप्तपर्णाः' इत्यादावितरेतरयोग-निष्क्रान्त-युक्त-पूर्ण-मिश्र-सङ्घात-विकार-सुच्प्रत्यय-लोप-वीप्साद्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणान्तरमाह—

प्रभा

'वृत्तावुपसर्जनपदार्थे संख्या न प्रतीयते' इत्यस्यापि संख्यात्वव्याप्यैकत्वत्वादिना एकत्वादिसंख्या न प्रतीयते इत्येवार्थः, किन्तु संख्यात्वेन रूपेण एकत्वादिसंख्या प्रतीयत एव । इयमेव वृत्तावभेदैकत्वसंख्या प्रतीयते इत्युक्तं भाष्ये । भेदो विशेषरूपं तदभावरूपैकत्वसंख्येत्यर्थः । विशेषरूपं यदेकत्वत्वादि तत्प्रतीत्यभावरूपेत्यर्थः । उपसर्जनपदार्थगता संख्या न प्रतीयते, उपसर्जनपदोपात्ता तु प्रतीयते इति 'द्विपुत्रः' इत्यादौ न दोषः । भाष्यविदस्तु केनापि रूपेण संख्या न प्रतीयते, संकोचेन भाष्यव्याख्याने मानाभावात् । 'त्वत्पुत्रः' 'तावकीनः' 'मासजातः' इत्यादौ एकत्वत्वेन रूपेणैकत्वसंख्या प्रतीयते । 'युष्मत्पुत्रः' 'यौष्माकीणः' इत्यादावनेकत्वेन रूपेणानेकसंख्या भासते । अत एव 'गोषुचरी' 'वर्णासु जातः' इत्यादौ बहुवचनसत्त्वेऽपि न बहुत्वबोधः, किन्तु बहुत्वारोपेण संस्कारमात्रम् । अत एव राजपुरुष इत्यादौ संख्याया अप्रतीतिर्न सुबभावकृता, उक्तेषु तत्सत्त्वेऽपि तदप्रतीतेरित्याहुः ।

अन्वयासम्भवादिति—पदार्थः पदार्थेनान्वेतीति न्यायविरोधादिति भावः । अत एव भेदस्य पशुत्वेऽन्वयाभिप्रायेण 'अपशुः पशुः' इति वाक्यस्य न प्रामाण्यम् । अत एव=व्यपेक्षापक्षे गौरवादेव । कैयटोक्तं दूषणमाह—तथेति । लोप इति—विग्रहवाक्ये निष्क्रान्तः कौशाम्ब्या इत्यादौ क्रान्ताद्यर्थस्य बोधाय यथा क्रान्तादिशब्दानां प्रयोगो भवति तथा वृत्तिजन्यबोधेऽपि तेषां भानमस्तीति तत्तदर्थवाचकानां सम्प्रयोगः स्यादिति तेषां लोपो वक्तव्य इति भावः ।

वाचनिको वाच्य इति—'चार्थे द्वन्द्वः' इत्यत्र 'चार्थे' इत्येको योगस्तत्रानेकमिति सुबिति चानुवर्तते । एवञ्चानेकं सुबन्तं चार्थे वर्तते, तच्च द्वन्द्वसंज्ञकं भवति इति वाक्यभेदेन वचनादेव बोद्धव्य इत्यर्थः । एवम् अत्यादयः क्रान्ताद्यर्थे वर्तन्ते इत्यर्थकम्—'अत्यादयः क्रान्ताद्यर्थे' इति वाक्यं भित्त्वा द्वितीयेन 'प्रथमया' इत्यनेन समाससंज्ञा विधेया, इत्येवमनेकवचनैरर्थबोधनेऽतिगौरवमिति भावः । 'धवखदिरौ' इत्यत्र 'समाहृतौ धवखदिरौ' इति समाहृतार्थः, 'निष्कौशाम्बिः' इत्यत्र निष्क्रान्तः कौशाम्ब्या इति क्रान्तार्थः । 'गोरथः' इत्यत्र गोभिर्युक्तो रथ इति युक्तार्थः, 'घृतघटः' इत्यत्र घृतपूर्णो घट इति पूर्णार्थः । 'गुडधानाः' इत्यत्र गुडमिश्रा धाना इति मिश्रार्थः, केशचूड इत्यत्र केशसङ्घातभूता (जटीभूता) चूडा (शिखा)

दर्पणव्याख्या

अन्वयासम्भवादिति वृत्तौ ह्युपसर्जनपदेन प्रधानार्थाभिधायिना भाव्यम्, स्वस्य विशेषणाऽऽकाङ्क्षायाश्च प्राधान्यमिति कथमेकदा प्राधान्यमेकार्थीभावश्चास्य, युगपद्गुणप्रधानभावविरोधादिति न्यायसिद्धमेवेत्यर्थः । *अत एवेति* व्यपेक्षावादस्याऽऽपातरमणीयत्वादेवेत्यर्थः । *दूषणमप्युक्तमिति* अस्य नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः । 'अयं दण्डो हरानेन' इत्यादिनेति शेषः ॥ ३२ ॥ कैयटोक्तं दोषसङ्घातमाह—*तथेत्यादि* । *इति दूषणान्तरमिति* इत्याकारकं दूषणान्तरमित्यर्थः । *पूर्वोक्तानामिति* 'निष्कौशाम्बिः' इत्यादौ क्रान्ताद्यर्थवाचकानां लोपवचनमित्यादिकानामित्यर्थः । एतद्दूषणोद्धारस्य वक्ष्यमाणत्वादाह—*दूषणान्तरमिति* ।

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् । कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ॥३३॥

आदिना 'घनश्यामः' 'हंसगमनः' इत्यादाविवादीनां पूर्वोक्तानाञ्च संग्रहः । दूषणान्तरमाह—बहुव्युत्पत्तिभञ्जनमिति । अयमाशयः—'चित्रगुः' इत्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा ।

नच तत्र लक्षणा, 'प्राप्तोदको ग्रामः' इत्यादौ तदसम्भवात् , 'प्राप्तिकर्त्रभिन्नमुदकम्' इत्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामपि 'उदककर्तृकप्राप्तिकर्म्म ग्रामः' इत्यर्थालाभात् ।

प्राप्तेति क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्म्मेति स्यात् , अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः, प्राप्तेर्धात्वर्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च । अन्यथा 'देवदत्तः पच्यते' इत्यत्र कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भवेनानन्वयानापत्तेः ।

प्रभा

यस्येति संघातार्थः, सुवर्णालङ्कारः' इत्यत्र सुवर्णविकारोऽलङ्कार इति विकारार्थः, 'द्विदशाः' इत्यत्र द्विरावृत्ता दश इत्यर्थात् सुज्लोपः । सप्तपर्णः' इत्यत्र प्रतिपर्व सप्त सप्त पर्णानि यस्येति वीप्सा प्रतीयते । एते शब्दा एतादृशार्थबोधका इति वचनं कर्तव्यमित्येवं रीत्या गौरवमिति यावत् । तदाह—

चकारादीति—च—क्रान्तादीनां निषेधः=लोप इत्यर्थः । पूर्वोक्तानाञ्चेति—निष्कौशाम्बिरित्यादौ क्रान्ताद्यर्थवाचकानाम् । तत्र समासे । तदसम्भवात्=लक्षणाया असम्भवात् । प्राप्तेति—प्राप्त इत्यत्र कर्तरि क्तः । तथाच प्राप्तिकर्त्रभिन्नमुदकमिति 'नामार्थयोरभेदान्वयः' इति व्युत्पत्त्या बोधोत्तरमित्यर्थः । तत्सम्बन्धि=प्राप्तिकर्त्रभिन्नोदकसम्बन्धि । अलाभादिति—सम्बन्धिलक्षणायामपि प्राप्तिकर्त्रभिन्नोदकसम्बन्धी ग्राम इत्येवार्थः स्यान्न तूदककर्तृकप्राप्तिकर्मग्राम इति । नन्वत्र स्वकर्तृकप्राप्तिकर्मत्वरूप एव सम्बन्धो वाच्य इति उदककर्तृकप्राप्तिकर्मग्राम इति लभ्यत एवेति चेन्न, सम्बन्धत्वेन रूपेण प्राप्तिकर्मत्वस्य भानेऽपि कर्मत्वत्वेन रूपेण तदलाभात् । स्यादिति—'क्रियावाचकसमभिव्याहारे जातिवाचकानां विशेष्यत्वम्' इति नियमेन प्राप्तिकर्माभिन्नमुदकमिति बोधः स्यादित्यर्थः, प्राप्तशब्दस्य क्रियावाचकत्वादुदकशब्दस्य जातिवाचकत्वाच्च । लक्षणया प्राप्तिकर्मरूपार्थलाभेऽपि उदकस्य कर्तृतया प्राप्तावन्वयो न स्यादपि तु 'नामार्थयोरभेदान्वयः' इति व्युत्पत्त्याऽभेदान्वय एव स्यादिति द्योतयितुं तथाभिधानम् । समानाधिकरणेति—अत्र सामानाधिकरण्यम्—समानविभक्तिकत्वम् । व्युत्पत्तीति—'राजा पुरुषः' इत्यत्र स्वस्वामिभावसम्बन्धेन राजविशिष्टः पुरुष इति बोधवारणाय तथाव्युत्पत्तिरावश्यकी । अन्यथा=कर्तृतासम्बन्धेन उदकस्य प्राप्तिक्रियायामन्वयस्वीकारे । समानाधिकरणेति—समानविभक्तिकप्रातिपदिकार्थयोरित्यर्थः । अन्वयासम्भवाच्चेति—नामार्थधात्वर्थयोः साक्षाद् भेदेनान्वयाव्युत्पत्तेरिति भावः । अन्यथा—'नामार्थधात्वर्थयोः साक्षाद् भेदान्वयोऽव्युत्पन्नः' इति व्युत्पत्त्यनङ्गीकारे । अनन्वयेति—देवदत्तस्य कर्तृतासम्बन्धेन पाकेऽन्वयस्याबाधितत्वेनेष्टस्यानन्वयस्य=अन्वितार्थविषयकबोधजनकत्वाभावस्य अनापत्तेः=असिद्धेः ।

दर्पणव्याख्या

व्युत्पत्तिभङ्गमाविष्कर्तुमाह—* अयमाशय इति * । * लक्षणेति * वाक्ये इति शेषः ।

'चित्रगुः' इत्यादौ वाक्यस्य गोस्वामिलक्षकत्वे भीप्सितबोधलाभसम्भवादाह—*प्राप्तोदको ग्राम इति* । लक्षणायामपीति* इदञ्च मीमांसकमतेन । स्वबाध्यसम्बन्धस्यैव तैर्लक्षणात्वाऽभ्युपगमात् । *बोधोत्तरम्* इत्यस्यानुपपत्तिप्रतिसन्धानं सतीति शेषः । *लक्षणायामपि* इत्यपिना तत्र लक्षणाया असम्भवं सूचयति । *अर्थालाभादिति* प्राप्तिकर्त्रभिन्नोदकसम्बन्धिनो लाभेऽप्यनुभूयमानोक्तार्थालाभादित्यर्थः । *तर्हि समानाधिकरणेति* सामानाधिकरण्यञ्चात्र समानविभक्तिकत्वम् । अन्यथा कर्मलक्षणकक्तान्तार्थोदकपदार्थयोरभेदान्वयानभ्युपगमे इत्यर्थः । * भङ्गापत्तेरिति * तादृशव्युत्पत्तेरत्रैव व्यभिचारादिति भावः । ननु तद्व्युत्पत्तौ समानाधिकरणस्यैकार्थाभिधायित्वस्यैव निवेशेन नेदं तद्विषयाऽत आह—*प्राप्तेरिति* । * अन्वयासम्भवादिति * 'नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयस्याव्युत्पन्नत्वात्' इति भावः । *अन्यथा देवदत्त इति* अन्यथा=उक्तव्युत्पत्त्यनभ्युपगम इत्यर्थः ।

अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्सम्बन्धिग्रामो लक्ष्यते इति चेन्न, प्राप्तेर्धात्वर्थतया क्तार्थकर्तारं प्रति विशेष्यताया असम्भवात्, 'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्" इति व्युत्पत्तेः। प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च।

एवम् 'ऊढरथः' 'उपहृतपशुः' 'उद्धृतौदना' 'बहुपाचिका' इत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्त्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्म्मकोद्धरणावधिः, बहुपाककर्त्राधिकरणमिति बोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः॥ ३३॥

प्रभा

अथेति—क्तप्रत्ययार्थकर्तरि उदकस्याभेदेनान्वयः। कर्तुश्च वृत्तित्वसम्बन्धेन प्राप्तावन्वयः। विशिष्टप्राप्तेश्च सम्बन्धिनि=कर्मणि लक्षणया उदकाभिन्नकर्तृकप्राप्तिकर्मग्राम इति बोधः स्यादित्याह—लक्ष्यते इति—वाक्येनेति शेषः, उदकपदेन वा। कर्तारम्प्रतीति—कर्तृनिरूपितविशेष्यतायाः प्रकृत्यर्थप्राप्तावसम्भवादित्यर्थः। 'सत्त्वप्रधानानि नामानि' इति न्यायविरोधोऽपि बोध्यः। ननु 'प्रकृतिप्रत्ययौ' इति न्यायो भवन्मते कर्तुराख्यातार्थस्य प्रकृतिवाच्यक्रियाम्प्रति विशेषणत्वेन व्यभिचरितः,'सत्त्वप्रधानानि नामानि' इति न्यायोऽपि वृत्त्यघटकनामपर एव इत्यत आह—प्राप्तपदे इति। नामार्थत्वेनेति—नामजन्यप्रतीतिविशेष्यत्वेनेत्यर्थः। 'नामजन्यप्रतीतिविशेष्ययोरभेदेनान्वयः' इति व्युत्पत्तेरित्यर्थः। न केवलं द्वितीयार्थबहुव्रीहावेव व्यभिचारः, किन्तु तृतीयाद्यर्थबहुव्रीहावपीत्याह—एवमिति।

ऊढरथ इति—ऊढो रथो येनेति कर्त्रर्थे बहुव्रीहिः। यत्कर्तृकवहनकर्माभिन्नो रथ इति बोधः। उपहृतः पशुर्यस्मै इति सम्प्रदानार्थे बहुव्रीहिः। यदुद्देश्यकोपहारकर्मीभूतः पशुरिति प्रत्ययः। उद्धृत ओदनो यस्या इति अपादाने बहुव्रीहिः। यदवधिकोद्धरणकर्माभिन्नौदन इति शाब्दमतिः। बहवः पाचका यस्यामिति अधिकरणे बहुव्रीहिः। नगर्यधिकरणवृत्तिबहुत्वसंख्याविशिष्टाभिन्नपाचका इति प्रतीतिः, इत्थं व्यपेक्षावादिमते बोधः। एकार्थीभाववादिनये तु समासार्थस्याभेदेनान्वयानुरोधाद् रथकर्मकवहनकर्त्रभिन्नोऽनड्वान् इत्यादि बोध इत्याह—अत्र हीति। घटपदस्येवेति—यथा घटपदस्य घटत्वविशिष्टे घटे शक्त्या एकैव घटत्वविशिष्टघटोपस्थितिः, नतु घटत्वस्य घटस्य च पृथक्। एवम् 'ऊढरथः' इत्यादिसमासस्य रथादिकर्मकवहनकर्तृत्वाद्यवच्छिन्ने शक्त्या विशिष्टविषयकैकोपस्थित्या विशिष्टविषयक एव शाब्दबोधः। 'नामार्थधात्वर्थयोः साक्षादभेदेनैवान्वयः' 'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्' 'समानाधिकरणनामार्थयोरभेदान्वयः' इत्यादिव्युत्पत्तयस्तु पृथगुपस्थितिविषया इति समुदायशक्तिवादे नासां व्युत्पत्तीनां भङ्गः॥ ३३॥

दर्पणव्याख्या

ग्रामो लक्ष्यत इति*। वाक्येनेति शेषः। उक्तबोधस्य सम्भवदुक्तिकत्वे कथञ्चिल्लक्षणाऽपि कल्प्येत, तदेव नास्तीत्याह—* प्राप्तेर्धात्वर्थतयेति *। "प्रकृतिप्रत्ययार्थयोः" इति न्यायस्य सङ्ख्यादौ व्यभिचरितत्वं सम्भाव्याह—*प्राप्तपदे इति *। * नामार्थत्वेनेति *। नामजन्यप्रतीतिविशेष्यस्यैव नामार्थत्वादिति भावः।

अभेदान्वयापत्तेश्चेति समानविभक्तिकनामार्थयोरिति भाव। *द्रष्टव्यमिति*। भवन्मते 'वहनकर्माभिन्नो रथः' इति बोधोत्तरं सम्बन्धिनि लक्षणायामपि 'रथकर्मकवहनकर्त्ताऽनड्वान्' इतीप्सितार्थस्यालाभ एव। कर्मार्थकक्तप्रत्ययस्य कर्त्तरि लक्षणायां तु धात्वर्थवहने रथस्य कर्मतया भेदसम्बन्धेनान्वयो दुर्लभ एव, उक्तव्युत्पत्तिविरोधादिति पूर्वोक्तदिशाऽवसेयमित्यर्थः। *अत्र हीति* बोधाभ्युपगमादित्येननान्वयि। अत्र 'ऊढरथः' इत्यादिसमासे विशिष्टशक्त्यभ्युपगमे तु न कस्या अपि व्युत्पत्तेर्विरोध इत्याह—*अतिरिक्तेति*॥ ३३॥

साधकान्तरमाह—

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ।
क्लृप्तत्यागश्चास्ति तव तत् किं शक्तिं न कल्पयेः ॥ ३४ ॥

अयं भावः । चित्रगुरित्यादिषु चित्रगवीणां स्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते । नच तत्र लक्षणा । सा हि न चित्रपदे, 'चित्रस्वामी गौः' इति बोधापत्तेः । नापि गोपदे, 'गोस्वामी चित्रः' इत्यन्वयबोधापत्तेः । चित्रादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात् ।

नच 'चित्राभिन्ना गौः' इति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यते इति वाच्यम् , गोपदस्य, चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात् ।

प्रभा

साधकान्तरमिति--समासशक्ताविति शेषः । अषष्ठ्यर्थेति--अत्र षष्ठीपदं सप्तम्या अप्युपलक्षणम् । षष्ठ्यर्थबहुव्रीहाविव तुल्ययुक्त्या सप्तम्यर्थबहुव्रीहावपि व्युत्पत्त्यन्तरकल्पनायाः अतिरिक्तशक्तिकल्पनारूपाया अप्रसक्तेः । क्लृप्तत्यागश्चेति--'क्लृप्तशक्त्यैव निर्वाहे ऽक्लृप्तशक्तिकल्पनाया अन्याय्यत्वात्' इति व्युत्पत्तित्यागश्चेत्यस्यार्थः । तव=व्यपेक्षावादिनः । शक्तिम्=एकार्थीभावात्मिकाम् । चित्रगवीणामिति--'चित्रगोस्वाम्यादि' इति लिखितपुस्तकेषु पाठ उपलभ्यते, परन्तु स चिन्त्यः, टचो दुर्वारत्वात् । चित्रगवीस्वाम्यादीति तूचितमिति पञ्चोलिनः । चित्रगुपदेन चित्राणां गवां स्वामी इति बोधः समुदाये एकार्थीभावात्मिकां शक्तिं विना नोपपद्यत इत्यर्थः । लक्षणेति--किं पूर्वपदे लक्षणा, उत उत्तरपदे इति विकल्प्य नाद्येत्याह—सा हीति=लक्षणा हीत्यर्थः । चित्रपदस्य चित्रस्वामिनि लक्षणायां वृत्तिजन्योपस्थितिविशेष्यस्य स्वामिनो नामार्थयोरभेदान्वय इति न्यायेनाभेदसम्बन्धेन गोपदार्थेऽन्वये चित्रस्वामी गौरिति बोधापत्तेरित्यर्थः । पूर्वपदे लक्षणायां दोषमुक्त्वा उत्तरपदे तस्या दोषमाह—नापीति । गोस्वामीति- गोस्वामिनो गोपदार्थतया तत्र चित्रस्याभेदान्वये 'चित्रो गोस्वामी' इति बोधापत्तेरित्यर्थः । लक्ष्यैकदेशतयेति--'चित्रपदस्य चित्रस्वामिनि, गोपदस्य गोस्वामिनि वा लक्षणायां चित्रपदार्थगोपदार्थयोर्लक्ष्यैकदेशत्वेनेत्यर्थः । अन्वयायोगादिति—'पदार्थः पदार्थेन' इति न्यायविरोधादिति भावः । अन्वयबोधोत्तरमिति--शीघ्रोपस्थितिकतया पदार्थोपस्थित्यादिसामग्रीवशात् शक्यार्थयोरेवान्वयबोधोत्तरं गोपदेन चित्राभिन्नगवीस्वामित्वेन रूपेणान्वयपदार्थो लक्ष्यते । तादृशबोधश्च लक्ष्यतावच्छेदकचित्रत्वादिविशिष्टगवीस्वामित्वस्योपस्थितये आवश्यकः । तादृशबोधे च चित्रपदं तात्पर्यग्राहकम् ।

दर्पणव्याख्या

षष्ठ्यर्थबहुव्रीहिपर्युदासे बीजं प्रदर्शयति—* अयम्भाव इति * । * विना शक्तिमिति * । समुदायशक्तिमित्यर्थः । * नच तत्रेति * तादृशसमुदायघटकपूर्वोत्तरपदयोरित्यर्थः । * चित्रस्वामीति * 'समानाधिकरणनामार्थयोः' इति व्युत्पत्तेरिति भावः । ननु गोपदस्य गोमति लक्षणा । गवि चित्रस्याभेदान्वये चित्राभिन्नगोस्वामीति बोधो नानुपपन्नोऽत आह—*चित्रादिमात्रस्येति* आदिना गवादिपरिग्रहः । प्राथम्यात् पूर्वपदे लक्षणेत्याशयेन चित्रपदोपादानम् ।

लक्ष्यैकदेशत्वेनेति लक्ष्यगोस्वामिरूपपदार्थैकदेशत्वेनेत्यर्थः । * अन्वयायोगादिति * 'एकपदार्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेनापरपदजन्योपस्थितेर्हेतुता' इत्यर्थपर्य्यवसितायाः "पदार्थः पदार्थेनान्वेति" इत्यादिव्युत्पत्तेर्विरोधादुक्तान्वयासम्भवादिति भावः । कस्यचिन्मतमाशङ्क्य निराचष्टे—*नचेति*

नच गोपदे साक्षात् सम्बन्ध एव विनिगमक इति वाच्यम्, एवमपि 'प्राप्तोदकः' 'कृतविश्वः' इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः। यौगिकानां कर्त्राद्यर्थकतया साक्षात्सम्बन्धाविशेषात्।

नच 'पदद्वये लक्षणा' इति नैयायिकोक्तं युक्तम्, बोधावृत्तिप्रसङ्गात्। नच परस्परं तात्पर्य्यग्राहकत्वादेकस्यैवैकदा लक्षणा, न द्वयोरिति न बोधावृत्तिरिति वाच्यम्, एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असम्भवात्।

नच चरमपदे एव सा, प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम्, एवं हि बहुव्रीह्यसम्भवापत्तेः। "अनेकमन्यपदार्थे" (पा० सू० २।२।४)

प्रभा

साक्षात्सम्बन्ध इति--गोपदे लक्षणायां स्वत्वनिरूपितस्वामित्वरूपसाक्षात्सम्बन्धः शक्यसम्बन्धः,। चित्रपदस्य तु गुणवाचित्वात् स्वसमवायिनिष्ठस्वत्वनिरूपितस्वामित्वरूपः शक्यसम्बन्धो गोघटितपरम्परासम्बन्धो लक्षणारूपो वाच्य इति लाघवमेव गोपदे लक्षणायां विनिगमकम्। नैयायिकमते शुक्लादिशब्दवच्चित्रशब्दस्य गुणवाचकत्वेन शक्यसम्बन्धः परम्परारूप इत्यस्य वक्तुं शक्यत्वादत आह—एवमपीति—गोपदे लक्षणायां लाघवरूपविनिगमकसत्त्वेन निर्वाहेऽपीत्यर्थः। प्राप्तोदक इति--'द्वितीया श्रितातीत' इत्यनेन द्वितीयान्तस्य प्राप्तशब्देन समासविधानाज्ज्ञापकात्सकर्मकादपि कर्तरि क्तः। 'तयोरेव' इति सूत्रेण कर्मणि क्ते तु अभिहितत्वेन द्वितीयाया अप्राप्त्या समासविधानवैयर्थ्यं स्पष्टमेव। प्राप्तमुदकं यमिति कर्मार्थे बहुव्रीहिः। अत्र प्राप्तोदकपदयोः समानार्थकत्वम्। प्राप्तिकर्त्रभिन्नमुदकमित्यर्थात्। कृतविश्व इति--कर्मणि क्तः। अत्रापि कृतविश्वशब्दयोरेकार्थबोधकत्वम्, कृतिकर्माभिन्नं विश्वमित्यर्थात्। एवंविधेषु कर्मादिवाचकप्रत्ययान्तघटितेषूभयोः समानार्थकत्वेन तुल्यैव शक्यसम्बन्धरूपा लक्षणेति पूर्वपदे उत्तरपदे वेत्यत्र विनिगमनाविरह एव। अषष्ठ्यर्थेति--ननु 'अध्यापकपुत्रको देवदत्तः' 'पाचकपुरुषको ग्रामः' इत्यादौ षष्ठीसप्तम्यर्थबहुव्रीहावपि द्वयोर्द्रव्यवाचकतया विनिगमनाविरहस्यैव सत्त्वात् परमताभिप्रायेणापि अषष्ठ्यर्थ इति संकोचोऽसङ्गत इति चेन्न, षष्ठीसप्तम्यर्थबहुव्रीहौ गुणवाचकस्य विशेषणत्वे 'पीताम्बरः' 'चित्रगुः' इत्यादौ विनिगमकसत्त्वेन 'अषष्ठ्यर्थ' इत्युक्तेः। तथाच षष्ठ्यर्थबहुव्रीहिपदेन गुणवाचकपदघटितबहुव्रीहेरेव ग्रहणम्, नतु षष्ठ्यर्थ बहुव्रीहिमात्रस्य। इदमपि नैयायिकमतेन। शाब्दिकनये तु तेषामपि गुणिवाचकतया अषष्ठ्यर्थ इति संकोचो व्यर्थ एव। पदद्वय इति- चित्रपदं गोपदञ्च चित्रगवीस्वामिनि लाक्षणिकमित्यर्थः। विनिगमनेति--कस्य पदस्य तात्पर्यग्राहकत्वं कस्य लक्षणेत्यत्र विनिगमनाविरहतादवस्थ्यमेवेति भावः। ननूत्तरपदस्य विभक्तिसन्निहिततया वक्ष्यमाणव्युत्पत्तिरेव विनिगमिका भविष्यतीत्यत आह—नचेति। असम्भवापत्तेरिति--यत्समुदायघटकमनेकं सुबन्तमन्यपदार्थप्रतिपादकं तादृशसमुदायस्य बहुव्रीहिसंज्ञाविधानेन उत्तरपदमात्रस्यान्यपदार्थप्रतिपादकत्वे बहुव्रीहिसंज्ञाविधायकशास्त्राप्राप्त्या बहुव्रीह्यसम्भवापत्तेरित्यर्थः।

दर्पणव्याख्या

साक्षादिति गोद्वारक इत्यर्थः। तथाच षष्ठ्यर्थबहुव्रीहौ न व्युत्पत्त्यन्तरकल्पनमिति भावः * पदद्वय इति * विनिगमकाभावादिति भावः *नैयायिकेति* अस्य प्राचीनेत्यादिः। एकदेशान्वयपक्षे हि तैरित्थमुक्तम् *बोधावृत्तीति* बोध्यमानस्य स्वामिनो द्वेधा भानापत्तेरित्यर्थः।

विनिगमनाविरहेति चित्रपदं तात्पर्य्यग्राहकमुत गोपदमित्येकतरपक्षपातियुक्तिविरहतादवस्थ्येनेत्यर्थः। *असम्भवादिति* एकतरपदे लक्षणाया असम्भवादित्यर्थः। पदद्वये लक्षणायान्तु उक्तदोष इति भावः। प्रत्ययार्थान्वयानुपपत्तिरेव उत्तरपदे लक्षणायां विनिगमिका भविष्यतीत्याशङ्क्य निराचष्टे—*नचेति* *एवं हीति* उत्तरपदस्यैवान्य-

इत्यनेकसुबन्तानामन्यपदार्थप्रतिपादकत्वेन तद्विधानात् ।

किञ्चैवं सति घटाऽऽदिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात्, पूर्वपूर्ववर्णानां तात्पर्य्यग्राहकत्वेनोपयोगसम्भवात् । एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेद् अत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः ।

प्रभा

तद्विधानादिति—अयम्भावः—यस्मिन्नर्थे यस्य शब्दस्य शास्त्रेण साधुत्वं बोध्यते तस्य शब्दस्य तेन शास्त्रेणार्थवाचकत्वं न विधीयते, किन्तु लोकसिद्धं तत्तदर्थप्रतिपादकत्वमुद्देश्यतावच्छेदकत्वेनाश्रित्य तत्तत्कार्यविधानद्वारा तत्तच्छब्दानां साधुत्वं बोध्यते । अत एव पङ्क्तिविंशत्यादिशब्दानां व्यवहारतस्तत्तदर्थवाचकत्वस्य सिद्धत्वेऽपि 'पङ्क्तिविंशति' इति सूत्रेण साधुत्वबोधनं सङ्गच्छते । अत एव समर्थसूत्रे भाष्ये—'स्वभावत एव तेषां शब्दानामर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते' इत्युक्तम् । एवञ्च लौकिकमर्थप्रतिपादकत्वं निमित्तत्वेनाश्रित्य बहुव्रीहिसंज्ञा विधीयते । तच्च भवन्मते सुबन्तसमुदाये नास्तीति बहुव्रीह्यसम्भव इति ।

ननु चरमपदे लक्षणास्वीकारेऽपि पूर्वपदमपि तादृशलक्षणायां तात्पर्यग्राहकतया अन्यपदार्थे वर्तत एवेति बहुव्रीह्यसम्भवोक्तिश्चिन्त्येत्यत आह—किञ्चेति । एवम्=बहुव्रीहौ चरमपदे एव लक्षणायाम् । ननु चरमवर्णे एव वाचकताऽस्तु को दोष इति, अत आह—एवं सतीति—चरमवर्णे एव वाचके सतीत्यर्थः । अर्थबोधापत्तिरिति—उदककर्तृकप्राप्तिकर्मरूपार्थबोधापत्तिरित्यर्थः । एतेन उदकशब्दादप्यर्थबोधो जायते एवेत्यपास्तम् । ननु तादृशार्थबोधकत्वप्रकारकतात्पर्यग्राहकपूर्वपदाभावान्नोदकमात्रश्रवणात् तदर्थबोधापत्तिः । किञ्च कोशादिप्रामाण्येन वर्णसमुदायात्मकघटादौ शक्तिरङ्गीक्रियते, अत्र तु चरमपदस्य लक्षणयैवान्यपदार्थबोधोपपत्तौ अनन्यलभ्यो हि शब्दार्थः' इति न्यायेन समुदायशक्त्यसिद्धिरत आह—अन्यत्र विस्तर इति—भूषणे विस्तर इत्यर्थः । तत्र हि प्रत्ययानां सन्निहितगतस्वार्थबोधकत्वस्वीकारो न सम्भवति 'सर्वकः' 'दधि इयद्

दर्पणव्याख्या

पदार्थलक्षकत्वे इत्यर्थः । बहुव्रीह्यसम्भवे हेतुमाह—***अनेकमिति* *तद्विधानादिति*** बहुव्रीहिविधानादित्यर्थः ।

अयम्भावः । वृत्तेर्विशिष्टार्थकत्वं न शास्त्रैकगम्यम् । "अचतुर" इत्यादावर्थानादेशनात् । किन्तु लौकिकव्यवहारगम्यम् । "स्वभावत एव तेषां शब्दानामेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते" इति समर्थसूत्रभाष्यात् । "अनेकमन्यपदार्थे" (पा० सू० २ । २ । २४) "चार्थे द्वन्द्वः" (पा० सू० २ । २ । २९) इत्यादीनामनेकप्रथमान्तमन्यार्थप्रतिपादकं बहुव्रीहिसंज्ञकं भवति, चार्थे वर्त्तते यः प्रथमान्तसमुदायः स द्वन्द्वसंज्ञको भवतीति क्रमेण लोकसिद्धार्थाऽनुवादेन बहुव्रीह्यादिसंज्ञाविधायकत्वमात्रम्, अर्थस्यापि विधाने वाक्यभेदापत्तेः । स्वसमानार्थकवाक्यानिवृत्तये विभाषाऽधिकारोऽपि विधेयः स्यात् । एवञ्च सुबन्तसमुदायस्यान्यार्थप्रतिपादकत्वे कथं बहुव्रीहिस्यादिति । नन्वेकपदस्यान्यार्थप्रतिपादकत्वे तात्पर्य्यग्राहकतयाऽपरपदस्याप्युपयोगित्वेन समुदायस्य विशिष्टार्थप्रतिपादकत्वमविकलमत आह—***किञ्चैवमिति*** समासस्थचरमपदस्यैव लक्षकत्वे सतीत्यर्थः । इष्टापत्तावाह—***एवं सतीति*** चरमवर्णस्य वाचकत्वे सतीत्यर्थः ***अत्रापि*** प्राप्तोदकादावपीत्यर्थः ***आपत्तिरिति*** आपाद्यव्यतिरेकनिर्णयकालिकाऽऽपाद्यव्याप्याऽऽपादकवत्ताज्ञानसत्त्वादिति भावः ।

ननूदकपदमात्रश्रवणान्न लक्ष्यार्थबोधः, तदानीं लक्षणाकल्पिकायास्तात्पर्य्यग्राहकपूर्वपदोपस्थितेरभावादत आह—***अन्यत्रेति*** भूषणे इत्यर्थः । ***विस्तर इति*** उत्तरपदलक्ष्यार्थे प्रकृत्यर्थत्वाभावेन तत्र प्रत्ययार्थानन्वयाऽऽपत्तिरित्यादि

एवञ्च, अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना, उक्तयुक्तेः। अगत्या शक्त्यन्तरकल्पनेत्यर्थः। क्लृप्तत्याग इत्यस्य क्लृप्तशक्त्योपपत्तिरिति व्युत्पत्तित्यागश्च तवास्ति। तत् किं सर्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः। यत्तु व्यपेक्षावादिनो नैयायिक-मीमांसकादयः। न समासे शक्तिः, 'राजपुरुषः' इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव 'राजसम्बन्ध्यभिन्नः पुरुषः' इति बोधोपपत्तेः।

प्रभा

ददाति' इत्यादौ व्यभिचारात्। 'दधि बहुपटुर्ददाति' इत्यत्र बहुजर्थस्य दध्नि अन्वयापत्तेश्चेति प्रातिपदिकात् कर्मत्वादौ स्वादय इति 'कर्मणि द्वितीया' इत्यादिशास्त्रैर्बोधितत्वात् प्रत्यासत्तिन्यायेन लब्धायाः 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्' इति व्युत्पत्तेः तादृशव्युत्पत्तिसिद्धस्य प्रकृतिप्रत्यययोः परस्परान्वितार्थबोधकत्वे एव साधुत्वस्य भङ्गः, उत्तरपदमात्रस्याप्रकृतित्वात्, प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यतापर्य्याप्त्यधिकरणस्यैव प्रकृतित्वात्। तदर्थं व्युत्पत्त्यन्तरस्वीकारापेक्षया समुदायशक्तिरेव न्याय्येत्यभिप्रायेणाह—एवञ्चेति।

व्युत्पत्त्यन्तरकल्पना=समुदाये शक्तिकल्पना। उक्तयुक्तेरिति—प्रकृत्यर्थप्रत्ययार्थयोरन्वयानुपपत्तिरूपयुक्तेरित्यर्थः। तत्क्रमिति—तदिति तस्मादित्यर्थेऽव्ययम्। कल्पयेरिति—सम्प्रश्ने लिङ्। बोधोपपत्तेरिति—नचैवं समासस्य वृत्त्या अर्थविषयकबोधजनकत्वाभावात् प्रातिपदिकत्वानापत्तिः, स्व—स्वावयवान्यतरनिष्ठवृत्त्याऽर्थविषयकबोधजनकत्वरूपार्थवत्त्वस्य ग्रहणेनादोषात्, समासग्रहणसामर्थ्यादेव प्रातिपदिकत्वसम्भवाच्च।

दर्पणव्याख्या

तत्रोक्तम्। *व्युत्पत्तीति* व्युत्पत्तित्यागः प्रकृते प्रतिज्ञाहानिरेव। *व्यपेक्षावादिन इति* समर्थसूत्रे "परस्परान्वययोग्यत्वरूपसामर्थ्यमेव व्यपेक्षा" इतिवादिन इत्यर्थः। *न समासे शक्तिरिति*। समासे=राजपुरुषादिसमुदाये, विशिष्टशक्तिर्नेत्यर्थः। समाससंज्ञाप्रयोजकत्वं क्लृप्तप्रत्येकपदवृत्त्यतिरिक्ते नास्तीति यावत्। संसृष्टार्थं समर्थमिति भाष्यकारोक्तेः, संसर्गस्य पृथगुपस्थितिनिबन्धनत्वात् परस्परव्यपेक्षैव सामर्थ्यम्। "इसुसोः सामर्थ्ये" (पा० सू० ७।३।४४) इत्यत्र समर्थपदस्य तादृशार्थकत्वस्य सर्वैरेवाङ्गीकारात्, पराङ्गवद्भावानुरोधाच्च। अन्यथा समासादावेकार्थीभाव; पराङ्गवद्भावादौ व्यपेक्षेति वाक्यभेदापत्तेः। तत्र व्यपेक्षाऽनादरे तु "ऋतेन मित्रावरुणावृतावृधावृतस्पृशौ" इत्यादावृतेनेत्यादेः पराङ्गवद्भावे सति "आमन्त्रितस्य च" (पा० सू० १।१।९८) इत्याद्युदात्तताऽऽपत्तिः।

नच "तन्निमित्तग्रहणं कर्त्तव्यम्" इति वार्तिकेनाऽमन्त्रितार्थस्य यन्निमित्तं तद्वाचकमेव पराङ्गवदित्यर्थकेन नियमितत्वात् पराङ्गवद्भावाप्रसक्तिरिति वाच्यम्, समर्थपरिभाषामाश्रित्य तत्प्रत्याख्यानस्यैवं न्याय्यत्वात्। "ऋतेन मित्रावरुणौ" इत्येतयोः समभिव्याहृतक्रियान्वयित्वेन परस्परसामर्थ्यात् "मित्रावरुणावृतस्पृशौ" एतयोस्तु पार्ष्ठिकान्वयबोधसत्त्वादस्त्येव सामर्थ्यम्, स्पष्टं चेदं वेदभाष्ये। अत एवानन्तरपाठोऽपि चरितार्थः। 'पुत्रो राज्ञः पुरुषो देवदत्तस्य' इत्यादौ निरुक्तव्यपेक्षारूपसामर्थ्याभावादेव समासाप्रसक्तेः।

समर्थसूत्रार्थस्तु पदसम्बन्धी समासादिविधिः साक्षात्परम्परया वा स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपव्यपेक्षाऽपरनामकसामर्थ्यवत्पदाऽश्रितो बोध्य इति बहुव्रीहौ चित्राऽदिविषयतायाः साक्षात्प्रयोजकत्वाभावात्परम्परयेति।

किञ्च वृत्तित्वावच्छेदेनैकार्थीभाववादिमते स्वावयवार्थातिरिक्तार्थाभिधायकत्वरूपवृत्तिलक्षणस्य कर्मधारयेऽव्याप्तिः, तत्रावयवार्थातिरिक्तार्थवत्त्वाभावात्। वृत्तित्वसामानाधिकरण्येन तु रथन्तराऽदिशुद्धरूढे पङ्कजादियोगरूढे च कोशाऽदिसिद्धायाः समुदायशक्तेरस्माभिरप्यभ्युपगमेन सिद्धसाधनात्। शुद्धयौगिकचित्रगवादिसमुदाये शक्त्यभ्युपगमस्तु कोशाऽद्यनुक्तत्वात्समासघटकप्रत्येकपदवृत्त्यैवोपपत्तेश्च हेय इति तदभिसन्धिः। शक्तिकल्पनानुपपत्त्यभावं तत्प्रयोजनतया दर्शयति—*राजपुरुष इत्यादाविति* अत्र राजपुरुषपदमश्रूयमाणविभक्तिपूर्वपदकषष्ठीसमासपरम्, तेन 'दास्याः पुत्रः' इत्याद्यलुक्समासे न दोषः।

अत एव राज्ञः पदार्थैकदेशतया न तत्र 'शोभनस्य' इत्यादिविशेषणान्वयः। नवा घनश्यामः, 'निष्कौशाम्बिः' 'गोरथः' इत्यादौ इत्रादिप्रयोगापत्तिः, उक्तार्थतयैव क्रान्तादिपदप्रयोगासम्भवात्। न वा "विभाषा" (पा० सू० २।७।११) इति सूत्रावश्यकत्वम्, लक्षणया 'राजसम्बन्ध्यभिन्नः पुरुषः' इति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भ-

प्रभा

अत एव=राजसम्बन्धिनि लक्षणाभ्युपगमादेव। तत्रेति—तत्र=राजनि 'पदार्थः पदार्थेन' इति न्यायविरोधादिति भावः। उक्तार्थकतयेति—'घनश्यामः' इत्यत्र घनशब्दस्य घनसदृशे, 'निष्कौशाम्बिः' इत्यत्र निःशब्दस्य द्योतकत्वमाश्रित्य कौशाम्बीपदस्य कौशाम्ब्यवधिकनिष्क्रमणकर्तरि, 'गोरथः' इत्यत्र गोशब्दस्य गोयुक्ते च लक्षणयोक्तार्थकतयेत्यर्थः। प्रयोगासम्भवादिति—'उक्तार्थानामप्रयोगः' इति न्यायादिति भावः। यदुक्तं पूर्वं 'विभाषा' इति सूत्रञ्च कार्यमिति तत्र समाधातुमाह—न वेति। विग्रहस्येति—'राज्ञः पुरुषः' इति विग्रहस्येत्यर्थः। अयम्भावः—'राज्ञः' इत्यत्र षष्ठ्यर्थः सम्बन्धस्तत्र राजपदार्थस्य निरूपितत्वसम्बन्धेनान्वयः। सम्बन्धस्य च स्वरूपसम्बन्धेन पुरुषेऽन्वय इति राजनिरूपितसम्बन्धवान् पुरुष इति बुबोधयिषायां विग्रहस्य प्रयोगसम्भवादिति। नियमसम्भवादिति—नच कर्मधारये समासेन, विग्रहेण च एकविधबोधस्यैव दर्शनेन तत्र उक्तनियमानुपपत्तिरिति वाच्यम्, 'नीलमुत्पलम्' इति वाक्ये नीलपदोत्तरविभक्तेरभेदोऽर्थः, तस्य स्वरूपसम्बन्धेन उत्पलेऽन्वयविवक्षायां वाक्यस्य, नीलपदस्य नीलभेदाभाववति लक्षणया नीलभेदाभाववदभिन्नम् उत्पल-

दर्पणव्याख्या

नच सम्बन्ध एव लक्ष्योऽस्त्वेवञ्च व्याससमासयोः समानाकारबोधजनकत्वप्रवादोऽप्युपपत्स्यते। राजाऽऽदिसम्बन्धरूपलक्ष्यार्थस्योत्तरपदार्थे आश्रयतयाऽन्वयेनैवोपपत्तौ सम्बन्धिनि लक्षणाऽभ्युपगमे प्रयोजनाभावश्चेति वाच्यम्, 'राजा पुरुषः' इत्यादावपि राजादिपदार्थस्य स्वस्वामिभावसम्बन्धेन पुरुषादावन्वयवारणाय निपातातिरिक्तनामार्थनिष्ठाभेदातिरिक्तसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेन प्रत्ययनिपातान्यतरजन्योपस्थितेर्हेतुत्वस्यावश्यकतया प्रकृते राजसम्बन्धरूपनामार्थस्य प्रत्ययनिपातान्यतरानुपस्थिते पुरुषादावन्वयासम्भवात् निपातातिरिक्तत्वविशेषणात् 'चन्द्र इव मुखम्' इत्यादाविवपदार्थसादृश्यस्य नामार्थस्य प्रत्ययजन्योपस्थित्यविषये मुखे निपातातिरिक्तनामार्थचन्द्रस्य तथोपस्थित्यविषये सादृश्येऽन्वयेऽपि न क्षतिः। अभेदातिरिक्तसम्बन्धावच्छिन्नत्वस्य प्रकारतायां निवेशाच्च 'राजा पुरुषः' इत्यादावभेदान्वयेऽपि न सा।

नच समस्यमानातिरिक्तत्वेनापि नाम्नो विशेषणीयत्वान्न प्रकृतेऽनुपपत्तिरिति वाच्यम्, गौरवात्, क्वचिदगत्या सङ्कोचेऽपि सर्वत्र सङ्कोचस्यान्याय्यत्वाच्च, प्रकृते सम्बन्धिलक्षणाऽभ्युपगमरूपगतिसत्त्वात्, निपातानां द्योतकत्वनये घटादिपदानां घटादिप्रतियोगिकलाक्षणिकतयैवोपपत्तौ व्युत्पत्तौ निपातातिरिक्तत्वस्याप्रवेशाच्चेति भावः।

अत एवेति पूर्वपदस्य सम्बन्धिलाक्षणिकत्वादेवेत्यर्थः। *(न) विशेषणान्वय इति* "पदार्थः पदार्थेनान्वेति" इति व्युत्पत्तेरिति भावः। ननु 'गभीरायां नद्यां घोषः' इत्यादौ नदीपदलक्ष्यनदीतीरार्थैकदेशनद्यादौ गभीराद्यन्वयवदत्राप्येकदेशान्वयो दुर्वार इति चेन्न, दृष्टान्तासिद्धेः। तत्राप्येतन्मते नदीपदस्य गभीरनदीतीरलक्षकताया गभीरपदस्य तात्पर्यग्राहकतायाश्च वक्ष्यमाणतया अदोषात् तादृशव्युत्पत्तेः ससम्बन्धिव्यतिरिक्तविषयतया चैत्रस्य नसेत्यादावेकदेशान्वयेऽपि क्षतिविरहादिति। *उक्तार्थतयेति* तत्र निरादीनां द्योतकतया कौशाम्ब्यादिपदस्यैव कौशाम्ब्यवधिकनिष्क्रमणकर्त्राद्यर्थे लक्षणाऽभ्युपगमेनैवेप्सितार्थबोधोपपत्तौ क्रान्तादिशब्दानामुपादानासम्भवादित्यर्थः। * आवश्यकत्वमिति * तेन पारायणादावदृष्टार्थकतया स्पष्टप्रतिपत्त्यर्थकतया वा तदुपयोगेऽपि न क्षतिरिति भावः।

वात् । नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका, तत्रावयवशक्तिमजानतोऽपि बोधात् ।

नच शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः सम्भवति । अत एव राजादिपदशक्त्यग्रहे 'राजपुरुषः' 'चित्रगुः' इत्यादौ न बोधः। नापि (नच) चित्रगुरित्यादौ लक्षणासंभवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असम्भवः बहुव्युत्पत्तिभञ्जनापत्तेरिति वाच्यम्, 'प्राप्तोदकः' इत्यादावुदकपदे एव लक्षणास्वीकारात् । पूर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात्,

प्रभा

मिति बुबोधयिषायां समासस्य च वक्तुं शक्यत्वात् ।

नचैवमपि द्वन्द्वे समासवाक्ययोर्नियमानुपपत्तितादवस्थ्यम्, उत्तरपदेन लक्षणया साहित्यविवक्षायां द्वन्द्वस्य, चशब्देन साहित्यविवक्षायां वाक्यस्य च प्रयोगनियमसम्भवात् । एवमौपगवादौ तद्धितादिवृत्तावपि बोध्यम् । उपगुनिरूपितसम्बन्धवदपत्यमिति विवक्षायां वाक्यस्य, उपगुसम्बन्ध्यभिन्नमपत्यमिति विवक्षायां तद्धितवृत्तेश्च प्रयोगः । एवमन्यत्राप्यूह्यम् । शक्तिः पङ्कजशब्दवदिति पूर्वोक्तं दृष्टान्तं निराकरोति—नापीति । प्रतिबन्दीति—अनिष्टान्तरप्रसञ्जिकोक्तिरित्यर्थः। पङ्कजशब्दे समुदाये शक्तिस्वीकारोक्तिः समासेऽनिष्टशक्तिसाधिका नेति भावः । शक्तिज्ञानं विना शक्यानुपस्थितौ शक्यसम्बन्धरूपलक्षणाया अभावेन लक्षणया पद्मत्वावच्छिन्नस्य बोधो नैव सम्भवतीति भावः। एवञ्च पङ्कजपदेऽवयवशक्त्यज्ञानेऽपि पद्मत्वावच्छिन्नविषयकबोधस्य सर्वानुभवसिद्धतया तत्र समुदायशक्तिरावश्यकीति सिद्धम् । अत एव=अवयवशक्तिज्ञानस्य विशिष्टार्थबोधप्रयोजकत्वादेव । न बोध इति—तत्रावयवशक्तिज्ञानविरहदशायां शाब्दबोधाभावः सर्वानुभवसिद्ध इति बोधाभावस्तत्र इष्ट एवेति भावः । अषष्ठ्यर्थ इति कारिकोक्तं दोषं परिहरति—नापीति—लिखितपुस्तकेषु नापीत्येव पाठः । मुद्रितेषु नचेति । नापीत्यस्य वाच्यमित्यनेनान्वयः । लक्षणाया असम्भव इति—'असम्भवः' इति प्रथमान्त एव पाठः, सप्तम्यन्तस्यानन्वितार्थकत्वादिति पञ्चालिनः । तल्लक्षणायाः=यौगिकपूर्वपदलक्षणायाः । धातुप्रत्ययेति—धातुश्च प्रत्ययश्च तदर्थश्चेति धातुप्रत्ययतदर्थास्तेषां ज्ञानेन साध्यतयेत्यर्थः । धातुप्रत्ययज्ञानं विना तदर्थज्ञानासम्भवेनार्थज्ञानद्वारा धातुप्रत्ययज्ञानमपि लक्षणायाः प्रयोजकमिति भावः ।

दर्पणव्याख्या

* प्रतिबन्दीति * पङ्कजादिपदे पद्मत्वादिविशिष्टशक्तयभ्युपगमरूपेत्यर्थः । * अवयवशक्तिमजानतोऽपि * इत्यपिना दृष्टान्त—दार्ष्टान्तिकयोर्वैषम्यं सूच्यते । *शक्त्यग्रहे* अवयवशक्तिग्रहाभावे । *तेभ्यः* पङ्कजादिपदघटकावयवेभ्यः । *विशिष्टार्थप्रत्यय इति* । पद्मत्वादिरूपेण पद्मादिबोध इत्यर्थः । लक्षणायाः शक्तिघटितत्वात्, किन्तु समुदायशक्त्युपस्थिते तस्मिन्नवयवशक्त्युपस्थापितपङ्कजनिकर्तुरभेदान्वयोपगम एवेति भावः । *अत एवेति* । तत्पदीयलक्षणाग्रहे तत्पदशक्तिज्ञानस्य हेतुत्वादेवेत्यर्थः उत्तरपदलक्षणायां विनिगमकमाह—*यौगिकत्वेनेति* । *विलम्बितत्वात्* इत्यनेन शीघ्रोपस्थितिकत्वमुत्तरपदलक्षणायां विनिगमकमिति सूचितम् ।

ननु व्युत्पत्तिपक्षे यौगिकत्वमुदकादिपदानामपि सममत आह-*प्रत्ययानामिति* । यथाश्रुतप्रकृत्यर्थत्वस्योदकादौ बाधात् प्रकृत्यर्थपदमन्यथा व्याचष्टे-*सन्निहितेति* 'दण्डिनमानय' इत्यादौ व्यवहितपदार्थे=दण्डादौ कर्मत्वाद्यन्वयवारणाय सन्निहितेति । तथाच "अणुरपि विशेषोऽध्यवसायकरः" इति न्यायेनोत्तरपदे एव लक्षणेति न बोधाऽऽवृत्तिरूपदूषणमपीति भावः । पूर्वोक्तदूषणान्तरमुद्धरति—

Sri Gargeshwari Digital Foundation

प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च ।

घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते, विशिष्टस्यैव सङ्केतितत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् । प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपदे एव सा कल्प्यत इति विशेषः ।

प्रभा

ननु 'शक्तं पदम्' 'शक्यसम्बन्धो लक्षणा' इति मते धातोः क्तप्रत्ययस्य च शक्तत्वेऽपि प्राप्तपदस्याशक्ततया तत्र शक्यसम्बन्धरूपलक्षणाया असम्भव इति क्तप्रत्यये एव लक्षणा वाच्या । तथाच तत्र लक्षणायां प्रत्ययमात्रज्ञानं तदर्थज्ञानञ्चापेक्ष्यते' उदकपदे लक्षणायामुदकपदज्ञानम्, तदर्थज्ञानञ्चापेक्ष्यते, इत्युभयत्रापि साम्यमेव, नहि पूर्वत्र धातुतदर्थज्ञानस्यापेक्षा, यतो विलम्बितत्वं स्यादितीदमसङ्गतम् । नच क्तप्रत्ययस्योदककर्तृकप्राप्तिकर्मणि लक्षणायां तात्पर्यग्राहकतया धातुज्ञानं तदर्थज्ञानञ्चापेक्ष्यत एवेति वाच्यम्, उदकेऽपि तादृशार्थे लक्षणायां पूर्वपदतदर्थज्ञानस्यापेक्षितत्वेन साम्याक्षतेरिति यौगिके पूर्वपदे लक्षणायां विलम्बितत्वं दुरुपपादमित्यरुचेराह—प्रत्ययानामिति । उक्तव्युत्पत्त्यनुरोधेन चरमपदे एव लक्षणेत्यत्र प्रतिबन्दितया यदुक्तं शाब्दिकेन घटपदेऽपि चरमवर्णे एव वाचकता स्यादिति तन्निराकरोति—घटादिपद इति । अतिरिक्तेति—नन्वतिरिक्तत्वं भिन्नत्वम्, तच्च यत्किञ्चित्प्रतियोगिकं सर्वत्रैवेतीदमसङ्गतमिति चेन्न, घटशब्दघटकधातुप्रत्ययशक्तिप्रतियोगिकभिन्नत्वस्य, घटपदातिरिक्तं यद्गृहीतशक्तिकं पदं तच्छक्त्यतिरिक्तत्वस्य, बोधकत्वापेक्षयाऽतिरिक्तत्वस्य वा विवक्षितत्वात् । सङ्केतितत्वादिति—कोशादिना सङ्केतितत्वस्य बोधनादित्यर्थः । ननु बोधजनकत्वरूपा शक्तिश्चरमवर्णे एवास्तु, किन्तु बोधजनकत्वं शक्तिं विना अनुपपन्नमिति तदतिरिक्ता कल्प्यमाना शक्तिरपि चरमवर्णे एव स्यादित्याशङ्कायामाह—बोधकत्वस्यापीति—बोधजनकत्वपर्य्याप्त्यधिकरणत्वस्यापीत्यर्थः । बोधकत्वं शक्तिरिति नयेऽपि चरमवर्णमात्रेणार्थबोधादर्शनात् समुदाये एव बोधकत्वम् । तदन्यथानुपपत्त्या कल्प्यमाना शक्तिरपि तत्रैवेति भावः । प्रकृते च=समासस्थले च । सा=लक्षणा । विशेष इति—घटादिपदापेक्षया समासस्य लक्षणायां भेद इत्यर्थः । समासदृष्टान्तेन घटादिपदेषु चरमवर्णे आप-

दर्पणव्याख्या

घटादिपदे चेति । *कल्प्यमाना* इत्युक्तया अक्लृप्तत्वं सूचयति—*विशिष्टस्यैवेति* व्यवहारादिना तत्रैव तन्निर्द्धारणादिति भावः । *असत्त्वात्* इत्यस्य येन तत्रापि विनिगमकगवेषणा स्यादिति शेषः । *उत्तरपद इति* प्रासादकादिघटकोदकादिपदे इत्यर्थः । *सा* लक्षणा । *विशेष इति* घटादिपदात् समासस्य लक्षणायां वैषम्यमित्यर्थः ।

अत्रेदं बोध्यम्—उक्तयुक्तयोपकुम्भमित्यादावुत्तरपदस्यैव समीपाद्यर्थे लक्षणा, पूर्वपदं तात्पर्य्यग्राहकम् । तत्पुरुषेऽपि क्वचिदर्द्धपिप्पलीत्याद्येकदेशिनि चरमपदस्यैव सा पिप्पल्यर्द्धाद्यर्थे, इतरद् द्योतकम् । नीलोत्पलमित्यादिकर्मधारये तु न क्वाऽपि सा, प्रत्येकपदशक्त्युपस्थितयोरभेदान्वयसौलभ्यात् । बहुव्रीहौ तूत्तरपद एव सेति सार एव व्यक्तम् । पाणिपादमित्यादिद्वन्द्वेऽप्युत्तरपदस्य पाणिपादसमाहारे लक्षणा, पदान्तरं द्योतकम् । तत्रैव परम्परया वादनकर्मत्वान्वयः । एवमितरेतरयोगद्वन्द्वे साहित्यापन्नप्रत्येकपदार्थयोरुत्तरपदस्यैव सा । अत एव द्विवचनाद्यर्थद्वित्वाद्यन्वयस्तत्र । समाहारद्वन्द्वे साहित्यं विशेष्यम्, अत्र तु विशेषणमिति भेदः ।

यद्वा समाहारद्वन्द्वेऽपि साहित्याप्रतीतेर्न तत्र लक्षणा, किन्तु प्रत्येकपदशक्त्युपस्थाप्ययोरेव साक्षाद् वादनकर्मत्वान्वयः । "द्वन्द्वश्च प्राणि" (पा० सू० २।४।२) इतिप्रकरणातिदिष्टैकत्वसमासस्यैव मुख्यं समाहारपदव्यपदेश्यत्वम् । इतरत्र तु तद्व्यवहार औपचारिकः । नात इतरेतरयोगे तत्प्रसङ्गः । एवमितरेतरयोगेऽपि न लक्षणा, एकस्मृत्यारूढपदद्वयात्

स्वीकृतश्च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकम्मन्यैरित्याहुः ।

प्रभा

तितामापत्तिमिष्टापत्त्या परिहरन्नाह—स्वीकृतञ्चेति । मीमांसकम्मन्यैरिति—आत्मानं मीमांसकं मन्यन्ते, न तु ते मीमांसका इति सूचनेन चरमवर्णस्य बोधकत्वाभाव एव सर्वसम्मतो न तु बोधकत्वमितीष्टापत्तिरयुक्तेति ध्वनितम् ।

आहुरिति—अत्र व्यपेक्षावादिनः—'उपकुम्भम्' इत्यादौ प्रत्ययार्थान्वयसौलभ्याय उत्तरपदस्य

दर्पणव्याख्या

प्रत्येकशक्त्युपस्थितार्थयोर्द्वित्वान्वयसम्भवात्, एकक्रियाऽन्वयित्वरूपस्य एकबुद्ध्यवच्छिन्नत्वरूपस्य वा साहित्यस्य पश्चादेवावगमेन पूर्वं तत्र लक्षणाग्रहासम्भवाच्च । 'चार्थे द्वन्द्वः' इत्यस्य चार्थान्वययोग्य इत्यर्थान्न तद्विरोधोऽपि ।

युक्तञ्चैतत्, द्वन्द्वत्वावच्छिन्नस्य प्रधानीभूतार्थद्वयप्रतिपादकत्वे एव "द्वन्द्वः सामासिकस्य च" (गीता) इत्यनेन समाससमूहमध्ये द्वन्द्वस्य विभूतितया परिगणनस्य भगवत्कृतस्य सङ्गतेः । विशिष्टशक्त्या, लक्षणया वा तस्य प्रधानीभूतसमाहारप्रतिपादकत्वे तु समासान्तराद् द्वन्द्वस्याविशेषात्तदसङ्गतिः स्पष्टैव ।

यत्तु भारतभावदीपे—सममेकत्राऽऽसनं समासो विदुषां गुरुशिष्याणां वा मन्त्रार्थे कथार्थे वैकत्रावस्थानम् । तत्र विदितमर्थजातं सामासिकम्, चातुरर्थिकष्ठक् तस्य "ठस्येकः" (पा० सू० ७ । ३ । ५०) इतीकादेशः, "यस्येति च" (पा० सू० ६ । ४ । १४८) इत्यलोपः । तस्य मध्ये द्वन्द्वः=रहस्योऽहम् "द्वन्द्वं रहस्य" (पा० सू० ७ । १ । १५) इति सूत्रे द्वन्द्वशब्दस्य रहस्यवाचित्वं शाब्दिकप्रसिद्धमिति व्याख्यातम् ।

तत्तु विदितार्थस्य चतुर्थे चतुरर्थ्यञ्च अदर्शनाद्रथन्तराधिकरणन्यायेन सङ्केतितसमासशब्दात् पारिभाषिकसमासरूपार्थस्यैवोपस्थितेरुचितत्वेन प्राप्तस्य सामूहिकठकः समासशब्दात्तदनभिधानात् । "द्वन्द्वं रहस्य" (पा० सू० ७ । १ । १५) इत्यनेन रहस्ये व्युत्पादितद्वन्द्वस्य नित्यनपुंसकत्वेन पुल्लिङ्गस्य तद्वाचित्वासम्भवात् । समासवाचिनश्च तस्य पुल्लिङ्गतायाः "चार्थे द्वन्द्वः" (पा० सू० २ । २ । २ । २९) इत्यादौ दृष्टत्वात् पारिभाषिकत्वाच्च तेन समासस्यैव ग्रहणस्योचितत्वाच्च चिन्त्यम् ।

नच साहित्याभानेऽन्यतरस्य क्रियाऽन्वयविवक्षायाम् 'पश्य धवं खदिरं छिन्धि' इतिवाक्यवत् 'पश्य धवखदिरौ छिन्धि' इति प्रयोगापत्तिरिति वाच्यम्, प्रत्ययार्थद्वित्वावच्छिन्नधर्मिकस्यैव पदार्थान्तरान्वयबोधस्यान्यत्र दर्शनेनात्रापि तदवच्छेदेनान्वयस्यैवोचितत्वात् ।

नच द्वित्वान्वययोग्यतावच्छेदकसाहित्यभानमन्तरेण द्वित्वान्वय एव दुर्लभ इति वाच्यम्, योग्यताऽवच्छेदकोपस्थितेरनपेक्षणात्, उपस्थितेर्योग्य एव तदन्वयात् । अत एव 'घटेन जलमानय' इत्यत्र छिद्रेतरस्यैव योग्यताबलेनान्वयः, नतु छिद्रेतरत्वप्रकारकः शाब्दबोधः, तत्र प्रकृत्यर्थतावच्छेदकस्यैव द्वित्वान्वययोग्यतावच्छेदकत्वेऽपि क्षतिविरहाच्च । विवेचितं चेदमधिकमन्यत्र ।

नच 'क्षौमवसनावग्निमादधीयाताम्' इत्यत्र समुच्चयसाहित्यलाभो न स्यादिति वाच्यम्, "यत् कर्त्तव्यं तदनया सह" इति वचनान्तरात्तत्सिद्धेः । यद्यपि द्वन्द्वे परस्परान्वयित्वरूपव्यपेक्षा दुर्घटा, तथापि "चार्थे द्वन्द्वः" (पा० सू० २ । २ । २९) इति विधिसामर्थ्यादेव तत्र समासः, तदर्थस्तूक्तः, समुच्चयान्वाचययोस्त्वनभिधानादेव न द्वन्द्व इति स्पष्टं भाष्ये । यत्त्वेकस्यां क्रियायामेकरूपेणान्वयित्वमेव तत्र सामर्थ्यमिति, तन्न, क्वचिदेतस्य क्वचित् पूर्वोक्तस्य सामर्थ्यस्याश्रयणे समर्थसूत्रे वाक्यभेदापत्तेः, एकक्रियान्वयित्वस्य ततोऽननुभवाच्चेति पूर्वोक्तापत्तिमिष्टत्वेनापि परिहरति—* स्वीकृतमिति* ।

* चरमवर्णस्यैवेति * पूर्वपूर्ववर्णानुभवजन्योद्बुद्धसंस्कारसहितान्तिमवर्णस्येत्यर्थः । नातः केवलचरमवर्णा-

अत्रोच्यते—समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात्, अर्थवत्त्वाभावात्,

प्रभा

कुम्भसमीपे लक्षणा, पूर्वपदं तात्पर्यग्राहकम्। तत्पुरुषे एकदेशिसमासेऽपि उत्तरपदे एव लक्षणा, पूर्वपदं तात्पर्यग्राहकम्। कर्मधारये तु न लक्षणा, किन्तु शक्यार्थयोरभेदान्वयः। समाहारद्वन्द्वे 'पाणिपादम्' इत्यादौ उत्तरपदस्य पाणिपादादिसमाहारे लक्षणा, पूर्वपदं तादृशार्थलक्षणायां तात्पर्यग्राहकम्। समाहारः=समूहः=अपेक्षाबुद्धिविशेषविषयताश्रयः। नच समाहारे कर्मत्वाद्यनन्वयः, बाधादिति वाच्यम्, स्वघटकवृत्तित्वरूपपरम्परासम्बन्धेनान्वयसम्भवात्। इतरेतरयोगद्वन्द्वेऽप्युत्तरपदस्य साहित्यविशिष्टधवखदिरादौ लक्षणा। अत एव साक्षात्परम्परया वा निरूप्यनिरूपकभावापन्नविषयताप्रयोजकत्वरूपसामर्थ्यं द्वन्द्वेऽप्युपपन्नम्। स्वार्थनिष्ठविषयतानिरूपितविषयतानिरूपितविषयताप्रयोजकत्वसम्बन्धेन धवखदिरपदयोः परस्परविशिष्टत्वरूपं सामर्थ्यं सिध्यति। धवनिष्ठविषयतानिरूपिता या साहित्यनिष्ठा विषयता तन्निरूपिता खदिरनिष्ठा या विषयता तत्प्रयोजकत्वं खदिरपदस्य। एवं खदिरपदविशिष्टं धवपदमपि बोध्यम्। साहित्यस्याभाने तु उक्तसामर्थ्यानुपपत्तिः। एकधर्मावच्छिन्नेऽन्वयित्वरूपमेव सामर्थ्यमिति तु न युक्तम्, 'समर्थः पदविधिः' इत्यस्यावृत्तिप्रसङ्गात्। विभक्त्यर्थसङ्ख्याया विशेष्यभूतधवखदिरयोरन्वयः। समाहारे तु साहित्यस्य विशेष्यतया तद्गतैकत्वमेव विभक्त्या बोध्यते इत्येकवचनमेव। यदि तु द्वन्द्वविषये साहित्यस्य न प्रतीतिस्तदा न तत्र लक्षणा। अत एवोभयपदार्थप्रधानो द्वन्द्व इत्युद्घोषः सङ्गच्छते। 'द्वन्द्वश्च प्राणि' इत्यादिशास्त्रेण विहितसमाससंज्ञकत्वं समाहारद्वन्द्वत्वम्, तदतिरिक्तद्वन्द्वत्वमितरेतरयोगत्वम्। ननु धवखदिरादेः चार्थवाचकत्वाभावाद् द्वन्द्वानुपपत्तिः, 'चार्थे द्वन्द्वः' चार्थान्वययोग्यकार्थानां द्वन्द्व इत्येवार्थः। अत एव गीतायाम्—'द्वन्द्वः सामासिकस्य च' इत्युक्तिः सङ्गच्छते। सामासिकस्येत्यस्य समाससमूहस्य मध्ये इत्यर्थात्। समासान्तरे पूर्वपदोत्तरपदार्थयोर्विशेष्यविशेषणभावो द्वन्द्वे सर्वपदार्थानां समप्राधान्यमित्येव श्रेष्ठत्वम्। नच साहित्यस्य द्वन्द्वबोध्यत्वाभावे उक्तसामर्थ्यानुपपत्तिः, द्वन्द्वोत्तरभाविद्वित्वान्वयविषयतामादाय सामर्थ्यस्य सूपपादत्वात्। एवञ्च 'न धवं छिन्धि' 'खदिरञ्च पश्य' इत्यत्रैव द्वन्द्वानुपपत्तिः, साक्षात्परम्परया वा निरूप्यनिरूपकभावापन्नविषयताप्रयोजकत्वरूपसामर्थ्यस्य 'इसुसोः सामर्थ्ये' इत्यत्र कृप्तत्वात्। अत एव 'ऋतेन, मित्रावरुणावृता' इत्यादौ व्यपेक्षाभावे पराङ्गवद्भावावारणाय आमन्त्रितस्य यन्निमित्तं तद्वाचकपदं पराङ्गवद्भवतीत्यर्थकस्य 'तन्निमित्तग्रहणं कर्त्तव्यम्' इति वार्तिकस्य सामर्थ्यानुवृत्त्या वा सिद्धमिति 'सुबामन्त्रिते पराङ्गवत्' इति सूत्रे भाष्ये प्रत्याख्यानं सङ्गच्छते। अन्यथा पराङ्गवद्भावविषये एकार्थीभावस्यासम्भवात् भाष्यासङ्गतिः स्पष्टैव। नचैवं द्विगुसमासेऽपि समाहारस्य वाच्यत्वं न स्यादित्युपसर्जनत्वाभावेन 'द्विगोः' इति ङीब् न स्यादिति वाच्यम्, 'तद्धितार्थ' इति सूत्रे समाहारे इत्यस्य समाहारे विधातुमिष्टे इत्यर्थेनादोषादिति दिक्।

पूर्वोक्तरीत्या एकार्थीभावाभावेऽपि नैयायिकेन सर्वस्मिन्दोषे परिहृते स्वसिद्धान्तेन शाब्दिकः समाधत्ते—अत्रोच्यते इत्यादिना। तस्य=समासस्य। संज्ञादिकमिति—आदिना सुब्लुकः, समुदायात्सुबुत्पत्तेः, 'अनुदात्तं पदम्' इति सूत्रस्य प्रवृत्तेश्च संग्रहः। व्यपेक्षया अर्थविषयकबोधजनकत्वरूपार्थवत्त्वस्य ग्रहणे तु गौरवम्, शब्दाधिकारप्रसङ्गश्च, पूर्वसूत्रे एतादृशार्थवत्त्वस्याग्रहणात्, चित्रग्वादावसम्भवश्च, गोपदस्यैव लक्षणया विशिष्टार्थबोधकत्वात्। नचार्थबोधजनकज्ञानविषयशब्दत्वमेव अर्थवत्त्वम्, अस्ति च प्रकृते तत्,

दर्पणव्याख्या

र्थबोधापत्तिः। अधिकमग्रे वक्ष्यते। "व्यपेक्षायां सामर्थ्ये समास एकोऽसङ्गृहीतो भवति" इति भाष्याशयं प्रकाशयन्नैयायिकमतं दूषयति—* अत्रोच्यते इति *। संज्ञादीत्यादिना पदत्वादिपरिग्रहः।

SGDF Sri Gargeshwari Digital Foundation

"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पा० सू० १ । २ । ४५) इत्यस्याप्रवृत्तेः । नच "कृत्तद्धितसमासाश्च" (पा० सू० १ । २ । ४६) इत्यत्र समासग्रहणात् सा, तस्य नियमार्थताया भाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् ।

प्रभा

चित्रगुशब्दोऽर्थविषयकबोधजनको भवत्विति ज्ञानविषयतायाः समुदाये सत्त्वादिति वाच्यम्, चित्रशब्दस्तात्पर्यग्राहकतया गोशब्दो लक्षणया अर्थविषयकबोधजनको भवत्विति ज्ञानमादाय प्रत्येकं विभक्त्युत्पत्त्यापत्तेः । नचैकाज्द्विर्वचनन्यायेन समुदायादेव सुप्, समुदायस्य कार्यभाक्त्वे यत्रावयवस्यापि कार्यभाक्त्वं तत्रैव तत्प्रवृत्त्या प्रकृते समुदायात्सुपि पूर्वपदरूपावयवाव्यवहितोत्तरत्वस्याभावेन तदप्रवृत्तेः । 'एकाचो द्वे' इत्यादिसूत्रेषु विभक्त्यन्तसमाननिर्देशेनावयवाद्वारणं तु न, गौरवात्, छान्दसत्वेनापि तदुपपत्तेर्वक्तुं शक्यत्वाच्च । तदुक्तम्—'स्यान्महद्गौरवं तस्मात्' इति । सा=प्रातिपदिकसंज्ञा । तथाच समासग्रहणं विध्यर्थमेव स्यादिति भावः । तस्य=समासग्रहणस्य । ननु 'विधिनियमसम्भवे विधिरेव ज्यायान्' इति अभियुक्तोक्तेर्विधित्वमेवोचितम् । किञ्च 'असूर्यम्पश्या' 'शशशृङ्गम्' इत्यादावर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाया असिद्ध्या 'सिद्धौ सत्यामारभ्यमाणो विधिर्नियमाय कल्पते' इति न्यायविषयाभावेन नियमार्थत्वानुपपत्तिश्चेत्यत आह—भाष्यसिद्धाया इति । तथाच भाष्यप्रामाण्यान्नियमार्थत्वमेवेति भावः ।

भूषणे स्पष्टमिति—'असूर्यम्पश्या' इत्यादावपि सूर्यकर्मकदर्शनाभाववति शक्तिकल्पनया 'अर्थवत्' सूत्रेण प्रातिपदिकसंज्ञा सिद्धा । तदुक्तं कैयटेन—'असमर्थसमासेऽपि क्रियायामुभयोः सन्निपातादेकार्थीभावस्तद्द्वारकोऽस्त्येव' इति । 'शशशृङ्गम्' इत्यादावपि खण्डशः प्रसिद्धः शशरूपः, शृङ्गरूपश्चार्थः । आरोपितसम्बन्धश्च शक्य इति 'अर्थवत्' सूत्रेणैव प्रातिपदिकसंज्ञा सिद्धा ।

यद्वा बौद्धार्थमादायार्थवत्त्वं तत्र सुवचम् । किञ्च 'असूर्यललाटयोः' इति ज्ञापकादपि प्रातिपदिकत्वं सिद्धम् । नहि सुबुत्पत्तिं विना समीपोच्चारितपदत्वरूपमुपपदत्वं सम्भवतीति शाब्दिकनये समासग्रहणस्य नियमार्थत्वं सुवचमेव । किञ्च समासग्रहणादपि प्रातिपदिकत्वं वक्तुमशक्यम्, तत्र 'अर्थवत्' इत्यस्यानुवृत्तेः । समासांशे तदसम्बन्धस्तु न, एकत्रान्वयित्वाभावेन समासानुपपत्तेः । नहि अन्यतरस्य धनिकत्वे 'चैत्रमैत्रौ धनिकौ' इति प्रयोग इष्यते । छान्दसत्वात्साधुत्वकल्पनायान्तु गौरवमेव । किञ्च 'बहुपटवः' इत्यत्रार्थवत्सूत्रेण प्रातिपदिकत्वाय वृत्तौ समुदायेऽर्थवत्त्वं स्वीकार्यम् । 'कृत्तद्धित' इति सूत्रे स्वाव्यवहितपूर्वत्व–स्वाव्यवहितोत्तरत्वान्यतरसम्बन्धेन तद्धितविशिष्टो यः स्व (तद्धित) घटितः स प्रातिपदिकसंज्ञको भवतीत्यर्थस्तु न, पचतकीत्यादावपि प्रातिपदिकत्वापत्तेः । उक्तसम्बन्धेन तद्धितविशिष्टायाः प्रकृतेरेव ग्रहणे मानाभावो गौरवञ्च । किञ्च समासग्रहणस्य विध्यर्थत्वे वाक्यस्य 'ग्रामं गच्छति' इत्यादिरूपस्य पूर्वसूत्रेण प्रातिपदिकसंज्ञा दुर्वारा । नच वाक्यस्य प्रातिपदिकत्वे 'तृतीयाप्रभृतीनि' इति सूत्रेऽन्यतरस्यां ग्रहणं व्यर्थम्, इति तत्सामर्थ्याद् वाक्यस्य प्रातिपदिकत्वं न भवतीति ज्ञाप्यते इति वाच्यम्, समासाभावे उत्तरपदप्रकृतिस्वराप्रवृत्तेरेव फलत्वात्, 'दधि उपदंशम्' इत्यादौ 'इकोऽसवर्णे' इत्यस्य समासाभावे 'न समासे' इति निषेधाप्रवृत्त्या प्रकृतिभावरूपफलस्य सत्त्वाच्च ।

दर्पणव्याख्या

* भाष्यसिद्धाया इति * "समासग्रहणमर्थवत्समुदायानां नियमार्थम्" इति भाष्यसिद्धाया इत्यर्थः ।

* स्पष्टमिति * वाक्यस्याप्यर्थवत्त्वेन प्रातिपदिकत्वप्रसक्तौ तद्व्यावृत्तये वचनारम्भमाशङ्क्य नियमार्थेन

SGDF

समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात्। अथ "तिप्तस्झि" इत्यारभ्य "ङ्योस्सुप्" इति तिप्प्रत्याहारो भाष्यसिद्धस्तमादाय ।

प्रभा

शक्यसम्बन्धरूपेति—नच स्वबोध्यसम्बन्धरूपैव लक्षणा, एवञ्च समासबोध्यश्चित्रगुरित्यत्र चित्राभिन्नगोरूपोऽर्थस्तन्निरूपितस्वामित्वरूपसम्बन्धस्य लक्षणत्वं वक्तुं शक्यमिति वाच्यम्, अपभ्रंशेऽपि लक्षणाप्रसङ्गात्। नचेष्टापत्तिः, अप्रसिद्धान्तात्। वृत्त्या ज्ञाप्यत्वनिवेशे तु वाक्ये भवदभिमतलक्षणाया असिद्धिरिति समासस्य प्रातिपदिकसंज्ञासिद्धये समुदाये एकार्थीभावात्मिका शक्तिरुपेया। समासेऽवयवमात्रशक्तिवादी सूत्रभङ्गेन समासादिसमुदायस्य प्रातिपदिकसंज्ञा साधयितुमाह—अथेति। भाष्यसिद्ध इति—अर्थवत्सूत्रे भाष्ये 'अप्रत्ययः' इत्यत्राशङ्कितम्'—किं पुनरयं पर्युदासो यदन्यत्प्रत्ययादिति' प्रत्ययभिन्नमित्यर्थः। आहोस्वित्प्रसज्योऽयं प्रतिषेधः—प्रत्ययो नेति—प्रत्ययः प्रातिपदिकसंज्ञको न भवतीत्यर्थः। प्रत्ययभिन्ने नास्य व्यापारः।

दर्पणव्याख्या

समासग्रहणेन समाहितम्। समासे शक्त्यनभ्युपगमे तु तस्य वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावेनाप्राप्तसंज्ञाविषये तस्याऽऽवश्यकतया नियमार्थत्वव्याघातः स्पष्ट एव। तस्मादेतद्भाष्यमपि समासे विशिष्टशक्तौ मानमिति तत्रोक्तत्वादित्यर्थः।

नच अर्थवत्पदसामर्थ्येनार्थवाचकपदघटितेऽपि प्रातिपदिकसंज्ञासिद्धिरन्यथा धात्वादिपर्युदासेनैवाऽर्थवत्त्वे लब्धे तदुपादानवैयर्थ्यं स्पष्टमेव। दशदाडिमानीत्याद्यनर्थकसमुदायस्य तु नियमेन वारणीयत्वादिति वाच्यम्, अर्थवद्ग्रहणस्योत्तरार्थतायाः सिद्धान्तसिद्धत्वे तत्सामर्थ्याभावात्, "अर्थवद्ग्रहणं संज्ञिव्यपदेशार्थम्" इति भाष्येगार्थवत्त्वेन सादृश्यबोधनार्थं तदुपयोगदर्शनाच्चेति विशिष्टशक्त्यभ्युपगममन्तरेण समासे प्रातिपदिकसंज्ञादौर्भिक्ष्यमेवेति भावः।

ननु चित्रगुरित्यादौ विशिष्टे शक्त्यस्वीकारेऽपि नार्थवत्त्वनिबन्धप्रातिपदिकसंज्ञाऽनुपपत्तिः। तथाहि—न शक्यसम्बन्धो लक्षणा, 'गभीरायां नद्यां घोषः' इत्यादावसम्भवात्। तत्र तावन्न गभीरपद तीरलक्षकम्, नद्यामित्यस्यानन्वयापत्तेः। नहि तीरं नदी, अत एव नदीपदमपि न तथा, गभीरपदार्थस्यानन्वयापत्तेः। नच पदद्वये प्रत्येकं सा, विशिष्टनदीतीराभानप्रसङ्गात्। नच नदीपदेनैव गभीरनदीतीरं लक्ष्यते, गभीरादिपदं तात्पर्य्यग्राहकमिति वाच्यम्, गभीरपदस्य तात्पर्य्यग्राहकत्वमुत नदीपदस्येति विनिगमनाविरहात्।

नच नदीपदस्य द्रव्यवाचकतया साक्षात्सम्बन्ध एव लक्षणायां विनिगमक इति वाच्यम्, गभीरपदस्यापि नित्यं गुणिवाचकतया तदर्थस्यापि साक्षात्सम्बन्धाविशेषात्। तस्मात् पदद्वयलक्षणायां गौरवात् समुदाय एव साऽङ्गीकार्य्या। अत एवाऽर्थवादवाक्यानां प्राशस्त्ये लक्षणेति सङ्गच्छते। किन्तु स्वबोध्यरूपैव सा। अस्ति च गभीरायां नद्यामित्यत्र वाक्यज्ञाप्या गभीराभिन्ननदी तत्सम्बन्धस्तीरे इति। एवञ्च चित्रगुरित्यादिसमुदायस्य लक्षणया चित्राभिन्नगोस्वामिरूपार्थबोधकत्वरूपार्थवत्त्वात् प्रातिपदिकसंज्ञा नानुपपन्नेत्यत आह—*** समासवाक्य इति *** वाक्य इत्युक्त्या क्वचित्तत्सम्भवेऽपि सर्वत्र राजपुरुषादिसमासे तदसम्भवं सूचयति।

अयमाशयः—स्वज्ञाप्यसम्बन्धस्य न लक्षणात्वम्, अपभ्रंशेऽपि तत्प्रसङ्गात्। किञ्च 'स्वज्ञाप्य' इत्यस्य स्वनिष्ठज्ञापकतानिरूपकज्ञाप्यतावदर्थसम्बन्ध इत्यर्थो वाच्यः। तत्र ज्ञापकत्वं वृत्त्या बोधकत्वम्, उत ज्ञानजनकज्ञानविषयत्वमात्रम्। नाद्यः, वाक्ये लक्षणाऽभावप्रसङ्गात्। तदर्थस्य गम्भीराभिन्नस्य वृत्त्यबोध्यत्वात्। नान्त्यः, प्रत्येकं वर्णानामर्थवत्त्वापत्त्या विभक्त्यापत्तेरिति स्वशक्यसम्बन्धो लक्षणेत्येवाङ्गीकरणीयम्। तथाच समासे तदसम्भवेन प्रातिपदिकसंज्ञाऽनुपपत्तिस्तदवस्थेति तदर्थं विशिष्टशक्तिस्वीकार आवश्यक इति।

*** भाष्यसिद्ध इति ***। "तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात्" इत्यादेस्तत्राभिधानादिति भावः।

SGDF Digital Foundation

"अतिप्प्रातिपदिकम्" इत्येव सूत्र्यताम्, कृतमर्थवदादिसूत्रद्वयेन। समासग्रहणञ्च नियमार्थमस्तु। तथाच अतिप्=सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात् समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वाऽऽवश्यकत्वेन समासाव्याप्तितादवस्थ्यमेव।

प्रभा

कश्चात्र विशेषः। अप्रत्यय इति चेत् (प्रत्ययभिन्न इति चेत्) तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात्। अप्रत्यय इति चेत् तिबेकादेशे प्रतिषेधो वक्तव्यः। काण्डे कुड्ये। किं कारणम्, अन्तवत्त्वात्। पूर्वान्तवद्भावेन प्रत्ययभिन्नत्वमादाय प्रातिपदिकसंज्ञा प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः स्यादिति भावः। परादिवद्भावेन प्रत्ययत्वन्तु न, शास्त्रीयकार्य्याभावात्। प्रत्ययत्वमादाय किञ्चित् शास्त्रीयकार्यं न प्राप्नोति इति भावः। निषेधे तु प्रत्ययमादाय निषेधरूपं शास्त्रीयं कार्यं विद्यत इति परादिवद्भावेन प्रत्ययत्वसत्त्वेन निषेधान्न दोष इति भावः। अत्र 'तिबेकादेशे' इति भाष्ये तिपस्तिशब्दादारभ्य सुपः पकारेण प्रत्याहार इति कैयटः। तदाह--तिप्प्रत्याहारो भाष्यसिद्ध इति। अतिप् प्रातिपदिकमिति—तिप्प्रत्याहारान्तर्गता अष्टादशतिङ्प्रत्ययाः, एकविंशतिः सुप्प्रत्ययाश्च। तथाच तिङ्भिन्नं तिबन्ततदादिभिन्नञ्च प्रातिपदिकसंज्ञकमित्यर्थकेन 'अतिप्प्रातिपदिकम्' 'समासश्च' इति सूत्रद्वयेन सिद्धे कृतं सूत्रद्वयेन। कृतमिति—निषेधेऽव्ययम्। गुरुभूतेन सूत्रद्वयेन किञ्चित्साध्यं नास्तीत्यर्थः। गुरुभूतम्—'अर्थवत्' इति 'कृत्तद्धित' इति सूत्रद्वयं नारम्भणीयमिति भावः। एतेनात्र पक्षेऽपि सूत्रद्वयस्य सत्त्वेन कृतं सूत्रद्वयेनेत्यसङ्गतमित्यपास्तम्।

नियमार्थमिति—'राजन् ङस् पुरुष सु' इत्यादिसमासस्य तिबन्ततदादिभिन्नतया 'अतिप् प्रातिपदिकम्' इत्यनेनैव प्रातिपदिकत्वे सिद्धे समासग्रहणस्य नियमार्थत्वं सुवचमिति भावः। तथाच वाक्यस्य प्रातिपदिकत्वं न स्यात्, समासस्य स्यादिति न कोऽपि दोष इत्याशयः। सा=प्रातिपदिकसंज्ञा। अर्थवत्त्वावश्यकत्वेनेति—अर्थवदिति विशेषणस्यावश्यकत्वेनेत्यर्थः। ननु अर्थवदिति विशेषणाभावेऽपि न दोषः, वर्णात् संख्याकर्मादेरप्रतीतेः। नचौत्सर्गिकमेकवचनं स्यादिति वाच्यम्, एकवचनमिति महासंज्ञाकरणेन तस्यापि सत्येव गमके विधानात्। अत एव 'ङ्याप्प्रातिपदिकात्' इति सूत्रे भाष्ये ङ्याबिति सूत्राभावे तिङन्तेभ्यः सुबुत्पत्तिमाशङ्क्य एकत्वादीनामुक्तत्वान्नेति समाहितम्। एवञ्च फलाभावात् संघातधनवनादिघटकवर्णानां प्रातिपदिकत्वं न स्यादिति चेन्न, 'दशदाडिमानि षडपूपाः' इत्याद्यर्थवत्समुदायस्यानर्थकस्य प्रातिपदिकसंज्ञावारणायार्थवदिति विशेषणस्यावश्यकत्वात्। समासग्रहणनियमेन तु न तस्य व्यावृत्तिः, नियमस्य सजातीयापेक्षत्वेन परस्परान्वितार्थकसमुदायस्यैव तेन व्यावृत्तेः। अत एव 'गवित्यथमाह' इति समुदायस्य न प्रातिपदिकत्वम्। समासाव्याप्तीति—तिबन्तभिन्नत्वेऽपि अर्थवत्त्वाभावात् प्रातिपदिकसंज्ञाया अप्राप्त्या विध्यर्थमेव समासग्रहणमिति वाक्यस्य संज्ञा दुर्वारा स्यादिति समासग्रहणस्य नियमार्थत्वाय समासशक्तेर्यथाश्रुतन्यासस्य चावश्यकत्वम्। नच 'वाक्यस्य न' इति तृतीयं सूत्रं कर्तव्यम्, गौरवात्। अतिबिति न्यासे सन्नन्ता-

दर्पणव्याख्या

* सूत्र्यतामिति * "अतिप्समासश्च प्रातिपदिकम्" इत्येव सूत्र्यतामित्यर्थः। तथाच तिङ्सुबन्तभिन्नं यत्तत्प्रातिपदिकमित्यर्थेन समासस्य प्रातिपदिकत्वलाभादतिरिच्यमानं समासग्रहणं नियमार्थमस्त्वित्यर्थः। * प्रत्येकं वर्णेष्विति* वर्णानामानर्थक्यपक्षे प्रातिपदिकसंज्ञायां प्रकाशनीयार्थाभावादविशेषेण प्रतिवर्णं विभक्तिसम्भवादव्ययादिवेति भावः। *अर्थवत्त्वेति*। अर्थवद्ग्रहणस्यावश्यकत्वेनेत्यर्थः॥

तथाच प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति—धूम इव वह्निम् ।

किञ्चैवं 'चित्रगुमानय' इत्यादौ कर्मत्वाद्यनन्वयापत्तिः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोध-

प्रभा

दिषु धातुषु च न दोषः, तेषां प्रातिपदिकत्वे एकत्वादीनामभावेन सुपोऽप्राप्तेः, अपवादैस्तिबादिभिर्बाधाच्च । धूम इवेति—धूमो यथा वह्निमनुमापयति, तथा प्रातिपदिकसंज्ञारूपं कार्यं समासेऽर्थवत्त्वमनुमापयेदिति भावः । तथाहि—समास एकार्थीभावात्मकशक्तिमान्, प्रातिपदिकसंज्ञकत्वात्, पङ्कजशब्दवत्, यन्नैवं तन्नैवम्, यथा 'दशदाडिमानि' इत्याद्यनर्थकसमुदायः ।

ननु पर्युदासन्यायेनातिप्पदेनार्थवत एव ग्रहणात् अनर्थकस्य प्रातिपदिकत्वं न स्यादित्यर्थवदित्यस्य प्रयोजनाभावेन समासग्रहणस्य नियमार्थतयोक्तन्यासे दोषाभाव इत्यरुचेराह—किञ्चेति । एवम्=समुदाय-शक्त्यस्वीकारे । इत्यादाविति—आदिना 'पूर्वकायः' इत्यादेरितरेतरयोगद्वन्द्वस्य च संग्रहः ।

दर्पणव्याख्या

नचार्थवत्समुदायघटकवर्णानामर्थवत्त्वपक्षस्यापि भाष्ये दर्शनात्तद्ग्रहणेऽपि विभक्तिर्दुर्वारेति वाच्यम्, तत्पक्षेऽपि, "सङ्घातस्यैकार्थ्यात् सुबभावो वर्णात्" इति भाष्यात्तन्त्रेणैकैव विभक्तिः समुदायावयवार्थगतमेकत्वं बोधयेत् । एकमेव तदेकत्वं तच्चैकेन सुपा प्रत्यायितमिति बोधनीयाभावाद् विभक्तेः प्रत्येकवर्णादनुत्पत्तेरिति भावः ।

ननु समासवाक्यस्यार्थवत्त्वाऽभावेऽपि न प्रातिपदिकसंज्ञानुपपत्तिः, "कृत्तद्धित" (पा० सू० १ । २ । ४६) इति सूत्रेणैव तत्सम्भवात् । सम्भवति विधित्वे नियमकल्पनाया अन्याय्यत्वात् । समासग्रहणमेव च समास एकार्थीभावाभावे मानम् । वाक्यस्य तु न पूर्वसूत्रेण तत्प्रसक्तिः, अर्थवत्त्वाभावात् । संसर्गस्याशक्यत्वेऽप्याकाङ्क्षादिवशादेव तद्भानस्य सूपपादत्वात् । एवं प्रकृतिप्रत्ययसमुदायस्याप्यनर्थकत्वेनाप्राप्तसंज्ञाविधानार्थं कृत्तद्धितग्रहणमिति समस्तस्यैव सूत्रस्य विधायकत्वम् । आद्यसूत्रस्य तु अव्युत्पन्नसाधुशब्दस्वरूपमेव, नतु बहुपटुरित्यादिसमुदायोऽप्युत्तरपदलाक्षणिकतादृशसमुदायस्यार्थवत्त्वाभावात् । कृदन्तानां केषाञ्चिदर्थवत्त्वेऽपि धातुत्वात्, एवं तद्धितानामपि 'इः' 'इयान्' इत्यादीनां प्रत्ययत्वेन तादृशसमुदायस्य त्वनर्थकत्वेन पूर्वसूत्राविषयत्वेन तत्र तत्र प्रातिपदिकत्वविधानार्थं सूत्रकारेण द्वितीयं सूत्रं प्रणीतम् । अत एवात्रार्थवदिति नानुवर्त्तते, असम्भवात्प्रयोजनाभावाच्च । तत्र कृच्छब्देन प्रत्ययपरिभाषया तदन्तग्रहणं संज्ञाविधावित्यस्य प्रायिकत्वात्, डतरादिवत्केवलकृतामप्रयोगेण तदुपादानवैयर्थ्याच्च । यद्यप्युक्तयुक्त्या तद्धितपदस्य तद्धितान्तपरतैव लभ्यते तथापि लक्ष्यतावच्छेदकाक्रान्तबहुपट्वादिसङ्ग्रहाय तत्स्वाव्यवहितोत्तरत्वसम्बन्धेन तद्धितविशिष्टप्रकृतिघटितसमुदायतद्धितान्तान्यतरपरतया व्याख्येयम् ।

प्रकृतित्वञ्च प्रत्ययविधानावधित्वम् । 'इः' 'इयान्' इत्यादौ तु प्रत्ययस्यैव तदन्तत्वान्न दोषः । पचतक्यादिसमुदायान्तर्गततद्धितप्रकृतेर्निरुक्ततद्धितवैशिष्ट्याभावान्न तत्रातिप्रसङ्गः, कृद्ग्रहणपरिभाषाया अनन्तरग्रहणज्ञापिताया असार्वत्रिकत्वाच्च न मूलकेनोपदंशमित्यादावतिप्रसक्तिः । एवं समासग्रहणेनाप्यप्राप्तप्रातिपदिकसंज्ञाविधानाद्राजपुरुष इत्यादिसमुदायात् स्वाद्युत्पत्तिः सुलभेति तत्र विशिष्टशक्त्यभ्युपगमो निष्प्रमाणकः । वाक्यस्य सा नेत्युक्तमेव, तत्र कोशादिना शक्त्यपरिच्छेदात् ।

यत्र तु कोशादिकं परिच्छेदकं तत्र समासे पङ्कजादौ तां न निवारयामः । एवञ्च वाक्यस्यार्थवत्त्वाभावेन प्रातिपदिकसंज्ञाऽप्रसक्तेस्तद्व्यावृत्तिरूपफलाभावेन समासग्रहणस्य नियमार्थत्ववर्णनमसाम्प्रतम् । भाष्ये तस्य नियमपरतया वर्णनं तु संसर्गस्य शक्यत्वमित्येकदेशिमतमनुसृत्यैवेत्यरुचेराह—*किञ्चैवमिति* । एवम्=समासे विशिष्टशक्त्यस्वीकारे । कर्मत्वाद्यनन्वयापत्तिरित्यस्य गवादिपदार्थे इति शेषः । तत्र हेतुमाह—* प्रत्ययानामिति * तथाच प्रकृतित्वम्

जनकत्वव्युत्पत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात्। यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति, तन्न, 'उपकुम्भम्', 'अर्द्धपिप्पली' इत्यादौ पूर्वपदार्थे-विभक्त्यर्थान्वयेन व्यभिचारात्।

नच तत्रापि सन्निधानमेव, आनुशासनिकसन्निधेर्विवक्षितत्वात्। तथाच यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति। समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्,

प्रभा

पूर्वपदार्थे इति—उपपदार्थार्द्धपदार्थस्यैव विशेष्यत्वाद्विभक्तेर्विशेष्यगतसंख्यादिबोधकत्वस्यैव नियमेन पूर्वपदस्योत्तरपदेन व्यवधानात् सन्निहितत्वं नास्तीत्यतो व्यभिचार इति भावः। ननु 'उपकुम्भम्' इत्यत्र कुम्भशब्दस्यैव लक्षणया कुम्भसमीपाद्यर्थकत्वम्, 'अर्द्धपिप्पली' इत्यादावपि लक्षणया अर्धशब्दस्यैव विशिष्टार्थकत्वमित्युक्तव्युत्पत्तौ व्यभिचाराभाव इति चेन्न, विशिष्टे शक्तिस्वीकारेणैवोपपत्तौ शक्यार्थतत्सम्बन्धज्ञानाद्यपेक्षणेन लक्षणायां गौरवात्, इतरेतरयोगद्वन्द्वे पूर्वपदार्थेऽपि विभक्त्यर्थान्वयेन व्यभिचाराच्च। नच तत्रापीति—नचेत्यस्य वाच्यमिति वक्ष्यमाणेनान्वयः। तत्रापि=पूर्वपदेऽपि। सन्निधानमेवेति—सन्निधानञ्च नात्राव्यवहितपूर्वत्वरूपम्, किन्तु सन्निहितत्वेन शास्त्रबोधितत्वम्। तथाच आनुशासनिकसन्निधेर्विवक्षितत्वे च।

समस्यमानपदोत्तरमेवेति—समस्यमानं पदम्=समसनकर्मीभूतं पदम्। तथाच समासविधायके शास्त्रघटकप्रथमान्तपदनिर्दिष्टानामेव साक्षात्समसनकर्मत्वं लभ्यते। सुबन्तेन सहाव्ययं समस्यते इत्युक्तावयवस्य साक्षात्समसनकर्मत्वम्। तथाच समासस्य विधीयमाना प्रातिपदिकसंज्ञा समासकर्मैव बोधयेत्। तथाच समासपदेनाव्ययीभावस्य ग्रहणेऽव्ययमेव विशेष्यतया गृह्यते, 'सुबन्तेन सहाव्ययं समस्यते' समासपदजन्यबोधीयविशेष्यतायास्तत्रैव सत्त्वात्। एवमेकदेशिसमासे एकदेशे एव समासपदजन्यबोधीयविशेष्यता बहुव्रीहौ, द्वन्द्वे च समासपदजन्यबोधीयविशेष्यता सुबन्तमात्रे। इत्थञ्च प्रातिपदिकपदबोध्यसमासोत्तरत्व-

दर्पणव्याख्या

प्रत्ययविधानावधित्वम्, न तु प्रत्ययाव्यवहितपूर्वत्वम्, बहुपटुरित्यादौ पट्वादिशब्देऽव्याप्तेः।

नच "तावेव सुप्तिङौ यौ ततः परौ, सैव च प्रकृतिराद्या" इति भाष्यात् प्रत्ययाव्यवहितपूर्वस्यैव प्रकृतित्वलाभ इति वाच्यम्, तदर्थानवबोधात्। यौ ततो विधानावधेरसति विशेषानुशासने परौ तावेव सुप्तिङावित्युपलक्षणम्, प्रत्ययान्तरस्यापि, यतो विहितौ सैव प्रकृतिरिति तदर्थात्। आद्येत्यभ्यासाभिप्रायेण। तथाच समासोत्तरपदस्य विधानावधित्वरूपप्रकृतित्वाभावेन तदर्थे न कर्मत्वाऽऽद्यन्वयः सम्भवति, उक्तव्युत्पत्तिविरोधादिति भावः।

प्रत्ययानामिति व्युत्पत्तिर्हि दण्डिनमानयेत्यादौ दण्डादौ कर्मत्वान्वयवारणाय स्वीक्रियते। तदर्थश्च 'प्रकृत्यर्थनिष्ठविषयतानिरूपितविषयतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितित्वेन हेतुता' इति तत्र प्रकृते सन्निहितत्वेनैव निवेशस्तावतैवोक्तस्थले व्यभिचारवारणात्, न तु प्रकृतित्वेन, गौरवादिति मतं दूषयितुमुपन्यस्यति—***यत्त्विति***।

*** सन्निहितेति *** सन्निहितत्वञ्चाव्यवहितपूर्वत्वेनानुसन्धीयमानत्वम्। तस्य च चित्रग्वादिपदे गवादौ सत्त्वान्नोक्तानुपपत्तिरिति भावः। व्युत्पत्तिरेवेत्येवकारेण पूर्वोक्तप्रकृतित्वघटितव्युत्पत्तिव्यवच्छेदः। उपकुम्भादौ व्यभिचारोद्भावनन्तु प्राचीनमते। नव्यनये तत्रोत्तरपदे लक्षणाऽभ्युपगमेन तदप्रसक्तेः। ***तत्रापि*** उपकुम्भादिसमासेऽपीत्यर्थः।

*** आनुशासनिकेति *** सन्निहितत्वं नाव्यवहितपूर्वत्वम्। तत्त्वेनानुसन्धीयमानत्वं वा, धवखदिरावित्यादौ धवादिपदार्थे विभक्त्यर्थानन्वयप्रसङ्गात्, किन्तु सन्निहितत्वेनानुशासनबोधितत्वम्। तच्च धवादिपदार्थानामिवोपादिपदार्थानामस्तीत्याशयवानाह—*** तथाचेति *** । *** समस्यमानपदोत्तरमिति *** समासस्यानेकपदसमुदायात्मकतया

अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरं विभक्त्यनुशासनात् ।

अथ 'प्रकृतित्वाश्रये विभक्त्यर्थान्वयः' इत्येव कल्प्यत इति चेत्तर्हि, 'पङ्कजमानय' 'दण्डिनं पश्य' 'शूलिनं पूजय' इत्यादौ पङ्क-दण्ड-शूलेष्वानयन-दर्शन-पूजनादेरन्वयप्रसङ्गात्, 'अघटमानय' इत्यत्र घटेऽप्यानयनान्वयापत्तेश्च । नच दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः,

प्रभा

विशिष्टविधीयमानविभक्तेः सन्निहितत्वं पूर्वपदेऽप्यस्तीति तद्गतं कर्मत्वादिकं विभक्तिर्बोधयेत् । अत्र सन्निहितत्वञ्च—स्वादिप्रत्ययनिष्ठविशेष्यतानिरूपितोत्तरत्वसम्बन्धावच्छिन्नप्रकारताश्रयत्वरूपम् । तच्च पूर्वपदेऽक्षतम् । यद्वा पदसमुदायात्मकसमासोत्तरं विधीयमाना विभक्तिः समुदायस्य प्रत्येकानतिरिक्ततया प्रत्येकपदोत्तरमपि विहितैवेति उक्तसन्निहितत्वं पूर्वपदेऽपि सुलभम् । तदाह—यत्पदोत्तरं यानुशिष्टेति । 'वृक्षप्रचलन'-न्यायेन 'तस्मादित्युत्तरस्य' इति परिभाषाबलात् पदसमुदायात्मकसमासाव्यवहितोत्तरत्वविशिष्टैव विभक्तिर्भवतीति त्वन्यत् । समासस्यार्थवत्सूत्रेणैव प्रातिपदिकसंज्ञाविधानात् प्रातिपदिकसंज्ञायाः समासे संज्ञित्वमर्थवत्त्वेनैव, नतु समसनकर्मत्वेनेत्यानुशासनिकसन्निहितत्वमपि समुदाये एव, नतु तद्घटके, विशिष्टे एवार्थवत्त्वसत्त्वादित्याह—अर्थवत्सूत्रेणेति— ननु नियमस्य निषेधमुखेन प्रवृत्तौ तु पूर्वपदेऽपि तादृशसन्निहितत्वमक्षतमेवेति चेन्न, 'पुत्रेण सहागतः पिता' इत्यत्र पुत्रप्रतियोगिकसाहित्यविशिष्टे पितरि आगमनकर्तृत्वविधानवत् सुबन्तादिविशिष्टे सुबन्तादौ समाससंज्ञाया विधानेन समसनकर्मत्वस्यापि विशिष्टे एव सत्त्वात्, 'समस्यते' इत्युक्तिस्त्वबुधानाम् इति शेखरोक्त्या समसनकर्मत्वस्याविधानेन समुदायवृत्तिसमाससंज्ञाया एव संकेतसम्बन्धेन विधानाच्च । विशिष्टोत्तरमेवेति— एवघटित एव पाठः ।

प्रकृतित्वाश्रये इति—प्रकृतित्वाश्रयार्थे इत्यर्थः, अर्थस्यार्थे एवान्वयौचित्यात् । प्रकृतित्वञ्च—प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यतारूपम्, तदवच्छेदकरूपं वा तदाश्रयत्वञ्चापर्य्याप्त्या पूर्वपदेऽप्यक्षतम् । अन्वयप्रसङ्गादिति—पङ्कादिपदेष्वपि प्रकृतित्वाश्रयत्वस्यापर्य्याप्त्या सत्त्वादिति भावः । दण्डविशिष्टस्यानयनतात्पर्ये दण्डेऽप्यानयनान्वय इष्टापत्तिसम्भावनया स्थलान्तरमाह—अघटमिति—अत्र तु घटभिन्नस्यानयने न कस्यापि घटानयने इष्टापत्तिरिति भावः । विशेषणतयेति—'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' इति न्यायेन पङ्कजादावेवान्वयः स्यान्नतु अप्रधाने पङ्कादाविति भावः । 'एकत्र विशेषणतयाऽन्वितस्यापरत्र

दर्पणव्याख्या

समुदायस्य प्रत्येकानतिरिक्ततया समासरूपप्रातिपदिकाद् विहितविभक्तेस्तत्तत्पदसन्निहितत्वादिति भावः ।

सम्भवेदेवं यदि समासग्रहणनिबन्धना प्रातिपदिकसंज्ञा, किन्तु तस्य नियामकतया पूर्वसूत्रेणैव सा वाच्या । तथाचोक्तप्रकारासम्भव इत्याशयेनाह—* अर्थवत्सूत्रेणेति * तथाच शास्त्रबोधितसन्निहितत्वमपि विशिष्टस्यैव, न केवलपूर्वपदस्येत्युक्तस्थले व्यभिचारो दुरुद्धर इति भावः । प्रकृतित्वस्य पर्य्याप्त्याख्यविलक्षणसम्बन्धेन समुदायमात्रविश्रान्तत्वेऽपि केवलाश्रयतया तद्वत्त्वस्य प्रत्येकदेशेऽपि सम्भवादुक्तव्युत्पत्तिशरीरे आश्रयतैव निवेशनीयेत्याशयेन शङ्कते—* अथेति * । * प्रकृतित्वाश्रये *=प्रकृतित्वाश्रयार्थे । असन्निहितप्रकृत्यर्थे दूषणमुद्भाव्य सन्निहितेऽपि तदाह—* अघटमिति * । पूर्वपदार्थप्राधान्यमत्रेत्याशयेन दूषणोद्भावनम् । तत्त्वञ्चाऽग्रे वक्ष्यते । * विशेषणतयेति *एकत्र विशेषणतयाऽवरुद्धस्यापरत्र तदन्वये नैराकाङ्क्ष्यादिति भावः । यत्र क्वापि विशेषणेनापरान्वय इति यथाश्रुतं दूषयति—

Copyright Digital Foundation

'पाकान्नीलः' 'धर्मात् सुखी' इत्यादौ पाक-धर्मादिहेतुताया रूप-सुखादावनन्वयप्रसङ्गात्। यच्च-प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रम्, तच्चात्राविरुद्धमिति, तन्न, 'घटं पश्य' इत्यत्र घटपदात् समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्यावश्यकत्वात्।

अथ 'प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वम्' इति चेन्न, 'गामानयति कृष्णो दण्डेन' इत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात्।

प्रभा

विशेषणत्वायोगात्' इत्यभिप्रायेण तु नेयमुक्तिः, 'पाकान्नीलः' इत्याद्युत्तरग्रन्थविरोधात्। न हि जन्यत्वं क्वचिद्विशेषणतयाऽन्वितमिति नीलादौ विशेषणं न स्यात्। नापि 'प्रकृतिजन्यप्रतीतिविशेष्ये एव विभक्त्यर्थान्वयः' इत्यभिप्रायेणापि 'विशेषणतया' इत्याद्युक्तिः, 'पाकान्नीलः' इत्यादिसमाधानासङ्गतेः।

पाकान्नील इति—पाकः=विलक्षणतेजःसंयोगः, विक्लित्त्यनुकूलव्यापारो वा। जन्यत्वरूपपञ्चम्यर्थस्य 'प्रधानाप्रधानयोः' इति न्यायेनाप्रधाननीलसुखादावन्वयो न स्यात्। सुखे, नीले च जन्यत्वाश्रयत्वस्य सर्वजनानुभवसिद्धतया 'प्रधानाप्रधानयोः' इति न्यायः प्रायिक इति मन्तव्यमिति भावः। 'पाकान्नीलः' इत्यत्र नीलपदस्य गुणे एव शक्तितया नीलत्वगुणविशिष्टे लक्षणया नीलगुणस्य विशेष्यत्वं बोध्यं नैयायिकमते। शाब्दिकमते तूभयत्र शक्तिरेव। अत एव 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति वार्तिकं सङ्गच्छते। 'प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तौ प्रकृत्यर्थत्वं न वृत्त्या प्रकृतिप्रयोज्यज्ञानविषयत्वम्, किन्तु यथाकथञ्चित् प्रकृतिप्रयोज्यज्ञानविषयत्वम्, तदाह—यच्चेति। तच्चात्रेति—तच्च=प्रकृत्यर्थत्वम्, अत्र='उपकुम्भम्' अर्धपिप्पली' इत्यादौ पूर्वपदार्थे। अविरुद्धमिति—कुम्भपदपिप्पलीपदयोर्लक्षणायामपि पूर्वपदस्य तात्पर्यग्राहकतया लक्ष्यार्थोपस्थितौ प्रकृतिप्रयोज्यज्ञानविषयत्वमक्षतमेवेति भावः। आकाशवारणायेति—आकाशे दृशिकर्मत्वान्वयवारणायेत्यर्थः। ननु चाक्षुषज्ञानं प्रत्युद्भूतरूपवत्त्वस्य कारणतया नाकाशे दर्शनकर्मत्वान्वय इति चेन्न, दृशेर्ज्ञानसामान्यार्थत्वेऽन्वयापत्तेरित्याशयात्। प्रकृत्यर्थत्वस्य=प्रकृतिजन्यज्ञानविषयत्वस्य। आवश्यकत्वात्=अवश्यं प्रवेशनीयत्वात्। प्रत्ययप्राग्वर्तीति—अस्य वृत्त्येति शेषः। तेन 'घटं पश्य' इत्यत्र आकाशे न कर्मत्वान्वयः। विशेष्यत्वमिति—विशेष्यत्वोक्त्या 'घटं पश्य' इत्यत्र घटत्वे 'दण्डिनं पश्य' इत्यत्र दण्डे च न दर्शनकर्मता, तत्रोक्तविशेष्यत्वाभावात्। अत्र प्रत्ययप्राग्वर्तित्वं नाव्यवहितत्वघटितम्, द्वन्द्वघटकपूर्वपदार्थे कर्मत्वाद्यनन्वयापत्तेः। कृष्ण इति—कृष्णपदेऽपि तृतीयाप्राग्वर्तित्वस्य सत्त्वात्। नच प्रकृतिघटकप्राग्वर्तिपद-

---

दर्पणव्याख्या

* पाकान्नील इत्यादि * नीलत्व-सुखयोः स्वाश्रये विशेषणतयाऽन्वितयोः पाकादित्याद्यन्तर्गतपञ्चम्यर्थहेतुत्वस्यानन्वयापत्तेरित्यर्थः। * तज्जन्यज्ञानविषयत्वेति * तत्पदार्थः प्रकृतिः। मात्रपदेन वृत्तिप्रतिपाद्यत्वस्य व्यवच्छेदः। * अत्र * चित्रग्वादिसमासान्तर्गतगवादिपदार्थे इत्यर्थः। * अविरुद्धमिति * अबाधितमित्यर्थः। 'घटं पश्य' इत्यत्र दृशिर्ज्ञानसामान्यार्थः। * आकाशवारणायेति * समवायेनोपस्थिताकाशे दृश्यर्थकर्मत्वाद्यन्वयवारणायेत्यर्थः। * वृत्त्या प्रकृत्यर्थत्वस्येति * वृत्तिजन्योपस्थितिविषयत्वस्येत्यर्थः।

'वादिवाक्ये यावन्तोऽर्थाः सम्भवन्ति' इति न्यायेनोक्तव्युत्पत्तिं दूषयितुमर्थान्तरपरतया व्याचष्टे—* अथेति * पूर्वं तु प्रत्ययसन्निहितपदार्थत्वं प्रकृतित्वम्, अत्र तु तत्प्राग्वर्त्तिपदार्थत्वमिति भेदः। * प्रसङ्गादिति * प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविषयतायाः कृष्णे सत्त्वादिति भावः। 'प्रत्ययानाम्' इति व्युत्पत्तेरेकार्थीभाववादिमते सत्त्वेऽपि नास्मन्मते सा सार्वत्रिकी, समास एवासम्भवात्। किन्तु प्रकृते व्युत्पत्त्यन्तरेण कल्प्यते इत्यभिप्रेत्याह—* अथेति *।

अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न, अक्लृप्तकल्पनां क्लृप्तव्युत्पत्तित्यागश्चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।

अपिच समासे विशिष्टशक्त्यस्वीकारे 'राजपुरुषः' 'चित्रगुः' 'नीलोत्पलम्' इत्यादौ सर्वत्रानन्वयप्रसङ्गः, राजपदादेः सम्बन्धिनि लक्षणायामपि, 'तण्डुलः पचति' इत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात्, पुरुषादेस्तथात्वाभावात्। 'तण्डुलः शुभ्रः' इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेः, तस्य च शुक्ले अभेदेनैवान्वयः।

प्रभा

जन्योपस्थितिविशेष्यत्वस्य निवेशान्नोक्तदोषः। एवमपि 'बहुपटुः' 'दधि इयद् ददाति' इत्यत्राव्याप्त्यतिव्याप्त्योः सत्त्वादित्यरुचेराह—अथ समस्यमानेति। अक्लृप्तेति—अक्लृप्तस्य=समस्यमानपदार्थेतिनियमस्य कल्पनामपेक्ष्येत्यर्थः। क्लृप्तव्युत्पत्तीति—क्लृप्तायाः,=प्रत्ययानां प्रकृत्यर्थ' इति व्युत्पत्तेस्त्याग इत्यर्थः।

नन्वनन्तसमासरूपसमुदायेष्वनन्तशक्तिकल्पनापेक्षया व्युत्पत्त्यन्तरकल्पनायां क्लृप्तव्युत्पत्तित्यागे च न गौरवमत आह—दिगिति—दिगर्थस्तु—'राजपुरुषः' इत्यादौ राजपदस्य राजसम्बन्धिनि लक्षणायां राज्ञः पदार्थैकदेशतया शोभनाद्यन्वयवारणेऽपि 'दास्याः पुत्रः' इत्याद्यलुक्समासे लक्षणायां मानाभावेन दास्यादौ शोभनाद्यन्वयो दुर्वारः। नच दास्या इति ङसन्तस्य सम्बन्धिनि लक्षणा, ङसन्ते शक्त्यभावेन शक्यार्थसम्बन्धरूपलक्षणाया असम्भवात्। न षष्ठ्याः, तदेकदेशे सम्बन्धे पदार्थैकदेशतया दास्या अनन्वयापत्तेः, 'सुब्विधौ न लक्षणा' इति सिद्धान्तभङ्गाच्च। किञ्च 'राज्ञः पुरुषः' इति वाक्याद्यथा राजसम्बन्धप्रकारकः पुरुषविशेष्यकः, स्वत्वसंसर्गको राजप्रकारकः पुरुषविशेष्यकश्च बोधो जायते, एवम् 'दास्याः पुत्रः' इत्यत्रापि तथैव बोध इष्टः, स दासीशब्दस्य सम्बन्धिलक्षणायां न स्यात्। किञ्च त्वदुक्तव्युत्पत्तेः 'बहुपटुः' इत्यत्राव्याप्तिश्च। तदर्थं व्युत्पत्त्यन्तरकल्पनायां गौरवञ्च। प्रातिपदिकार्थेति—भेदसम्बन्धावच्छिन्नप्रातिपदिकार्थनिष्ठप्रकारताकबोधं प्रतीत्यर्थः। तेन 'स्तोकं पचति' इत्यादौ स्तोकरूपप्रातिपदिकार्थस्य अभेदेन पाकेऽन्वयेऽपि न व्यभिचारः। तथात्वाभावादिति—पुरुषस्य विभक्तिजन्योपस्थितिविषयत्वाभावादित्यर्थः। प्रातिपदिकार्थकेति-

दर्पणव्याख्या

* अक्लृप्तकल्पनामिति * समस्यमानपदार्थविषयतानिरूपितविषयतासम्बन्धेन शाब्दं प्रति विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितेः कारणत्वान्तरकल्पनामित्यर्थः।

ननु प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वरूपा व्याससमाससाधारण्येकैव व्युत्पत्तिः। सन्निहितत्वञ्च प्रकृतिघटकत्वे सति प्राग्वर्त्तित्वमिति नोक्तदूषणमत आह—*दिगिति* तथाकल्पने चोक्तव्युत्पत्त्यपेक्षया पदत्वस्य प्रकृतित्वघटितस्य व्युत्पत्तौ निवेशे गौरवमित्यादिदिगर्थः।

ननु प्रत्ययानामिति व्युत्पत्तेः प्रकृतिप्रत्ययघटिततया तत्र प्रकृतित्वप्रत्ययत्वयोरनुगतयोर्दुर्वचत्वेन तत्तद्व्यक्तिभेदेन कार्य्यकारणभावो वाच्यः। तथाच समासस्थले समस्यमानपदार्थस्य प्रत्ययार्थान्वयाभ्युपगमे बाधकाभावोऽत आह—* अपि चेति *। यद्वाऽनेकसमासेषु विशिष्टशक्तिकल्पनापेक्षया क्लृप्तव्युत्पत्तित्यागसहकृता व्युत्पत्त्यन्तरकल्पनैव लघीयसी इत्यत आह—*अपि चेति*। * अनन्वयप्रसङ्ग इति * नामार्थयोरिति व्युत्पत्तेरिति भावः।

अनन्वयमेवाह—* राजपदादेरिति *। लक्षणायामपीत्यपिना सम्बन्धलक्षणायां नितरामन्वयाभावः सूच्यते। नचोक्तव्युत्पत्तेः 'तण्डुलः शुभ्रः' इत्यादौ व्यभिचारोऽत आह—*तण्डुलः शुभ्र इति*। *अभेदेनैवान्वय इति*।

'शुभ्रेण तण्डुलेन' इत्यादौ च विशेषणविभक्तिरभेदार्थिका,

प्रभा

प्रातिपदिकपदं लक्षणया प्रातिपदिकार्थपरम्। तथाच प्रातिपदिकमर्थो यस्याः सा प्रातिपदिकार्थिका सा चासौ प्रथमा चेति प्रातिपदिकार्थकप्रथमा तदर्थे तण्डुलस्याभेदसंसर्गेणान्वयः। प्रथमार्थस्य चाभेदेन शुभ्रेऽन्वयः। तथाच तण्डुलाभिन्नार्थाभिन्नः शुभ्र इति 'तण्डुलः शुभ्रः' इत्यनेन बोधः।

एतेन 'तण्डुलः शुभ्रः' इत्यत्र तण्डुलपदार्थस्य 'नामार्थयोरभेदान्वयः' इति नियमेन शुभ्रेऽन्वयात् प्रातिपदिकार्थकप्रकारकबोधं प्रति विभक्तिजन्योपस्थितिः कारणम्' इत्यस्य व्यभिचारः, एतन्न्यायास्वीकारे कर्मतासम्बन्धेन तण्डुलविशिष्टः पाक इत्यर्थे 'तण्डुलः पाकः' इत्यस्य प्रामाण्यापत्तिरिति तद्वारणाय विशेष्यतासम्बन्धेन प्रातिपदिकार्थप्रकारकबोधं प्रति धातुभिन्नजन्योपस्थितेः कारणत्वं वाच्यम्। तथाच 'राजपुरुषः' इत्यत्र धातुभिन्नपुरुषपदजन्योपस्थितेः सत्त्वात् स्वत्वसंसर्गकराजप्रकारकबोधे बाधकाभाव इत्यपास्तम्, तण्डुलः शुभ्रः' इत्यत्रापि तण्डुलस्य प्रथमार्थाभेदे एवान्वयात्। प्रथमया प्रातिपदिकार्थश्चार्थत्वेनैवोपस्थाप्यते इति न घटो घट इतिवत् शाब्दबोधानापत्तिः।

यद्वा विभक्त्या असत्त्वरूपेण तण्डुलस्योपस्थितिरिति विरूपेणोपस्थितिसत्त्वान्नान्वयबाधः। अत्र मूलकृता तण्डुलप्रकारको बोधः स्वीकृतः, स चासङ्गतः, 'जातिगुणवाचकयोः समभिव्याहारे जातिवाचकस्य विशेष्यताप्रयोजकत्वम्' इति नियमेन तण्डुलस्यैव विशेष्यतया भानौचित्यात्। नन्वेवमपि 'शुभ्रं तण्डुलम्' शुभ्रेण तण्डुलेन' इत्यादौ विशेषणविभक्तेः साधुत्वमात्रार्थकतया शुभ्रस्य तण्डुल एवान्वयेनोक्तनियमे व्यभिचारतादवस्थ्यमित्यत आह—शुभ्रेणेति। अभेदार्थिकेति—नचाभेदार्थे द्वितीयादिविधायकशास्त्राभावः,

दर्पणव्याख्या

तथाच तण्डुलान्वयिनि प्रातिपदिकार्थे विभक्तिजन्योपस्थितेः सत्त्वान्न तत्र व्यभिचार इति भावः। शुभ्रेण तण्डुलेन इत्यादौ व्यभिचारमाशङ्क्य निराचष्टे—*अभेदार्थिकेति* अथवा कट इव तत्समानाधिकरणभीष्माऽऽदिभ्यो द्वितीया भविष्यतीति द्वितीयादिविभक्तेरनभिहितसूत्रे भाष्यकृताऽभिधानात् सामानाधिकरण्यस्य समानाधिकरणयोर्विशेष्यविशेषणयोर्भावस्याभेदस्य विशेषणपदोत्तरविभक्त्यर्थलाभात् तत्रापि शुभ्रेणेति तृतीयाजन्याभेदोपस्थितिसत्त्वान्न व्यभिचार इति भावः।

नन्वत्र अभेदो यदि भेदत्वावच्छिन्नाभावस्तदाऽप्रसिद्धिः, भेदस्य केवलान्वयित्वात्। यदि भेदप्रतियोगिकाभावस्तदा 'नीलो वह्निः' इति वाक्यस्य प्रामाण्यापत्तिः द्वित्वादिना नीलभेदाभावस्य वह्नौ सत्त्वाद् विशेषणविभक्त्यर्थैकदेशे भेदे प्रकृत्यर्थस्यानन्वयापत्तिश्च।

नच भेदेऽभावे च द्वितीयादेः शक्तिः। भेदे च प्रकृत्यर्थस्य प्रकृत्यर्थताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वेनान्वयः, उक्तसम्बन्धेन प्रकृत्यर्थविशिष्टभेदस्य तु तत्त्वावच्छिन्नप्रतियोगिताकत्वेनाभावेऽन्वयोपगमान्नोक्तापत्त्यादिरिति वाच्यम्। 'प्रमेयो घटः' इत्यादौ प्रमेयत्वाच्छिन्नभेदाप्रसिद्ध्योक्तप्रकारासम्भवात्, नीलपटादिपरनीलपदघटितनीलो घट इति वाक्यस्य प्रामाण्याऽऽपत्तेश्च। नीलत्वादिना नीलभेदाभावस्य घटेऽबाधात्।

नच तद्व्यक्तित्वावच्छिन्नाभेद एव विभक्त्यर्थः। तथा सत्यपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्य भानासम्भवेन तदवच्छिन्नप्रतियोगिताकाभावे शक्तिग्रहासम्भवेनापूर्वव्यक्त्यभेदान्वयाऽनुपपत्तेः। अभावबुद्धेर्विशिष्टवैशिष्ट्याऽवगाहित्वानुपपत्त्या एकधर्माऽवच्छिन्नप्रतियोगिताकाभावेऽपरधर्माऽवच्छिन्नप्रतियोगितायाः सम्बन्धतया भानासम्भवाच्चेति चेन्न, अभेदस्तादात्म्यम्, तच्च स्ववृत्त्यसाधारणो धर्मः। असाधारण्यञ्च स्वप्रतियोगिवृत्तित्व-स्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टं यत्तदन्यत्वमित्येकमात्रवृत्तिधर्म एव, तस्मिन्नाधेयतया प्रकृत्यर्थाऽन्वयः। अपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्य विशिष्य-

पार्ष्टिको वाऽन्वय इति नातिप्रसङ्गः । तथाच समासे परस्परमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः ।

प्रभा

कर्माद्यभेदस्य कर्मादिरूपतया 'कर्मणि द्वितीया' इत्यादिनैवाभेदे द्वितीयादेर्विधानात् । ननु समानाधिकरणस्थले विशेष्यवाचकपदोत्तरविभक्त्यैव कर्मादीनामभिधानाद् विशेषणवाचकपदोत्तरविभक्तिः साधुत्वार्थिकैवेति व्यभिचारतादवस्थ्यमित्याह—पार्ष्णिको वेति—कर्मादिष्वेव द्वितीयेति 'कर्मणि द्वितीया' इत्यादिशास्त्राणां नियमार्थतया विभक्तीनां साधुत्वार्थकत्वं न युक्तम् , किन्तु कर्माद्यर्थकत्वमेव । नच विशेषणे कर्मत्वाभावः, कटोऽपि कर्म भीष्मादयोऽपि कर्म' इति भाष्योक्त्या विशेषणेऽपि कर्मत्वसत्त्वात् । तथाच 'कारकाणां क्रियायामेवान्वयः' इति नियमेन विशेष्यविशेषणयोः परस्परमन्वयाभावादुक्तनियमे व्यभिचाराभावः । ननु क्रियायामन्वयेऽपि विभक्त्यर्थेऽनन्वयेन व्यभिचारतादवस्थ्यम् , विभक्त्यर्थान्वयद्वारैव कारकाणां क्रियान्वयनियमात् । नन्वेवं तण्डुले शुभ्रस्यान्वयाभावेऽव्यावर्तकतया 'शुभ्रेण तण्डुलेन शूलिनं पूजयेत्' इति विधिस्थले शुभ्रेण वस्त्वन्तरेण, श्यामतण्डुलेन च पूजने विधिवैगुण्यानापत्तिः । किञ्च 'नीलोत्पलमानय' इत्यादौ सामर्थ्याभावान्नीलोत्पलयोः समासानापत्तिरिति चेन्न, विशेष्यविशेषणयोः पार्ष्णिकपरस्परान्वयबोधस्वीकारेणादोषात्—पार्ष्टिक इति—क्वाचित्कः पाठः । पृष्ठम्=पश्चात्कालः, तत्र भवः पार्ष्टिकः, 'कालाट्ठञ्' इति ठञ् । पार्ष्णिक इति पाठेऽपि पार्ष्णिः=पृष्ठम्=पश्चात्कालस्ततष्ठञ् क्रियायामन्वयबोधोत्तरं 'शुभ्रगुणविशिष्टः क इत्याकाङ्क्षायामुपस्थिततण्डुले एवान्वयेन शुभ्राभिन्नस्तण्डुल इति मानसिकं बोधमादायैव विशेषणत्वम्, सामर्थ्यञ्चोपपाद्यमिति भावः । पार्ष्टिकबोधकृतसामर्थ्यमादाय समासे च 'विशेषणं विशेष्येण' इति सूत्रमेव मानम् । तत्सूत्रसामर्थ्येन सामर्थ्याभावेऽपि विशेष्यविशेषणयोः समास इति कल्पनापेक्षया ईदृशसामर्थ्यमादायापि समास इति कल्पनस्यैवौचित्यात् ।

परे तु प्रथमायाः प्रातिपदिकार्थो न वाच्यः, किन्तु द्योत्य एव । वाच्यत्वे तु बोधावृत्तिप्रसङ्गः, घटो घट इतिवदनन्वयापत्तिश्च । नच विभक्त्याऽसत्त्वेनोपस्थितिरिति नानन्वयः, सर्वजनानुभवविरुद्धत्वात् । 'प्रातिपदिकार्थे प्रथमा' इत्यस्य तत्तत्प्रातिपदिकेन प्रातिपदिकार्थे विवक्षिते तदुत्तरं प्रथमा इत्येवार्थः । एवं विशेषणविभक्तेरभेदोऽर्थ इत्यप्यसङ्गतम्, तादृशानुशासनाभावात् । नच कर्माद्यभेदस्य कर्मादिरूपतया 'कर्मणि द्वितीया' इत्यादिसूत्रमेव मानम्, कर्मत्वादिनैव तत्तत्सूत्रेण कर्मादीनां विभक्त्यर्थत्वबोधनात्, विशेष्यवाचकपदोत्तरविभक्तेरपि अभेदार्थकत्वप्रसङ्गाच्च । अत एव भाष्यकृता विशेषणवाचकाद् द्वितीयाद्युपपत्तिः प्रकारान्तरेण समाहिता । तथाहि—'अनभिहिते' इति सूत्रे 'विशिष्टस्य क्रिययेप्सितत्वात् कर्मत्वादुभयत्रापि द्वितीया' इत्युक्तम् । अत्र कैयटः—यथेश्वर (धनिक) सुहृदः स्वयं निर्धना अपि तद्धनेनैव धनभाजस्तद्वत् तदेकयोगक्षेमत्वादिति । विशेषणस्य विशेष्यसमानशक्तिं विना एकार्थबोधकत्वरूपसामानाधिकरण्यानुपपत्तिरिति विशेष्यसमानशक्तिकत्वं तस्य ।

अयम्भावः—विशिष्टनिष्ठं कर्मत्वं विशेष्यविशेषणयोः समानविभक्तिकत्वं विना बोधयितुं न शक्यत

दर्पणव्याख्या

ज्ञातुमशक्यत्वेऽप्येकमात्रधर्मत्वेन सामान्यप्रत्यासत्त्या सुग्रहात् सर्वं सुस्थमिति । *पार्ष्टिक इति* । शाब्दबोधोत्तरकालिक इत्यर्थः । *अन्वय इति* तद्बोध इत्यर्थः । अरुणाधिकरणरीत्या सर्वेषां विभक्त्यर्थानां प्रथमं क्रियायामेवान्वयेन तत्र शुभ्रादिपदार्थान्वये विभक्तिजन्योपस्थितिसत्त्वात्तत्पक्षेऽपि नोक्तव्युत्पत्तेर्व्यभिचार इति भावः ।

SGDF

किञ्च 'राजपुरुषः' इत्यादौ सम्बन्धिनि, सम्बन्धे वा लक्षणा। नाद्यः, 'राज्ञः पुरुषः' इति विवरणविरोधात्, समाससमानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयो न स्यात्। नान्त्यः 'राजसम्बन्धरूपः पुरुषः' इति बोधप्रसङ्गात्।

प्रभा

इति विशेषणादपि अपर्य्याप्त्या कर्मत्वमादाय सैव विभक्तिरिति। अथवा 'कटोऽपि कर्म भीष्मादयोऽपि' इति पक्षान्तरेण समाहितम्। अत्र पक्षे विशेषणे पृथक् कर्मत्वशक्तिः, विशेष्ये च पृथक्, परन्तु द्रव्याभेदात् न पार्थक्येन शक्तिज्ञानम्। अत्र पक्षे विशेष्यविशेषणे परस्परमन्विते एव क्रियायां सम्बध्नीतः। नचैवं कारकाणां क्रियान्वयनियमभङ्गः, साक्षात् क्रियाजनकानां साक्षात्, द्रव्यद्वारा क्रियाजनकानां द्रव्यद्वारैव क्रियायामन्वय इति तत्तात्पर्य्यात्। तथाच प्रथमाया द्योतकतया 'शुभ्रस्तण्डुलः' इत्यत्रोक्तव्युत्पत्तेर्व्यभिचार एव। प्रकारतायां भेदसम्बन्धावच्छिन्नत्वनिवेशे तु दोषाभाव इत्यत आह—किञ्चेति।

दर्पणव्याख्या

ननु नामार्थयोरिति व्युत्पत्ते राजा पुरुषस्तण्डुलः पचतीत्यादौ राज्ञः स्वस्वामिभावसम्बन्धेन पुरुषे, तण्डुलस्य कर्मतासम्बन्धेन धात्वर्थपाकेऽन्वयवारणायाऽवश्यकत्वेऽपि तत्र राजा पुरुषः स्तोकं पचतीत्यत्राभेदसम्बन्धेनान्वयाद् व्यभिचारवारणायाभेदातिरिक्तसम्बन्धावच्छिन्नत्वं नामार्थनिष्ठप्रकारतायां निवेशनीयम्।

नच विशेषणविभक्तेरभेदार्थकतया निर्वाहः, कट एव कर्मेति भाष्यव्याख्यावसरे भीष्मादीनां स्वयमकर्मकत्वेऽपि विशेष्यसम्बन्धिविभक्त्यैव भीष्मादिपदोत्तरे भवितव्यम्, तदेकयोगक्षेमत्वात्। केवलानां च प्रातिपदिकानाम् "प्रत्ययः" "परश्च" इति नियमेन प्रयोगानर्हत्वात्। यथेश्वरसुहृदः स्वयं निर्धना अपि तदीयधनेनैव तत्फलभाजः, एवं गुणा अपीति "अनभिहित" सूत्रे वदता कैयटेन विशेषणविभक्तेः साधुत्वमात्रार्थकत्वं स्पष्टमेवोक्तम्। विभक्त्यर्थप्रातिपदिकार्थविशेष्यकनामा(पुरुषा)दिप्रकारकबोधस्य समानाधिकरणविशेष्यविशेषणभावस्थलेऽननुभवाच्च। अत एव व्युत्पत्तौ भेदेनेति पठ्यते। तथाच तत्पक्षे लक्ष्यार्थराजसम्बन्धिनः पुरुषादावन्वयो नानुपपन्नोऽत आह—*किञ्चेति*। *विवरणविरोधादिति*।

अत्र वदन्ति—विग्रहस्य विव्रियमाणसमानाऽर्थकत्वम्, नाविव्रियमाणजन्यबोधे यद्यद्विशेष्यकत्वे सति यत्तत्प्रकारकबोधजनकत्वं तत्तद्विशेष्यकतत्तत्प्रकारकबोधजनकत्वम्, प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासविग्रहत्वानुपपत्तेः, पचति, व्याकरणमधीते इत्यादीनां पाचको वैयाकरण इत्यादिकृत्तद्धितान्तविग्रहत्वानापत्तेश्च, तत्र विग्रहविगृह्यमाणजबोधविषयपदार्थानां विशेष्यविशेषणभावविपरीतत्वात्। नापि तज्जन्यबोधीयावद्विषयविषयकबोधजनकत्वम्, पुरुषस्य राजेत्यस्यापि राजपुरुषादिविग्रहत्वापत्तेः। किन्तु विव्रियमाणजबोधजनकत्वं तद् वाच्यम्। प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासजबोधविषयाः परस्परसम्बन्धतात्पर्य्यविषयीभूताश्च यावन्तः पदार्था उदकादयस्तावद्विषयकबोधजनकत्वम्। घटकीया कर्मतेत्येतावन्मात्रस्य घटकर्मकानयनकृतिरिति विग्रहत्ववारणाय यावदिति। राज्ञः पुरुषः सुन्दर इत्याधिकाऽवगाहिनो राजपुरुष इति विग्रहत्वमिष्टमेव।

वस्तुतस्तु शक्तिग्रहणार्थं प्रयुज्यमाने तस्मिन्नतात्पर्य्यविषयार्थकपदप्रयोगदौर्लभ्यमेव। पुरुषस्य राजेत्यादेस्तु विग्रहत्ववारणाय तात्पर्य्यविषयत्वं विशेषणम्। तत्र पुरुषः प्रतियोगी न, घटः कर्मत्वमित्यादिसमुदायस्य घटकर्मकानयेत्यादिविग्रहत्वम्। कुम्भं करोतीत्यादीनां तु कर्तृलाक्षणिकानामेव न्यायनये कुम्भकारादिविग्रहत्वम्। प्रकृते च राजपुरुष इत्यादित्वस्य राज्ञः पुरुष इति वाक्ये अज्ञतत्वान्न तस्य विग्रहत्वानुपपत्तिरिति।

अन्यथेति समानाऽर्थकत्वाभावे इत्यर्थः। *तस्मात्* विग्रहवाक्यात्। *न स्यादिति* तत्समानाऽर्थकवाक्यस्यैव तच्छक्तिनिर्णायकत्वादिति भावः। सम्बन्धलक्षणाकल्पं दूषयति—*नान्त्य इति* नीलोत्पलादिसमास-

विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे। अत एव "वषट्कर्त्तुः प्रथमभक्षः" इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तम्,

प्रभा

विरुद्धविभक्तिरहितेति—विरुद्धविभक्तित्वञ्च—विशेष्यवाचकपदोत्तरविभक्त्यर्थभिन्नार्थकविभक्तित्वम्। तादृशविभक्तिरहितत्वं राजशब्देऽस्तीत्यभेदान्वयापत्तिरिति भावः। अत एव=समासे एकार्थीभावस्वीकारादेव। वषट्कर्त्तुरिति—'ऋत्विजो हविश्शेषं भक्षयन्ति' इति वाक्यान्तरेण प्राप्तं भक्षणमनूद्य 'वषट्कर्तुः प्रथमभक्षः' इति श्रुत्याऽप्राप्तं प्राथम्यं विधीयते। वषट्=देवतोद्देशेन हविस्त्यागसम्बन्धी मन्त्रविशेषस्तं करोतीति वषट्कर्ता। वषणनामकमन्त्रोच्चारयिता होतृविशेषस्तस्यैव प्रथमं भक्षणमिति पूर्वपक्षे सिद्धान्तितम्। यदि भक्षणमनूद्य प्राथम्यं विहितं स्यात्तदा यो भक्षो वाक्यान्तरेण प्राप्तः स वषट्कर्तुः प्रथम इति विच्छिद्य=वाक्यं

दर्पणव्याख्या

संग्रहाय समानविभक्तिकेत्यपहायोक्तम्—* विरुद्धविभक्तिरहितेति * विरुद्धविभक्तिकधातुप्रातिपदिकार्थयोः 'स्तोकं पचति' इत्यादावभेदाऽन्वयदर्शनादाह—* प्रातिपदिकार्थयोरिति * तथाचाभेदसंसर्गावच्छिन्नप्रातिपदिकार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विरुद्धविभक्तिरहितपदजन्योपस्थितेर्हेतुतया तस्या राजपुरुष इत्यादिसमासोत्तरपदार्थे पुरुषादौ सत्त्वादभेदाऽन्वयो दुर्वार इति भावः।

ननु विरुद्धविभक्तिराहित्यं व्याससमाससाधारणम्, न विशेष्यवाचकपदस्य विशेषणवाचकपदाऽप्रकृतिकविभक्त्यप्रकृतित्वम्, नीलघटमानयेत्यादावभावात्। नापि विशेषणवाचकपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वम्, विशेष्यपदाप्रकृतिकत्वस्य तदनुत्तरत्वस्य तदुत्तरत्वेनाऽप्रतिसन्धीयमानत्वस्य वा नीलो घट इत्यादौ नीलपदोत्तरविभक्तौ घटादिपदोत्तरविभक्तिभिन्नायां सत्त्वेन तत्राभेदान्वयानुपपत्तेरिति चेत्,

अत्र केचित्—विशेषणपदे विशेष्यवाचकपदप्रकृतिकविभक्तिसजातीयभिन्नविभक्त्यप्रकृतिकत्वमेव विरुद्धविभक्तिराहित्यम्। साजात्यञ्च प्रथमात्वादिना सुत्वादिना वा, नीलो घट इत्यादौ विशेषणविभक्तेर्विशेष्यविभक्तिभिन्नत्वेऽपि तत्सजातीयभिन्नत्वाभावेनोक्तविरुद्धविभक्तिराहित्यस्य तत्राक्षतत्वादिति।

वस्तुतस्तु विशेषणविभक्तेः साधुत्वमात्रार्थकत्वमिति मते विशेष्यवाचकपदोत्तरविभक्तिविरुद्धत्वं स्वार्थभिन्नार्थकत्वम्। नीलो घट इत्यादौ विशेषणविभक्तेर्निरर्थकतया तत्र विशेष्यविभक्तिविरुद्धार्थकविभक्तिर्द्वितीयादिरूपैव, तदप्रकृतित्वस्य, विशेषणवाचकपदे सत्त्वान्न तदसंग्रहः। एवं नीलघटमानयेत्यादिसमस्तस्थले विशेषणविभक्तेरेवाभावेन तादृशविभक्त्यप्रकृतित्वं विशेषणवाचकपदस्याव्याहतम्। अत एव चैत्रस्य सुतस्य धनमित्यादौ नाभेदान्वयाऽऽकाङ्क्षा। तत्र विशेषणविशेष्यविभक्त्योर्विभिन्नसम्बन्धार्थकत्वात्। नापि स्तोकमत्तीत्याद्यसङ्ग्रहः। पूर्वकल्पे तु विशेषणवाचकविभक्तेस्तिङ्विजातीयत्वेनोक्ताकाङ्क्षायास्तत्रासत्त्वेन तदसङ्ग्रहः स्पष्ट इव।

सारे, प्रातिपदिकार्थयोरिति प्रकृताभिप्रायेणैव। तथाचोक्तविरुद्धविभक्त्यप्रकृतिप्रातिपदिकार्थनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे धातुप्रातिपदिकान्यतरजन्योपस्थितिः कारणमित्यर्थः फलित इति।

ननु पूर्वनिरुक्तविरुद्धविभक्तिराहित्यस्याभेदान्वयबोधाकाङ्क्षत्वे चैत्रस्य सुतस्य धनमित्यादौ तदापत्तिरत आह—*प्रपञ्चितमिति* विभक्त्यर्थमन्तर्भाव्य नामार्थान्वय एवोक्तव्युत्पत्तिरिति तत्रोक्तम्। तस्यापि सार्थकविभक्त्यप्रकृतित्वमपि विशेषणवाचकपदे निवेशनीयमत्र तात्पर्य्यम्। मीमांसकैरपि विशिष्टशक्तिपक्षाऽभ्युपेय इत्याह—* अत एवेति * समासे एकार्थीभावस्य सर्वसम्मतत्वादेवेत्यर्थः। *भक्षमुद्दिश्येति* "ऋत्विजो हविःशेषान् भक्षयन्ति" इति विहितभक्षणमनूद्येत्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

एकप्रसरताभङ्गापत्तेरिति तृतीये—"त्र्यङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन त्रित्वविधान

प्रभा

भित्त्वाऽन्वयो वाच्यः, स न सम्भवति 'प्रथमभक्षः' इति समासानुपपत्तेः। यथा 'पण्डितो ब्राह्मणः' इत्युक्ते यः पण्डितः स ब्राह्मण इति प्रतीयते। तथा 'पण्डितब्राह्मणः' इति समासेन न प्रतीयते। अत एव समासे विधेयाविमर्शस्य दोषत्वमुक्तमालङ्कारिकैः।

तदुक्तम्—एकप्रसरताभङ्गापत्तेरिति—एकप्रसरता=मिलितार्थबोधजनकतारूपा एकार्थीभावात्मिका शक्तिः तस्या भङ्गस्तद् बाधरूपो यो वाक्यभेदस्तस्यापत्तेरित्यर्थः। उद्देश्यविधेयभावस्यानेकपदसाध्यत्वमेव, नैकपद साध्यत्वमिति भावः। यच्छब्द-तच्छब्दयोः साकाङ्क्षत्वेन सामर्थ्याभावात् समासाप्राप्तेः। तथाच विशिष्टस्य (प्राथम्यविशिष्टभक्षणस्य) विधानमिति। तृतीये=पूर्वमीमांसायास्तृतीयेऽध्याये तृतीये पादे दशमाधिकरणे त्र्यङ्गैरिति—'पशौ हृदयस्याग्रेऽवद्यति' इत्यादिश्रुत्या एकादशानामङ्गानाम्=जिह्वाद्यङ्गानां होमस्य विधानेन 'प्रकृतिवद्विकृतिः कर्त्तव्या' इत्यतिदेशवाक्येन विकृतियागेऽपि एकादशानामङ्गानां होमे प्राप्ते तदङ्गमनूद्य त्रित्वं विधीयते इति पूर्वपक्षे एकप्रसरताभङ्गभिया=विशिष्टार्थविषयकैकोपस्थितिजनकताया बाधरूपो यो वाक्यभेदरूपो भङ्गस्तद्भिया त्रित्वविशिष्टाङ्गान्तरं विधीयते इति निर्णीतम्—पूर्वमीमांसायां दशमाध्याये तृतीयपादे।

समासेऽपि पृथगुपस्थितिस्वीकारे मीमांसकोक्त उद्देश्यविधेयभावनिरासो विरुद्ध्येतेति भावः। एकादशाङ्गानि—हृदयम्, जिह्वा, वक्षः, यकृत्, वृक्कौ, सव्यं दोः, उभे पार्श्वे, दक्षिणा श्रोणिः, गुदम्, इति। नच तच्छब्दयोगाभावात्प्राथम्यस्य विधेयताशङ्का अयुक्ता, यत्तच्छब्दयोरुद्देश्यविधेयभावनिर्णायकत्वस्योपलक्षणत्वात्। अन्यथा प्रथमो देवदत्त इत्यनेनापि उद्देश्यविधेयप्रतीतिर्न स्यात्। नच विधेयताया विशेष्यनिष्ठतया 'इको यणचि' इत्यादिसूत्रेषु दृष्टत्वेनेदमसङ्गतम्, अज्ञातस्यैव विधेयत्वमिति नियमेन विशेष्ये इव विशेषणेऽपि तत्सम्भवात्। अत एव 'प्रथमो देवदत्तः' इत्यत्र विशेषणेऽपि प्राथम्ये विधेयत्वप्रतीतिः। परे तु 'लोहितोष्णीषाः ऋत्विजः सञ्चरन्ति' 'सप्तदशारत्निर्वाजपेयस्य यूपो भवति' इत्यादिषु समस्तेष्वपि उष्णीषयूपारत्नी अनूद्य लोहितत्वसप्तदशत्वयोर्विधेयत्वस्य मीमांसायां सिद्धान्ततया समस्तप्रयोगेऽपि प्राप्ताप्राप्तादिपर्यालोचनया उद्देश्यविधेयभावः प्रतीयत एव। अत एवालङ्कारिकैरपि समासस्थले विधेयाविमर्शस्य दोषत्वे बीजं विलम्बेन प्रतीतिः, सद्धृदयोद्वेगो वेत्येवोक्तम्। नतूद्देश्यविधेयभावाप्रतीतिरिति। एवञ्चास्य प्रमाणत्वेनोपन्यसनं विफलमेवेत्याहुः।

[illegible] तदारुण्यगुणकनात परिच्छेदकत्वेन तदन्वया

[illegible]ति 'शाक्त[illegible]द्धान्तभङ्गापत्तेरित्यपि बोध्यम्। तदेवाह—प्रपञ्चितमिति। उपसंहरात[illegible]मिनीयैरिति वदता[illegible]पथायिकमतस्य सयुक्तिकत्वं ध्वन्यते ॥ ३५ ॥

समानार्थत्वानुरोधादिति समानार्थत्वञ्च व्यास-समासयोः समानविशेष्यप्रकारकबोधजनकत्वं तदनुरोधा[illegible]र्थः। उक्तविग्रहवाक्यान्तर्गतराजशब्दस्य सम्बन्धिनि लाक्षणिकत्वान्न विग्रहत्वक्षतिः, सम्बन्धार्थकषष्ठ्यन्तस्य तु सम्बन्ध[illegible]कबोधजनकत्वान्न विग्रहत्वमेवं चित्रा गावो यस्यैत्यादेरपीत्याशयं प्रकाशयति—यद्यपीत्यादि मीमांसका इत्यन्तेन। [illegible]ग्राह्यभ्यते इति* तेन हि "शेषो बहुव्रीहिः (पा० सू० २।२।२३) इत्यधिकारात् प्रथमात्रिकस्य द्वितीया[illegible]त्यादिनाऽनुक्तस्य समासो विधीयते। यद्यपि "विशेषणं विशेष्येण (पा० सू० २।१।५७) इत्यादिना तस्यापि [illegible]स उक्त एव तथापि नासौ प्रथमाशब्देनोल्लिखित इति तत्त्रिकस्य शेषत्वमविकलमिति भावः।

उक्तस्यैवेति। चित्राणां गवामयमित्यादेरेवेत्यर्थः। एवकारेण प्रथमान्तचित्रादिपदघटितस्य व्यवच्छेदः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Foundation

* एकप्रसरताभङ्गापत्तेरिति * उद्देश्यविधेयभावेनान्वये पृथगुपस्थितेर्नियामकत्वेन तदनुरोधेन तदभ्युपगमे विशिष्टाऽर्थोपस्थितिजनकत्वरूपैकप्रसरताभङ्गापत्तेरित्यर्थः । तैर्विशिष्टशक्त्यनभ्युपगमेऽपि विशिष्टलक्षणाया अभ्युपगमेनैकप्रसरतायास्तन्मतसिद्धत्वात् । नचोद्देश्यतयाऽन्वये यच्छब्दयोगप्राथम्यादीनाम्, विधेयतयान्वये च तच्छब्दयोगादीनां तन्नतया तत्र तदभावात् कथं तदापादानमिति वाच्यम्, सति तात्पर्ये प्रथमो भक्षः, पण्डितो ब्राह्मण इत्यादावुद्देश्यविधेयभावेन बुद्धेरानुभविकतया यच्छब्दयोगादीना प्रायिकत्वात् । तादृशशाब्दबोधे अक्षमत्वपदजन्योपस्थितेर्हेतुता तु न, दामोदरः पूज्यः, राजपुरुषः सुन्दर इत्यादितस्तथाबोधानुपपत्तेः, तत्र च प्राथम्यविशिष्टं भक्षणान्तरमेव विधीयते शब्दवृत्त्या, ततश्च प्राप्ताप्राप्तविवेकेन प्राथम्यविधिः पर्यवस्यतीति सिद्धान्तादिति भावः ।

त्र्यङ्गैरिति । तत्र हीज्याशेषभूतत्रिष्वविशिष्टयत्किञ्चिदङ्गविधानम्, किं वा नित्यविशिष्टाशेषाङ्गविधानमिति संशये

SGDF
Sri Gargeshwari Digital Foundation

न युक्तम्, एकप्रसरताभङ्गापत्तेरिति दशमे च निरूपितं सङ्गच्छते, सङ्गच्छते चारुणाधिकरणारम्भः।

अन्यथा "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्रारुण्यपदवदितरयोरपि एकाब्दत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेदशङ्काया असम्भवादिति प्रपञ्चितं भूषणे।

प्रभा

वस्तुतस्तु 'लोहितोष्णीषा ऋत्विजः सञ्चरन्ति' इत्यादावपि शब्दतो विशिष्टस्यैव विधानम्। प्राप्ताप्राप्तविवेकन्यायेन तु मानसबोधविषयीभूता विधेयता लोहितत्वे, सप्तदशत्वे च पर्य्यवस्यति। इत्थञ्च समस्तपदेनापि उद्देश्यविधेयप्रतीतिसमर्थनं साहसमात्रम्। आलङ्कारिकाणामपि मानसबोधमादायैव तत्र तत्र तादृशोक्तिरिति गुरवः। मञ्जूषायां भूषणे च विस्तरेण निरूपितम्।

इत एव वाऽरुचेराह—सङ्गच्छते चेति—'अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति' इति श्रूयते। अत्र संशयः—किमरुणिमा वाक्याद् भिन्त्वा प्राकरणिकेषु सर्वद्रव्येषु सम्बध्नाति, उत क्रीणातिना सम्बन्धमनुभूय साक्षात्क्रयणाङ्गत्वस्यासम्भवादेकहायन्यां सम्बध्नाति, इति सन्देहे अमूर्त्तत्वेनारुण्यस्य क्रयणे करणत्वासम्भवात् प्रकरणकल्पितश्रुत्यनुमितैकदेशनिष्पन्नेन 'अरुणिम्ना प्रकृतापूर्वसाधनीभूतद्रव्यपरिच्छेदं भावयेत्' इति वाक्येन प्राकरणिकसर्वद्रव्याङ्गत्वं प्राप्नोति इति पूर्वपक्षे 'वह्निना सिञ्चति' इत्यनेनापि बोधदर्शनाद् योग्यताज्ञानं न शाब्दबोधे कारणम्, अपि तु अयोग्यतानिश्चयस्याप्रमात्वग्राहकत्वमात्रम्, इत्ययोग्यतानिश्चयाभावे आरुण्यस्यापि क्रयणान्वयबोधः। पार्ष्टिकस्तु स्ववाचकपदघटितवाक्योपात्तैकहायन्यादिद्रव्ये सम्बन्धः। अत्र समासे विशिष्टशक्त्यस्वीकारे पूर्वपक्षासङ्गतिः। पिङ्गाक्ष्येकहायनीशब्दयोरपि पिङ्गाक्षीसम्बन्धैकहायनीसम्बन्धमात्रवाचकतया अमूर्त्तत्वेन क्रयणकरणत्वासम्भवात् त्रयाणामपि लाक्षणिकत्वसाम्येन बहुव्रीह्योरेव द्रव्याभिधायकत्वं नारुण्यस्येत्यत्र प्रमाणाभावात्तदसङ्गतिः।

दर्पणव्याख्या

प्रकृताविज्याशेषेण पुरोडाशेन स्विष्टकृतो हुतत्वादत्रापि शेषभूतत्रित्वविशिष्टाङ्गैरेव स्विष्टकृद्हवनं युक्तमिति पूर्वपक्षे, शेषभूतानि कानिचिदङ्गान्यनूद्य त्रित्वविधाने एकप्रसरताभङ्गापत्तिस्तस्मात् कल्पसूत्रोक्तत्रित्वविशिष्टाङ्गान्तरविधानमिति निर्णीतं दशमाध्यायस्य तृतीये पादे इत्यर्थः। कल्पसूत्रोक्तानि हृदयाद्येकादशाङ्गानि तु-हृदयम् १, जिह्वा २, वक्षः ३, यकृत् ४, वृक्कौ ५। सव्यं दोः ६, ७, उभे पार्श्वे ८। [illegible] श्रोणिः १० गुदम् ११, इति। तत्र त्रीणि—दक्षिणोंऽसः, सव्या श्रोणिः, गुदं तृतीयमिति। [illegible] तम्। अत एव चैत्रस्य सुतस्य धनमित्यादा[illegible] [illegible]नामन्नसम्बन्धार्थकत्वात्। नापि स्तोकमत्तीत्याद्यसङ्ग्रहः। पूर्वकल्पे तु वि[illegible] [illegible]स्तङ्-विजातीयत्वनोक्ताकाङ्क्षायास्तत्रासत्त्वेन तदसङ्ग्रहः स्पष्ट इव।

सारे, प्रातिपदिकार्थयोरिति प्रकृताभिप्रायेणैव। तथाचोक्तविरुद्धविभक्त्यप्रकृतिप्रातिपदिकार्थनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे धातुप्रातिपदिकान्यतरजन्योपस्थितिः कारणमित्यर्थः फलित इति।

ननु पूर्वनिरुक्तविरुद्धविभक्तिराहित्यस्याभेदान्वयबोधाकाङ्क्षत्वे चैत्रस्य सुतस्य धनमित्यादौ तदापत्तिरत आह—***प्रपञ्चितमिति*** विभक्त्यर्थमन्तर्भाव्य नामार्थान्वय एवोक्तव्युत्पत्तिरिति तत्रोक्तम्। तस्यापि सार्थकविभक्त्यप्रकृतित्वमपि विशेषणवाचकपदे निवेशनीयमत्र तात्पर्य्यम्। मीमांसकैरपि विशिष्टशक्तिपक्षाऽभ्युपेय इत्याह—*** अत एवेति *** समासे एकार्थीभावस्य सर्वसम्मतत्वादेवेत्यर्थः। ***भक्षमुद्दिश्येति*** "ऋत्विजो हविःशेषान् भक्षयन्ति" इति विहितभक्षणमनूद्येत्यर्थः।

Sri Gargeshwari Digital Foundation

तस्मात् समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः ॥ ३५ ॥

'राजपुरुषः' इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः। चित्रगुरित्यादौ चित्राणां गवामयमित्येव, समानार्थत्वानुरोधात् यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति "शेषो बहुव्रीहिः" (पा० सू० २।२।२३) इति सूत्राल्लभ्यते इति प्रथमान्तम्, पक्षे वाक्यम्—चित्रा गावो यस्येत्येवं सम्भवत्येव। "षष्ठी" (पा० सू० २।२।८) इति समासविधानात् 'राज्ञः पुरुषः' इति च पक्षे वाक्यं वाक्यम्। तथापि तस्य न विग्रहत्वम्, भिन्नार्थत्वात्, किन्तूक्तस्यैवेति मीमांसकास्तान् प्रसङ्गादिदं स्मरति

प्रभा

तस्मात्=अरुणाधिकरणविरोधात् ॥ ३५ ॥

ननु समासादौ समुदायशक्तिनिरूपणानन्तरं 'आख्यातं तद्धितकृतोः' इति कारिका उक्ता, सा च पूर्वग्रन्थसङ्गतिरहितेति आशङ्कानिराकर्तुमाह—राजपुरुष इति। राजा चेति—राजपदं राजसम्बन्धिनि लाक्षणिकम्। तथाच 'राजा चासौ पुरुषश्च' इति 'वाक्येन राजसम्बन्ध्यभिन्नः पुरुषः' इति बोधात् वृत्तिसमानार्थकत्वरूपविग्रहत्वमुपपन्नम्। एवेन 'राज्ञः पुरुषः' इत्यस्य विग्रहत्वनिरासः। ननु यदा राजपदं राजसम्बन्धिनि लाक्षणिकं षष्ठी चाभेदार्थिका साधुत्वमात्रार्थिका वा तदा 'राज्ञःपुरुषः' इत्यस्यापि विग्रहत्वं सुवचमिति चेन्न, षष्ठ्यर्थाभेदस्य प्रकारविधयाऽपि भानसम्भवेन वृत्तौ अभेदस्य प्रकारत्वाभावेन विग्रहत्वासम्भवात्, अभेदे साधुत्वमात्रे वा षष्ठीविधायकशास्त्राभावस्य पूर्वमुक्तत्वाच्च। इत्येवेति—विग्रह इति शेषः। समानार्थत्वञ्च—तुल्यविशेष्यप्रकारकप्रतीतिजनकत्वरूपम्। शेष इति—प्रथमान्तमित्यर्थः, यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्यर्थात्। भिन्नार्थत्वादिति—'राजपुरुषः' इति समासाद् राजसम्बन्धिप्रकारकाभेदसंसर्गकबोधः। 'राज्ञः पुरुषः' इति वाक्याद् राजसम्बन्धप्रकारकस्वरूपसंसर्गको बोध इति भेदान्न विग्रहत्वं तस्येति भावः। एवं चित्रगुरिति समासात् चित्राभिन्नगोस्वामीत्याकारकस्य वर्तिपदार्थप्रकारकस्य, चित्रा गावो यस्येति वाक्याद् यत्स्वामिकचित्राभिन्नगव्य इति वर्तिपदार्थविशेष्यकस्य बोधस्य दर्शनाद् भिन्नार्थत्वादित्यर्थः। उक्तस्यैवेति—राजा चासावित्यादेरुक्तस्यैवेत्यर्थः।

दर्पणव्याख्या

सम्भवति। अमूर्त्तत्वेन क्रियाभिः कारकत्वेन द्रव्यैः सममपि सम्बन्धासम्भवात्। नच तृतीयया ज्योतिष्टोमकरणीभूतप्राकरणिकद्रव्याण्यनूद्य यत् कर्त्तव्यं तदारुण्यगुणकेनेति परिच्छेदकत्वेन तदन्वयो नासम्भावित इति वाच्यम्, तथा सति 'शक्तिः 'कारकम्' इति सिद्धान्तभङ्गापत्तेरित्यपि बोध्यम्। तदेवाह—प्रपञ्चितमिति। उपसंहरति—*तस्मादिति*। जैमिनीयैरिति वदता नैयायिकमतस्य सयुक्तिकत्वं ध्वन्यते ॥ ३५ ॥

समानार्थत्वानुरोधादिति समानार्थत्वञ्च व्यास-समासयोः समानविशेष्यप्रकारकबोधजनकत्वं तदनुरोधादित्यर्थः। उक्तविग्रहवाक्यान्तर्गतराजशब्दस्य सम्बन्धिनि लाक्षणिकत्वान्न विग्रहत्वक्षतिः, सम्बन्धार्थकषष्ठ्यन्तस्य तु सम्बन्धप्रकारकबोधजनकत्वान्न विग्रहत्वमेवं चित्रा गावो यस्येत्यादेरपीत्याशयं प्रकाशयति—यद्यपीत्यादि मीमांसका इत्यन्तेन।

सूत्राल्लभ्यते इति तेन हि "शेषो बहुव्रीहिः (पा० सू० २।२।२३) इत्यधिकारात् प्रथमात्रिकस्य द्वितीयान्तेत्यादिनाऽनुक्तस्य समासो विधीयते। यद्यपि "विशेषणं विशेष्येण (पा० सू० २।१।५७) इत्यादिना तस्यापि समास उक्त एव तथापि नासौ प्रथमाशब्देनोल्लिखित इति तत्त्रिकस्य शेषत्वमविकलमिति भावः।

उक्तस्यैवेति। चित्राणां गवामयमित्यादेरेवेत्यर्थः। एवकारेण प्रथमान्तचित्रादिपदघटितस्य व्यवच्छेदः।

SGDF Sri Gurudev Ogdal Foundation

आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम् ।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः ॥ ३६ ॥

तद्धितकृतोर्यत्किञ्चिदर्थबोधकं विवरणमाख्यातम्, तत्र विपर्य्ययो दृष्टः । तथाहि—'आक्षिकः' कुम्भकारः इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भोत्पत्त्यनुकूलव्यापाराश्रय इति बोधः । 'अक्षैर्दीव्यति' कुम्भं करोति इत्यत्राक्षकरणिका देवनानुकूला भावना, कुम्भोपत्त्यनुकूला भावनेति बोधः । कृत्प्रत्यये कारकाणाम्, आख्याते च भावनायाः प्राधान्यं वदतो मीमांसकस्यापि गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य, 'चित्रा गावो यस्य' इत्यादेर्विग्रहत्वे बाधकमस्तीति भावः ॥ ३६ ॥

प्रभा

आख्यातमिति—तिङन्तमित्यर्थः । तच्च तिङन्तघटितविवरणपरम् । तथाच 'अक्षैर्दीव्यति' इत्याद्याकारकं तिङन्तघटितं विवरणमित्यर्थः । यत्किञ्चिदिति इदमीषदर्थेऽव्ययम् । यत्किञ्चिदर्थस्य=ईषदर्थस्य । उपदर्शकम्=बोधकम् । गुणेति—विशेष्यविशेषणभावादावित्यर्थः । तत्र=तद्धितकृतोः । आक्षिक इति—'तेन दीव्यति' इति कर्तरि ठक् । कुम्भकार इति—'कर्मण्यण' इति कर्तरि अण् । भावनेति—'भावप्रधानमाख्यातम्' इति सिद्धान्तादिति भावः । तद्धितकृतोरर्थबोधकवाक्ये गुणप्रधानभाववैपरीत्यसत्त्वेऽपि विवरणत्वव्यवहारवत् चित्रा गावो यस्येति वाक्येऽपि विवरणत्वसम्भवादिति भावः । तथाच वृत्तिजन्यबोधसमानविषयकबोधजनकत्वमेव विग्रहत्वम्, नतु वृत्तिजन्यबोधीयप्रकारताविशेष्यतासमानप्रकारताविशेष्यताकबोधजनकत्वम् । किञ्च चित्राणां गवामयमिति विग्रहो भाष्यवार्तिकादिविरुद्धः । तथाच भाष्यवार्तिकम्—'मत्वर्थे बहुव्रीहिः' 'कर्तृकर्मवचनेनाप्रथमाया अप्रथमाविभक्त्यर्थे बहुव्रीहिः 'शेषो बहुव्रीहिः' इति । नचालौकिके प्रथमान्तानामेव निवेश इति न भाष्यादिविरोध इति वाच्यम्, यद्विभक्त्यन्तानां लोके वाक्ये सन्निवेशस्तद्विभक्त्यन्तानामेव परिनिष्ठितानां लौकिके वाक्ये प्रवेशस्यौचित्यात्, नतु षष्ठ्यन्तानाम्, उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावात् । अन्ये तु 'तत्र दृष्टो विपर्य्ययः' इत्यस्यायमर्थः—कर्त्रादिमुख्यविशेष्यकबोधजनकत्वं विग्रहवाक्यस्य, भावनामुख्यविशेष्यकबोधजनकत्वं कृत्तद्धितादेरिति, तद्विपरीतविशेष्यविशेषणभावापन्नार्थविषयकबोधजनकत्वरूप एवात्र विपर्य्ययपदार्थो नत्वेकाधिकरणे, विशेष्यतादिविपर्य्ययसत्त्वेऽपि आख्यातादिरूपैकनिष्ठत्वाभावात् ।

अयम्भावः—विपर्य्ययो द्विधा—समानाधिकरणः, व्यधिकरणश्च । तत्राद्यः—'देवदत्तस्य स्वभावविपर्य्ययः' । द्वितीयः—'चैत्रस्वाभावान्मैत्रस्य स्वभावो विपरीतः' इति । तत्र द्वितीयविपर्य्यय एव वृत्तिविग्रहयोरिति प्रतीयते । परन्तु आद्य एवात्र विपर्ययः । तथाहि—लोके प्रयुक्तस्य 'अक्षैर्दीव्यति' इत्यादितिङन्तवा

दर्पणव्याख्या

उपदर्शकपदस्य विवरणम्—*अर्थबोधकमिति* । * आख्यातम् *=तिङन्तम् । तत्र तिङन्तघटिते विवरणे इत्यर्थः । व्यत्यासमेवाह—*तथाहीत्यादि* ।

ननु तत्रापि तिपः कर्त्तृलक्षकतयाऽक्षकरणव्यापाराश्रय इति बोधान्न समानार्थकत्वभङ्गोऽत आह—*कृत्प्रत्यये इति* । कारकाणाम्=कर्त्रादीनाम् । *प्राधान्यम्* मुख्यविशेष्यत्वम् । कारकाणां प्राधान्यम्, "प्रकृतिप्रत्ययार्थयोः" इति न्यायेन, भावनायास्तु "भावप्रधानमाख्यातम्" इति निरुक्तादिति भावः ॥ ३६ ॥

SGDF
Sri Gargeshwari Digital Foundation

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिः, 'अस्तु च तथाविग्रहस्तथापि षष्ठी तत्पुरुष-कर्मधाय शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादित्यत आह—

प्रभा

क्यस्य यथा भावनाविशेष्यकबोधजनकत्वम्, न तथा वृत्त्यर्थप्रदर्शकविग्रहवाक्यस्य, किन्तु तस्य तद्धित क-तोरिव कर्त्रादिविशेष्यबोधजनकत्वमेव। एवञ्च न वृत्तिविग्रहयोः समानार्थत्वभङ्ग इति। नन्वेवमेव पुञ्जराजेन व्याख्यातम्। तथाच 'आख्यातं तद्धित' इति कारिकायाम् 'गुरुर्घाह' इत्यादौ लोक-प्रयुक्तवृत्त्यर्थप्रदर्शकतिङन्तयोरेव वैपरीत्यं बोध्यते इति भावः। एतेन 'राज्ञः पुरुषः' इत्यादि विग्रह वाक्यस्य 'राजपुरुषः' इत्यादिवृत्तेश्च समानविशेष्यताप्रकारताकबोधजनकत्वं सर्वत्र सूचितम्। 'वृत्तावेकार्थीभावः' इति भाष्यविरोधः, लोके प्रयुक्तवाक्ये इति तदर्थात्। वृत्तावित्यस्य वृत्तिविषये=विग्रहे वृत्तौ च एकार्थीभाव इति च तदर्थाच्चेति भावः। अत एव 'तद्वहति रथयुग' इति सूत्रस्थं भाष्यं सङ्गच्छते। तथाहि—'रथादिभ्यः प्रत्ययविधानमनर्थकम्, तस्येति विहितत्वात्' इति। ननु 'रथं वहति' इत्यर्थे षष्ठ्य-न्तत्वाभावात् 'तस्येदम्' इति न स्यादितीदं भाष्यम् असङ्गतं स्यादिति चेन्न, 'रथस्य वोढा' इत्यर्थे आख्यातत्वा-र्थात्। अत एव 'वोढा' इति द्रव्यप्रधानम्' 'वहतीति क्रियाप्रधानम्' इत्याशङ्क्य 'य एवार्थो रथं वहति, एव रथस्य वोढेति' इति सूत्रवैयर्थ्यं समर्थ्य 'द्विरथ्यः' इत्यत्र प्राग्दीव्यतीयत्वाभावाल्लुङ् मा भूदिति—न्तरमुक्तम्। 'य एव रथं वहति' इति भाष्यस्य विग्रहवाक्यात्मकस्येत्याशयः। अन्यत्र तु भावप्रधानस्य तस्येति भाव इत्याहुः ॥ ३६ ॥

तथाविग्रहः=चित्रा गावो यस्येत्याद्याकारकः। शक्तिमत्त्वेति—एकार्थीभावात्मिकायाः शक्तेरुभ-तुल्यत्वादित्यर्थः। निषादेति—विप्रात् शूद्र्यां जातो निषाद इत्युच्यते। तदुक्तम्—

विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्।
अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि च ॥ इति

स्थपतीति—स्थपतिः=शिल्पी, राजा वा। तदुक्तम्—

स्थपतिः कारुभेदेऽपि भूभृद् भूमिधरे नृपे ॥ इति ॥

सिद्धान्तसिद्धिरिति—सिद्धान्तस्य=प्रमाणैर्निश्चितार्थस्य सिद्धिः=अनुष्ठानोपयोगिनी निष्पत्तिः। तत्र हि। 'निषादस्थपतिं याजयेत्' इत्यत्र निषादस्थपतिशब्दः किं कर्मधारयः, उत षष्ठीतत्पुरुषो बहुव्रीहिर्वा इत्याशङ्क्यते, निषादस्थपतिशब्दः कर्मधारयः, लक्षणाविरहात्। ननु तत्पुरुषादिस्तत्र, लक्षणाऽऽश्रयणे गौरवादिति तत्रेदम्यः, सिद्धान्तस्तत्सिद्धिरेकार्थीभावस्वीकारे न स्यादुभयत्र शक्तिमत्त्वाविशेषेण कुत्रापि लक्षणाया अभावात्" भावः। ननु निषादस्थपतिः शूद्रस्तस्य वेदेऽनधिकाराद् याजनासम्भव इति चेन्न, विधिसामर्थ्याद् याजनम्। एवञ्च व्यध्ययनस्य कल्पनात्। नच गौरवम्, फलमुखगौरवस्यादोषत्वात्। फलम्=लाघवादिरूपं मुख्यं राजदन्ता-यत्र तादृशगौरवस्यादोषत्वादित्यर्थः। वादिविचारस्तु

दर्पणव्याख्या

* शक्तिमत्त्वाविशेषादिति * शक्तिमत्त्वमेकार्थीभावः। * सिद्धान्तसिद्धिरिति * सिद्धान्त-र्थस्य सिद्धिः=अनुष्ठानोपयोगार्हत्वमित्यर्थः। तथाहि—"निषादस्थपतिं याजयेत्" इति श्रूयते। तत्र निषा-ष्ठीतत्पुरुष, बहुव्रीहिर्वा, उत कर्मधारय इति संशये, कर्मधारयेऽपूर्वविद्याध्ययनकल्पनागौरवाद् बहुव्रीहि-गौरवाल्लाघवात् षष्ठीतत्पुरुष एवेति पूर्वपक्षे, तत्पुरुषस्यापि पूर्वपदलाक्षणिकतया कर्मधारया-

SGDF
Sri Gargeshwari Digital Foundation

पर्यवस्यच्छाब्दबोधाविदूराक्क्षणस्थितेः ।
द्वान्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥ ३७ ॥

पर्यवस्यन्नासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्क्षणश्च तदानीन्तनलाघवमादायाधिकरणा-

प्रभा

पर्यवस्यन्=पर्यवसन्नं भवन् । तदानीन्तनेति—समासजन्यशाब्दबोधाव्यवहितप्राक्क्षणवृत्तिशक्तिग्रहनिष्ठान्तरङ्गबहिरङ्गभावचिन्तनमादायेत्यर्थः । निषादस्वामिक इति—निषादः स्थपतिः स्वामी यस्येति बहुव्रीहिपक्षे पुंस्कान्तरे इत्यर्थः । तत्कल्पनायाम्=तात्पर्यकल्पनायाम् । पूर्वोपस्थितार्थ इति—समासशक्तिग्रहात् प्राक्पदद्वयेन उपस्थितेः निषादरूपस्थपतौ एवेत्यर्थः । लाघवादिति—षष्ठीतत्पुरुषशक्तिग्रहस्य षष्ठ्यर्थसम्बन्धरूपाधिकविशेषणत्वेन बहुव्रीहेश्चान्यपदार्थरूपाधिकविषयकत्वेन तदपेक्षया पूर्वोपस्थितवर्तिपदार्थमात्रापन्नत्वेन कर्मधारयशक्तिग्रहे तात्पर्यकल्पने लाघवमिति भावः । जैमिनिनाप्युक्तम्—'स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्' इति । निषादाभिन्नस्थपतिरेव निषादस्थपतिपदबोध्यः, अन्तरङ्गत्वेन तथाविधेऽर्थे शीघ्रोपस्थितिजनकत्वानुकूलशक्तिरूपसामर्थ्यादित्यर्थः । ननु मीमांसकमते समासे नानाशक्तेरभावात् कथं

दर्पणव्याख्या

कर्मधारय एव । अपूर्वविद्याध्ययनस्योत्तरकालकल्प्यत्वेन तादृशगौरवस्य फलमुखतया अदोषत्वादिति सिद्धान्तितम्, तद् विरुद्ध्येत, भवन्मते तत्पुरुषस्वीकारेऽपि गौरवानवकाशादिति भावः ।

* तदानीन्तनेति * तादृशवाक्यजन्यशाब्दबोधाव्यवहितप्राक्क्षणवृत्तिशक्तिग्रहनिष्ठान्तरङ्गबहिरङ्गभावचिन्तनयुक्तलाघवमादायेत्यर्थः । तदेव विशदयति—*अयम्भाव इति* । निषादरूप इति* स्थपतावित्यनेनान्वितम् । निषादानामिति* । निषादसम्बन्धिस्थपतावित्यर्थः । तत्र षष्ठ्यर्थसम्बन्धान्तर्भावेणैकार्थीभावाभ्युपगमात् । *निषादस्वामिक इति* । स्थपतिशब्दस्य स्वाम्यर्थकतया निषादाभिन्नस्वामिके पुंसीत्यर्थः । तत्रान्यपदार्थान्तर्भावेण समुदायशक्तिविशेषात् 'नानार्थे' इत्यस्य वृत्त्यानेकार्थोपस्थितौ जातायामिति शेषः । 'न्यायेन' इत्यस्य क्व तात्पर्य्यमिति सन्देहे सति । तात्पर्य्यकल्पनायाम्=तात्पर्य्यकल्पनायाम् । * पूर्वोपस्थितार्थ एवेति * । समासघटकप्रत्येकपदशक्त्युपस्थापितार्थमात्रविपर्य्ययकर्मधारयीयशक्तिग्रहस्यान्तरङ्गत्वेन प्रथमोपस्थितार्थ एवोपस्थितिर्लाघवान्निषादस्थपतिशब्दस्य तात्पर्य्यमवसीयते योरिति प्रतीतिः । ननु बहिर्भूतपदार्थविषयकशक्तिग्रहोपस्थापिते, तदुपस्थितेर्विलम्बितत्वादित्याखण्डलार्थः ।

अपेक्षैव सामर्थ्यं मूलकृदभिप्रेतमित्यर्थे इदमपि प्रमाणम् । अन्यथा जहत्स्वार्थवृत्तिपक्षे पदानामानर्थक्यात् उपदर्शकपदस्य विशेषोपस्थितेरसम्भवेन क्व तन्मूलकशक्तिग्रह इति तस्यान्तरङ्गत्वकथनमसङ्गतमेव स्यादिति बोध्यम् । * तत् * व्यत्यासमेवाह—*[illegible]यते *—अवधार्य्यते ।

ननु तत्रापि "[illegible]ग विप्रयोगश्च" इत्यादिना हरिणा संयोगादीनां विशेषावगतिहेतुत्वं बोध्यते, तत् कथं तात्पर्य्यस्य इति* । कारकाणामि[illegible]ति चेन्न, नानाशक्त्युपस्थितानेकेषु संयोगादिनैकस्मिन्नवधारिते तात्पर्य्ये विशेषावगतिरिति शब्दान्यायेन, भावनायास्तु "भा[illegible]वार्थस्य वक्ष्यमाणत्वात् । संयोगादीनां तात्पर्य्यग्राहकतायामेवोपयोगेन तात्पर्य्यस्य विशेषावगति-

SGDF
Sri Gargeshwari Digital Foundation

कल्प्यत इति। परेषामपि सति तात्पर्य्ये 'यष्टीः प्रवेशय' इतिवल्लक्षणाया दुर्वारत्वात्, तात्पर्य्यमेव कल्प्यकोटाववशिष्यत इति दिक् ॥ ३६ ॥

इति वैयाकरणभूषणसारे समासशक्तिनिरूपणम् ॥ ५ ॥

प्रभा

नानार्थकत्वमत आह—परेषामिति। लक्षणाया इति—षष्ठ्यर्थसम्बन्धविशिष्टे, अन्यपदार्थविशिष्टे च लक्षणाया दुर्वारत्वादित्यर्थः। नच निषादशब्दस्य जातिवाचित्वात् स्थपतिशब्दस्य स्वामिवाचकत्वेन गुणवाचकत्वात् विशेषणतया पूर्वनिपात उचित इति वाच्यम्, पूर्वनिपातस्यानित्यत्वात्, राजदन्तादित्वाच्च तस्य परनिपातकरणात्। नच स्वामिनः स्वे नित्यसाकाङ्क्षत्वेन षष्ठीसमास एवोचित इति वाच्यम्, जैमिनिना 'लिङ्गदर्शनाच्च' इति हेत्वन्तरोक्तेः। लिङ्गञ्च दृश्यते कूटञ्च दक्षिणेति तदर्थः। कूटं हि निषादानामेव स्वमिति शबरस्वामी। तात्पर्यमेवेति—ननु तात्पर्यग्राहकेषु हर्य्युक्तेषु संयोगादिषु लाघवस्यागणनादिदमसङ्गतमिति चेन्न, स्वरादय इत्यादिना तस्यापि ग्रहीतुं शक्यत्वादित्यलम् ॥ ३६ ॥

समासेन समासस्य शक्तीनां निर्णयो गतः।
प्रभायां बालकृष्णेन कृष्णो नंनम्यतेऽसकृत् ॥

॥ शुभम्भूयात् ॥

दर्पणव्याख्या

ननु प्रत्येकपदवृत्तिपक्षेऽनायासेनैवाधिकरणसिद्धान्तापपत्तौ विशिष्टशक्तिपक्षे तादृशसिद्धान्तसमर्थने क्लेशो दुष्परिहर एवेत्यत आह—*परेषामपीति*। *प्रवेशयेतिवदिति* तात्पर्य्यस्यैव लक्षणानियामकतया तत्सत्त्वे वाक्यलक्षणया समासान्तरबोधस्य दुर्वारतया तात्पर्य्याभावेनैव तदवगतेर्वारणीयत्वादित्यर्थः।

ननु "निषादस्थपतिं याजयेत्" इत्यत्र स्थपतिशब्दः स्वामिपर्य्यायः, श्रेष्ठपर्यायो वा। उभयथाऽप्यसौ गुणवचनः। तस्य च जातिवचननिषादपदेन कर्मधारये तत्र गुणवचनस्यैव पूर्वनिपातनियमेन स्थपतिनिषादमिति प्रसज्येत, नतु निषादस्थपतिमिति स्यात्। किञ्च उभयथापि स्थपतिशब्दार्थस्य नित्यसम्बन्धिसापेक्षत्वेन षष्ठीसमास एव न्याय्यः, नतु कर्मधारय इति कथमुक्तसिद्धान्तसङ्गतिः प्रकृतेऽपीत्यत आह—*दिगिति*। तदर्थस्त्वत एवास्वरसात् "लिङ्गदर्शनाच्च" इति सूत्रं हेत्वन्तरोपसङ्ग्राहकं प्रणीतं महर्षिणा। तच्च शबरस्वामिना, 'कूटं हि निषादानामेवोपकारकम्, नार्याणाम्। एवञ्च तन्निषादानामेव स्वम्" इति भाष्ये व्याख्यातम्। तथाच कूटदक्षिणालिङ्गात् कर्मधारयत्वे निर्णीते स्थपतिशब्दस्य राजदन्तादित्वात् परनिपातो बोध्यः, सम्बन्धाकाङ्क्षानिवृत्तिरप्यर्थतो निषादानां स्वत्वलाभादुपपद्यते। एवं लाघवादिविचारस्तु कथञ्चित् सम्भवमात्रेणेति सर्वमनवद्यम् ॥ ३६ ॥

इति वैयाकरणभूषणसारदर्पणे समासशक्तिनिरूपणम्।

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ शक्तिनिर्णयः ॥

शक्तिप्रसङ्गात् तस्याः स्वरूपमाह—

॥ अथ शक्तिनिर्णयः ॥

प्रभा

शक्तिप्रसङ्गादिति—"समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।"

इति समासप्रकरणोक्तग्रन्थेन "एकसम्बन्धिज्ञानमपरसम्बन्धिनः स्मारकम्" इति न्यायेन शक्तित्वरूपधर्मसाजात्यसम्बन्धेन घटादिपदनिष्ठशक्तेरपि स्मरणात् स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गत्या आह—तस्याः स्वरूपमिति—शक्तेराकार इत्यर्थः। येषां पदानामर्थनिरूपितवृत्तिज्ञानं नास्ति ततः पदार्थोपस्थितिः, शाब्दबोधश्च न जायते, अतः "तद्धर्मावच्छिन्नार्थविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति तद्धर्मावच्छिन्नार्थनिरूपितवृत्तिविशिष्टज्ञानस्य हेतुत्वम्" वाच्यम्।

ज्ञाने वृत्तिवैशिष्ट्यञ्च—स्वाश्रयपदविषयकत्व—स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्योभयसम्बन्धेन।

तत्र पदज्ञानाभावेऽपि शाब्दबोधवारणायाद्यसम्बन्धः। वृत्तिज्ञानजन्यसंस्कारसत्त्वेऽपि विस्मृतवृत्तिकस्य शाब्दबोधवारणाय द्वितीयः। वृत्तिज्ञानञ्च आज्ञाप्याज्ञापकवृद्धयोः 'घटमानय' इत्युक्तिरूपघटकर्मकानयनरूपव्यवहारेणाप्तोपदेशादिना च पदनिष्ठवृत्तिजिज्ञासोर्जायते।

तथाच 'तद्धर्मावच्छिन्ननिरूपितवृत्तिविषयकपदज्ञानत्वरूपकारणतावच्छेदकघटकतया निविष्टवृत्तेर्ज्ञानस्य विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणम्' इति विशेषणज्ञानविधया आवश्यकत्वम्। तत्र वृत्तित्वसामान्यलक्षणन्तु 'शाब्दबोधौपयिकसम्बन्धत्वम्', 'पदपदार्थोभयनिरूपितसम्बन्धत्वम्' वा। सा च वृत्तिर्द्विधा—शक्तिर्लक्षणा चेति। तत्र ईश्वरसङ्केतश्शक्तिः। आधुनिकसङ्केतः परिभाषा। शक्त्या अर्थबोधकं पदं वाचकमित्युच्यते। बोध्यश्चार्थो वाच्य इति। परिभाषया अर्थबोधकं पारिभाषिकम्—यथा नदीवृद्ध्यादिपदम्। यत्पदं शक्तिं परिभाषां विनापि सादृश्यादिना बोधकं तल्लाक्षणिकम् इत्युच्यते। 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इति 'इदं पदमेतदर्थविषयकबोधजनकं भवतु' इति अर्थविशेष्यिका, पदविशेष्यिकेश्वरेच्छा वा। ईश्वरेच्छा संकेतः, स एव शक्तिः। लक्षणा च शक्यसम्बन्धरूपा। तत्र तात्पर्यानुपपत्तिरेव लक्षणाबीजम्, नत्वन्वयानुपपत्तिः, गङ्गापदस्य नौकायां लक्षणाप्रसङ्गात्। घोषपदस्य मीने लक्षणापत्तिरिति तु न, 'न विधौ परः शब्दार्थः' इति न्यायात्, इति नैयायिकाः।

दर्पणव्याख्या

प्रसङ्गादिति "समासे खलु भिन्नैव शक्तिः" इति ग्रन्थेन स्मृतायाः शक्तेरनुपेक्षणीयत्वादिति भावः। अगृहीतवृत्तिकात् पदात् पदार्थोपस्थितेः शाब्दबोधस्य चादर्शनात्तद्धर्मावच्छिन्नविषयकशाब्दबुद्धिं प्रति तद्धर्मावच्छिन्नार्थनिरूपितवृत्तिविषयकपदज्ञानं करणम्, वृत्त्या पदजन्यपदार्थोपस्थितिर्व्यापारः, तां विना तदनुत्पत्तेः नतु वृत्तिमत्त्वेन ज्ञातं पदम्, अतीतानागतशब्दानुसन्धानाच्छाब्दबोधानुदयप्रसङ्गात्।

वृत्तिश्च—शक्तिलक्षणाभेदाद् द्विविधा। तत्रार्थे पदसङ्केतः शक्तिः। स चेदंपदमिममर्थं बाधयतु इति पदविशेष्यकेश्वरेच्छात्मकः। 'अस्मात् पदादयमर्थो बोध्यः' इत्याकारपदार्थविशेष्यकेश्वरेच्छारूपो वा, विनिगमकाभावात्। तथा चार्थबोधकं पदं वाचकमिति व्यवह्रियते। शास्त्रकारादिसङ्केतः परिभाषा। तथा चार्थबोधकं पदं पारिभाषिकमिति व्यवह्रियते, यथा—नदीवृद्ध्यादिपदम्। लक्षणा तु शक्यसम्बन्धः। तत्कल्पिका च मुख्यार्थबाधोन्नीततात्पर्यानुपपत्तिः।

तथाहि—'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य घोषाभाववत्प्रवाहार्थकत्वेन तीरतात्पर्य्यकत्वे उन्नीते तात्पर्यविषयतीर-

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ ३७ ॥

प्रभा

वैयाकरणमते तु वृत्तिस्त्रिधा—शक्तिर्लक्षणा व्यञ्जना च। तत्र शक्तिज्ञानं विना शक्यसम्बन्धरूपाया लक्षणाया ज्ञानासम्भवात् प्रथमं शक्तिरूपाया वृत्तेः स्वरूपमाह—इन्द्रियाणामिति । स्वविषयेष्विति—स्वम्=इन्द्रियं तज्जन्यं घटादिज्ञानं तद्विषयेषु घटादिषु इत्यर्थः। तथाच इन्द्रियजन्यं ज्ञानरूपं यत्कार्यं तद्गतं सविषयकत्वं कारणेषु=इन्द्रियेषु आरोप्योक्तम्—स्वविषयेष्विति। एतेन ज्ञानेच्छायत्नसंस्काराणामेव सविषय-

दर्पणव्याख्या

स्मृतिं विनाऽनुपपद्यमानेन तीरशाब्दबोधेन तत्स्मृतिराक्षिप्यते । सा च गङ्गापदवृत्तिं विनानुपपद्यमाना तज्ज्ञानमाक्षिपति । तद्विषयो गङ्गापदनिरूपिता वृत्तिर्न शक्तिः, तस्यात्राभावादतस्तीरस्मारिका काचिदन्यैव वृत्तिः कल्प्यते । सा च गङ्गापदशक्य-सामीप्यरूपैव तेन रूपेण गृह्यमाणा तीरं स्मारयत्यनुभावयति च । शक्यादशक्योपस्थितिस्तु न लक्षणा, उपस्थितिहेतोस्त-स्यास्तत्त्वासम्भवात् । नापि स्वबोध्यसम्बन्धः, समासशक्तिनिरूपणोक्तयुक्तेः ।

नन्वीश्वरेच्छायाः शक्तित्वासम्भवः, घटपदस्यापि पटे शक्तत्वप्रसङ्गात्, 'घटपदात् पटो बोद्धव्यः' इतीच्छाया विषय-तया पटेऽपि सत्त्वात् । यदि चेश्वरेच्छीयघटपदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं शक्तिरिति न पटपदेऽतिप्रसङ्गः, तद्विषयत्वेऽपि तादृशविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वस्य तत्रानभ्युपगमादित्युच्यते, तदापि गङ्गापदात् तीरबोध-स्यापि जायमानत्वेन सन्मात्रविषयकेश्वरेच्छीयगङ्गापदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वस्य तीरे सत्त्वाच्छक्त्यैव निर्वाहे कृतं लक्षणयेति चेन्न, गङ्गापदवाच्यत्वव्यवहारस्य तीरादावसत्त्वेन गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानि-रूपितविशेष्यत्वसम्बन्धेन ईश्वरेच्छीयगङ्गादिपदानां प्रवाहादौ शक्तिः, तीरादिनिष्ठविशेष्यतायाश्च गङ्गादिपदजन्यबोधवि-षयत्वप्रकारतानिरूप्यत्वेऽपि न तस्याः तादृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वम्, अपि तु शुद्धविषयतात्वेनैवेत्यभ्यु-पगमान्न तया लक्षणाऽन्यथासिद्धिः, नापि विषयत्वलक्षणसम्बन्धस्य पदे जन्यजनकभावे च सत्त्वेऽपि तत्रातिप्रसङ्गः ।

तत्र लक्ष्योपस्थितिनियामकः सादृश्यात्मकः सम्बन्धो गौणी, तदतिरिक्तस्तु शुद्धलक्षणेति व्यवह्रियते । शुद्धाप्युपादान-लक्षणभेदेन द्विविधा । तत्र मुख्यसंसृष्टा यार्थोपस्थापकत्वमुपादानत्वम् । शक्याविषयकलक्ष्यार्थोपस्थितिजनकत्वं लक्षणत्वम् । 'यष्टीः प्रवेशय,' 'गङ्गायां घोषः' इत्यादिके यथायथमुदाहरणे । तत्राप्याद्याऽजहत्स्वार्था, अन्त्या च जहत्स्वार्थेत्युच्यते । तद्भे-दान्तराणि त्वन्यतोऽवधार्य्याणीति नैयायिका आहुः ।

मीमांसकास्तु उक्तयुक्त्या लाक्षणिकपदस्य वाचकत्वपरिहारेऽपि नेश्वरेच्छायाः शक्तित्वम्, ईश्वरस्यैवानभ्युपगमात् । नन्विच्छाया ईश्वरीयत्व नुपादेयमेवञ्चाऽऽधुनिकसङ्केतज्ञानादपि शाब्दबोधोदयेन तादृशसङ्केतस्य वृत्तितानिर्वाहः । आधु-निकसङ्केतत्वेन तात्पर्य्यस्याऽपि वृत्तित्वप्रसङ्गस्तु न, पदार्थोपस्थितिनियामकसङ्केतस्यैव वृत्तित्वेन तस्याऽतत्त्वात् । तज्ज्ञानस्य साक्षादेव शाब्दधीजनकतया पदार्थोपस्थित्यात्मकव्यापारानपेक्षणाद् वृत्त्युपस्थापितार्थ एव प्रकरणादिना तदवधारणात् ।

आधुनिकसङ्केतितडित्थादिपदेषु त्वाधुनिकसङ्केतस्य प्रागवधारितस्य डित्थादिव्यक्तिशाब्दधीजनकपदार्थोपस्थितौ नियामकत्वेन तद्वृत्तित्वस्य सौलभ्यादिति चेदेवमपि सङ्केतस्य निष्प्रतियोगिकतया तदीयोक्तविषयत्वस्याप्यापातरमणीय-तया सम्बन्धित्वासम्भवेन पदार्थानुपस्थापकत्वाद् वृत्तित्वानिर्वाहात् । तस्मात् पदपदार्थयोर्वाच्यवाचकभावनियामकः सम्बन्धः पदार्थान्तरमेव । नाप्यसौ समवेतः, अभावादावपि सत्त्वात् । किन्तु वैशिष्ट्याख्येन सम्बन्धान्तरेण वर्त्तते इत्याहुः ।

वाच्यत्वं यथा न समवायि तथा वक्ष्यत इति वदता दीधितिकृतापि तन्मतमेवानुसृतम् । तदेतन्नानामतानि निरा-कर्त्तुमादौ तत्स्वरूपप्रदर्शनमित्याशयेन मूलमवतारयति—*तस्याः स्वरूपमिति* तस्याः—शक्तेः । निर्विषयाणां तेषां कथं

इन्द्रियाणाम्=चक्षुरादीनां स्वविषयेषु=चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता=तदीयचाक्षुषादिकारणता, तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः। ननु न बोधकारणत्वमनादिभूतं शक्तिः, आधुनिकदेवदत्तादिपदे तदभावात्।

प्रभा

कतया 'इन्द्रियाणां स्वविषयेषु' इत्युक्तिरसङ्गतेत्यपास्तम्। इन्द्रियाणामित्यत्र निष्ठत्वं षष्ठ्यर्थः। स्वविषयेषु इत्यत्र निरूपितत्वं सप्तम्यर्थः। योग्यता=कारणता। तथाच इन्द्रियनिष्ठा इन्द्रियविषयघटादिनिरूपिता या कारणता सा यथा अनादिस्तथा सकलशब्दनिष्ठा घटादिनिरूपिता योग्यताऽपि अनादिः। नच घटादिनिरूपितेन्द्रियनिष्ठा कारणतेत्यसङ्गतम्, घटादेरिन्द्रियाजन्यत्वादिति वाच्यम्, घटादिज्ञानगतकार्यत्वस्यारोपेण तदुक्तेः।

वस्तुतस्तु घटादिविषयकचाक्षुषादिज्ञाननिरूपिता योग्यता (कारणता) इन्द्रियनिष्ठा यथा अनादिस्तथा शब्दनिष्ठा अर्थविषयकज्ञाननिरूपिता योग्यता (कारणता)ऽपि अनादिः। योग्यतायामनादित्वञ्च—'इन्द्रियजन्यज्ञानप्रतियोगिकध्वंसव्याप्यत्वम्' कालिकसम्बन्धेन व्याप्यव्यापकभावो बोध्यः। तथाहि—यदा यदा चक्षुरादीन्द्रियनिष्ठा ज्ञानजनकता तदा तदा तज्ज्ञानपूर्वकालिकतदिन्द्रियजन्यज्ञानध्वंस इति ध्वंसस्य व्यापकत्वम्, ज्ञानजनकतायाश्च व्याप्यत्वं सुलभम्। नच सृष्ट्यारम्भे इन्द्रियनिष्ठप्राथमिकज्ञानजनकताकाले तदिन्द्रियजन्यपूर्वज्ञानाभावेन तद्ध्वंसस्याभावाद् व्यभिचार इति वाच्यम्, तत्पूर्वसृष्टिकालिकतादृशज्ञानध्वंसस्य तदानीमपि वक्तुं शक्यत्वात्। प्रागभावाप्रतियोगित्वं वाऽनादित्वम्, ज्ञानजननसामर्थ्यरूपायाः जनकताया नित्यतया, प्रागभावाप्रतियोगित्वस्याक्षतेः। इयञ्च योग्यतारूपा शक्तिः पदार्थान्तरम्, नत्वीश्वरेच्छारूपा, ईश्वरेच्छा-ज्ञान-यत्नानामन्यतमरूपत्वे मानाभावेन सर्वरूपत्वे गौरवात्। भूषणकाराभिमतं बोधजनकत्वं शक्तिरिति सिद्धान्तं स्फुटीकर्तुं वाक्यपदीयकारिकयाऽऽह ग्रन्थकारः—इन्द्रियाणामिति। शब्दकौस्तुभेऽप्युक्तम्—घटादिबोधजननसामर्थ्यमेव घटादिपदानां शक्तिरिति। शब्दार्थयोः सम्बन्धो योग्यता।

तत्रानादित्वविशेषणं न युक्तमिति ध्वनयन्नाह—नन्विति। आधुनिकेति=एतत्कालिकपित्र्यादिसंकेतविषयेत्यर्थः। तदभावात्=अनादित्वविशिष्टबोधकारणत्वस्याभावात्। बोधकारणत्वस्य सत्त्वेऽपि बोधगता-

दर्पणव्याख्या

घटादिर्विषयोऽत आह—*चाक्षुषेति* तथाचौपचारिकविषयत्वं न विरुद्धमिति भावः। चाक्षुषपदं त्वाचादिप्रत्यक्षस्याप्युपलक्षणम्। इन्द्रियनिष्ठचाक्षुषादिकारणतायामनादित्वम्—इन्द्रियजन्यपूर्वपूर्वबोधध्वंसकालिकत्वम्। चक्षुष्ट्वादिव्यापकत्वं पुरुषप्रयत्नानपेक्षत्वं वा, न त्वजन्यत्वम्, अव्यावर्त्तकत्वात्। शब्दनिष्ठबोधकारणतायां तु स्वजन्यबोधसमानाकारपूर्वबोधध्वंसवत्त्वम्। *तद्बोधकारणता*=अर्थबोधकत्वम्।

ज्ञायमानं पदं करणमभिप्रेत्येदम्। अन्यथा विषयतायां तादृशहेतुताऽवच्छेदकतेत्यर्थो बोध्यः। सङ्केतज्ञानं विनोक्तशक्तिग्रहासम्भवेनावश्यापेक्षणीयतया तस्यैव शक्तित्वमस्तु, "तद्धेतोरेव" इति न्यायादित्याशङ्कते—*नन्विति* तस्या शक्तित्वे हेतुराधुनिकेत्यादि। आधुनिके=एतत्कालिकसङ्केतविशिष्टे। *तदभावात्*=निरुक्तानादित्वविशेषणविशिष्टबोधकारणत्वाभावादित्यर्थः। विशेष्यसत्त्वेऽपि प्रकृते विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वेन तदप्रतियोगित्वरूपकारणत्वं न सम्भवतीत्यर्थः।

नन्वनादिभूतेतिप्रसिद्धिप्रदर्शनमात्रार्थकम्, नतु तच्छक्तिशरीरे प्रविष्टं येन तद्रूपेण तस्य हेतुता सम्भाव्येत। किन्तु बोधकारणत्वत्वेनैव प्रकृते तेन रूपेण तज्ज्ञाने बाधकाभाव इति चेत्स्यादेवं यदि सङ्केतग्रहमन्तरेणैव तद्ग्रहो भवेन्न तु तत्

SGDF

अन्यथा पित्रादीनां सङ्केताज्ञानेऽप्यन्वयबोधप्रसङ्गः, लाक्षणिकातिव्याप्तिश्चेति सङ्केतज्ञानमपि हेतुर्वाच्यम्। तथाचावश्यकत्वात् स एव शक्तिरस्तु।

प्रभा

नादित्वस्याभावेन विशेषणाभावप्रयुक्तविशिष्टाभाव इति भावः। अन्यथा=देवदत्तादिपदेऽप्यनादित्वविशिष्टबोधकारणत्वस्वीकारे। पित्रादीति—यदि देवदत्तादिपदेऽपि अनादिबोधकारणता स्यात्तदा पित्रादिसंकेतज्ञानस्य तदग्राहकतया पित्रादिसंकेतज्ञानाभावेऽपि देवदत्तादिपदाच्छाब्दबोधापत्तिरिति भावः।

ननु बोधकारणत्वमेव शक्तिः। अनादित्वं नहि शक्तिशरीरे निविष्टम्, किन्तु प्रसिद्धत्वमात्रबोधकम्। तथाच देवदत्तादिपदे तादृशशक्तेरप्रसिद्धत्वात् सत्त्वेऽपि न बोध इत्यत आह—लाक्षणिकेति—अत्र प्रसिद्धबोधकारणत्वसत्त्वात् तटनिरूपितापि गङ्गापदे शक्तिः स्यादिति भावः। नन्वप्रसिद्धबोधकारणत्वस्य सत्तामात्रेण बोधस्वीकारे 'नहि वह्निरविदितशक्तिर्न दहति' इति व्युत्पन्नवदव्युत्पन्नस्यापि बोधवारणाय यथा प्रत्यक्षप्रमाणचक्षुरादेरनाद्यर्थप्रत्यायकत्वे सत्यपि इन्द्रियसन्निकर्षापेक्षा, तथा अत्रापि संकेतग्रहसचिवस्यैव बोधकत्वमित्याह—संकेतज्ञानमिति—तथाच लक्ष्यतटादिनिरूपितसंकेतज्ञानाभावान्नातिव्याप्तिरिति भावः। अपीति—अपिना योग्यताज्ञानसंग्रहः। तथाच=संकेतज्ञानस्य हेतुत्वे सिद्धे च। स एव=संकेत एव। संकेतश्च—'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्याद्याकारकेच्छारूपोऽर्थविशेष्यकः। इदं पद (घटादिपद) जन्यबोधीयविषयतावानर्थ इति तदर्थात् विषयतानिष्ठप्रकारतानिरूपिता विशेष्यता अर्थे सुलभेति अर्थविशेष्यकत्वमुक्तसंकेते। इदंपद् (घटादि) मिममर्थं बोधयतु इत्याकारकेच्छारूपः पदविशेष्यकश्च इदमर्थ, (घटाद्यर्थ) विषयकबोधजनकतावत्पदं भवतु इति तदर्थात् बोधजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यतायाः पदे सत्त्वात्। संकेतस्य शक्तित्वादेवार्थबोधकं पदं शक्तमिति व्यवहारः। अर्थबोधकत्वस्यैव वाचकत्वे तु दण्डवान् दण्डवान्' इतिवत् उद्देश्यताऽवच्छेदकविधेयताऽवच्छेदकयोरैक्यादुद्देश्यविधेयभाव एव न स्यात्। किञ्च बोधजनकत्वान्यथानुपपत्त्या कल्प्यमानशक्तेर्बोधजनकत्वरूपत्वे आत्माश्रयापत्तेः, स्वस्य स्वोपपादकत्वासम्भवात्। तत्रेदं तत्त्वम्—ईश्वरसंकेतः शक्तिः तया बोधकं वाचकम्। आधुनिकसंकेतः परिभाषा तया बोधकं पारिभाषिकम्। घटपटादिपदं वाचकम्। वृद्धिगुणादिपदं पारिभाषिकम्। यत्र चोभयविधोऽपि संकेतो नास्ति, अथ च सादृश्यादिना बोधकं तल्लाक्षणिकमित्युच्यते। लक्षणा च शक्यसम्बन्धरूपैव। यत्र सादृश्यातिरिक्तसम्बन्धरूपा लक्षणा सा शुद्धा इति, यत्र सादृश्यात्मकसम्बन्धरूपा सा गौणी इति च व्यवह्रियते। मुख्यार्थपूर्वकतात्पर्यानुपपत्तिरेव लक्षणाबीजम्। यथा 'गङ्गायां घोषः' इत्यत्र। प्रथमं गङ्गापदेन प्रवाहविशेषोपस्थितिः। तत्र घोषाभावज्ञाने जाते इदं गङ्गापदं घोषाभाववत्प्रवाहार्थकमिति ज्ञानानन्तरम्—गङ्गापदं तटविषयकतात्पर्यवत् घोषान्वय्यर्थबोधजनकत्वप्रकारकैतत्कालिकाभिप्रायविषयत्वात् यन्नैवं तन्नैवमित्यनुमित्या तात्पर्यज्ञाने जाते 'तटे घोषः' इति शाब्दबोधो जायते। स च तटोपस्थितिं विनाऽनुपपन्नः। तटोपस्थितिश्च गङ्गापदे तटविषयकवृत्तिं विनाऽनुपपन्ना सती गङ्गापदस्य तटे वृत्तिं कल्पयति। तत्र कोशाद्यभावात् तटनिरूपिता शक्तिरूपा वृत्तिस्तु असम्भवन्ती सती अनुमितिविषयलक्षणायां पर्यवस्यति। नन्वीश्वरेच्छायाः शक्तित्वमेव युक्तम्, ईश्वरेच्छाया एकत्वेन लाघवात्। सा यथा घटपदाद् घटो बोद्धव्य इत्या-

दर्पणव्याख्या

सम्भवतीत्याह—* अन्यथेति * सङ्केतनिरपेक्षस्यैव तस्य शाब्दबोधहेतुत्वे इत्यर्थः। * लाक्षणिकेति * तत्राप्यनादिभूतस्यापि बोधजनकत्वस्य सत्त्वादिति भावः। *आवश्यकत्वादिति* अवश्याऽपेक्षणीयज्ञानविषयत्वादित्यर्थः। *स एव*=

SGDF

स चाधुनिके पित्रादेः, गवादौ चेश्वरस्य चेति चेत् ,
अत्रोच्यते—सङ्केतो न स्वरूपेण हेतुः, अगृहीतशक्तिकादर्थबोधप्रसङ्गात् ।

प्रभा

कारिका, तथा पटपदात्पटो बोद्धव्य इत्याकारिकापि । तथाच घटस्य घटपदवाच्यत्ववत्पटस्यापि घटपदवाच्यत्वापत्तिः, ईश्वरेच्छीयविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यताया घटपदेऽपि सत्त्वात् । ईश्वरेच्छाया एकत्वेऽपि घटपदजन्यबोधविषयतानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनेच्छावत एव यदि घटपदस्य वाच्यत्वमित्युच्यते, तदापि ईश्वरेच्छायाः सन्मात्रविषयकत्वेन 'गङ्गापदात् तटो बोद्धव्यः' इत्याकारिकेच्छाया अपि आवश्यकत्वेन गङ्गापदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन तटस्यापि ईश्वरेच्छाविशिष्टतया गङ्गापदवाच्यत्वापत्तिरिति चेन्न, 'गङ्गापदं तटवाचकम्' इत्यस्य, 'तटो गङ्गापदवाच्यः' इत्यस्य वा व्यवहारस्य लोकेऽदर्शनेन 'गङ्गापदजन्यबोधविषयतावाँस्तटः' इत्यस्य दर्शनेन च गङ्गापदजन्यबोधीया या विषयत्वनिष्ठा प्रकारता तस्यां शुद्धविषयतात्वावच्छिन्नत्वमेवाङ्गीक्रियते । वाच्यत्वघटकविषयत्वनिष्ठप्रकारतायाञ्च गङ्गापदजन्यबोधीयविषयतात्वरूपविशिष्टधर्मावच्छिन्नत्वमपेक्ष्यते इति तादृशविषयतात्वावच्छिन्नप्रकारतानिरूपिता विशेष्यता च प्रवाहे एव, नतु तटे इति गङ्गापदवाच्यत्वस्य तटेऽनतिप्रसङ्गात् । इत्थञ्च 'तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छाविशिष्टोऽर्थो वाच्यः' इत्यभ्युपगमान्न लक्ष्याद्यर्थेष्वतिव्याप्तिरिति सर्वं सुस्पष्टम् । स च=संकेतश्च । आधुनिके=आधुनिकसंकेतविषये देवदत्तादौ । इदं नैयायिकमतेन ।

अत्र मीमांसकाः—ईश्वरेच्छा न शक्तिः, ईश्वराभावात् । किन्तु यस्य कस्यचित्संकेत एव शक्तिः । अत एव देवदत्तादिपदादपि शाब्दबोधः । नच 'द्वादशेऽह्नि पिता नाम कुर्यात्' इति श्रुत्या तत्रापि ईश्वरसंकेतसत्त्वान्न दोषः, तत्तदानुपूर्वीमत्पदघटितसंकेतस्यैव शक्तित्वात् । अन्यथा अपभ्रंशानामपि तव (नैयायिकस्य) मते शक्तत्वापत्तिः । नचैवं तात्पर्यस्यापि संकेतरूपत्वाच्छक्तित्वापत्तिः, पदार्थोपस्थितिजनकस्यैव संकेतस्य शक्तित्वस्वीकारात् । तात्पर्य्यस्य तु साक्षाच्छाब्दबोधं प्रत्येवार्थविशेषविषयकत्वनिर्णायकतया कारणत्वम्, नतूपस्थितिं प्रत्यपीत्यदोषात् । शब्देन वृत्त्योपस्थितेषु अनेकार्थेषु प्रकरणादिना तात्पर्यनिर्णय इति च लोकप्रसिद्धिरिति, तन्न युक्तम्, पदपदार्थयोः सम्बन्धोऽभिधा, सम्बन्धस्य च सप्रतियोगिकत्वनियमात् । संकेते तु सप्रतियोगिकत्वस्यानुभवविरुद्धत्वात्सम्बन्धत्वाभावः । किन्तु शक्तिः पदार्थान्तरम्, सैव च पदपदार्थयोर्वाच्यवाचकभावनियामिका । सा च वैशिष्ट्याख्यसम्बन्धेनार्थनिष्ठा प्रतियोगित्वसम्बन्धेन पदनिष्ठा चेति मीमांसकमतं निराकर्तुं स्वमतमाह—अत्रोच्यते इत्यादिना—आदौ संकेतः शक्तिरिति मतं निरस्यति—सकेत इति । संकेतोऽज्ञातोऽपि वह्निरिव स्वरूपतः सत्तामात्रेण हेतुः ? 'ज्ञातः सन् वा हेतुः ? ज्ञानमपि किं सामान्यरूपेण (येन केनापि धर्मेण) उत विशेषरूपेण ? नाद्यः, स्वस्य रूपम्=स्वनिष्ठो धर्मविशेषः संकेतत्वम्, तेन सतोऽज्ञायमानस्यापि हेतुत्वे । अगृहीतशक्तिकात्=अज्ञातसंकेतरूपशक्तिकादपि शब्दा-

दर्पणव्याख्या

सङ्केत एव । एवकारेण बोधकत्वव्यवच्छेदः, सङ्केतस्य स्वरूपतः कारणत्वं ज्ञातस्य वा, तस्यापि सामान्यतो विशेषरूपेण वा हेतुत्वमभिमतमिति विकल्पं दूषयति-*उच्यत इति* । *स्वरूपेणेति* स्वस्य यद्रूपमिति व्युत्पत्त्या स्वासाधारणधर्मेण सङ्केतत्वेनेत्यर्थः । दण्डत्वेन घटे दण्ड इव ज्ञानाविषय एव संकेतः सङ्केतत्वेन हेतुरिति यावत् । *अगृहीतशक्तिकादिति* अज्ञातसङ्केतादित्यर्थः ।* अर्थबोधप्रसङ्गादिति * सङ्केतस्य तत्र विद्यमानत्वादिति भावः ।

SGDF Gargeshwari Digital Foundation

नापि सामान्यतो ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात् । नाऽपि सङ्केतत्वेन तज्ज्ञानं हेतुः, गवादिपदेष्वपीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात् । नचार्थधीजनकतावच्छेदकत्वेन

प्रभा

दर्थबोधापत्तिरित्याह—अगृहीतेति । सामान्येन ज्ञानं निराकरोति—नापीति । प्रमेयत्वादिनेति—प्रमेयत्वस्य सर्वान्वयितया संकेतस्यापि तेन रूपेण ज्ञानसम्भवादिति भावः । संकेतत्वेनेति—संकेतत्वरूपविशेषधर्मेणेत्यर्थः । गवादिपदेष्विति—गवादिपदेषु ईश्वरसंकेतस्यैव सम्भवेन ईश्वरानङ्गीकर्तृमते तत्र संकेतकर्तुरभावात् संकेतत्वेन ज्ञानाभावेऽपि बोधादर्शनान्न संकेतत्वेनापि तज्ज्ञानं हेतुरित्याह—ईश्वरादेरिति—आदिना महर्षिणां संग्रहः । ईश्वरादेः संकेतत्वेन=ईश्वरादिकर्तृकेच्छाविषयत्वेन । तज्ज्ञानशून्येति—गवादिपदेषु संकेतकर्तुरीश्वरादेरभावात् । संकेतस्याप्यभावेन तज्ज्ञानशून्यानाम्=संकेतज्ञानशून्यानाम् । लौकिकमीमांसकादीनामिति—लौकिकाश्च मीमांसकाश्चेति विग्रहे द्वन्द्वे लौकिकमीमांसकास्ते आदयो येषामित्यर्थे द्वन्द्वघटितो बहुव्रीहिः । तत्र लौकिकाः=व्यावहारिकपदार्थमात्रज्ञानवन्तः पामराः । मीमांसकास्तु श्रुति–लिङ्गादिबलाबलविचारपूर्वककर्मकाण्डविषयकतत्त्वनिर्णायकजैमिनिप्रणीतग्रन्थविशेषं मीमांसामधीयते विदन्ति वा ये ते उच्यन्ते । आदिना चार्वाकादिनास्तिकसंग्रहः । तत्तदर्थेति—'गवादिपदं गवाद्यर्थविषयकबोधजनकम्' इत्याकारकज्ञानवतामित्यर्थः । ग्रहणवतामेवेति—एवशब्दः सङ्केतज्ञानं व्यवच्छिनत्ति । तद्व्यवच्छेदस्य 'तज्ज्ञानशून्यानाम्' इत्यनेनैवोक्तत्वादेवकाररहित एव पाठो युक्तः । बोधोदयेनेति—'इदं पदमेतदर्थविषयकबोधजनकतावत्' इति पदविशेष्यकार्थविषयकबोधजनकत्वप्रकारकज्ञानाच्छाब्दबोधोत्पत्त्येत्यर्थः । व्यभिचारादिति—संकेतज्ञानस्य पदविशेष्यकबोधजनकत्वप्रकारकज्ञानत्वेन सत्त्वेऽपि तत्तदर्थनिरूपितेश्वरसंकेतत्वावच्छिन्नशक्तिज्ञानत्वेन सङ्केतज्ञानरूपकारणस्यासत्त्वेन शाब्दबोधरूपकार्यस्य च सत्त्वेन कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणवृत्त्यत्यन्ताभावीयप्रतियोगितानवच्छेदकधर्मवत्त्वरूपकारणतायां व्यभिचारात्=कार्यसत्त्वेऽपि कारणासत्त्वरूपाद् व्यभिचारादित्यर्थः । यद्यपि संकेतत्वेन संकेतज्ञानस्य हेतुत्वशङ्कायां कारणतावच्छेदकदले नेश्वरस्य निवेशस्तथापि गवादावाधुनिक संकेतकर्तुरभावात्संकेताभावे बोधानापत्त्या ईश्वरस्यैव संकेतयितृत्वस्यावश्यकतया 'गवादिपदेष्वपीश्वरादेः' इति ग्रन्थोक्त्यनुरोधेनेश्वराज्ञानवतां तत्कृतज्ञानाभावप्रदर्शनायेश्वरोक्तिर्नासङ्गता । यदुक्तं प्राक 'संकेतत्वेन' इति तत्र विशेषरूपेणेति शेषः, तत्पूर्वं 'सामान्यतः' इत्युक्तेः । तत्र विशेषरूपं न संकेतत्वम्, किन्तु तत्तदर्थधीजनकतावच्छेदकत्वरूपमितिशङ्कां निराचष्टे–नचेति–गोपदं गोरूपार्थविषयकबोधजनकमिति ज्ञानस्य शाब्दबोधजनकत्वं मीमांसकैः स्वीक्रियते । केन रूपेण तत्र जनकतेत्याकाङ्क्षायाम् 'तत्तदर्थधीजनकतावच्छेदकत्वेन' इत्युक्तम् । अयं भावः—यथा कस्यचित्पुरुषस्य घटरूपार्थस्य घटत्वेन ज्ञानाभावेऽपि ततो जलाहरणदर्शनेन जलाहरणकरणत्वेन घटस्य ज्ञानमस्त्येव । एवं संकेतकर्तुरीश्वरस्य ज्ञानाभावे तत्कार्यरूपसंके-

दर्पणव्याख्या

* सामान्यत इति * जनकाजनकसाधारणरूपेणेत्यर्थः । * सङ्केतत्वेनेति * ईश्वरीयसङ्केतत्वादिना विशेषधर्मेणेत्यर्थः । * तज्ज्ञानशून्यानामिति * सङ्केते ईश्वरीयत्वमविदुषामित्यर्थः । * लौकिकमीमांसकानामिति * वैदिकानां तेषां कथञ्चिदीश्वरबोधसम्भवादुक्तम्—* लौकिकेति * । अथवा लौकिकानां व्यावहारिकपदार्थमात्रविषयकज्ञानवतां पामराणामिति यावत्, मीमांसकानां चेत्यर्थः । *बोधोदयेनेति* सङ्केतत्वेन तज्ज्ञानमात्राद् गवाद्यर्थबोधोदयेनेत्यर्थः ।

तज्ज्ञानं तथा, ततोऽपि लाघवेनार्थधीजनकत्वेनैव हेतुतायामस्मत्पक्षसिद्धेः । नचाधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः, तत्रापि "इदम्पदम् एनमर्थं बोधयतु" इतीच्छाग्रहेपदे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात् ।

प्रभा

तस्य मीमांसकानां संकेतत्वरूपविशेषधर्मेण ज्ञानाभावेऽपि पदविशेष्यकबोधजनकत्वप्रकारकज्ञाने पदस्य विशेष्यतया विशेष्यितासम्बन्धेन शाब्दबोधकारणीभूतोक्तज्ञाने पदस्य विशेषणतया भानेन तत्र पदे ज्ञाननिष्ठशाब्दबोधीयकारणावच्छेदकत्वस्य विशेष्यित्वरूपविषयित्वसम्बन्धावच्छिन्नस्य वक्तुं शक्यतया तत्तदर्थविषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितबोधजनकत्वप्रकारकपदविशेष्यकज्ञाननिष्ठा या जनकता तादृशजनकतानिरूपिता विशेष्यित्वसम्बन्धावच्छिन्ना याऽवच्छेदकता तादृशावच्छेदकत्वप्रकारकं ज्ञानम् 'तादृशबोधजनकतावच्छेदकतावद्गवादिपदम्' इति । तथाच गवादिपदनिष्ठेन तादृशावच्छेदकत्वेन संकेतज्ञानस्य कारणत्वं नानुपपन्नमिति कस्यचिन्मतं दूषयति—ततोऽपीति—अर्थधीजनकतावच्छेदकत्वरूपधर्मादपीत्यर्थः । ननु अर्थधीजनकतावच्छेदकत्वप्रकारकज्ञाने जनकतात्वेन जनकता तु निविष्टैवेति तादृशजनकतात्वेनेव संकेतज्ञानस्य कारणत्वेऽवच्छेदकत्वानिवेशप्रयुक्तलाघवमित्याह—लाघवेनेति—तत्पदविशेष्यकतत्तदर्थविषयकबोधजनकत्वप्रकारकज्ञानत्वेन कारणतायां लाघवेनेत्यर्थः । अस्मत्पक्षेति—'बोधकत्वं शक्तिः' इति भूषणकारभिमतपक्षसिद्धेरित्यर्थः, ननु तत्तदर्थविषयकबोधजनकत्वज्ञानस्य कारणत्वे यत्र संकेतत्वेन संकेतज्ञानाद् बोधस्तत्र व्यभिचारः, अर्थधीजनकत्वज्ञानस्याभावादित्याह—नचाधुनिकेति । व्यभिचार इति—'कारणाभावे कार्याभावः' इति व्यतिरेकव्याप्तेर्व्यभिचार इत्यर्थः । व्यभिचारं निराकरोति—तत्रापीति—तादृशसंकेतज्ञानेऽपीत्यर्थः । इच्छाग्रह इति—पदविशेष्यका या इच्छा तद्रूपो यः संकेतस्तद्ग्रह इत्यर्थः । पद इति—'इदं पदमेनमर्थं बोधयतु' इतीच्छारूपसंकेतस्य 'इदं पदमेतदर्थविषयकबोधजनकतावत्' इत्यर्थकत्वेन संकेतस्यार्थबोधजनकत्वप्रकारकपदविशेष्यकतया तज्ज्ञानस्यापि अर्थविषयकबोधजनकत्वप्रकारकपदविशेष्यकत्वमक्ष-

दर्पणव्याख्या

यद्यपि सङ्केतत्वेन सङ्केतज्ञानकारणतावादिमते नेश्वरीयत्वादेर्निवेशस्तथापि गवादावीश्वरस्येति. तद्ग्रन्थालोचनायेश्वरीयत्वादेर्निवेशस्तदभिमत इत्यभिप्रेत्य दूषितमिति ध्येयम् । तत्तदर्थधीजनकत्वग्रहवतामेवेत्येवकारेण निरुक्तसङ्केतज्ञानवत्त्वव्यवच्छेदः । स च तज्ज्ञानशून्यानामित्यस्यैवानुवादः । एवशून्यपाठस्तु सुगमः । इदञ्च शक्तिग्रहरूपकारणप्रदर्शकम् । * तज्ज्ञानम् *=सङ्केतज्ञानम् * तथा *=हेतुः । सङ्केतितपदस्यैवार्थधीजनकत्वेन पदनिष्ठजनकतायां सङ्केतस्यावच्छेदकत्वादिति भावः ।

* ततोऽपीति * अर्थधीजनकतानिरूपितविषयतासम्बन्धाऽवच्छिन्नाऽवच्छेदकत्वस्याऽवच्छेदकत्वाऽपेक्षयार्थधीजनकतात्वेन हेतुताया औचित्येन वैयाकरणेष्टसिद्धिरित्यर्थः, सङ्केतज्ञानस्येदं पदमर्थधीजनकताऽवच्छेदकवदित्याकारकस्यार्थधीजनकताऽवच्छेदकत्वाऽवच्छिन्नप्रकारताकज्ञानत्वेन हेतुत्वे गौरवादिदं पदमर्थधीजनकमिति ज्ञानस्यैवार्थधीजनकतात्वावच्छिन्नप्रकारताकज्ञानत्वेन हेतुत्वमुचितम् , लाघवादिति भावः ।

वस्तुतस्तु तन्मते सङ्केतत्वेनैव हेतुतेति नोक्तविकल्पावसर इति बोध्यम् । सङ्केतज्ञानादेवेत्येवेनाऽर्थधीजनकत्वग्रहव्युदासः । अस्य=बोधकत्वग्रहस्य, व्यभिचारो व्यतिरेके । * तत्रापि *=सङ्केतमात्रादर्थबोधस्थलेऽपीत्यर्थः । * इच्छाग्रह इति * इदम्पदविशेष्यकैतदर्थबोधकत्वप्रकारकेच्छाग्रहे इत्यर्थः । * अवगाहनेनेति * विषयीकरणेनेत्यर्थः । ज्ञानेच्छा-

नच स्वातन्त्र्येणार्थबोधकताज्ञानं कारणं वाच्यम्। अन्यथा 'नेदं तद्धीजनकम्' इति ज्ञानवतः 'अस्माच्छब्दादयमर्थो बुद्धोऽनेन' इति जानतस्तद्ग्रहापत्तेरिति वाच्यम्,

प्रभा

तम्, इच्छाविशेषरूपसंकेतविषयकं यज्ज्ञानं तत्र स्वविषयीभूतायामिच्छायां यत्प्रकारकत्वं यद्विशेष्यकत्वं तादृशेच्छाज्ञानेऽपि तत्प्रकारकत्व—तद्विशेष्यकत्वस्य भानमिति नियमः। तथाच संकेतज्ञानस्थलेऽप्यर्थधीजनकत्वज्ञानमक्षतमेवेति भावः। स्वातन्त्र्येणेति—इतराविशेषणत्वेनेत्यर्थः। प्रकृते तु अर्थधीजनकत्वमिच्छारूपे संकेते विषयितासम्बन्धेन विशेषणीभूय तज्ज्ञानेऽपि भासते, नतु संकेतज्ञानेऽर्थधीजनकत्वं साक्षाद्विषय इति भावः। अन्यथा=अन्यत्र विशेषणतया भासमानस्यापि बोधजनकत्वज्ञानस्य कारणत्वे। नेदं तदिति—'घटपदं घटत्वावच्छिन्नविषयकबोधजनकतावत्' इति तात्पर्येण चैत्रेण 'घटमानय' इति वाक्यमुच्चारितम्। मैत्रेण तद्वाक्यं भ्रमात् 'घटपदं पटत्वावच्छिन्नविषयकबोधजनकतावत्' इत्येवंरूपेण ज्ञात्वा पटो बुद्धः। ततो विष्णुमित्रेण 'घटपदं पटत्वावच्छिन्नविषयकबोधजनकत्वाभाववत्' इति जानता 'घटपदात्पटो बुद्धोऽनेन' (मैत्रेण) इति ज्ञातम्। इत्थञ्च पारतन्त्र्येण (अन्यत्र=ज्ञाने विशेषणतया) भासमाने बोधजनकत्वज्ञानस्य शाब्दबोधकारणत्वे भ्रान्तज्ञाने घटपदे पटत्वावच्छिन्नबोधजनकत्वस्यावगाहनेन भ्रान्तज्ञानं जानतो ज्ञानेऽपि तादृशबोधजनकत्वस्य विषयतया अभ्रान्तस्यापि घटपदात्पटबोधापत्तिः। किञ्च परम्परया तज्ज्ञानस्य कारणत्वे 'घटपदं पटत्वावच्छिन्नविषयकबोधजनकत्वाभाववत्' इति ज्ञानवतः पुंसोऽपि अभावप्रतियोगितया बोधजनकत्वज्ञानसत्त्वाद् घटपदात्पटबोधापत्तिः। ननु ज्ञानेतराविशेषणत्वेन बोधजनकत्वज्ञानस्य कारणत्वे घटपदाद् घटस्यापि बोधो न स्यात् पदे विशेषणतयैव बोधजनकत्वज्ञानसत्त्वादिति चेन्न, 'इतराविशेषणत्वेन' इत्यस्य विषयितया ज्ञानेतराविशेषणत्वेनेत्यर्थात्। तथाच पदे बोधजनकत्वस्य स्वरूपेण विशेषणत्वेऽपि न दोषः।

यत्तु—पारतन्त्र्येण बोधजनकत्वज्ञानस्य कारणत्वे 'वयस्या नागरासङ्गादङ्गानां हन्ति वेदनाम्' इत्यत्र वयस्यापदं हरीतकीम्, नागरपदं शुण्ठीञ्च बोधयतु इति तात्पर्येणोच्चरितस्थले वयस्यापदं तरुणीबोधकम्, नागरपदं नागरिकपुरुषबोधकमिति बोद्धुर्बोधं जानतो वयस्यापदं नात्र तरुणीबोधकमिति जानतोऽपि वयस्यापदात्तरुणीबोधापत्तिरिति तन्न, वयस्याशब्दस्योभयार्थकत्वेन वयस्यापदं तरुणीविषयकबोधजनकत्वाभाववदिति ज्ञानासम्भवात्। तद्ग्रहापत्तेरिति—घटशब्दात्पटबोधापत्तेरित्यर्थः। पारतन्त्र्येण बोधजन

दर्पणव्याख्या

दिविषयकज्ञानस्य तद्विषयकत्वनियमादिति भावः। * स्वातन्त्र्येति * इतराविशेषणत्वेनेत्यर्थः। प्रकृते चेच्छांशे विषयितया विशेषणीभूतबोधकत्वस्यैव तज्ज्ञानेन विषयीकरणादिति भावः।

* अन्यथेति * पारतन्त्र्येणापि बोधकताज्ञानस्य शाब्दधीहेतुत्व इत्यर्थः। इष्टापत्तिनिरासायाह—* नेदं तद्धीजनकमितीति *। * अस्माच्छब्दादिति * एतच्छब्दजन्यैतदाशयकबोधविषयोऽयमर्थ इत्याकारकवर्त्तमानग्रहवत इत्यर्थः। पदविशेष्यकार्थधीजनकत्वबोधग्रहे वियमाने तदंशेऽर्थधीजनकत्वावगाहिनः 'इदं पदमेतदर्थधीजनकत्वेन बुद्धमनेन' इति ग्रहस्यासम्भवात्तदपहायास्मादित्याकारकबोधग्रह उक्तः। एतस्मिँस्तु न तस्य प्रतिबन्धकता, ग्राह्याभावानवगाहित्वादिति भावः।

* तद्ग्रहापत्तेरिति * घटादिशाब्दबोधापत्तेरित्यर्थः। उक्तज्ञानस्य विषयविषयकत्वेऽपि न तेन पदांशेऽर्थबोधकत्वं विषयीक्रियते येन तस्य शक्तिग्रहत्वं स्यात्। किन्तु बोधांशे तत्पदजन्यत्वस्यार्थांशे तादृशबोधविषयत्वमेव तथा,

नेदं तद्धीजनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासम्भवात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति।

प्रभा

कत्वज्ञानस्य कारणत्वे निपतितामापत्तिं परिहरति—नेदं तद्धीति—इदम्=घटपदम्। तद्धीजनकन्न=पटत्वावच्छिन्नविषयकबोधजनकत्वाभाववदिति निश्चयस्य 'घटपदं पटत्वावच्छिन्नविषयकबोधजनकतावत्' इति ज्ञानं प्रति प्रतिबन्धकतया प्रतिबन्धकरूपबाधसत्त्वेनेत्यर्थः। पदे=घटादिपदे। परग्रहम्='घटपदं पटत्वावच्छिन्नविषयकबोधजनकतावत्' इति परस्य=अन्यस्य भ्रान्तस्य ग्रहम्=ज्ञानं जानतोऽपीत्यर्थः। तद्ग्रहासम्भवात्=घटपदे पटत्वावच्छिन्नविषयकबोधजनकत्वज्ञानासम्भवात्। अन्यथेति—घटपदे पटविषयकबोधजनकत्वाभावावगाहिनिश्चयसत्त्वेऽपि तत्र पटविषयकबोधजनकत्वावगाहिज्ञानस्वीकारे इत्यर्थः। भ्रान्तिज्ञस्येति—'रजतत्वाभाववान् शुक्त्यादौ रजतत्वेन रुपेणानेन ज्ञातः' इति ज्ञानवत इत्यर्थः।

ननु भ्रान्त्यात्मकज्ञाने इन्द्रियसन्निकर्षाभावात् तज्ज्ञानासम्भव इति चेन्न, चेष्टादिना तज्ज्ञानानुमितिसम्भवात्। 'अयं पुरुषः शुक्तिं रजतं जानाति' इति ज्ञानवान्, अथ नेदं रजतमिति च ज्ञानवान् यः स एव भ्रान्तिज्ञः। यत्र चैत्रस्य शुक्तौ रजतत्वभ्रमो जातस्तत्र चैत्रीयं ज्ञानं यथा शुक्तौ रजतत्वप्रकारकम्, तथा भ्रान्तिज्ञस्य मैत्रस्यापि यदि शुक्तौ रजतत्वप्रकारकं स्यात्तदा सोऽपि भ्रान्तः स्यात्। तथा तु न भवति, किन्तु भ्रान्त्यात्मकज्ञाने शुक्तिविशेष्यकरजतत्वप्रकारकं रजतत्वावगाहिज्ञानं जायते, नतु शुक्तौ रजतत्वावगाहिज्ञानं भ्रान्तिज्ञस्य।

ननु पदविशेष्यकार्थविषयकबोधजनकत्वप्रकारकज्ञानस्य पदार्थोपस्थितिं प्रति कारणत्वस्वीकारेण यथा पदनिष्ठस्यार्थधीजनकत्वस्य शक्तित्वम्, तथा अर्थविशेष्यकपदजन्यधीविषयत्वप्रकारकज्ञानस्यापि पदार्थोपस्थितिं प्रति कारणत्वं वाच्यमिति पदजन्यधीविषयत्वमपि अर्थनिष्ठं शक्तिः स्यात्। नचेष्टापत्तिः, परस्परोपस्थितौ व्यभिचारप्रसङ्गात्। तथाहि—यत्र पदविशेष्यकशक्तिज्ञानादुपस्थितिस्तत्रार्थविशेष्यकशक्तिज्ञानाभावः। यत्रार्थविशेष्यकशक्तिज्ञानादुपस्थितिस्तत्र पदविशेष्यकशक्तिज्ञानाभाव इति 'कार्यजनकत्वे सति कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपकारणत्वम्' कुत्रापि शक्तौ न स्यात्, कार्यसत्त्वेऽपि

दर्पणव्याख्या

तेन तुल्यवित्तिवेद्यतया पदांशेऽर्थबोधकत्वमप्यवगाह्यत इति तु दुर्वचम्, तुल्यवित्तिवेद्यत्वे मानाभावात्, तत्प्रतिबन्धकस्य ग्राह्याभावावगाहिनो नेदं तद्धीजनकमिति ज्ञानस्य जागरूकत्वाच्च।

नच पदनिष्ठार्थधीजनकत्ववदर्थनिष्ठपदजन्यबोधविषयत्वमपि शक्तिर्विनिगमनाविरहात्, उभयविधज्ञानाच्छाब्दबोधस्य सर्वानुभवसिद्धत्वाच्च, कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशाच्च न परस्परजन्यशाब्दबोधे व्यभिचारः। एवञ्च द्वितीयशक्तिग्रहरूपात् तस्माच्छाब्दबोधापत्तिः सुकरेति वाच्यम्, तथा सति नेदमर्थधीजनकमिति ग्राह्याभावानवगाहिनोऽप्रतिबन्धकग्रहस्योपन्यासवैयर्थ्यात्। ग्राह्याभावानवगाहित्वेप्युभयविधशक्तिं प्रत्यन्वयव्यतिरेकाभ्यां प्रतिबन्धकत्वोपगमेन तदुपन्यासस्य सार्थक्यसम्पादने तूक्तज्ञानस्यासम्भव एवेत्याशयेन दूषयति—* नेदं तद्धीजनकमिति *। बाधेन * अप्रामाण्यज्ञानानास्कन्दितनिरुक्तनिर्णयात्मकप्रतिबन्धकसद्भावेनेत्यर्थः। * तद्ग्रहासम्भवात् *—अर्थविशेष्यकपदजन्यबोधविषयत्वग्रहासम्भवादित्यर्थः। * अन्यथेति * बाधग्रहेऽपि जायमानस्य रजतं बुद्धमनेनेति ग्रहस्य, इदं विशेष्यकरजतप्रकारकग्रहत्वे। 'भ्रान्तिज्ञस्य' इत्यनेन दोषाभाववत्त्वमपि सूच्यते *भ्रान्तत्वापत्तेरिति* तदभाववति तदवगाहिज्ञानवत एव तत्त्वादिति भावः।

इदञ्चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानादेव गृह्यते, अतस्तज्ज्ञानात् पूर्वं न बोधः। नापि लाक्षणिकोच्छेदापत्तिः, इष्टत्वात्,

प्रभा

तत्तदभावस्य सुलभत्वादिति चेन्न, यया सामग्र्या एका शक्तिर्गृह्यते तस्याः सामग्र्या एवापरशक्तिज्ञानेऽपि कारणतया 'तुल्यवित्तिवेद्यत्व (समानसामग्रीग्राह्यत्व) न्यायेन पदविशेष्यकशक्तिज्ञानस्यार्थांशे पदजन्योपस्थितिविषयावगाहित्वस्यार्थविशेष्यकशक्तिज्ञानस्य च पदांशेऽर्थोपस्थितिजनकत्वावगाहित्वस्य च कल्पनेनैकसत्त्वेऽपरसत्ताया अपि सत्त्वेनादोषात्। यदि च तुल्यवित्तिवेद्यत्वे मानाभावस्तदा कार्यतावच्छेदककोटौ 'स्वसामानाधिकरण्य—स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसम्बन्धेन तत्तच्छक्तिज्ञानवैशिष्ट्यं तत्तदुपस्थितौ निवेशनीयमिति न कापि व्यभिचारः। इत्थञ्च 'नेदं तद्धीजनकम्' इति ज्ञानस्य 'तत्प्रकारकतद्विशेष्यकबुद्धिम्प्रति तदभावप्रकारकतद्विशेष्यकबुद्धेरेव प्रतिबन्धकत्वम्' इति ज्ञानं ग्राह्याभाववगाहित्वेन प्रतिबन्धकमुच्यते। नच ग्राह्यस्य=ज्ञानविषयत्वेनाभिप्रेतस्य प्रतियोगिनोऽभावावगाहिज्ञानस्य प्रतियोगिप्रकारकबुद्धिम्प्रति प्रतिबन्धकत्वमिति ग्राह्याभावावगाहित्वस्यैव प्रतिबन्ध्यप्रतिबन्धकभाव इति वादिमतेऽर्थविशेष्यकशक्तिज्ञानाच्छाब्दबोधो दुर्वार इति वाच्यम्, अर्थविशेष्यकशक्तिज्ञानम्प्रति ग्राह्याभावानवगाहित्वेऽप्युभयविधशक्तिज्ञानं प्रति अन्वयव्यतिरेकाभ्यामनुभवसिद्धप्रतिबन्ध्यप्रतिबन्धकभावस्वीकारेणादोषात्।

अत एव 'घटवद् भूतलम्' इति बुद्धिम्प्रति 'भूतले घटाभावः' 'घटाभावो भूतलवृत्तिः' 'भूतलवृत्त्यभावप्रतियोगी घटः' इत्यादिनिश्चयानां सर्वानुभूतं प्रतिबन्धकत्वं सङ्गच्छते। ननु उक्तार्थधीजनकत्वं शब्दश्रवणमात्रेण गृह्यते चेत्तर्हि अगृहीतसंकेतादाप नारायणादिपदाच्छाब्दबोधापत्तिरित्याशङ्कायामाह—इदञ्चार्थधीति—शक्तित्वेनाभिमतञ्चेत्यर्थः। अत इति—शक्तिज्ञानं प्रति संकेतज्ञानस्य कारणत्वादेवेत्यर्थः। तज्ज्ञानात्=संकेतज्ञानात्। न बोध इति—अर्थविषयकबोधजनकत्वरूपशक्तिज्ञानाभावेन शाब्दबोध इत्यर्थः। इष्टत्वादिति—लक्षणारूपा वृत्तिर्नैवास्ति, किन्तु तीरेऽपि शक्तिरेवेति भावः। ननु घटपदेन शक्त्या घटत्वविशिष्टस्य बोध इव गङ्गापदेन शक्त्या प्रवाहत्वविशिष्टस्यैव बोधः स्यान्नतु तीरत्वविशिष्टस्य, तत्र तीरनिरूपितशक्तेरभावात्। नच तीरत्वावच्छिन्ननिरूपिताऽपि शक्तिस्तत्रास्तीति वाच्यम्, तीरपर्यायेषु कोशादौ तदगणनादिति चेन्न, प्रवाहत्वेनैव रूपेण तीरस्यापि बोधात्। नच तीरे प्रवाहत्वाभावाद् बोधानुपपत्तिः,

दर्पणव्याख्या

अत्रेदञ्चिन्त्यम्—यत्रेदं पदमेतदर्थं बोधयत्विति सङ्केतज्ञानमात्राच्छाब्दबोधस्तत्र बोधकताशक्तिज्ञानस्य हेतुतावादिमते व्यभिचारो दुरुद्धर एव। नच तत्र सङ्केतज्ञानमेव बोधकताज्ञानमित्युक्तमेवेति वाच्यम्, सविषयकज्ञानस्य तद्विषयविषयकत्वेऽपि तद्विशेष्यांऽशे तत्प्रकारो न तेन विषयीक्रियते। 'घटमहं जानामि' इत्यनुव्यवसायेन ज्ञानांशे घटत्वप्रकारकत्वघटविशेष्यकत्वयोरेव विषयीकरणात्। अन्यथा भ्रान्तिज्ञस्य भ्रान्तत्वापत्तिरनिवार्यैव स्यात्।

अत एव शब्दचिन्तामणौ तात्पर्य्यविषयसंसर्गज्ञानपूर्वकत्वस्य पदपक्षकानुमानेन सिद्धावपि नेतरपदार्थेऽभिमतापरपदार्थसंसर्गसिद्धिः, तादृशसंसर्गज्ञानपूर्वकत्वानुमानेन तत्पदार्थे इतरपदार्थतात्पर्य्यविषयसंसर्गस्याविषयीकरणादित्यस्वरसात् पदार्थपक्षकानुमानमवतारितं पक्षधरमिश्रैरिति।

शक्तिग्राहकमाह—* इदञ्चेति * शक्तित्वेनाभ्युपेतं बोधकत्वञ्चेत्यर्थः। पित्रादित्यादिनासपरिग्रहः। * गृह्यत इति * कार्यतावच्छेदककोटौ स्वातन्त्र्यनिवेशान्न संकेतज्ञानाजन्ये संकेतज्ञानात्मकबोधकताज्ञाने व्यभिचार इति भावः। पूर्वोक्तां लाक्षणिकोच्छेदापत्तिमिष्टत्वेन परिहरति—* नापीति *

SGDF

शक्तिग्राहकव्यवहारस्य मुख्य-लक्ष्यसाधारण्यात् ।

किञ्च प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानङ्गत्वाच्छाब्दबोधं प्रति शक्तिजन्योपस्थितेः, लक्ष-

प्रभा

सामीप्यमूलकाभेदाध्यवसायेनारोपितप्रवाहत्वस्य तत्रापि सत्त्वात् । व्यवहारस्येति—अर्थबोधनाय शब्दप्रयोगरूपप्रयोजकवृद्धव्यवहारस्येत्यर्थः । तस्यापि परम्परया शक्तिग्राहकत्वम्, नतु साक्षात् । तथाहि—प्रयोजक (आज्ञापक) वृद्धेन प्रयोज्य (आज्ञाप्य) वृद्ध उक्तः—'घटमानय' इति । तदनन्तरं घटमानयन्तं प्रयोज्यवृद्धं पश्यता बालेन=शक्तिं जिज्ञासुनाऽनुमितम्—'अस्य प्रयोज्यवृद्धस्य चेष्टा (कायव्यापारः) घटानयनविषयकप्रवृत्तिजन्या' चेष्टात्वान्मदीयचेष्टावदिति चेष्टाकारणीभूतां प्रवृत्तिं (यत्नं) मनुमाय, अस्य प्रवृत्तिः 'घटानयनं मत्कर्त्तव्यम्' इति ज्ञानजन्या मदीयभोजनादिविषयकप्रवृत्तिवदिति प्रवृत्तिकारणं कर्त्तव्यज्ञानमनुमाय, तदुक्तम्—

ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः (यत्नः) ।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्यं भवेत्फलम् ॥ इति ॥

घटानयनकर्त्तव्यताज्ञानं किञ्चित्कारणजन्यं कादाचित्कत्वाद् घटवदिति सामान्यरूपेण कारणमनुमीयते । ततोऽस्य कार्यताज्ञानम् 'घटमानय' इति वाक्यजन्यं तदन्वयव्यतिरेकानुविधायित्वात्, यो यदन्वयव्यतिरेकानुविधायी स तज्जन्यः । यथा—दण्डाद्यन्वयव्यतिरेकानुविधायी घटो दण्डादिजन्यस्तथा घटानयनकर्त्तव्यताज्ञानं वाक्यजन्यमिति वाक्यं कारणत्वेनानुमीयते । एवमुक्तरीत्या घटज्ञाने घटपदं कारणम् । एवञ्च वाक्येन, पदेन च समर्थस्य सम्बन्धं विना तद्विषयकं ज्ञानं न भवेदिति पदपदार्थयोर्वाक्यवाक्यार्थयोश्च कश्चन सम्बन्धो वाच्यः । स च सम्बन्धो नैयायिकैरीश्वरेच्छारूपः, मीमांसकैर्बोधजनकतावच्छेदकशक्तिरूपः, प्राचीनदीक्षितादिभिर्बोधजनकत्वरूपः स्वीक्रियते । स एव सम्बन्धः शक्तिरित्युच्यते । एवंविधपरम्परया शक्तिज्ञाने व्यवहारज्ञानं कारणमिति । इयान् विशेषः—गङ्गापदशक्यत्वेन प्रवाहस्य प्रसिद्धत्वान्मुख्यत्वम्, तीरस्याप्रसिद्धत्वाल्लक्ष्यत्वमिति । एवमेव लक्षणास्थले सर्वत्र बोद्धव्यम् । साधारण्यादिति— व्यवहारस्य तुल्यत्वात्तत्रापि शक्तिरेवेति भावः । शाब्दबोधानङ्गत्वादिति—शब्देतरप्रमाणेन=चक्षुरादिना पदार्थोपस्थितिसत्त्वेऽपि शाब्दबोधानुत्पत्त्या तादृशोपस्थितेः शाब्दबोधाकारणत्वमिति भावः । ननु व्यवहारस्य लक्षणाग्राहकतयैवोपपत्तौ गङ्गापदे तीरनिरूपिता शक्तिरप्रामाणिकी । अत एव तीरपर्य्यायमध्ये न तस्य पाठ इत्यत आह—किञ्चेति—कार्यकारणभावो द्विधा—सामान्यरूपेण, विशेषरूपेण च । तत्र सामान्यरूपेण कार्यकारणभावे लाघवं दर्शयति—शाब्दबोधम्प्रतीति । शक्तिजन्येति— ज्ञायमानशक्तिजन्येत्यर्थः, ज्ञायमानलक्षणाजन्येत्यर्थश्च । तेनाज्ञातशक्त्यादिसत्त्वेऽप्युपस्थितेरभावेनान्वयव्यभिचार इति भावः । ननु तीरादिविषयकबोधजनकता प्रवाहादिविषयकधीजनकतातो भिन्नेति सर्वसम्मतम् । तथाच गङ्गापदादिनिष्ठतीरादिबोधजनकतायामपि

दर्पणव्याख्या

* शक्तिग्राहकेति * शक्य इव शक्तिग्राहकव्यवहारादेर्लक्ष्येऽपि तुल्यत्वादित्यर्थः ।

ननु शक्यलक्ष्यव्यवहारानुपपत्त्या लक्ष्यव्यावृत्तैव सा वाच्या । तथाच लक्ष्योपस्थितये लक्षणावृत्तेरावश्यकत्वेन कथमुक्तापत्तेरिष्टत्वमत आह—* किञ्चेति * शाब्दबोधानङ्गत्वादिति * घटादिपदेऽगृहीतशक्तिकस्य प्रत्यक्षाद्युपस्थितघटादेर्घटादिपदाच्छाब्दबोधानुदयादन्वयव्यभिचारेण प्रत्यक्षाद्युपस्थितेः शाब्दबोधाजनकत्वादित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

णाजन्योपस्थितेश्च कारणत्वं वाच्यम्, तथाच कार्य्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुतेति लाघवम्।

अपिच लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः, शक्तिजन्योपस्थितिं विनाऽपि लक्षणाजन्योपस्थितितः शाब्दबोधात्। नचाव्यवहितोत्तरत्वसम्बन्धेन

प्रभा

शक्तित्वकल्पने लक्षणाखण्डकमते गौरवम्। शक्यसम्बन्धरूपा लक्षणा तु सिद्धैवेति न तत्कल्पनायां गौरवम्। तज्जन्योपस्थितेः शाब्दबोधहेतुत्वमात्रं मया (लक्षणावादिना) कल्प्यते इति नाधिकं गौरवम्। किञ्च—बोधजनकतात्वं न शक्तित्वम्, अनुमानप्रमाणादिनिष्ठबोधजनकतायामतिव्याप्तेः। तदतिरिक्तबोधजनकतात्वस्य शक्तित्वकल्पने त्वतिगौरवम्, 'अन्यायश्चानेकार्थकल्पनम्' इति न्यायविरोधश्चेत्याह—अपि चेति। प्रत्येकमिति—शक्तिज्ञानजन्योपस्थितेर्लक्षणाज्ञानजन्योपस्थितेश्च प्रत्येकमित्यर्थः। व्यभिचार इति—'कारणाभावे कार्याभावः' इति व्यतिरेकव्याप्तेर्व्यभिचारेत्यर्थः। व्यभिचारमाह—शक्तीति—यत्र शक्तिज्ञानजन्योपस्थित्या बोधस्तत्र लक्षणाज्ञानजन्योपस्थितिरूपकारणाभावे कार्याभाव इत्यस्य व्यभिचारो बोध्यः। अव्यवहितोत्तरत्वेति—अव्यवहितोत्तरत्वञ्च-स्वविशिष्टत्वम्, वैशिष्ट्यञ्च-स्वध्वंसाधिकरणक्षणानुत्पत्तिकत्व-स्वोत्पत्त्यधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वोभयसम्बन्धेन। यन्निरूपितमव्यवहितोत्तरत्वं चिकीर्षितं तत्त्वम्। प्रकृते शक्तिज्ञानजन्योपस्थितिविशिष्टशाब्दबोधं प्रति शक्तिज्ञानजन्योपस्थितिः कारणम्। एवं लक्षणाज्ञानजन्योपस्थितिविशिष्टशाब्दबोधं प्रति लक्षणाज्ञानजन्योपस्थितिः कारणमिति वाच्यम्। वैशिष्ट्यञ्च—स्वसामानाधिकरण्य—स्वध्वंसाधिकरणक्षणानुत्पत्तिकत्व—स्वाधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वैतत्त्रितयसम्बन्धेन। यत्र शक्तिज्ञानजन्योपस्थितितः शाब्दबोधस्तत्र समवायेन चैत्रे उपस्थितिश्चैत्रे एव समवायेन शाब्दबोध इति स्व (उपस्थिति) सामानाधिकरण्यं शाब्दबोधे। एतेनान्यस्योपस्थित्याऽन्यस्य शाब्दबोधो न। एकस्मिन् क्षणे उपस्थितिरुत्पद्यते, द्वितीयक्षणे तिष्ठति, तृतीयक्षणे नश्यति। तथाचोपस्थितेर्द्वितीयक्षणे यः शाब्दबोधः स तद्विशिष्टः। उपस्थितेर्ध्वंसाधिकरणक्षणस्तृतीयस्तत्र शाब्दबोधो नोत्पन्नः, किन्तु द्वितीये एवोत्पन्न इति तादृशक्षणानुत्पत्तिकत्वं तत्र सुलभम्। तृतीयसम्बन्धे स्वाधिकरणक्षणपदेन स्वोत्पत्त्यधिकरणक्षणो ग्राह्यः, तथाच स्वोत्पत्त्यधिकरणक्षणः प्रथमस्तस्य क्षणस्य यो ध्वंसस्तस्याधिकरणक्षणो द्वितीयस्तत्क्षणोत्पत्तिकत्वमपि तादृशशाब्दबोधे। स्वध्वंसाधिकरणेति द्वितीयसम्बन्धाभावे शक्तिज्ञानजन्योपस्थितिवैशिष्ट्यं लक्षणाज्ञानजन्यशाब्दबोधेऽपि स्यात्, तस्य शक्तिज्ञानजन्योपस्थित्यधिकरणक्षणस्य यो ध्वंसस्तदधिकरणक्षणोत्पत्तिकत्वात्। तृतीयसम्बन्धाभावे लक्षणाज्ञानजन्योपस्थितिवैशिष्ट्यं ततः प्राग्भाविनि शक्यार्थविषयकशाब्दबोधे स्यात्, तस्य लक्षणाज्ञानजन्योपस्थितिध्वंसाधिकरणक्षणानुत्पत्तिकत्वात्। एवम् 'इकोयणचि' इत्यादावजाद्यव्यवहितपूर्वत्वञ्च-स्वविशिष्टत्वरूपम्, वै० स्वप्रागभावाधिकरणक्षणोत्पत्तिकत्व-स्वोत्पत्त्यधिकरणक्षणप्रागभावाधिकरणक्षणानुत्पत्तिकत्व—स्वोच्चारणकर्तृकर्तृकोच्चारणकर्मत्वैतत्त्रितयसम्बन्धेन बोध्यम्। शब्दनित्यतावादिनये स्वाविर्भावध्वंसस्य स्वाविर्भावप्रागभावस्य निवेशेन स्वयं लक्षणमूहनीयम्।

दर्पणव्याख्या

नन्वमायत्त्या तादृशगौरवं सौढव्यमत आह—*अपिचेति*। व्यभिचारो व्यतिरेके बोध्यः। तमेवोपपादयति—* शक्तिजन्योपस्थितिमिति *। अव्यवहितोत्तरत्वेति * तच्च—स्वध्वंसाधिकरणक्षणानुत्पत्तिकत्वे सति स्वाधिकरणध्वंसाधिकरणक्षणोत्पत्तिकत्वम्। अत्र स्वपदम्—शक्तिज्ञानजन्योपस्थितिपरम्। लक्षणाज्ञानजन्यपदार्थोपस्थितिप्राग्वर्त्तिशक्तिज्ञानजन्यपदार्थोपस्थितिजन्यशाब्दबोधे व्यभिचारवारणाय विशेष्यम्। शक्यशाब्दबोधानन्तरभाविलक्षणाज्ञानजन्योपस्थिति-

तत्तदुपस्थितिमत्त्वं कार्य्यतावच्छेदकम्, तत्तदुपस्थितित्वञ्च कारणतावच्छेदकम्, अनन्तकार्य्यकारणभावप्रसङ्गात्। किञ्च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन, लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारः, गौरवञ्च प्राग्वदेव द्रष्टव्यम्। नच 'इदं पदमेतदर्थबोधकम्' इति शक्तिज्ञानेन कार्य्यकारणभावकल्पनेऽपि तत्तदर्थभेदेनानेककार्य्यकारणभावकल्पने गौरवं तवापि समानम्, परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम्,

प्रभा

तत्तदुपस्थितिमत्त्वमिति—शक्तिज्ञानजन्योपस्थितिविशिष्टशाब्दबुद्धित्वम्, लक्षणाज्ञानजन्योपस्थितिविशिष्टशाब्दबुद्धित्वञ्चेत्यर्थः। तत्तदुपस्थितीति—शक्तिज्ञानजन्योपस्थितित्वम्, लक्षणाज्ञानजन्योपस्थितित्वञ्चेत्यर्थः। अनन्तेति—नचोपस्थितेर्द्वैविध्यात् कार्यकारणभावोऽपि द्विविध एव स्यादित्यनन्तेत्यसङ्गतमिति वाच्यम्, व्यक्तिभेदेन द्विविधोपस्थितेरप्यानन्त्यमित्याशयात्। शक्तिज्ञानजन्योपस्थितित्वेनोपस्थितिमात्रस्योक्ताव्यवहितोत्तरत्वस्य वक्तुमशक्यत्वात् तत्तद्व्यक्तेर्ग्रहणे कार्यकारणभावानन्त्यं स्पष्टमेवेति भावः। यद्वा—अव्यवहितोत्तरत्वम्=स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वम्। प्रकृते स्वम्=उपस्थितिः। गौरवान्तरमाह—किञ्चेति—वृत्तिज्ञानजन्योपस्थितिः, उपस्थितिजन्यः शाब्दबोध इति उपस्थितिं प्रत्यपि शक्तिज्ञान-लक्षणाज्ञानयोः कारणत्वस्यावश्यकत्वे यत्र शक्तिज्ञानादुपस्थितिस्तत्र लक्षणाज्ञानाभावः, यत्र लक्षणाज्ञानादुपस्थितिस्तत्र शक्तिज्ञानाभाव इति व्यतिरेकव्याप्तिव्यभिचारवारणाय उपस्थितौ तत्तद्व्यक्तित्वेन शक्तिज्ञान-लक्षणाज्ञानयोः स्वाव्यवहितोत्तरत्वं निवेश्य कार्यकारणभावस्वीकारे व्यक्तीनामानन्त्यात्कार्यकारणभावानन्त्येऽतिगौरवमिति भावः।

ननु पूर्वोक्तरीत्या सामान्यतः कार्यकारणभावस्वीकारे उपस्थितेः, शाब्दबोधस्य चादर्शनेन तत्तत्पदं तत्तदर्थञ्च निवेश्यैव कार्यकारणभावो वाच्य इति लक्षणाऽनङ्गीकर्तृमतेऽपि गौरवं तुल्यमित्याह—नचेदमिति—'गङ्गापदं प्रवाहविषयकबोधजनकम्' इति शक्तिज्ञानत्वेनोपस्थितिं प्रति कार्यकारणभावकल्पनेऽपीत्यर्थः। पदतदर्थेति—पदञ्च तदर्थश्चेति पदतदर्थौ तयोर्भेदेनेत्यर्थः। पदभेदेन यथा भगीरथखातावच्छिन्नप्रवाहविषयकोपस्थितिं प्रति गङ्गापदं भगीरथखातावच्छिन्नप्रवाहविषयकबोधजनकमिति शक्तिज्ञानस्येव जाह्नवीपदं तादृशार्थबोधजनकमिति शक्तिज्ञानस्यापि कारणत्वमिति पदभेदेन कार्यकारणभावभेदः। प्रवाह-

दर्पणव्याख्या

जन्यशाब्दबोधे व्यभिचारवारणाय सत्यन्तम्। प्रकृते लक्षणाज्ञानजन्योपस्थितिजन्यशाब्दबोधे उक्तसम्बन्धेन शक्तिज्ञानजन्योपस्थितिवैशिष्ट्याभावेन तत्कार्य्यतावच्छेदकाक्रान्तत्वान्न व्यभिचार इति भावः।

* अनन्तेति * स्वत्वस्य तत्तद्व्यक्तिविश्रान्तत्वेनाननुगततया तद्घटिताव्यवहितोत्तरत्वसम्बन्धेनोपस्थितिमत्त्वस्य कार्य्यतावच्छेदककोटौ निवेशे कार्य्यकारणभावानन्त्यमिति भावः। न्यायसाम्यादाह—* किञ्चेति * प्राग्वदेवेति * शक्तिज्ञानं विनाऽपि लक्षणाज्ञानात् पदार्थोपस्थितेः, एवं लक्षणाज्ञानं विनाऽपि शक्तिज्ञानात्पदार्थोपस्थितेस्तयोरुपस्थितिहेतुतायां परस्परं व्यभिचारः, अव्यवहितोत्तरत्वसम्बन्धेन तत्तत्कारणवैशिष्ट्यस्य कार्य्यताऽवच्छेदककोटौ निवेशे च गौरवं तद्वदेवेत्यर्थः।

ननु बोधकत्वशक्तिवादिनोऽपि गङ्गापदं प्रवाहबोधकमिति शक्तिग्रहाल्लक्ष्यार्थोपस्थिति-शाब्दबोधयोरापत्तिवारणाय कारणतावच्छेदककुक्षौ तत्तदर्थनिवेश आवश्यकः, तथाच लक्षणावादिमते क्व गौरवमित्याशङ्क्य निराचष्टे—*नचेति*। * परस्परेति * गङ्गापदनिष्ठतीरबोधकत्वग्रहं विनाऽपि तीरादिपदनिष्ठतादृशशक्तिग्रहेण तीरबोधात्तयोः परस्परजन्यबोधे व्यभिचारप्रतिरोधायेत्यर्थः।

Sri Gargeshwari Digital Foundation

शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्य्यकारणभावानन्त्यस्य तवापि साम्यात्। लक्षणाकार्य्यकारणभावकल्पनागौरवं परं तवातिरिच्यते। अथ वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता,

प्रभा

विषयकोपस्थितिं प्रति 'गङ्गापदं प्रवाहविषयकबोधजनकम्' इति ज्ञानस्येव तीरविषयकोपस्थितिं प्रति 'गङ्गापदं तीरविषयकबोधजनकम्' इति शक्तिज्ञानस्यापि कारणत्वमित्यर्थभेदेन कार्यकारणभावभेदः। एवं लक्षणावादिमतेऽपि प्रवाहविषयकोपस्थितिं प्रति गङ्गापदनिष्ठशक्तिज्ञानजन्योपस्थितिः कारणम्। तीरविषयकोपस्थितिं प्रति गङ्गापदनिष्ठलक्षणाज्ञानजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयेन साम्यमेवेत्याह—गौरवं तवापि समानमिति। परस्परव्यभिचारेति—यत्र 'गङ्गापदं तीरबोधकम्' इति शक्तिज्ञानेन तीरोपस्थितिस्तत्र 'तटपदं तीरबोधकम्' इति तीरोपस्थापकशक्तिज्ञानस्याभावः। यत्र 'तटपदं तीरबोधकम्' इति शक्तिज्ञानेन तीरोपस्थितिस्तत्र 'गङ्गापदं तीरबोधकम्' इति शक्तिज्ञानस्याभाव इति व्यतिरेकव्याप्तिव्यभिचारवारणाय समवायेन स्वसामानाधिकरण्य—स्वाव्यवहितोत्तरत्वोभयसम्बन्धेनोक्तत्रितयसम्बन्धेन वा तत्तच्छक्तिज्ञानवैशिष्ट्यं तत्तदुपस्थितौ तत्रैव तत्तदुपस्थितिवैशिष्ट्यं तत्तच्छाब्दबोधे च निवेश्यमिति वैयाकरणमतेऽपि अतिगौरवं स्फुटमेवेति भावः। गौरवसाम्यं खण्डयति—शक्तिभ्रमेति— अयम्भावः—यत्र 'गङ्गापदं तीरे शक्तम्' इति शक्तिभ्रमस्तत्र तीरोपस्थितिं प्रति गङ्गापदशक्तिज्ञानस्य कारणत्वम्। यत्र 'गङ्गापदं तीरे लाक्षणिकम्' इति ज्ञानात्तीरोपस्थितिस्तत्र तीरोपस्थितिं प्रति गङ्गापदनिष्ठलक्षणाज्ञानस्य कारणत्वम्। एवं तीरोपस्थितिं प्रति तटादिपदनिष्ठशक्तिज्ञानस्यापि कारणत्वमित्युक्तरीत्या कारणत्रयवैशिष्ट्यं तीरोपस्थितौ निवेश्यैवात्रापि व्यभिचारो वारणीयो लक्षणावादिना। शक्तिवादिनस्तु 'गङ्गापदं तीरे लाक्षणिकमिति ज्ञानाभावेन तीरोपस्थितौ तादृशज्ञानकारणत्वस्य तदव्यवहितोत्तरत्वनिवेशस्य चाभावेन लाघवमिति लक्षणावादिमते कार्यकारणभावे गौरवं दुष्परिहरमिति भावः। तदाह—लक्षणाकार्यकारणभावकल्पनागौरवमिति।

ननु तीरोपस्थितिं प्रति गङ्गापदनिष्ठलक्षणाज्ञानम्, भ्रमस्थले गङ्गापदनिष्ठशक्तिज्ञानम्, तटादिपदनिष्ठशक्तिज्ञानञ्च कारणमिति कारणत्रयस्वीकारे एव गौरवम्। परन्तु लक्षणावादिनापि तीरोपस्थितिं प्रति गङ्गापदनिष्ठवृत्तिज्ञानं तटादिपदनिष्ठशक्तिज्ञानञ्च कारणमिति कारणद्वयमेव स्वीक्रियते। लक्षणाज्ञानस्यापि वृत्तिज्ञाने एवान्तर्भाव इति गौरवाभाव इत्याह—अथ वृत्तीति—अयम्भावः 'तीरविषयकशाब्दबोधम्प्रति गङ्गापदनिष्ठवृत्तिज्ञानजन्योपस्थितिः कारणम्' इत्येव वाच्यम्। एवञ्च गङ्गापदनिष्ठवृत्तिज्ञानजन्योपस्थितित्वमेव कारणतावच्छेदकमित्युक्तरूपेण लक्षणाज्ञानजन्योपस्थितेरपि कारणत्वे गौरवाभावस्तदर्थं पृथक् कार्यकारणभावाकल्पनात्। इदमुपलक्षणम्—तीरविषयकशाब्दबोधम्प्रति तटादिपदनिष्ठशक्तिज्ञानजन्यापस्थितित्वेनापि कारणत्वस्य।

दर्पणव्याख्या

* शक्तिभ्रमानुरोधेनेति * गङ्गापदस्य तीरे शक्तिभ्रमदशायां तीरोपस्थित्यादेः सर्वमतसिद्धतया तवापि तत्तत्कारणतावच्छेदककोटौ तत्तत्पदत्तदतर्थनिवेशस्यावश्यकत्वादित्यर्थः।

तवेति लक्षणास्वीकर्तुरित्यर्थः। शक्तिज्ञानकारणतायां शक्तेश्शक्तित्वेन निवेशे स्यादेवोक्तदोषः किन्तु वृत्तित्वेनेति न तत्सम्भावनेत्याशङ्कते—*अथेति*। *वाच्यमिति* शक्तिजन्योपस्थिताविव लक्षणाजन्योपस्थितावपि शक्तिलक्षणासाधारणवृत्तित्वावच्छिन्नजन्यत्वसत्त्वादिति भावः।

SGDF

वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न, शक्ति-लक्षणान्यतरत्वस्य, शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वाच्छक्तित्वमपेक्ष्य गुरुत्वात्, शाब्दबोधहेतुताऽवच्छेदकपदार्थोपस्थितिहेतुवृत्तेरज्ञाने तद्घटितकार्य्यकारणभावग्रहस्याप्यसम्भवात्।

प्रभा

वृत्तिज्ञानत्वेनेति—एवं तीरोपस्थितिं प्रत्यपि गङ्गापदनिष्ठवृत्तिज्ञानं कारणमिति वृत्तिज्ञानत्वमेकमेव कारणताऽवच्छेदकमिति तेनैव रूपेण लक्षणाज्ञानस्यापि संग्रहे दोषाभाव इति भावः। इदमप्युपलक्षणम्—तीरविषयकोपस्थितिं प्रति तटादिपदनिष्ठशक्तिज्ञानत्वेन कारणत्वस्य। तथा कार्यकारणभावस्वीकारेऽपि गौरवमाह—शक्तिलक्षणेति—शक्तिभिन्नं सत् लक्षणाभिन्नं यत्तद्भिन्नत्वरूपान्यतरत्वे जगत्प्रवेशकृतगौरवस्य स्वरूपकृतगौरवस्य, शक्तिभेदविशिष्टो यो लक्षणाभेदो लक्षणाभेदविशिष्टो यः शक्तिभेद इत्येवं भेदानां विशेष्यविशेषणभावव्यत्यासेन निवेशप्रयुक्तगौरवस्य च सत्त्वादाह—शाब्दबोधहेत्विति - शाब्दबोधस्य हेतुः शाब्दबोधहेतुः स चासौ पदार्थोपस्थितिश्चेति कर्मधारयस्तदनुकूलो यः पदपदार्थयोः सम्बन्धः=शक्तिरूपो लक्षणारूपो वा तत्त्वं वृत्तित्वम्। पदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वमात्रोक्तौ गगनपदस्य तदर्थेनाकाशेन सह यः सम्बन्धः समवायस्तस्यापि आश्रयतयाऽऽकाशोपस्थापकत्वात् समवायेऽतिव्याप्तिः स्यादिति पदार्थोपस्थितौ शाब्दबोधहेत्विति विशेषणम्। तथाच पदनिष्ठवृत्तिज्ञानजन्यपदार्थोपस्थितावेव शाब्दबोधहेतुत्वस्य सत्त्वेन शाब्दबोधहेत्वित्यादेः शाब्दबोधहेतुपदनिष्ठवृत्तिज्ञानजन्योपस्थित्यनुकूलपदपदार्थसम्बन्धत्वमित्यर्थो लभ्यते। एवञ्च पदार्थोपस्थितिम्प्रति वृत्तिज्ञानं कारणमित्युक्तौ वृत्तिज्ञाने साक्षात्परम्परया वा यद्विशेषणीभूतं तत्सर्वं कारणतावच्छेदकं स्यात्। वृत्तिज्ञाने च वृत्तित्वं स्वाश्रयविषयित्वसम्बन्धेन विशेषणीभूतमिति गुरुभूते वृत्तित्वे कारणत्वावच्छेदकत्वकल्पनापेक्षया शक्तिज्ञानत्वेन कारणत्वं स्वीकृत्य लघुभूते शक्तित्वे एव कारणतावच्छेदकत्वं स्वीकार्यम्। एवञ्च वृत्तिज्ञानत्वेन कारणत्वं हेयमेव। किञ्च शाब्दबोधनिष्ठकार्यतानिरूपिता या वृत्तिज्ञानजन्यपदार्थोपस्थितिनिष्ठा कारणता तदवच्छेदकस्य पदार्थोपस्थितिवृत्तेः=(पदार्थोपस्थितिवृत्तेरित्येव पाठः, हेतुपदवैयर्थ्यात्, काशिकाकारादिभिस्तथैव व्याख्यातत्वाच्च) पदार्थोपस्थितिनिष्ठस्य धर्मस्य पदनिष्ठवृत्तिज्ञानजन्यपदार्थोपस्थितित्वरूपस्य विशिष्टज्ञाने विशेषणज्ञानस्य कारणतया विशेषणीभूतवृत्तित्वज्ञानं विना ज्ञानं न सम्भवतीति कारणतावच्छेदकज्ञानमन्तरा शाब्दबोध-पदार्थोपस्थित्योः कार्यकारणभावोऽपि न सम्भवतीति शाब्दबोधपदार्थोपस्थित्योः कार्यकारणभावज्ञाने वृत्तित्वज्ञानं कारणम्। वृत्तित्वज्ञाने च वृत्तित्वघटकतया निविष्टशाब्दबोधपदार्थोपस्थित्योः कार्यकारणभावज्ञानं कारणमित्यन्योऽन्याश्रयतया किमपि ज्ञानं न भवतीति भावः।

दर्पणव्याख्या

* शक्तिलक्षणेति * शक्तिभिन्नत्वे सति लक्षणाभिन्नं यत्तद्भिन्नत्वस्येत्यर्थः। * शाब्दबोधेति * शाब्दबोधजनिका या पदार्थोपस्थितिः पदवृत्तिज्ञानजन्योपस्थितिस्तदनुकूलेत्यर्थः, कारणताऽवच्छेदकत्वे उभयसाधारणं दूषणमाह—* गुरुत्वादिति * अस्मदभिमतशक्तित्वमपेक्ष्य निरुक्तान्यतरत्वादेर्गुरुत्वादित्यर्थः। द्वितीये दूषणान्तरमाह—* शाब्दबोधहेत्विति *। शाब्दबोधानुकूलत्वस्य तज्जनकत्वस्य कारणताऽवच्छेदकोपस्थित्यधीनत्वेन तस्य च पदवृत्तिज्ञानजन्योपस्थितित्वात्मकतया तज्ज्ञानस्य स्वघटकवृत्तित्वज्ञानं विना असम्भवेन कार्य्यकारणभावग्रह एव दुर्घट इत्यर्थः। तथाच वृत्तित्वग्रहे शाब्दबोधपदार्थोपस्थित्योः कार्य्यकारणभावग्रहस्तद्ग्रहे च निरुक्तपदपदार्थसम्बन्धत्व-

अथ ममापि शक्तिज्ञानत्वेनैव हेतुता, शक्यसम्बन्धज्ञानरूपलक्षणायां शक्तेरपि प्रवेशात्, इति चेन्न, शक्तिज्ञान-पदार्थोपस्थित्योः कार्य्यकारणभावे समानविषयत्वस्यावश्यकत्वात् । अन्यथा

प्रभा

आपतितं गौरवं प्रकारान्तरेण परिहरन्नाह—अथ ममापीति—लक्षणायां वृत्तित्ववादिनो ममापीत्यर्थः। एतेन शक्यसम्बन्धरूपलक्षणायाः केनाप्यपलपितुमशक्यत्वात् 'लक्षणा नाङ्गीक्रियते' इत्यसङ्गतमित्यपास्तम्, लक्षणायाः सर्वसम्मतत्वेऽपि तत्र वृत्तित्वस्य सर्वसम्मतत्वाभावात्। शक्तिज्ञानत्वेनेति—नतु शक्तिज्ञानत्वेन, लक्षणाज्ञानत्वेन च हेतुत्वमित्यर्थः। हेतुतेति—शाब्दबोधम्प्रति, तदनुकूलपदार्थोपस्थितिं प्रति च हेतुतेत्यर्थः, लक्षणायाः शक्तिविषयार्थसम्बन्धरूपतया लक्षणाज्ञानविषयतायाः शक्तावपि सत्त्वादिति भावः। ननु 'शक्यादशक्योपस्थितिर्लक्षणा' इति नये लक्षणायास्तीरोपस्थितिरूपतया तज्ज्ञानविषयतायाः शक्तावसत्त्वेन शक्तिज्ञानत्वेन हेतुत्वं दुर्वचमित्यत आह—शक्यसम्बन्धेति। शक्तेरपि प्रवेशादिति—शक्तेरपि विशेषणतयैव प्रवेशः, नतु देवदत्तगृहस्य काकादेरिव कादाचित्कत्वे सति व्यावर्तकत्वोपलक्षणतयेति भावः। ननु लक्षणायां शक्तेर्विशेषणत्वेऽपि यदि शक्तौ पदार्थोपस्थितौ च 'तत्पदजन्यपदार्थोपस्थितिं प्रति तत्पदनिष्ठशक्तिज्ञानं कारणम्' इत्येवंरूपेण विषयमनिवेश्यैव कार्यकारणभावः स्यात्तदा लक्षणाज्ञानस्यापि गङ्गादिपदनिष्ठप्रवाहविषयकशक्तिविषयकत्वेन गङ्गापदजन्यतीरविषयकोपस्थितिम्प्रति गङ्गादिपदनिष्ठशक्तिज्ञानत्वेन कारणत्वं वक्तुं शक्यम्। तथापि नैवं कार्यकारणभावोऽत्र, किन्तु 'तत्तत्पदजन्यतत्तदर्थविषयकोपस्थितिं प्रति तत्तत्पदनिष्ठतत्तदर्थनिरूपितशक्तिज्ञानं कारणम्' इति विषयं निवेश्यैव वक्ष्यमाणदोषपरिहाराय कार्यकारणभावो वाच्यः, तथाच तीरविषयकोपस्थितिम्प्रति गङ्गापदनिष्ठतीरनिरूपितशक्तिज्ञानस्य कारणतया लक्षणास्थले तादृशशक्तिज्ञानाभावेन शक्तिज्ञानत्वेन कारणत्वं दुर्लभमित्याह—शक्तिज्ञानपदार्थोपस्थित्योरिति। समानेति—कार्यकारणभावे समानविषयत्वप्रवेशस्यावश्यकत्वादित्यर्थः। तद्विषयकोपस्थितिम्प्रति तद्विषयकशक्तिज्ञानत्वेन हेतुत्वस्यावश्यकत्वादिति यावत्। 'गङ्गापदशक्यसम्बन्धि तीरम्' इति लक्षणाज्ञानस्य तीरविषयकत्वे सति शक्तिविषयकत्वेऽपि तीरांशे शक्तिविषयकत्वानवगाहितया उपस्थितेश्च तीरविषयकत्वावगाहनेन समानविषयकत्वाभावान्न तादृशकार्यकारणभावेन निर्वाह इति भावः। अन्यथा=शक्तिज्ञानपदार्थोपस्थित्योः समानविषयकत्वाभावेऽपि कार्यकारणभावस्वीकारे।

दर्पणव्याख्या

रूपवृत्तित्वग्रह इत्यन्योन्याश्रयेणोक्तस्य वृत्तित्वासम्भव इति भावः।

वस्तुतस्तु विजातीयपदार्थोपस्थितिजनकपदपदार्थयोः सम्बन्धः शक्तिः। वैजात्यस्य निवेशाच्च नाकाशोपस्थितिजनकसमवायादावतिव्याप्तिः। तादृशवैजात्यपरिचायकञ्च शाब्दबोधानुकूलेति। नतु तेन रूपेणोपस्थितेर्निवेश इत्यन्तिमलक्षणस्यादुष्टत्वमिति। *ममापि* लक्षणाऽङ्गीकर्त्तुरपीत्यर्थः। *प्रवेशादिति* तथाच लक्षणाज्ञानस्यापि शक्तिज्ञानत्वेनैव हेतुत्वेन लक्षणाज्ञानजन्यलक्ष्यार्थोपस्थित्यादौ शक्तिज्ञानस्य हेतुतायां व्यभिचार इत्यर्थः। विषयमनिवेश्यैव यदि शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावः सम्भवेत् तदा स्यादप्युक्तप्रकारः, स एव न सम्भवतीत्याह—*शक्तिज्ञानेति*। *आवश्यकत्वादिति* तदर्थविषयकोपस्थितिं प्रति तदर्थनिरूपिततत्पदनिष्ठशक्तिज्ञानत्वेन हेतुताया अवश्यकल्प्यत्वादित्यर्थः। आवश्यकत्वमेवाह—*अन्यथेति* शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावे समानविषयत्वानिवेशे इत्यर्थः। सम्बन्धाग्रहवत इत्युक्तया लक्षणाज्ञानासत्त्वं बोधितम्।

SGDF Sri Gargeshwari Digital Foundation

गङ्गा-तीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि 'गङ्गायां घोषः' इति वाक्यात्तीरबोध-प्रसङ्गः, शक्तिज्ञानस्य हेतोः सत्त्वात् । अपिच 'घटमानय' इति वाक्यम्, हस्तिनश्च स्मरतः, घटपदादिभ्यो घटादेः, गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः, समूहालम्बनरूपायां पदार्थोपस्थितौ वृत्ति (पद) जन्यत्वसत्त्वात् ।

तथाच 'विषयतया शाब्दबोधं प्रति तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुः' इति वाच्यम्, एवञ्च

प्रभा

सम्बन्धाग्रहवत इति—'प्रवाहो गङ्गापदशक्यः' इति ज्ञानवतः 'गङ्गापदशक्यसम्बन्धितीरम्' इति ज्ञानाभाववतः पुरुषस्य गङ्गापदात्तीरबोधो न जायते । असमानविषयकस्यापि शक्तिज्ञानस्य हेतुत्वे तु गङ्गा-पदात् तीरोपस्थितेस्तद्द्वाराशाब्दबोधस्य चापत्तिरित्यर्थः । ननु तद्विषयकशाब्दबोधम्प्रति शक्तिज्ञानजन्यतद्-विषयकोपस्थितिः कारणम्, इति कार्यकारणभावे समानविषयकत्वनिवेशोऽस्तु इति गङ्गातीरयोः सम्बन्धाग्र-हवतः प्रवाहो गङ्गापदशक्य इति जानतोऽपि तीरोपस्थितेरभावान्न शाब्दबोध इत्यत आह—'अपिचेति। स्मरत इति—वाक्यविषयकं हस्तिविषयकञ्चैकमेव समूहालम्बना (विषय) त्मकं स्मरणम् । इदञ्च पदज्ञानं कारण-मिति मतेन । यदि तूच्चरितः शब्दः प्रत्यायक इति मतं तदा वाक्यमित्यस्य श्रुतवत इति शेषः । तथाच घटादि-पदहस्त्युभयविषयकसमूहालम्बनात्मकस्मृतिरूपज्ञानेन वाक्यश्रवणात्मक-हस्तिस्मरणात्मकज्ञानद्वयेन वा घटा-दिपदनिष्ठशक्तिस्मृतिद्वारा घटादिपदार्थविषयिका हस्तिपकविषयिका च समूहालम्बनस्मरणात्मिका एका उपस्थितिः । एषा चोपस्थितिर्घटादिपदनिष्ठशक्तिज्ञानजन्या । अत एव पूर्वत्र वाक्यस्मरणोक्तिः । तादृशोप-पस्थितेश्च घटकर्मकमानयनमिति शाब्दबोधो जायते । 'हस्तिपककर्मकमानयनम्' इति शाब्दबोधस्तु न जायते' शक्तिज्ञानपदार्थोपस्थित्योरपि समानविषयकत्वनियमात्, प्रकृते घटादिपदनिष्ठशक्तिज्ञानस्य हस्तिपकविषयकतया हस्तिपकविषयकसमूहालम्बनात्मकोपस्थितेर्हस्तिपकविषयकशक्तिज्ञानजन्यत्वाभावात् । तस्यामेवोपस्थितौ घटादिपदनिष्ठघटादिविषयकशक्तिज्ञानजन्यत्वसत्त्वेन घटादिविषयकशाब्दबोधोपपत्तिः । इत्थञ्च हस्तिपकस्योक्तस्थले शाब्दबोधवारणाय शक्तिज्ञान-पदार्थोपस्थिति-शाब्दबोधानां समानविषयकत्व-स्यावश्यकतया 'गङ्गायां घोषः' इत्यादिस्थले तीरादिविषयकोपस्थितिशाब्दबोधम्प्रति प्रवाहविषयकशक्ति-ज्ञानत्वेन कारणत्वमसम्भवदुक्तिकमित्याह—विषयतयेति—प्रकृते हस्तिपकनिष्ठविषयतया शाब्दबोधं प्रति तादृशविषयतया हस्तिपकांशविषयकशक्तिज्ञानजन्योपस्थितेर्हेतुत्वमिति तादृशोपस्थितेरभावान्न शाब्दबोध इति भावः। एवञ्च=लक्षणावृत्त्यन्तरमेव। अत एव 'अयं लक्ष्यः' 'अयं शक्यः' इति व्यवहारवैगुण्यमप्युपपद्यते, इत्यन्यत्र विस्तरः ।

दर्पणव्याख्या

* गङ्गापदेति * प्रवाहरूपार्थनिरूपितबोधकत्वशक्तिं गङ्गापदे जानत इत्यर्थः * तीरबोधप्रसङ्ग इति * तीरोपस्थितेस्तद्द्वारकशाब्दबोधस्य चापत्तिरित्यर्थः ।

ननूक्तापत्तिवारणाय वृत्तिज्ञानजन्योपस्थितिशाब्दबोधयोरेव कार्य्यकारणभावे समानविषयकत्वं निवेश्यताम्, कृतं वृत्तिज्ञान-पदार्थोपस्थित्योः कार्य्यकारणभावे तन्निवेशेनेत्यत आह—*अपिचेति* हस्तिपकस्मृतेर्वृत्तिज्ञानजन्यत्वसम्पत्तये हस्तिनोऽपि वाक्यात् स्मृतिविषयता दर्शिता । समूहालम्बनमेत्यत्रालम्बनपदं विषयपरम् । *वृत्तिजन्योपस्थितिरिति* तद्विषयकत्वावच्छिन्नवृत्तिज्ञाननिष्ठकारणतानिरूपितकार्य्यतावच्छेदकधर्मावच्छिन्नोपस्थितिरित्यर्थः । उक्तस्थले हस्तिपको-पस्थितेर्वृत्तिज्ञानजन्यत्वेऽपि न तन्निष्ठा जन्यता हस्तिपकविषयत्वेनाऽवच्छिद्यते । नापि वृत्तिज्ञाननिष्ठजनकतायां हस्ती विषयत्वेनावच्छेदकः, वृत्तिज्ञाने धर्मित्वेनाभानादिति नोक्तापत्तिरिति भावः । प्रकृतोपयोगिनमर्थमाह—*] एवञ्चेति *

लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसम्भवदुक्तिकमिति ।

एतेन शक्तिप्रयोज्यैवोपस्थितिर्हेतुरिति न लक्षणाज्ञाने कार्य्यकारणभावान्तरं ममापीति परास्तम् , प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादि विस्तरेण प्रपञ्चितं भूषणे ॥ ३७ ॥

प्रभा

एतेनेति—उक्तरीत्या हस्तिपकस्य शाब्दबोधापत्तिरूपदूषणेनेत्यर्थः। शक्तिप्रयोज्येति—प्रयोज्यत्वस्य जन्यजन्यत्वरूपत्वेन तीरोपस्थितौ गङ्गापदनिष्ठशक्तिज्ञानजन्या प्रवाहविषयकोपस्थितिस्तज्जन्या तीरोपस्थितिरिति शक्तिज्ञानप्रयोज्योपस्थितित्वेन कारणत्वे लक्षणाज्ञानजन्योपस्थितेरपि सङ्ग्रहे लक्षणाविषयककार्यकारणभावकल्पनप्रयुक्तं गौरवं नास्तीति तद्भावः। परास्तमिति— शक्तिज्ञानप्रयोज्यतादृशोपस्थितित्वस्य हस्तिपकोपस्थितावपि सत्त्वेन हस्तिपकस्य शाब्दबोधापत्तेर्दुर्वारत्वादित्यर्थः। ननु विषयतासम्बन्धेन शाब्दबोधं प्रति शक्तिज्ञानप्रयोज्यतावच्छेदकविषयतासम्बन्धेन तत्पदनिष्ठशक्तिज्ञानप्रयोज्योपस्थितिः कारणम् । अतः हस्तिपकनिष्ठोपस्थितीयविषयताया घटादिपदनिष्ठशक्तिज्ञानप्रयोज्यतानवच्छेदकतया तेन सम्बन्धेन तादृशोपस्थितेरभावात् न शाब्दबोधः। 'गङ्गायां घोषः' इत्यादौ तीरनिष्ठविषयतायाश्च नियमेन सत्त्वात् गङ्गापदनिष्ठशक्तिज्ञानप्रयोज्यतावच्छेदकतया तादृशसम्बन्धेनोपस्थितेः सत्त्वाच्छाब्दबोधोपपत्तिः। यत्र यत्र तत्पदनिष्ठशक्तिज्ञानप्रयोज्यता तत्र तत्र नियमेनोपस्थितीया विषयता सैव तादृशप्रयोज्यतावच्छेदिका । घटादिपदप्रयोज्यताव्यापिका हस्तिपकविषयता नास्तीति न सा तादृशप्रयोज्यतावच्छेदिकेति न तत्र दोष इत्यत आह— प्रयोज्यत्वस्येति—यदि जन्यजन्यत्वरूपं प्रयोज्यत्वं तदा 'घटपदं घटे शक्तम्' इति ज्ञानाद् घटोपस्थितौ घटपदेन स्वसमवायित्वेनोपस्थिताकाशस्यापि शाब्दबोधापत्तिः, आकाशनिष्ठविषयतायां घटादिपदनिष्ठशक्तिज्ञानप्रयोज्यतावच्छेदकत्वस्य सत्त्वात्। आकाशनिष्ठविषयतायाः तादृशप्रयोज्यताव्यापकत्वात्। यदि साक्षाज्जन्यत्वरूपं प्रयोज्यत्वं तदा जन्यत्वं परित्यज्य तन्निवेशे फलाभावः, लक्षणाजन्योपस्थितेरसङ्ग्रहश्चेत्याह— दुर्वचत्वाच्चेति । वस्तुतस्तु—अर्थविषयकबोधजनकत्वं न शक्तिः, शाब्दबोधं प्रति शक्तिज्ञानस्य हेतुत्वावश्यकतया शक्तिज्ञानं कारणमित्यस्य 'बोधजनकत्वज्ञानं कारणम्' इत्यर्थकतया शक्तिज्ञाननिष्ठशाब्दबोधजनकतायाः शक्तिज्ञाने विशेषणतया भासमानानामवच्छेदकत्वं सर्वसम्मतम्, तच्च न सिध्यति, अवच्छेद्या बोधजनकता अवच्छेदिकाऽपि शक्तिज्ञाने विशेषणीभूता बोधजनकतैवेत्यात्माश्रयेण स्वस्यैव स्वावच्छेदकत्वासम्भवात्। किञ्च प्रयोजकवृद्धेन प्रयुक्तं वाक्यं श्रुत्वा घटानयनं कुर्वन् प्रयोज्यवृद्धः 'घटानयनं मत्कर्त्तव्यम्' इति ज्ञानवान्, 'घटानयनविषयकप्रवृत्तिमत्त्वात् मदीयज्ञानवत्' इति प्रयोज्यप्रयोजकवृद्धव्यवहारं पश्यता बालेनानुमितज्ञानस्य कारणाकाङ्क्षायां कारणान्तरानुपलब्ध्या 'घटमानय' इति वाक्यमेव तत्कारणत्वेन निश्चिनोति। वाक्यस्यार्थेन सह सम्बन्धाभावे तद्विषयकबोधजनकत्वं नोपपद्यते इति बोधजनकत्वानुपपत्त्या कल्प्यमानस्य शक्तिरूपसम्बन्धस्यापि बोधजनकत्वरूपत्वं न सम्भवति। यथा भोजनं विनाऽनुपपद्यमानपी-

दर्पणव्याख्या

वृत्तिज्ञानोपस्थितिशाब्दबोधानां समानविषयकत्वेन हेतुहेतुमद्भावः फलतीति भावः। *असम्भवदुक्तिकमिति* लक्षणाज्ञानस्य शक्तिविषयकत्वेऽपि तीरविषयकशक्तिग्रहात्मकत्वस्याभावादिति भावः ।

एतेनेति द्विविधवृत्तिज्ञानस्यैकरूपेण हेतुत्वासम्भवेन, वक्ष्यमाणदूषणेन वेत्यर्थः। *शक्तिप्रयोज्येति* लक्षणाज्ञानस्य शक्तिज्ञानाधीनत्वेन तज्जन्योपस्थितौ शक्तिप्रयोज्यत्वसत्त्वान्न लक्षणावादिमते हेत्वन्तरकल्पनेत्यर्थः। *अनतिप्रसक्तस्येति* । जन्यजन्यत्वस्य लक्षणाज्ञानजन्योपस्थिताविव विशेषणतावच्छेदकप्रकारकनिर्णयविधया शक्तिज्ञानजन्यघटपदशक्य-

SGDF

दर्पणव्याख्या

वान् देश इत्याकारकविशिष्टवैशिष्ट्यावगाह्यनुव्यवसायात्मकोपस्थितावपि सत्त्वात्तद्विषयस्यापि शाब्दबोधापत्ति, साक्षाज्जन्योपस्थितेरसंग्रहश्च, साक्षाज्जन्यत्वस्य तत्त्वे तु लक्षणाज्ञानजन्योपस्थित्यसंग्रहः, इत्युभयसाधारणस्य तस्य निर्वक्तुमशक्यत्वात्। स्वरूपसम्बन्धरूपस्य तस्याननुगतस्योभयसाधारण्यं तु सुतरामसम्भावितमिति भावः। अन्यथासिद्धिनिरूपकतानवच्छेदकशक्तिज्ञाननियतोत्तरवर्तितावच्छेदकधर्मवत्त्वरूपं शक्तिप्रयोज्यत्वमुभयसाधारणं सुवचमित्यपि केचित्। अधिकमग्रे वक्ष्यते।

अत्र वदन्ति—अर्थबोधजनकत्वस्य वस्तुतः पदनिष्ठस्य वाच्यवाचकव्यवहारनियामकशक्तित्वसम्भव एवोक्तकार्य्यकारणभावे गौरवलाघवादिचर्चा, नतु तस्य तद्रूपत्वसम्भवः। तथाहि—शाब्दबोधं प्रति वृत्तिज्ञानस्य हेतुतेति निर्विवादम्। सा च भवदुक्तार्थधीजनकत्वस्य वृत्तित्वे न सम्भवति, तद्रूपायास्तस्याः ज्ञाननिष्ठशाब्दधीजनकतायामनवच्छेदकत्वात्। आत्माश्रयेण स्वस्यैव स्वावच्छेदकत्वासम्भवात्।

किञ्च प्रयोज्यप्रयोजकव्यवहारद्रष्टुप्रयोज्यप्रवृत्त्यनुमिते प्रयोज्यघटानयनादिज्ञाने उपस्थितत्वाच्छाब्दस्यैव हेतुतायामवधार्य्यमाणायामसम्बद्धस्य कारणत्वानुपपत्त्या कल्प्यमानसम्बन्धस्य जनकत्वात्मकत्वासम्भवः, स्वयमनुपपद्यमानत्वेन गृहीतस्य ग्रहीतुमशक्यत्वात्। तस्मान्न 'बोधकत्वं शक्तिः'। एवं न्यायमताभ्युपेतास्मात् पदादेतदर्थविशेष्यकबोधो भवत्वित्याकारकेश्वरेच्छाविषयत्वस्यापि सङ्केतीयगङ्गापदजन्यत्वप्रकारतानिरूपितबोधत्वावच्छिन्नोद्देश्यताकनिरूपितविशेष्यत्ववृत्त्यवच्छेदकताधेयतासम्बन्धावच्छिन्नावच्छेदकत्वपर्य्यवसितस्य न शक्तित्वम्, लक्षणोच्छेदापत्तेः।

गङ्गापदात्तीरबोधोदयेन गङ्गापदात् तीरविशेष्यकबोधो भवत्वितीच्छाया अपि भगवत्या सम्भवात्, तादृशेच्छीयनिरुक्तावच्छेदकताया लक्ष्ये तीरेऽपि सम्भवात् तादृशावच्छेदकतात्वेन शक्तिज्ञानस्य शाब्दबोधे कारणताकल्पने गौरवाच्च। तीरादिनिष्ठावच्छेदकतायाः पूर्वोक्तविशेष्यत्ववृत्त्यवच्छेदकतानिरूपितत्वेऽपि न विशेष्यवृत्त्यवच्छेदकतात्वेन तन्निरूप्यत्वम्, किन्तु शुद्धावच्छेदकतामात्रेणेति न तादृशशक्तिस्तीरे इति तु शिष्यप्रतारणामात्रम्। इच्छाविषयत्वम्, ज्ञानविषयत्वं वा शक्तिरिति विनिगमनाविरहाच्चेत्यधिकमग्रे वक्ष्यते। तस्मात् पदपदार्थयोर्वाच्यवाचकभावव्यवहारनियामक सम्बन्धः पदार्थान्तरमेव।

तस्य च लक्ष्यव्यावृत्तस्यैव धर्मिग्राहकमानसिद्धत्वाल्लक्ष्यबोधार्थं शक्यसम्बन्धरूपलक्षणावृत्तेरपि स्वीकार आवश्यकः। तज्ज्ञानस्य शाब्दबोधे हेतुत्वान्तरकल्पनप्रयुक्तगौरवन्तु फलमुखत्वान्न दोषावहम्, अन्यथाऽनुपपत्तेश्च। अत एव शक्यलक्ष्यव्यवहारः स्वरसतः सङ्गच्छते।

अथवा शक्तिलक्षणाज्ञानयोः शाब्दरूपं प्रत्येकरूपेणैव हेतुता। तथाहि—तच्छाब्दं प्रति शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपिततदर्थविशेष्यताकज्ञानत्वेन हेतुता। शक्तिसम्बन्धेन, शक्यसम्बन्धेन वा पदप्रकारकज्ञाने शक्तेः संसर्गत्वात्। शक्तित्वनिष्ठावच्छेदकतायां पर्य्याप्तेरनिवेशेन शक्यसम्बन्धप्रकारकज्ञानस्यापि तेन क्रोडीकरणात्। परन्तु पदनिष्ठप्रकारतानिरूपिततादृशसांसर्गिकविषयतायामर्थविशेष्यतानिरूपितत्वानभ्युपगमान्न शक्तिसम्बन्धेन पदाभावप्रकारकबुद्धिप्रतिबध्यत्वं लक्षणाज्ञानस्य।

"इन्द्रियाम्" इत्यादिहरिपद्यस्य त्वयमर्थः—इन्द्रियाणां चाक्षुषादिविषयेषु=घटादिषु पुरुषप्रयत्नानपेक्षा यथा योग्यता=तदीयचाक्षुषादिकारणतावच्छेदकरूपाऽस्ति तथाऽर्थैः साकमपि पदानां सम्बन्धो योग्यता=तच्छाब्दबोधजनकताऽवच्छेदकधर्मः, नतु जनकत्वमेव, उक्तयुक्तेः, इति न तद्विरोधोऽपीति सर्वमनवद्यम्। तद्ग्राहकञ्च—व्याकरणस्मृत्यादि। तदुक्तम्—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति।

तत्र व्याकरणादिकं लाघवसहकृतमेव शक्तिग्राहकमिति नैयायिकमतम्। यतो लाघवसहकृतेन "लः कर्मणि" (पा० सू० ३।४।६९) इति सूत्रेण कृतावेव शक्तिः परिच्छिद्यते, नतु कर्त्तरीति यथैतत्तथोक्तम्। एवम् "गुणे शुक्लादयः" इति कोशेनापि लाघवसहकृतेन गुणे एव शक्तिर्निर्धार्य्यते, नतु गुणिनि, गौरवात्। गुणिबोधस्तु शुक्लादिपदेभ्यो निरूढः

दर्पणव्याख्या

लक्षणैवेति च तदुक्तेः। निरूढत्वञ्च प्राङ् निरुक्तम्।

उपमानस्य तु सादृश्यज्ञानात्मकस्यातिदेशवाक्यार्थस्मृतिद्वारा गवयादिर्गवयादिपदवाच्य इति शक्तिपरिच्छेदकत्वम्। इदमेतद्वाचकमित्याकाराऽऽप्तवाक्यादपि तद्ग्रहः। आप्तत्वञ्च—तदर्थविषयकयथार्थज्ञानवत्त्वम्। व्यवहारात्—यथा प्रयोजकवृद्धेन घटमानयेत्युक्ते प्रयोज्यवृद्धेनाऽनीते घटे पार्श्वस्थो घटकर्मकानयनादिकार्यं घटकर्मकानयनादिज्ञानसाध्यमित्यनुमिमीते, व्यवहारे व्यवहर्त्तव्यज्ञानस्य हेतुत्वात्। अन्तरं तद्धेतुजिज्ञासायामुपस्थितं तद्वाक्यमेव तद्धेतुत्वेनावधारयति। तस्य चार्थासम्बद्धस्य तद्धेतुत्वानुपपत्त्याऽर्थेन साकं पश्चाद् वाक्यस्य सम्बन्धमवधारयति। सैव शक्तिरिति व्यवह्रियते।

यद्यपि प्रथमं तेन वाक्यस्यैव वाक्यार्थोऽवधारितः सः, तथापि घटं नय' 'गामानय' इत्यावापोद्वापाभ्यां पश्चाज्जातप्रत्येकपदशक्तिग्रहेण प्राग्जातवाक्यशक्तिग्रहे चन्द्रादेर्ज्योतिःशास्त्राध्ययनजन्यशतयोजनादिपरिमाणग्रहेण पाश्चात्येन प्राथमिकाल्पपरिमाणग्रह इवाप्रामाण्यं गृह्यते इति नैयायिकाः। प्रत्येकपदशक्तिग्रहेणैवाकाङ्क्षादिसहकृतेन वाक्यार्थबोधोपपत्तेरिति तदाशयः।

अन्ये तु वाक्यार्थशक्तिग्रहस्य प्रत्येकपदशक्त्युपजीव्यत्वात्तेनैतद्बाधासम्भवेन प्राग्जातशक्तिग्रहस्यैव बलवत्त्वमित्याहुः।

वाक्यशेषात्तु—"यवैर्जुहोति" इत्यत्र यवपदस्य दीर्घशूकविशिष्टे आर्याणां प्रयोगात् कङ्गौ म्लेच्छानां प्रयोगात् क्व शक्तिरिति सन्देहे "यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति" इति वाक्यशेषेण दीर्घशूकविशिष्टे तन्निर्णयः। विवरणस्य यथा शक्तिग्राहकत्वं तथा धात्वर्थनिरूपणे उक्तम्। "इह सहकारतरौ मधुरं पिको रौति" इत्यादौ प्रसिद्धसहकारादिपदसन्निधानात् पिकादिपदानां कोकिलादौ शक्तिपरिच्छित्तिरिति। सैषा शक्तिर्नानार्थेषु संयोगादिना नियम्यते। तदुक्तं काव्यप्रकाशे—

संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इति॥

शब्दार्थस्यानवच्छेदे=सन्देहे तन्निरासद्वारा विशेषनिर्णयस्य जनकाः संयोगादय इति तदर्थः। शक्योपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्य्यनिर्णयद्वारा तत्तदर्थबोधजनकत्वं तेषामिति भावः।

तत्र सवत्सा धेनुरवत्सा धेनुरिति क्रमेण संयोगविप्रयोगयोरुदाहरणे। साहचर्यम्=सादृश्यम्, सदृशयोरेव प्रायशः सह प्रयोगात्, एवञ्च 'रामलक्ष्मणौ इत्यादावुभयोर्नामार्थयोर्युगपदेव साहचर्य्यग्रहाधीनतात्पर्यग्रहेण विशेषावगतिरिति नान्योन्याश्रयः। 'रामार्जुनगतिस्तयोः' इत्यादौ विरोधेन सा। 'अञ्जलिना जुहोति' 'अञ्जलिनाऽदित्यमुपतिष्ठते' इत्यादौ धात्वर्थवशात्तदाकाराञ्जलिपरत्वम्। 'सैन्धवमानय' इत्यादौ तु भोजनादिरूपप्रकरणेन सा। 'अक्ताः शर्करा उपदधाति' इत्यादौ 'तेजो वै घृतम्' इत्यादिस्तुतिरूपाल्लिङ्गादक्तपदस्य घृतसाधनाञ्जने तात्पर्यावगतिः। 'रामो जामदग्न्यः' इत्यादौ जामदग्न्यपदसन्निधानेन रामपदस्य परशुरामपरता। एवम् 'अभिरूपाय कन्या देया' इत्यत्राभिरूपतरायेति सामर्थ्यादवगम्यते। 'यच्च निम्बं परशुना' इत्यत्रौचित्यात् परशुपदस्य छेदनार्थत्वम्। 'भात्यत्र परमेश्वरः' इत्यत्र राजधानीरूपदेशात् परमेश्वरपदस्य राजपरत्वम्।

'चित्रभानुर्भाति' इत्यत्र चित्रभानुपदं रात्रौ वह्नेर्दिवा सूर्य्यस्य बोधकम्। 'मित्रं भाति', 'मित्रो भाति' इत्यादौ व्यक्तेः=लिङ्गादाद्ये सुहृदोऽन्त्ये सूर्य्यस्य बोधकं मित्रपदम्। 'स्थूलपृषतीमनड्वाहीम्' इत्यत्र स्वरात् तत्पुरुषबहुव्रीह्यर्थनिर्णयः। आदिपदात् षत्वणत्वादि, यथा—'सुसिक्तम्' इत्यत्र सुशब्दस्य कर्मप्रवचनीयस्य पूजार्थकत्वम्, सुषिक्तमित्यत्रोपसर्गस्यान्यार्थकत्वम्। एवम्—'प्रणायकः' इत्यत्र णत्वात् प्रणयनकर्त्तृबोधः। 'प्रनायकः' इत्यत्र तदभावात् प्रगतनायकबोध इत्याद्यूह्यम्।

Sri Gargeshwari Digital Foundation

दर्पणव्याख्या

यत्तु—पदपदार्थयोर्योऽर्थः स शब्दो य शब्दः सोऽर्थ इतीतरेतराध्यासमूलकं तादात्म्यं भेदव्यापृक्तमस्ति। तस्य वाचकः प्रणवादि। 'ओमित्येकाक्षरं ब्रह्म' इति भेदाभेदयोर्दर्शनात्। आद्ये भेदस्योद्भूतत्वविवक्षया षष्ठी, अभेदस्योद्भूतत्वविवक्षया त्वन्त्ये प्रातिपदिकार्थे प्रथमा। स एव सम्बन्धः पदतदर्थयोर्वाच्यवाचकभावव्यवहारनियामकः।

शक्तिस्तु सङ्केतः, पदार्थान्तरं वेति भट्टानुयायिमतम्। तत्तु न साधीयः, अध्यासमूलकस्यासतस्तस्य सम्बन्धत्वासम्भवात्, भेदाभेदयोः परस्पराभावरूपतया विरुद्धत्वेनैकत्रासम्भवाच्च कस्यचित् तथाऽध्याससम्भवेऽपि सर्वेषां तथाऽध्यासे मानाभावात्, घटपदनाशेऽपि घटस्योपलभ्यमानतया तयोस्तादात्म्यस्यासम्भवदुक्तिकत्वाच्च।

नच पाकरक्ते प्राक् श्यामेऽपि पाकोत्तरम् 'अयमिदानीं न श्यामः' इति प्रतीतेर्भेदाभेदौ न विरुद्धाविति वाच्यम्, अव्याप्यवृत्तीनां तेषामेकावच्छेदेन विरोधानपायात्। अत एव तत्र देशकालावच्छेदकभेदेनैव 'अयमिदानीं न श्यामः' 'वृक्षो मूले न कपिसंयोगी,' इति, नतु तदनवगाहिनी घटोऽयं न श्यामो वृक्षो न कपिसंयोगीति प्रतीतिः, किन्त्वभेदवादे घटपदनाशे घटनाशापत्तिरेवं शब्दवदर्थस्यापि श्रोत्रेन्द्रियग्राह्यतायाः शब्दस्य चक्षुरादीन्द्रियग्राह्यतायाश्चापत्तिरिति बहुव्याकोपः। शब्दस्य यथा न नित्यत्वं तथा वक्ष्यते।

नचात्यन्तभेदे घटः पटोऽस्य ताऽभेदे घटो घट इति सामानाधिकरण्यादर्शनाद् भेदाभेदवादोपपत्तिरिति शङ्क्यम्, 'शब्दो घटः' इत्याद्यननुभवात् घटो न शब्दः, शब्दो न घटः' इत्याद्यनुभवाच्च भेदस्यैव सिद्धेः। 'ओमित्येकाक्षरम्' इत्यादौ त्वक्षरपदस्य तत्प्रतिपाद्ये निरूढलक्षणया सामानाधिकरण्योपपत्तेस्तद्वाक्यस्योपासनाकाण्डस्थतया भेदेऽप्यभेदोपासनपरतयोपपत्तेश्चेत्यन्यत्र विस्तरः।

सा च शक्तिस्त्रिधा—योगः, रूढिः, योगरूढिश्चेति। प्रकृतिप्रत्ययनिरूपिता तत्तदर्थे या शक्तिः स योगस्तन्मात्रेणार्थबोधकं पदं यौगिकमिति व्यवह्रियते। यथा पाचकादिपदम्, तद्घटकधातुप्रत्ययोः पाकादौ, कर्त्रादिकारके च व्युत्पन्नत्वात्। अवयवार्थाप्रतीतौ केवलसमुदायस्य तत्तदर्थे या शक्तिः सा रूढिः, तयाऽर्थबोधकं पदं रूढम्। यथा—मणिनूपुरादि। अश्वगन्धादिपदातु कदाचिदोषधिनिष्ठसमुदायनिरूपितशक्त्योषधिबोधः। कदाचित्तु अश्वस्य गन्धोऽस्यामिति व्युत्पत्त्या वाजिशालादिबोधोऽवयवशक्त्येति यौगिकरूढिः पृथङ्नोक्ता, उक्तयोरेवान्तर्भावात्।

"रूढियोगापहारिणी" इति तु प्रकारणाद्यभावे। लाक्षणिकं तद् वाजिशालाबोधे इत्यपरे। यत्रावयवार्थसहकृता समुदायशक्तिरर्थबोधिका सा योगरूढिस्तयाऽर्थबोधकं पदं योगरूढम्। यथा—पङ्कजादिपदम्। तत्र पङ्काधिकरणकोत्पत्त्याश्रयपद्मत्वविशिष्टबोधाद् अनुपपत्तिप्रतिसन्धानं विनापि पद्मबोधान्न तत्र लक्षणावसर इत्यादि प्रपञ्चितं पूर्वमेव।

'गङ्गायां घोष' इत्यादौ गङ्गापदस्य तीरे शक्यसामीप्यरूपलक्षणाग्रहे तदाऽऽहितसंस्कारजन्यतीरादिस्मृत्या तीराधिकरणकघोषशाब्दबुद्धिः। लक्ष्यव्यवहारान्यथानुपपत्त्या लक्षणाया अप्यवश्यमभ्युपेयत्वात्। अन्वयाऽनुपपत्तिप्रतिसन्धानं च तत्कल्पने बीजम्। यथोक्ते क्वचिन्निराकाङ्क्षत्वमपि तद्बीजम्। यथा "वदनं तस्या वदनं मुखममुखं भाति चान्यासाम्" इत्यत्र तादात्म्यसम्बन्धावच्छिन्नवदनत्वावच्छिन्नप्रकारतानिरूपितवदनत्वावच्छिन्नविशेष्यताको बोधो न सम्भवति, तादात्म्यसम्बन्धावच्छिन्नतादृशप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धौ विधेयताऽवच्छेदकभेदस्य तन्त्रत्वात्, इति वदनत्वावच्छिन्नार्थकवदनपदनिरूपिताकाङ्क्षा न वदनपदेऽतस्तत्र वदनपदं लक्षणयाऽऽह्लादकपरम्। तदुपस्थिताह्लादकत्वावच्छिन्नस्याभेदान्वयो वदने अनुशासनबोधितनैराकाङ्क्ष्यमपि क्वचित्तथा। यथा—

कृतसीतापरित्यागः स रत्नाकरमेखलाम्।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्॥

इत्यत्र भुजिधातोरवनवाचकस्यात्मनेपदनिराकाङ्क्षतया वाच्यार्थबुद्धौ प्रतिबद्धायां तद्धातुना स्वार्थपालनसम्बन्धिशासनं लक्ष्यते। आत्मनेपदसमभिव्याहृतभुजित्वावच्छेदेनाऽऽख्यातबोध्यकर्त्रन्वितपालनबोधस्वरूपायोग्यत्वरूपनैराकाङ्क्ष्यस्य,

SGDF

दर्पणव्याख्या

"भुजोऽनवने" (पा० सू० १ । ३ । ६६) इति सूत्रेण बोधनात् । तत्र केवलपदेन तत्कालिकरामाभिन्नपृथिवीपालकर्त्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकैकत्वयोगिनी व्यक्तिरभिधीयते । एवकारेण पृथिव्यन्ययोगव्यवच्छेदः ।

एवञ्च तत्कालिकरामाभिन्नपृथिवीपालकर्त्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वविशिष्टाभिन्नपृथिवीकर्मकभोगकर्त्ता पृथिव्यन्यस्त्रीकर्मकभोगाकर्त्ता रामाभिन्नः पृथिवीपाल इति न्यायनये वाक्यार्थबोधः । 'द्विरेफो मधुरं रौति,' 'पिकः कूजति कानने' इत्यादौ तु मुख्यार्थबाध एव लक्षणाबीजम् । किन्तु सा लक्षितलक्षणेत्युच्यते, लक्ष्यसमासार्थरेफद्वयविशिष्टघटितत्वात्तस्याः ।

तथाहि—येन पुरुषेण द्विरेफादिपदस्य प्राणिविशेषे रूढिर्न गृहीता, किन्तु द्वौ रेफौ यत्रेति व्युत्पत्त्या रेफद्वयसम्बन्धिभ्रमरपदे शक्यसम्बन्धरूपलक्षणा गृहीता तस्य प्राणिविशेषविशेष्यकमधुरारावकर्तृत्वशाब्दबोधस्य तात्पर्य्यविषयस्यानुपपत्त्या द्विरेफपदात् स्वलक्ष्यरेफद्वयघटितपदवाच्यत्वलक्षणयोपस्थिते प्राणिविशेषे मधुराऽऽरावकर्तृत्वान्वय इति द्विरेफपदेन भ्रमरपदमुपस्थाप्यते । तेन च प्राणिविशेषोपस्थितिरिति तु न सम्यक्, 'प्रत्ययानाम्' इति व्युत्पत्तेस्तत्र प्रत्ययार्थान्वयासम्भवात् । भ्रमरपदे लक्षणायामपि न तेन तदुपस्थितिः, उच्चरितस्यैवार्थप्रत्यायकत्वादित्यप्याहुः । एवम् "पिकः कूजति कानने" इत्यादावपि बोध्यम् ।

एवम्—

गङ्गा हरति वै पुंसां दृष्टा पीताऽवगाहिता ।

इत्यत्र पीता गङ्गा पापं हरतीति वाक्ये गङ्गापदात् स्वशक्यप्रवाहावयवावयविभावसम्बन्धरूपलक्षणाग्रहाऽहितसंस्कारसहकृतादुपस्थितोद्धृतजले पानकर्मत्वाऽन्वयः । तात्पर्य्यानुपपत्तिरेव वा सर्वत्र लक्षणाबीजम् । तदुन्नायकत्वेनैवोक्तनैराकाङ्क्षगादीनामुपयोगः । अत एव 'यष्टीः प्रवेशय' इत्यादौ यष्ट्यादिपदानां तद्धारणकर्त्तरि लक्षणा, यष्टिषु प्रवेशकर्मत्वान्वयानुपपत्त्यभावेऽपि भोजनादिप्रकरणोन्नीततात्पर्य्याविषयभोजनप्रयोजनकप्रवेशकर्मत्वानुपपत्तेस्तत्र जागरूकत्वात् । एवम् 'कुन्ताः प्रविशन्ति' 'छत्रिणो यान्ति' इत्यादिष्वप्यूह्यम् ।

ननु छत्रिशब्दस्य पदद्वयघटितत्वेन वाक्यतया न्यायनये कथं तस्य लक्षणा, शक्याप्रसिद्धेः । किञ्चात्र नैकसार्थगन्तृत्वं लक्ष्यताऽवच्छेदकम्, 'यान्ति' इत्यस्यानन्वयापत्तेः, गन्तृत्वेनोपस्थितस्य गमनाकाङ्क्षाविरहादिति चेत् सत्यम्, सम्बन्धिशक्तमतुप एव तत्रैकसार्थसम्बन्धिलक्ष्यकत्वाभ्युपगमेनोक्तदोषद्वयस्याप्रसक्तेः । नच छत्रपदवैयर्थ्यम्, तस्य तात्पर्य्यग्राहकत्वेन सार्थक्यात् । 'लाक्षणिकं पदं नानुभावकम्' इति सम्प्रदायः । स्वशक्यानुभवं प्रत्येव पदानां कारणत्वम् । इतरपदार्थेन सह स्वशक्यानुभावकत्वेन क्लृप्ताद्घोषादिपदादेव तीरानुभवोपपत्तेर्न शक्यादशक्योपस्थितिर्लक्षणेत्यभ्युपगच्छतां मते स्वजन्योपस्थितिसम्बन्धेनैव पदस्यानुभावकतया तस्याश्च तीरादावभावात्तस्याननुभावकत्वमिति तन्मूलम् । नच तत्सम्भवति, शक्योपस्थितात्तीरादेरप्रकृत्यर्थतया तत्र प्रत्ययार्थान्वयासम्भवात् ।

वस्तुतस्तु लाक्षणिकं पदमुद्देश्यविधेयभावेनान्वयाजनकमित्येव तदर्थः, उद्देश्यविधेयभावेनान्वये शक्तिमत्त्वस्यैव तन्त्रत्वात् । अत एव "न विधौ परः शब्दार्थः" इति सङ्गच्छते । किञ्च तन्तुसंयोगस्य पटसंयोगहेतुत्वतात्पर्य्यके 'तन्तुः पटं जनयति' इति सर्वलाक्षणिकवाक्येऽन्वयानुभवापलापाऽपत्तेर्लाक्षणिकपदस्यानुभावकत्वमेव न्याय्यम् गङ्गापदात्तीरमनुभवामि' इति प्रतीतेश्च तादृशप्रवादे नाभिनिवेष्टव्यम् ।

ननु 'स्वायत्ते शब्दप्रयोगे किमित्यवाचकं पदं प्रयोक्ष्यामहे' इति न्यायात्तीराद्यवाचकगङ्गादिपदाभिधानमनुचितम् । प्रयोजनजिज्ञासायां पावनत्वादिप्रतिपत्तये तदिति यदि, तर्हि वृत्तिं विना तस्य शाब्दे भानासम्भवात्तदर्थे व्यञ्जनावृत्तिरपि तृतीयाऽङ्गीकरणीया । अत एव—

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।
तिष्ठन्ति चपला यत्र स कालः समुपागतः ॥

SGDF
Sri Gargeshwari Digital Foundation

नन्वेवं भाषादितो बोधदर्शनाद् बोधकतारूपा शक्तिस्तत्रापि स्यात्। तथाच साधुताऽपि स्यात्, शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते—

प्रभा

नत्वस्य पीनत्वं नोपपादकम्, किन्तु तद्भिन्नं रात्रिभोजनरूपमेव। एवं बोधजनकत्वानुपपत्त्या कल्प्यमानः शब्दार्थयोः सम्बन्धः पदार्थान्तरमेव, नतु बोधजनकत्वरूपः। अत एव मीमांसकैर्बोधजनकतावच्छेदकधर्मविशेषात्मिका शक्तिरिति स्वीकृतम्। तज्ज्ञापकञ्च कोषव्यवहारादि ॥ ३७॥

बोधजनकत्वस्य शक्तित्वे दोषमाशङ्क्य निराचष्टे—नन्वेवमिति—बोधजनकत्वस्य शक्तित्वाङ्गीकार इत्यर्थः। भाषादित इति—भाषा—अत्रापभ्रंशः=यज्ञादावुच्चारणेन पापहेतुतया अपभ्रश्यते=पत्यते नरकादावनेनेति करणे घञि अपभ्रंशः=तत्तद्देशीयव्यावहारिकोऽसाधुशब्दः। यद्यपि भाष्यते या सा भाषेति व्युत्पत्त्या 'गुरोश्च हलः' इति कर्मणि अप्रत्यये भाषाशब्दशब्दमात्रपरः। अत एव 'सख्यशिश्वीति भाषायाम्' इति पाणिनिसूत्रं सङ्गच्छते। तथापि प्रकृते साधुशब्दप्रतिकूलतया अत्र प्रयोगादसाधूनामेवात्र तेन ग्रहणम्। अत्रापि=गगर्य्यादिशब्देऽपि। कोशाप्तव्यवहारज्ञाप्येश्वरेच्छादिरूपस्य शक्तित्वे तु न दोषः तत्रेश्वरेच्छादिरूपायाः शक्तेः कल्पकाभावात्। तथाच=शक्तत्वे च। व्याकरणाधिकरण इति—साधुपदप्रयुक्तिनवमाधिकरणे। तथाच सूत्रम्—'प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात्' इति सूत्रे 'अनादिवाचकत्वं साधुत्वं तद्विपर्ययश्चासाधुत्वम्' इत्युक्तम्। अग्रे च 'यद्यपि अमीषामवाचकत्वं यद्यपि च मुख्याभावे गौणलाक्षणिकयोरप्यसम्भवस्तथापि वाचकाशक्तिजतया मूलशब्दोपस्थापकत्वेन (स्मारणेन) प्रत्यायकत्वं भविष्यति' इत्यनेन 'असाधुरनुमानेन' इति पक्ष उपपादितः शास्त्रदीपिकायाम्। द्विधेति—साक्षाद्बोधकत्वाभावेन बोधकत्वस्य सत्त्वेऽपि साधुत्वस्य शक्तत्वादतिरिक्तत्वेनेति प्रकारद्वयेनेत्यर्थः।

दर्पणव्याख्या

इत्यत्र अशक्तानां श्रियमवहृत्य पुंश्चल्यो जलवाहकैः साकं रमन्ते इत्यतात्पर्य्यविषयरूढ्यर्थानालिङ्गितार्थान्तरस्यापि प्रतीतिः। सा चार्थद्वारिकाऽपि—

"भ्रम धार्मिक विस्रब्धं सोऽयं श्वा मारितस्तेन।
गोदातीरनिकुञ्जप्रतिष्ठितनिसर्गदृप्तसिंहेन॥"

इत्यादौ प्रतिभाजुषां सहृदयानां वक्तृबोद्धव्यवैशिष्ट्यस्फूर्तौ सिंहप्रतीत्यनन्तरं गोदातीरे श्वभीरुभ्रमणायोग्यत्वप्रत्ययादिति चेन्न, रूढ्यर्थानालिङ्गितार्थस्य केवलयोगेन प्रतीत्यसम्भवेऽपि लक्षणया तस्याः सूपपादत्वात्। पावनत्वादिप्रतीतिर्विशिष्टलक्षणयाऽपि शुद्धलक्षणयैवानुपपत्तिपरिहारे विशिष्टे तदभ्युपगमे बीजाभाव इति तु न, 'यष्टीः प्रवेशय' इत्यत्रापि तदनापत्तेः, वाच्यार्थवैयञ्जनिकबुद्धेरनुमानेनापि गतार्थत्वाच्च।

वस्तुतस्तु गालिप्रदानादेरिवेतोऽपि तथा तात्पर्य्यमेवोन्नीयते, न त्वन्वयबोधः, अनुमितिर्वा, बोधे व्यभिचारपक्षधर्मतयोः, सन्देहे वा तयोरसम्भवात्तत्रैव तैर्व्यञ्जनोल्लासाभ्युपगमादित्यन्यत्र विस्तरः ॥ ३७ ॥

यदि पुनरानुभाविको लोकानां स्वरसवाही शब्दादमुमर्थं प्रत्येमीति प्रत्ययस्तदा व्यञ्जनावृत्तिरप्रत्यूहैवेति स्वोक्तनिष्कृष्टमतमवलम्ब्य मूलमवतारयति—* नन्विति * एवम्—बोधकत्वस्यैव शक्तित्वे * तत्रापि *=अपभ्रंशात्मकभाषायामपि। * स्यादिति * तस्या अपि बोधकत्वात्। ईश्वरेच्छादीनां शक्तित्ववादिनां तु नायमतिप्रसङ्ग इति भावः। इष्टापत्तावाह—* तथाचेति *। "नापभ्रंशितवै" इत्यादिनिषेधविधिविषयत्वानापत्त्येष्टापत्तेः कर्तुमशक्यत्वादिति भावः।

* द्विधेति * अपभ्रंशानामुक्तशक्तिमत्त्वाभावव्यवस्थापनेन साधुत्वस्याऽन्यथानिर्वचनेन चेत्यर्थः।

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः ॥ ३८ ॥

असाधुः=गाव्यादिः, अनुमानेन=साधुशब्दमनुमाय, वाचकः=बोधकः कैश्चिदिष्यते । तथाच लिपिवत्तेषां साधुस्मरणे एवोपयोगः, नतु साक्षात्तद्वाचकत्वम्, अतो न साधुत्वमिति भावः । उक्तं हि वाक्यपदीये—

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥

प्रभा

अनुमानेनेति—अत्र माधातुः स्मृतौ । अन्तर्भावितण्यर्थश्च । अन्यथा 'घटस्स्मरति' इत्यादिप्रयोगादर्शनात् स्मरणकर्तृत्वस्य चेतने एव दर्शनेन 'असाधुशब्दः साधुशब्दमनुमाय बोधकः' इत्यर्थे स्मृतिकर्तृत्वस्य शब्दे बाधात् 'समानकर्तृकयोः' इति क्त्वाप्रत्ययानुपपत्तिः । शब्दस्य प्रयोजककर्तृत्वे तु समानकर्तृकत्वं सूपपादम् । यद्वा शब्दे चेतनत्वारोपेण स्मृतिकर्तृत्वं बोद्ध्यमिति पञ्चोलिनः । कैश्चित्=नैयायिकादिभिः। वाचकत्वाविशेष इति—रूढत्वात्तु व्यवहारस्याविशेषं ग्रन्थकार आह तत्र च शास्त्रं नियामकम् । 'साधुशब्दैरेवार्थोऽभिधेयो नापशब्दैः' एवं क्रियमाणमभ्युदयकारि भवति । असाधुशब्दप्रयोगे तु धर्माभावः पापत्वेनोपचर्यते । अपशब्दानां बोधकत्वे मतत्रयम्—अपशब्देन साधुस्मरणं तत एव बोध इत्येकम् । अपशब्दः शब्देन तादात्म्यापन्नोऽर्थम्बोधयतीति द्वितीयम् । अपशब्दः शब्दवत् साक्षादेवार्थं बोधयतीति तृतीयम् । तृतीयमादाय 'नियमः पुण्यपापयोः' इत्युक्तिः । तद्वाचकत्वम्=तस्य=असाधुशब्दस्य वाचकत्वम्=बोधकत्वम् । न साधुत्वमिति—वाचकत्वमेव साधुत्वमिति मत इत्यर्थः । तथाच—साधुशब्दं जानतां व्युत्पन्नानामसाधूनां साधुशब्दस्मरणाद्बोधः । अव्युत्पन्नानान्तु शक्तिभ्रमादेव बोधः । ननु रजतत्वं जानत एव शुक्तौ भ्रमो भवति न त्वजानत इति पामराणां भ्रमासम्भव इति चेन्न, कदाचिद्व्युत्पन्नोऽसाधुशब्दं साधुशब्दं बुद्ध्वा व्यवहृतवान्, तन्दृष्ट्वा पामरास्तथैव व्यवहर्तुमारब्धा इति पूर्वपूर्वभ्रमादुत्तरोत्तरभ्रमः । यद्वा—'घटमानय' इति केनचिदुक्तम्, तदानीमेवान्येनोच्चरितं गगरीशब्दं श्रुत्वा घटमानयन्तञ्च तन्दृष्ट्वा गगरीशब्दादेवास्य बोध इति पामरस्य भ्रमो जातस्तत एवोत्तरोत्तरेषां भ्रमः । ते=असाधुशब्दाः । साधुष्विति—विषयत्वं सप्तम्यर्थः । साधुशब्दविषयकं स्मरणं कारयित्वा । प्रत्ययोत्पत्तिहेतवः=प्रत्ययः=अर्थबोधस्तदुत्पत्तिकारणानि भवन्ति इति पूर्वार्द्धार्थः । तादात्म्यमिति—साधुशब्दतदर्थयोस्तादात्म्यम् । ययोः शब्दार्थयोः परस्परं

दर्पणव्याख्या

मूले * अनुमानेन वाचक इति * अनुमानमत्र स्मृतिः । अनु=पश्चान्मानम्=मितिरिति व्युत्पत्तेः, नतु व्याप्तिज्ञानम्, तच्छून्यानामपि शाब्दबोधदर्शनात् । गाव्याद्यपभ्रंशानां गवादिशब्दविकृतित्वेनोद्बोधकविधया झटिति प्रकृतिस्मारकत्वादित्याशयेन व्याचष्टे—*अनुमानेन साधुशब्दमिति* । *अनुमायेति* स्मृत्वेत्यर्थः । वक्ष्यति च—'तेषां साधुस्मरणे एवोपयोगः' इति । अपभ्रंशानां साक्षाद् बोधकता तु न, शब्दजनकसाधुत्वस्याभावादसाधुत्वज्ञानस्य प्रतिबन्धकत्वाद्वेति भावः । तत्र हरिसम्मतिमाह—*उक्तं हीति* । ते=अपभ्रंशाः । *'साधुषु* इति विषयसप्तमी, साधुविषयकस्मरणेनेत्यर्थः । *प्रत्ययेति* गवाद्यर्थबोधकारणानीत्यर्थः । पक्षान्तरमाह—* तादात्म्यमिति * साधुगवादिशब्दतादात्म्यप्रकारकज्ञान-

न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः ।
ते (न) यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥
बम्बम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।

प्रभा

लोके शिष्टव्यवहारे तादात्म्यमुपलभ्यते तयोरेव वाच्यवाचकभावः । यदर्थस्य यत्र शब्दे तादात्म्यन्तदर्थनिरूपिता तस्मिन् शब्दे शक्तिः, अपभ्रंशस्य तु शिष्टव्यवहारविषयत्वाभावान्नार्थेन सह तादात्म्यम् । परन्त्वसाधुशब्दा अपि अर्थेन सह तादात्म्यमुपगता इवार्थप्रकाशका भवन्ति । एतेन बोद्धुरपभ्रंशेऽर्थतादात्म्यभ्रमाच्छक्तिभ्रमेण बोध उपपादितः ।

अन्ये हेलाराजादयस्तु अन्यथा व्याचख्युः । तथाहि—विवाग् (विरुद्धवाग्) अशक्तव्यक्तीनां बालवदन्धादिवदनुमिता (अनुस्मृता) वृत्तिर्विदुषां वाचिका । नहि विद्वांसोऽर्थमपभ्रंशशब्दात् साक्षात्पश्यन्तीति नापभ्रंशानामर्थे कश्चित्सम्बन्धः । अत एव पुराकल्पेऽनृतादिभिरिवापभ्रंशैरपि रक्षिता वागासीत् । अवाचका एवापभ्रंशाः । ते तु सादृश्यात् साधुशब्दमनुमापयन्ति (स्मारयन्ति) । तथाच सङ्ग्रहकारकः—'शब्दप्रकृतिरपभ्रंशः' इति । शब्दः प्रकृतिः=उपादानकारणं यस्य सोऽपभ्रंशः । तथाच स्वप्रकृतिभूतशब्देन तादात्म्यापन्न एवापभ्रंशोऽर्थमभिदधाति ।

न शिष्टैरिति—यतः शिष्टैः पाणिन्यादिभिः साधवः पर्य्याया इव स्मृतिशास्त्रेण व्याकरणस्मृत्या ते=अपभ्रंशाः । नानुगम्यन्ते=अनुगतप्रकृतिप्रत्ययादिरूपेण न बोध्यन्ते । तस्मात्=पाणिन्यादिभिरननुख्यातत्वात् ।

बम्बम्बेति— मात्रादिभिः 'अम्बा' 'अम्बा' इति कथयेति शिक्ष्यमाणो बालो यदाऽशक्त्या 'म्बा' म्बा' इति किञ्चिदव्यक्तमस्पष्टाक्षरं भासते, तद्विदाम्=व्यक्तविदाम् , तेन—अव्यक्तेन व्यक्ते ज्ञाते सति निर्णयो भवति=अर्थज्ञानं जायते । एवमिति—साधौ प्रयोक्तव्ये=प्रयोक्तुमर्हत्वेऽपि कथञ्चिदपभ्रंशः यः शब्दः प्रयुज्यते=

दर्पणव्याख्या

विषयतामापाद्य वेत्यर्थः । एवकारो वाऽर्थे । गोपदे उच्चारणीये करणापाटवेन गावीत्युच्चारितम् , वस्तुतो गोपदमेवेदमिति तादात्म्येन भासमाना गाव्यादिशब्दा गवादिरूपार्थस्य प्रकाशका इत्यर्थः । नच वक्ष्यमाणकल्पाभेदः, तत्रापभ्रंशगतानुपूर्व्या एव शक्तावच्छेदकत्वात् । अत्र तु साधुगतायास्तस्यास्तत्त्वमिति भेदादिति भावः ।

यत्तु—शब्दार्थयोस्तादात्म्यं शक्तिरिति स्वोक्तार्थे तादात्म्यमित्यादिहरिकारिकार्द्धस्योपष्टम्भकतयोपन्यसनम् , तन्मुधैव, तादात्म्यस्य शक्तित्वेऽपि शब्दनिष्ठतादात्म्यज्ञानस्यार्थाबोधकत्वेन तस्य शक्तित्वासम्भवात् । उपक्रमोपसंहारपर्य्यालोचनया साधुशब्दतादात्म्यभ्रान्त्याऽपभ्रंशानामर्थबोधकजनकत्वमिति पक्षान्तरपरतयैव तद्व्याख्यानस्यौचित्यादिति ।

अवाचकत्वे युक्तिमाह—* न शिष्टैरिति * यतस्तेऽपभ्रंशाः साधवः पर्य्याया इव शिष्टैः स्मृत्यादिना न प्रतिपाद्यन्तेऽतो न वाचका इत्यर्थः । ते साधुष्वित्याद्युक्तमर्थं विशदयति—* बम्बम्बेत्यादि * 'अव्यक्तम्' इति भाषणक्रियाविशेषणम् । * तद्विदाम् * अव्यक्तशब्दश्रोतॄणाम् । * तेन * साधुविकृत्यपभ्रंशश्रवणेन । * व्यक्ते * अपभ्रंशप्रकृतिसाधुशब्दे । अस्य स्मृते सतीति शेषः । * निर्णयः * तदर्थशाब्दबोधो भवतीत्यर्थः । * एवमिति * इत्थमेवेत्यर्थः * साधौ *=गवादिशब्दे । * अपभ्रंशः *=गाव्यादिः ।

SGDF Sri Gargeshwari Digital Foundation

तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ इति ॥

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानम्, ? शक्तिकल्पकव्यवहारादेस्तुल्यत्वात्, इति चेत् सत्यम्; तत्तद्देशभेदेन भिन्नेषु तेषु तेषु शक्तिकल्पने गौरवात्। नच पर्य्यायतुल्यता शङ्कया, तेषां सर्वदेशेष्वेकत्वात्, विनिगमनाविरहेण सर्वत्र शक्तिकल्पना, नहि अपभ्रंशे तथा, अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च। एवञ्च 'शक्तत्वमेवास्तु साधुत्वम्' इति नैयायिकमीमांसकादीनां मतं तन्मतेनैव द्रष्टव्यम्।

इदानीं स्वमतमाह—वाचकत्वाविशेषे वेति। अयं भावः—अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात्। नच साधुस्मरणात् ततो बोधः, तानविदुषां पामराणामपि बोधात्, तेषां साधोरबोधाच्च

प्रभा

प्रयुक्तो भवति तेन=अपभ्रंशेन साधुव्यवहितः=साधुस्मरणद्वारकः कश्चिदर्थोऽभिधीयते=प्रत्याय्यते।

अपभ्रंशानां वाचकत्वाभावं द्रढयितुं शङ्कते—नन्विति। शक्तिकल्पकेति—शक्तिकल्पकेषु मुख्यो वृद्धव्यवहार एव। स चापभ्रंशेष्वपि तुल्य एवेति। अपभ्रंशानामपि वाचकत्वमेवास्त्विति भावः। तेषु तेष्विति—नानाविधेषु बुद्धिस्थेष्वित्यर्थः। तथाचापभ्रंशानां नानात्वेन संस्कृतस्य च सर्वत्रैकानुपूर्वीकत्वेन बोधकतया तत्रैव लाघवात् शक्तिरिति भावः। पर्य्यायतुल्यतेति—यथा एकस्यार्थस्यानेके साधवः पर्यायास्तथाऽविशेषादपभ्रंशा अपि सन्त्वित्यर्थः। तेषाम्—साधुपर्य्यायाणाम्। एकत्वादिति—विष्णुनारायणादिपर्यायाणां सर्वदेशेष्वेकरूपेण बोधकत्वादित्यर्थः। तथा—सर्वदेशेष्वेकरूपता। अन्यथा—अपभ्रंशेष्वपि शक्तिकल्पनायाम्। एवञ्च—अपभ्रंशानामशक्तत्वे च। नच शक्तत्वस्यैव साधुत्वे लाक्षणिकानामसाधुत्वम्, तेषामपि प्रवाहादौ शक्तत्वात्। नचैवं घटादीनां पटाद्यर्थे साधुत्वापत्तिः, शक्तत्वस्य वृत्तिमत्त्वपरत्वेनादोषात्। तन्मतेनैवेति—'असाधुरनुमानेन' इति हर्युक्तमताभिप्रायेण नैयायिकादीनां मतमित्यर्थः। आहेति—कौण्डभट्ट इति शेषः। वाचकत्वाविशेषेति—शब्दापशब्दयोर्वाचकत्वकृतभेदाभावेऽपि व्याकरणस्मृत्या नियमः क्रियते—साधुभिर्भाषणे पुण्यमसाधुभिर्भाषणेऽपुण्यमिति वाचकत्वन्तूभयोः सममेवेति भावः। अतः 'समानायामर्थावगतौ शब्देन चापशब्देन च, तत्र धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति' इति भाष्यं सङ्गच्छते। ततः=अपभ्रंशात्। तान्=साधुशब्दान्। अविदुषाम्=अजानताम्। तेषाम्=पामराणाम्। साधोः=साधुशब्दात्।

दर्पणव्याख्या

* तेन *=असाधुशब्देन। *साधुव्यवहितः*=साधुस्मृतिद्वारकः। *कश्चित्*=प्रसिद्धोऽम्बादिरूपः। * अभिधीयते *—बोध्यते इत्यर्थः। उक्तमेवार्थं द्रढयितुमाशङ्कते—* नन्विति *। तेषाम्*=साधुपर्य्यायाणाम्। *एकत्वादिति* एकजातीयत्वादित्यर्थः। *तथा* एकजातीयत्वम्, येन तत्रापि विनिगमकाभावाच्छक्तिकल्पना स्यादिति भावः।

* अन्यथेति * एकजातीयत्वस्य शक्तिकल्पनायामतन्त्रत्वे शक्तिमत्त्वाविशेषात् साधूनामिवापभ्रंशानामपि कोशादौ प्रतिपादनं प्रसज्येतेत्यर्थः। * तन्मतेनैवेति * ते साधुष्वनुमानेनेत्याद्युक्तहरिमतेनैवेत्यर्थः। अपभ्रंशाद् बोधस्योक्तरीत्योपपादितत्वात् तत्र शक्तिकल्पनं स्वाग्राहकमूलकमित्याशङ्कां निराचिकीर्षुस्तत्रोक्तप्रकारासम्भवं दर्शयति—* अयम्भाव इति *। * तानिति * साधुशब्दानित्यर्थः। अज्ञाने हेतुमाह—* पामराणामिति *। * बोधादिति * व्यवहारेण तेषां बोधानुमानादित्यर्थः।

नच शक्तिभ्रमात् तेभ्यो बोधः, बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् । 'ईश्वरेच्छा शक्तिः' इति मतेऽपि सन्मात्रविषयिण्यास्तस्या बाधाभावात्, शक्तेः पदपदार्थविशेषघटिताया भ्रमासम्भवाच्चेति ।

प्रभा

यदि प्रत्यक्षश्रुतादपि न बोधश्चेत्तर्हि स्मृतात्कथं बोधः स्यादिति भावः । तेभ्यः=अपशब्देभ्यः । अबाधेनेति—अपशब्दे पामराणां बोधजनकत्वप्रकारकनिश्चयात्मकज्ञानविषयतायाः सत्त्वेन बोधजनकत्वाभावरूपबाधज्ञानासम्भवेनेति भावः, तदभाववत्ताज्ञानम्प्रति तद्वत्तानिश्चयस्य प्रतिबन्धकत्वात् । ईश्वरेच्छेति—गगर्य्यादिपदादपि घटादिविषयकबोधदर्शनेन 'घटो गगरीपदजन्यबोधीयविषयतावान् भवतु' इत्याद्याकारिकेश्वरेच्छाशक्तिरावश्यकी । अन्यथा घटादिनिष्ठाया गगर्य्यादिपदजन्यबोधविषयताया ईश्वरेच्छाया अविषयत्वेन तस्याः सन्मात्रविषयत्वं हीयेत । नच लाघवादीश्वरैक्यमिव तदिच्छाया अप्यैक्यात् गगरीपदजन्यबोधविषयत्वप्रकारिका या इच्छा तदीयविशेष्यतयैव शक्तिः । एवम् 'पटः पटपदजन्यबोधविषयतावान् भवतु' इत्याद्याकारिकायाः समूहावलम्बनात्मकेश्वरेच्छीयविशेष्यतायाः पटादावपि सत्त्वाद् गगरीशब्दात्पटादिबोधापत्तिरिति चेन्न, तत्पदजन्यबोधविषयत्वनिष्ठविषयतात्वावच्छिन्नप्रकारतानिरूपकेश्वरेच्छीयविशेष्यतायाः पटादौ सत्त्वेऽपि गगरीपदजन्यबोधविषयतात्वावच्छिन्नविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यताया घटनिष्ठाया एव गगरीपदस्य शक्तित्वेनाभिमतत्वात्, तस्याश्च घटे एव सत्त्वेनादोषात् । एवमेवान्यपदस्यान्यपदार्थे शक्तिर्वारणीया । तथाच गगरीपदजन्यबोधविषयतात्वावच्छिन्नविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यतारूपा शक्तिर्यदि घटेऽस्ति तदा भ्रमत्वासम्भवः, तदभाववति तत्प्रकारकज्ञानस्यैव भ्रमत्वात् । यदि घटे नास्ति तर्हि अन्यत्रापि नास्तीति सुतरां भ्रमत्वासम्भवः, क्वचिज्ज्ञातस्यैव भ्रमत्वसम्भवात् । ननु पदविशेष्यिकाया अपि इच्छायाः शक्तित्वेन घटविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यताकेच्छायास्तादृशविशेष्यतासम्बन्धेन घटपदे एव प्रसिद्धतया गगरीपदे तद्भ्रमसम्भव इति चेन्न, घटपदनिष्ठविशेष्यतासम्बन्धेनैव तादृशेच्छायाः शक्तित्वेन भ्रमत्वासम्भवादित्याह—पदपदार्थविशेषेति ।

दर्पणव्याख्या

तथाचानधीतशास्त्राणां तेषां साधुत्वप्रकारकशब्दज्ञानासम्भवेन न तत्र साधुशब्दस्मृतिकल्पनया शाब्दबुद्धिरुपपादयितुं शक्येति भावः । किञ्च साधुशब्दस्मृतिकल्पना कथञ्चित् सम्भवेदपि यदि प्रत्यक्षश्रुतसाधुशब्दात्तेषां बोधोदयः स्यात् । स एव नास्तीत्याह—* तेषां साधोरिति । * शक्तिभ्रमादिति * अर्थनिरूपितायाः साधुशब्दनिष्ठायाः शक्तेरपभ्रंशे भ्रमादित्यर्थः ।

किं बोधकत्वरूपशक्तिभ्रमात् तत्र बोध उपपद्यते, उतेश्वरेच्छारूपशक्तिभ्रमात् । तत्र नाद्यः कल्प इत्याह—* बोधकत्वस्येति * । द्वितीये त्वाह—* ईश्वरेच्छेति । *सन्मात्रेति* मात्रपदं कृत्स्नार्थकम् । अपभ्रंशाद् बोधस्य सर्वानुभवसिद्धत्वेन बोधकत्वेनेश्वरेच्छाया अपि तत्राबाधेन तामादायापि न शक्तिज्ञानस्य भ्रमत्वसम्पत्तिः । प्रतीतेर्भ्रमत्वे विषयबाधस्यैव तन्त्रत्वादिति भावः ।

ननु लाक्षणिक इवापभ्रंशेऽपि वाचकत्वव्यवहाराभावेन तद्व्यावृत्त्येश्वरेच्छारूपशक्तेस्तत्र भ्रमे बाधकाभावोऽत आह—* शक्तेरिति * । *भ्रमासम्भवाच्चेति* तत्पदविशेष्यकतदर्थबोधजनकत्वप्रकारकेच्छायास्तत्पदविशेष्यकत्वेन गृहीताया पदान्तरविशेष्यकत्वासम्भवेन तद्भ्रमासम्भवादित्यर्थः । यथाश्रुताभिप्रायेणेदम् । परिष्कृतविशेष्यत्वरूपायास्तत्सम्बन्धावच्छिन्नावच्छेदकत्वरूपायाः पदार्थान्तररूपाया वा शक्तेस्तत्र भ्रमे बाधकाभावादिति बोध्यम् । तथाच भ्रमेणापि बोधस्य दुरुपपादत्वेन

उक्तञ्च वाक्यपदीये—

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥
दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्य्ययः ॥ इति ॥

अवाचकः=अबोधकः, बुद्धिविपर्य्ययः=एते एव वाचका नान्ये इति विपर्य्यय इत्यर्थः । किञ्च विनिगमनाविरहाद् भाषायामपि शक्तिः । नच तासां नानात्वं दोषः,

प्रभा

उक्तञ्चेति—अपभ्रंशानां वाचकत्वमुक्तमित्यर्थः । पारम्पर्य्यादिति—'चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यानम्, इति वार्तिकात्स्वार्थे ष्यञ् । परम्परात इत्यर्थः । अभिधातृषु=वक्तृषु । विगुणेषु=वागिन्द्रियदोषवशादुच्चारणसामर्थ्यरहितेषु सत्सु पारम्पर्य्यात्=तादृशवक्तृपरम्परातो येषु=अर्थेषु प्रसिद्धिम्=रूढिम् आगताः=प्राप्तास्तेषामर्थानां साधुः=शब्दः स्मरणद्वारा अवाचकः=बोधको न भवति किन्त्वसाधुरेव साक्षाद् बोधको भवतीत्यर्थः ।

दैवीति—इयं दैवी संस्कृतरूपा वाग् । अशक्तैः=उच्चारणसामर्थ्यरहितैरभिधातृभिर्व्यवकीर्णा=विकृतानुपूर्वीका कृता । अनित्यदर्शिनाम्=शब्दानित्यत्ववादिनां नैयायिकानाम् । अस्मिन् वादे=शक्तिविचाररूपे वादे । एते=साधवः । नान्ये=नापभ्रंशाः । ननु तत्तत्पदजन्यबोधविषयत्वप्रकारिका तत्तदर्थविषयकबोधजनकत्वप्रकारिका वेश्वरेच्छा शक्तिरिति मते द्वितीयेच्छाया अर्थघटितत्वेऽपि पदघटितत्वाभावाद् गगर्य्यादिशब्दे तद्भ्रमसम्भव इत्यत आह—किञ्चेति ।

दर्पणव्याख्या

भाषायां शक्तिरावश्यकेति भावः ।

अस्मिन्नपि पक्षे हरिसम्मतिमादर्शयति—*उक्तञ्चेति* । *पारम्पर्य्यादिति* स्वार्थे ष्यञ् । *विगुणेषु इति* हेतुगर्भं विशेषणम् । वैगुण्यञ्च करणापाटवरूपम्, अभिधातृवैगुण्यस्यापभ्रंशनियामकत्वात् । तथाच विगुणेष्वभिधातृषु सत्सु परम्परया येष्वर्थेषु प्रसिद्धिमागता इत्यर्थः । * दैवीति * संस्कृतरूपेत्यर्थः । * अशक्तैः * =करणापाटववद्भिः * व्यवकीर्णा *=उच्छिन्नानुपूर्वीका कृतेत्यर्थः । * अनित्यदर्शिनाम् * शब्दानित्यत्ववादिनाम् । * अस्मिन्वादे *—शक्तिविवादे इत्यर्थः ।

ननु 'तेषां साधुरवाचकः' इत्यनुपपन्नम्, यस्मिन्नर्थेऽपभ्रंशाः प्रयुज्यन्ते तद्वाचकत्वस्य साधुषु सर्वसम्मतत्वादतो व्याचष्टे—* अबोधक इति * व्यवहितः साधुर्न तत्र बोधकः, किन्तु साक्षादपभ्रंशा एव तत्तदानुपूर्वीमत्त्वेन वाचका इति भावः ।

नन्वियं अपभ्रंशरूपा वाग् अभिधातृवैगुण्येनोच्छिन्नानुपूर्वीकाऽपि दैवी संस्कृतरूपैव । नैयायिकानां त्वस्या अबोधकत्वे भ्रम एव । पारम्पर्य्यादित्युपपादनात् साधुतादात्म्यभ्रान्तिमूलकशक्तिभ्रमेण बोधकत्वसम्भवादित्यर्थकम् 'दैवीवाग्व्यवकीर्णेयम्, इत्यपि पूर्वोक्तान्तिमकल्पस्यैवोपोद्बलकम् । नचैवं 'तेषां साधुरवाचकः' इत्यनुपपन्नम्, तत्कल्पे आरोपितसाधुत्वकाद्यपभ्रंशानां बोधकत्वेन साधुस्मरणाद् बोधानभ्युपगमात् । तेषामित्यादेः साधुतादात्म्यारोपविषयास्त एव प्रसिद्धार्थानां बोधकाः, ननु तत्तदानुपूर्वीमत्त्वेन बोधका इत्यर्थात्तस्मान्नोक्तयुक्त्याऽपभ्रंशानां तत्त्वेन वाचकतासिद्धिरत आह—* किञ्चेति * । * तासाम् *=भाषाणाम् । * दोष इति * तथाच गौरवात् तत्र शक्तिरित्यर्थः ।

संस्कृतवन्महाराष्ट्रादिभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् ।

किञ्चानुपूर्वी पदेऽवच्छेदिका । सा च पर्य्यायेष्विव भाषायामप्यन्यान्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः । तथाच संस्कृतवद् भाषायाः सर्वत्रैकत्वेन प्रत्येकं शब्दाः शक्ता एव । नच पर्य्यायतया भाषाणां गणनाऽऽपत्तिः, साधूनामेव कोशादौ विभागाभिधानात् ।

नन्वेवं साधुता तेषां स्यादित्यत आह—नियम इति—पुण्यजननबोधनाय साधूनाम्, "साधुभिर्भाषितव्यम्" इति विधिः । पापजननबोधनाय "नासाधुभिः" इति निषेधः । तथाच पुण्यजननयोग्यत्वं साधुत्वम् । पापजननयोग्यत्वमसाधुत्वम् तत्र जनकताऽवच्छेदिका च जातिः ।

प्रभा

महाराष्ट्रेति— इदमुपलक्षणम्—सर्वभाषायाः सर्वत्रैकरूपेण बोधकत्वात् । नहि काचन भाषा देशभेदेन भेदमुपैति । यदि विकृता तर्हि भाषान्तरमेव सा । नन्वानुपूर्वी वाचकतावच्छेदिका सा च साधुशब्देषु एका । अपभ्रंशानान्तु नानात्वान्नानानुपूर्वी शक्ततावच्छेदिकेति गौरवमित्याशङ्कायामाह—किञ्चानुपूर्वीति—नानापर्य्यायनिष्ठा नानानुपूर्वी यथा शक्ततावच्छेदिका साधुषु स्वीक्रियते तथा नानाऽपभ्रंशनिष्ठाया नानाऽऽनुपूर्व्याः शक्ततावच्छेदकत्वास्वीकारे बीजाभाव इति भावः । तयोः=साध्वसाध्वोः । नच संस्कृतशब्दानां वाचकत्वे सकलशिष्टपरिगृहीतत्वमेव बीजम्, 'शवतिर्गतिकर्मा कम्बोजेषु, विकारे एव एनमार्या भाषन्ते' इति भाष्यात् संस्कृतस्यापि सकलशिष्टपरिगृहीतत्वाभावात् । 'भाषाशब्दाः शक्ता एव' इत्येव पाठ । 'भाषायाः सर्वत्रैकत्वेन प्रत्येकं शब्दाः शक्ता एव' इति त्वपपाठः, पुनरुक्तघटितत्वात् । विधिरिति— तथाच भाष्यम्—'शब्देनैवार्थोऽभिधेयो नापशब्देनेति, एवं क्रियमाणमभ्युदयकारि भवतीति' इति । 'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति' इति च । सम्यग्ज्ञातः=साधुत्वप्रकारकज्ञानविषयीभूतः । शास्त्रान्वितः=व्याकरणशास्त्रव्युत्पादनमार्गेणानुसंहितः । शिक्षोक्तस्थानप्रयत्नादिवैशिष्ट्येनोच्चारितः । निषेध इति—'न म्लेच्छितवै नापभाषितवै' इति भाष्ये 'न म्लेच्छितवै' इत्यस्यैव दार्ढ्यार्थमनुवादः—'नापभाषितवै' इति अपशब्देन न भाषणीयमित्यर्थः । 'कृत्यार्थे तवैकेन्केन्यत्वनः' (३-४-१४) इत्यनेन म्लेच्छ-भाषधातुभ्यां तवैप्रत्ययः । समानायामर्थावगतौ शब्देनापशब्देन च तत्र शास्त्रेण धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देनेति' इति च निषेध इत्यर्थः । तथाच पुण्यजनकः साधुशब्दप्रयोगः, पापजनकोऽसाधुशब्दप्रयोगः । समवायेन पुण्यविशेषं प्रति स्वाभिव्यञ्जककण्ठाद्यभिघातादिजनककृतिमत्त्वेन साधुशब्दः कारणम् । पुण्यजननेति— शब्दनिष्ठः पुण्यजनकतावच्छेदको धर्मो जातिविशेषः साधुत्वम् । अप-

दर्पणव्याख्या

सकलदेशशिष्टपरिगृहीतत्वमेव विनिगमकमत आह—* अवच्छेदिकेति * बोधजनकताऽवच्छेदिकेत्यर्थः * तयोरिति * साध्वपभ्रंशयोरित्यर्थः । सकलशिष्टपरिगृहीतत्वन्तु न विनिगमकम्, "शवतिर्गतिकर्मा कम्बोजेषु प्रयुज्यते । विकारे एवैनमार्य्या भाषन्ते" इति भाष्यात्तत्तद्देशनियतसंस्कृतेषु शक्तिसिद्ध्यानापत्तेः, वाचकस्य व्यञ्जकतायामालङ्कारिकाणां प्राकृतभाषोदाहरणस्यासङ्गतत्वापत्तेश्च । अत एव तत्तद्देशीयशिष्टानां तत्तद्भाषासु निस्सन्दिग्धशक्तत्वप्रत्ययः सङ्गच्छते । नचासौ भ्रमः, बोधकाभावादिति भावः । उपसंहरति—* तथाचेति * । * एवम् *=अपभ्रंशानामपि शक्तत्वे * तेषाम् *=अपभ्रंशानाम् । * साधुता स्यादिति * शक्तत्वस्यैव साधुत्वादिति भावः । * साधुभिर्भाषितत्वमिति * साधूनेव प्रयुञ्जीतेत्यादिरूपश्चेत्यर्थः । * नासाधुभिरिति * "नापभ्रंशितवै न म्लेच्छितवै" इत्यादिनिषेधविधिरित्यर्थः । * योग्यत्वम् *—जनकतावच्छेदकधर्मवत्त्वम् । * तत्र *=साधुशब्दे । * जातिरिति *

Sri Gangeshwari Organic Foundation

तज्ज्ञापकञ्च कोशादि, व्याकरणादि च।

एवमेव च राजसूयादेर्ब्राह्मणे फलाजनकत्ववद् गवादिशब्दानां नाश्वादौ साधुत्वमिति सङ्गच्छते। आधुनिकदेवदत्तादिनाम्नामपि "द्व्यक्षरम्" इत्यादिभाष्येण व्युत्पादितत्वात् साधुत्वम्। एवञ्च

प्रभा

भ्रंशशब्दनिष्ठः पापजनकतावच्छेदको धर्मविशेषोऽसाधुत्वम्। साधुत्वं जातिः, कत्वादिना साङ्कर्यन्तु न जातित्वबाधकम्, ययोर्धर्मयोर्लोके वैयधिकरण्यस्यैव प्रसिद्धिस्तयोरेव साङ्कर्यस्य जातित्वबाधकत्वात्। साधुत्वकत्वादिधर्मयोस्तु 'करोत्यादिशब्दघटकः ककारः साधुः' इति व्यवहारस्यापि दर्शनेन सामानाधिकरण्यस्य सर्वसम्मतत्वात्। नरत्वसिंहत्वयोस्तु लोके वैयधिकरण्यमेवेति तयोः साङ्कर्यं जातित्वबाधकम्, इति न नरसिंहे नरत्वं सिंहत्वञ्च जातिद्वयम्, किन्तु नरसिंहत्वं जात्यन्तरम्। साङ्कर्यं भेदभञ्जकत्वस्यैव बाधबीजत्वात्। एवञ्च भूतत्वमूर्त्तत्वे जातिरूपे एव। आकाशातिरिक्तभूतचतुष्कं मूर्तम्, इति व्यवहारदर्शनेन नरत्वसिंहत्वयोरिव वैयधिकरण्याभावात्। कोशादिति—आदिना भाष्यशिष्टप्रयोगानुमानादीनां सङ्ग्रहः। अत्र कोशादिव्याकरणाद्योरन्यतरप्रयोग उचितः। अत एव भूषणे कोशव्याकरणादिकमित्युक्तम्। अत्र कोशोपन्यासेन तत्तदर्थपुरस्कारेणैव शब्दानां साधुत्वं बोधितम्। अन्यथा कोशस्य तत्तदर्थनिरूपितशक्तेरेव बोधकतया साधुत्वज्ञापकत्वेनोपन्यसनमसङ्गतमेव स्यात्। एवमेव=तत्तदर्थपुरस्कारेण शब्दानां साधुत्वादेव। राजसूयादेरिति—'राजा राजसूयेन यजेत' इति श्रुत्या राजकर्तृकेष्टभावनायामेव राजसूययागस्य करणत्वबोधनेन राजपदस्य रूढ्या क्षत्रियार्थकतया ब्राह्मणस्य तदनधिकारित्वेन कृते राजसूये फलाजनकत्ववदित्यर्थः। नाश्वादौ साधुत्वमिति—तत्तदर्थनिबन्धनत्वात्साधुत्वस्येत्यर्थः। अत एव 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' इत्यादिसूत्रेषु अर्थनिर्देशः सङ्गच्छते। नचैवं लाक्षणिकानामसाधुत्वापत्तिः, तीराद्यर्थे केनापि साधुत्वाबोधनादिति वाच्यम्, शिष्टैस्तीराद्यर्थे लाक्षणिकानां प्रयुक्तत्वेन तत्रापि साधुत्वाक्षतेः, शक्यतावच्छेदकारोपस्यैव लक्षणात्वेन शक्यार्थमादायैव तत्प्रयोगसत्त्वाच्च। आधुनिकेति— कोशाद्यबोधितार्थे स्वेच्छया अशिष्टैः प्रयुक्तानामित्यर्थः। द्व्यक्षरमिति—'घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं चतुरक्षरं वा पुरुषस्य नामकृतं कुर्यान्न तद्धितम्' इति भाष्येणेत्यर्थः।

दर्पणव्याख्या

तत्र प्रमाणन्तु "एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति" इति "एकः पूर्वपरयोः" (पा० सू० ६।१।६४) इत्यत्र भाष्यपठितश्रुतिः। सम्यग् ज्ञातः=साधुत्वेन ज्ञातः। 'यदिह परिनिष्ठितं तत् साधु' इत्यर्थापत्तिलभ्यवाक्येन च तत्। शास्त्रान्वितः=शास्त्रव्युत्पादनमार्गेणाभिसंहितः। सुप्रयुक्तः=शिक्षायुक्तमार्गेण प्रयुक्त इति तदर्थः, "ते हेऽलय इति कुर्वन्तः पराबभूवुः" इति श्रुतिश्च। यदि च कत्वादिना साङ्कर्य्यान्न तस्य जातित्वमिति विभाव्यते तदास्तूपाधिरिति भावः।

तज्ज्ञापकमिति तदभिव्यञ्जकमित्यर्थः। यथैतत्तथोक्तम्। व्याकरणादिपदाच्छिष्टप्रयुक्तत्वपरिग्रहः। *एवमेवेति* तत्तदर्थपुरस्कारेण तत्तच्छब्दानां साधुत्वपर्य्यवसानलाभेनैवेत्यर्थः। * फलाजनकत्ववदिति * क्षत्रियाधिकारिकृतस्यैव तस्य फलश्रवणादिति भावः। * साधुत्वमिति * गवाद्यर्थपुरस्कारेणैव गवादिशब्दानां प्रयोगे पुण्यजनकत्वरूपं साधुत्वमित्यर्थः। नन्वाधुनिकदेवदत्ताद्यर्थपुरस्कारेणदेवदत्तादिशब्दानां शास्त्रेऽव्युत्पादनात् तेषां देवदत्तादौ साधुता न स्यादत आह— *आधुनिकेति *। * द्व्यक्षरमिति * "घोषवदाद्यन्तरन्तःस्थं द्व्यक्षरं चतुरक्षरं वा पुरुषस्य नाम कृतं कुर्यान्न

यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्र साधुरिति पर्यवसितम् ।

गौणानां गुणे व्युत्पादनात् तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव । आधुनिकलाक्षणिकानां त्वसाधुत्वमिष्टमेव । अत एव 'ब्राह्मणाय देहि' इत्यर्थे 'ब्राह्मणं देहि' इत्यादिकं लक्षणयाऽपि न साधुरित्यादि विस्तरेण प्रपञ्चितं भूषणे ॥ ३८ ॥

अतिरिक्तशक्तिग्रहोपायमाह—

प्रभा

व्याकरणेनेति—एतेन व्याकरणेन व्युत्पादितानामेव साधुत्वं ध्वनितम् । नच व्याकरणापरिगृहीतानां रथन्तरादीनामसाधुत्वापत्तिः, 'पृषोदरादीनि यथोपदिष्टम्' 'उणादयो बहुलम्' इत्यादिना तेषामपि परिग्रहात् । गौणानामिति—गुणादागता गौणाः क्रौर्य्यादिगुणयोगात् माणवकादौ प्रयुक्ताः, ये लाक्षणिकाः सिंहादिशब्दाः, नैयायिकमते गुणिनि प्रयुक्ताः शुक्लादिशब्दाश्च गुणे=प्रकारीभूते प्रवृत्तिनिमित्ते तादृशगुणमादाय व्युत्पादनात्=वाचकत्वेन बोधनात् । तत्पुरस्कारेण=शक्यतावच्छेदकारोपात् तादृशप्रवृत्तिनिमित्तपुरस्कारेण प्रवृत्तौ=प्रयोगे । 'सिंहो माणवकः' इत्यादौ आरोपे निमित्तं क्रौर्य्यादिगुणयोगः । 'शुक्लो घटः' इत्यादौ गुणिनि शुक्लत्वारोपे शुक्लगुणयोगो निमित्तम् । वैयाकरणनये तु शुक्लशब्दो गुणगुणिनोरुभयत्रापि शक्त एव । अत एव 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति वार्तिकं सङ्गच्छते । अन्यथा लक्षणया प्रकृत्यैव मतुबर्थस्य गुणिनोऽभिधानात् मतुपोऽप्राप्त्या लुग्विधानानुपपत्तेः । आधुनिकलाक्षणिकानामिति—नन्वाधुनिकदेवदत्तादिनाम्नां शरीरविशेषावच्छिन्ने शास्त्रेण व्युत्पादनादसाधुत्वापत्तिरत आह—असाधुत्वमिति । अत एवेति—यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितस्तस्य तत्रैव साधुत्वादेवेत्यर्थः । अत एव 'कर्तृकर्मणोः कृति' इत्यादिसूत्रं चरितार्थम् । अन्यथा शेषषष्ठ्याः कर्मादौ लक्षणया सिद्धे तद्वैयर्थ्यं स्पष्टमेव ।

नन्वपभ्रंशानां वाचकत्वे 'अर्थवत्' इत्यनेन प्रातिपदिकसंज्ञापत्तिः, तत्तच्छास्त्रप्रवृत्तौ साधुत्वस्यापि उद्देश्यतावच्छेदकदले निवेशात् । नच शास्त्रप्रवृत्तौ साधुत्वम्, साधुत्वे च शास्त्रप्रवृत्तिरित्यन्योऽन्याश्रय इति वाच्यम्, 'भूवादयो धातवः' इत्यनेनावृत्त्या साधुत्वस्यापि विधानात् । नच तस्यापि तत्राप्रवृत्त्यापत्तिः, तदुद्देश्यतावच्छेदकत्वेन साधुत्वस्याप्रवेशात् । 'सिद्धे शब्दार्थसम्बन्धे' इति, 'साध्वनुशासनेऽस्मिन् शास्त्रे' इति च भाष्यात् साधुत्वस्य सिद्धत्वात् कोशादिना तज्ज्ञानेन शास्त्रप्रवृत्तौ बाधकाभावाच्च ॥ ३८ ॥

ननु पुण्यजननयोग्यत्वं साधुत्वम्, तज्ज्ञापकञ्च कोशव्याकरणाद्युक्तम् । एवञ्च येषां शब्दानां कोशेन व्याकरणेन वाऽनुक्तिस्तेषामसाधुत्वापत्तिरत आह—अतिरिक्तेति—कोशव्याकरणाद्यतिरिक्तो यः शक्तिग्रहो-

दर्पणव्याख्या

तद्धितम्" इति भाष्यस्थस्मृत्येत्यर्थः । तत्तद्देशभाषाऽनुसारेण क्रियमाणानां नाम्नां तु शास्त्राव्युत्पन्नत्वादसाधुत्वमेवेति भावः । * गौणानामिति * शुक्लादिशब्दानामित्यर्थः । गुणे=स्वशक्ये शुक्लादिरूपे ।

* व्युत्पादनादिति * "गुणवचनेभ्यो मतुपो लुक्" इति स्मृत्या "गुणे शुक्लादयः पुंसि" इत्यादिकोशेन चेत्यादिः । तत्पुरस्कारेण=नीलाद्यर्थपुरस्कारेणेत्यर्थः * प्रवृत्तौ *=गुणिनि प्रयोगे । शक्यार्थस्य बाधे अन्वयानुपपत्तिप्रतिसन्धानात्तैर्लक्ष्यार्थोपस्थापनेऽपि शक्यार्थमादाय तेषां साधुत्वं नानुपपन्नम् । शक्यार्थपुरस्कारेण तेषां शास्त्रव्युत्पन्नत्वादित्यर्थः । गौणपदस्य निरूढलाक्षणिकपदोपलक्षणत्वाच्च न गङ्गायां घोष इत्यादौ गङ्गादिपदानामसाधुत्वमिति भावः । * आधुनिकानामिति * ऐच्छिकयत्किञ्चित्सम्बन्धेन शास्त्रकृत्तात्पर्याविषये प्रयुक्तानामित्यर्थः ॥ ३८ ॥

ननु शक्तिग्राहकयोः कोशव्याकरणयोर्विद्यमानत्वाच्छक्तिग्रहोपायकथनं व्यर्थमत आह * अतिरिक्तेति * कोशव्या-

सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता ॥
समयाद् योग्यतासंविन्मातापुत्रादियोगवत् ॥ ३९ ॥

सम्बन्धो विषयः । योग्यतां प्रति योग्यता—सम्बन्धिशब्दं प्रति योग्यता विषय इति । समयात्—व्यवहारात्, योग्यतासंवित्—शक्तिग्रहः । घटपदमत्र योग्यमेतत्सम्बन्धीति व्यवहारात् सा ग्राह्येत्यर्थः ॥ ३९ ॥

इति वैयाकरणभूषणसारे शक्तिनिर्णयः ॥ ६ ॥

प्रभा

पायस्तमाहेत्यर्थः । सम्बन्धिशब्द इति—इन्द्रियाणामिति कारिकायां यः सम्बन्धशब्दस्तत्र वाच्यत्वेन प्रतीतिविषयो यो योग्यतारूपः (शक्तिरूपः) सम्बन्धः । योग्यताम्प्रति—योग्यतयैव (सम्बन्धपदनिष्ठशक्त्यैव) ज्ञाप्यः । 'लक्षणेत्थंभूत' इत्यादिना लक्षणे द्वितीया, वृक्षं प्रति विद्योतते विद्युत्' इतिवत् । तदुक्तं हेलाराजेन—'सम्बन्धशब्दो योग्यतालक्षणं सम्बन्धं योग्यतयैव प्रतिपादयति' इति । एवं समवायशब्दोऽपि अनादिसिद्धया स्वनिष्ठयोग्यतयैव समवायरूपं स्वार्थं प्रतिपादयति । एतेन सम्बन्धे सम्बन्धान्तराभाव इत्यपास्तम्, योग्यतारूप (शक्तिरूप) सम्बन्धस्य सर्वत्र सत्त्वात् । ननु योग्यताया एव सम्बन्धत्वे सङ्केतस्य कोपयोग इत्यत आह—समयादिति – समयात्=सङ्केतात्, अनादिसिद्धाया योग्यतायाः (शक्तेः) संविद्=ज्ञानं भवति । तत्र दृष्टान्तमाह—मातापित्रेति—'इयमस्य माता' 'अयमस्य पिता' इति व्यवहाराद् यथा सिद्धस्यैव जन्यजनकभावस्य ज्ञानम्, तथा योग्यताज्ञानं सङ्केतात्स्यादिति भावः । ग्रन्थकारस्त्वन्यथा व्याचष्टे—सम्बन्धो विषय इति—सम्बन्धशब्दे विषयीभूतो यः सम्बन्धः=शक्तिरूपस्तस्य 'अयं शब्द एतदर्थसम्बन्धी' इति योग्यताम्प्रति=योग्यताशब्दं प्रति विषयीभूता या योग्यता तस्याः 'अयं शब्दोऽत्रार्थे योग्यः' इति समयात्=व्यवहारात्, योग्यतासंविच्छक्तिज्ञानं जायते, योग्यतासम्बन्धयोरैक्यात् 'योग्यतासंविद्' इति सम्बन्धसंविदोरप्युपलक्षणम् । मातेति पूर्ववद् व्याख्येयम् ।

मञ्जूषाकारैस्तु—इमे कारिके इत्थं व्याख्याते । तथाहि—इन्द्रियाणाम्=चक्षुरादीनाम् । स्वविषये=रूपादिविषयकज्ञानजनने । अनादिः=पुरुषप्रयत्नानपेक्षा । यथा योग्यता=तज्जनकतावच्छेदकधर्मवत्त्वरूपा । तथा शब्दानामर्थेऽनादिः सम्बन्ध एव योग्यता=तज्जनकतावच्छेदको धर्मः । सम्बन्धशब्दे=सम्बद्ध्यतेऽर्थेन सह यः स सम्बन्धो घटादिः, कर्मणि घञ् । सम्बन्धिशब्दे=घटादिशब्दे योग्यताम्प्रति=बोधजनकतावच्छेदकधर्मवत्त्वरूपयोग्यतानिरूपितो यस्तादात्म्यलक्षणः सम्बन्धः स एव योग्यता, स्वाभाविकी एव । समयात्=अनादिवृद्धव्यवहारपरम्परारूपास्मदादिसमयेन गृहीतादीश्वरसङ्केतान्निश्चीयते । यथा मातापुत्रयोः जन्यजनकभावस्य 'इयमस्य माता' इत्यादिव्यवहारो निश्चायक इति अत्र=अर्थे । अयम्=अर्थः । एतत्सम्बन्धी=घटादिपदसम्बन्धी । सा=योग्यता ।

पञ्चोलिबालकृष्णस्य प्रभायां शक्तिनिर्णयः ।
प्रीत्यै भूयाद् भगवतोर्भवानीविश्वनाथयोः ॥
॥ शुभम्भूयात् ॥

दर्पणव्याख्या

करणाभ्यामतिरिक्तो यः शक्तिग्रहोपायस्तमित्यर्थः । तथाचानधीतव्याकरणानां तेन शक्तिग्रहासम्भवात् तदर्थं व्यवहाररूपमप्युपायमाहेतिपर्य्यवसानान्न वैयर्थ्यमिति भावः । एतेन ग्रन्थकृतातिरिक्तशक्तेरनङ्गीकारेण तद्ग्रहोपायप्रदर्शनं व्यर्थमित्याशङ्कापि समाहिता । विषयपदाध्याहारेण मूलं व्याचष्टे—* सम्बन्धो विषय इति * ।

SGDF Sri Gargeshwari Digital Foundation

अथ नञर्थनिर्णयः ।

नञर्थमाह—

नञ्समासे चापरस्य प्राधान्यात् सर्वनामता ॥
आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत् ॥ ४० ॥

अथ नञर्थनिर्णयः

प्रभा

वृत्तिस्त्रिधा—शक्तिर्लक्षणा व्यञ्जना च । तत्र लक्षणायाः शक्त्यैव गतार्थत्वं समर्थ्य व्यञ्जना निरूपणीया । व्यञ्जनाया द्योतकत्वस्वरूपतया द्योतकनञर्थं निरूपयति—नञ्समासे इति—यद्यपि नञ्समासस्यापि समासशक्तिनिर्णये एव निरूपणमुचितम्, तथापि नञो द्योतकतया पृथङ् निरूपयति—नञ्समासे इति—अत्र 'नञ्समासे' इत्युक्त्या 'घटो न पटः' 'अत्र घटो नास्ति' इत्यादावसमासस्थले घटभेदवान् पटः, घटप्रतियोगिकोऽभाव इत्यादिप्रतीत्या नञोऽभावार्थकत्वेऽपि दोषाभावः, तथापि 'असः' इत्यादौ तदभाव इत्याद्यर्थेऽभावे तदर्थस्य विशेषणतया 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इत्युक्त्या सर्वनामकार्यं न स्यादित्याह—अपरस्येति—नञ्समासे त्रयः पक्षा भाष्ये उक्ताः । तथाहि—१ अन्यपदार्थप्रधानः, २ पूर्वपदार्थ-

दर्पणव्याख्या

तथाचायमेतत्सम्बन्धीति व्यवहारे सम्बन्धो विषयः । *योग्यतां प्रति*—इदमत्र योग्यमिति योग्यताव्यवहारे योग्यताविषयो यतोऽतः समयात् तद्व्यवहाराद्योग्यताया बोधकतारूपशक्तेः संवित्=ज्ञानं भवतीत्यर्थः ।

तत्र दृष्टान्तः—*मातापुत्रादियोगवदिति* यथाऽयमेतत् सम्बन्धीति व्यवहारस्तयोर्जन्यजनकभावनिश्चायकस्तद्वदित्यर्थः।

अन्ये त्विदं हरिपद्यमित्थं व्याचक्षते—*सम्बन्धिशब्दे*=अयमेतत्सम्बन्धीति व्यवहारे । * योग्यतांमिति *= अर्थबोधजनकताऽवच्छेदकधर्मवत्त्वरूपयोग्यताव्यवहारनिरूपितो यस्तादात्म्यलक्षणोऽन्यो वा सम्बन्धः स एव योग्यताऽपरपर्यायो विषय इति शेषः । स चानादिः, वृद्धव्यवहारापरपर्यायोऽस्मदादिसमयान्निश्चीयते, नतु बोधजनकत्वमेव शक्तिः, एतद्बोधजननेऽयं योग्य इति व्यवहारात् । अत एवैतच्छेषे—

सति प्रत्ययहेतुत्वं सम्बन्ध उपपद्यते ।
शब्दस्यार्थे यतस्तस्मात् सम्बन्धोऽस्तीति गम्यते ॥

इत्यन्तेनोक्तार्थः स्पष्टीकृत इति । अधिकमन्यतोऽवधार्यम् ॥ ३९ ॥

इति वैयाकरण भूषणसारदर्पणे शक्तिस्वरूपनिरूपणम् ॥ ६ ॥

'समासे खलु भिन्नैव' इत्यत्र पङ्कजशब्दवदिति वदता समासे तद्घटकप्रत्येकशक्तिसहकृतसमुदायशक्तेर्व्यपेक्षात्वमङ्गीकृतम् । तच्चानुपपन्नम्, यत्र समासघटकप्रत्येकपदस्यानर्थकत्वं तत्र प्रत्येकशक्तिसाचिव्यासम्भवात् । यथा नञ्समासघटकनञः ।

तयोरर्थाभिधाने हि व्यापारो नैव विद्यते । इत्युक्तेः ।

एवञ्च जहत्स्वार्थावाद इवेदृशस्थले उत्तरपदार्थादिप्राधान्यस्य स्वरसतोऽनुपपत्तिरपीतीमां शङ्कां परिहर्तुं नञर्थनिरूपणमित्याह—* नञर्थमिति * । मूले * नञ्समास * इति ।

अयं भावः—'घटो न पटः, 'घटो नास्ति' इत्यादावभावशाब्दबोधस्य सार्वजनीनप्रसिद्धिसिद्धत्वान्नञोऽभावार्थकत्वमावश्यकम् । तथोचोत्तरपदार्थप्राधान्यादिव्यवस्था सुलभा । यद्यपि 'घटो न' इत्यादावभावविशेष्यक एव बोधः, तथापि 'असर्वः' इत्याद्यनुरोधेनारोपितत्वार्थकत्वमपि नञोऽङ्गीकरणीयमिति शेषपूरणेन व्याचष्टे सारे—

SGDF Sri Gargeshwari Digital Foundation

नञ्समासे अपरस्य=उत्तरपदार्थस्य प्राधान्यात् सर्वनामता सिद्ध्यतीति शेषः। अत एव आरोपितत्वमेव, नञ्द्योत्यमिति—अभ्युपेयमिति शेषः।

अयं भावः—'असर्वः' इत्यादौ 'आरोपितः सर्वः' इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात् सर्वनामता सिद्ध्यति। अन्यथा 'अतिसर्वः' इत्यत्रैव सा न स्यात्, 'घटो नास्ति' इत्यादाव-

प्रभा

प्रधानः, ३ उत्तरपदार्थप्रधानश्चेति। यदा जातौ ब्राह्मणादिशब्दा 'नास्ति ब्राह्मणः=ब्राह्मणत्वं यस्य सोऽब्राह्मणः' इति तदा अन्यपदार्थप्रधानः क्षत्रियादिः। यदा असत्सामान्यवृत्तिर्नञ् ब्राह्मणादिभिर्विशेष्यते 'ब्राह्मणत्वेनासन्' अब्राह्मणशब्देनोच्यते तदा पूर्वपदार्थप्रधानः। यदा तु दुरुपदेशान्मिथ्याज्ञानाद्वा ब्राह्मणशब्दः क्षत्रियादौ प्रयुज्यते। स्वाभाविकी ब्राह्मणपदार्थनिवृत्तिश्च नञा द्योत्यते, तदा उत्तरपदार्थप्रधानः।

अयम्भावः—अनियतविशेषगुणस्य नियतविशेषगुणप्रतिपादनाय विशेषणं प्रयुज्यते, नतु तद्रूपघाताय। यदि च नञा ब्राह्मणपदार्थः प्रतिषिध्यते तदा सर्वात्मना तदर्थस्याभावात् कथमुत्तरपदार्थप्राधान्यं स्यात्। तस्मात् 'अब्राह्मणः' इत्यत्र नञो ब्राह्मणगतविशेषगुणस्यावचनादनर्थकत्वमेव। तथाचाब्राह्मणशब्दोऽपि ब्राह्मणवाचक एव स्यादिति। यद्वा—'भेदप्रतियोगिब्राह्मणः' इत्यर्थे ब्राह्मणस्य विशेष्यतया तत्रैव कर्मत्वान्वयेन 'अब्राह्मणमानय' इत्युक्तौ ब्राह्मणस्यानयनं प्रसज्येत। अन्यपदार्थप्रधानस्तर्हि भविष्यति, यद्यन्यपदार्थप्रधानस्तर्हि 'अवर्षा हेमन्तः' इति हेमन्तस्य यल्लिङ्गं वचनञ्च तत्समासस्यापि प्राप्नोति, अथवा पुनरस्तूत्तरपदार्थप्रधानः। ननु चोक्तम्—'अब्राह्मणमानय' इत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीति, नैष दोषः, यथेह 'राजपुरुषमानय' इत्युक्ते राजा विशेषकः प्रयुज्यते तेनैवं विशिष्टस्यानयनं भवति इहापि तर्हि नञ्विशेषकः प्रयुज्यते, तेन नञ्विशिष्टस्यानयनं भविष्यति। कः पुनरसौ (नञ्) निवृत्तपदार्थकः, निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् सः क्षत्रियादिरर्थः। सादृश्यादिनाऽध्यारोपितब्राह्मण्य इत्यर्थः। एवञ्चारोपितत्वं नञ्द्योत्यमिति स्पष्टमेवोक्तम्। आरोपितत्वञ्च—तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकप्रतीतिविषयत्वम्, तथाच 'अब्राह्मणः' इत्यनेन ब्राह्मणत्वाभाववत्क्षत्रियादिनिष्ठविशेष्यतानिरूपितब्राह्मणनिष्ठप्रकारताकप्रतीतिविषयीभूताब्राह्मणक्षत्रियादिरिति बोधः। अत एव=उत्तरपदार्थस्य प्राधान्यानुरोधादेव। नञ आरोपितत्वार्थकत्वाभावे उत्तरपदार्थप्राधान्यं न स्यादिति भावः। नञ्द्योत्यमिति—नञ्समासघटकब्राह्मणादिपदानामारोपितब्राह्मणत्वादिप्रवृत्तिनिमित्तमिति नञा द्योत्यत इत्यर्थः। शेष इति—कारिकायां योजनीयमिति भावः। अन्यथा=उत्तरपदार्थस्य प्राधान्याभावे। 'असर्वः' इत्यस्य सर्वभिन्नः, सर्वाभावो वा इत्यर्थे। अतिसर्व इति—'सर्वकर्मकातिक्रमणकर्ता' इत्यर्थे सर्वशब्दस्य प्रकारताप्रयोजकतया इतरपदार्थनिष्ठविशेष्यतानिरूपितोपस्थितीयप्रकारताप्रयोजकत्वरूपोपसर्जनत्वस्य सत्त्वात् 'संज्ञोपसर्जनीभूतानां प्रतिषेधो वक्तव्यः' इति वार्तिकेन निषेधात् सर्वनामता न स्यादित्याह—सा न स्यादिति—सर्वनामता न स्यादित्यर्थः।

दर्पणव्याख्या

* सिध्यतीति * अत एवेति * प्राधान्यानुपपत्तेरेवेत्यर्थः।

ननु नञस्तत्राभावार्थकत्वे कथं प्राधान्यानुपपत्तिरित्यतोभावार्थमाह—*अयम्भाव इति*। * अन्यथा * आरोपितत्वार्थकत्वानभ्युपगमे, भेदार्थकत्व इति यावत्। *सा*=सर्वनामसंज्ञा। *न स्यादिति* 'असर्वः' इत्यत्र नञोऽभेदार्थकत्वे तत्र प्रतियोगितया सर्वपदार्थस्योपसर्जनत्वेन संज्ञोपसर्जनानां सर्वादिबहिर्भूतत्वेन अतिसर्वः' इत्यादाविव तदप्रवृत्तेरिति भावः। ननु 'भेदप्रतियोगी सर्वः' इति तत्र बोधाभ्युपगमान्नोत्तरपदार्थस्य प्राधान्यहानिरत आह—* घटो नास्तीत्या-

भावविषयकबोधे तस्य विशेष्यताया एव दर्शनात्। अस्मद्रीत्या च स आर्थो बोधो मानसः।

तथाच 'असर्वस्मै' इत्याद्यसिद्धिप्रसङ्गो नेति। अत्र चारोपितत्वम्—आरोपविषयत्वम्। आरोपमात्रमर्थो विषयत्वं संसर्ग इति निष्कर्षः।

प्रभा

तस्य=नञर्थाभावस्य। विशेष्यताया इति—'घटो नास्ति' इत्यस्य नैयायिकमते 'सत्तावान् घटाभावः' इति, शाब्दिकनये घटाभिन्नैकाश्रयवृत्तिवर्तमानकालावच्छिन्नसत्ताभाव इति च बोधः। एतेन 'असर्वः' इत्यस्य 'प्रतियोगितासम्बन्धेन भेदादिविशिष्टः सर्वः' इत्यर्थेऽपि सर्वनामता सिध्यतीत्यपास्तम्, तादृशबोधस्यानुभवविरुद्धत्वात्, 'अब्राह्मणमानय' इत्यादौ ब्राह्मणस्यैवानयनप्रसक्तेश्च। नन्वेवम् 'अघटः' इत्यादिना 'घटभिन्नः' इत्याद्यर्थस्य सर्वजनानुभवसिद्धस्यापलापापत्तिरित्याह—अस्मदिति। सः='घटभिन्नः' इत्याकारकोऽभावविशेष्यकः। शाब्दस्तु 'आरोपितघटत्वाश्रयः' इत्येव। आर्थ इति—घटभिन्ने एव घटत्वारोपात् आरोपितघटत्वस्य घटभेदस्य च सामानाधिकरण्यात्फलतीति भावः। तथाच=नञ आरोपितार्थकत्वे च। लाघवादाह—आरोपमात्रमिति—आरोपश्च—तदभाववद्विशेष्यकं तत्प्रकारकं ज्ञानम्। विषयत्वं संसर्ग इति—'विषयतासम्बन्धेनारोपविशिष्टं यद् ब्राह्मणत्वं तद्वान्' इति 'अब्राह्मणः' इत्यनेन बोधः। तथाच नञः शक्यतावच्छेदकमारोपत्वमिति लाघवम्। आरोपितस्य शक्यत्वे तु आरोपविषयत्वं शक्यतावच्छेदकमिति गौरवम्। यद्यपि विषयत्वस्य संसर्गत्वे प्रकारत्वे वा शक्यत्वं स्वीकार्यमेव, तथापि समासे एकार्थीभावात्मकशक्तिस्वीकारेणाकाङ्क्षाभास्यत्वासम्भवः। नचैवं लाघवाभावः, संसर्गीभूतविषयत्वस्य सम्बन्धाभावकृतलाघवसत्त्वात्। विषयत्वस्य प्रकारविधया भाने तु निरूपितत्व—स्वरूपसम्बन्धयोर्भाने गौरवम्।

भाष्ये तु पक्षान्तरमप्युक्तम्—'अथवा सर्वे एवैते शब्दा गुणसमुदायेषु वर्तन्ते, ब्राह्मणः, क्षत्रियः, वैश्यः, 'शूद्रः' इति।

तपः श्रुतञ्च योनिश्चेत्येतद्ब्राह्मणकारकम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥

समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते। जातिहीने गुणहीने चेति। अयम्भावः—नञ्शब्दः क्वचिद् गुणं निषेधति। 'अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयति' 'अब्राह्मणोऽयं यस्तिष्ठन् भक्षयति' इति। अत्र ब्राह्मणशब्दो जातिमात्राश्रयपरः। नञ्पदं गुणक्रियाराहित्यं द्योतयति, गुणक्रियारहितो ब्राह्मणत्वजातिमानित्यर्थः। क्वचिज्जातिं निषेधति—शुच्याचारं पिङ्गलं कपिलकेशं गौरं दृष्ट्वाऽध्यवस्यति ब्राह्मणोऽयमिति, ततः पश्चात्प्रमाणेन' 'अब्राह्मणोऽयम्' इति जानाति, अत्र ब्राह्मणशब्दः शुचित्वादिगुणमात्राश्रयपरः। नञ् च जातिं निषेधति 'ब्राह्मणत्वजातिरहितः, शुचित्वादिगुणविशिष्टश्चायमिति बोधः। नन्वारोपस्य नञ्वाच्यत्वे नञो द्योतकत्वाभङ्गः इत्यत आह—

दर्पणव्याख्या

दाविति * तस्य * नञर्थस्य। नञर्थाभाववत्त्वस्य विशेष्यतायां तन्त्रत्वादिति भावः।

ननु तवापि 'अघटः पटः' इत्यतो 'घटभिन्नः पटः' इति सर्वसिद्धप्रतीत्यनुपपत्तिरत आह—* अस्मद्रीत्येति * * सः *—भेदबोधः। * आर्थ इति * अर्थात्=उपस्थितिविषयादागत इत्यर्थः। * मानस इति * तत्र शाब्दत्वप्रत्ययस्त्वसिद्ध एवेति भावः। नन्वसर्वशब्दस्य सर्वनामत्वाभावे का क्षतिरत आह—* तथाचेति * अत्र चेति * आरोपितत्वं नञ्वाच्यमिति कल्पे चेत्यर्थः। * निष्कर्ष इति * विषयत्वस्य संसर्गमर्यादयैव लाभादनन्यलभ्यारोपस्यैव नञर्थत्वम्,

द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य ॥ ४० ॥

'घटो नास्ति' 'अब्राह्मणः' इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात् पक्षान्तरमाह—

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्य्यताम् ॥ ४१ ॥

तदर्थः=नञर्थः अर्थपदं द्योत्यत्व-वाच्यत्वपक्षयोः साधारण्येन कीर्त्तनाय । भाष्यस्येति—तथाच नञ्सूत्रे महाभाष्यम्—"निवृत्तपदार्थकः" इति, निवृत्तं पदार्थो यस्य "नपुंसके भावे क्तः" (पा० सू० ३ । १ । ११४) इति क्तः । अभावार्थक इत्यर्थः ।

प्रभा

द्योत्यत्वोक्तिरिति—निपातमात्रस्य द्योतकत्वमिति सिद्धान्तानुरोधात्तथोक्तिः, नतु वाचकत्वस्वीकारेऽत्र दोष इति भावः । नहीति—अतिसर्ववत्=अतिसर्वपदजन्योपस्थितीयप्रकारता यथा सर्वाऽऽर्थे तथा 'असः' इति पदजन्योपस्थितीयप्रकारताख्यविषयता तत्पदार्थे नास्ति किन्तु मुख्यविशेष्यताख्यविषयतैवास्तीति भावः । नचारोपितत्वस्य नञर्थत्वे 'वायौ रूपं नास्ति' पीतः शङ्खो नास्ति' इत्यादौ शाब्दबोधानापत्तिः, वाय्वधिकरणकरूपकर्तृकसत्तायाः पीतशङ्खकर्तृकसत्तायाश्चाप्रसिद्ध्या कथमसदर्थसत्तायां विशिष्टसत्तात्वारोप इति वाच्यम्, विशकलितानां वाय्वादीनां प्रसिद्धेरदोषात् । मिलिताप्रसिद्धेश्चाप्रयोजकत्वात् । विशिष्टं तावन्त एव पदार्थास्ते च प्रसिद्धाः । यद्वा—विशिष्टप्रसिद्धिराहार्यरूपैव । किञ्च रूपकर्तृकसत्तायां वाय्वधिकरणकत्वम्, शङ्खकर्तृकसत्तायां पीतकर्तृकत्वञ्चारोप्यते । रूपकर्तृकाऽऽरोपितवाय्वधिकरणत्विका सत्ता इति, शङ्खकर्तृकारोपितपीतकर्तृकत्विका सत्ता इति च बोधः ।

यत्तु—समासघटकस्यैव नञ आरोपितत्वार्थकत्वमिति तन्न, यत आरोपितत्वं नञ्द्योत्यमतो नञ्समासे अपरस्य प्राधान्यात् सर्वनामता सिध्यतीति हेतुत्वमात्रोक्त्या समासघटकस्यैव नञस्तदर्थकत्वमित्यस्यालाभात् । समासघटकस्यापि नञ आरोपितत्वार्थकत्वादेवाग्रे 'घटो नास्ति' इत्यत्र दोषोक्तिः सङ्गच्छते ॥४०॥

घटो नास्तीति—आरोपिता घटकर्तृका सत्ता इति, आरोपितब्राह्मणत्वविशिष्ट इति च बोधः । घटाभिन्नाश्रयकसत्ताभावः, ब्राह्मणभिन्न इत्याकारकसर्वजनानुभवविरुद्ध इत्यर्थः । अर्थपदमिति—तद्वाच्यस्तद्द्योत्यो वेति वक्तव्येऽर्थपदं बोद्ध्यार्थपरतया साधारण्येनोभयोर्बोधनायेत्यर्थः । भाष्यस्येति—पूर्वपदार्थस्य प्राधान्ये 'असः' इत्यादिसर्वनामकार्याभावादिरूपं दूषणमुक्त्वा 'अथवा पुनरस्तूत्तरपदार्थप्रधानः' इत्युक्तम् । 'अत्र पक्षे 'प्रतियोगितासम्बन्धेन भेदविशिष्टो ब्राह्मणः' इत्यर्थे ब्राह्मणस्यैव विशेष्यतयाऽब्राह्मणमानयेत्युक्ते ब्राह्मणस्यानयनं प्राप्नोति' इत्युक्त्वा 'नैष दोषः, इदन्तावदयं प्रष्टव्य.....'राजपुरुषमानय' इत्युक्ते राजा विशेषकः प्रयुज्यते, तेन राजविशिष्टस्यानयनं यथा भवति, तथा इहापि नञ्विशेषकः प्रयुज्यते तेन नञ्विशि-

दर्पणव्याख्या

नत्वारोपविषयत्वस्य, गौरवादिति भाव । नन्वारोपस्य वाच्यत्वाभ्युपगमे द्योतकताप्रतिपादकमूलविरोधोऽत आह—*द्योत्यत्वोक्तिरिति* वाच्यस्यापि तस्य विशेषणतैव, नाभाववद्विशेष्यतेति सूचयितुमेव तथोक्तिरिति भावः ॥ ४० ॥

* घटो नास्तीति * यद्यपि समासयोग्यनञ एवारोपार्थकत्वं मूले उक्तम्, तथापि 'घटो नास्ति' इत्युक्तिरत्रेव तत्राप्यारोपाननुभव इति दृष्टान्तार्थेत्यवधेयम् । 'नञ्द्योत्यम्' इत्यत्र नञो विशेषणतया व्यवधानेन चोपस्थितत्वेऽपि त्यदादीनां बुद्धिस्थपरामर्शकत्वात्तदा तत्परामर्शो नानुचित इत्याह—* तदर्थ इति * । * साधारण्येनेति *

यत्तु—निवृत्तः पदार्थो यस्मिन्नित्यर्थः । सादृश्यादिनाऽध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ इति कैयटः, तन्न, अध्यारोपितब्राह्मण्यस्य क्षत्रियादेर्नञवाच्यत्वात् ।

प्रभा-

ष्टस्यानयनं भविष्यति । कः पुनरसौ (नञ्) निवृत्तपदार्थकः' इति भाष्यस्येत्यर्थः । निवर्तनम्=निवृत्तम् (अभावः) पदार्थः=अर्थो यस्य स निवृत्तपदार्थकः=अभावार्थकनञित्यर्थः । आरोपितार्थकत्वपरत्वेनोक्तभाष्यस्य कैयटोक्तं व्याख्यानं खण्डयति—यत्त्विति । निवृत्त इति– निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् स सादृश्यादिनाऽध्यारोपितब्राह्मण्यः क्षत्रियादिरित्यर्थः । अध्यारोपितेति अध्यारोपितं ब्राह्मण्यं येषु ते इत्यर्थः । शक्यतावच्छेदके लाघवाल्लोकप्रसिद्धेश्चाभाव एव नञ्वाच्यः । 'अब्राह्मणो देवदत्तः' इत्यत्र सामानाधिकरण्येनान्वयस्तु नञर्थभेदस्य तद्वति लक्षणयोपपाद्यः । नञवाच्यत्वात्=नञो वाच्यत्वाभावादित्यर्थः । यद्यपि 'सन्देहाद् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते' सन्देहात्तावत् गौरं शुच्याचारं पिङ्गलम् (उत्कृष्टकान्तिमन्तम्) तदुक्तम् शब्दार्णवे—

पिङ्गलस्तु परच्छायः पिङ्गे शुक्लाङ्गखण्डवत् । इति कपिलकेशं दृष्ट्वाऽध्यवस्यति—'ब्राह्मणोऽयम्' इति । ततः पश्चादुपलभते नायं ब्राह्मण इति अब्राह्मणोऽयमिति । पूर्वं शौचाचारगौरवर्णादिकं दृष्ट्वा ज्ञातं ब्राह्मणोऽ-

दर्पणव्याख्या

प्रकृतेऽर्थपदस्य तज्जन्यबोधविषयपरतया पक्षद्वयस्य संग्रहः । तत्रासति बाधके वाचकत्वमेव । सति तु तस्मिन् द्योतकताऽपीति भावः । * नञवाच्यत्वादिति *

"यद्यप्युत्तरपदार्थप्राधान्येन नञ्तत्पुरुषस्य, ब्राह्मणस्याऽनयनं प्राप्नोति । नञः प्रयोगान्नञर्थविशिष्टस्यानयनं भविष्यति । कः पुनरसौ नञर्थो ? निवृत्तपदार्थकः । ब्राह्मणदृष्टस्य गौरत्वादेर्दर्शनाद् दृष्टोपदेशाद्वा पूर्वं ब्राह्मणोऽयमित्यध्यवस्यति । ततः पश्चादुपलभते–'नायं ब्राह्मणः' इति । ततोऽब्राह्मणोऽयमिति प्रयुङ्क्ते । अतश्च तद्दृष्टगुणदर्शनाद् दृष्टोपदेशाद्वा ब्राह्मणत्वाद्यध्यवसायपूर्वकमेव नायं ब्राह्मण इति ज्ञानम् । नह्ययं कालवर्णमापणे दृष्ट्वाऽध्यवस्यति ब्राह्मणोऽयमिति । यथास्थितं वस्तुतत्त्वं तस्य निर्ज्ञातं भवति" इति नञ्सूत्रभाष्यपर्यालोचनया कैयटोक्तार्थस्यैव साधुत्वं लभ्यते । तथापि तद्भाष्यस्य भेदप्रत्यक्षे क्वचिद् यो यानुपलब्धेर्हेतुत्वप्रदर्शनपरतयैवोपपत्तेर्नञ आरोपवाचकत्वे तदुपष्टम्भकत्वाभावात् ।

अन्यथाऽत्यन्तासदृशे उक्तयुक्त्या तदारोपासम्भवेन तत्र नञर्थस्तदर्थकत्वासम्भवात् 'अघटः पटः' इत्यनापत्तेः । 'प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ' इति तान्त्रिकोक्ते नीलो 'घटः' इत्यादौ तादात्म्येन घटांशे नीलपदार्थभानान्नञ्समभिव्याहारे तादात्म्यसम्बन्धावच्छिन्ननीलाभावबोधस्य सर्वानुभवसिद्धस्य नञोऽभावार्थकत्वं विनाऽनुपपत्तेर्नेदं रजतमिदं रजतमिति वाक्यजन्यबोधयोस्तत्तदभावानवगाहितया परस्परप्रतिबन्ध्यप्रतिबन्धकभावानापत्तेश्च नञो भेदार्थकत्वमावश्यकम् ।

नच नञोऽभेदार्थकत्वे 'अब्राह्मणमानय' इत्यादितो ब्राह्मणभिन्नलोष्टादेरपि बोधाऽऽपत्तिः । नचेष्टापत्तिः, नह्यब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवति" इति भाष्यविरोधादिति वाच्यम् , घटत्वेन घटार्थकघटपदात् सन्निहितव्यक्तिबोधवत् प्रकरणादिना ब्राह्मणभिन्नमात्रार्थकाद् ब्राह्मणपदात् क्षत्रियादेरेव बोधसम्भवात् । तस्मादघटो न पट इत्याद्यसमस्ते नञो भेद एव शक्तिः, भेदत्वस्याखण्डोपाधितया तस्य शक्यताऽवच्छेदकत्वे लाघवात् । समासघटकस्य तस्य तु उत्तरपदस्य तद्भिन्ने लक्षणायां तात्पर्यग्राहकत्वमेव । नच "न ब्राह्मणैरेतैरुपद्रुतम्" इत्यादौ नञो भेदार्थकत्वे तत्प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वाऽनुपपत्तिः, सामानाधिकरण्याभावादिति वाच्यम् , प्रतियोग्यनुयोगिनोरभेदान्वयबोधोपयिकाकाङ्क्षायां सत्यामेव नञा भेदबोधनेन तयोः समानविभक्तिकत्वस्य तदुपजीव्यत्वात् । एवञ्च नञा भेदबोधने प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिवचनत्वं नियामकमत एव 'भूतले न घटः' इत्यादौ न भेदबोधः ।

SGDF Sri Gargeshwari Digital Foundation

दर्पणव्याख्या

दृश्यते च—"यजतिषु ये यजामहं करोति नानुयाजेषु" इत्यत्र नञा पर्य्युदासबोधः। उक्तवाक्ये यजतिशब्दो यागस्वरूपवचनः। तथाच अनुयाजभिन्नेषु यागेषु ये यजामहशब्दवन्मन्त्रं करोति=उच्चारयतीत्यर्थः। अत एवात्रानुयाजभिन्नेषु यजतिषु ये यजामहपदवन्मन्त्रप्रयोगरूपैकार्थविधानादेकविधेयार्थकत्वरूपैकवाक्यत्वमुपपद्यते। अन्यथा यागेषु ये यजामहपदवन्मन्त्रविधानमनुयाजेषु निषेधविधानमिति विधेयद्वयार्थकत्वरूपवाक्यभेदापत्तेः, ये यजामहपदानुषङ्गकल्पने गौरवाच्चेति भावः।

अन्ये तु—शास्त्रविहितप्रतिषिद्धत्वात्, षोडशिग्रहणाग्रहणवद्विकल्पापत्तेर्नानुयाजेष्वित्यत्र नञः प्रतिषेधार्थकत्वम्। तथाहि—क्रियायाः कारकसाकाङ्क्षत्वाद् विनिगमनाविरहेण सकलकारकविशिष्टां प्रतियोगिभूतां भावनामुद्दिश्याभावविधिस्तत्र वाच्यः। एवञ्चोद्देश्यस्य प्रसिद्ध्यर्थं तत्प्राप्तिरपेक्षिता। प्राप्तिसापेक्षत्वात् प्रतिषेधस्य। प्राप्तिश्च क्वचिद्रागतः, यथा—"न कलञ्जं भक्षयेत्" इति। तत्र कलञ्जभक्षणादेरागत इष्टसाधनत्वावगत्या प्रसक्तायाः कलञ्जभक्षणभावनाया निषेधशास्त्रेण निवृत्तिनिश्चयत्वेऽवगतेऽर्थात् तद्विषयकलञ्जभक्षणस्यानिष्टसाधनत्वाक्षेपात् ततो निवृत्तिः। प्रकृते तु ये यजामहङ्करोतीति शास्त्रादेव सा। एवञ्च निषेधस्य शास्त्रविषयत्वेन प्राबल्यवद् विधिशास्त्रस्याप्युपजीव्यत्वेन प्राबल्यान्निषेधेन विधेरत्यन्तबाधायोगाद् विकल्प एव प्राप्नोति।

विकल्पे च "व्रीहिभिर्जुहोति" "यवैर्वा जुहोति" इत्यादौ प्रथमं व्रीह्यनुष्ठाने वेदस्य विपर्य्यासमिति जनकत्वासम्भवाद्यवशास्त्रस्याप्राप्तप्रामाण्यस्वीकारः, प्रतीतप्रामाण्यपरित्यागश्चेति दोषद्वयम्। प्रयोगान्तरे यवोपादाने यवशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागः, परित्यक्तप्रामाण्योपादानञ्चेति दोषद्वयमिति चत्वारो दोषाः। पुनस्तृतीते प्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागः, त्यक्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्। चतुर्थे यवोपादाने व्रीहिशास्त्रस्यास्वीकृताप्रामाण्यस्वीकारः, स्वीकृतप्रामाण्यत्यागश्चेति दोषद्वयमिति चत्वारोऽन्येऽपीत्यष्टदोषविकल्पापत्त्या नञनुयाजपदाभ्यामनुयाजभेदो बोध्यते। सोऽयं पर्य्युदासः। अस्मिँश्च पक्षे ये यजामहो न कर्त्तव्यतया प्रतीयते, 'यजतिषु ये यजामहङ्करोति' इत्यनेनैव तद्विधानात्। किन्तु सामान्यशास्त्रविहितयेयजामहमनूद्य तस्यानुयाजव्यतिरिक्तविषयता बोध्यते।

तथाच सामान्यशास्त्रस्य विशेषविधिसापेक्षत्वान्नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्तविषयसमर्पणादनुयाजव्यतिरिक्तेषु ये यजामहः कर्त्तव्यतया प्रतीयतेऽनुयाजेषु तु न कर्त्तव्यतया प्राप्तः, नापि प्रतिषिद्धः स इति न विकल्पः। नच नञा निषेधबोधनेऽपि पदशास्त्रेणाऽऽहवनीयशास्त्रस्येव नानुयाजेष्विति विशेषशास्त्रेण यजतिषु ये यजामहङ्करोतीति सामान्यशास्त्रस्य बाधान्न विकल्प इति वाच्यम्,

परस्परनिरपेक्षयोर्हि बाध्यबाधकभावः, पदशास्त्रेणाऽऽहवनीयशास्त्रस्यानपेक्षणात् स उचितः। निषेधशास्त्रस्य तु प्रतियोगिप्रसिद्ध्यर्थमस्त्यपेक्षा विध्यर्थस्य। "प्रसक्तं हि प्रतिषिद्ध्यते" इति न्यायेन न तद्बाधः, असम्भवात्। किन्तूक्तयुक्त्या विकल्प एव। तथाच द्विरदृष्टकल्पनाप्रसङ्गोऽपि। विधेर्ह्येवं ज्ञायते। यदनुयाजेषु ये यजामहकरणे न कश्चनोपकारो भवति निषेधाच्च तदकरणादनृतवदनाकरणादिव दर्शपूर्णमासयोः। स चोपकारोऽदृष्टरूप एवेत्यतोऽपि विकल्पो न युक्त इत्याहुः।

अत्र केचित्—निषेधशास्त्रानालोचनेन सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिद्ध्याभावबोधनसम्भवेन विकल्पाप्रसक्तेः, विशेषनिषेधे सामान्यविधेस्तदितरपरत्वस्य 'ब्राह्मणेभ्यो दधि दातव्यम्' 'कौण्डिन्याय न दातव्यम्' इत्यादौ व्युत्पत्तिसिद्धत्वाच्च।

नच तत्रापि पर्य्युदास एव नञा बोध्यते, नञा पर्य्युदासबोधने विशेष्यविशेषणवाचकपदयोः समानविभक्तित्वस्येव तयोः समानवचनस्यापि तन्त्रत्वात्, तस्य प्रकृतेऽभावात्। अन्यथा न महतो राज्ञ इत्यादाविव, न महतां राज्ञ इत्यादावपि महद्भेदप्रतीत्यापत्तिः। एको न द्वावितिवत् कथञ्चित् समर्थनेऽपि द्वितीयस्य दातव्यमित्यस्य नैरर्थक्यप्रसङ्गश्च, 'ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय न' इत्यत एव कौण्डिन्यभिन्नब्राह्मणोद्देश्यकदधिदानबोधसम्भवादित्याहुः।

SGDF Sri Gargeshwari Digital Foundation

प्रभा

यमिति। पश्चादाप्तजनोपदेशादिना ज्ञातम्—'नायं ब्राह्मणः' इति। इत्थमेव दुरुपदेशाच्च दुरुपदिष्टमस्य भवति—अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेति, स तत्र (उपदिष्टस्थाने) गत्वा यं (ततः स्थानाद् ब्राह्मणे गते तत्र स्थितं क्षत्रियादिकम्) पश्यति तमध्यवस्यति ब्राह्मणोऽयमिति। ततश्च पश्चादुपलभते 'नायं ब्राह्मणः' अब्राह्मणोऽयम्' इति निर्ज्ञातं तस्य भवति। अत्र तत्स्थाने कियत्कालपर्यन्तं 'ब्राह्मणस्तिष्ठति' इति नोक्तं तेनेति तत्स्थाने कञ्चन स्थितं दृष्ट्वा प्रयोज्यकर्त्रा ज्ञातं ब्राह्मणोऽयमिति, पश्चादुपदेशादिना ज्ञातं नायं ब्राह्मण इति। ब्राह्मणज्ञानपूर्वकाब्राह्मणज्ञानप्रदर्शनेनैतदुक्तं भवति यत् 'निवृत्तः पदार्थः=पूर्वं यो ज्ञातः ब्राह्मणत्वरूपः पदार्थः स निवृत्तो यस्य क्षत्रियादेः स एव सादृश्यादिना अध्यारोपितब्राह्मण्यः क्षत्रियादिरेव नञर्थ इति कैयटोक्तं युक्तं प्रतीयते, तथापि ब्राह्मणगुणाचारादिविशिष्टे ब्राह्मणत्वयोग्यताप्रदर्शनपूर्वकतदनुपलब्धावेव भाष्यतात्पर्यकल्पनयोपपत्तौ नञ आरोपवाचकत्वे तद्भाष्यस्य प्रामाण्यानर्हत्वात्। किञ्च कैयटमते सादृश्यादिना तद्धर्मारोपस्थले एव तादृशनञः प्रयोगे 'घटो न पटः' नीलो न रक्तः' 'अघटः पटः' इत्यादावत्यन्तासदृशे नञः प्रयोगानुपपत्तिः। किञ्च 'नञोऽभावे यद्धर्मावच्छिन्ने येन सम्बन्धेन यस्य प्रकारतया भानं नञ्समभिव्याहारे तद्धर्मावच्छिन्ने प्रकारतावच्छेदकतत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिताकाभावः प्रकारतया भासते' इति नियमः। तदुक्तम्—'प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ' इति। एवञ्च 'नीलो घटः' इत्यादौ नीलपदार्थोऽभेदसम्बन्धेन घटे प्रकार इति नञ्सत्त्वे 'नीलो न घटः' इत्यादौ घटत्वावच्छिन्नेऽभेदसम्बन्धावच्छिन्ननीलनिष्ठप्रतियोगिताकाभावस्य भानमुचितम्, तद्भज्यते, नञ आरोपितार्थकतामते, नञसत्त्वेऽपि 'आरोपितनीलत्ववान् घटः' इत्याकारकबोधस्यैव तन्मते सत्त्वात्। नञो भेदरूपाभावार्थकत्वे तु न दोषः 'घटो न पटः' 'नीलो न रक्तः' इत्यादितः 'घटभेदवान् पटः' 'नीलभेदवान् रक्तः' इत्याद्याकारकबोधे बाधकाभावात्। नचैवं 'अब्राह्मणमानय' इत्यादिना लोष्ठादेरप्यानयनापत्तिः ब्राह्मणभेदस्य तत्र सत्त्वादिति वाच्यम्, घटमानय' इत्यादौ प्रकरणादिना घटत्वेन व्यक्तिविशेषबोधवद् ब्राह्मणभेदवत्त्वेन क्षत्रियादेरेव बोधसम्भवात्। अत एव 'नह्यब्राह्मणमानय इत्युक्ते लोष्ठमानीय कृती भवति' इति भाष्यं सङ्गच्छते। किञ्च नञ आरोपितार्थकत्वे आरोपितत्वं शक्यतावच्छेदकम्, भेदार्थकत्वे तु अखण्डोपाधिरूपं भेदत्वमेवेति लाघवमपि भेदार्थकत्वे बीजम्। नच समासाभावे नञो भेदार्थकत्वे 'न घटः पटः' इत्यादौ प्रतियोग्यनुयोगिनोः समानाधिकरणानुपपत्तिः, अभेदेनान्वयाभावादिति वाच्यम्, यत्र नञ्समभिव्याहाराभावे प्रतियोग्यनुयोगिनोरभेदान्वयबोधौपयिकी आकाङ्क्षा (समानविभक्तिकत्वम्) तत्रैव नञो भेदार्थकत्वम्। अत एव 'भूतले न घटः' इत्यादौ न भेदबोधकत्वम्, किन्तु अत्यन्ताभावबोधकत्वमेव। एवञ्च प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वमभेदार्थकत्वे उपजीव्यम्। अत एव 'प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ' इति नियमस्यापि नानुपपत्तिरित्याशयात्। उक्तनियमवाक्यार्थश्च नञसत्त्वे यत्र धर्मिणि यस्य पदार्थस्य येन सम्बन्धेन प्रकारता नञ्सत्त्वे तत्र धर्मिणि तस्य पदार्थस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावः प्रकारतया भासत इति। 'घटः पटः' इत्यत्र समानविभक्तिकत्वसत्त्वाद् घटाभिन्नः पट इति भ्रमात्मको बोधः सम्भवतीति 'घटो न पटः' इत्यत्र 'घटभेदवान् पटः' इत्येव बोधः, उक्तनियमानुसारात्। नञो भेदार्थकत्वे समानविभक्तिकत्वस्योपजीव्यत्वादेव मीमांसायाम् 'यजतिषु येयजामहं करोति नानुयाजेषु'

दर्पणव्याख्या

विकल्पप्रसक्तिरूपदोषाभावेऽपि वाक्यभेदाऽऽपत्तेर्जागरूकतया समानविभक्तिकत्वादेस्तद्बोधनियामकस्य सत्त्वेन च नञः पर्युदासार्थकत्वमेव, नानुयाजेष्वित्यत्रोचितमिति तु परे।

SGDF
Sri Gargeshwari Digital Foundation

अन्यथा सादृश्यादेरपि वाच्यतापत्तेः ।

यत्तु—तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥

इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोऽश्वेभ्यः, अधर्म इत्युदाहरन्ति । तत्त्वार्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र ।

प्रभा

इति श्रुतौ पर्य्युदास एव नात्यन्ताभावः । एतदर्थश्च—'येयजामह' इति पदघटितमन्त्रमनुयाजभिन्नेषु यागेषु उच्चारयेदिति । अत्र यजतिशब्दो यागपरः । यदि तु नञत्रात्यन्ताभावार्थकः स्यात्तदा यजतिषु (यागेषु) येयजामहं (येयजामहपदवन्मन्त्रम्) करोति=उच्चारयति इत्येकं विधिवाक्यं स्यात् । 'नानुयाजेषु इति वाक्यमनुयाजेषु येयजामहपदघटितं मन्त्रन्नोच्चारयेदिति निषेधकं स्यादिति वाक्यभेदापत्तिरूपगौरवं स्यादिति भावः । यद्वा—पर्य्युदासानाश्रयणे 'नानुयाजेषु येयजामहं करोति' इत्यत्र विकल्पः स्यात् । तथाहि—प्राप्तिसापेक्षो हि निषेधः—यथा 'व्रीहीनवहन्ति' इति शास्त्रं वैतुष्यार्थमवघाते स्वतः प्रवृत्तं पुरुषम्प्रति न प्रवर्तते, वैयर्थ्यात् । किन्तु नखविदलनादौ प्रवृत्तं पुरुषम्प्रति प्रवर्तते, कर्तव्यत्वेन प्रसक्तस्य निषेधात् । प्राप्तिसापेक्षत्वान्निषेधानामनुयाजेषु येयजामहनिषेधे तस्य तत्र प्राप्तिर्वक्तव्या । सा च न भोजनादाविव रागतः प्रवृत्तिः सम्भवति, अतः 'यजतिषु येयजामहं करोति' इति शास्त्रात् सा वक्तव्या । शास्त्रप्राप्तस्य निषेधे विकल्पः स्यात् । विकल्पश्चानुयाजेषु स्वेच्छया येयजामहमन्त्रं पठेन्न पठेद्वेत्येवं रूपः । रागतः प्राप्तस्य शास्त्रेण यथा सर्वथा बाधः, न तथा विधिशास्त्रेण प्राप्तस्य निषेधशास्त्रेण सर्वथा बाधः । नच पदशास्त्रेण आहवनीयशास्त्रस्य बाध इव 'नानुयाजेषु' इति विशेषशास्त्रेण 'यजतिषु येयजामहं करोति' इति सामान्यशास्त्रस्य बाधः स्यादिति वाच्यम्, शास्त्रयोर्हि न तत्र बाध्यबाधकभावो यत्र परस्य निरपेक्षता । न हि पदशास्त्रस्य स्वार्थविधानार्थमाहवनीयशास्त्रस्यापेक्षाऽस्ति । निषेधशास्त्रस्य तु प्रसक्तस्य निषेधार्थं 'यजतिषु ये यजामहं करोति' इति विधिशास्त्रस्यास्ति अपेक्षेति न बाध्यबाधकभावः । अन्यथा=यथाकथञ्चित्प्रतीयमानस्य वाच्यत्वाङ्गीकारे । वाच्यत्वापत्तेरिति—नचेष्टापत्तिः, शक्यतावच्छेदके गौरवात् । तत्सादृश्यमिति—'अब्राह्मणः' इत्यनेन ब्राह्मणसदृशः । अपापम्=पापाभावः । अनश्वः=अश्वभिन्नः । अनुदरा=अल्पोदरा । अपशव इति—गोऽश्वेभ्योऽन्ये पशवोऽप्रशस्ता इत्यर्थः । अपशव=अप्रशस्ताः पशव इत्यर्थः । अधर्मः=धर्मविरुद्धः । आर्थिकार्थमिति—आरोपितब्राह्मणत्वविशिष्ट आरोपितपापत्वविशिष्ट एवंविधशाब्दबोधानन्तरं मानसो बोध इत्यर्थः ।

दर्पणव्याख्या

प्रकृतमनुसरामः—*अन्यथेति* लाघवानादरेणाऽऽरोपितत्वस्य नञ्वाच्यत्वाभ्युपगमे इत्यर्थः । *सादृश्यादेः* इत्यादिना पठिष्यमाणाल्पत्वादेः सङ्ग्रहः । 'अब्राह्मणः' इत्यादेर्ब्राह्मणसदृशः, पापाभावः, अश्वभिन्नः, अल्पोदरा, गवाश्वेतराः पशवोऽप्रशस्ताः, धर्मविरुद्ध इत्यादिक्रमेणार्थः । ननु सादृश्यादेरवाच्यत्वे कथं ततस्तद्बोधोऽत आह—*तत्त्विति* तत्पठनं त्वित्यर्थः । *अभिप्रेत्येति* भेदप्रतियोगित्वप्रकारकब्राह्मणादिबोधानन्तरभाविमानसबोधमभिप्रेत्येत्यर्थः ।

ब्राह्मणादिबोधस्य तत्तत्पदादेव सम्भवाद्भेदप्रतियोगित्वेन ब्राह्मणादिबोधनाय यदब्राह्मणादिपदोपादानं तत्सादृश्यादिना क्षत्रियादिबोधनार्थमित्यूहमूलकक्षत्रियादिबोधस्य भेदप्रतियोगी ब्राह्मण इत्यादिशक्यार्थबोधोत्तरमेव सम्भवादिति भावः ।

विशेषणमिति—प्रतियोगिनीति शेषः। तथाचासर्वपदे सर्वनामता। "अनेकमन्यपदार्थे" "सेव्यतेऽनेकया सन्नतापाङ्गया" इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः। 'अब्राह्मणः' इत्यादावुत्तरपदार्थप्राधान्यात् तत्पुरुषत्वम्। 'अत्वं भवसि' 'अनहं भवामि' इत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते।

प्रभा

विशेषणमिति—ननु नञर्थभेदस्य प्रतियोगिभिन्ने स्वरूपसम्बन्धेन विशेषणत्वे 'अब्राह्मणः' इत्यादौ समासानापत्तिः, प्रतियोगिनः ब्राह्मणेन सामर्थ्याभावादत आह प्रतियोगिनीति—नञर्थो भेदः, ब्राह्मणत्वाद्यवच्छिन्नप्रतियोगितासम्बन्धेन प्रतियोगिनी विशेषणमिति भावः। एतेन भेदप्रतियोगितायाः केवलान्वयितया 'अब्राह्मणः' इत्यत्र घटादेरपि भेदविशिष्टतया बोधानापत्तिरित्यपास्तम्। ब्राह्मणत्वावच्छिन्नप्रतियोगितासम्बन्धेन भेदस्य ब्राह्मणे एव सत्त्वात्। भेदस्य विशेषणत्वे 'भेदप्रतियोगी ब्राह्मणः' इति शाब्दबोधः। 'ब्राह्मणभिन्नः' इति मानसबोध आर्थिक इति भावः। 'अब्राह्मणः क्षत्रियः' इत्यादौ 'क्षत्रियवृत्तिभेदप्रतियोगी ब्राह्मणः' इति बोधः। नच क्षत्रियस्य वृत्तित्वसम्बन्धेन नञर्थभेदेऽन्वयानापत्तिः, नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादिति वाच्यम्, निपातेतरनामार्थयोरेव तथात्वात्। उत्तरपदार्थस्य प्राधान्ये फलमाह—सर्वनामतेति। अनेकमिति—तथाच भाष्यम्—'इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये सति सङ्गृहीतं भवति, किम्? अनेकमिति। किमत्र सङ्गृहीतम्, एकवचनम्, कथं पुनरेकस्य प्रतिषेधे द्विबहूनां सम्प्रत्ययः स्यात्, प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति। तद्यथा 'आनय' 'आसय' 'शायय' 'भोजय' अनेकमिति'। अयम्भावः—अनेकशब्दो यदि बहूनां वाचकस्तदा बहुवचनं प्राप्नोति। यद्येकप्रतिषेधमात्रमस्यार्थस्तदा 'अनेको जन आगतः' इत्यत्र द्विबहूनां प्रतीतिर्न स्यादित्याशङ्कायामुक्तं भाष्यकृता—प्रसज्येति—यत्र क्रियागुणौ विधायानेकमित्याह तत्र निराश्रययोः क्रियागुणयोरसम्भवात् एकप्रतिषेधादनियतसङ्ख्यद्रव्याक्षेपे सति बहूनाम्प्रतीतिः। इदञ्च भाष्यमत्यन्ताभावो नञर्थस्तस्य च प्रतियोगिनि विशेषणत्वमित्यभिप्रायेण। वस्तुतस्तु प्रसज्यप्रतिषेधस्यासमासे एव प्रतीत्या इदं भाष्यमेकदेशि। अत एव यत्र खलु पुनर्न प्रसज्येते तत्र कथम् 'अनेकं तिष्ठति' इति। भवति चैवं जातीयकानामप्येकस्य प्रतिषेधेन बहूनां सम्प्रत्ययः। तद्यथा न न एकं प्रियम्। न न एकं मुखम्, इति भाष्ये पक्षान्तरमुक्तम्। अयम्भावः—पर्युदासे द्व्यादिसङ्ख्यायुक्त एवानेकशब्दार्थः। यस्माद् द्व्यादिष्वेकत्वमारोप्य प्रतिषिध्यते, यथा—क्षत्रियादौ ब्राह्मणत्वम्। एवञ्च यथा—अब्राह्मणाः=क्षत्रियादिरुच्यते तथाऽनेकपदेन सङ्ख्यान्तरयुक्तः प्रतियोगितासम्बन्धेन भेदविशिष्ट एक इति। सेव्यते इति—

वर्जयन्त्या जनैः सङ्गमेकान्तत—
स्तर्कयन्त्या सुखं सङ्गमे कान्ततः।
योषयैष स्मरासन्नतापाङ्गया
सेव्यतेऽनेकया सन्नतापाङ्गया॥

दर्पणव्याख्या

तद्बोधे शाब्दत्वप्रत्ययस्यानुभवाल्लक्षणयैव सादृश्यादिना ब्राह्मणादिबोध इति त्वन्ये। विशेषणस्य विशेष्यसाकाङ्क्षत्वादाह—* प्रतियोगिनीति * एवञ्च 'अब्राह्मणः' इत्यादेः प्रतियोगितया भेदविशिष्टो ब्राह्मण इत्याद्याकारको बोध इति भावः। भेदस्य प्रतियोगितयोत्तरपदार्थान्वये उपपत्तिमाह—* तथाचेति *।

सर्वनामता चेत्यादि—प्रथमान्तचतुष्टयस्य 'उपपद्यते' इत्यनेनान्वयः। सर्वनामता=सर्वनामसंज्ञा। तदन्त-

अन्यथा त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्त्वसत्त्वात् पुरुषव्यवस्था न स्यात् ।

प्रभा

मा० स० ४—श्लो० ४२ । सन्नतौ अपाङ्गौ यस्यास्तया स्मरात्=स्मरतापात् कूणितनेत्रया अनेकया योषया एष कृष्णः सेव्यते इत्यर्थः । अत्वमिति—वक्तृसम्बोध्यः युष्मदर्थः । अस्मच्छब्दोच्चारयिता अस्मच्छब्दार्थः । भेदविशिष्टस्त्वम्, भेदविशिष्टश्चाहमिति अत्वमनहमित्यनेन बोधः । अन्यथा नञर्थाभावस्य युष्मदस्मदर्थरूपप्रतियोगिनि विशेषणत्वाभावे, अभावस्य विशेष्यत्वे इति यावत् । त्वदभाव इति—एतेनोत्तरपदार्थप्राधान्यवादिनयेऽत्यन्ताभावस्यापि विशेषणतया भानं सूचितम् । इतिवदिति—'त्वदभावो मदभावोऽस्ति' इत्यादाविव युष्मत्सामानाधिकरण्याभावान्मध्यमोत्तमपुरुषौ न स्यातामित्यर्थः । किञ्च 'अयुवां भवथः' 'अयूयं भवथ' इत्यादौ द्विवचनादिकमपि न स्यात्, कर्तुरभावस्यैकत्वात् । अन्वयेनेति—विशेषणतयाऽन्वयेनेत्यर्थः । सामानाधिकरण्यस्येति—समानाधिकरणे=समानमधिकरणम्=अर्थो यस्य तस्मिन्, केन समानमित्याकाङ्क्षायां प्रत्यासत्त्या यस्य स्थाने मध्यमपुरुषो विधीयते तेन समानम् । तथाच लकारेण तुल्यमित्यर्थः । लकारस्य लोके प्रयोगाभावात् तुल्यत्वस्य च स्ववाच्यवाचकत्वरूपेणैव वक्तव्यतया तदादेशेन तुल्यत्वमादायाह—तिङ्वाच्यकारकवाचिनि युष्मद्युपपदे इति—लकारस्य इह त्रयोऽर्थाः—कर्तृ-कर्म-भावाः । तत्र यदा भावे लस्तदा लवाच्यभाववाचकत्वस्य धातुप्रत्यययोरेव सम्भवेन युष्मदादिनामसु तत्सामानाधिकरण्यासम्भवात् तिबादयो प्राप्नुवन्तीति 'तङ्भावकर्मणोः' इति भावे तङ्विधानसामर्थ्यात् 'अपदं न प्रयुञ्जीत' इति भाष्याच्च प्रथमोपस्थितत्वात् प्रथमपुरुषस्यौत्सर्गिकमेकवचनमेव, कर्तृकर्मादीनां द्वित्वबहुत्वेऽपि न द्विवचनादयः । एवञ्च लकारस्य कर्तृवाचकत्वे युष्मदोऽपि यदा कर्तृवाचकत्वम्, लस्य कर्मवाचकत्वे युष्मदोऽपि यदा कर्मवाचकत्वं तदा मध्यमः । एवम् अस्मच्छब्दे, तद्भिन्ने उपपदेऽपि बोध्यम् । स्थानिन्यपीति—स्थानम्=प्रसङ्गः सोऽस्त्यस्य स्थानी । प्रसङ्गश्चाविद्यमानस्यैवेति । स्थानिनि=अप्रयुज्यमाने=अनुच्चार्य्यमाणे, अपिशब्दादुच्चार्य्यमाणे वा युष्मदादौ मध्यमपुरुषादयः । 'तिङ्वाच्यकारकवाचिनि' इति तु न युक्तम्, स्वविधेयतिङ्घटितस्य विधानात्प्रागसिद्धत्वेन स्वोद्देश्यत्वासम्भवात् । आरोपितवाचकत्वमादाय 'लवाच्यकारकवाचिनि' इत्येव वक्तुं युक्तम् । नन्वेवमपि 'परमत्वं पचसि' 'त्वत्कल्पः पचसि' 'बहुत्वं पचसि' इत्याद्यसिद्धिः, लकारवाच्यार्थवाचकत्वस्य युष्मच्छब्देऽभावात् । नच युष्मद्घटिते उपपदे इत्यर्थान्न दोषः, 'अतित्वं भवति' इत्यत्रातिप्रसङ्गादिति चेन्न 'युष्मदि साधने इत्येवं भविष्यति' इति भाष्येणैव समाहितत्वात् । नन्वेवमपि युष्मदि साधने

दर्पणव्याख्या

विधिनेति शेषः । अन्यथा संज्ञोपसर्जनानां सर्वादित्वाभावे तदर्थस्य नञर्थविशेषणत्वे तत्संज्ञानुपपत्तिरिति भावः । * अनेकम् * इत्यादावेकभिन्नमिति बोधे स्वीक्रियमाणे एकप्रतियोगिकभेदवति द्वित्वस्य बहुत्वस्य वाऽवश्यम्भावेन ततस्तद्बोधकद्विवचनबहुवचनयोरापत्तिः, एकत्वार्थस्य तस्य तत्र बाधात्तद्बोधकैकवचनस्यानुपपत्तिश्चेति भावः ।

* तत्पुरुषत्वमिति * भेदविशेषणत्वे तदनुपपत्तिः स्यात् । * पुरुषेति * तिबादित्रिकसङ्केतितपुरुषेत्यर्थः । * वचनेति * एकवचनत्वादिरूपेत्यर्थः । "अयुवां भवथः" इत्यादौ युष्मदस्मदर्थाभावविशेष्यकबोधे अभावे द्वित्वाद्यर्थस्य बाधाद् द्विवचनाद्यनुपपत्तिः । 'भावनाऽन्वयिन्येव सङ्ख्याऽन्वयः' इति त्वदभ्युपगमेनान्यार्थगतसङ्ख्यामादाय द्विवचनाद्युपपादनस्य कर्तुमशक्यत्वादिति भावः ।

* अन्यथेति * नञर्थाभावस्योत्तरपदार्थाविशेषणत्वे तद्विशेष्यत्व इति यावत् । * पुरुषव्यवस्थेति *

Sri Gargeshwari Digital Foundation

अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात् सामानाधिकरण्यं नानुपपन्नमिति भावः ।

विशेष्यो वेति—प्रतियोगिनीति शेषः । अयं भावः—गौणत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" (पा० सू० ६ । १ । १३२) इति ज्ञापकात् सर्वनामसंज्ञा नानुपपन्ना । 'असः शिवः' इत्यत्र सुलोपवारणाय 'अनञ्समासे' इति हि विशेषणम् । नच तत्र

प्रभा

इत्यस्य युष्मदर्थे कारके इत्येवार्थस्तदाऽपि देवदत्तादेः सर्वस्यैव युष्मदर्थत्वात् 'देवदत्तः पचति' इत्यादावतिव्याप्तिः । नच युष्मच्छब्दनिष्ठप्रयोजकतानिरूपितप्रयोज्यतावद्विषयतावदर्थे साधने इत्यर्थेन प्रयोजकतायाश्चापर्य्याप्ताया अपि ग्रहणेनादोषः, 'अतित्वं भवति' इत्यादावापत्तितादवस्थ्यादिति चेन्न, युष्मच्छब्दवृत्त्यानुपूर्व्यवच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावदुपस्थितिव्यापकमुख्यविशेष्यतावदर्थे साधने इत्यर्थेनादोषात् । प्रयोजकता च पूर्ववदपर्य्याप्ताऽपि । अतित्वमित्यादौ तादृशमुख्यविशेष्यतावदर्थे कारकत्वाभावान्न दोषः ।

न स्यादिति--अभावस्य कर्तृत्वेन लकारवाच्यकारकवाच्यत्वस्य युष्मच्छब्देऽभावान्मध्यमोत्तमपुरुषयोर्व्यवस्था न स्यादिति भावः । सामानाधिकरण्यमिति--लकारास्मदोः प्रवृत्तिनिमित्तयोरेकाधिकरणवृत्तित्वरूपं सामानाधिकरण्यमित्यर्थः । शेष इति--'अब्राह्मणः' इत्यादेः ब्राह्मणभिन्नक्षत्रियादिरर्थः । नन्वेवम् 'असः' इत्यस्य तद्भिन्न इत्यर्थे तच्छब्दार्थस्योपसर्जनतया 'त्यदादीनामः' इत्यादेरप्रवृत्त्याऽसिद्ध्यापत्तिरित्यत आह-गौणत्वेऽपीति । ज्ञापकादिति—नच सर्वनामत्वाभावेऽपि एतत्तदोरित्यस्य वैयर्थ्याभावेन ज्ञापकत्वानुपपत्तिः, उपसर्जनत्वेन सर्वादित्वाभावे तदन्तर्गणतया त्यदादित्वस्याप्यभावेनात्वाप्रवृत्त्या नञ्समासे 'हलङ्याब्भ्यः' इति सूत्रेण सुलोपस्य सिद्धतया सूत्रस्य वैयर्थ्याभावेऽपि 'अनञ्समासे' इत्यस्य वैयर्थ्येन ज्ञापकत्वसम्भवात् । तदाह—अनञ्समासे इति । ज्ञापकादिति--नञ्समासे उपसर्जनत्वेऽपि सर्वादित्वप्रयुक्तं कार्यं भवतीत्यर्थे ज्ञापकादित्यर्थः । सर्वनामसंज्ञेति--इदमुपलक्षणम्-सर्वाद्यन्तर्गणकार्यमात्रस्य ।

दर्पणव्याख्या

"युष्मद्युपपदे" (पा० सू० १ । ४ । १०५) इति सूत्रद्वयाविषयतया "शेषे प्रथमः" (पा० सू० । १ । ४ । १०८) इत्यस्य प्रवृत्त्या प्रथमपुरुषस्यैवापत्तेरित्यर्थः । * नानुपपन्नमिति * । तथाचोक्तव्यवस्था सुलभेति भावः । ननु नञर्थभेदस्य प्रतियोगितयोत्तरपदार्थान्वये 'अघटमानय' इत्यत्र स्वभेदप्रतियोगित्वस्य घटे सत्त्वात्तद्बोधानन्तरं घटानयनस्याप्यापत्तिरत आह—मूले—* विशेष्यो वेति * । विशेषणाकाङ्क्षायामाह—सारे * प्रतियोगिनीति * । उत्तरपदार्थरूपप्रतियोगिनीत्यर्थः ।

निरूपितत्वं सप्तम्यर्थः । उत्तरपदार्थरूपप्रतियोगिनिष्ठविशेषणतानिरूपितविशेष्यताश्रयो नञर्थ इति यावत् । ननु तर्हि उत्तरपदार्थाप्राधान्ये पूर्वोक्तदूषणगणो दुष्परिहरोऽत आह—* अयम्भाव इति * । * गौणत्वेऽपीति * नञ्समासघटकैतदाद्यर्थस्य नञर्थविशेषणत्वेऽपीत्यर्थः । * ज्ञापकादिति * । तत्सूत्रस्थानञ्समासग्रहणाज्ज्ञापकादित्यर्थः । ज्ञापकतामेव प्रपञ्चयति-*असः शिव इति* ।

"एतत्तदोः" (पा० सू० ६ । १ । १३२) इत्यनेन परस्परसाहचर्य्यात् सर्वनामैतत्तद्भ्यां परस्य सोर्हलि लोपो विधीयते । नञ्तत्पुरुषान्तर्गतैतत्तदोरुपसर्जनतया सर्वनामत्वाभावादेवानतिप्रसङ्गे व्यर्थं सदनञ्समासग्रहणं नञ्समासे गुणीभूतार्थस्यापि सर्वादेः सर्वनामताज्ञापनेन चरितार्थमिति भावः । साहचर्य्यज्ञापकत्वस्यासार्वत्रिकत्वं सूचयन् सूत्रे सर्वनाम्नोरेव ग्रहणे मानान्तरमाह—

SGDF Sri Gargeshwari Digital Foundation

तच्छब्दस्य सर्वनामताऽस्ति, गौणत्वात् । 'अकोः' इत्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात् । तथाच 'अनञ्समासे' इति ज्ञापकं सुवचम् ।

"अनेकमन्यपदार्थे" इत्यादावेकवचनम्, विशेष्यानुरोधात् । "सुबामन्त्रिते पराङ्गवत् स्वरे" (पा० सू० २ । १ । २) इत्यतोऽनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव । किञ्चानेकशब्दाद् द्विवचनोपादाने, बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिद्ध्येदित्युभयसंग्रहायैकवचनम्, जात्यभिप्रायम्, औत्सर्गिकं वा ।

प्रभा

गौणत्वादिति--उपसर्जनत्वादित्यर्थः । ननु सर्वनाम्न एव तत्र सूत्रे ग्रहणमित्यत्र मानाभाव इत्याशङ्कायामाह,—अकोरिति-- सर्वनाम्न एवाकचः सम्भवेन विप्रयोगन्यायेन 'अवत्सा गौः' इतिवत् सर्वनाम्नोरेव ग्रहणलाभादिति भावः । वस्तुतस्तु सर्वनाम्नो ग्रहणाभावेऽपि 'अनञ्समासे' इत्यस्य वैयर्थ्यं सूपपादमिति सर्वनामग्रहणप्रयासो व्यर्थ एवेति पञ्चोलिनः । विशेष्यानुरोधादिति-'असति बाधकेऽभेदेन विशेषणीभूतार्थकपदं विशेष्यवाचकपदसमानवचनम्' इति नियमानुरोधादित्यर्थः । नन्वत्र विशेष्यवाचकपदाभाव इत्यत आह—सुबामन्त्रित इति । नन्वत्र विशेष्यविशेषणयोः समानवचनकत्वे 'अवर्षा हेमन्तः' इति नञ्सूत्रस्थभाष्यप्रयोगासङ्गतिः, 'गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति' इति नञ्सूत्रस्थभाष्याक्त्यैव समाहितत्वात् । अत्राश्रयपदेन विशेष्यस्येव प्रतियोगित्वाश्रयस्य प्रतियोगिनोऽपि ग्रहणेन वर्षागतलिङ्गसङ्ख्ये भवतः । एवञ्च नञ्समासे क्वचित्प्रतियोगिगते लिङ्गसङ्ख्ये क्वचिदनुयोगिगते लिङ्गसङ्ख्ये भवत इति तत्त्वम् ।

ननु 'तव्यत्तव्यानीयरः' इत्यत्राधिकृतस्य 'प्रत्ययः इत्यस्य 'नन्दिग्रहिपचादिभ्यः' इत्यत्राधिकृतस्य 'धातोः' इत्यस्य च वचनविपरिणामवत्सुबिति स्यादित्यरुचेराह—किञ्चेति--'अनेकमन्यपदार्थे' इति सूत्रे द्विवचनान्तोपादाने बहूनां सुबन्तानां बहुवचनान्तन्यासकरणे च द्वयोः सुबन्तयोर्बहुव्रीहिर्न स्यादित्युभयोर्ग्रहणार्थमौत्सर्गिकमेकवचनमिति भावः । जात्यभिप्रायमिति—एकभिन्नत्वरूपसामान्यगतैकत्वाभिप्रायमित्यर्थः । यथा बहुव्रीहिषु सम्पन्नेषु 'सम्पन्नो व्रीहिः' इत्यत्र व्रीहिषु बहुत्वसत्त्वात् समवायेन स्वार्थैकत्वान्वयस्य बाधात् स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन व्रीहावन्वयस्तथा 'अनेकम्' इत्यत्र स्वार्थैकत्वस्य स्वाश्रयैकभेदवत्त्वसम्बन्धेन द्वयोर्बहुषु वाऽन्वय इति भावः । स्वम्=एकत्वं तदाश्रयः प्रकृते एकभेदस्तद्वत्त्वं द्वित्वादिष्विति समन्वयः । भेदत्वस्य जातित्वाभावाज्जात्यभिप्रायमित्यसङ्गतमित्यत आह—औत्सर्गिकमिति--एकवचनमिति योगविभागेन द्वित्वबहुत्वयोरभावे

दर्पणव्याख्या

* अकोरिति * असर्वनाम्नः सर्वनामविहिताकजसम्भवेन तत्पर्युदासात् सर्वनाम्नोरेव तयोर्ग्रहणं निश्चीयत इत्यर्थः । एतत्कल्पे एतत्तदुत्तरस्य सोर्हलि लोप इति सूत्रार्थः । अर्थद्वारकसम्बन्धाश्रयणेन व्याख्यानं तु पूर्वकल्पाभिप्रायेणोत्तरपदलक्षणाभिप्रायेण वेति भावः । * विशेष्यानुरोधादिति * । असति विशेषानुशासने विशेषणवाचकपदस्य विशेष्यवाचकपदसमानवचनत्वनियमादिति भावः ।

ननु विशेषणस्य विशेष्यसङ्ख्याविरुद्धसंख्यावत्त्वेऽपि विशेषणवाचकपदात्तद्वचनमित्यत्र प्रमाणाभावोऽत आह-- * किञ्चेति * । नन्वनेकशब्दोपादानादेव द्वयोर्बहूनां वा तत्सिद्धेर्द्विवचनबहुवचनयोरपि समयपरिपालनार्थत्वसम्भवादेकवचनोपादानं व्यर्थमेवेत्यत आह--* औत्सर्गिकं वेति * । "एकवचनमुत्सर्गतः करिष्यते" इति, "न केवलाः"

SGDF Copyright Digital Foundation

"सेव्यतेऽनेकया" इत्यत्रापि 'योषया' इति विशेष्यानुरोधात्, प्रत्येकं सेवनान्वयबोधनाय चैकवचनम्, नतूत्तरपदार्थप्राधान्यप्रयुक्तम्। अत एव "पतन्त्यनेके जलधेरिवोर्मयः" इत्यादिकमपि सूपपादम्।

प्रभा

एकत्वे, एकत्वाभावे चैकवचनविधानादिति भावः। तथाचोक्तम्—'एकवचनमुत्सर्गतः करिष्ये' इति। न केवलं विशेष्यानुरोधादेवैकवचनं किन्तु साभिप्रायमपीत्याह—प्रत्येकमिति—एकैकयोषा (स्त्री) कर्तृककृष्णकर्मकसेवनम्, न तु योषासमुदायकर्तृकसेवनमिति प्रत्येकप्रीतिद्योतनायेत्यर्थः। उत्तरपदार्थेति—उत्तरपदार्थप्राधान्याभावेऽपि एकवचनस्य समर्थिततया उत्तरपदार्थप्राधान्यं न स्वीकार्यमिति भावः। अत एव=पूर्वपदार्थप्राधान्यादेव। अनेके इति—यदि प्रतियोगितासम्बन्धेन भेदविशिष्ट एक इत्यर्थः स्यात्तदा 'उर्मयः' इति बहुवचनान्तोपस्थाप्यबहुत्वविशिष्टेषु उर्मिषु भेदविशिष्टैकस्याभेदेनान्वयबोधो न स्यादिति भावः।

नच भेदेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनैव प्रतियोगिनोऽन्वयो वाच्यः। अन्यथा ब्राह्मणेऽपि ब्राह्मणत्व-घटत्वोभयधर्मावच्छिन्नब्राह्मणनिष्ठप्रतियोगिताकभेदस्य सत्त्वात् 'अब्राह्मणः' इति प्रयोगापत्तिः। तथाचैकत्वस्य केवलान्वयितया एकत्वावच्छिन्नप्रतियोगिताकभेदस्याप्रसिद्धतया एकत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन एकपदार्थस्य भेदेऽन्वयानापत्तिरिति वाच्यम्, व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगित्वानिरूपको यो भेदस्तद्विशिष्टो यो विशेष्यतावच्छेदको धर्मस्तत्त्वरूपानेकत्वस्य स्वीकारेणादोषात्। धर्मे भेदवैशिष्ट्यञ्च—स्वसामानाधिकरण्य—स्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन। भेदश्च तत्तद्व्यक्तिप्रतियोगिको ग्राह्यः। तथाच 'इमौ द्वौ तद्व्यक्तिर्न' 'इमे बहवस्तद्व्यक्तिर्न' इत्यादिभेदमादाय लक्षणसमन्वयो बोध्यः। तादृशधर्मत्वञ्च द्वित्वबहुत्वादीनाम्।

ननु पूर्वपदार्थप्राधान्ये 'उत्तरपदार्थप्रधानस्तत्पुरुषः' इति व्युत्पत्तिविरोधः, तादृशव्युत्पत्तेः प्रायिकत्वस्योक्तत्वात्। ननूत्तरपदार्थप्राधान्येऽप्यनेकशब्दस्यैकशेषेण एको रथोऽश्वो गज इत्याद्यर्थप्रतीत्या बहुवचनान्तत्वोपपत्तिरिति चेन्न, सकृदुच्चरितानेकशब्देन सकलार्थप्रत्यायनसम्भवेनानेकानेकशब्दस्य प्रयोगाप्राप्त्या एकशेषाप्राप्तेः, पृथग्विभक्त्यन्तरथादिशब्दप्रयोगे एकस्यैवानेकशब्दस्यावृत्त्याऽन्वयसम्भवेनैकशेषानुपयोगाच्च द्वन्द्वनिर्देशेऽपि एकस्यैव समुदिते ऽन्वयसम्भवाच्च।

सूपपादमिति—उत्तरपदार्थप्राधान्ये भेदप्रतियोगी एक इत्यर्थो तु 'अनेके' इति बहुवचनान्तत्वं

दर्पणव्याख्या

इति नियममूलकवचनविहितमित्यर्थः। सति तात्पर्ये क्वचित् सार्थकमप्येकवचनमिष्यत एवेत्याह—* प्रत्येकमिति * एकभिन्नत्वेनोपस्थितासु योषासु प्रत्येकं सेवनान्वयबोधायेत्यर्थः। उपसंहरति—* नत्विति *। * अत एवेति * अनेकशब्दस्यैकभिन्नार्थकत्वादेवेत्यर्थः।

* सूपपादमिति *। भेदप्रतियोग्येकार्थकत्वे तु दुरुपपादं स्यात्, एकशेषेण समर्थनं त्वगतिकगतिरिति भावः। भाष्योदाहृते "नैकस्तिष्ठति" इति प्रयोगे 'जनः' इत्यध्याहार्य्यम्। प्रत्येकं स्थित्यन्वयबोधार्थञ्च तत्रैकवचनम्। 'अनेको जनाः' इति त्वसाध्वेव। उत्तरपदार्थप्राधान्यादिव्यपदेशस्तु प्रायिक इत्याद्यपि बोध्यम्। 'अत्वं भवसि' इत्यादिना 'अनहम्भवामि' इत्यादिर्गृह्यते। युष्मद इत्यस्मदोऽप्युपलक्षणम्। एवम् 'त्वद्भिन्नः' इत्यत्रापि लक्षणेति तु नैयायिकाद्यनुसारेण, स्वमते तदनभ्युपगमात्। 'अत्वम्भवसि' इत्यादावारोपादिबोधस्य सर्वानुभवविरुद्धत्वान्नञ्समासे सर्वत्रोत्तरपदस्य स्वार्थभिन्नलाक्षणिकत्वमेव युक्तमिति भावः।

SGDF
Sri Gargeshwari Digital Foundation

'अत्वं भवसि' इत्यादौ युष्मदस्मदोस्तद्भिन्ने लक्षणा । नञ् द्योतकः । तथाच भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात् पुरुषव्यवस्था । 'त्वद्भिन्नाभिन्नाश्रयिका भवनक्रिया इति शाब्दबोधः । एवम् 'न त्वं पचसि' इत्यत्र त्वदभिन्नाश्रयकपाकानुकूलभावनाऽभावः । 'घटो नास्ति' इत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इतिरीत्या बोधः, असमस्तनञः क्रियायामेवान्वयात् ।

प्रभा

दुरुपपादमिति भावः । ननु 'असः' इत्यादौ 'एतत्तदोः' इति सूत्रेऽनञ्ग्रहणं पूर्वपदार्थप्राधान्येऽपि उत्तरपदार्थप्राधान्यप्रयुक्तकार्यप्रवृत्तिज्ञापकमिति दोषाभावेऽपि 'अत्वं भवसि' इत्यादौ प्रथमपुरुषापत्तिस्तदवस्थैवेत्यत आह—अत्वमिति । इत्यादाविति—आदिना 'अनहं भवामि' इत्यस्य संग्रहः । भिन्नेन युष्मदर्थेन=त्वद्भिन्नेन युष्मदर्थेन । युष्मदिति—अस्मदोऽप्युपलक्षणमेतत् । अतएव 'अनहं भवामि' इत्यादेः सिद्धिः । सामानाधिकरण्यादिति—अनञ्समासग्रहणज्ञापितात् 'नञ्समासे पूर्वपदार्थप्राधान्येऽपि उत्तरपदार्थप्राधान्यप्रयुक्तकार्यप्रवृत्तिः' इति वचनादपि पुरुषव्यवस्था सिध्यतीति भावः ।

नञर्थस्य क्रियायामन्वये शाब्दबोधप्रकारमाह—एवमिति । भावनान्वय इति—अस्य 'इतिरीत्या बोधः' इत्यत्रान्वयः । नन्वसमस्तनञा सकलकारकविशिष्टक्रियाया अभावबोधने 'भूतलं घटवत्' इति ज्ञानम्प्रति प्रतिबन्ध्यत्वं प्रतिबन्धकत्वं वा न स्यात् । एवमारोपितार्थकत्वेऽपि नञस्तदनुपपत्तिः, नञसत्त्वे यत्प्रकारकयद्विशेष्यको बोधो नञ्सत्त्वे तदभावप्रकारकतद्विशेष्यकबोधम्प्रत्येव प्रतिबन्ध्यप्रतिबन्धकभावस्वीकारात् । नञश्चैष स्वभावो यत्स्वसम्बन्धिप्रतिपक्षबोधकत्वमिति । नास्तीत्यत्र ह्यस्तीति सत्त्वशब्देन सम्बद्ध्यमानो नञ् सत्त्वप्रतिपक्षमसत्त्वं गमयतीति वाच्यम्, ग्राह्याभावविधया प्रतिबन्ध्यप्रतिबन्धकत्वाभावेऽपि अनुभवसिद्धप्रतिबन्ध्यप्रतिबन्धकभावेनादोषात् । क्रियायामेवेति—समासाघटकनञर्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधम्प्रति भावनात्वावच्छिन्नविशेष्यतासम्बन्धेन धातुजन्योपस्थितेः कारणतया धात्वर्थप्रतियोगिकाभावविशेष्यक एव बोध इति भावः । क्रियाग्रहणं गुणस्याप्युपलक्षणम् । अत एव नञ्सूत्रे भाष्यम्—'नञश्चैषस्वभावो यत्प्रसज्य क्रियागुणौ पश्चान्निवृत्तिं करोति' । प्रसज्य=विधाय ततः प्रतिषेध इत्यर्थः । तेन गुणाभावबोधेऽपि प्रसज्यप्रतिषेधो गम्यते । गुणोदाहरणन्तु 'न न एकं प्रियम्' इति भाष्यवचनमेव । अत्र 'न' इति षष्ठ्यन्तम् । अत्र हि एकत्वप्रतिषेधेन सङ्ख्यान्तप्रयुक्तप्रियप्रतीतिर्भवति । 'न सन्देहः' इत्यादौ च सन्देहात्यन्ताभावः प्रतीयते । सन्देहश्च गुण एव, एकधर्मिकविरुद्धनानाधर्मप्रकारकज्ञानरूपत्वात् । पूर्वोदाहरणे एकत्वं सङ्ख्यारूपो गुणस्तस्य प्रतिषेधः । नः=अस्माकं प्रियमेकं नेति तदर्थात् । एवञ्चैकत्वसंख्याप्रतिषेधः फलति । तदुक्तं कैयटेन—'अत्रैकत्वसङ्ख्याप्रतिषेधादेव सङ्ख्यान्तरयुक्तवस्तुप्रतीतिः' इति । नचास्तीत्यस्याध्याहारादेककर्तृकसत्त्वैव निषिध्यते इति वाच्यम्, 'प्रसज्य क्रियागुणौ पश्चान्निवृत्तिं करोति' इति भाष्यविरोधात् । प्रसज्यप्रतिषेधार्थकनञो गुणेऽप्यन्वय इति 'क्रियया सह यत्र नञ्' इति प्रसज्यप्रतिषेधलक्षणे क्रियापदं गुणस्याप्युपलक्षणं बोध्यम् ।

दर्पणव्याख्या

प्रसज्यप्रतिषेधार्थकनञो व्यवस्थामाह—* एवं न त्वं पचसीत्यादि * नञर्थे युष्मदर्थान्वये तु प्रकृते पुरुषव्यवस्था न सिद्ध्येदिति सूचयितुं पचसीति मध्यमपुरुषनिर्देशः । अधिकं त्वादावेवोक्तम् । इदमुपलक्षणम्—'घटो नास्तः' इत्यादौ द्विवचनाद्यनुपपत्तेः । क्रियाप्रतियोगिकाभावविशेष्यकबोधे हेतुमाह—* असमस्तेति * व्याख्यानात् * नञः * तदर्थस्य प्रसज्यप्रतिषेधस्य तादृशनञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन बोधे धातुजन्योपस्थितेर्भावनात्वावच्छिन्नविशेष्यतासम्बन्धेन हेतुत्वस्य पूर्वमुक्तत्वादिति भावः ।

Sri Gargeshwari Prakashan Publication

स चाभावोऽत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यः,

प्रभा

नन्वभावनिष्ठशक्यताया अवच्छेदकं किम् ? न तावदभावत्वं 'मैत्रो न गच्छति' इत्यादावपि भेदबोधापत्तेः। नापि प्रसज्यप्रतिषेधत्वेन, उक्तदोषतादवस्थ्यात्। प्रसज्यप्रतिषेधत्वेनेत्यस्य विधानपूर्वकप्रतिषेधत्वेनेत्यर्थः। तथाच यत्र क्रिया न विधीयते='न तिष्ठति' इत्यादौ तत्राभावाप्रतीतिरत आह—स चेति—अभावश्चेत्यर्थः। अत्यन्ताभावत्वेति— अत्यन्ताभावशब्दोऽन्वर्थसंज्ञा तथाहि—अन्तमतिक्रान्तोऽत्यन्तः। अन्तशब्दोऽत्र जघन्यवाची, 'अन्तो जघन्यं चरमम्' इत्यमरात्। जघन्यत्वञ्च—स्व (अत्यन्ताभाव) प्रतियोगिनिष्ठतादृशाभाव (अत्यन्ताभाव) प्रतियोगित्वरूपम्। यथा—'घटाभावः' इत्यत्र स्वः=घटाभावस्तत्प्रतियोगी घटस्तन्निष्ठोऽत्यन्ताभावः—पटाद्यभावः, घटाद्यभावो वा, नतु घटत्वात्यन्ताभाव इति घटत्वं घटाभावप्रतियोगिघटनिष्ठात्यन्ताभावाप्रतियोगि। तथाच घटाभावप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वाभाववति घटत्वेऽपि घटाभावस्य सत्त्वेन घटाभावः स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वव्यभिचारी, तादृशप्रतियोगित्वाभावाधिकरणे घटत्वेऽपि सत्त्वात्। एवञ्चात्य-

दर्पणव्याख्या

नन्वभावस्य केन रूपेण शक्यता। न तावदभावत्वेन। 'चैत्रो न पचति' इत्यादावपि भेदबोधापत्तेः। प्रसज्यप्रतिषेधत्वेन शक्यत्वेऽपि स एव दोषः, भेदस्यापि योग्यानुपलब्धिजन्यप्रत्यक्षविषयत्वात्। तदनुपस्थितावपि नञोऽभावबोधाच्चेत्यत आह—*स चेति* अभावश्चेत्यर्थः। तथाच नञोऽन्योन्याभावत्वेनात्यन्ताभावत्वेन वाऽभावे शक्तिकल्पनान्न दोषः।

* अत्यन्ताभावत्वेति * अन्तम्=स्वप्रतियोगिनिष्ठाभावप्रतियोगित्वमतिक्रान्तः=व्यभिचरितोऽत्यन्तः। स चासावभावश्चेति विग्रहः। तस्य भावस्तत्त्वम्। स्वप्रतियोगिनिष्ठस्वसदृशाभावप्रतियोगित्वव्यभिचार्यभावत्वमिति यावत्। 'अन्तो जघन्यं चरमम्' इत्यमरेणान्तशब्दस्य जघन्ये वृत्तिबोधनात् जघन्यत्वञ्चोक्तार्थस्य जघनवृत्तिबोध्यत्वात्। घटात्यन्ताभावस्य स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वाभाववति घटवृत्तिधर्मे सत्त्वात्तत्त्वं तत्राक्षतम्। घटान्योन्याभावस्य तु स्वप्रतियोगिनिष्ठान्योन्याभावप्रतियोगित्वव्यापकत्वात्तद्व्यावृत्तिः। व्युत्पत्तिप्रदर्शनं चेदम्। लक्षणं त्वत्यन्ताभावस्य तादात्म्येतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। * अन्योन्याभावेति * अन्योन्यस्मिँस्तादात्म्येनाभावः=अभवनमिति व्युत्पत्त्या तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वम्। ताभ्यां शक्य इत्यर्थः।

वस्तुतस्तु अत्यन्ताभावस्याभावत्वेनैव शक्यता, नतूक्तरूपेण, गौरवात्, तेन रूपेण बोधस्याननुभवाच्च। अत एव "तत्सादृश्यमभावश्च" इत्यत्राभावत्वेनैवात्यन्ताभावोपादानम्।

नच नञः संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वादिनाऽभावे शक्तघनभ्युपगमे 'भूतले न घटः' इति वाक्यजबोधस्य संयोगसम्बन्धेन भूतलविशेष्यकघटविशिष्टबुद्धिविरोधित्वानापत्तिस्तत्संसर्गावच्छिन्नतद्विशिष्टबुद्धौ अभावांशे तत्संसर्गावच्छिन्नप्रतियोगिताकत्वावगाहिन्या एव तदभावबुद्धेः प्रतिबन्धकत्वादिति वाच्यम्,

निरुक्ताभावत्वेन शक्तावपि संयोगादीनां लक्षणे तादात्म्येतरसम्बन्धत्वेनानुगतरूपणैव निवेशनीयतया नञ्पदशक्तयाऽप्यभावे विशिष्य संयोगावच्छिन्नप्रतियोगिताकत्वभानासम्भवात्, प्रतिबन्धकत्वानुपपत्तितादवस्थ्यात्। तादृशविशिष्टबुद्धिविरोधित्वानुरोधेनाकाङ्क्षाबलादेव तादृशप्रतियोगिताकत्वस्य विशिष्यप्रतियोग्यभावयोः सम्बन्धविधया भानस्योपगन्तव्यत्वात्।

नन्वन्योन्याभावसाधारणाभावत्वस्य नञ्पदप्रवृत्तिनिमित्तत्वेऽन्योन्याभावे तत्र पृथक्शक्तिकल्पनानर्थक्यम्। नचाऽन्योन्याभावत्वप्रकारकबोधानुरोधात्तस्यापि शक्यतावच्छेदकत्वकल्पनमावश्यकम्, अन्यथा तादात्म्यसम्बन्धेन प्रतियोगिप्रकारकेऽयं घट इति बोधे नायं घट इति वाक्यजबुद्धेरप्रतिबन्धकत्वापत्तेः। अन्योन्याभावत्वावगाह्यभावबुद्धेरेव तादृशबुद्धिविरोधित्वात्। घटाभाववानिति बुद्धेरपि तद्विरोधित्वापत्तेश्चेति वाच्यम्,

SGDF Sri Gargeshwari Digital Foundation

प्रभा

न्ताभावः=अन्तम्=स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वमतिक्रान्तः=व्यभिचरित इति अत्यन्तः=तादृशस्वप्रतियोगित्वव्यभिचारी, स चासावभावश्चेति कर्मधारयेण तादृशप्रतियोगित्वव्यभिचारी अभावोऽत्यन्ताभाव इत्यन्वर्थत्वं सिद्धम् । इदञ्च योगार्थमात्रप्रदर्शनम् । अत्यन्ताभावत्वञ्च—तादात्म्येतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । नित्यत्वे सति अभावत्वम्, त्रैकालिकसंसर्गाभावत्वं वा । कस्यचिन्मते अत्यन्ताभावो द्विधा—वायो रूपाभावादिरूप एकः, भूतले घटाभावः सामयिकात्यन्ताभावरूपो द्वितीयः । समयभेदेन यत्र कदाचित्तद्वत्ता, कदाचित् तदभाववत्ता च तत्रैवायम् । अयं भावः—यस्य वस्तुनोऽभावस्तद् वस्तु तस्याभावस्य प्रतियोगि, प्रतियोगिनो भावः—प्रतियोगिता=प्रतियोगिवृत्तिधर्मः । प्रतियोगिताया अवच्छेदकः कश्चन धर्मः, सम्बन्धश्च । धर्मसम्बन्धाभ्यां प्रतियोगिताऽवच्छिद्यते । तत्र यः प्रतियोगितायाः समनियतो धर्मो घटत्वादिरूपः स प्रतियोगितावच्छेदकः । प्रतियोगी स्वाधिकरणे येन सम्बन्धेन नास्ति स सम्बन्धः प्रतियोगितावच्छेदकः । यथा—'संयोगेन भूतले घटो नास्ति' इत्यत्र संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकोऽभावः प्रतीयते । भविष्यतो घटस्य स्वाधिकरणे=कपालादौ योऽभावः (अत्र घटो भविष्यति) इत्यादिवाक्याभिव्यङ्ग्यः स प्रागभाव इत्युच्यते । भूतस्य घटस्य यो नाशः स 'घटो नष्टः' इत्यादिवाक्यबोध्यः प्रध्वंसाभाव इत्युच्यते । एतौ च न नञ्पदबोध्यौ, इत्यभावत्रयं संसर्गाभावशब्देन व्यवह्रियते । अन्योन्याभावस्तु 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये' इति वार्तिकेनान्यशब्दस्य द्वित्वे बहुलग्रहणात् समासवद्भावाभावे द्वित्वपूर्वभूतान्यप्रकृतिकसप्तम्याः सावादेशे 'अन्योन्य ङि' इत्यस्याभावशब्देन समासे बहुलग्रहणबलेनैव सोरलुकि 'सुपो धातु' इति सप्तम्या लुकि च 'अन्योन्याभाव' इति पदं सिद्ध्यति । अन्योऽन्यस्मिन् तादात्म्येनाभवनमन्योन्याभावः । तादात्म्यम्=तस्य आत्मा=स्वरूपं तदात्मा, तदात्मनो भावस्तादात्म्यम् , अभेद इत्यर्थः । अन्योन्याभावस्य प्रतियोगितावच्छेदकसम्बन्धश्च तादात्म्यमेव । अत एव तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभाव इत्यभिधीयते । यथा—'घटः पटः' इत्यत्र समानविभक्तिकत्वात् 'नीलो घटः' इतिवत् 'घटपटयोः' अभेदः प्रतीयते । तत्र 'घटो न पटः' इत्युक्तौ 'पटभिन्नो घटः' इति बोधो जायते । सोऽयमभेदनिषेधकोऽभावोऽन्योन्याभावः । 'पटभिन्नो घटः' इतिवत् 'घटभिन्नः पटः' इत्यपि प्रतीयते । एवञ्च 'अन्योन्याभावः' स्वप्रतियोगिनिष्ठान्योन्याभावप्रतियोगित्वव्यापकः । एवम्—अन्योऽन्यपदं तादात्म्यसम्बन्धपरम् , तेनाभाव इति तृतीयासमासः । अवच्छिन्नप्रतियोगिताकत्वं तृतीयार्थः । तथाचासाधारणधर्मरूपतादात्म्यत्वनिष्ठावच्छेदकतानिरूपितावच्छेद्यतावत्संसर्गतानिरूपकप्रतियोगिताकाभावत्वमन्योन्याभावत्वं फलितम् । तेन संयोगेन संयोगी नास्ति, समवायेन समवायी नास्ति, इत्याद्यत्यन्ताभावे न व्यभिचारः । यद्वा—अन्योऽन्यम्=परस्परं तन्निष्ठो योऽभावः सोऽन्योऽन्याभावः । ननु संसर्गा-

दर्पणव्याख्या

तत्राभावत्वस्य नञ्पदशक्त्या तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्य समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदयोः समभिव्याहाररूपाकाङ्क्षाबलेन लाभेन तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वरूपान्योऽन्याभावत्वावगाहितयैव तत्तद्बुद्धेः प्रतिबन्धकत्वोपपत्तौ तेन रूपेण शक्तिकल्पनस्याकिञ्चित्करत्वात् ।

नच नास्त्येव तदवच्छिन्ने शक्तिः, पृथगुपादानं त्वभावसामान्यस्य नञर्थत्वालाभायैवेति वाच्यम् , तथा सति "नञर्थाः षट् प्रकीर्तिताः" इत्यस्यासङ्गत्यापत्तेरिति चेत् , स्यादेव, यद्यन्योन्याभावत्वम्=तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वरूपं निर्वक्तुं शक्येत , तदेव न, संयोगितादात्म्यस्य संयोगरूपतया संयोगात्यन्ताभावेऽतिव्याप्तेः । सम्बन्धविधया तादात्म्यनिष्ठावच्छेदकतानिवेशेऽपि संयोगसम्बन्धावच्छिन्नसंयोगधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावातिव्याप्तिता-

प्रभा

भाव इत्यत्र कः समासः ?—संसर्गश्चासावभावश्चेति तु न, संसर्गस्य भावपदार्थतयाऽभावेऽभेदेनान्वयायोगात् । नच संसर्गपदं तादात्म्यसम्बन्धभिन्नसम्बन्धपरम् । एवमन्योऽन्यपदं तादात्म्यसम्बन्धपरम् । तथा संसर्गेण=तादात्म्यसम्बन्धभिन्नसम्बन्धेनाभावः संसर्गाभावः । अन्योऽन्येन=तादात्म्यसम्बन्धेनाभावोऽन्योऽन्याभावः । तादात्म्येतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावः संसर्गाभावः । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः । ननूक्तसंसर्गाभावत्वलक्षणे ध्वंसे प्रागभावे चाव्याप्तिः, ध्वंसप्रागभावीयप्रतियोगितायाः सम्बन्धानवच्छिन्नत्वादिति चेन्न, संसर्गपदस्य तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगितापरत्वमन्योन्यपदस्य तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगितापरत्वञ्चाश्रित्य तयोरभाव इति व्युत्पत्त्या संसर्गाभावान्योऽन्याभावशब्दयोः प्रयोगे बाधकाभावात् । नचैवमपि 'संयोगेन संयोगी नास्ति' इत्यादावत्यन्ताभावलक्षणाव्याप्तिः, प्रकृते संयोगस्य तादात्म्यरूपतया तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताकत्वाभावादिति वाच्यम्, तादात्म्यत्वेन तादात्म्यसम्बन्धानवच्छिन्नत्वस्य निवेशेनादोषात् । तादात्म्यत्वञ्चासाधारणधर्मत्वरूपं नतु संयोगत्वरूपम् । निरूपकत्वस्य षष्ठ्यर्थतया अभावे तादृशप्रतियोगितानिरूपकत्वस्य सत्त्वादुक्तात्यन्ताभावत्वेनान्योऽन्याभावत्वेन च नञर्थाभावस्य भानमिति भावः । ननूक्तात्यन्ताभावत्वस्य गुरुत्वेन लघुभूतान्योऽन्याभावत्वेनैवाभावस्य शक्यत्वमस्तु, एवमुत्पत्तिमदभावत्वरूपध्वंसत्वस्य, उत्पत्तिशून्यनाशप्रतियोग्यभावत्वरूपप्रागभावत्वस्य चान्योऽन्याभावत्वापेक्षया गुरुतया शक्यतावच्छेदकत्वकल्पनमनुचितमिति चेन्न, नास्तीत्यादिप्रतीतिबलादनुयोगिताविशेष एवात्यन्ताभावादिर्नतूक्तरूप इति स्वीकारेणादोषात् । नच तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योऽन्याभावत्वमिति स्वीकारे 'संयोगेन संयोगी नास्ति' इत्यादावत्यन्ताभावेऽतिव्याप्तिः, संयोगिनिष्ठतादात्म्यस्य संयोगरूपतया संयोगरूपतादात्म्यसम्बन्धावच्छि-

दर्पणव्याख्या

दवस्थ्यात् । तादात्म्यत्वावच्छिन्नतादात्म्यसंसर्गतां निवेश्य परिष्कृतस्य तस्य वाच्यतावच्छेदकत्वे तु 'घटस्तादात्म्येन न पटः' इति प्रयोगानुपपत्तिः । एवञ्च तादात्म्यस्यान्योन्याभावप्रतियोगितावच्छेदकसम्बन्धत्वमपि प्रामाणिकम् । इह संयोगेन घटो नास्तीतिवत् 'अयं तादात्म्येन न घटः' इत्यादिप्रत्ययात् । एवञ्च तादृशानुयोगिताविशेषप्रकारताकत्वमेवाभेदसम्बन्धेन प्रतियोगिप्रकारकधीविरोधित्वे तन्त्रमिति तदनुरोधेन नञः पृथगन्योन्याभावे शक्तिरावश्यकेति ।

ननु नञोऽविशेषेणात्यन्ताभावबोधकत्वे 'भूतले न घटः' इत्यादिवाक्यजबोधेऽत्यन्ताभावभानापत्तिः । नच नञ्पदजन्यात्यन्ताभावबोधेऽनुयोगिवाचकपदोत्तरसप्तमीसमभिव्याहारज्ञानस्य हेतुत्वान्नोक्तापत्तिरिति वाच्यम्, 'चैत्रो न पचति' इत्यादिवाक्यजभावनात्यन्ताभावबोधे व्यभिचारेणोक्तकार्यकारणभावस्यैवासम्भवादिति चेत् ,

अत्र वदन्ति—यत्र नञ्समभिव्याहारे प्रतियोग्यनुयोगिनोराधाराधेयभावसंसर्गबोधौपयिकाकाङ्क्षा तत्रैव नञोऽत्यन्ताभावार्थकत्वोपगमेन नोक्तस्थले तद्बोधापत्तिः, तत्र नञ्समभिव्याहारे तादृशबोधौपयिकाकाङ्क्षाविरहात् । 'न पचति चैत्रः, 'नेदं चैत्रस्य' इत्यादौ नञ्समभिव्याहारे तिङर्थस्य कृत्यादेः प्रथमान्तपदोपस्थापितचैत्रादौ षष्ठ्यर्थस्वत्वस्येदंपदार्थे आधाराधेयभावबोधौपयिकप्रथमान्तपदादिसमभिव्याहाररूपाकाङ्क्षायाः सत्त्वेन तत्र नञा कृत्याद्यभावबोधनसम्भवात् ।

एवञ्च यत्र प्रतियोग्यनुयोगिनोराधाराधेयभावबोधः सप्तमीं विनाऽनुपपन्नस्तत्रानुयोगिवाचकपदात् सप्तम्यप्यपेक्ष्यते । यथा—'भूतले न घटः' इत्यादौ । तदुक्तं दीधितिकृता—"वस्तुतो न पचति चैत्रो नेदं मैत्रस्येत्यादौ विभक्त्यर्थकृतिसम्बन्धादेरभावस्य बोधने नञा सप्तमी नापेक्ष्यते, अपेक्ष्यते च प्रातिपदिकार्थस्येति" इति ।

नच चैत्रो न पचतीत्यादौ नञाख्यातार्थभावनाभावबोधने चैत्रौ न पचतश्चैत्रा न पचन्तीत्यादौ द्विवचनाद्यनुपपत्तिः, भवन्मते भावनाऽन्वयिनि सङ्ख्यान्वयनियमेन भावनान्वयिन्यभावे द्वित्वाद्यभावेन द्विवचनादिना तस्य बोधयितु-

SGDF

प्रभा

न्नप्रतियोगिताकाभावत्वस्य तत्र सत्त्वादिति वाच्यम्, तादात्म्यावच्छिन्नतादात्म्यसम्बन्धनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वरूपान्योऽन्याभावत्वस्य विवक्षितत्वात्। प्रकृते च संयोगत्वावच्छिन्ना संयोगसम्बन्धनिष्ठावच्छेदकता, नतु तादात्म्यावच्छिन्नेति न दोषः। यद्यपि संयोगितादात्म्यस्य संयोगरूपत्वे तत्तादात्म्यमपि संयोगत्वरूपमेवेत्यत्यन्ताभावेऽतिव्याप्तिस्तदवस्थैव, तथापि संसर्गतावच्छेदकं तादात्म्यत्वम्, नतु संयोगत्वादिरूपम्, किन्तु संयोगिव्यक्तिवृत्त्यसाधारणधर्मत्वरूपमेवेति उक्तात्यन्ताभावीयप्रतियोगितानिरूपिता संयोगसम्बन्धनिष्ठावच्छेदकता नासाधारणधर्मत्वरूपतादात्म्यत्वेनावच्छिन्नेति न दोषः। तत्तद्रूपेणेति—अत्यन्ताभावत्वादिरूपेण बोधस्यानुभवसिद्धत्वादित्यर्थः। घटप्रागभावध्वंससमये 'अत्र घटो नास्ति' इत्यादिना घटप्रागभावः, घटध्वंसाभाव इत्याकारिकैव प्रतीतिर्नत्वत्यन्ताभावात्मिका प्रागभावध्वंसयोरत्यन्ताभावेन सह विरोधस्य प्राचीनतार्किकसम्मतत्वेन ध्वंसप्रागभावसमयेऽत्यन्ताभावस्यासम्भवादिति भावः।

केचित्तु—अभावत्वमेव शक्यतावच्छेदकम्, 'चैत्रो न गच्छति' इत्यादौ चैत्रकर्तृकगमनाभावबोधस्यानुभवसिद्धत्वात्। ननु 'चैत्रो न गच्छति' इति वाक्यात् तादृशबोधासम्भवः, 'नञ्समभिव्याहारे यादृशधर्मिणि येन सम्बन्धेन यः प्रकारतया भासते, नञ्समभिव्याहारे तादृशधर्मिणि तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावः प्रकारतया भासते' इति नियमात् प्रकृते क्रियामुख्यविशेष्यकबोधस्यैव नञ्समभिव्याहारे सिद्धान्ततत्वेन नञ्सत्त्वे कथं समवायेन क्रियाभावभानमिति चेन्न, क्रियायां चैत्रकर्तृकत्वं प्रकारतया भासते। क्रियायां चैत्रकर्तृकत्वञ्च—चैत्रनिष्ठाश्रयतानिरूपकत्वम्। प्रकृते चैत्रनिष्ठायाः समवायसम्बन्धावच्छिन्नाश्रयतायाः क्रियानिष्ठविशेष्यतानिरूपितनिरूपकत्वनिष्ठप्रकारतावच्छेदकतया भानेन नञ्समभिव्याहारे तत्सम्बन्धावच्छिन्न (स्वनिष्ठविशेष्यतानिरूपित प्रकारतावच्छेदकत्वसम्बन्धावच्छिन्न) प्रतियोगिताकक्रियाभावस्याप्यङ्गीकारात्। एवम् 'घटो न पटः' इत्यादावप्यन्योऽन्याभावस्य बोधः सम्भवति। अभावत्वावच्छिन्नस्य नञा तत्र तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्य समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारवशाद् भानेन निर्वाहात्। 'प्रतियोग्यनुयोग्यभावान्वयौ तुल्ययोगक्षेमौ' इति नियमस्य नञ्समभिव्याहारे प्रतियोग्यनुयोगिनोर्यत्सम्बन्धावच्छिन्नाश्रयत्वप्रकारकबोधौपयिकाकाङ्क्षा तत्स-

दर्पणव्याख्या

मशक्यत्वात्। वैयाकरणमते तु तत्र धात्वर्थक्रियाभावस्यैव नञा बोधनेन द्वित्वादिविशिष्टचैत्रकर्तृकक्रियाभाव इति बोधाभ्युपगमेन तादृशानुपपत्त्यभावादिति वाच्यम्,

नञ्समभिव्याहारे भावनाभावान्वयिनि तिङर्थसङ्ख्यान्वय इति व्युत्पत्त्यन्तराभ्युपगमेन द्विवचनाद्युपपत्तेः। त्वन्मतेऽपि यच्चैत्रकर्तृकः पाकोऽप्रसिद्धस्तत्र चैत्रो न पचतीति प्रयोगानुपपत्त्या क्रियाप्रतियोगिकाभावस्य नञा प्रत्यायितुमशक्यत्वाच्च।

नच तत्र नञा भेद एव बोध्यते। प्रतियोगितया चैत्रादिविशिष्टस्य तस्याऽऽख्यातार्थकर्त्तर्य्येवान्वयान्न तादृशप्रयोगानुपपत्तिरिति वाच्यम्, तथा सति प्रतियोगितासम्बन्धावच्छिन्नधात्वर्थप्रकारकबोधे असमस्तनञ्पदजन्योपस्थितेर्हेतुत्वस्यात्रैव व्यभिचारेण त्वत्सिद्धान्तव्याघातात्। नञ्समभिव्याहारे आख्यातार्थभावनान्वय्यर्थकत्ववत् तत्समभिव्याहारे भावनान्वय्यर्थकत्वरूपसामानाधिकरण्यस्य युष्मदादौ सत्त्वान्न न त्वं पचसीत्यादौ मध्यमादिपुरुषानुपपत्तिः।

यद्वा नञ्समभिव्याहारे स्वबोधकर्तृत्वबोधकत्वम्। तत्समभिव्याहारे तु भूतपूर्वं तदादाय पुरुषोपपत्तिरिति। इदं त्ववधेयम्—'नञ्समभिव्याहारे प्रतियोग्यनुयोगिनोर्यः सम्बन्धो भासते तत्समभिव्याहारे तत्सम्बन्धावच्छिन्नतदभावस्तदनुयोगिनि भासते' इति व्युत्पत्तेर्न भूतले न घट इत्यादावन्योन्याभावबोधस्तन्नियामकं त्वादावेवोक्तम्। परन्तु घटत्वादिवि-

तत्तद्रूपेण बोधादित्याद्यन्यत्र विस्तरः ॥ ४१ ॥

इति वैयाकरणभूषणसारे नञर्थनिर्णयः ॥ ७ ॥

प्रभा

म्बन्धावच्छिन्नप्रतियोगिताकाधेयाभावस्यापि भानमित्यर्थः। नच 'जले समवायेन नीलरूपं नास्ति' इति वाक्यान्नीलरूपाश्रयतायां समवायसम्बन्धावच्छिन्नत्वस्य पृथग्भानाभ्युपगमो भवता कार्य्यः, स च न सम्भवति, उक्तनियमेनैव सम्बन्धावच्छिन्नत्वलाभेन समवायेनेतिशब्दात् पुनस्तद्भानाङ्गीकारे पौनरुक्त्यापत्तिरिति वाच्यम्, उक्तनियमवशाद् यत्र समवायेनेत्यादिपदसमभिव्याहारो नास्ति तत्र तत्सम्बन्धावच्छिन्नत्वं प्रतियोगितायामेव भासते। यत्र तु समवायेनेत्यादिसमभिव्याहारस्तत्राभावांशे तत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वस्य प्रकारतया भानमित्यङ्गीकारात्।

नञा किञ्चन नास्तीति बोधयन्ती श्रुतिर्यतः।
तदर्थनिर्णयो यातो बालकृष्णप्रभाश्रितः ॥
॥ शुभम्भूयात् ॥

—*—

दर्पणव्याख्या

शिष्टोपस्थापकपदसमभिव्याहृतनञादिपदस्य घटत्वावच्छिन्नप्रतियोगितासम्बन्धेन घटप्रकारकाभावशाब्दत्वस्य, तथा नीलादिसाकाङ्क्षघटाद्युपस्थापकपदसमभिव्याहृतनञ्पदस्य नीलघटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन नीलघटादिप्रकारकशाब्दबुद्धित्वस्य च कार्य्यतावच्छेदकत्वोपगमान्न नीलघटो न घट इत्यादिप्रयोगप्रसक्तिः, भवति च पीतो घटो न नीलघट इत्यादिप्रयोगोपपत्तिरित्याद्यन्यतोऽवधार्य्यमित्याशयवानाह—* इत्याद्यन्यत्र विस्तर इति * ॥ ४१ ॥

इति वैयाकरणभूषणसारदर्पणे नञर्थनिरूपणम् ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ निपातार्थनिर्णयः ॥

प्रादयो द्योतकाः, चादयो वाचकाः, इति नैयायिकमतमयुक्तम्,

अथ निपातार्थनिर्णयः

प्रभा

नञो निपातत्वेऽपि 'ब्राह्मणवशिष्ठन्यायेन तदर्थं निरूप्य 'प्रादयो द्योतकाश्चादयस्तु वाचकाः' इति नैयायिकोक्तं वैषम्यमयुक्तमिति ध्वनयन् निपातानां द्योतकत्वं समर्थयते—प्रादय इत्यादिना। द्योतका इति—ननु द्योतकता व्यञ्जकतारूपैव, सा च व्यञ्जना न नैयायिकसम्मतेति दृष्टान्तासङ्गतिरिति चेन्न, तन्मते द्योतकत्वस्य स्वसमभिव्याहृतपदगतवृत्तिबोधकत्वरूपत्वात्। तस्य च 'प्रजयति' इत्यादौ प्रशब्देऽपि सम्भवः, तन्मते प्रकर्षविशिष्टे जये धातो र्लक्षणायाः स्वीकारात्। तत्र प्रपदं तात्पर्यग्राहकम्। अन्ये तु प्रकर्षः प्रशब्दवाच्य एव। तस्य च प्रकारतया जिधात्वर्थे जयेऽन्वयः। नच 'नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयोऽव्युत्पन्नः' अत एव कर्मतानिरूपकत्वसम्बन्धेन पाकेऽन्वयाभिप्रायेण 'तण्डुलः पचति' इति न प्रयोग इति वाच्यम्, तादृशव्युत्पत्तेर्निपातातिरिक्तविषयकत्वात्। अत एव मीमांसकमते 'न कलञ्जम् (विषाक्तशस्त्रहतमृगमांसम्, पक्षिविशेषं वा) भक्षयेत्' इत्यादौ भक्षणनञर्थाभावयोः साक्षादेव परस्परमन्वयेन कलञ्जकर्मकभक्षणाभावप्रयोज्यमपूर्वं (पुण्य) मिति बोधः। नैयायिकमते नञर्थोऽभावस्तत्र लिङर्थस्य बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वस्य प्रतियोगितयाऽन्वयः। अभावस्य स्वरूपसम्बन्धेन भक्षणरूपधात्वर्थेऽन्वयः। तथाच बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभाववद्भक्षणमिति बोधः। नचैवं प्रशब्दस्य प्रकर्षवाचकत्वे 'प्रतिष्ठते' इत्यादौ प्रकर्षप्रतीतौ प्रकृष्टा स्थितिरित्येव बोधः स्यादिति वाच्यम्, द्योतकतावादिनयेऽपि तद्दोषतादवस्थ्यात्। नच द्योतकत्वमते धातूनामनेकार्थत्वात् स्थाधातुरत्र गमनार्थक इति तद्गतादित्वं प्रशब्दो द्योतयतीति वाच्यम्, निपातानां वाचकत्वादिनाऽपि तथात्वस्य वक्तुं शक्यत्वात्।

'यश्चोभयोः समो दोषः परिहारस्तयोः समः' इति न्यायात्। निपातानामपि अनेकार्थतया प्रकर्षे इवादित्वेऽपि प्रशब्दस्य शक्तिस्वीकारात्। आदित्वञ्च—तदर्थविषयककृतिध्वंससमानकालिकत्वम्। नच प्रशब्दजन्यप्रकर्षविषयकबोधम्प्रति जिधात्वादिसमभिव्याहाररूपायाः, तज्जन्यादित्वविषयकबोधम्प्रति स्थाधात्वादिरूपाया आकाङ्क्षायाः कारणत्वान्नोक्तदोष इति वाच्यम्, दत्तोत्तरत्वादित्याहुस्तन्न युक्तम्, धातूनामनेकार्थत्वस्य सर्वसम्मतत्वेन प्रकर्षादिविशिष्टतत्तदर्थे धातूनां शक्तिकल्पनेनैव तादृशार्थबोधसम्भवे निपातानां पृथक् शक्तिकल्पने तज्जन्योपस्थित्यादीनाञ्च पृथक्कल्पनेऽतिगौरवप्रसङ्गात्। अनेकार्थकशब्दस्थले एकस्यैवार्थस्य एकदोपस्थितौ नियामकस्यापेक्षणेन प्रशब्दस्यैव तात्पर्यग्राहकत्वेन नियामकत्वात्। किञ्च निपातानां वाचकत्वेऽपि प्रशब्दस्याप्यनेकार्थतया तत्र तात्पर्यग्राहकस्यापेक्षणेऽननुगततत्तद्धातूनां तात्पर्यग्राहकत्वकल्पनापेक्षयाऽनुगतप्रशब्दस्यैव तत्कल्पकत्वमुचितम्। किञ्च शक्तानां घटादिपदानां क्रियायोगे

दर्पणव्याख्या

प्रासङ्गिकं निपातोपसर्गार्थनिरूपणमित्याशयेन मूलमवतारयति—*प्रादयो द्योतका इति* द्योतकतारूपशक्तिमन्त इत्यर्थः। अत एव 'प्रजयति' इत्यादौ न प्रकर्षाद्यर्थस्य विशेष्यतेति भावः। मतान्तरे तु तात्पर्य्यग्राहकत्वं द्योतकत्वं वक्ष्यति।

SGDF

वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते—

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
'उपास्येते हरिहरौ' लकारो दृश्यते यथा ॥ ४२ ॥

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयः=निपातास्तथा = द्योतका इत्यर्थः । अयं भावः—'ईश्वरमनुभवति' इत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः, 'भवति' इत्यत्राप्यापत्तेः । नोपसर्गार्थः, तथा सत्यप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः, 'अनुगच्छति' इत्यादौ अनुभवादिप्रत्ययापत्तेश्च ।

प्रभा

केवलानामपि प्रयोगदर्शनेन प्रशब्दस्य च केवलस्य तादृशार्थे प्रयोगादर्शनात् प्रशब्दस्य प्रकर्षे शक्तिरयुक्तैव । लक्षणया प्रशब्दस्य प्रकर्षविशिष्टतत्तदर्थबोधकत्वं तत्तद्धातुश्च तात्पर्यग्राहक इत्यपि न, शक्यार्थाभावे शक्यसम्बन्धरूपलक्षणाया असम्भवात्, आख्याताप्रकृतित्वेन तदर्थे आख्यातार्थान्वयानापत्तेश्च । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरित्याहुः । नचैवं प्रादीनामिव 'घटमानय' इत्यादौ घटादिपदानामपि घटकर्मत्वादौ लक्षणा स्याद् द्वितीयादेस्तात्पर्यग्राहकतया तत्र शक्तिर्न सिध्येदिति वाच्यम्, कर्मत्वादिपर्यन्तस्य प्रातिपदिकार्थत्वे तस्य निरूपकतासम्बन्धेनानयनादिधात्वर्थेऽन्वयानापत्तेः, नामार्थधात्वर्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् । नच 'स्तोकं पचति' इत्यादावभेदेन नामार्थधात्वर्थयोरन्वयस्य व्युत्पन्नतया घटकर्मके लक्षणयाऽभेदेनानयनेऽन्वयोऽस्त्विति वाच्यम्, 'कर्मणि द्वितीया' इत्यादेः शक्तिग्राहकत्वसिद्धान्तस्य विरुद्धत्वापत्तेः । तस्मादुपसर्गाणां द्योतकत्वमेव । उपसर्गसंज्ञायाः क्रियायोगे विधानात् क्रियावाचकधातुत एव द्योत्यार्थविशिष्टक्रियाभानम् । 'सुजनः' इत्यादौ क्रियावाचकासमभिव्याहारे उपसर्गत्वाभावाद् वाचकत्वमेव । अत एव 'निर्मक्षिकम्' इत्यत्र निरित्यस्य ध्वंसवाचकतया, 'उपकुम्भम्' इत्यत्र 'उप' इत्यस्य समीपवाचकतयाऽव्ययीभावः सिद्ध्यति । वाचका इति—'घटः पटश्च' इत्यादौ 'घटसमुच्चितः पटः' इत्यादि क्रमेण बोधस्यानुभविकत्वादन्वयव्यतिरेकाभ्यां चादीनां वाचकत्वमेवेति नैयायिका आहुः । वैषम्ये=प्रादीनां द्योतकत्वम्, चादीनां वाचकत्वमिति भेदे । बीजाभावादिति—यथा प्रादिद्योत्यार्थस्य धात्वर्थे विशेषणत्वं तथा चाद्यर्थस्यापि विशेषणतया वैषम्यं नास्तीति भाव. । तार्किकैरुपसर्गाणां द्योतकत्वं स्वीक्रियते तत्सम्मतदृष्टान्तेनाह—तथेति । कारिकोत्तरार्द्धोपात्तहेतुनैव न चादीनामपि द्योतकत्वं किन्तु प्रमाणान्तरमप्यस्तीत्याह—अयम्भाव इत्यादिना । धात्वर्थ इति—भूधात्वर्थ इत्यर्थः । तेनानुभवस्य ज्ञाधात्वर्थत्वेऽपि न दोषः । अन्वयव्यतिरेकाभ्यां लाघवादुपसर्गवाच्य एवानुभवादित्याशङ्कां परिहरन्नाह—नोपसर्गार्थ इति । ननु धात्वर्थफलस्थानापन्नानुभवस्यान्वर्थत्वेऽपि तज्जनकव्यापारस्य धात्वर्थतया आख्यातार्थान्वयः स्यादित्यत आह—अनुगच्छतीति । प्रत्ययापत्तेश्चेति—नचोपसर्गेणानुभवादिबोधे तत्तद्धातुसम-

दर्पणव्याख्या

तत्र येनेत्यत्र यच्छब्दो नोत्तरार्द्धपठितहेतुमात्रपरामर्शकः, किन्तु हेत्वन्तरपरामर्शकोऽपि इत्याह—* अयं भाव इति * । * न धात्वर्थ इति * न तत्प्रयोगान्तर्गतधातुशक्य इत्यर्थः । * आपत्तेरिति * अनुभवादिप्रतीत्यापत्तेरित्यर्थः । * नोपसर्गार्थ इति * न तद्धातुसमभिव्याहृतप्रादिशक्य इत्यर्थः । * अनन्वयापत्तेरिति * एतच्चानुभवादिमात्रप्रतीतिमभ्युपेत्य । वस्तुतस्तथास्वीकारेऽक्रियार्थकत्वेन अनुभवादेर्धातुत्वानापत्तेरिति बोध्यम् ।

SGDF Gurgaonkar Digital Foundation

न विशिष्टार्थः, गौरवात् । तथाच धातोरेव विद्यमानत्वादिवाचकस्यास्तु लक्षणा, उपसर्गस्तात्पर्य्यग्राहक इत्यस्तु । तथाच तात्पर्य्यग्राहकत्वमेव द्योतकत्वमिति ।

तच्च चादिष्वपि तुल्यम् । 'चैत्रमिव पश्यति' इत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्य्यग्राहक इत्यस्य सुवचत्वादिति । तत्र स्वयं युक्त्यन्तरमाह—'उपास्येते हरिहरौ' इति—अत्र ह्युपासना किमुपसर्गार्थः, विशिष्टस्य, धातुमात्रस्य वा ।

प्रभा

भिव्याहारस्य कारणत्वं कल्प्यत इति वाच्यम्, सत्तादौ शक्तत्वेन क्लृप्तस्य धातोरेवानुभवार्थकत्वमुपसर्गस्य द्योतकत्वमित्यस्यापि वक्तुं शक्यत्वात् । विशिष्टार्थः='अनुभू' इति समुदायार्थः । गौरवादिति—विशिष्टानुपूर्व्याः शक्तावच्छेदकत्वे विनिगमनाविरहादव्यवहितोत्तरत्वसम्बन्धेनानुविशिष्टभूशब्दस्याव्यवहितपूर्वत्वसम्बन्धेन भूशब्दविशिष्टस्यानोर्वा वाचकत्वकल्पने च गौरवादित्यर्थः । विशिष्टस्य प्रकृतित्वाभावेन तदर्थे प्रत्ययार्थान्वयानापत्तिरपि दोषो बोध्यः । तथाचेति—धातोरुपसर्गस्य विशिष्टस्य च वाचकत्वासम्भवे चेत्यर्थः । विद्यमानत्वादीति— आदिना 'यागात् स्वर्गो भवति' इत्यत्रोत्पत्तेः संग्रहः । धातोर्विद्यमानत्ववाचकत्वविशेषणं हेतुगर्भितम्, यतो धातोर्विद्यमानत्ववाची, अतस्तस्य शक्यसम्बन्धरूपा लक्षणा सम्भवति । प्रादयस्तु न कस्याप्यर्थस्य वाचका इति शक्यसम्बन्धरूपा लक्षणा तत्र न सम्भवतीति भावः ।

नन्वेवमुपसर्गस्य तात्पर्यग्राहकत्वसिद्धावपि न द्योतकत्वसिद्धिरत आह—तथाच तात्पर्य्येति । नन्वेवं प्रादीनां द्योतकत्वे तेषां पृथगर्थाभावेन क्रियायोगाभावादुपसर्गत्वानापत्तिरिति चेन्न, यत्र यस्य फलस्य धात्वर्थव्यापारविशेषणतया प्रतीतिर्यत्प्रादिगम्या तत्र तादृशार्थबोधकाः प्रादयः उपसर्गसंज्ञका इत्यर्थस्यैव क्रियायोग इत्यादिना विवक्षितत्वात् । तच्चेति—निरुक्तद्योतकत्वञ्चेत्यर्थः । द्योतकत्वसिद्धये युक्त्यन्तरमाह—स्वयमिति ।

दर्पणव्याख्या

नन्वनुभवार्थकत्वेऽपि तस्य फलस्थानीयत्वेन तदन्वयिव्यापारसामान्यार्थकान्वादेर्न धातुत्वानुपपत्तिरत आह—*अनुगच्छतीत्यादाविति* अत्रानोरनुभवार्थकत्वे तदनुरोधेन गमेरपि व्यापारसामान्यार्थकताया एवाभ्युपेयतया तथा प्रतीतिर्दुर्वारा स्यादित्यर्थः ।

वस्तुतस्तु संयोगावरुद्धव्यापारेऽन्वर्थानुभवस्य बाधेनान्वयासम्भवान्नानोरनुभवार्थकत्वसम्भावनेति भावः । * गौरवादिति * विशिष्टानुपूर्व्याः शक्तावच्छेदकत्वे गौरवादित्यर्थः । * तथाचेति * धातूपसर्गविशिष्टानां प्रत्येकं प्रतीयमानानुभवार्थप्रतिपादकत्वासम्भवादिति समुदितार्थः । विद्यमानत्वादीत्यादिनोत्पत्तिर्गृह्यते । लक्षणेत्यस्यानुभवादिरूपेऽर्थे इति शेषः । लक्षणाकल्पिकायास्तात्पर्य्यानुपपत्तेस्तात्पर्य्यग्रहाधीनतया तस्य चोपसर्गसमभिव्याहाराद्यायत्तत्वादित्यर्थः ।

नन्वेतावतोपसर्गस्य तात्पर्य्यग्राहकत्वमेव समायातम्, न द्योतकत्वमत आह—* तथाचेति * तात्पर्य्यग्राहकत्वमेवेत्येवकारेण द्योतकत्वस्य वृत्त्यन्तरत्वव्यवच्छेदः । अनुभवादिफले धातोस्तात्पर्य्यग्राहकत्वस्योपसर्गसमभिव्याहाराधीनत्वात् "उपसर्गाः क्रियायोगे" (पा० सू० १ । ४ । ५९) इत्यत्रापि क्रियाविशेषणीभूतार्थतात्पर्य्यग्राहकत्वमेवोपसर्गाः क्रियायोगे इत्यनेन विवक्षितमिति भावः । एतत्तत्त्वमग्रे वक्ष्यते । * तत्रेति * द्योतकत्व इत्यर्थः । सकर्मकत्वस्येत्यनापत्तेरित्यनेनान्वितम् ।

Sri Gargeshwari Digital Foundation

नाद्यः, तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्यास्धातोरुपासनारूपफलवाचकत्वाभावादनापत्तेस्ततः कर्म्मणि लकारो न स्यात्। न द्वितीयः, गौरवात्। तृतीये त्वागतं द्योतकत्वम्, तात्पर्य्यग्राहकत्वलाभादिति भावः। 'दृश्यते' इत्यत्र 'कर्मणि' इति शेषः ॥ ४२ ॥

तच्चादिष्वपि तुल्यमित्याह—

तथान्यत्र निपातेऽपि लकारः कर्मवाचकः।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः ॥ ४३ ॥

अन्यत्र = 'साक्षात्क्रियते,' 'अलङ्क्रियते,' ऊरीक्रियते शिवः,' इत्यादौ। अत्रापि धातोस्तत्तदर्थे

प्रभा

तथा सति=उपासनाया उपसर्गवाच्यत्वे सति। स्वार्थेति—नच फले स्वार्थत्वविशेषणं मास्तु, तथाचोपासनाया उपसर्गार्थत्वेऽपि उपासनारूपफलव्यधिकरणव्यापारवाचकतया धातोः सकर्मकत्वं निर्बाधमेवेति वाच्यम्, यत्किञ्चित्फलव्यधिकरणव्यापारवाचकत्वस्याकर्मकधातावपि सत्त्वेनातिव्याप्तिवारणाय फले स्वार्थत्वनिवेशस्यावश्यकत्वात्। अन्यथा विक्लित्त्यादिरूपफलव्यधिकरणव्यापारवाचकतया शीङादेरप्यकर्मकत्वानापत्तेः। सकर्मकत्वस्येति—अस्य 'अनापत्तेः' इति वक्ष्यमाणेनान्वयः। ततः=आस्धातोः। न स्यादिति—'लः कर्मणि' इत्यनेन सकर्मकेभ्य एव कर्मणि विधानात्। द्वितीय इति—विशिष्टार्थ इत्यर्थः। गौरवादिति—इदमुपलक्षणम्—भ्वादिगणे विशिष्टस्य पाठाभावेन धातुत्वानापत्तेः। नच 'उपास्यते' इत्यादिशिष्टप्रयोगदर्शनाद् भ्वादौ पाठः कल्प्यते इति वाच्यम्, एवमपि विशिष्टेऽङ्द्विर्वचनादिव्यवस्थानुपपत्तेः। उक्तञ्च वाक्यपदीये—

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥

इति। इदं दूषणमनुभवतीत्यादावपि बोध्यम्। ननु भावे लकारेऽपि 'उपास्यते' इति स्यादित्यत आह—तृतीये=धातुमात्रार्थकत्वपक्षे। आगतमिति—उपशब्दासमभिव्याहारे धातुमात्रेण तादृशार्थाप्रतीतेरुपशब्दस्य तादृशार्थतात्पर्यग्राहकत्वं कल्पनीयमित्यागतं द्योतकत्वमित्यर्थः। दृश्यते इति—भावे लकारे 'हरिहरौ दृश्येते' इति प्रयोगानुपपत्तेः ॥ ४२ ॥

तच्चेति—द्योतकत्वञ्चेत्यर्थः। तथा=प्रादिवत्। अन्यत्र=चादिरूपे निपाते समभिव्याहृते। वाचक इति—अस्य 'दृश्यते' इति शेषः। अत्रापि=लक्ष्येष्वपि। तत्तदर्थे इति—साक्षात्पूर्वकधातोः इन्द्रियसन्निकर्षनिष्ठप्रयोजकतानिरूपितप्रयोज्यतावद्विषयताशालिप्रत्यक्षानुकूलव्यापारनिरूपितम्। अलम्पूर्वककधातोः शोभानुकूलव्यापारविशेषनिरूपितम्। ऊरीपूर्वककधातोः स्वीकृत्यनुकूलव्यापारनिरूपितञ्च वाचकत्वमित्यर्थः।

दर्पणव्याख्या

ननु मास्तु सकर्मकत्वमत आह—* तत इति *। उपोपसृष्टास्धातोरित्यर्थः। तथाचोपास्यते हरिरित्यादिप्रयोगानुपपत्तिरिति भावः। *तृतीये त्विति* धातुमात्रार्थ इति कल्पे त्वित्यर्थः। *आगतमिति* कर्तृकान्तम्। उपाद्यसमभिव्याहारे विना शक्तिं गम्धातोस्तादृशबोधादर्शनात्तस्येतरार्थपरतायामुपसर्गस्य नियामकत्वलाभादिति भावः ॥ ४२ ॥
* तच्चादिष्विति * तत्=द्योतकत्वम्। * तत्तदर्थेति * तत्तदर्थबोधकत्वमित्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवत् द्योतकत्वममीषामपीत्यर्थः । यद्यपि कृधातोः सकर्म्मकत्वमस्त्येव, तथाप्येष्वर्थेषु सकर्मकता न स्यात् । अन्यथा 'वायुर्विकुरुते' 'सैन्धवा विकुर्वते' इत्यत्रापि स्यादिति भावः ।

अथोपासना–साक्षात्कारादिर्निपातार्थोऽस्तु, "साक्षात्प्रत्यक्षतुल्ययोः" इति कोशस्वरसात् । तदनुकूलो व्यापार एव धात्वर्थोऽस्तु । स्व-स्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवत्त्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधकमिति चेन्न, नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवेन निपातधात्वर्थयोरन्वयासम्भवात् । अन्यथा 'तण्डुलः पचति' इत्यत्रापि कर्मतया

प्रभा

धातोस्तत्तदर्थे लक्षणायान्तु 'वाचकत्वम्' इत्यस्य बोधकत्वमर्थः । शक्तत्वे तु यथाश्रुतमेव साधु । अमीषाम्=चादीनाम् । ननु भ्वाद्यकर्मकधातुरिव कृधातुर्नाकर्मकः, किन्तु सकर्मक एव । तथाच न कर्मणि लकारानुपपत्तिरत आह—यद्यपीति । एष्वर्थेषु=साक्षात्कारादिष्वर्थेषु । अन्यथा=यत्र कुत्रचित्सकर्मकत्वस्य दर्शनेन सर्वत्र सकर्मकत्वस्वीकारे । इत्यत्रापि स्यादिति—'करोति घटम्' इत्यत्र कृधातोः सकर्मकत्वस्य दृष्टतया 'विकुर्वते सैन्धवाः' इत्यत्रापि सकर्मकत्वापत्तिः । नचेष्टापत्तिः, तदर्थे 'सैन्धवैर्विक्रियते' इति भावे प्रत्ययानुपपत्तेः । किञ्च 'साक्षात्क्रियते गुरुः' इत्यत्र गुरोर्लकारेणाभिधानं न स्यात्, साक्षात्कारस्य निपातवाच्यत्वेन गुरोर्धात्वर्थफलाश्रयत्वाभावात् । कोशस्वरसादिति--यद्यप्येतेन कोशेनोपशब्दस्योपासनार्थकत्वं न सिध्यति, तथापि निपातान्तराणां तथात्वदर्शनेन 'अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति' इति निरुक्ते निपातशब्दार्थनिर्वचनेन चोपशब्दस्यापि तदर्थत्वं कल्प्यते इति भावः । कृधातोर्व्यापारमात्रवाचित्वे गुर्वादीनां धात्वर्थफलाश्रयत्वाभावात् कर्मत्वं न स्यादित्याशङ्कामपाकरोति—स्व-स्वयुक्तेति—स्व-(धातुः) श्च स्व (धातु) युक्तनिपातश्चेति स्वस्वयुक्तनिपातौ तयोरन्यतरस्यार्थभूतं यत्फलं तद्व्यधिकरणव्यापारवाचकत्वमित्यर्थः । अत्र 'वाचित्वम्' इत्येव लिखितपुस्तकेषु पाठः । नतु व्यापारवत्त्वमिति । दृष्टान्तेति--'उपास्येते हरिहरौ' इति दृष्टान्तः । दृष्टान्तमर्हतीति दार्ष्टान्तिकम् 'साक्षात्क्रियते' इत्यादिः । नेदं साधकमिति—इदम्='साक्षात्क्रियते' इत्यादिस्थले गुर्वादेः कर्मणो लकारेणाभिधानम् । साधकम्=धातोर्विशिष्टार्थकत्वस्य निपातानां द्योतकत्वस्य च साधकम्=उपपादकं नेत्यर्थः । साक्षादिति—विभक्त्यर्थकर्मत्वाद्यन्वयद्वारा त्वन्वयो भवत्येवेत्यर्थः । विभक्त्यर्थकर्मत्वादिसम्बन्धेनैवान्वये तु भेदेनेत्यस्य विभक्तिवाच्यभिन्नभेदसम्बन्धेनेत्यर्थः । अन्वयासम्भवेनेति—साक्षात्काररूपं फलं निपातार्थः, व्यापारमात्रं कृधात्वर्थः । फलस्यानुकूलत्वरूपभेदसम्बन्धेन व्यापारेऽन्वयेन

दर्पणव्याख्या

* अमीषामिति * चादिनिपातानामपीत्यर्थः । * अस्त्येवेति * 'घटः क्रियते' इत्यादौ कर्मणि लकारदर्शनात् कृञः न सकर्मकत्वानुपपत्त्या साक्षात्कारे लक्षणेति भावः । * एष्विति * साक्षात्कारादिरूपार्थेष्वित्यर्थः । * अन्यथेति * क्वचिदर्थान्तरमादाय कृञः सकर्मकस्य सर्वत्र तत्त्वाङ्गीकारे इत्यर्थः ।

* वायुर्विकुरुत इति * विकारानुकूलव्यापारवाचकस्यापि सकर्मकतापत्त्या "अकर्मकाच्च" (पा० सू० १।३।३५) इति विहितात्मनेपदानुपपत्तिरिति भावः । उपास्यते गुरुरित्यादावुपाद्युपसर्गाणामुपासनाद्यर्थवाचकत्वेऽपि पूर्वोक्तसकर्मकत्वानुपपत्तिं परिहरति—*अथेति* । *इदमिति* सकर्मकत्वानुपपत्तिरूपमित्यर्थः । *साधकम्*=द्योतकत्वसाधकम् ।

तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति । किञ्च प्रादीनां वाचकत्वे 'भूयान् प्रकर्षः' 'कीदृशो निश्चयः' इतिवत् 'भूयान् प्रः' 'कीदृशो निः' इत्यपि स्यात् । अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इत्यतो द्योतकता तेषां स्यादिति । साधकान्तरमभिप्रेत्याह—विशेषणेति । 'शोभनः समुच्चयो द्रष्टव्यः' इतिवत् 'शोभनश्च द्रष्टव्यः' इत्यस्यापत्तेस्तुल्यसमाधेयत्वादिति भावः ।

अपिच निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भवः । अन्यथा 'राजा पुरुषः' इत्यस्य 'राजसम्बन्धी पुरुषः' इत्यर्थापत्तेरित्यभिप्रेत्याह—आदीति—'धवखदिरयोः

प्रभा

साक्षात्कारानुकूलो व्यापार इति बोधो न स्यात्, नामार्थधात्वर्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादिति भावः । अन्यथा=नामार्थस्य भेदसम्बन्धेन धात्वर्थेऽन्वयस्वीकारे । नच कर्मत्वेनान्वये द्वितीयाऽऽपत्तिः, कर्मत्वस्यात्राकाङ्क्षाभास्यत्वेन प्रत्ययवाच्यत्वविवक्षायामेव द्वितीयादिविधानात्तदप्राप्तेः । ननु 'नामार्थधात्वर्थयोः' इति व्युत्पत्तौ निपातेतरनाम्नो ग्रहणेनादोष इत्यत आह—किञ्चेति । इत्यपि स्यादिति—अभ्युपगमवादेनैतत् । वस्तुतस्तु—चादिनिपातानां समुच्चये नित्यसाकाङ्क्षतया शब्दशक्तिस्वभावात् समुच्चयार्थकपदं विना प्रयोगासम्भवः । तदन्वय इति—भूयः पदार्थस्य प्रशब्दार्थे, कीदृशपदार्थस्य निश्शब्दार्थेऽन्वय इत्यर्थः । साधकेति—अस्य निपातानां द्योतकत्वे इति शेषः । तुल्येति—तुल्येन=प्रादितुल्येन निरर्थकत्वहेतुना समाधातुं शक्यत्वादित्यर्थः । 'विष्णुमुपासते' इत्यादावुपाद्यर्थे कर्मत्वान्वयासम्भवात् तेषामपि द्योतकत्वमेवेति भावः । यदि तु निपातानां वाचकत्वे 'चार्थे द्वन्द्वः' इति सूत्रं मानमित्युच्यते, तदा ममापि 'ईषद्दुः सुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति सूत्रं प्रादीनां वाचकत्वे मानत्वेन गृहाण । षष्ठ्यादिकमिति—आदिना द्वितीयादेः संग्रहः । एवञ्च 'अभेदातिरिक्तसम्बन्धावच्छिन्नप्रातिपदिकार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति विशेष्यतासम्बन्धेन विभक्तिजन्योपस्थितिः कारणम्' इति कार्यकारणभावस्यावश्यकतया 'धवश्च खदिरश्च' इत्यत्र तदभावेन धवादेश्चार्थसमुच्चयेऽन्वयासम्भवः । अन्यथा=षष्ठ्यादिकं विनापि नामार्थयोर्भेदसम्बन्धेनान्वयस्वीकारे । आपत्तेरिति—अत्र 'राज्ञः पुरुषः' इतिवद् 'राजा पुरुषः' इति लिखितपुस्तके पाठः । स्वत्वसम्बन्धेन राजप्रकारकपुरुषविशेष्यकबोधापत्तेरिति भावः । आदीतीति—'विशेषणाद्ययोगोऽपि' इति कारिकांशे आदि-

दर्पणव्याख्या

व्युत्पत्तौ निपातातिरिक्तत्वविशेषणान्नेयमापत्तिरत आह—* किञ्चेति * । * इत्यपि स्यादिति * अभ्युच्चयवादोऽयं चाद्युपस्थाप्यसमुच्चयस्य नित्यं समुच्चेयसाकाङ्क्षतया समुच्चयार्थकपदप्रयोगं विना चादिप्रयोगासम्भवात् । शब्दशक्तिस्वाभाव्येन नित्यं धातुपरतन्त्रोपसर्गैः स्वार्थस्य धात्वर्थविशेषणतयैव बोधनेन तदसमभिव्याहारे तत्प्रयोगस्याप्यसम्भवात् । अत एव वक्ष्यति—* तुल्यसमाधेयत्वादिति * ।

ननु निपातानां वाचकत्वे "चार्थे द्वन्द्वः" (पा० सू० २।२।२९) इत्यादिसूत्रमेव मानम् । प्रादीनां वाचकत्वे तु मानानुपलम्भाद् द्योतकतैवोचितेति चेत्, तत् किम् 'ईषद्दुः सुषु कृच्छ्राकृच्छ्रार्थेषु खल्" (पा० सू० ३।३।१२६) इत्यादिसूत्रात्मकं मानं पाणिपिहितमिति विभावय । षष्ठ्यादिकमित्यादिपदेन तदर्थविहितद्वितीयादिपरिग्रहः । अभेदातिरिक्तसम्बन्धावच्छिन्नप्रातिपदिकार्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दत्वावच्छिन्नं प्रति विशेष्यतया विभक्तिजन्योपस्थितेर्हेतुतया प्रकृते तदभावेन भेदान्वयासम्भव इत्यर्थः । *अन्यथा*=उक्तकार्यकारणभावानभ्युपगमे । *आपत्तेरिति* । भेदेनान्वयबोधापत्तेरित्यर्थः । *आदीति* भेदान्वयसङ्ग्राहकमादिपदमित्यर्थः ॥ ४३ ॥

Gurgaon Digital Foundation

समुच्चयः' इतिवत् 'धवस्य च खदिरस्य च' इत्येव स्यादिति भावः ॥ ४३ ॥

ननु प्रातिपदिकार्थयोर्भेदान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याह—

पदार्थः सदृशान्वेति विभागेन कदापि न।
निपातेतरसङ्कोचे प्रमाणं किं विभावय ॥ ४४ ॥

सदृशा=सदृशेन, समानाधिकरणेनेति यावत्। अन्वेति, अभेदेनेति शेषः। विभागेन=असदृशेन, असमानाधिकरणेनेति यावत्।

प्रभा

पदेन भेदसम्बन्धेन नामार्थयोरन्वयापत्तेः सङ्ग्रहः, तदाह—धवस्य चेति। इत्येवेति—ननु 'धवश्च खदिरश्च' स्यादिति भावः ॥ ४३ ॥

प्रातिपदिकार्थयोर्भेदेति—ननु प्रातिपदिकार्थयोर्भेदेनान्वयस्य काप्यदृष्टत्वादिदमसङ्गतमिति चेन्न, 'भेदेन' इत्यस्य भेदघटितपरम्परासम्बन्धेनेत्यर्थात्। तथाच विभक्त्यर्थान्वयद्वारैव प्रातिपदिकार्थेन समं प्रातिपदिकार्थान्वयो भवतीति नियमो निपातातिरिक्तविषयक एव। 'प्रातिपदिकार्थनिष्ठभेदघटितपरम्परासम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधम्प्रति निपातेतरपदजन्योपस्थितिः कारणम्' इति धवस्य च इति न स्यादित्यत आह—सदृशेति। ननु 'सदृशा' इत्याबन्तस्यात्रानन्वयोऽत आह—सदृशेनेति—तथाच तृतीयान्तम्, नतु 'वाचा' 'निशा' इत्यादिवदाबन्तम्। यत्किञ्चिद्रूपेण सादृश्यस्य व्यधिकरणेऽपि सम्भवादाह—समानाधिकरणेनेति—स्ववाचकशब्दसमानाधिकरणशब्दवाच्येनेत्यर्थः। अथवा स्वनिष्ठपदार्थतावच्छेदकसमानाधिकरणपदार्थतावच्छेदकाधिकरणेन, तादात्म्यसम्बन्धेन सम्बन्धिना वा। ईदृशपदार्थयोरभेदसम्बन्धेनान्वयः स्यादित्याशयेनाह—अभेदेनेति। ननु समानविभक्तिकपदोपस्थाप्यत्वेन सादृश्याभावेऽपि 'मृदु पचति' इत्यादावन्वयो दृश्यते इत्यसदृशेन नान्वेतीत्यनुपपन्नमत आह—असमानाधिकरणेनेति—स्वनिष्ठपदार्थतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगिपदार्थतावच्छेदकाधिकरणेन कदाचन नान्वेतीत्यर्थः। अयम्भावः—अभेदसम्बन्धेन प्रातिपदिकार्थप्रकारकबोधम्प्रति विरुद्धविभक्त्यनवरुद्धप्रातिपदिकधात्वन्यतरजन्योपस्थितेर्हेतुताऽवश्यं वाच्या। अत एव 'राज्ञः पुरुषः' इत्यत्राभेदान्वयबोधो न। तथाच

दर्पणव्याख्या

भेदान्वयेति। 'प्रातिपदिकार्थयोरभेदान्वयः' इति पाठस्तु तादृशान्वयबोधे विभक्तिजन्योपस्थितेर्हेतुत्वस्य केनाऽप्यनभ्युपगमादप्रक्रान्तत्वाच्च चिन्त्यः। *निपातातिरिक्तेति*। तथाच समुच्चयाद्यर्थस्य निपातार्थत्वेन न तेन साकं पदार्थान्तरस्य भेदान्वयानुपपत्तिरित्यर्थः। सदृक्शब्दस्य समाना दृगितिव्युत्पन्नस्योपादानेऽनन्वयापत्त्या प्रकृते तुल्यरूढस्य, "तमिवेमं पश्यन्ति जनाः" इति भाष्ये कर्तृकर्मव्युत्पन्नस्य वा तस्य ग्रहणमित्यभिप्रेत्य व्याचष्टे—*सदृशेनेति* तुल्येनेत्यर्थः।

ननु विरुद्धविभक्तिकस्यापि नामत्वादिना तुल्यत्वात् तेनाभेदेनान्वयापत्तिरत आह—*समानाधिकरणेनेति* तथाच समानविभक्तिकपदोपस्थाप्यत्वेन सादृश्यस्य विवक्षणान्नोक्तदोष इति भावः। एवञ्च मूलेऽन्वेतीत्यन्तरमभेदेनेतीति शेषः। 'स्तोकम्पचति' इत्यादौ विभिन्नविभक्तिकपदोपस्थाप्यत्वादसदृशेनाप्यभेदान्वयादाह—*असमानाधिकरणेनेति* विशेषवाचकपदप्रकृतिकविभक्तिविरुद्धार्थकविभक्तिप्रकृत्युपस्थाप्येनेत्यर्थः।

Sri Gargeshwari Digital Foundation

अयमर्थः—समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावः, गौरवञ्च। अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः। अत एव 'घटो नास्ति' इत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः ॥ ४४ ॥

प्रभा

'घटश्च' इत्यादावाप्यभेदान्वयबोधापत्तिः स्यादिति। ननु 'नामार्थयोरभेदान्वयः' इति व्युत्पत्तौ निपातातिरिक्तत्वविशेषणदानेनादोष इत्यत आह—मानाभाव इति। ननु 'कीदृशो निः' इत्यादिप्रयोगापत्तिरेव मानमित्यत आह—गौरवञ्चेति। ननु निपातातिरिक्तत्वेनासंकोचे तवापीदं दूषणमत आह—अस्माकमिति। अन्वय एवेति—पृथगुपस्थितयोरेव संसर्गस्यान्वयरूपत्वादिति भावः। नायं दोष इति—'धवस्य च' 'खदिरस्य च' इति दोषो नास्तीत्यर्थः, व्युत्पत्तेः पृथगुपस्थितिविषयत्वात्। प्रकृते च धवादिपदेनैव धवसमुच्चयस्योपस्थापनादुक्तव्युत्पत्तेरविषयत्वम्। अत एव=निपातातिरिक्तत्वेन संकोचाभावादेव। लाक्षणिकमिति—'घटो न' इत्यत्र समानविभक्तिकत्वेऽपि घटाभेदस्याभावे बाधाद् घटपदस्य घटप्रतियोगिके लक्षणया 'घटप्रतियोगिकाभिन्नोऽभावः' इत्यभेदान्वय उपपद्यते। सङ्कोचे तु उक्तव्युत्पत्तेरविषयतया घटस्य प्रतियोगितानिरूपकत्वरूपभेदसम्बन्धेनापि नञर्थाभावेऽन्वयसम्भवाल्लक्षणाप्रयासो व्यर्थ एव स्यादिति भावः। नैयायिका इति—प्राञ्च इति शेषः। नव्यास्तु—'घटो न पटः' 'चैत्रो न पचति' 'चैत्र इव मैत्रः' 'पुत्रेण सहागतः' इत्यादौ भेदसम्बन्धेन नामार्थयोरन्वयबोधः क्लृप्त एव। आद्ये घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन घटस्य भेदे

दर्पणव्याख्या

ननु वाचकतावादिनोक्तव्युत्पत्तेर्निपातातिरिक्तत्वेन सङ्कोचनीयेत्युक्त्यैवाक्षेपबीज्ये मूले समानाधिकरणेत्यादिव्युत्पत्तिकथनेऽर्थान्तरमत आह—*अयमर्थ इति* स चेत्थम्—"विभागेन कदाचन" इत्यनेन व्यधिकरणयोरभेदान्वयं व्यवच्छिन्दता नामार्थयोर्भेदेनान्वय इति व्युत्पत्तिरेव प्राधान्येन प्रदर्श्यते, ननु समानाधिकरणयोरिति व्युत्पत्त्यन्तरं तथा। किं तु दृष्टान्तविधया तदुपन्यसनमिति नोक्तदोषः।

तथाच प्रधानीभूतव्युत्पत्तावेव निपातेतरसङ्कोचोत्कीर्तनमिति सर्वं सुस्थम्।

ननु नामार्थयोरभेदान्वयबोधे समानविभक्तिकपदजन्योपस्थितिहेतुतायां पदांशे निपातातिरिक्तत्वं निवेशनीयमिति नोक्तदोष इत्यवतरणं तु सम्प्रतीचीनम्। नच तादृशव्युत्पत्तेरप्रक्रान्तत्वात् कथमेतदिति वाच्यम्, मूलोक्तादिपदेनैव षष्ठ्यादिकमन्तरेण भेदेनान्वयासम्भवं प्रतिपादयता समानविभक्तित्वेन धवश्चेत्यादावभेदान्वयापादानस्यापि कुक्षीकृतत्वात्तदेव च सामानाधिकरण्यं व्युत्पत्तौ निविष्टमिति यथाकृतमूलसङ्गमनादिति।

ननु तदन्वयानुपपत्तिरेव मानमत आह—*गौरवञ्चेति*। ननु तवापीदं दूषणं समानमत आह—*अस्माकमिति* द्योतकतावादिनामित्यर्थः। *द्योतकत्वादिति* चादीनां समभिव्याहृतपदसमुचिततत्तदर्थरूपलक्ष्यार्थे तात्पर्यग्राहकत्वादित्यर्थः। *नास्तीति* समुच्चयादेस्तन्निरूपकत्वादेश्च समभिव्याहृतपदेनैव लाभात्तस्य पृथगुपस्थित्यभावेनान्वयस्यैवाभावेनोक्तस्थलस्य तादृशव्युत्पत्त्यविषयत्वादिति भावः। *अत एवेति*। व्युत्पत्तौ निपातातिरिक्तत्वविशेषणप्रवेशादेवेत्यर्थः। *लाक्षणिकमिति*। व्युत्पत्तेस्तद्घटितत्वे तु तत्र लक्षणानुसरणं व्यर्थमेव स्यादिति भावः।

नैयायिकास्तु नञो वाचकताया भाष्यसम्मतत्वात् 'घटो न पटः' 'चैत्रो न पचति' इत्यादौ नञर्थाभावस्य विशेषणतया घटचैत्रादिष्वन्वयानुरोधादुक्तव्युत्पत्तौ व्यभिचारवारणाय निपातातिरिक्तत्वविशेषणमावश्यकम्। एवञ्च घटश्च पटश्चेत्यादौ विभक्तिजन्योपस्थितिं विनाऽपि चार्थस्य घटादिष्वन्वयः सुलभः।

SGDF Sri Gargeshwari Digital Foundation

अपिच निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह—

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ।
इत्यादावन्वयो न स्यात् सुपाञ्च श्रवणं ततः ॥४५॥

अत्रोस्रसदृशैः शरै रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः । अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे सत्येव सङ्गच्छते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः ।

तथाहि—उस्रैरिति करणे तृतीया । नचोस्रोऽत्र करणम् । इवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यम्, अप्रकृत्यर्थत्वात् । इवशब्दस्य चासत्त्वार्थकतया तदुत्तरतृतीयाया

प्रभा

तस्य स्वरूपसम्बन्धेन पटे, द्वितीये आख्यातार्थकृत्यभावस्य स्वरूपसम्बन्धेन चैत्रे, तृतीये चैत्रस्य निरूपितत्वसम्बन्धेन इवार्थसादृश्ये, चतुर्थे पुत्रस्य प्रतियोगितासम्बन्धेन सहार्थसाहित्येऽन्वयः । तथाचैषु भेदेनान्वयसिद्धये नामार्थयोरभेदान्वय इति व्युत्पत्तौ 'निपातेतरत्व' विशेषणं निवेशनीयमेव । यद्वा 'निपातारिक्तनामार्थनिष्ठविषयतानिरूपितनिपातार्थावृत्तिविषयतासम्बन्धेन नामार्थप्रकारकशाब्दबोधं प्रति विशेष्यतासम्बन्धेन विभक्तिजन्योपस्थितिः कारणम्' इति कार्यकारणभावेन दोषं परिजह्रुः ॥ ४४ ॥

ननु अनन्तनामसु समुच्चयादिनिरूपितशक्तिकल्पनापेक्षया परिगणितनिपातेष्वेव शक्तिकल्पनोचितेत्याशङ्कायामाह—अपिचेति—उक्तदोषाणां कथञ्चिद्वारणेऽपि स्थलान्तरे दोषोऽस्त्येवेति भावः । अयञ्चेति—'उस्रसदृशैः शरैः' इत्यादिनोक्तार्थश्चेत्यर्थः । अन्यथा=उस्रादिशब्दानां उस्रादिसदृशे लक्षणाया अस्वीकारे । प्रकृत्यर्थान्वित इति—प्रकृतिनिष्ठवृत्तिविषयार्थान्वितेत्यर्थः । प्रकृते उस्रसदृशानां उस्रपदनिष्ठवृत्त्यविषयतया तृतीयार्थकरणत्वान्वयो न स्यादिति भावः । उस्रैः=किरणैः । अत्र=उदग्देशीयराजोद्धरणक्रियायाम् । इवार्थेति—इवार्थसदृशाभिन्नशराणां करणत्वेऽपि । तस्य=सदृशार्थस्य । अनेन=उस्रपदोत्तरतृतीयारूपप्रत्ययेन । अप्रकृत्यर्थत्वेति—'इवार्थः सदृशः' इति मते तृतीयाप्रकृतिभूतोस्रशब्दार्थत्वाभावादित्यर्थः । ननु इवशब्दोत्तरलुप्यमानतृतीयया स्वप्रकृतीवार्थसदृशस्य करणत्वप्रतीतिः स्यादत आह—असत्त्वार्थेति—लिङ्गसङ्ख्यानन्वितमसत्त्वम् । तथाच 'चादयोऽसत्त्वे' इत्यनेनाव्ययतया अव्ययेषु कारकत्वाभावा-

दर्पणव्याख्या

नच घटो नेत्यत्र घटस्य नामार्थत्वाद्विभक्तिजन्योपस्थितिं विना तत्प्रकारकप्रतियोगितासंसर्गकनञर्थविशेष्यबोधानुपपत्तिर्दुष्परिहरैवेति वाच्यम्, एतद्भियैव घटादिपदानां तत्प्रतियोगिके लक्षणाऽभ्युपगमात् निपातातिरिक्तनामार्थयोः साक्षाद्भेदेनान्वयोऽव्युत्पन्न इत्यत्र द्विवचनस्वारस्येन निपातातिरिक्तनामार्थनिष्ठभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितनिपातार्थावृत्तिविशेष्यतासम्बन्धेन बोधे, विशेष्यतासम्बन्धेन विभक्तिजन्योपस्थितेर्हेतुत्वकल्पनाद्वा सामञ्जस्यादित्याहुः ॥ ४४ ॥

उक्तव्युत्पत्तेर्निपातातिरिक्तविषयत्वेन पूर्वोक्तदोषपरिहारेऽपि स्थलान्तरे तन्मतेऽन्वयानुपपत्तिर्दुर्वारैवेत्याशयेन मूलमवतारयति-*अपिचेति* । *इत्यर्थ इति* इत्यन्वयबोधः सर्वसम्मत इत्यर्थः । *अयञ्चेति* उक्तार्थान्वयबोधश्चेत्यर्थः । *अन्यथेति* निपातानां वाचकत्वाभ्युपगम इत्यर्थः । व्युत्पत्तिविरोधं व्यक्तीकरोति—(* अत्र *=उदीचोद्धरणे) *तथाहीत्यादि* ।

नन्विवशब्दोत्तर ६ ततृतीयार्थकरण एवेवार्थान्वयः सुलभोऽत आह—*इवशब्दस्येति* । *असत्त्वार्थकतयेति*।

असम्भवात्। सम्भवे वा श्रवणप्रसङ्गात्, उस्रपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह—सुपाञ्चेति। सुपां श्रवणञ्चेत्यर्थः। चकारादुस्रपदोत्तरतृतीयाऽनन्वयः समुच्चीयते।

इत्यादावित्यादिपदात्। "वागर्थाविव सम्पृक्तौ" "पार्वतीपरमेश्वरौ वन्दे" इत्यत्र वागर्थयोर्वदिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वयः। इवार्थस्य कर्मत्वान्वयबोधासम्भवश्च संगृह्यते।

यदि च विशेषणविभक्तिरभेदार्था, साधुत्वमात्रार्था वा तदाऽपि इवशब्दस्य वाचकत्वेऽनन्वय एव। उस्रसदृशशराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात्।

प्रभा

त्करणत्वाभावेन करणतृतीयाया असम्भवादित्यर्थः। नचैवं 'स्वयं कृतम्' इत्यादिषु करणत्वेनान्वयदर्शनादिदमसङ्गतम्, तत्र करणत्वस्य स्वयमित्यव्ययार्थत्वेनादोषात्। नन्वत्रापि करणत्वमिवार्थः, तेन सम्बन्धेनोद्धरणे अन्वयोऽस्तु, अत एव 'दीधितौ' 'पृथिव्यामेव गन्धः' इत्यत्र एवशब्दोत्तरलुप्तपञ्चम्या समवायसम्बन्धावच्छिन्नाधेयत्वस्य व्यवच्छेदेऽन्वयेन 'पृथिवीसमवेतः पृथिव्यन्यसमवेतत्वाभाववान् गन्धः' इति बोधो दर्शितः। तथैव इवशब्दस्यापि करणार्थकत्वेन तदुत्तरतृतीयया तद्बोधेन नानुपपत्तिरत आह—सम्भवे वेति—अत्र वाशब्दोऽनादरपरः। कारणत्वव्याप्यधर्मेणैवार्थसदृशस्योपस्थितेः केनाप्यनभ्युपगमात्। कारणत्वेनेवार्थस्यान्वयं स्वीकृत्य सत्त्वार्थकत्वाभ्युपगमे तु निपातत्वाभावेनाव्ययत्वाभावाल्लुगप्राप्त्या तृतीयायाः श्रवणप्रसङ्ग इत्याह—श्रवणेति। अनन्वयप्रसङ्गादिति—इवशब्दस्य वाचकतावादिनये उस्रस्य निरूपितत्वसम्बन्धेन सादृश्ये एवान्वयेन तृतीयार्थकरणत्वस्य तत्र बाधादन्वयो न स्यादिति भावः। इदमुपलक्षणमुस्रे करणत्वाभावेन तृतीयाया अनुत्पत्तेः। ननु इवशब्दस्य सत्त्वार्थकत्वेऽपि स्वरादिपाठेनाव्ययतया सुपो लुक् सिद्ध्येदित्यत आह—कारिकायां श्रवणञ्चेति—चशब्दो भिन्नक्रमः सुपां श्रवणञ्चेति। तथाच चशब्दो दोषान्तरसमुच्चायकः। समुच्चेयमाह—चकारादिति। वदिकर्मत्वाभावादिति—वागर्थयोः सादृश्यरूपे इवार्थे एवान्वये द्वितीयार्थकर्मत्वस्यानन्वयः, द्वितीयाया अनुत्पत्तिश्चेति भावः। साधुत्वमात्रेति—'न केवला प्रकृतिः प्रयोक्तव्या' इति न्यायेन क्रियमाणा विभक्तिर्विशेष्यवाचकप्रकृतिकविभक्तिसजातीयैव विभक्तिः कर्तुमुचिता। अन्यथा अभेदान्वयबोधो न स्यात्, अभेदान्वयबोधे विरुद्धविभक्तिराहित्यादेः कारणत्वात्। उस्रसदृशशराणमिति—त्रिपदो द्वन्द्वः। समानाधिकरणपदेति—'उस्रैः' 'इव' 'शरैः' इति विरुद्धविभक्तिरहितपदैरुपस्थापितत्वेनाभेदान्वय एव स्यान्नतु भेदान्वय इति भावः। भेदेनान्वयेति—उस्रपदार्थस्य प्रतियोगित्वसम्बन्धेन

दर्पणव्याख्या

लिङ्गाद्यनन्वय्यर्थकतयेत्यर्थः। निपातत्वादिति यावत्। एवञ्च कारकानन्वयितावच्छेदकरूपेणोपस्थितेऽर्थे नैराकाङ्क्ष्यात् कारकान्वयासम्भवेन तदर्थकतृतीयाया असम्भवादिति भावः। *सम्भवे वेति*। वाकारोऽनास्थायाम्। अव्यये वशब्दस्य क्वाप्यदृष्टत्वात्तदभ्युपगमे तु ततो विभक्तेस्तच्छ्रवणस्य च दुर्निवार्यतैव स्यादिति दूषणान्तरमाह—*उस्रपदोत्तरेति*।*अनन्वयप्रसङ्गादिति* वाचकतावादिमत इति शेषः।

इदमुपलक्षणम्, तृतीयाऽनुपपत्तेः। उस्रस्येवार्थसदृशान्वये उद्धरणकरणत्वस्य तत्राभावात्। अस्मन्मते तूस्रसदृशरूपोस्रार्थस्य करणत्वान्न तदनुपपत्तिरिति भावः। तदुत्तरं सुब्व्यतिरिक्तप्रत्ययश्रवणत्वापाद्यत्वासम्भवेन समुच्चेयासम्भवमाशङ्क्य चकारस्यान्यत्रापकर्ष इत्याह—*सुपां श्रवणञ्चेति*। चकारसमुच्चयं दर्शयति—*उस्रपदोत्तरतृतीयेति*। तृतीयायास्तदर्थस्य अनन्वयमेव स्पष्टयति—*उस्रसदृशेत्यादि*—तत्तत्पदार्थानामित्यर्थः। * भेदेनान्वयेति * सामानाधिकरण्यं नामार्थयोरित्युक्तव्युत्पत्तेरिति भावः।

Sri Gargeshwari Digital Foundation

बाधादभेदेनापि न सः । नह्युस्राभिन्नसदृशाभिन्नः शर इत्यर्थो द्रष्टव्यः ॥ ४५ ॥

प्रभा

सदृशपदार्थैकदेशे सादृश्ये, सादृश्यस्य च स्वनिष्ठानुयोगितासम्बन्धेनान्वयो बाधित इत्यर्थः । तथाच 'घनश्यामः' इत्यादौ घनपदं स्वसदृशे लाक्षणिकम् । अत एवोत्तरपदार्थेऽभेदेनान्वयात् कर्मधारयसमास-पुंवद्भावौ सिद्धौ । नच घनपदस्य सदृशपरत्वे सदृशस्योपमेयत्वेनोपमानवाचकत्वानुपपत्तिः, स्वतन्त्रप्रयोगमादाय भूतपूर्वगत्या उपमानवाचकत्वव्यवहारात्, सदृशपरत्वेऽपि विशेषणीभूतघनमादाय तथात्वाच्च । द्योत्यस्यापि सदृशस्यानुभववशाद् विशेष्यतया भानम् । उस्राभिन्नेति—उस्राभिन्नः सदृशः उस्र एवेति तस्य शरे, शरः उस्रो नेति भेदसत्त्वादभेदान्वयोऽपि बाधित एवेति भावः । इवशब्दस्य द्योतकत्वे तु उस्रप्रतियोगिकसादृश्यविशिष्टाभिन्नः शर इति बोधः । परे तु केषाञ्चिन्निपातानां द्योतकत्वम् । अत एव नेत्यनेनाभावबोधः, कस्याभाव इत्याकाङ्क्षा च सङ्गच्छते । अत एव 'आनो दिवः पर्वतादा' इत्यादौ 'आ' इत्यस्यावागित्यर्थेन दिग्योगलक्षणा पञ्चमीति निरुक्ते उक्तम् । किञ्च द्योत्यस्य विशेषणत्वमेव । अत एव 'स्त्रियाम्' इति सूत्रे वाचकतापक्षे स्त्रीत्वस्य प्राधान्यमाशङ्क्य द्योत्यत्वेन समाहितं भाष्ये । 'हेतुमति च' इत्यत्रापि भाष्ये प्रकृत्यर्थविशेषणाय णिचो द्योतकत्वमुक्तम् । हरिणाप्युक्तम्—

निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः ॥

इति । अत एव 'चतुष्टयी शब्दानां प्रवृत्तिः, नामाख्यातोपसर्गनिपाताः' इति भाष्ये उक्तम् । एवञ्च द्योत्यार्थस्य विशेषणत्वनियमेन 'उस्रसदृशैः शरैः' इति बोधोऽपि न युक्तः । किञ्च 'सदृशपरत्वे उपमानवाचकत्वाभावात्' 'उपमानानि सामान्यवचनैः' (२ । १ । ५४) इति समासानुपपत्तिः । विग्रहेऽपि सदृशपरत्वेन भूतपूर्वगत्याऽपि न निर्वाहः । 'घनेन तुल्यम्' इति तु न विग्रहः, 'मृगीव चपला' इत्यर्थे मृगचपला इत्यादौ पुंवत्त्वानापत्तेः । केवलघनादिशब्दप्रयोगे 'घनः' इत्यादावुपमानवाचकत्वस्य दुर्वचतयाऽपि भूतपूर्वगतिरयुक्तैव । किञ्च 'घनश्यामः' इत्यादौ श्यामस्यौपमेयेऽन्वयेनोपमेयमात्रवाचकतयोपमानोपमेययोः साधारणधर्मवाचकत्वानुपपत्तिः । अत एव भाष्ये उक्तम्—'यदि शस्त्रीव श्यामा देवदत्ता' इति विग्रहस्तदा 'शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यात् । अयं भावः—श्यामापदार्थस्य देवदत्तायामेवान्वयेन शस्त्र्यां श्यामत्वं न प्रतीयेत, इति तत्र 'श्यामा' इत्यध्याहारेण योजनीयं स्यादिति । यदि यथा शस्त्री श्यामा तद्वद्देवदत्तेति विग्रहस्तदा देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यात्' इति । एवम् 'तस्यामेवोभयं वर्तते' इति भाष्ये सिद्धान्तितम् । तस्यामेव=उपमेयायां देवदत्तायामेव । उभयम्=पूर्वपदमुत्तरपदञ्च । सादृश्यमूलकाभेदाध्यवसायादुपमान-

दर्पणव्याख्या

ननु तर्ह्यभेदान्वयस्तत्र स्यादत आह—*बाधादिति* सादृश्यस्य भेदघटितत्वादिति भावः । अत्रेदं बोध्यम्—वाचकतावादिना इवादिना सादृश्यादिबोधने पर्युदासनञिचानुयोगिप्रतियोगिवाचकपदयोः समानविभक्तिकत्वस्य—

लिङ्गसङ्ख्याविभेदेऽप्यस्त्युपमानोपमेयता ।
विभक्तिः पुनरेकैवमुपमानोपमेययोः ॥

इति अनुशासनसिद्धाया नियामकताया अभ्युपगमेन प्रकृते उस्रनिरूपितसादृश्याश्रयशरकरणकोद्धरणबोधः सूपपादः । भेदाभेदयोर्विकल्पस्योपन्यासस्तु सारकारोक्तश्चिन्त्य एवेति ॥ ४५ ॥

SGDF

ननु त्वन्मते 'अब्राह्मणः' इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः, पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात् । उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादित्यत आह—

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः ॥ ४६ ॥

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव । तमेवार्थमादायार्थवत्त्वात् प्रातिपदिकत्वमित्यर्थः ।

वस्तुतः "अव्ययादाप् सुपः" (पा० सू० २ । ४ । ८२) इति ज्ञापकात् सुबुत्पत्तिः ।

प्रभा

वाचकस्याप्युपमेयपरत्वम् । साधारणधर्मत्वनिर्वाहाय तन्त्रादिना उभयत्र सम्बन्धः । तदुक्तं कैयटे 'एवञ्चोपमेये श्रुतः कथमुपमानं न संस्पर्क्ष्यति' इति । भाष्येऽपि 'श्यामत्वस्योभयत्र भावादुभयगुणवाचकत्वाच्च श्यामशब्दस्य सामान्यवचनत्वम्' इति । एवञ्च 'घनश्यामः' इत्यनेन उपमानश्यामघनाभिन्नः श्यामो देवदत्त इति बोधः । समासे तु एकार्थीभावात्तथाबोधः । नचैवं 'पुरुषो व्याघ्र इव शूरः' इत्यत्राप्युभयत्र सम्बन्धाद् विशेषणस्यापि सविशेषणत्वेन सविशेषणानां वृत्तिर्नेति समासाप्राप्त्या 'सामान्याप्रयोगे' इत्यस्य वैयर्थ्यम् । साधारणधर्मवत्त्वेनेतरसापेक्षत्वरूपोपमानत्वस्य साधारणधर्मांशे नित्यसापेक्षत्वेनादोषात् , सामान्याप्रयोगे ग्रहणाज्ज्ञापकात्सापेक्षत्वेऽपि समासस्वीकाराच्च अत एव 'राजपुरुषो धनी सुन्दरश्च' इत्यादि सिध्यति । तथाच सापेक्षत्वराहित्यं न समासप्रयोजकम् , किन्तु गमकत्वमेव तादृशार्थविषयकबोधजनकत्वमेव । शब्दशक्तिस्वभावात्क्वचिदेव गमकत्वमिति 'ऋद्धस्य राजपुरुषः' इत्यत्र गमकत्वाभावात् समासासाधुत्वम् । त्वन्मते=द्योतकत्ववादिमते । 'अब्राह्मणः' इत्यत्र उत्तरपदस्यैवारोपितब्राह्मणत्ववदर्थकतयाऽन्यपदार्थनिरूपितविशेष्यताया उत्तरपदार्थेऽभावेन तादृशव्यवहारानुपपत्तिरिति भावः । उपसर्गस्येति—द्योतकमात्रस्योपलक्षणमिदम् । अर्थवत्त्वाभावेनेति—उपसर्गाणां द्योतकत्वादिति भावः । द्योत्यार्थमिति—इतरपदार्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनकत्वमुत्तरपदार्थप्रधानत्वम् । तत्रेतरपदार्थपदेन वाच्य–लक्ष्य–द्योत्यात्मकस्त्रिविधोऽपि अर्थो गृह्यते । प्रकृते 'अब्राह्मणः' इत्यादावारोपितरूपद्योत्यार्थे प्रकारतायाः सत्त्वान्न दोष इति भावः । प्रातिपदिकत्वमिति – द्योतकत्वं व्यञ्जनैवेति वृत्त्याऽर्थविषयकबोधजनकत्वरूपार्थवत्त्वस्य द्योतकेऽपि सत्त्वात्प्रातिपदिकत्वमक्षतमेवेति भावः । व्यञ्जनारूपवृत्त्यन्तरस्यास्वीकारेऽप्याह—वस्तुतस्त्विति । ज्ञापकादिति—

दर्पणव्याख्या

उत्तरपदार्थप्राधान्याभावादिति प्राधान्यस्यान्यनिरूपितत्वनियमात् । *द्योत्यार्थमिति* द्योतकतावृत्त्युपस्थापितार्थमित्यर्थः *तमेवेति* । द्योत्यमेवेत्यर्थः । *अर्थवत्त्वादिति* अयं भावः—द्योतकताया अपि वृत्तित्वेन तयाऽर्थवत्त्वस्य द्योतकेऽप्यक्षतत्वान्न तन्निबन्धनप्रातिपदिकसंज्ञानुपपत्तिः । नहि शक्तिलक्षणान्यतरदेवार्थोपस्थापकमिति वचनमस्तीति ।

ननु शब्दादुपस्थितसामान्यस्य विशेषे पर्यवस्थापकत्वं द्योतकत्वम्, ननु तदुपस्थापकत्वमेवेति न तदादायार्थवत्त्वसम्भवोऽत आह—*वस्तुतस्त्विति* । *ज्ञापकादिति* द्योतकतावादे तेषामनर्थकत्वादेव सुबभावे लुग्विधानमनर्थकं सदुक्तार्थे ज्ञापकमिति भावः ।

SGDF Sri Gargeshwari Digital Foundation

"निपातस्यानर्थकस्य" इति वार्तिकाद्वा प्रातिपदिकत्वम्। "कृत्तद्धितसमासाश्च" (पा० सू० १।२।४६) इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति वा बोध्यम्। तस्माद् युक्तं निपातानां द्योतकत्वम्। उक्तञ्चाकृत्यधिकरणवार्त्तिके—

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः॥
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
यदर्थद्योतकौ तौ तु वाचकः स विचार्य्यते॥ इति॥
उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते।

प्रभा

द्योतकतावादे उपसर्गाणां वृत्त्याऽर्थविषयकबोधजनकत्वाभावेऽपि ध्वंसरूपस्य लुकः प्रतियोगिपूर्वकत्वेन प्रतियोग्यन्यथानुपपत्त्या तत्कारणतावच्छेदकस्य प्रातिपदिकत्वस्यानुमितिः स्यादिति भावः। अनुमितिप्रयोगश्च—'द्योतकाः प्रातिपदिकत्ववन्तः, लुक्प्रतियोगिपरत्वविशिष्टस्य सुपोऽवधित्वेन शास्त्राश्रितत्वात्, वार्य्यादिवत्' इति। ननु निपातभिन्नेषु स्वराद्यव्ययेषु वृत्त्याऽर्थबोधकत्वेन प्रातिपदिकत्वात् 'अव्ययादाप्सुपः' इति सूत्रं लुग्विधानाय चरितार्थमत आह—निपातस्यानर्थकस्येति—सूत्रेणैव सिद्धे वार्तिकमपि मास्त्वित्याह—चकारेणेति—इदमुपलक्षणम्—'अधिपरी अनर्थकौ' इति सूत्रस्यापि। तथाहि—क्रियायोगाभावाद् गत्युपसर्गसंज्ञाया अप्राप्त्या तद्बाधनार्थम् 'अधिपरी अनर्थकौ' इति सूत्रं व्यर्थं सन्निपातानामर्थवत्त्वप्रयुक्तं कार्यं ज्ञापयति तेन प्रातिपदिकत्वं स्यादिति भावः। अत एव येषां द्योत्योऽप्यर्थो नास्ति तेषाम् 'तु' 'ह' 'स्म' 'वै' इत्यादीनां प्रातिपदिकत्वं सिध्यति। उपसंहरति—तस्मादिति। स्वीयसिद्धान्ते मीमांसकसम्मतिमाह—उक्तञ्चेति। चतुर्विधे=नामाख्यातोपसर्गनिपातरूपे। नाम=सुबन्तम्। आख्यातम्=तिङन्तम्। द्विविधस्य=नामाख्यातरूपस्य। संशयानुत्पत्तौ हेतुमाह—तयोरिति—आनर्थक्याद्विचाराविषयता। वाचकस्य नाम्नो जातौ शक्तिर्व्यक्तौ वा, धातोः फले व्यापारे, उभयत्र वा शक्तिरिति विचारोऽपेक्ष्यते इति भावः। तौ=उपसर्गनिपातौ। सः=नामाख्यातात्मकः शब्दः। अन्यः=उपात्तार्थातिरिक्तः।

दर्पणव्याख्या

ननु स्वरादीनां सत्त्ववचनानामपि सत्त्वात्तद्धितसुब्लुग्विधानेन चरितार्थस्य तस्य न ज्ञापकत्वमत आह—*निपातस्येति*। तद्वार्त्तिकप्रत्याख्याने त्वाह—कृत्तद्धितेति*। *संग्रह इति* अनर्थकस्यापि निपातस्य प्रातिपदिकत्वमित्यर्थः। उपसंहरति—*तस्मादिति*। एतत्कल्पे मीमांसकसम्मतिमाह—*उक्तञ्चेति*। *चतुर्विध इति* नामाख्यातोपसर्गनिपातभेदेन चतुःप्रकार इत्यर्थः। *पदे*—सुप्तिङन्तरूपे। *द्विविधस्य*=नामाख्यातस्वरूपस्य। अर्थनिरूपणे हेतुमाह—* संशयोत्पत्तेरिति *। नामार्थो जातिः, किं वा व्यक्तिः। धात्वर्थो व्यापार उत फलम्, किं वोभयमिति सन्देहे तन्निरूपणस्यौचित्यादिति भावः। * तयोः *—निपातोपसर्गयोः। * व्यापारः *—शक्तिलक्षणान्यतररूपः। * तौ *—उपसर्गनिपातौ। *यदर्थद्योतकौ*—यदर्थविषयकतात्पर्यग्रहजनकौ। *सः*—नामाख्यातात्मकः शब्दः। तस्य च तिङ्कृत्तद्धितघटितत्वात्तदर्थोऽपि विचार्य्यत इत्यर्थः।

यद्यपि स्वाद्यन्तत्वनिबन्धनं नामत्वमुपसर्गनिपातयोरपीति तयोः पार्थक्येन निर्देशोऽनुचितः। तथापि लिङ्गसङ्ख्या-

SGDF Sri Gargeshwari Digital Foundation

प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ॥

अत्रोपसर्गपदं निपातोपलक्षणम् । धातुपदं पदान्तरस्येति बोध्यम् ॥ ४६ ॥

नन्वन्वयव्यतिरेकाभ्यां निपातानां तत्तदर्थवाचकत्वमेव युक्तम्, बोधकतारूपशक्तेरबाधात् । किञ्चोक्तरीत्या 'पचति' इत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणाऽस्तु तात्पर्य्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह—

प्रभा

ननु 'उपसर्गेण' इति वृद्धोक्तावुपसर्गमात्रस्योपादानं विरुद्धमित्यत आह—अत्रोपसर्गेति । लिखितपुस्तकेषु 'वृद्धोक्तावुपसर्गपदम्' इति पाठः । धातुपदमिति—कारिकायां 'धात्वर्थः' इत्यत्रोपात्तं धातुपदमित्यर्थः । नन्वधिकरणवार्तिके उपसर्गनिपातयोरपि सुबन्तत्वात् सुबन्तबोधकनाम्नः पृथग्ग्रहणं व्यर्थमिति चेन्न, लिङ्गाद्यन्वय्यर्थप्रतिपादकं हि नामेत्यभिप्रायेण पृथगुपादानात् । उपसर्गाणां निपातत्वेऽपि पृथगुपादानं गोबलीवर्दन्यायेन । ननु सामान्यविशेषवाचिनां द्वन्द्वस्य भाष्याद्यसम्मततया गोत्वस्य बलीवर्देऽपि सत्त्वेन गोबलीवर्देति द्वन्द्वोऽसङ्गत इति चेन्न, गवा सहितो बलीवर्द इत्यर्थकत्वेनादोषात् । पदान्तरस्य='चन्द्र इव मुखं दृश्यते' इत्यादौ चन्द्रादिपदस्य ॥ ४६ ॥

द्योतकतापक्षं समर्थ्य वाचकत्वपक्षं समर्थयते—नन्विति । 'चन्द्र इव मुखं दृश्यते' इत्यादाविवादिसमभिव्याहारे तेषामर्थाः प्रतीयन्ते, तदभावे तु न इत्येवमन्वयव्यतिरेकाभ्यामित्यर्थः । निपाता वाचकाः, स्वसमभिव्याहारप्रयोज्यार्थप्रतीतिकत्वात् । ननु पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकत्वं हेतावपेक्ष्यतेऽनर्थकनिपाते निपातत्वस्य सत्त्वाद्धेतोश्चासत्त्वात्, पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावरूपभागासिद्धिरिति चेन्न, पक्षतावच्छेदकसामानाधिकरण्येनैवानुमितेरिष्टत्वात्, तत्र च भागासिद्धेरदोषात् । ननु निपातेषु ईश्वरेच्छारूपशक्तौ मानाभाव इत्यत आह—बोधकतेति—तथाच बोधकत्वरूपशक्तावनुभव एव प्रमाणमिति भावः । नन्वन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपपन्नावित्यत आह—किञ्चेति—'प्रजयति' इत्यत्र प्रकर्षविशिष्टो जयो जिधातोरेवार्थः । प्रादीनान्तु तात्पर्यग्राहकतयोपयोग इत्युक्तरीत्येत्यर्थः । यदि त्वन्वयव्यतिरेकाभ्यां तिङां वाचकत्वमभिमतं तर्हि ताभ्यामेव निपातानामपि वाचकत्वमभ्युपेयमिति भावः । तिङादेरिति—आदिना कृताम्, सनादेश्च संग्रहः ।

दर्पणव्याख्या

निष्ठप्रकारतानिरूपितविशेष्यताशाल्यर्थकत्वरूपपारिभाषिकनामत्वमादाय तथोक्तम् । उपसर्गाणां निपातत्वेऽपि तदुपादानन्तु 'ब्राह्मणवसिष्ठ' न्यायेनेति बोध्यम् । ननु 'उपसर्गेण धात्वर्थः' इत्यत्र निपातत्वव्याप्योपसर्गत्वेन प्रादीनामुपादानात् कथं तच्चादीनां द्योतकत्वे उपष्टम्भकमत आह—*उपसर्गपदमिति* । *पदान्तरेति*'—चन्द्र इव मुखम्' इत्यादावर्थवत्त्वेन चन्द्रादिनामोपलक्षकमित्यर्थः । एवञ्च न तद्वलान्निपातानां वाचकत्वमिति भ्रमितव्यमिति भावः ॥ ४६ ॥

इदानीं वाचकतापक्षं परिष्करोति—*नन्विति* । *अन्वयव्यतिरेकाभ्यामिति* । चन्द्र इव मुखम्' इत्यादाविवादिनिपातसत्त्वे सादृश्याद्यर्थप्रतीतेस्तदसत्त्वे तदप्रतीतेश्च निपातानां घटादिपदवद्वाचकत्वमेव युक्तमित्यर्थः । नन्विच्छादिरूपशक्तेरभावात् कथं तेषां वाचकत्वमत आह—*बोधकतारूपेति* तथाच तदर्थबोधकत्वमेव तद्वाचकत्वमिति तेषामपि घटादिपदवद्वाचकत्वमेवेत्यर्थः ।

नन्वन्वयव्यतिरेकयोस्तदर्थतात्पर्य्यग्रहे उपयोगस्य प्रागभिहितत्वान्न तयोर्वाचकताप्रयोजकत्वमत आह—*किञ्चेति* । *उक्तरीत्येति* अनन्यलभ्यस्यैव शब्दार्थतया 'प्रजयति' इत्यादौ प्रकृष्टजयस्य लक्षणया जिधातोरेवोपस्थितौ न प्रादीनां प्रकर्षाद्यर्थकत्वम्, तेषां तात्पर्य्यग्राहकतयैवोपयोगादित्युक्तरीत्येत्यर्थः । *तिङादेः स्यादिति* तत्रान्वयव्यतिरेकाभ्यां

प्रभा

नच कृतां द्योतकत्वे सर्वानुभवविरुद्धं तदर्थस्य विशेषणत्वं स्यादिति वाच्यम्, अनुभवानुरोधात् 'सत्त्वप्रधानानि नामानि' इति निरुक्तवचनाच्च द्योत्यस्यापि कृदर्थस्य विशेषणत्वमित्याशयात्। एवं सत्तादावपि बोध्यम्। परेतु—सुप्तिङां द्योतकत्वमिष्टमेव। अत एव 'पञ्चकं नामार्थः' 'पञ्चकं धात्वर्थः' इति प्रवादोऽप्युपपद्यते। अत एव 'पच' 'अजर्घाः' 'अचकात्' इत्यादौ तिङोऽभावेऽपि कर्त्राद्यर्थप्रतीतिः। लुप्तविभक्तिस्मरणाद् बोध इति तु न युक्तम्, 'प्रत्ययलोपे' इति सूत्रस्य प्रत्ययनिमित्तककार्यमात्रफलकत्वं वदता भाष्यकृता तत्पक्षस्य तिरस्कृतत्वध्वननात्। अत एव कर्त्राद्यर्थानां विशेषणत्वम्, धात्वर्थस्य विशेष्यत्वञ्च सङ्गच्छते। यत्र तद्धितादौ प्रत्ययस्य वाचकता तत्र तदर्थस्य विशेष्यताया दृष्टत्वाच्च। नच वाचकताबोधकस्य 'लः कर्मणि च' इत्यादिसूत्रस्य विरोधः, कर्तृकर्मविषयाद्धातोर्ल इत्येवं व्याख्यानेनादोषात्। अत एव 'भावे' इत्यनेन सारूप्यम्। तत्र धातुनैव भावस्योक्ततया भावार्थविषये वर्तमानाद् धातोरित्यर्थस्यैवौचित्यात्। नच यत्र कर्तृकर्मणोः प्रतीतिस्तत्रापि भावे प्रत्ययापत्तिरिति वाच्यम्, सकर्मकेभ्यः कर्मणीति विशेषानुवादेन विहितत्वाद् भावे लकारानभ्युपगमात्। पञ्चकस्य धात्वर्थत्वादेव 'भावकर्मणोः' 'शेषात्कर्तरि' 'द्व्येकयोः' इत्यादीनां नियमार्थत्वपरं भाष्यमुपपद्यते इत्याहुः,

तन्न, यत्र धातोर्न श्रवणम्, किन्तु प्रत्ययमात्रस्यैव 'व्यतिसे' इत्यादौ तत्रापि कर्त्राद्यर्थप्रतीत्या तिङां द्योतकत्वासम्भवात्। तत्र यदि धातुस्मरणेन कर्त्रादिप्रतीतिश्चेत्तर्हि यत्र प्रत्ययस्य लोपे धातुमात्रस्य श्रवणं तत्र लुप्तविभक्तिस्मरणेन कर्त्रादिप्रतीतिर्वाच्येति तुल्ययोगक्षेमत्वात्तिङां वाचकत्वसिद्धेर्निष्प्रत्यूहत्वात्। अत एव स्वोत्तरतिङ्वाच्यकर्त्राद्यर्थगतद्वित्वारोपेण द्विवचनादीनि द्योतकत्ववादिनस्तवोक्तिः सङ्गच्छते। नच कर्त्रादेस्तिङ्वाच्यत्वे 'प्रकृतिप्रत्ययौ' इति न्यायेन प्राधान्यापत्तिः, 'भावप्रधानमाख्यातम्' इत्यनेनौत्सर्गिकस्य तस्य बाधात्। अपिच 'प्रविश' इत्यत्र यथा श्रूयमाणस्य प्रविशेत्यस्य गृहं प्रविशेत्यर्थे शक्तिस्तथा 'अजर्घाः' 'अचकात्' इत्यादौ प्रत्ययलोपेऽपि श्रयमाणस्य कर्त्रादिविशिष्टे शक्तिरस्तु, वाक्यैकदेशन्यायात्। यथा 'प्रविश' इत्यस्य गृहं ग्रामं सभां वा प्रविशेत्यर्थेऽपि 'प्रविश' इत्यस्य न त्रिलिङ्गवाचकत्वम्, तथा ब्रुविधातुमात्रात्कर्त्राद्यर्थस्य प्रतीतावपि धातुर्न तेषां वाचकः, अपि तु प्रत्यय एवेति न तन्मते दोषसम्भावनाऽपि, इति दिक्।

दर्पणव्याख्या

कर्त्रादिवाचकत्वावधारणे तु प्रादीनामपि वाचकत्वविधृतिरिति भावः। परे तु "अजर्घाः" "अचकात्" इत्यादौ धातुमात्रात् कर्त्रादिबोधेन तिङां द्योतकत्वे इष्टैवापत्तिः।

नच तत्र लुप्तविभक्तिस्मरणाद् बोधः। लोपमजानतोऽपि बोधात् प्रत्ययलक्षणस्य लोपफलत्वं वदता भाष्यकृता लुप्तविभक्तिस्मरणाद् बोधस्यानभ्युपगमाच्च। यत्र प्रत्ययस्य वाचकता तत्रैव प्रकृतिप्रत्ययार्थयोः, इति नियमावकाशः। यथा—'पाचकः' इत्यादिकृदन्ते। "लः कर्मणि" (पा० सू० ३।४।६९) इत्यादौ कर्मकर्तृविषयाद्धातोरित्यर्थान्न तद्विरोधः, "भावे" इत्यस्य सर्वैस्तथैव व्याख्यानात्।

नच सर्वत्रैव धातोर्भावनाविषयत्वात्तत्रैव लकारः स्यादिति शङ्क्यम्, 'भावविषयात्' इत्यस्य केवलक्रियामात्रबोधकादित्यर्थेनादोषात्। अत एव "भावकर्मणोः" (पा० सू० १।३।१३) "शेषात् कर्त्तरि परस्मैपदम्" (पा० सू० १।३।७९) 'द्व्येकयोर्द्वि,, (पा० सू० १।४।२२) इत्यादीनां नियम इति भाष्यकृदुक्तिसङ्गतिः। तेषामनिर्दिष्टार्थत्वेन "अनिर्दिष्टार्थाः स्वार्थं भवन्ति" इति न्यायेन सर्वत्र सिद्धत्वादित्याहुः।

[illegible]ञ्चिन्त्यम्, 'व्यतिसे' इत्यादौ धातुं विनापि कर्तृबोधेनाद्ययुक्तेः शैथिल्यात्, तुल्ययुक्त्या सुपामपि द्योतकतापत्ते-

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा नतु तद्युक्तं परेषां मतमेव नः ॥ ४७ ॥

एवञ्च 'धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्नः' इति निपातातिरिक्तविषयः। समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इत्यपि तथेत्यगत्या कल्पनीयमिति भावः। नत्विति—नैयायिकोक्तं प्रादि—चादयोर्वैषम्यमित्यर्थः।

यत्तु—सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसम्भवात् "निपातस्यानर्थकस्य" इति विधिवैयर्थ्यम्।

प्रभा

अन्वयव्यतिरेकयोरिति—अस्य 'सतोः' इति शेषः। अन्वयव्यतिरेकयोः सतोर्निपातानां वाचकत्वं युक्तं वा=युक्तमेव। वाशब्द एवार्थे। तत्=प्रादिचाद्योर्वैषम्यं नतु युक्तम्। परेषां यन्मतं तदेव नः=अस्माकं वैयाकरणानाम्। वाचकत्वं द्योतकत्वं वा। परन्तु वैषम्यं नतु युक्तम्, अर्द्धजरतीयस्यानौचित्यादिति भावः। एवञ्च=निपातानां वाचकत्वे च। तथा=निपातातिरिक्तविषयः। इतरे दोषाः प्रागुद्धृता एव। सकर्मकत्वं स्वस्वयुक्तनिपातान्यतरार्थेत्यादिपूर्वोक्तं बोध्यम्। प्रत्ययानां प्रकृतिसमभिव्याहृतनिपातप्रकृत्यन्यतरार्थान्वितस्वार्थबोधकत्वं वाच्यम्। अत एव 'प्रतिष्ठते' इत्यत्रोपसर्गस्य गतिवाचकत्वेऽपि न क्षतिः। उपसर्गस्य फलमात्रवाचकत्वं धातोर्व्यापारवाचित्वमिति स्वीकारे तु प्रत्ययार्थस्य प्रकृत्यर्थे एवान्वयात् पूर्वव्युत्पत्तौ अन्यतरार्थेति निवेशस्य नावश्यकत्वम्। एवं नामार्थप्रकारकभेदसंसर्गकबोधं प्रति प्रत्ययनिपातान्यतरजन्योपस्थितेः कारणत्वं वाच्यम्। नच गौरवम्, उक्तरीत्या वाचकत्वे स्थिते गौरवस्यागत्या सोढव्यत्वात्। अत एव 'न' इत्येतन्मात्रेणाभावविषयको बोधः, पदान्तरसमभिव्याहाराभावेन द्योतकत्वासम्भवात्। ननु सकलनिपातानां वाचकत्वे केवलानामपि प्रयोगापत्तिरिति चेन्न, गत्युपसर्गयोः 'ते प्राग्धातोः' इति नियमेन केषाञ्चित् केवलप्रकृतिप्रत्ययवदुपपत्त्या केवलानां प्रयोगाभावात्। नेत्यादीनां केषाञ्चित्तथात्वस्येष्टत्वाच्च। तदुक्तं हरिणा—

प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते।
समुच्चयाभिधानेऽपि व्यतिरेको न विद्यते॥

दर्पणव्याख्या

द्वीतोर्द्विवचनाद्यनुपपत्तेश्च, प्रत्ययलक्षणस्य लोपफलत्वेऽपि लुप्तविभक्तिस्मरणजन्यबोधस्य फलत्वाभ्युपगमे बाधकाभावाच्च। स्वोत्तरतिङ्वाच्यकर्त्रादिगतद्वित्वारोपेण द्विवचनादिरिति स्वोक्तिविरोधाच्च।

भवदुक्तरीत्यैव कर्तृविशिष्टभावनावाचकात्, कर्मविशिष्टभावनावाचकात्, केवलभावनावाचकाच्च धातोर्लकारा भवन्तीत्यर्थे लः कर्मणीत्यर्थपर्य्यवसानेन 'अनिर्दिष्टार्थाः' इति न्यायेनापि तत्तत्कारकादिविशिष्टभावनार्थकानां तिङां सर्वत्र सिद्ध्यसम्भवेन नियमस्यान्यथैव सङ्गमनीयत्वादित्यन्यत्र विस्तरः।

ननु निपातानां वाचकत्वे 'घटो न पटः' इत्यादौ घटादेः प्रतियोगितया नञर्थाभावे तस्य चाऽश्रयतया घटादावन्वयोऽनुपपन्नः। भेदसम्बन्धेन प्रातिपदिकार्थप्रकारकबोधे विशेष्यतया प्रत्ययजन्योपस्थितेर्हेतुतायाम् "नामार्थयोर्भेदेनान्वयः" इति व्युत्पत्तिसिद्धत्वात्, एवं "समानाधिकरणनामार्थयोः" इति व्युत्पत्तेरभेदान्वयापत्तिश्चेत्यत आह—*[illegible]न्वेति*।

* विधिवैयर्थ्यमिति * तादृशवार्त्तिकेन प्रातिपदिकसंज्ञाविधानवैयर्थ्यमित्यर्थः।

Sri Gargeshwari Prakashan Foundation

सर्वेषां द्योतकत्वे "चानर्थकस्य" इति व्यर्थम्। तथाच केचिद् द्योतकाः, केचिद्वाचका इत्यभ्युपेयमिति, तन्न, एवं हि 'चादयो द्योतका प्रादयो वाचकाः' इति वैपरीत्यावारणात्। सर्वथानर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्त्तिकारम्भस्य कैयटादौ स्पष्टत्वात्, तस्य प्रत्याख्यातत्वाच्च।

'परेषाम्' इति बहुवचनं मीमांसकसंग्रहाय। केवलवृत्तशब्दात् समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचकः, न द्योतकः। किञ्च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या, चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितम्, तदपि न युक्तमिति भावः।

तथाहि—अन्वयव्यतिरेकौ तात्पर्य्यग्राहकत्वेनाप्युपयुक्तौ। घटादिपदानामेव समुच्चिते लक्षणा, तात्पर्य्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनाऽपि। अस्माकं लक्षणाग्रहदशायां बोधात्तत्तत्कार्य्यकारणभाव आवश्यकः। एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम्।

प्रभा

इति। 'शोभनः समुच्चयः' इतिवत् 'शोभनश्च' इत्यस्य, 'घटस्य समुच्चयः' इतिवत् 'घटस्य च' इत्यस्य चापत्तिस्तु न, शब्दशक्तिस्वभावेन नित्यपरतन्त्रतया इतरविशेषणत्वेनैव स्वार्थोपस्थापकत्वात्, षष्ठ्यर्थसम्बन्धबोधम्प्रति, भेदेनान्वयबोधम्प्रति च चादिनिपातेतरजन्योपस्थितेरेव हेतुत्वाच्च। व्यर्थमिति—द्योतकत्वपक्षे सर्वेषामेव निपातानामनर्थकतया व्यावर्त्यालाभादिति भावः। प्रत्याख्यातत्वादिति—'अधिपरी अनर्थकौ' इत्यस्यानर्थकस्यापि निपातस्यार्थवत्कृतं कार्यं भवतीत्यर्थे व्यापकतामाश्रित्य प्रत्याख्यातत्वादित्यर्थः। मीमांसकेति—मीमांसकानां भाष्यकारादिभेदेन नानात्वाद् बहुवचनमिति भावः। शक्तिद्वयेति—घटादेर्निपातानाञ्च पृथक्शक्तिद्वयकल्पनाऽपीत्यर्थः। अस्माकम्=वाचकत्वद्योतकत्वोभयस्वीकर्तॄणाम्। तत्तत्कार्यकारणभावः=समुच्चितघटादिविषयकबोधम्प्रति घटादिपदनिष्ठलक्षणाज्ञानत्वेन कार्यकारणभावः। शक्तिग्रहस्यापीति—यथा घटादिविषयकशाब्दबोधम्प्रति घटादिपदनिष्ठशक्तिज्ञानत्वेन हेतुत्वम्, तथा समुच्चितविषयकशाब्दबोधे समुच्चितविषयकशक्तिज्ञानत्वेन कारणत्वमित्यनुभवानुरोधेन सममेवेति भावः।

दर्पणव्याख्या

(* अनर्थकस्येति *) *व्यर्थमिति* व्यभिचाराभावेन तस्य विशेषणत्वायोगादिति भावः। *प्रत्याख्यातत्वादि "कृत्तद्धित" (पा० सू० १। २। ४६) इत्यत्र चशब्देनैव तदर्थस्य समुच्चितत्वादिति भावः।

वक्ष्यमाणास्वरसादाह—*किञ्चेति* प्रकरणादिवदित्यनेन द्योतकताया वृत्तित्वाभावो ध्वन्यते। *अस्माकमिति* पक्षद्वयाभ्युपगन्तॄणामित्यर्थः। * कार्य्यकारणभाव इति * समुच्चितघटादिशाब्दबोधे घटपदनिरूपितलक्षणाज्ञानत्वेन हेतुतेत्याकारक इत्यर्थः। * शक्तिग्रहस्यापीति * घटाद्यर्थबोधे घटशक्तिज्ञानस्य, समुच्चयादिबोधे तच्छक्तिज्ञानस्य हेतुतेत्याकारकः कार्य्यकारभावोऽप्यावश्यक इत्यर्थः।

* कल्प्यान्तराभावेनेति * द्योतकतापक्षे वाचकतापक्षेऽपि तत्तत्पक्षकसाधिककल्पनीयाभावेनेत्यर्थः।

SGDF

अत एव । "स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा" ।

इति वाक्यपदीयं सङ्गच्छते । दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह—'मतमेव नः' इति ॥ ४७ ॥

पर्य्यवसितमुपसंहरन्नाह—

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्ततायास्त्ववच्छेदकमिष्यते ॥ ४८ ॥

परेषां यन्निपातत्वम्—असत्त्वार्थकत्वे सति चाऽदिगणपठितत्वम्, शक्तिसम्बन्धेन निपातपदवत्त्वञ्च । जातिर्वा,

प्रभा

अत एव=पक्षद्वयेऽपि युक्तेः साम्यादेव । सः=उपसर्गः । द्योतकत्वमेवेति—निपातानामिति शेषः ॥ ४७ ॥

एतावता प्रपञ्चेन पक्षद्वयव्युत्पादनाद् यत्कृतं तद्भानमोहनिवृत्तयेऽवतरणप्रदर्शनव्याजेनाह—पर्य्यवसितमिति फलितमित्यर्थः । परेषाम्=अन्येषां वैयाकरणादीनामित्यर्थः । तत्=निपातत्वम् । अस्माकम्=वैयाकरणानाम् । स्थितिः=मर्यादा । 'चादयोऽसत्त्वे' इति सूत्रार्थानुसारेणाह—सत्त्वार्थकत्व इति—लिङ्गान्वयि सत्त्वम्, विशेष्यतया तद्भिन्नार्थप्रतिपादकमसत्त्वार्थकम् । नचैवं घटादिशब्दस्याप्यसत्त्वार्थकत्वापत्तिः, पुंस्त्वत्वेन पुंस्त्वस्योपस्थापकतया तादृशार्थप्रतिपादकस्य सत्त्वादिति वाच्यम्, विशेष्यतापदेन शाब्दबोधीयमुख्यविशेष्यताया ग्रहणात् । तथाच प्रादीनां चादीनाञ्च सत्त्वार्थकतया निपातत्वमुपपन्नम् ।

ननु 'चादयोऽसत्त्वे' इति सूत्रे 'असत्त्वे' इत्यस्य प्रसज्यप्रतिषेधपक्षे वाक्यद्वयं कल्पनीयम्—'चादयो निपातसंज्ञकाः' इत्यर्थकम्—'चादयः' इत्येकम्, 'सत्त्वेऽर्थे चादयो न निपातसंज्ञकाः' इत्यर्थकम्—'असत्त्वे' इत्यपरम्, इति वाक्यभेदः, प्रतिषेधार्थकनञः क्रियायामन्वयेन सत्त्वेन सहानन्वयादसमर्थसमासः, निषेधेन शास्त्रबाधश्चेति दोषत्रयसत्त्वात्पर्युदास एवाश्रयणीयः । एवञ्च 'असत्त्वे चादयो निपातसंज्ञकाः' इत्यर्थे सर्वथाऽनर्थकेषु चादिषु निपातसंज्ञानापत्तिरत आह—शक्तिसम्बन्धेनेति—नैयायिकानां मते ईश्वरसङ्केतः शक्तिः । वैयाकरणानां बोधकता, तदवच्छेदकोऽखण्डो धर्मविशेषो वा शक्तिः । नन्वेवं शक्यतावच्छेदकं पदमेव, तथाच तेषामानन्त्याद् गौरवमत आह—जातिर्वेति—ननु हत्वादिना साङ्कर्यान्न जातित्वम्,

दर्पणव्याख्या

अत एवेति कल्प्यपक्षद्वये युक्तिसाम्यादेवेत्यर्थः *स वाचक इति* उपसर्ग' प्रक्रम्येदम्, 'प्रतिष्ठते' इत्यत्र "गतिनिवृत्तिवाचकः स्थाधातुः, उपसर्गस्तदभावरूपगतिवाचकः" इति पुञ्जराजेन तदर्थस्य कथनात् । 'वाचकत्वमेव इत्यस्य निपातानामित्यादिः, एवं 'द्योतकत्वमेव' इत्यस्योपसर्गाणामित्यादिः । * मतमेवेतीति * । * वा *=अथवा, अन्वयव्यतिरेकतो निपातानां वाचकत्वं युक्तम् । * नः *=अस्माकं मते परेषां यदेकस्य वाचकत्वमपरस्य द्योतकत्वमिति मतम्, तदेव तु न युक्तमिति मूलयोजना ॥ ४७ ॥

ननु "चादयोऽसत्त्वे" (पा० सू० १ । ४ । ५७) इत्यत्र 'असत्त्वे' इति प्रसज्यप्रतिषेधाश्रयणेऽसमर्थसमासापत्तिः, वाक्यभेदापत्तिश्चेति पर्य्युदास एवाश्रयणीयः । तथाचोक्तलक्षणस्याश्रयणेऽनर्थके तस्मिन्नव्याप्तिः । तावदन्यतमत्वस्य निवेशे तु गौरवमत आह—* शक्तिसम्बन्धेनेति * । तस्य लक्ष्यताऽवच्छेदकमभिप्रेत्याह—* जातिरिति * । निपातपदशक्यतावच्छेदकतया च तत्सिद्धिरिति भावः ।

CC-0. Sri Gargeshwari Digital Foundation

उपाधिर्वा तदेवास्माकमपि । परन्तु सामान्य

प्रभा

स्वसमानाधिकरणत्व—स्वाभावसमानाधिकरणत्व—स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वैतत्त्रितयसम्बन्धेन परस्परविशिष्टत्वरूपसाङ्कर्यस्य सत्त्वात्। साङ्कर्यस्य च जातिबाधकत्वात्। तदुक्तम्—

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥ इति ॥

तथाहि—'ह' इति ।निपाते हशब्दत्वं निपातशब्दत्वञ्चेति हत्वसामानाधिकरण्यम्, निपातचादिशब्दे हत्वाभावसामानाधिकरण्यम्, हन्त्यादिधातुघटकहशब्दे हत्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वमिति। चत्वप्रत्वादिसमानाधिकरणनानानिपातत्वस्वीकारे तु गौरवम्। कार्यतावच्छेदककारणताच्छेदकत्वयोरेव जातिसाधकत्वेन निपातत्वे च तत्त्वाभावेन जातित्वं दुर्वचम्। नच निपातपदशक्यतावच्छेदकतया जातित्वसिद्धिः, तथा सति जातित्व—अभावत्वादीनामपि जातित्वापत्तेः। अत एव गुणत्वस्य कार्यतायाः कारणतायाश्चानवच्छेदकत्वाज्जातित्वं निराकृतं दीधितिकृता। शक्यतावच्छेदकतया जातित्वसिद्धौ तु दीधितिविरोधः स्पष्ट एव। एवञ्च निपातत्वस्य जातित्वे मानाभाव इत्यत आह—उपाधिर्वेति—उपाधित्वञ्च—नित्यत्वे सत्यनेकसम्बद्धत्वम्। क्वचिदुपाधिर्वा जातिर्वेति पाठः। तस्यायमाशयः—साङ्कर्यस्य जातिबाधकत्वासम्भवः। जातिनाशकत्वरूपं जातिबाधकत्वं साङ्कर्ये न सम्भवति, जातेर्नित्यत्वात्। नापि जातित्वाभावसाधकत्वरूपं बाधकत्वम्, प्रमाणाभावात्। ननु अनुमानं प्रमाणम्, तथाहि—भूतत्वं जातित्वाभाववत्, स्वसामानाधिकरण्य—स्वाभावसामानाधिकरण्योभयसम्बन्धेन मूर्तत्वविशिष्टत्वात्, इति चेन्न, तदनुमानं यदि विशेषतस्तदा दृष्टान्ताप्रसिद्धिः। यदि 'उभयसम्बन्धेन जातिविशिष्टं तत्तज्जातित्वाभाववत्, यथा पृथिवीजलसंयोगः' इति सामान्यतस्तदपि न, द्रव्यत्वेऽपि पृथिवीत्वादेः पूर्वोक्तोभयसम्बन्धेन विशिष्टतया तत्र व्यभिचारात्।

दर्पणव्याख्या

ननु हत्वादिना साङ्कर्य्यान्न निपातत्वं जातिः। तथाहि—निपातत्वाभाववति हत्वम्, धात्वादिहकारे हत्वाभाववति निपातत्वम् निपातात्मकचकारे तयोरेकत्र हकारे समावेशात्। तद्दूषकताबीजं तु स्वसामानाधिकरण्य—स्वभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावाप्रतियोगित्वनियमभङ्ग एव। निरुपाधिसहचारग्रहश्च तादृशनियमेऽनुकूलस्तर्कः। अन्यथा तन्मात्रबलप्रवृत्तानां 'सत्तावान् जातेः' इत्याद्यनुमानानां विलयप्रसङ्गात्। अत एव 'भूतत्वं न जातिः' इति साम्प्रदायिका।

हत्वादिव्याप्यनिपातत्वस्य नानात्वाभ्युपगमेन साङ्कर्य्यस्य परिहारेऽपि सकलचादिसाधारण्याभावेनाननुगततया तस्यैवासिद्धिर्निष्प्रमाणत्वात्। किञ्च कार्यतावच्छेदकत्वादीनां जातित्वसाधकानां तत्राभावादपि न सा जातिः। शक्यतावच्छेदकत्वं तु न तत्साधकम्, अभावत्वविभुत्वादीनामपि जातित्वापत्तेः। अत एव गुणदीधितौ गुणत्वस्य जातित्वं दीधितिकृता खण्डितमत आह—* उपाधिर्वेति *। * सामान्ये *=व्यापकधर्मे। इत्यर्थः।

अयं भावः—उपसर्गेषूभयमतेऽपि द्योतकत्वे, वाचकत्वे वा कल्पनीये तन्मिंवृत्तितयोपस्थितोपसर्गत्वनिपातत्वयोरुभयोर्धर्मयोर्मध्ये द्योतकत्वादिकमुपसर्गत्वावच्छेदेन कल्प्यम्, उत निपातत्वावच्छेदेनेति संशये अवच्छेदकनिर्णिनीषायां व्यापकतया निपातत्वावच्छेदेनैव तत् कल्प्यते, सङ्ग्राहकलाघवात्। अत एवेश्वरानुमाने कर्तृजन्यत्वं घटत्वादिनाऽवच्छिद्यते, उत कार्यत्वेन, इत्यवच्छेदकजिज्ञासायामुक्तलाघवात् कार्य्यत्वमेव तदवच्छेदकम्, नतु घटत्वादिकमिति न्यायसिद्धान्त इति।

दर्पणव्याख्या

अत्र वदन्ति—प्रमाणानां सामान्यधर्मस्यावच्छेदकतायां तत्र पक्षपातः, यत्र च बहूनां धर्माणामवच्छेदकत्वकल्पनाप्रयुक्तं गौरवम्। यथा कर्त्तृजन्यत्वानुमाने कृतिजन्यतायां घटत्वाद्यपेक्षया कार्य्यत्वस्य। यत्र तु विशेषोऽप्येक एव तत्रोक्तयुक्तिविरहात् तस्यैवावच्छेदकत्वम्। अत एव व्यापारस्याधिकसंग्राहकत्वेऽपि कृतित्वस्यैवाख्यातशक्यतावच्छेदकत्वं स्वीकृतञ्च मीमांसकैरपि। द्रव्यप्रत्यक्षत्वं विहाय द्रव्यचाक्षुषत्वस्यैव रूपकार्य्यतावच्छेदकत्वम्। प्रकृते व्यापकत्वान्निपातत्वाधिकसंग्राहकत्वेऽपि व्यापकोपसर्गत्वस्याप्येकत्वेन तस्यैवावच्छेदकत्वमुचितम्। निपातत्वस्याद्योतकेऽवाचके पादपूरणमात्रार्थके वृत्तित्वेनातिप्रसक्तत्वात्, प्रादयो द्योतकाः, उपसर्गत्वात्' इत्यनुमानाच्च।

नच प्रादीनां द्योतकता निपातत्वलिङ्गेनैव सेत्स्यतीति वाच्यम्, तस्योपसर्गत्वरूपोपधिमत्तया तदसाधकत्वात्। नच चेष्टादौ साध्याव्यापकत्वान्न तस्योपाधित्वमिति वाच्यम्, शुद्धसाध्याव्यापकत्वसम्भवात्। अस्ति हि निपातत्वावच्छिन्नं द्योतकत्वं यत्र तत्रोपसर्गत्वम्, यत्र निपातत्वं नञादौ तत्र तदभावात्। ननु प्रकर्षाद्यर्थः प्रादिवाच्यः, तदन्वयव्यतिरेकानुविधायिशाब्दधीविषयत्वात्। यो यदन्वयव्यतिरेकानुविधयिशाब्दधीविषयः स तद्वाच्य इति सामान्यव्याप्तौ घटादिदृष्टान्तः।

नचानन्यलभ्यत्वमुपाधिः, तस्य वाच्यत्वरूपसाध्यव्यापकत्वात् कर्त्रादौ आख्यातान्वयव्यतिरेकानुविधायिशाब्दधीविषये साधनाव्यापकत्वादिति वाच्यम्, उक्तहेतुघटकशाब्दबुद्धेराक्षेपाद्यजन्यत्वेन विशेषणेनानन्यलभ्यत्वस्य साधनव्यापकत्वेनोपाधित्वायोगात्।

नच स्वरूपासिद्धिः, धातोरेव प्रकृष्टजयार्थकत्वेनोपसर्गस्य तात्पर्यमात्रग्राहकत्वादिति वाच्यम्, धातोः प्रकृष्टजयार्थकत्वस्य ग्रन्थकृतैव खण्डनात्। नापि लक्ष्यता तस्य, प्रोत्तरत्वादेर्लक्षणतावच्छेदककोटिप्रवेशे गौरवात्। तस्माज्जयत्यादि धातोः शक्यतावच्छेदकम्, प्रकर्षत्वादिकं तूपसर्गस्येति वाच्यम्। तथाच क्व हेत्वसिद्धिः। किञ्चार्थस्य धातुलक्ष्यत्वे जिपूर्वप्रत्वेनापि विनिगमनाविरहाल्लक्षकतावच्छेदककोटौ निवेशापत्तिः। नापि तदर्थस्य धात्वर्थेन साकमनन्वयप्रसङ्गः, निपातातिरिक्तत्वस्योक्तव्युत्पत्तौ विशेषणात्। एवञ्च 'प्रतिष्ठते' इत्यादौ धातोर्गत्यभावोऽर्थः, तदभावश्चोपसर्गार्थः।

तथाच ततो गत्यभावाभाववानिति धीः, गमनत्वप्रकारकबोधस्तूत्तरकालिको मानस एवेति चेन्न, 'प्रत्ययानाम्' इति व्युत्पत्तेर्जागरूकतया गमनाभाववानिति बोधस्यापि गगनकुसुमायमानत्वात्।

किञ्च तथाबोधाङ्गीकारे तादृशस्थले प्रादीनामुपसर्गत्वमपि दुर्घटम्, क्रियाया अविशेषकत्वात्। क्रिया ह्यत्रोपसर्गाभावविशेषिका, नतूपसर्गार्थो क्रियाभावविशेषकः। स्वादीनो द्योतकताव्यवस्थापनोक्तरीत्याप्युपसर्गाणां साऽवसेयेति। निपातानान्तु केषाञ्चिद् वाचकत्वम्। तत्र नञर्थो निरूपितः। चार्थश्च समुच्चयादिभेदेन चतुर्विध इति, "चार्थे द्वन्द्वः" (पा० सू० २।८।८९) इत्यत्राकरेषु व्यक्तमेव।

इवार्थस्तु सादृश्यम्। तच्च तद्भिन्नत्वे सति तद्गतधर्मवत्त्वम्। यत्तु—सादृश्यं न भेदघटितमिति, तन्न तावतापि "नञिवयुक्तम्" इति परिभाषणेन तस्येवार्थत्वानपायात्। तद्बोधकानुयोगिप्रतियोगिवाचकपदयोः समानविभक्तिकत्वं नियामकम्। नातश्चन्द्र इव मुखमित्यर्थे चन्द्रेणेव मुखमिति साधु।

एवकारस्य त्वन्ययोगव्यवच्छेदः, अयोगव्यवच्छेदः, अत्यन्तायोगव्यवच्छेदश्चार्थः। तत्र विशेष्यगतैवस्थले—'पार्थ एव धनुर्द्धरः' इत्यादावन्यतादात्म्यव्यवच्छेदोऽर्थः। अन्यत्वञ्च—समभिव्याहृतपदार्थापेक्षिकम्। तथाच पार्थान्यतादात्म्याभाववद्धनुर्द्धराभिन्न पार्थ इति बोधः। 'पृथिव्यामेव गन्धः' इत्यत्र पृथिव्यन्यसमवेतत्वाभाववान् पृथिवीसमवेतश्च गन्धः' इति बोधाच्चादृशबोधे सप्तमीरूपविशेषणविभक्तिसमभिव्याहारोऽपि नियामकः। अत्र भावान्वयबोधानुपगमे पृथिव्यामेवाकाशमित्यपि प्रसज्येत। एवञ्चैवकारेणान्ययोगव्यवच्छेदबोधे विशेष्यवाचकपदविशेषणवाचकसप्तम्यन्तान्यतराव्यवहितोत्तरैवशब्दो हेतुः। विशेषणसङ्गतैवस्थलेऽयोगव्यवच्छेदः। 'शङ्खः पाण्डुर एव' इत्यादौ शङ्खत्वावच्छेदेन पाण्डुरवत्त्वसमवायाभावव्यवच्छेदबोधात्। 'नीलं सरोजं भवत्येव' इत्यादौ क्रियासङ्गतैवस्थलेऽत्यन्तायोगव्यवच्छेदोऽर्थः।

SGDF Sri Gargeshwari Digital Foundation

धर्म्मे प्रमाणानां पक्षपाताच्छक्तता, द्योतकता वा तदवच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादि—चाद्योर्वैषम्यमयुक्तमित्यर्थः । व्यापकत्वात्=सामान्यत्वात् । शक्तताया इत्युपलक्षणम्—द्योतकताया वेत्यपि द्रष्टव्यम् ॥ ४८ ॥

इति वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः ॥ ८ ॥

प्रभा

वस्तुतस्तु शक्यतावच्छेदकतया चत्वप्रत्वादिभेदेऽपि 'निपातः' इति एकाकारप्रतीत्या वा निपातत्वे जातित्वं सिध्यति । नचैवमभावत्वविभुत्वादीनामपि जातित्वसिद्धिरिति वाच्यम्, इष्टापत्तेः । अत एव—

स्वजातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते ।
ततोऽर्थजातिरूपेषु तदध्यारोहकल्पना ॥

इत्युक्तं हरिणा । यदा विशुद्धा एवार्थजातयः शब्दैरभिधीयन्ते तदा सर्वे जातिवाचिन एव। किञ्च सामान्यादिचतुर्षु जातेरभावे 'जात्याकृतिव्यक्तयस्तु पदार्थः' इति गौतमसूत्रविरोधापत्तिः । अत एव—

संयोगिद्रव्यभेदेन देशे च परिकल्पिते ।
तेषु देशेषु सामान्यमाकाशेष्वपि जायते ॥

इत्यप्युक्तं हरिणा । अत एव 'आकृतिः पदार्थः' इति मीमांसकाः । तत्र प्रवृत्तिनिमित्तम्, जातिः, आकृतिः, उपाधिरित्यनर्थान्तरम् । द्रव्यगुणकर्माण्येव जातिमन्ति इति तु स्वशास्त्रप्रक्रियानिर्वाहाय नैयायिका आहुः । अत एव गौतमेन प्रवृत्तिनिमित्तस्योपाधेश्च पदार्थत्वं कुत्रापि नोक्तम् । नापि कार्यतायाः कारणताया वाऽवच्छेदकतयैव जातिसिद्धिरित्यपि नियन्त्रितम् । परन्त्विति—अस्य 'वैषम्यं न युक्तम्' इत्यत्रान्वयः । परन्तुपदं केवलवाचि, केवलं वैषम्यम्=वाचकताया द्योतकतायाश्चावच्छेदकभेदो न युक्त इत्यर्थः । सामान्यधर्मे=उपसर्गत्वापेक्षया व्यापकधर्मे निपातत्वरूपे । प्रमाणानाम्=द्योतकत्ववाचकत्वावच्छेदकत्वविषयकप्रमाणानाम् । पक्षपातादिति—व्यापकधर्मावच्छेदेन द्योतकत्ववाचकत्वरूपविधेयसाधकत्वादित्यर्थः । शक्तता=वाचकता । तदवच्छेदेन=निपातत्वावच्छेदेन । नैयायिकोक्तमिति—प्रादय उपसर्गा द्योतका इति द्योतकतावच्छेदकं प्रादित्वमुपसर्गत्वं वेति चादयो निपाता वाचका इति वाचकतावच्छेदकं निपातत्वमिति नैयायिकोक्तमित्यर्थः । अयं भावः—उपसर्गाणां द्योतकत्वं वाचकत्वं वा उपसर्गवृत्तिधर्मावच्छेदेन कल्पनीयम् । तद्वृत्तिधर्मश्चोपसर्गत्वं निपातत्वमित्युभयम् । किमवच्छेदेन तत्कल्पनमिति संशये निपातत्वस्य व्यापकतया चादिषु वाचकतावच्छेदकत्वेन कृप्तता च तदवच्छेदेनैव द्योतकत्वकल्पनमुचितम् । यथा न्यायनयेऽदृष्टस्य कारणत्वकल्पनायां तत्कार्यतावच्छेदकं कार्यत्वमेव, व्यापकत्वात्, नतु घटत्वादिकम्, पटत्वादिकमादाय विनिगमनाविरहादनन्तकार्यकारणभावप्रसङ्गात् । तथाऽत्रापि अनुगतरूपेण द्योतकत्वं वाचकत्वं वा युक्तम् । प्रकृते प्रमाणन्त्वनुमानमेव । तथाहि—'निपाता द्योतकाः, निपातत्वात्, उपसर्गवत्' इति । नच निपातत्वस्यैव पक्षतावच्छेदकतया हेतुत्वाच्च व्याप्यग्रहः, सिद्धसाधनञ्चेति वाच्यम्, जातिरूपस्योपाधिरूपस्य वा निपातत्वस्य पक्षतावच्छेदकतया सङ्केतसम्बन्धेन निपातपदवत्त्वस्य च हेतुत्वेनादोषात् । नच पादपूरणमात्रार्थके चादौ द्योतकत्वरूपसाध्यस्यासत्त्वात्, निपातत्वस्य च सत्त्वाद् व्यभिचार इति वाच्यम्, वाचकत्वाभावरूपद्योतकत्वस्य साध्यत्वेन तस्यानर्थकनिपातेऽपि सत्त्वेन क्षतिविरहात् ।

अत्र नैयायिकाः—यत्र बहूनां व्याप्यधर्माणामेकस्य व्यापकधर्मस्य चावच्छेदकत्वप्राप्तिस्तत्रैकस्य

SGDF Sri Gargeshwari Digital Foundation

प्रभा

व्यापकधर्मस्यावच्छेदकत्वकल्पनमुचितम्, नतु बहूनाम्, गौरवादननुगतत्वाच्च । यत्र तु व्याप्योऽपि धर्म एक एव व्यापकोऽपि तथा, तत्र व्याप्यधर्मस्यैवावच्छेदकत्वं कल्प्यते, तस्यावच्छेदकत्वे गौरवाभावात्। अत एव न्यायनये आख्यातवाच्यायाः कृतेः कृतित्वेनैव व्याप्यत्वम्, नतु कृतित्वव्यापकव्यापारत्वेन। ईदृशस्थले मीमांसका अपि व्याप्यस्यैवावच्छेदकत्वमिच्छन्ति नतु व्यापकस्य । तद्यथा—द्रव्यचाक्षुषं प्रति उद्भूतरूपं कारणम्, तत्र द्रव्यचाक्षुषनिष्ठकार्यताया द्रव्यप्रत्यक्षत्वं न कार्यतावच्छेदकम्, किन्तु तद्व्याप्यं द्रव्यचाक्षुषत्वमेवेति मन्यन्ते। अद्योतके पादपूरणमात्रफलके निपाते द्योतकत्वरूपसाध्याभावेन निपातत्वस्य च सत्त्वेन व्यभिचरितत्वाच्च निपातत्वस्यावच्छेदकत्वासम्भवः। तथाच 'प्रादयो द्योतकाः, उपसर्गत्वात्' इत्यनुमानेन प्रादीनां द्योतकत्वमेवेति। किञ्च निपातत्वहेतुकद्योतकत्वसाध्यकानुमित्यसम्भवः, उपसर्गत्वरूपोपाधिविशिष्टत्वात्। उपसर्गत्वे द्योतकत्वरूपसाध्यव्यापकत्वस्य निपातत्वस्य वाचकचादिष्वपि सत्त्वेन निपातत्वरूपसाधनाव्यापकत्वस्य च सत्त्वात्। नच चेष्टादीनामपि सङ्केतितार्थद्योतकत्वेन तत्र चोपसर्गत्वस्यासत्त्वेन साध्याव्यापकत्वं निपातत्वरूपसाधनावच्छिन्नद्योतकत्वस्योपसर्गे एव सत्त्वेन निपातत्वसमानाधिकरणद्योतकत्वरूपसाध्यव्यापकत्वेन साधनावच्छिन्नसाध्यव्यापकस्याप्युपाधित्वात्। ननु उपसर्गवाच्य एव प्रकर्षः । तथाहि—'प्रकर्षादिः प्रादिवाच्यः, प्राद्यन्वयव्यतिरेकानुविधायिशाब्दबुद्धिविषयत्वात्', प्रादिसत्त्वे तत्प्रतीत्या तदसत्त्वे चाप्रतीतेः। यथा घटादिरूपोऽर्थोः घटादिशब्दान्वयव्यतिरेकानुविधायीति स घटादिपदवाच्यः । नचात्रापि 'अनन्यलभ्यो हि शब्दार्थः' इत्यनन्यलभ्यत्वमुपाधिरिति वाच्यम्, तस्य वाच्यत्वरूपसाध्यव्यापकत्वेऽपि साधनाव्यापकत्वस्य दुर्वचत्वात्। तस्माज्जयादिर्धातुवाच्यः, प्रकर्षादिश्च प्रादिवाच्यः। नच नामार्थधात्वर्थयोः साक्षाद् भेदसम्बन्धेनान्वयस्याव्युत्पन्नतया प्रकर्षस्य स्वरूपसम्बन्धेन जयार्थेऽन्वयो न स्यादिति वाच्यम्, उक्तव्युत्पत्तौ निपातारिक्तत्वनिवेशादिति चेन्न, 'प्रतिष्ठते' इत्यत्र गत्यभावस्य धात्वर्थत्वे तदभावस्योपसर्गार्थत्वे न्यायनये तिङर्थाश्रयत्वे गत्यभावाभावस्याप्रकृत्यर्थतया 'प्रत्ययानां प्रकृत्यर्थान्वित' इति व्युत्पत्तिविरोधादनन्वयापत्तेः, आद्यगमनस्य प्रतीत्यभावापत्तेश्च। 'प्रतिष्ठते' इत्यत्र प्रशब्दार्थाभावस्य गमनाभावरूपधात्वर्थस्य प्रति विशेष्यतयैव भानाद् धात्वर्थगतविशेषकत्वाभावेनोपसर्गत्वानापत्तिः। तस्मादुपसर्गा द्योतका एव। चादयश्च केचिद् वाचकाः केचिद् द्योतकाश्च। वाचका यथा—नञोऽभावो वाच्यः, सादृश्यमिव वाच्यम्। सादृश्यबोधे च समानविभक्तिकत्वं प्रतियोग्यनुयोगिनोर्नियामकम्, तेन 'चन्द्रेणेव मुखम्' इति न प्रयोगः। नचोपमानोपमेययोर्भिन्नलिङ्गकस्थले चन्द्र इव मुखमाह्लादकम्' इत्यादावुपमानगताह्लादकत्वस्याप्रत्यायकत्वेन कथं साधारणधर्मबोधकत्वं तस्येति वाच्यम्, तस्योपमादोषेष्वेव परिगणनात्। ह्लादयतीति लिङ्गरहितार्थोपस्थापकपदप्रयोगस्यैव तत्रौचित्यात्।

एवपदस्य तु त्रयोऽर्था वाच्याः—१—अन्ययोग (सम्बन्ध) व्यवच्छेदः (अभावः)। २—अयोग-(असम्बन्ध) व्यवच्छेदः। ३—अत्यन्तायोगव्यवच्छेदश्च। तत्र विशेष्यवाचकपदोत्तर एवकार अन्यत्वञ्च (भेदश्च) सन्निहितविशेष्यार्थप्रतियोगिक एव । योगश्च एवपदं विना यः प्रतीयते स एव। तथाच—'पार्थ एव धनुर्धरः' इत्यत्र पार्थभिन्नतादात्म्याभाववद्धनुर्धराभिन्नः पार्थ इति बोधः। एवम्—'काश्यामेव विश्वनाथः' इत्यनेन काशीभिन्नासंयुक्तः काशीसंयुक्तश्च विश्वनाथ इति बोधः। इत्यन्ययोगव्यवच्छेदः=भिन्नस्य सम्बन्धाभावः। विशेषणसन्निहितैवस्थलेऽयोगव्यवच्छेदः=सम्बन्धाभावाभावः सम्बन्धः प्रतीयते। यथा 'शङ्खः पाण्डुर एव' इत्यत्र विशेषणतावच्छेदकधर्मसम्बन्धाभावो विशेष्ये प्रतीयते, तथाच शङ्खत्वावच्छेदेन पाण्डुरत्वसमवायाभावाभावः प्रतीयते। पाण्डुरत्वसम्बन्धाभावाभाववान् शङ्ख इति बोधः। क्रियासङ्गतैवकारेणात्यन्तायोगव्यवच्छेदो बोध्यते। तथाहि—'नीलं कमलं भवत्येव' इत्यादौ क्रियासङ्गतैवकारेण

प्रभा

सरोजत्वव्यापकत्वं नीलभवनाभावे प्रतिषिध्यते । तथाच सरोजनिष्ठो योऽभावस्तत्प्रतियोगी नीलभवनाभावः सरोजनिष्ठं नीलभवनमिति यावत् , अभावाभावस्य प्रतियोगिरूपत्वात् ।

वस्तुतस्तु—सामान्यज्ञानं न बोधोपयोगि । अत एव प्रमेयत्वेन प्रातिपदिकत्वेन वा रामादिशब्दज्ञाने धातुत्वेन शक्यादिज्ञानेऽपि न बोधः । तथाच निपातानामपि चत्वादिरूपानुपूर्वीरूपेणैव शक्तता । अत एवानुपूर्वीरूपेण जानतां निपातत्वेनाजानतामपि बोधः । क्वचिद्द्योतकत्वमपि तथैव । यथा 'शरैरुस्रैः' इत्यादौ । क्वचिन्नैरर्थक्यम्—यथा पादपूरणमात्रफलके—च, वै, तु, हि, इत्यादौ । तदुक्तं हरिणा—

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः ॥ इति ॥

दर्पणव्याख्या

अत्र केचित्—अयोगे आत्यन्तिकत्वं व्यवच्छिद्यते । तच्चान्वयितावच्छेदकव्यापकत्वम् । खण्डशश्च तत्र शक्तिः । तथाचोक्तस्थले सरोजनिष्ठाभावप्रतियोगिनीलभवनाभाव इति बोध इति वदन्ति ।

वस्तुतस्तु अन्ययोगव्यवच्छेदायोगव्यवच्छेदयोरेवैवकारस्य शक्तिः । अन्वयितावच्छेदकावच्छेदेनायोगव्यवच्छेदबोधे ग्रहणाध्ययनार्थकधातुसमभिव्याहारस्यापि नियामकत्वात् 'ज्ञानमर्थं गृह्णात्येव' इतिवन्न ज्ञानं रजतं गृह्णात्येवेत्यादिप्रयोगः । क्रियान्तरसमभिव्याहारे तु प्रायः सामानाधिकरण्येन तद्भानम् । इत्थञ्चान्वयितावच्छेदकसामानाधिकरण्येनान्ययोगव्यच्छेदोऽत्यन्तायोगव्यवच्छेदोऽन्वयितावच्छेदेन स्वयोगव्यवच्छेद इति व्यवह्रियते । विस्तरस्त्वन्यतोऽवधार्य्यः ।

'क्वेव भोक्ष्यसे' इत्यादावसम्भावनाऽपि तदर्थः । एवमन्येषामपि सार्थकानां निपातानामर्था ऊह्याः । वैयाकरणमते त्वेवकारस्य वाचकत्वासम्भवादवधारणात्मकज्ञानविशेषद्योतकत्वमेव । स च समभिव्याहृतपदार्थानुरोधादनेकविधः । यथा ज्ञानमर्थं गृह्णात्येव, इत्यत्रावच्छेदकावच्छेदेनार्थग्रहणाभावानधिकरणज्ञानप्रकारकज्ञानविषयो ज्ञानकर्तृकमर्थकर्मकं ग्रहणमिति बोधादुक्तपदार्थघटितः सः । परन्त्वनेकधात्वादीनां तत्तदर्थे वृत्तिकल्पनापेक्षयैवकारस्यैव सोचितेत्यन्ये ।

यद्यप्युपसर्गं प्रकम्य—

स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि च ।

इति हरिणा पक्षद्वयमविशेषेणोक्तम् । ग्रन्थकृता च तदेवानुसृतम् । तथाऽपि

क्वचित् सम्भविनो भेदाः केवलैरनिदर्शिताः ।
उपसर्गेण सम्बन्धे व्यज्यन्ते प्रसरादिना ॥

इति तदुक्तोपसंहृतिपर्य्यालोचनयोपसर्गाणां द्योतकत्वमेवावसीयते ।

अत्रेदं बोध्यम् – उपसर्गत्वाद्यजानतोऽपि 'प्रजयति' इत्यादौ प्रकृष्टजयबोधात् नैव तेषां द्योतकत्वम् । निपातानामपि चत्वादिनैव वाचकता, यत्र न वाचकतामन्तरेण निर्वाहः । क्वचिद् द्योतकत्वमप्युक्तयुक्त्यनभ्युपगमे । यथा "शरैरुस्रैः" इत्यादौ । क्वचिन्नोभयम् । यथा पादपूरणमात्रार्थके त्वादौ । तदुक्तम्—

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः ॥ इति ।

केचिदित्युभयान्वयी । नतूपसर्गत्वेन प्रादीनाम्, निपातत्वेन चादीनां द्योतकता वाचकता चेति स्थिते; उपसर्गत्वावच्छेदेन द्योतकता, न निपातत्वावच्छेदेनेति विवादः सिद्धान्तानालोचनमूलक एव । कर्मप्रवचनीयानान्तु नोपसर्गवत्

SGDF

॥ अथ त्वादिभावप्रत्ययार्थनिर्णयः ॥

भावप्रत्ययार्थमाह—

प्रभा

तस्मादुपसर्गत्वेन निपातत्वेन वा वाचकत्वादि चिन्त्यमेव । कर्मप्रवचनीयसंज्ञका अपि प्रत्यादयो न क्रियाविशेषकाः, किन्तु क्रियानिरूपितसम्बन्धविशेषका एव । अत एव कर्म=क्रियां प्रोक्तवन्त इति कर्मप्रवचनीयाः । बाहुलकात्कर्तरि भूतेऽनीयर् । तेन सम्प्रति क्रियां न द्योतयन्ति, किन्तु क्रियानिरूपितसम्बन्धविशेषं द्योतयन्ति ये ते कर्मप्रवचनीयाः । क्रियागतविशेषकत्वाभावादुपसर्गत्वाप्राप्त्या उपसर्गसंज्ञाऽपवाद इत्युक्तिः फलितार्थाभिप्रायेणेति दिक् ।

निपातार्थस्य निर्णीत्या पातयन् विघ्नवारणान् ।
प्रभायां बालकृष्णस्य प्रभां दद्याद् इभाननः ॥
॥ शुभम् भूयात् ॥

अथ भावप्रत्ययार्थनिर्णयः ।

सामान्यतो नामार्थं तद्विशेषनिपातार्थञ्च निरूप्य नामघटकं स्वार्थस्य प्रथमोपस्थितत्वात्तदर्थकं तद्धितं निरूपयितुमाह—भावेति—भवन्ति=अर्थबोधनाय प्रवर्तन्तेऽनेनेति भावः । करणे घञ् । भावः=तत्तच्छब्दप्रवृत्तिनिमित्तम् । तदुक्तं परममूले—'प्रकृतिजन्यबोधे प्रकारीभूतो भावः' इति । प्रकारपदेन च मुख्यविशेष्यतया साक्षान्निरूपितविषयताश्रयस्य ग्रहणम् । विषयता च प्रकारतारूपा, संसर्गतारूपा वा । घटादिपदस्थले घटत्वादौ प्रकारतारूपा । 'औपगवः' 'राजपुरुषः' 'पाचकः' इत्यादिषु च संसर्गतारूपा । एषु

दर्पणव्याख्या

क्रियाविशेषकत्वम्, किन्तु क्रियागतसम्बन्धविशेषकत्वम्, कर्म=क्रियां प्रोक्तवन्तः 'कर्मप्रवचनीयाः' इत्यन्वर्थसंज्ञानात् । अधिपर्य्यास्तु सूत्रारम्भसामर्थ्यादेव सा । 'जपमनुप्रावर्षत्' इत्यत्र हेतुभूतजपनिरूपितलक्ष्यलक्षणभावसम्बन्धस्य वर्षणक्रियानिष्ठस्यानुना द्योतनात् । एवमन्यत्रापि ज्ञेयम् । अत एव न तेषामुपसर्गत्वम् । क्रियागतविशेषद्योतको ह्युपसर्गः । उक्तञ्च हरिणा—

क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः ।
नापि क्रियापदाऽऽक्षेपी सम्बन्धस्य तु भेदकः ॥ इति ।

तदर्थस्तु—कर्मप्रवचनीयसंज्ञकोऽन्वादिः, 'प्रजयति' इत्यादावुपसर्गवन्न क्रियागतविशेषस्य द्योतकः । विभक्त्यैवोक्तत्वाच्च न सम्बन्धस्य वाचकः । नापि 'प्रादेशं विलिखति' इत्यादौ विशब्दवत् क्रियाक्षेपकः, तत्र विना मानक्रियाक्षेपात् । तथा सति तत्तत्क्रियानिबन्धना कारकविभक्तिरेव स्यात् । किन्तु विशिष्टक्रियाजनितो यः सम्बन्धो विभक्त्यर्थ इति तद्द्योतकः । 'प्रादेशं विमाय लिखति' इत्यर्थप्रतीतेरित्यधिकमन्यतोऽवधार्य्यम् ॥ ४८ ॥

इति वैयाकरणभूषणसारदर्पणे उपसर्गनिपातार्थनिरूपणम् ॥ ८ ॥

—○*○—

प्रक्रान्ते नामार्थनिरूपणे नामघटकतद्धितानामर्थमुपोद्घातसङ्गत्या निरूपयिष्यन्नादौ प्रकृत्यर्थप्रकारत्वाद्भावप्रत्ययार्थनिरूपणमित्याशयेनाह—*भावेति* ष्यञ्वुञादेरपि

SGDF
Sri Gargeshwari Digital Foundation

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥ ४९ ॥

"कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनाऽन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः" इति वार्त्तिकवचनमिति मीमांसकादीनां भ्रममपाकुर्वन्नाह—टीकायामिति । भर्तृहरिणा महाभाष्यटीकायामित्यर्थः । त्वतलोरिति—भावप्रत्ययमात्रोपलक्षणम् ।

अयमर्थः—समासादौ शक्तिः कल्प्यमाना राजादिसम्बन्धविशिष्टे कल्प्यते

प्रभा

त्वादिप्रत्ययेन क्रमशः जन्यजनकभावस्य स्वस्वामिभावस्य क्रियाकारकभावस्य संसर्गतया बोधः । संसर्गस्यापि प्रकारतया भानाङ्गीकारे तु विषयतापदेन प्रकारताया एव ग्रहणेऽपि न दोषः । तथा चोक्तेषु जन्यजनकभावसम्बन्धेन उपगुविशिष्टमपत्यम्, उपगुसम्बन्धवदपत्यमिति वा स्वस्वामिभावसम्बन्धेन राजविशिष्टः पुरुषः, राजनिरूपितसम्बन्धवत्पुरुष इति वा, क्रियाकारकभावसम्बन्धेन पाकविशिष्टः कर्त्रादिः, पाकनिरूपितसम्बन्धवान् कर्त्रादिरिति वा बोधः । वैयाकरणनये तु कृदादिवृत्तिषु पाचक इत्यादिषु प्रकारविधया संसर्गविधया वा संसर्गादेर्भानमेकार्थीभावात्मकविशिष्टशक्त्यैव । अत एव 'औपगवः' इत्यत्रोपगुपदार्थे धनिन इत्यस्य, 'पुत्रीयति' इत्यत्र पुत्रे 'विद्वांसम्' इत्यस्यान्वयाभिप्रायेण 'धनिन औपगवः' 'विद्वांसं पुत्रीयति' इत्यादेर्न साधुत्वम् । नचैवं 'पर्वतो वह्निमान्, धूमात्' इत्यत्र धूमस्य हेतुतया वह्नावनन्वयापत्तिः, 'वृत्तस्य विशेषणयोगो न' इति व्युत्पत्तेर्वह्नेः पदार्थैकदेशत्वाच्चेति वाच्यम्, वह्निविशिष्टे पर्वते एव तदन्वयाङ्गीकारात् । नच पञ्चम्यर्थहेतुत्वस्य निरूपकपर्वते बाध इति वाच्यम्, धूमज्ञानगतहेतुतानिरूपकत्वस्य वह्निज्ञाननिष्ठस्य वह्नावारोपेणान्वयस्य पर्वतेऽप्यारोपेण तत्त्वस्य वक्तुं शक्यत्वात् । अत एव न्यायभाष्यवार्तिककारैः 'प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः' इत्युक्तं सङ्गच्छते । उभयथापि संसर्गस्यैव त्वादिप्रत्ययेन बोधनमित्याह—कृत्तद्धितेति । सम्बन्धाभिधानमिति—प्रकारतया, संसर्गतया वा भासमानस्य सम्बन्धस्य त्वादिप्रत्ययेनाभिधानमित्यर्थः । भावप्रत्ययेनेति—भावे विहितप्रत्ययेनेत्यर्थः । अन्यत्रेति—अस्यार्थो मूले एव वक्ष्यते । इति वार्तिकेति—'इति वार्तिककारवचनम्' इति पाठः । क्वचित् 'इति वार्तिकवचनमिति वा पाठः।' 'वार्तिकवचने' इति पाठस्तु हेय एव । भूषणे तु 'इतिवचनं वार्तिककारीयम्' इति भ्रमं मीमांसकानामिति पाठः । तथाच कृत्तद्धितेति आरभ्य सम्बन्धेभ्य इत्यन्तं वार्तिककारवचनम्, वार्तिकमिति यावति मीमांसकानां भ्रम एव ।

वस्तुतस्तु भाष्यस्य स्वकृतटीकायां हर्युक्तमेवैतत् 'कृत्तद्धितसमासेभ्यः' इति, नतु वार्तिकमित्याह—भ्रममिति । महाभाष्यटीकायामिति—स्वकृतमहाभाष्यटीकायामित्यर्थः । ननु त्वादेरिति वक्तव्ये त्वतलोरिति कथनेन ष्यञादीनामर्थान्तरत्वशङ्का स्यादत आह—भावप्रत्ययमात्रेति—तथाचोपलक्षणतया तेषामपि ग्रहणमिति भावः । अयमिति—वक्ष्यमाण इत्यर्थः । अर्थ इति—तात्पर्यार्थ इत्यर्थः । सम्बन्धविशिष्ट इति—स्वनिष्ठविषयतानिरूपितविषयतावत्त्वसम्बन्धेन सम्बन्धविशिष्टे इत्यर्थः । तेन सम्बन्धस्य संसर्गतया भानेऽपि नासंग्रहः ।

दर्पणव्याख्या

सम्बन्धरूपभावबोधकत्वात् तत्संग्रहार्थमाह—* त्वतलोरिति * । * भावप्रत्ययेति * भावविहिततद्धितप्रत्ययेत्यर्थः । हरिवाक्यं विवृणोति—* अयमर्थ इत्यादिना * । 'इत्युक्तम्' इत्यस्य समासशक्तिनिरूपणावसर इति शेषः ।

SGDF

इत्युक्तम् । तथाच तदुत्तरभावप्रत्ययः सम्बन्धं वदतीत्यर्थः । एतदपि 'भेदः, संसर्गः, उभयं वेत्युक्तेषु भेदपक्षे न सम्भवतीत्यत आह—मतभेदेति—पक्षभेदेनेत्यर्थः ।

एवञ्च राजपुरुषत्वम् , औपगवत्वम् , पक्तृत्वमित्यादौ स्वस्वामिभावसम्बन्धः, उपग्वपत्यसम्बन्धः, (अपत्यापत्यवत्सम्बन्धः) क्रियाकारकभावसम्बन्धः, इत्यन्वयबोधः । औपगवादावव्यभिचरितसम्बन्धे तु अर्थान्तरवृत्तिस्तद्धित उदाहार्य्यः ।

प्रभा

उक्तमिति—समासशक्तिनिरूपणे 'राजसम्बन्धवान्' इत्येव शाब्दं भानमित्यादिनेत्यर्थः । तदुत्तरेति— समासाद्युत्तरेत्यर्थः । वदतीति—बोधयतीत्यर्थः । एतदपि--कृदाद्युत्तरत्वादेः सम्बन्धवाचकत्वेऽपि । भेद इति— अराजकीयभेदवान् इति भेदः समासार्थः । संसर्ग इति--राजकीयसम्बन्धवानित्यर्थः । उभयमिति— अराजकीयभेदवान्, राजकीयसम्बन्धवाँश्चेत्यर्थः । भेदपक्ष इति--अराजकीयभेदविशिष्टपुरुष इत्यर्थके भेदपक्षे इत्यर्थः । न सम्भवतीति—'राजपुरुषः' इत्यतः पुरुषे राजसम्बन्धस्याभानादिति भावः । राजसम्बन्धवतो वस्तुगत्या पुरुषत्वेन बोधे पुरुषत्वमेव त्वप्रत्ययार्थः । पुरुषत्वरूपे प्रत्ययार्थे च राजसम्बन्धवतः पुरुषस्य तद्व्यक्तिमात्रनिरूपिताधेयतासम्बन्धेन प्रकृत्यर्थस्यान्वय इति नातिप्रसङ्गः । 'राजपुरुषः' इत्यतो भेदमात्रस्य भानपक्षे भेद एव त्वाद्यर्थः । पक्षभेद इति--कृदन्तादिविहितभावप्रत्ययस्य सम्बन्धोऽर्थ इति मतभेदेन हर्य्युक्तिर्नतु सिद्धान्तोक्तिरिति भावः ।

स्वस्वामिभावेति--त्वप्रत्ययार्थोऽत्र स्वस्वामिभावसम्बन्धः, अन्वयबोधस्तु राजपुरुषनिष्ठः स्वस्वामिभावसम्बन्धः । उपग्वपत्यनिष्ठोऽपत्यापत्यवत्सम्बन्धः, पाककर्तृनिष्ठः क्रियाकारकभावसम्बन्ध इत्याद्याकारकः । उपग्वपत्येति--'अपत्यापत्यवत्सम्बन्धः' इति लिखितपुस्तकेषु पाठः ।

अन्वयबोध इति-- शब्दजन्यो बोध इत्यर्थः । पृथगुपस्थितयोरर्थयोराकाङ्क्षाभास्यसम्बन्धेन विशेष्यविशेषणभावापन्नार्थविषयकबोधस्यैवान्वयबोधत्वेन प्रकृते चैकार्थीभावशक्तिवादिनये पृथगुपस्थित्यभावेन तत्त्वस्य वक्तुमशक्यत्वात् । विशिष्टोपस्थितार्थबोधेऽपि शब्दजन्यत्वन्त्वक्षतमेव, 'शाब्दयामि' इत्यनुभवस्य सत्त्वात् । उपस्थितिविषययोरर्थयोः सम्बन्धोऽन्वय इति मते तु यथाश्रुतमपि साधु ।

अव्यभिचरितसम्बन्ध इति—व्यक्तेरुत्पत्तिमारभ्य आविनाशं तद्व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगिसम्बन्ध इत्यर्थः । उपग्वपत्ये च जन्यजनकभावसम्बन्धो नास्ति इत्यस्याभावेन तादृशसम्बन्धेऽत्यन्ताभावाप्रतियोगित्वं सुलभम् । अर्थान्तरवृत्तिरिति—देवतार्थकादितद्धितान्ताद् भावप्रत्यये 'ऐन्द्रत्वम्' इत्यादौ इन्द्राभिन्न-

दर्पणव्याख्या

* सम्बन्धमिति * उत्तरपदार्थे पूर्वपदार्थसम्बन्धस्यैव धर्मत्वेन भासमानत्वादिति भावः ।
* भेदपक्ष इति * तत्पक्षे हि 'राजपुरुषः' इत्यत्र 'अराजकीयभिन्नः पुरुषः' इति बोधेन पुरुषांशे राजसम्बन्धाभानादिति भावः । * उपग्वपत्यसम्बन्ध इति * उपग्वपत्ययोर्जन्यजनकभावात्मकः सम्बन्ध इत्यर्थः । * अन्वयबोध इति * तत्तत्पदोत्तरभावप्रत्ययस्य तत्तत्सम्बन्धवाचकत्वादिति भावः ।

* अव्यभिचरितसम्बन्धे त्विति * अव्यभिचरितसम्बन्धरूपजात्यैव भानोपगमे त्वित्यर्थः । तुशब्दसूचिता-रुचिबीजन्तु "तस्यापत्यम्" (पा० सू० ४ । १ । ८२) इत्यनेन षष्ठीप्रकृत्यर्थोपग्वादिसम्बन्धेऽपत्येऽणादीनां विधानेन षष्ठ्यर्थसम्बन्धान्तर्भावेणैव तत्रैकार्थीभावस्योपगन्तव्यतया तत्रापत्याद्यंशे संसर्गस्यैव प्रकारतया तस्यैव तदुत्तरभावप्रत्ययार्थत्वेन जातेरतद्व्याप्यत्वासम्भवादिति । * अर्थान्तरवृत्तिरिति * धात्वर्थघटितार्थवृत्तिराक्षिकाद्यन्तर्गतष्ठगादिरित्यर्थः । तदर्थो

'दामोदरत्वम्' 'कृष्णसर्पत्वम्' इत्यादौ जातिविशेषबोधादाह—अन्यत्रेति—रूढेरभिन्नरूपादव्यभिचरितसम्बन्धेभ्यश्चान्यत्रेत्यर्थः। रूढिरुक्ता। द्वितीयं यथा शुक्लत्वम्। अत्र "तदस्यास्त्यस्मिन्" (पा० सू० ५।२।१४) इति मतुपः "गुणवचनेभ्यो मतुपो लुगिष्टः" (पा० वा०) इति लुप्तत्वात् तद्धितान्तत्वेऽपि 'घटः शुक्लः' इत्यभेदप्रत्ययाद् गुणस्यैव प्रकारत्वेन भानं जायते। तृतीयम्—

प्रभा

देवतासम्बन्ध इति बोधः। अत्रेन्द्रोद्देश्यकदानकर्मत्वसम्बन्धो दत्ते हविष्युत्पद्यते, नतु ततः प्राक्, इत्यव्यभिचरितसम्बन्धभिन्नत्वं तत्र। तथाच 'औपगवत्वम्' इत्यस्य उपगवपत्यत्वमित्येवार्थः।

दामोदरत्वमिति—दामोदरपदस्य नारायणपरत्वे कल्पभेदेन तद्भेदमादाय यत्किञ्चिद्व्यक्तिपरत्वेऽवस्थाभेदेनानेकव्यक्तिवृत्तित्वाज्जातित्वमुपपाद्यम्। कृष्णसर्पत्वमिति - कृष्णसर्पो जातिविशेषः। बहुलग्रहणान्नित्यसमासः। उक्तेति—दामोदरत्वम्, कृष्णसर्पत्वमित्यनेन। तद्धितान्ता रूढिशब्दाः—खरहस्ति-कुञ्जरादयः। समासाः—सप्तपर्ण-लोहितशाल्यादयः। कृदन्ताः—गृह-रजक-प्राहादयः। एतेभ्यो जातावेव त्वादयः, नतु सम्बन्धे। अभिन्नरूपाः शुक्लादयस्तद्धितान्ताः। एते च 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति मतुपो लुकि गुणे गुणिनि चाभिन्नरूपाः=समानानुपूर्वीकाः। तथाच तद्धितान्तेभ्योऽपि शुक्लादिभ्यः प्रकारीभूते गुणे, एव प्रत्ययः, नतु गुणगुणिनोः समवायसम्बन्धे। 'शुक्लो गुणः' इति गुणवाचकात्तु जातावेव त्वादयः। तदाह—द्वितीयमिति—अभिन्नरूपोदाहरणमित्यर्थः। तृतीयमिति—अव्यभिचरितसम्बन्धोदाहरणमित्यर्थः। सतो भावः सत्तेति जातावेव प्रत्ययः। सद्वस्तु सत्तासम्बन्धं नहि कदाचिद् व्यभिचरति। सद्वस्तुनि अव्यभिचरितसत्ता (जाति) सम्बन्धस्य सत्त्वेऽपि नहि 'सत्' शब्दः तादृशसम्बन्धमपेक्ष्य सद्वस्त्वभिधत्ते, किन्तु सत्तारूपां जातिमपेक्ष्यैव सद्वस्त्वभिधत्ते इति जातावेव तल्प्रत्ययः। पुरुषे राजसम्बन्धे जाते राजसम्बन्धमपेक्ष्यैव राजपुरुषशब्दस्तत्र प्रवर्तते इति सम्बन्धे एव तत्र त्वादिः। धवखदिरादिद्वन्द्वादपि जातिसमुदाये संज्ञाशब्दात् संज्ञारूपे संज्ञिन्यध्यस्ते प्रत्ययः। यथा डित्थत्वमित्यत्र। यद्वा व्यक्तावेव प्रकारतया भानमाश्रित्य त्वप्रत्यय इति व्यक्तेरेव प्रकारतया भासमानत्वात्वप्रत्ययार्थोऽपि। तदुक्तं हरिणा—

जातिगुणाज्जातिगुणे समासकृत्तद्धिताच्च सम्बन्धे।
डित्थादेश्च स्वरूपे धवखदिराज्जातिसंघाते॥

तदुक्तं भाष्ये—'यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ' इति। अत्र कैयटः—'गुणशब्देन यावान् कश्चित्पराश्रयो भेदको जात्यादिरर्थः स सर्व इह गृह्यते' इति।

दर्पणव्याख्या

कर्त्रादौ देवनादिरूपक्रियायाः क्रियाकारकभावसम्बन्धस्य प्रकारतया भानादित्याशयः।

* रूढेरिति * कथमप्यवयवयोगादर्थविशेषप्रसिद्धादित्यर्थः। * अभिन्नरूपादिति * प्रत्ययान्तत्वेऽपि प्रत्ययलुका प्रकृतिसमानाऽऽकारात् 'शिष्यमाणं लुप्यमानार्थाभिधायि' इति न्यायेन प्रकृत्यर्थान्वितप्रत्ययार्थाभिधायिन इत्यर्थः। * अव्यभिचरितसम्बन्धेभ्य इति * अव्यभिचरितो व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगी सम्बन्धः समवायात्मको यस्य जात्यादेस्तद्विशिष्टवाचकेभ्य इत्यर्थः। नातः पाकादिना नाशेन स्वाश्रयनिष्ठाभावप्रतियोगिनां तत्त्वम्। * उक्तेति * 'दामोदरत्वम्' इत्यादौ जातिविशेषेण भानादिति ग्रन्थेनेत्यर्थः। * द्वितीयं यथेति * अभिन्नरूपोदाहरणं यथेत्यर्थः। तद्धितान्तत्वेऽपीत्यपिना तदुत्तरभावप्रत्ययेन सम्बन्धाभिधानं प्राप्नोतीति सूचितम्। *अभेदप्रत्ययादिति* इदञ्च षष्ठ्यर्थे विहितस्य मतुपः सम्बन्धार्थकत्वशङ्कानिरासाय। 'तृतीयम्' इत्यस्योदाहरणं यथेति शेषः।

सतो भावः सत्तेति । अत्र जातावेव प्रत्यय इति दिक् ॥ ४९ ॥

दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकम्मन्यं प्रत्याह—

अत्रार्द्धजरतीयं स्याद् दर्शनान्तरगामिनाम् ।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु ॥ ५० ॥

प्रभा

दिगिति—यं धर्ममपेक्ष्य शब्दस्यार्थाभिधाने प्रवृत्तिस्तदेव प्रवृत्तिनिमित्तं स एव त्वादिप्रत्ययार्थः । स च क्वचिज्जातिः, क्वचिद्गुणः, क्वचित्सम्बन्धः, क्वचिद् द्रव्यम्, क्वचिद्भावः' इति यथायथमूह्यम् । यथा घटत्वं जातिः । गुणवाचकात् त्वे शुक्लत्वं रूपत्वव्याप्यजातिः, गुणिवाचकात् त्वे शुक्लत्वं गुणः, राजपुरुषत्वम्=राजपुरुषसम्बन्धः, दण्डवत्त्वम्=दण्डः, दण्डसम्बन्धो वा, घटाभाववत्त्वम्=घटाभावः, घटाभावसम्बन्धो वा, दण्डत्वत्वम्=दण्डः । घटाभावत्वत्वम्=घटाभाव इति ॥ ४९ ॥

अत्र विशेषो वक्ष्यते—दण्डीत्यादाविति—'दण्डी' इत्यादौ मत्वर्थीयप्रत्ययान्ते दण्डादिरूपप्रकृत्यर्थविशिष्टो यः कश्चनार्थः पुरुषदेशादिरूपः स एव मतुबर्थः, नतु द्रव्यदण्डान्तरयोः सम्बन्धः । सम्बन्धस्य तु वाक्यविधया विशेष्यविशेषणभावबोधोत्तरमार्थप्रतीतिरेव, न शाब्दः । अत एव 'पाचकः' इत्यादिकृदन्तेऽपि क्रियाविशिष्टकर्त्रादिरेव कृदर्थः, सम्बन्धस्तूत्तरकालमर्थतः । तदुक्तम्—

पाकन्तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित् ॥

इति । नच दण्डादियुक्तं द्रव्यमनन्तमिति शक्तिग्रहासम्भवः, दण्डत्वेन दण्डमनुगमय्य तेनानुगमसम्भवात् । नच 'दण्डी' 'कुण्डी' इत्यादौ दण्डत्वकुण्डत्वादीनामप्यनन्तत्वात्तेन रूपेण दण्डादेरनुगमासम्भवेन तद्युक्तद्रव्याणामनुगमासम्भव इति वाच्यम् , प्रकृत्यर्थत्वेन दण्डादीननुगम्य तद्युक्तद्रव्याणामनुगमसम्भवादित्याह—अत्रार्द्धेति—अर्द्धं जरत्या अर्द्धजरती सैवेतीवार्थे कन्, तस्य लुका, सदृशे लक्षणया वा अर्द्धवृद्धातुल्यन्यायोऽर्द्धजरती । यथा कामिनो जरत्या अप्यर्द्धं विषयवासनया कामयन्ते , मुखस्तनादिकन्तु सौन्दर्यराहित्यान्न कामयन्ते इत्यर्द्धस्य कामनाविषयत्वमर्द्धस्य तदविषयत्वञ्चानुचितम् । यथा वा अर्द्धं जरत्याः कुक्कुट्याः पाकाय, अर्द्धञ्च प्रसवाय चेति कौशलासम्भवः, किन्तु जरत्या एव पाकः, युवत्यास्तु प्रसवार्थत्वम् । तथा एकस्यैव द्विविधकार्यकरत्वं न युक्तम् । प्रकृते कस्यचिद्भावप्रत्ययस्य सम्बन्धवाच-

दर्पणव्याख्या

* सत इति * सच्छब्दजन्यबोधे शत्रर्थकर्त्रंशे सत्तायाः प्रकारतया भानात्तदुत्तरभावप्रत्ययेनापि सैवाभिधीयते इत्यर्थः । तथाचोक्तस्थलेषु भावप्रत्ययान्तात् सम्बन्धाभानादुक्तवाक्ये अन्यत्रेत्युपात्तमिति भावः ।

ननु 'शुक्लत्वं सत्त्वम्' इत्यादौ सतोऽपि शौक्ल्यादिसम्बन्धस्य भावप्रत्ययेनानभिधानवत् 'राजपुरुषः' इत्यत्रापि तदनभिधानं स्यात् , तत्रापि राजादीनां पुरुषादिपदार्थे स्वत्वादिसम्बन्धेन प्रकारतेत्यस्यापि वक्तुं शक्यत्वादित्यत आह—* दिगिति * तदर्थस्तु निर्वक्ष्यमाणभावे "तस्य भावः" (पा० सू० ५ । १ । ११ ।) इति सूत्रेण त्वतलादयो विधीयन्ते ।

ननु जातित्वादिना जातावेव सम्बन्ध एवेति नियमः । तथाच 'यत्प्रकृतेर्यद्धर्मप्रकारबोधः शास्त्रकृत्सम्मतः स एव धर्मस्त्वाद्यभिधेयः' इति रुच्यादिभिन्नप्रकृतेः कृदन्तादितोऽपि सम्बन्धप्रकारकबोधस्य भाष्यसम्मतत्वात् तस्यैव भावप्रत्ययेनाभिधानमुचितमिति नोक्तेषु भावप्रत्ययस्य जात्याद्यभिधायकत्वमिति ॥ ४९ ॥

SGDF
SGDF Sri Gargeshwari Digital Foundation

अत्र=भावप्रत्ययविषये। तथाहि - दामोदरत्वम्, घटत्वमित्यादौ भावप्रत्ययस्य सम्बन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि तदभिधानं न स्यात्। प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधीयते। अन्यथा घटत्वमित्यत्र द्रव्यत्वादेः, दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यताऽऽपत्तेः। नच तन्मते दण्डीत्यादिबोधे सम्बन्धः प्रकारः।

प्रभा

कत्वं कस्यचित्तदिरवाचकत्वं न युक्तमित्यर्द्धजरतीयन्यायविषयः। तुल्ययोर्भावप्रत्यययोर्विभिन्नार्थकत्वं न युक्तमिति भावः। सम्बन्धानभिधायकत्वेन=सम्बन्धानभिधानेन। दर्शनान्तरगामिनामित्यस्यैवार्थः—मीमांसकानामिति। तदभिधानमिति—सम्बन्धाभिधानमित्यर्थः। न स्यादिति—उक्तन्यायविरोधादिति भावः। ननु 'दामोदरत्वम्' 'घटत्वम्' इत्यादिषु भावपदेन दामोदरादिनिष्ठो धर्मविशेष उच्यते, 'दण्डित्वम्' इत्यादौ तादृशो भावः संयोगादिरेवेति तेन तदभिधाने किं बाधकमित्याशङ्कायामाह—प्रकृतिजन्येति—हि हेतौ यत उक्तरूपो भावस्तदुत्तरभावप्रत्ययेनाभिधीयते। तव (मीमांसकस्य) मते दण्डित्वमित्यादौ दण्डिपदजन्यशाब्दबोधीयप्रकारतायाः संयोगेऽभावेन भावप्रत्ययेन तदभिधानं न स्यादिति भावः। 'प्रकृतिजन्यबोधे प्रकारीभूतः' इति विशेषणाभावे 'घटत्वम्' इत्यनेन प्रकृत्यर्थनिष्ठस्य द्रव्यत्वादेरप्यभिधानं स्यादित्यर्थः। एवम् 'दण्डित्वम्' इत्यनेन दण्डस्यैव प्रकृत्यर्थे प्रकारतया भासमानत्वेन त्वप्रत्ययेनाभिधानं स्यात्, नतु संयोगस्य, तस्य तत्र संसर्गतया भानसत्त्वात्। तन्मते=मीमांसकमते। प्रकार इति—दण्ड एव संयोगसम्बन्धेन प्रकारः। शाब्दिकमते तु दण्डस्य प्रकारत्वेऽपि प्रकृत्यर्थे पुरुषादौ समवायसम्बन्धेन वृत्तित्वाभावान्न तस्य भावत्वमिति न तत्र प्रत्यय इति भावः। नचैवम् 'दण्डत्वत्वम्' 'अभावत्वम्' इत्यत्र दण्डत्वे, अभावे च दण्डत्वत्वस्याभावत्वस्य च स्वरूपसम्बन्धेनैव प्रकारतया भावप्रत्ययवाच्यत्वानुपपत्तिः, प्रकृत्यर्थसमवेतेत्यस्य प्रकृत्यर्थनिष्ठविशेष्यतानिरूपितप्रकारताऽवच्छेदकसम्बन्धेन प्रकृत्यर्थनिष्ठेत्यर्थेनादोषात्। ननु यत्र प्रकृतिजन्यबोधे प्रकारः स्वस्मिन् समवायेन नास्ति तत्र स्वसमवेतः सम्बन्धः संयोगादिरेव त्वादिवाच्यः

दर्पणव्याख्या

'प्रकृत्यर्थविशिष्टद्रव्यमात्रवचनता' इति पाठः। मात्रपदेन सम्बन्धव्यवच्छेदः। * **तद्धितस्येति** * इन्यादेरित्यर्थः। * **सम्बन्धानभिधायकत्वेनेति** * प्रकृतिजन्यबोधे तस्याप्रकारत्वादिति भावः। * **तदभिधानम्** * सम्बन्धाभिधानम्। * **न स्यादिति** * किन्तु दण्डस्यैवाभिधानं स्यात्, नच तदभिधानमिष्टमिति भावः।

ननु प्रकृतिजन्यबोधविषयत्वे सति प्रकृत्यर्थवृत्तित्वं भावत्वम्। तच्च दण्डसम्बन्धस्याक्षतमिति भावप्रत्ययेन तदभिधानं भविष्यतीत्यत आह—* **प्रकृतिजन्यबोध इति** * उक्तार्थस्य भावत्वे तु 'दामोदरत्वम्' इत्यादौ जातिगुणसम्बन्धस्यापि भावार्थता प्रसज्येतेति भावः। क्रमेण दलद्वयव्यावर्त्यमाह—* **अन्यथेति** * एकतरदलमात्रोपादाने इत्यर्थः। * **तदुत्तरेति** * घटदण्डिपदोत्तरेत्यर्थः। तथाच 'घटत्वम्' इत्यादौ द्रव्यत्वस्येव त्वन्मते दण्डीत्यादौ दण्डसम्बन्धस्याप्यपदार्थतयाऽप्रकारत्वादभावत्वेन न तस्य प्रत्ययार्थत्वसम्भव इति भावः।

वस्तुतस्त्वन्त्यदलोपादानं व्यर्थम्, मतुबादीनां सम्बन्ध्यर्थकतया दण्डीत्यादिवाक्यजन्यबोधे सम्बन्धस्यैव प्रकारत्वेन दण्डादीनां प्रकृत्यर्थेऽप्रकारत्वादेवानतिप्रसङ्गात्। मीमांसकैकदेशिमते मत्वर्थीयानां सम्बन्धवाचकत्वेऽपि तदाक्षिप्ताश्रयविशेष्यकबोधस्यैव तैरभ्युपगमेन तन्मतेऽपि प्रकृतिजन्यबोधविशेष्यांशे दण्डादीनामप्रकारत्वेन प्रयोजनविरहादिति विभावनीयम्। * **सम्बन्धः प्रकार इति** * अस्य येन तस्य त्वादिप्रत्ययवाच्यता स्यादिति शेषः।

यत्तु—यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः ।
तदा गत्यन्तराभावात् सम्बन्धो वाच्य आश्रितः ॥ इति ॥

तन्न, इनादेः सम्बन्धिवाचकत्वेनोपपत्तौ गत्यभावाभावात्। प्रपञ्चितश्चैतदादावेव वैयाकरणभूषणे।

ननु तवापीदं वैषम्यं कथमित्यत आह—सिद्धान्ते त्विति । 'जायन्ते' इति वक्ष्यमाणविशेषणेऽन्वितम् । सिद्धान्ते प्रकृतिजन्यबोधे प्रकारे त्वादयो जायन्त इत्यर्थः ।

प्रभा

स्यादित्यत आह—यत्त्विति । स्वसमवेतः=प्रकृत्यर्थसमवेतः । अपरः=सम्बन्धाद्भिन्नः । गत्यन्तराभावात्=उपायान्तराभावात् । तथाच प्रकारीभूतस्य पदार्थस्य प्रकृत्यर्थसमवेतत्वाभावे प्रकारतावच्छेदकसम्बन्धस्याभिधानं भावप्रत्ययेनेत्यर्थः । सम्बन्धः=प्रकारतावच्छेदकीभूतः सम्बन्धः । सम्बन्धिवाचकत्वेति—इन्यादितद्धितस्य सम्बन्धप्रकारकबोधजनकत्वस्वीकारेण । उपपत्तौ=त्वादेः सम्बन्धवाचकत्वोपपत्तावित्यर्थः । गत्यभावेति—लिखितपुस्तकेषु 'अगत्यभावात्' इति पाठः । दण्डीत्यादेः सम्बन्धविशिष्टवाचकत्वेन सम्बन्धस्य भावप्रत्ययवाच्यत्वरूपगतेः सत्त्वादित्यर्थः । एतत्=तद्धितानां सम्बन्धिवाचकत्वम् । आदावेवेति—वैश्वदेवीत्यादितद्धितानामित्यादिग्रन्थेनेत्यर्थः । वैषम्यमिति—दामोदरत्वमित्यत्र सम्बन्धो न त्वाद्यर्थः । 'दण्डित्वम्' इत्यादिषु तु सम्बन्धस्त्वाद्यर्थ इति वैषम्यमित्यर्थः । सिद्धान्ते त्वितीति—तत्र हि—'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति श्रुतिः । तत्रायं संशयः—अनया श्रुत्या आमिक्षावाजिनोभयगुणकमेकं कर्म विधीयते—उत आमिक्षागुणकं वाजिगुणकञ्च भिन्नं कर्मेति । ततः सिद्धान्तितम्—वैश्वदेवीत्यत्र तद्धितस्य सम्बन्ध्यर्थकतया वैश्वदेवीपद—आमिक्षापदयोः समानार्थकतया तद्धितरूपश्रुति-(शब्द) कृतः श्रौतः सम्बन्धः । भिन्नार्थकवाजिपदोपस्थापितवाजिनेन तु वाक्यीयः सम्बन्ध इति वाक्यापेक्षया श्रुतेर्बलवत्त्वात् वैश्वदेवयागानुवादेनान्तरङ्गतया श्रौताऽमिक्षारूपद्रव्यगुणकं कर्मैव पूर्वं विहितं स्यादिति निराकाङ्क्षत्वाद् वाजिनस्य तत्र सम्बन्धाभावेन वाजिनगुणकं कर्मान्तरमेव स्यादित्युक्तम् । तथाच श्रौतत्वनिर्वाहाय तद्धितस्य सम्बन्धिवाचकत्वमावश्यकम् । वक्ष्यमाणेति—वक्ष्यमाणेन द्विपञ्चाशत्तमकारिकाघटकेन 'जायन्ते' इत्यनेन 'सिद्धान्ते तु' इति पञ्चाशत्तमकारिकाघटकमन्वितमित्यर्थः । तदाह—सिद्धान्त इति—वैयाकरणसिद्धान्त इत्यर्थः ।

दर्पणव्याख्या

मीमांसकमतमुपन्यस्यति—*यत्त्विति* । *अत्र* दण्डित्वमित्यादौ । *स्वसमवेतः*—त्वादिप्रकृत्यर्थसमवेतः । नीलत्वमित्यादौ नीलादिगुणवन्न सम्भवति यतोऽतः सम्बन्धस्यैव भावप्रत्ययवाच्यत्वमाश्रितमित्यर्थः । दण्डादेः प्रकृत्यर्थांशे प्रकारत्वेऽपि प्रकृत्यर्थासमवेतत्वेनाभावत्वादिति भावः ।

सम्बन्धिवाचकत्वेनेति "तदस्यास्त्यस्मिन्" (पा० सू० ५ । २ । ९४) इति मतुपः सम्बन्धे विधानेऽपि, "दण्डी पुरुषः" इति सामानाधिकरण्यानुरोधात् सम्बन्धिवाचकत्वस्यावश्यकत्वादिति भावः । *गत्यभावाभावादिति* सम्बन्धस्यैव भावत्वसम्भवादिति भावः । *आदावेवेति* एवम् 'वैश्वदेवी' इत्यादिसामानाधिकरण्यस्योक्तरीत्यैवोपपत्तेरित्यन्तग्रन्थेन भूषणे इत्यर्थः । *तवापीति* वैयाकरणस्यापीत्यर्थः । *इदम्*—क्वचिज्जात्यादिवाचकत्वम्, क्वचित् सम्बन्धवाचकत्वमित्येवं रूपं वैषम्यमित्यर्थः ।

Sri Gargeshwari Digital Foundation

प्रकृतिजन्यबोधे प्रकार इत्यत्र पक्षद्वयं स्थितमिति योजना ॥ ५० ॥

तौ पक्षावाह—

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम् ।
धर्म्ममात्रं वाच्यमिति यद्वा शब्दपरा अमी ॥ ५१ ॥
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते ।

प्रयोगे उपाधिर्निमित्तं प्रकृत्यर्थप्रकारताम्=प्रकारतया भासमानं धर्म्मं वाच्यतया आश्रित्य त्वादयो जायन्ते । प्रकृतिजन्यबोधे प्रकारस्त्वाद्यर्थ इति यावत् ।

प्रभा

प्रकृतिजन्येति—प्रकृतिनिष्ठशक्तिज्ञानजन्येत्यर्थः । तेन गङ्गापदान्न तटत्वे त्वादिः । इत्यर्थ इति—अतः परम् 'प्रकृतिजन्यबोधे प्रकारः सम्बन्धरूपो वा जातिरूपो वा तत्र नाग्रह इति भावः' इति लिखितपुस्तके पाठः । क्वचित् 'सप्रकृतिजन्यबोधप्रकारः क इत्यत्र पक्षद्वयं स्थितमिति योजना' इति पाठः ॥ ५० ॥

तौ पक्षाविति—द्वित्वविशिष्टत्वेन निर्दिष्टयोः पक्षयोः स्वरूपमाहेत्यर्थः । सामान्यतो निर्दिष्टौ विशेषत आहेति यावत् । प्रयोगे=तत्तच्छब्दानामर्थबोधनायोच्चारणे कर्त्तव्ये । निमित्तमिति—कारणमित्यर्थः । अर्थगतं यं धर्मं दृष्ट्वा त्वादिप्रकृतेः प्रयोगस्तं धर्ममिति यावत् । यथा घटशब्दो जातिमादायार्थबोधनाय प्रवर्तत इति घटत्वं जातिः । गुणमात्रवृत्तिभ्योऽपि रूपादिभ्यो भावप्रत्यये रूपत्वादिशब्देन जातिरेवाभिधीयते । ये तु शुक्लादयो गुणिवाचकास्तेभ्यो गुणे प्रत्ययः । गुणपरत्वे तु जातावेव । अणुमहद्ध्रस्वदीर्घादिभ्यो नित्यं परिमाणिवाचिभ्योऽपि परिमाणरूपे गुणे एव । 'पाचकः' इत्यादौ क्रियाप्रकारकबोधात्पाचकत्वमित्यादिना विशेष्यतया क्रियैव वोच्यते । एवमेव सर्वत्र यथानुभवं द्रष्टव्यम् । प्रकारतामापन्नमित्यर्थस्तदाह—प्रकारतयेति ।

दर्पणव्याख्या

ननु प्रकृतिजन्यबोधप्रकारकत्वेनैवोपाधेः संग्रहे तस्य पृथगुपादानं व्यर्थमत आह—*प्रकृतिजन्येति* । स च प्रकृत्यर्थवृत्तिरसाधारणो धर्मस्तस्मिन्नसाधारणत्वम्—तदितरावृत्तित्वे सति सकलतद्वृत्तित्वम् । सत्यन्तोपादाने द्रव्यत्वादेर्घटासाधारण्यम्, विशेष्योपादानाच्च तद्व्यक्तित्वादिनिरासः । तेन रूपेण धर्मो भावप्रत्ययवाच्यः । तत्र तत्पदार्थस्य घटादेस्त्वादिप्रकृत्यैव लाभादनन्यलभ्य इतरावृत्तित्वादौ भावप्रत्ययस्य शक्तिः । तत्रापीतरवृत्तित्वमभावः । साकल्यं वृत्तिमच्च विशकलितमर्थः । इतरवृत्तित्वप्रतियोगिकाभावस्यातिप्रसक्तत्वादितरवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वाद् घटत्वादौ बाधाच्च विशिष्टस्य शक्यत्वासम्भवात् । अत्र च प्रकृतिजन्यबोधे येन सम्बन्धेन प्रतिपाद्यतावच्छेदकधर्मस्य प्रकारता तेन सम्बन्धेनेतरावृत्तित्वं वृत्तिमत्त्वञ्च बोध्यम् । नातः कालादौ कालिकादिसम्बन्धेन घटत्वस्य वृत्तावपि क्षतिः । नवा घटत्वमित्यादौ कम्बुग्रीवादिमत्त्वस्य भानम् । प्रमेयत्वमित्यादौ त्वितरावृत्तित्वांशो न भासते, अप्रसिद्धत्वात्, किन्तु सकलप्रमेयवृत्तित्वमात्रम् । एवम् 'एकत्वम्' इत्यत्र साकल्यांशोऽपि । नच विशिष्टस्यानतिरिक्तत्वमते गुणान्यत्वविशिष्टसत्त्वमित्यादौ विशिष्टसत्त्वे विशिष्टसदितरावृत्तित्वस्य महत्त्वमित्यादौ सकलमहद्वृत्तित्वस्य महत्परिमाणादौ चासम्भव इति वाच्यम्, तदितरत्वव्यापकात्यन्ताभावप्रतियोगितावच्छेदकतद्वृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वे दलद्वयतात्पर्य्येणादोषात् । तत्राद्यदलं घटत्वमित्यादौ द्रव्यत्वादेरसाधारण्यवारणायेति भावः ॥ ५० ॥

प्रयोग इति शब्दप्रवृत्तावित्यर्थः । *निमित्तमिति* यद्धर्मवत्त्वेन ज्ञातेऽर्थे यश्शब्दः प्रयुज्यते स

SGDF Sri Gargeshwari Digital Foundation

ननु 'घटत्वम्' इत्यत्र प्रकारत्वात् तदुत्तरभावप्रत्ययेन घटत्वत्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह—धर्ममात्रमिति, नत्वत्र लघुगुरुविचार इत्यभिप्रायः । तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्व-घटत्वत्वादिरूपत्वात् ।

प्रभा

घटत्वस्यापीति—तच्च सकलघटवृत्तित्वे सति घटेतरावृत्तित्वरूपम्, तदेव घटत्वपदशक्यतावच्छेदकम्। घटत्वत्वस्य गुरुरूपतया शक्यतावच्छेदत्वमयुक्तमत आह—नत्वत्रेति—अत्र भावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतस्य प्रतीतिरसाधारणधर्मत्वेन। तत्त्वञ्च तदितरावृत्तित्वे सति सकलतद्वृत्तित्वरूपम्। तत्र वृत्तिता च प्रकृतिनिष्ठशक्तिभास्यसम्बन्धावच्छिन्ना ग्राह्येति न कालिकसम्बन्धेन वृत्तित्वमादाय दोषः । यद्यप्येतादृशासाधारणधर्मत्वस्य प्रमेयत्वादावव्याप्तिः, प्रमेयातिरिक्तस्याप्रसिद्धत्वात्, तथापि तत्पदजन्यबोधीयविषयतावच्छेदकत्वे सति तादृशविषयतानवच्छेदकभिन्नस्यैवासाधारणधर्मस्य ग्रहणेनादोषात् । अस्ति च प्रमेयत्वादौ प्रमेयपदजन्यबोधीयविषयतावच्छेदकत्वम्, तत्पदजन्यबोधीयविषयतानवच्छेदकघटत्वादिभिन्नत्वञ्चेति न तत्र दोषः। एवमेव सत्तातो विशिष्टसत्त्वस्यानतिरिक्तत्वमते 'गुणान्यत्वविशिष्टसत्त्वम्' इत्यादौ विशिष्टसत्त्वे विशिष्टसदितरावृत्तित्वस्य, 'महत्त्वम्' इत्यादौ महत्परिमाणादौ सकलमहद्वृत्तित्वस्यासम्भवेऽपि दोषः परिहरणीयः । एतेन 'एकत्वम्' इत्यादौ दर्पणोक्ता परिमाणादेर्भानापत्तिरपि निरस्ता । 'कम्बुग्रीवादिमत्त्वम्' इत्यादौ गुरुधर्मस्यापि प्रतीतेः सर्वजनानुभवसिद्धतया 'घटत्वत्वम्' इत्यादौ गुरुधर्मस्यापि भावप्रत्ययवाच्यत्वमिष्टमेव ।

वस्तुतस्तु गौरवाभाव एवेत्यत आह—तत्तद्व्यक्तीति—घटरूपव्यक्तिविशिष्टं घटत्वम्, घटत्वरूपव्यक्तिविशिष्टम्—घटत्वत्वम्, इति स्ववृत्तित्वादिसम्बन्धेन व्यक्तिरेव प्रकारः। एवञ्च घटत्वपटत्वादिरूपभावप्रत्ययान्तपदवाच्या ब्रह्मसत्तारूपा जातिरेवेति तस्या अखण्डत्वान्नास्तिधर्ममात्रस्य वाच्यत्वे गौरवमिति भावः ।

अपरे तु-आविद्यिको धर्मविशेषः, अविद्या, ब्रह्मसत्तैव वा जातिरिति स्वीकारादखण्डमेव भावप्रत्ययवाच्यमित्याहुः । यद्यप्यत्र पक्षे जातेरेकत्वेन 'घटत्वम्' इत्यादौ पटस्यापि प्रकारताऽऽपत्तिः, तथाऽपि घटस्यैव तत्रोपस्थितत्वात् प्रकारत्वम् नतु पटस्येति न दोषः, पटादेः शब्दादनुपस्थितौ शाब्दबोधे भानासम्भवात्।

दर्पणव्याख्या

धर्मस्तच्छब्दप्रवृत्तौ निमित्तमित्यर्थः । स दामोदरत्वमित्यादौ जातिः, शुक्लत्वमित्यादौ गुण एवेति । *प्रकारत्वादिति* घटत्वासाधारणधर्मत्वादित्यर्थः । *लघुगुर्विति* अयं भावः—धर्मस्यासाधारणधर्मत्वेन वाच्यत्वेऽप्येकत्वमित्यादौ परिमाणादेर्भानापत्तिः, उक्तासाधारण्यस्य परिमाणे सत्त्वात् । नच प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टसमवायसम्बन्धेन तदितरावृत्तित्वं तद्वृत्तित्वञ्च विवक्षितं । नच तेन सम्बन्धेन परिमाणं तत्र वृत्तीति नोक्तदोष इति वाच्यम्, तथा सत्यनन्तशक्तिकल्पनावश्यकत्वे तत्तद्धर्मत्वेनैव धर्मे शक्तिरस्तु, किमितरावृत्तित्वादिगौरवसहिष्णुतया ।

तदुक्तं गुणदीधितौ—पृथक्त्वमित्यादौ प्रकृत्यर्थतावच्छेदकगुणान् भावप्रत्ययः प्रतिपादयति । प्रतीतिस्तु तद्रूपेण धर्मत्वेन वेत्यभिप्रेत्याह मूले—*धर्ममात्रमिति*—अस्य तत्तद्रूपेण, धर्मत्वेन वेति शेषः । एतेन भावशक्तत्वादिप्रत्ययेन कम्बुग्रीवादिमत्त्वमित्यादौ गुरोरपि धर्मस्य कम्बुग्रीवादिमत्त्वस्य बोधनेन तद्वद् घटत्वमित्यादावपि गुरोर्धर्मस्य त्वप्रत्ययेन बोधनसम्भवादाशङ्का निःसारेत्यपास्तम् । धर्मस्य भावप्रत्ययवाच्यत्वे सम्मतिमाह—*तत्तद्व्यक्तीति* तत्तद्व्यक्त्युपलक्षितेत्यर्थः । *घटत्वघटत्वत्वादिरूपत्वात्* घटघटत्वपदोत्तरत्वप्रत्ययार्थत्वादित्यर्थः । जातेरुक्तसत्तात्मकत्वे भावप्रत्ययार्थ-

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थश्च धात्वर्थश्च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥

इति वाक्यपदीयात् । उक्तञ्च "तस्य भावस्त्वतलौ" (पा० सू० ५ । १ । ११९) इति सूत्रे वार्त्तिककारैः—"यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ" इति ।

यस्य गुणस्य=विशेषणतया भासमानस्य, भावात्=आश्रयत्वात् , द्रव्ये = विशेष्ये, शब्दनिवेशः = शब्दप्रवृत्तिः, तस्मिन् वाच्ये त्वतलावित्यर्थः । तथाच रूपादिशब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायाम् , घटादिशब्देभ्यो जातौ प्रत्ययः, रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात् । पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः ।

प्रभा

तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव जातित्वे प्रमाणमाह—सम्बन्धिभेदादिति—सम्बन्धिभेदादित्यस्य व्यक्तिभेदादित्यर्थः । भिद्यमाना=व्यक्तिरूपोपाधिना पृथक्त्वेन प्रतीयमाना । तस्याम्=ब्रह्मसत्तायाम् । व्यवस्थिताः=तामेव प्रवृत्तिनिमित्तमादाय स्वार्थबोधेन नियताः । व्यवस्थामेवाह—तामिति । धात्वर्थश्चेति—धातुवाच्यपचित्वादिजातिरेव । सा च क्रमिकाधिश्रयणाद्यनेकव्यक्तौ वर्तमाना फूत्काराद्यनेकव्यक्तिभिर्व्यज्यते तदुक्तम्—

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् । इति ।

नित्या=प्रागभावाप्रतियोगिनी । महान्=आत्मा प्रपञ्चाधिष्ठानतया महान् । ताम्=तत्तद्व्यक्तिवर्तिनीं सत्ताम् । गुणस्येति—गुणशब्दोऽत्रोपकारकपरः । इतरव्यवच्छेदक एवोपकारः । विशेषणतयेति—तदुक्तं कैयटेन—'गुणशब्देन यावान् कश्चित् पराश्रयो भेदको जात्यादिः सर्व इह गृह्यते' इति । शुक्लेति—शुक्लशब्दो गुणपरः 'शुक्लो गुणः' इति ततो गुणत्वव्याप्यजातौ भावप्रत्ययः । शुक्लत्वं जातिः । 'शुक्लो घटः' इति गुणिपरत्वे गुणे शुक्लत्वं गुणः । अण्वादिशब्दास्तु गुणिपरका एवेति तेभ्यो गुणे एव त्वादयः । तस्याम्=क्रियायाम् । पाचकादिशब्दानां क्रियाकारकभावरूपसंसर्गप्रकारकशक्तिवादिमते तु क्रियाकारकसंसर्ग

दर्पणव्याख्या

त्वे च मानमाह—*सम्बन्धिभेदादिति*। 'जाति पदार्थः' इति कल्पे साधकमिदम् । सम्बन्धिभेदात्—अनुयोगिभेदात् , भिद्यमाना=गवेतरासमवेतत्वे सति सकलगोसमवेतत्वादिना तद्व्यक्त्युपरागेण वा पार्थक्येन प्रतीयमाना गवादिनिष्ठा ब्रह्मसत्तैव जातिरित्युच्यते । तस्यां सर्वे शब्दा वाचकत्वेन व्यवस्थिता इत्यर्थः । तदेव व्यक्तीकरोति—*तामिति* तां तत्तद्व्यक्त्युपरक्तां सत्तामित्यर्थः ।

धात्वर्थमिति आकृत्यधिकरणन्यायेन, "जातिमन्ये क्रियामाहुः" इति पक्षाभिप्रायेण वा । महानित्यात्मविशेषणम् । क्वचिज्जात्यादिः, क्वचित् सम्बन्धार्थ इत्युक्तार्थे वार्त्तिकं प्रमाणयति—*उक्तञ्चेति* गुणशब्दस्य वैशेषिकाणां रूपादिष्वेव प्रसिद्धेः । प्रकृतोपयुक्तार्थपरतामाह—*विशेषणतयेति* । तथाच प्रकृते गुणपदमुपसर्जनीभूतार्थपरमिति भावः । पर्य्यवसितमाह—*तथाचेति* । रूपादीत्यादिना रसादेः, गुणपरशुक्लादेश्च सङ्ग्रहः । *बोधजनकत्व इति* बोधजनकत्वमत इत्यर्थः । व्यपेक्षावादे क्रियाकारकभावसम्बन्धेन कृदर्थकर्त्रादौ धात्वर्थस्यैव प्रकारतया भानोपगमादिति भावः ।

'संसर्गप्रकारकबोधजनकत्वम्' इति मते च संसर्ग इति व्यवस्था सूपपादेति भावः। तत्र जातिवाचकानां व्यक्तय एव शक्यताऽवच्छेदिकाः। तथाच 'घटत्वम्' इत्यत्र 'घटवृत्तिरसाधारणो धर्म्मः' इति बोध इत्यादि द्रष्टव्यम्।

पक्षान्तरमाह—यद्वेति—"यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति, स तेषां भावः" इति वार्त्तिकोक्तेः। यद्वाशब्दस्तत्सूचनप्रयोजनकोऽपि। भवन्ति=वाचकत्वेन प्रवर्त्तन्ते इति

प्रभा

एव पाचकत्वादिपदवाच्यस्तदाह—संसर्गप्रकारकेति। तत्रेति—घटकत्वं त्रलर्थः। भावप्रत्ययान्तघटकानां जातिवाचकानामित्यर्थः। व्यक्तय एवेति—घटत्वे व्यक्तिरूपघटत्वत्वस्य प्रकारीभूतत्वादिति भावः। शक्यतावच्छेदिका इति—घटत्वादौ स्ववृत्तित्वसम्बन्धस्य सत्त्वात्तेन सम्बन्धेन व्यक्तय एव शक्यतावच्छेदिका इति भावः। तत्र तत्र त्वाद्यर्थं निरूप्य शाब्दबोधप्रकारमाह—तथाचेति। 'घटत्वम्' इत्यादौ स्वेतरासमवेतत्वविशिष्टनिखिलस्वसमवेतसम्बन्धेन प्रत्ययार्थे धर्मे व्यक्तेः प्रकारतया तत्राप्यसाधारणधर्मत्वं सुलभम्। एतदभिप्रायेणैवासाधारणो धर्म इति बोधे उक्तम्। तेन न द्रव्यत्वादिनिष्ठशक्तेर्घटावच्छिन्नत्वम्, स्वेतरासमवेतत्वसम्बन्धेन द्रव्यत्वस्य वृत्तित्वाभावात्। नच घटत्वादौ व्यक्तीनां शक्यतावच्छेदकत्वे तदानन्त्यादननुगमः, गोत्वादीनामेवानुगमकस्य सत्त्वात्। असाधारणधर्मत्वेन शक्तिस्तु न त्वादीनाम्, तस्येतरावृत्तित्वविशिष्टसकलप्रकृत्यर्थवृत्तित्वरूपत्वेन गौरवात्। पक्षान्तरमाह—यद्वेति—'यद्वा शब्दपरा अमी' इति कारिकायां यद्वाशब्देन पक्षान्तरमाहेत्यर्थः। वार्तिकोक्तेरिति—'तस्य भावस्त्वतलौ' (५।१।११९) इति सूत्रे वार्तिकोक्तेरित्यर्थः। तत्सूचनेति—कारिकायां यद्वाशब्दः पक्षान्तरं द्योतयन्नपि कारिकाकृता यद्वाशब्दघटितस्य वार्तिकस्याध्ययनाध्यापनकाले स्मरणायोक्त इति भावः। वार्तिकस्वरूपञ्च 'यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावस्तदभिधाने' किमेभिस्त्रिभिर्भावग्रहणैः क्रियते। एकेन शब्दः प्रतिनिर्दिश्यते, द्वाभ्यामर्थ इति। यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थ इति। 'तदभिधाने वा त्वतलौ भवत इति वक्तव्यम्' इति। भावा इति—'भवतेश्चेति वक्तव्यम्' इति कर्तरि णप्रत्ययः। धातूनामनेकार्थत्वात् प्रवृत्त्यर्थकोऽत्र भूधातुः। प्रवृत्तिश्च प्रकृते प्रयोगरूपैव। एवञ्च भावशब्दः शब्दपर्य्याय इत्याह—

दर्पणव्याख्या

स्वसिद्धान्तमनुसृत्याह—*संसर्गप्रकारकेति*। *सूपपादेति* भावप्रत्ययो जातावेवेत्याद्यनियमादिति भावः। *तत्रेति* जात्यादिवाचकभावप्रत्ययेषु मध्ये इत्यर्थः। *जातिवाचकानामिति* अर्थनिष्ठशक्तेरिति शेषः।

गुणाद्यात्मकभाववचनानां शुक्लत्वादिशब्दानां जातेः शक्यतावच्छेदकत्वसम्भवादाह—* जातिवाचकानामिति * भावप्रत्ययानामिति शेषः। * अवच्छेदिका इति * उपस्थितत्वाद् घटत्वादिजातिनिष्ठशक्तेः स्वेतरावृत्तित्वावच्छिन्ननिखिलस्ववृत्तित्वरूपाधेयत्वादिसम्बन्धेनावच्छेदिका इत्यर्थः। तेन न द्रव्यत्वादिजातिनिष्ठशक्तेर्घटावच्छिन्नत्वम्। अवच्छेदकानुगमकञ्च घटत्वादिकमेवेति भावः। पर्य्यवसितबोधमाह—*घटवृत्तिरिति*। * पक्षान्तरमिति * तत्तच्छब्द एव भावप्रत्ययवाच्य इति मतान्तरमित्यर्थः। "अथ कस्माद्गौरित्युच्यते गौरित्येव हि गौर्गवि वर्त्तते इत्यौकिथकाः" इति निरुक्तमप्येतत्कल्पे उपष्टम्भकं बोध्यम्। * तत्सूचनप्रयोजनकोऽपीति * यद्वा शब्दघटितोक्तवार्तिकसूचनप्रयोजनकोऽपीत्यर्थः। अपिना पक्षान्तरसङ्ग्रहः। वार्त्तिके "स्वेनार्थेन भवन्तीत्यत्र स्वशब्दस्यात्मीयवचनतया आत्मीयार्थेन जात्यादिन

भावाः = शब्दाः । स्वेन = रूपेण = अर्थेन भवन्ति = प्रवर्त्तन्ते । अतः स तेषां भावः = प्रवृत्तिनिमित्तमित्यर्थः । अयं भावः—अर्थवच्छब्दोऽपि द्रव्ये प्रकारः । हरिहरनलेक्ष्वाकुयुधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारकबोधस्य सर्वसिद्धत्वात्, अन्यथा वनौषधिवर्गादेर्नागरिकान् प्रत्यबोधकत्वापत्तेश्च । एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धः, नतु घटादिपदेष्विव तत्तज्जात्यादिभेदेन (रूपेण) । तथाचोभयमवच्छेदकम् । यस्य तथाशक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः ।

प्रभा

भावाः=शब्दा इति । स्वेन रूपेणेत्यत्र स्वशब्द आत्मीयवाची । तथाच भावाः=शब्दाः स्वस्य वाच्यो योऽर्थस्तेन भवन्ति=तत्रार्थे वाचकत्वेन प्रवर्तन्ते । अर्थप्रत्यायनार्थमेव शब्दप्रयोगाच्छब्दप्रयोगेऽर्थस्य करणत्वमिति तेनेति तृतीयान्तेन निर्देशः । स चार्थो द्विविधः—वाच्यः, प्रवृत्तिनिमित्तञ्च तत्र वाच्यं द्रव्यम् (आश्रयः) शब्दो वा प्रवृत्तिनिमितञ्च घटादिशब्देषु जातिः, पाचकादिशब्देषु क्रिया, राजपुरुषादिशब्देषु सम्बन्धः, डित्थादिषु संज्ञेति यथानुभवं बोद्धव्यम् । वार्तिके 'सः' इत्यस्य प्रवृत्तिनिमित्तरूपोऽर्थ इत्यर्थः, तदनुरोधेनैव शब्दानां प्रवृत्तेः । ननु अनेन वार्तिकेन शक्यतावच्छेदकमेव भावप्रत्ययवाच्यमिति लब्धं तर्हि को विशेष पूर्वपक्षादिति चेदत्रोच्यते—

पूर्वोक्तपक्षे घटत्वादिशब्देषु व्यक्तिरेव शक्यतावच्छेदिका । अत्र मते शब्द एव शक्यतावच्छेदक इति विशेषः । एवञ्चात्र पक्षे गोत्वमित्यस्य गोशब्दप्रवृत्तिनिमित्तम्, पाचकत्वमित्यस्य पाचकशब्दप्रवृत्तिनिमित्तम्, शुक्लत्वमित्यस्य च शुक्लशब्दप्रवृत्तिनिमित्तमिति चार्थ इति कैयटानुसारिणो वार्तिकाभिप्रायमाह । वस्तुतस्तु सर्वे भावाः=शब्दाः स्वेनात्मरूपेणार्थेन भवन्ति=अर्थकथने प्रवर्तन्तेऽतः स शब्द एव तेषां भावः=प्रवृत्तिनिमित्तमित्यर्थः । ननु शब्दस्य प्रवृत्तिनिमित्तत्वमशक्यम्, शक्ये प्रकारस्यैव तत्त्वादित्याशङ्कायामाह—अयम्भाव इति—जात्यादिरिव शब्दोऽपि द्रव्ये शक्यतावच्छेदकः । कृष्ण-नल-युधिष्ठिरादिशब्देषु तत्तत्पदवाच्यो यः कश्चिदासीदित्येव बोधात् । एवमेव सर्वत्राप्रसिद्धार्थकपदेषु अनुभवः सर्वसिद्ध इति शब्दोऽपि त्वादिप्रत्ययार्थः । तद्व्यक्तित्वेन रूपेण शक्तिग्रहस्त्वसम्भावित एव, तत्तद्रूपेणानुभवासम्भवात्, शब्दप्रकारिकाया एव तज्जन्योपस्थितेः । नागरिकानिति—तेन रूपेणानभिज्ञस्योपलक्षणमिदम् । उभयमवच्छेदकमिति—जात्यादिरूपम् शब्दरूपञ्चेत्यर्थः । शब्दस्य शक्तिसम्बन्धेन सङ्केतसम्बन्धेन वा शक्यतावच्छेदकत्वम् । जात्यादेस्तु यथार्हं समवायादिसम्बन्धेन । तथाशक्तिग्रह इति=जात्यादिरूपेण शक्तिग्रहः ।

दर्पणव्याख्या

प्रवर्तते इत्यर्थात् कथं पक्षान्तरपरता, कथं वार्थावृत्तेर्धर्मस्य शब्दस्य भावत्वञ्चेत्यस्य आशयं प्रकाशयति—

*** अयं भाव इति ***। जात्याद्यर्थस्य द्रव्यांशे विशेषणतायाः प्रसिद्धत्वात्तद्दृष्टान्तेन शब्दस्यापि तां साधयति—*** अर्थवदिति *** जात्यादिवदित्यर्थः । शब्दस्यार्थविशेषतायामसाधारणस्थलमाह—*** हरिहरेति ***। **'कश्चिदासीत्'** इत्यनेन जात्यादिप्रकारकबोधासम्भवो ध्वन्यते । हर्य्यादौ सन्निकर्षाभावेनानुपस्थितहरित्वाद्यवच्छेदेन शक्तिग्रहाभावेन तद्धर्मप्रकारकशाब्दबोधासम्भवादुपस्थितपदस्यैव विशेषणत्वमभ्युपगम्य शाब्दबोध उपपादनीयः । यथाच वृत्त्या तदुपस्थितिस्तथोपपादितं नामार्थनिरूपण इति भावः ।

*** अन्यथेति *** अर्थांशे शब्दस्य प्रकारत्वानभ्युपगम इत्यर्थः । आरण्यकानां सन्निकर्षेण जातिधर्मितावच्छेदकशक्तिग्रहसम्भवादुक्तम्—*** नागरिकानिति ***। *** एवमेवेति *** पदप्रकारेणैवेत्यर्थः । *** अप्रसिद्धेति ***। अगृहीतजातित्वादिविशिष्टशक्तिकपदेष्वित्यर्थः । *** जात्यादिभेदेनेति *** तद्विशेषेणेत्यर्थः । क्वचित्तु जात्यादिरूपेणैवेत्येव पाठः । *** उभयमिति ***। जात्यादिरूपं पदञ्चेत्यर्थः । *** अवच्छेदकमिति *** शक्त्यवच्छेदकमित्यर्थः ।

SGDF Digital Foundation

पदाप्रकारकः शक्तिग्रहस्तु विशिष्य नापेक्षितः। किन्तु 'इदं पदं क्वचिच्छक्तम्, साधुपदत्वात् इत्यादिरूप एवापेक्ष्यते इति विशिष्यागृहीतशक्तिकेभ्यस्तथैव बोधः। तथाच 'शब्दोऽपि त्वप्रत्ययार्थः' इति प्रपञ्चितं भूषणे ॥ ५१ ॥

इति वैयाकरणभूषणसारे त्वादिभावप्रत्ययार्थनिर्णयः ॥ ९ ॥

प्रभा

विशिष्येति—तद्व्यक्तित्वादिविशेषरूपेणेत्यर्थः। तथाच=शब्दस्यापि शाब्दबोधप्रकारत्वे च। णत्वं कुत्वमित्यादिषु णत्वावच्छिन्नाभिन्नो यो णपदवाच्यस्तत्र शक्तिः, कुपदादेश्च कवर्गाभिन्नो यः कुपदवाच्यस्तत्र शक्तिः। तथाच णत्वावच्छिन्नस्य णकारस्य, कवर्गस्य चाभेदेन प्रकारतया भासमानस्य प्रवृत्तिनिमित्तत्वेन तत्र त्वप्रत्यये णत्वमित्यस्य णकारः, कुत्वमित्यस्य कवर्ग इत्यर्थान्नासङ्गतिः। अत एव 'कुत्वं कस्मान्न भवति' इति 'वृद्धिरादैच्' इति सूत्रस्थं भाष्यं सङ्गच्छते। तस्य कवर्गाभिन्नो यः कुपदवाच्यस्तत्र शक्त्या 'कवर्गः कस्मान्न भवति' इत्यर्थात्। वस्तुतस्तु शब्दब्रह्मवादिनये धर्मी एक एव ब्रह्मरूपः। काल्पनिकजात्यादिधर्मभेदेनैव धर्मिणो भेदेन प्रतीयन्ते इति धर्मा एव शास्त्रविधेयाः, धर्मिणो नित्यतया विधातुमशक्यत्वादिति णत्वं कुत्वञ्च यथाश्रुतमेव साधु।

वस्तुतस्तु शब्दनित्यत्ववादिनये बुद्धिविपरिणामे एव शास्त्रतात्पर्य्यात् धर्मिणोऽपि तथाप्रतीतौ बाधकाभावः।

भावप्रत्ययभावस्य विस्तरेण निरूपणम्।
भवस्य कृपया पूर्णं प्रभायां बालकृष्णतः॥
"शुभम्भूयात्"

दर्पणव्याख्या

ननु जात्याद्यनुपस्थितिदशायाम् 'अयमर्थ एतत्पदवान्' इति शक्तिग्रहोऽप्यसम्भवदुक्तिकोऽत आह—* **पदाप्रकारक इति** *। * **विशिष्येति** * घटपदत्वादिरूपेणेत्यर्थः। यद्यपि 'सर्वे भावा' इति सर्वशब्दोपादानादेतत्कल्पे शब्दस्यैव सर्वशब्दप्रवृत्तिनिमित्तत्वमवगम्यते। तथापि घटत्वादिना गृहीतशक्तिकघटादिपदाद् घटत्वप्रकारकबोधस्य सार्वजनीनप्रसिद्धिसिद्धस्यापह्नोतुमशक्यतया प्रायशः प्रसिद्धार्थकस्थले शब्दाप्रकारबोधस्याननुभवेन चैतत्कल्पेऽपि जात्यादीनां शब्दप्रवृत्तिनिमित्तत्वमङ्गीकरणीयमेव।

वार्त्तिकन्तु भावशब्दस्याप्रसिद्धार्थकशब्दपरतया योज्यम्, तत्र निमित्तान्तराभावेन वार्तिकबलाच्छब्दस्यैव शब्दप्रवृत्तिनिमित्तत्वावधारणात्। यथा—कादिपञ्चकशक्तकुपदे। अत एव "अनुदात्तङ्डितः" (पा० सू० १।३।१२।) इति सूत्रेऽनुदात्तङितौ द्वावात्मनेपदमित्यस्य 'तङानौ द्वावर्थः" इति तत्र "सङ्ख्यातानुदेशः प्राप्नोति" इति यथासङ्ख्यसूत्रे भाष्यकृदुक्तं सङ्गच्छते। अन्यथा नवानां तङर्थत्वेनात्मनेपदवत्त्वेन बोधे सर्वेषामेकत्वेन तत्र च द्वावित्यस्यानुपपत्तिः स्पष्टैव। अत एव सारकृताऽपि 'उभयमवच्छेदकम्' इत्युपसंहृतम्—क्वचिच्छब्दोऽपीति तदाशय इति। कथं—तर्हि तत्र शक्तिग्रहोऽत आह—* **कित्विति** *। * **क्वचिच्छक्तमिति** * किञ्चिन्निष्ठशक्तिनिरूपकमित्यर्थः। तथाच नृपादिवर्णनप्रस्तावे नृपत्वादिनोपस्थितनलादीनां शक्त्यंशे भाने उपस्थितत्वान्नलादिपदानामपि तदर्थे भानमविरुद्धम्' इदमेतच्छक्यम्' इत्याकारकार्थशक्तिग्रह एव विशेषरूपेणोपस्थितेस्तन्त्रत्वादिति भावः। * **तथैव बोध इति** *

Digitized by Siddhanta eGangotri Gyaan Kosha Foundation

॥ अथ देवताप्रत्ययार्थनिर्णयः ॥

"सास्य देवता" [पा० सू० ४ । २ । २४] इत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः । 'ऐन्द्री' 'वैश्वदेवी' इत्यादौ इन्द्रादेर्देवतात्वोपस्थापकान्तराभावात् ,

प्रभा

स्मृतार्थविषयकोपेक्षानर्हत्वरूपप्रसङ्गसङ्गत्या त्वादेस्तद्धिततया तेन स्मृतदेवतादितद्धितार्थेष्वपि मीमांसकादिवैमत्यात् तन्निर्णेतुमाह—सास्य देवतेति—प्रथमोपस्थितापत्याद्यर्थकतद्धितेषु विप्रतिपत्तेरभावात्तदर्थविचारोपेक्षा । देवताद्यर्थककतिपयतद्धितेषु नानापक्षदर्शनात्तन्निर्णय आवश्यक इति भावः । प्रथमान्ताद्देवतोपाधिकात्षष्ठ्यर्थेऽणादय इत्यर्थकस्य 'सास्य देवता' इत्यस्योदाहरणे देवताविशिष्टं देयं प्रत्ययार्थः । 'देवता' इत्यत्र तु अत एव निर्देशात् स्वार्थे देवशब्दात्तल् । देये हविरादौ देवतावैशिष्ट्यञ्च 'स्वस्वामिभावसम्बन्धेन' 'स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन' वा बोध्यम् । मन्त्रे देवतावैशिष्ट्यञ्च स्वोद्देश्यकत्यागकरणत्वेन श्रुतिबोधितत्वेन । नच मन्त्रं विनाऽपि हविःप्रक्षेपादिक्रियासम्भवात्तस्य करणत्वासम्भवः, त्यागाङ्गव्यापारकत्वरूपकरणत्वस्य तत्रापि सम्भवात् । व्यापारश्चोच्चारणरूप एव । अत्र सम्बन्धित्वमेव प्रत्ययार्थतावच्छेदकम् । प्रत्ययार्थश्च क्वचिद्देयं क्वचिन्मन्त्ररूपश्चेति । देयं प्रत्ययार्थ इति मन्त्रस्याप्युपलक्षणम् । अत एव 'ऐन्द्रो मन्त्रः' 'आग्नेयी ऋक्' इत्यादि सङ्गच्छते ।

देवता च मन्त्रेण या स्तूयते सा, वेदबोधितत्यागकर्मीभूतद्रव्यविषयित्वावच्छिन्नस्वामित्वप्रकारितावदिच्छोद्देश्या वा । यथा 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस्कामः' इत्यत्र 'त्यागकर्मीभूतचरुनिरूपितस्वामित्ववान् सूर्यो भवतु' इतीच्छोद्देश्यतायाः सूर्ये सत्त्वात्तस्य देवतात्वम् । अत्र वेदपदस्य श्रुतिपुराणाद्युपलक्षणत्वेन

दर्पणव्याख्या

पदवाच्यत्वप्रकारक एवेत्यर्थः । एवकारेण जात्यादिप्रकारकबोधव्यवच्छेदः । इदञ्च कश्चिदर्थो नलादिपदशक्यः, अर्थत्वादित्यानुमानिकशक्तिग्रहाभिप्रायेण । उक्तोपनीतपदशक्तिग्रहे त्वर्थविशेष्यकबोधानुपपत्तिरेव । शक्तिज्ञानपदार्थोपस्थितिशाब्दबोधानां समानप्रकारकत्वनियमादित्यवधेयम् ।

नैयायिकास्तु—नलादिपदानामपि विशिष्य शक्तिग्रहो नानुपपन्नः, यत्र नलत्वादिसम्बन्धेन यत्किञ्चिद्धर्मवत्त्वधीस्तद्विषयीभूतनलत्वादेः शक्तिग्रहे धर्मितावच्छेकतया भाने बाधकाभावात् । यद्वा यत्र 'प्रमेयत्वेन प्रमेयवान्' इत्याकारा नलत्वादिविशिष्टबुद्धिः, ततश्च प्रमेयत्वांशे मोषदशायां स्वरूपतो नलत्वादिप्रकारकनलविशेष्यकस्मरणे बाधकाभावात्तद्विषयनलत्वादिना विशिष्य नलादौ नलादिपदशक्तिग्रहेण तत्तद्रूपेण नलादिपदान्नलादिबोधस्य सुलभत्वात् । नच प्रमेयत्वांशे मोषकल्पने मानाभावः, अनुभूयमानतत्तद्धर्मप्रकारकशाब्दबोधानुपपत्तेरेव मानत्वात् । कथमन्यथाऽनुभवात्मकसमूहालम्बनादेकपदार्थोद्बोधकासमवधानेऽन्यपदार्थस्मृतिः । अक्लृप्तस्यार्थांशे पदविशेषणत्वस्य कल्पनापेक्षया तादृशस्मृतौ प्रमेयत्वांशे मोषकल्पनस्यैव न्याय्यत्वात् , पदस्यार्थधर्मत्वाभावेन तस्य पदांशे विशेषणत्वासम्भवाच्च, तस्य पदस्य तस्मिन् पदे शक्तिरित्यर्थस्यालौकिकत्वेन पदप्रकारकबोधस्य सार्वत्रिकत्वासम्भवाच्चेत्याहुः ॥ ५१ ॥

इति वैयाकरणभूषणसारदर्पणे भावप्रत्ययार्थनिरूपणम् ॥ ९ ॥

ननु देवताया इन्द्रादिपदाल्लाभेन तदन्तर्भावेण तद्धितशक्तिकल्पनमनर्थकमत आह—* देवतात्वोपस्थापकेति *

SGDF

तेन रूपेणोपस्थितये शक्तिकल्पनाऽऽवश्यकत्वात् । अत एव--

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम् ॥ इति ॥

प्रभा

तद्बोधितमहेश्वरदुर्गादीनामपि देवतात्वं बोध्यम् । मन्त्रत्वञ्च वेदत्वे सति कर्मविधायकभिन्नवाक्यत्वरूपम्, वेदत्वे सति ब्राह्मणभिन्नत्वम्, अनुष्ठानकारकीभूतद्रव्यदेवताप्रकाशकवेदत्वं वा । वेदभिन्नानां मन्त्रत्वञ्च वैदिकमन्त्रमूलकत्वात्, मन्त्रत्वेन शिष्टप्रतीतिविषयवाक्यत्वाद्वा बोध्यम् । ब्राह्मणश्च कर्मविधायक वेदरूपः, मन्त्रतात्पर्यार्थप्रकाशको वेदभागो वा । तेन रूपेणेति—देवतात्वरूपेणोपस्थितय इत्यर्थः । इन्द्रपदस्येन्द्रत्वेनोपस्थापकत्वेऽपि 'इन्द्राभिन्नदेवोद्देश्यकं हवि.' इति शाब्दबोधः, तद्धितप्रत्ययस्य देवतायां शक्तिमन्तरा नोपपद्येतेति भावः । अत एवेति=देवताविशिष्टदेयस्य तद्धितार्थत्वादेव । मीमांसकैरुक्तम्—आमिक्षामित्यादीत्यर्थः । आमिक्षामिति—तप्ते पयसि दधियोगजा विकृतिरामिक्षा (छन्ना) इति लोके प्रसिद्धा । तथाच अमरः—

'आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः' । इति ।

एष तद्धित इति—'सा वैश्वदेवी आमिक्षा' इत्यत्र अण्रूपतद्धित इत्यर्थः । सान्निध्यादिति—सम्बन्धित्वेन तद्धितस्य देये शक्तिस्वीकारेऽपि देयस्यामिक्षात्वेन बोधस्तु आमिक्षापदसान्निध्यादेव, नतु तेन रूपेण तद्धितस्य शक्ति । तस्यैव=आमिक्षारूपदेयस्यैव । विषयेति—दानविषयीकरणमित्यर्थः । अयम्भावः—'सास्य देवता' इत्यत्र 'अस्य' इति पदस्य विशेषार्थबोधकतया तदर्थे विहितस्य तद्धितस्यापि विशेषार्थबोधकत्वेन भाष्यम् । तत्र कोऽसौ विशेष इत्याकाङ्क्षायामामिक्षारूपद्रव्यस्यैव .सान्निध्यात् 'स्वस्वत्वनिवृत्ति—परस्वत्वोत्पत्त्यनुकूलेच्छारूपदानविषयतया प्रतीतिरित्यर्थः । तथाच 'विषयार्पणम्' इत्यत्र विषयस्येति कर्मषष्ठ्यन्तेन त्यागरूपार्थकार्पणशब्दस्य षष्ठीसमासः । तत्रामिक्षया सह विषयस्याभेदेन नित्यसापेक्षतया

दर्पणव्याख्या

इन्द्रत्वेन रूपेण देवतोपस्थितावपि देवतात्वेन रूपेण तदुपस्थापकाभावादित्यर्थः । * तेन रूपेणेति *—देवतात्वेन रूपेणेन्द्रोपस्थितये इत्यर्थः । अन्यथा—

तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वा पुनः ।
देवतासङ्गतिस्तत्र दुर्बलं च परं परम् ॥

इति मीमांसकसिद्धान्तासङ्गतिरिति भावः । द्रव्यस्य देवतासम्बन्धित्वञ्च तदुद्देश्यकत्यागकर्मत्वं त्यागोद्देश्यत्वमपि वेदबोधिताबाधितद्रव्यस्वामित्वप्रकारेणेच्छाविषयत्वम् । तदेव च देवतात्वम् । नातो घृतादिसम्प्रदानब्राह्मणस्य त्यागोद्देश्यत्वेऽपि देवतात्वम् । तस्य तत्स्वामित्वाबाधात् 'ऐन्द्रो मन्त्रः' इत्यादौ मन्त्रस्य तद्देवताकत्वञ्च न तदुद्देश्यकत्यागकरणत्वम् , विनाऽपि मन्त्रमिच्छाविशेषात्मकत्यागोत्पत्त्याऽव्यभिचारात् । किन्तु त्यागाङ्गोच्चारणकत्वम् । एवञ्च देवतासम्बन्धी प्रत्ययार्थः, नतु तद्देवताकत्वम् , 'ऐन्द्रं हवि.' इति सामानाधिकरण्यानुपपत्तेः । स चामिक्षादिपदसमभिव्याहारे तत्तद्द्रव्येण प्रतीयते । 'देयं प्रत्ययार्थः' इति तु तस्यामिक्षादिपदसमभिव्याहारे दानकर्मत्वेनापि प्रतीतेरित्यभिप्रेत्योक्तमिति भावः । उक्तार्थे सम्मतिमाह—* अत एवेति * देवतासम्बन्धिनः प्रत्ययार्थत्वादेवेत्यर्थः । * सान्निध्यादिति * सा=आमिक्षा वैश्वदेवीत्यत्रामिक्षापदसमभिव्याहारादित्यर्थः । * विषयार्पणमिति * आमिक्षात्मकद्रव्यस्यैव देवतोद्देश्यकत्याग-

केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन् ।
नान्ययुक्तोऽग्निदैवत्यं प्रतिपादयितुं क्षमः ॥ इति च

मीमांसकैरप्युक्तमित्याशयेनाह—

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ॥ ५२ ॥
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥ ५३ ॥

एकदेशे = देवतारूपे । तच्च विशेषणमभेदेनेत्याह—अभेदश्चेति । ननु देवतायाः प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य

प्रभा

शब्दशक्तिस्वभावेन तादृशार्थबोधनक्षमत्वात् समासो बोद्धव्यः । तद्धितस्य देवतायाम्, देये च शक्तौ मीमांसकोक्त्यन्तरमपि प्रमाणयति—केवलादिति—अयम्भावः—यथा 'आग्नेयोऽष्टाकपालोऽमावास्यायाम्' इत्यत्राष्टसु कपालेषु कम्=जलं पालयतीति कर्तर्यणि कपालेषु यागीयपात्रविशेषेषु संस्कृतः पुरोडाशोऽग्न्यभिन्नदेवतासम्बन्धी उच्यते, तथा अग्नीषोमीयः पुरोडाश आग्नेयशब्देन ग्रहीतुं शक्यते न वेत्याशङ्कायामुक्तम्—केवलादग्नेः=अग्निशब्दात्परः समुच्चरन् देवतावाची तद्धितः सोमादियुक्ताग्निदैवत्यं हविः प्रतिपादयितुं न क्षमः । द्वन्द्वाद्विहितस्तद्धितो व्यासज्य (समुदाय) वृत्तिदेवतात्वमेव प्रतिपादयति । आग्नेयशब्देन च अग्निपर्याप्तदेवतात्वकहविष एव बोध इत्युभयदेवताकस्य हविषो नाग्नेयशब्देन ग्रहणम् । अत एव 'आग्नेयं चतुर्धा करोति' इति वाक्यविहितचतुर्धाकरणस्याग्नीषोमीयेषु हविःषु न प्रवृत्तिरिति तृतीयाध्यायस्य प्रथमपादे निरूपितम् । अनेनापि वचनेन देवताया देयस्य च तद्धितार्थत्वं स्पष्टमेवोक्तमिति । प्रत्ययार्थेति—'देवताविशिष्टं देयं प्रत्ययार्थः' वैशिष्ट्यञ्च—स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन । एकदेश इति—वृत्तिज्ञानजन्योपस्थितीयप्रकारतया भासमान इत्यर्थः । प्रकृत्यर्थः=अग्न्यादिरूपः ॥५२॥ अभेद इति—सामान्यविशेषयोरभेदान्वय इति नियमात् 'आग्नेयः' इत्यादिना 'अग्न्यभिन्नदेवतासम्बन्धि हविः' इत्यादिबोधः । अत्र सम्बन्धश्च स्वोद्देश्यकत्यागकर्मत्वरूपः । देयादेः सम्बन्धित्वेनैव बोधः, नतु विशेषरूपेण । अत एव वैश्वदेवी आमिक्षा इत्यादौ न पौनरुक्त्यम् । एकदेशत्वादिति—'पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेन' इति न्यायादिति भावः । अत्र पदार्थश्च वृत्तिज्ञानजन्योपस्थितीयमुख्यविशेष्यताश्रयीभूतोऽर्थो ग्राह्य इति न घटत्वादेः 'घटः' इत्यादौ पदार्थत्वम् । अत एव घटत्वादावभेदेन

दर्पणव्याख्या

कर्मत्वप्रतीतिरित्यर्थः । * केवलादिति * सोमादिपदासमभिव्याहृतात् । अग्नेः—अग्निशब्दात्, समुच्चरन्=प्रत्ययत्वात् अग्निशब्दात् पुरः प्रादुर्भवन् । "आग्नेयोऽष्टाकपालो भवत्यमावास्यायाम्" इत्यादौ । * नान्येति * सोमादिसाहित्यापन्नाग्निदेवतोद्देश्यकत्यागविषयं द्रव्यं प्रतिपादयितुं नेष्टे, किन्तु तद्देवताकमेवेति तद्भावः । तथाच देवताविशिष्टदेयस्य तद्धितार्थत्वं तेषामपि सम्मतमिति भावः ।

* प्रकृत्यर्थेति * 'पदार्थः पदार्थेनान्वेति' इति व्युत्पत्तेरिति भावः । अस्मिन् कल्पे च प्रकृत्यर्थस्याभेदसम्बन्धेन देवतारूपतद्धितार्थेऽन्वयः । तस्य च स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन द्रव्यरूपतद्धितापरपदार्थे इति बोध्यम् ॥ ५२ ॥

SGDF

तत्राभेदेनाप्यन्वय इत्याशयेनाह—देवतायामिति—तथाच पदार्थैकदेशतैव नास्तीति भावः ॥ ५३ ॥

प्रभा

नित्यपदार्थतान्वयाभिप्रायेण 'नित्यो घटः' इति न प्रयोगः। तथाच स्वेतरद्वद्विभक्तिभिन्नं पदं तत्प्रयोज्य-प्रकारताविशिष्टविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति स्वविशिष्टविशेष्यतासम्बन्धेन स्वजन्यो-पस्थितिः कारणम् इति कार्यकारणभावो बोध्यः। स्वेतरदित्यत्र स्वपदेन विशेष्यवाचकं पदं ग्राह्यम्। कार्यतावच्छेदकसम्बन्धे प्रकारतावैशिष्ट्यञ्च—स्वनिरूपितत्व—स्वाश्रयनिरूपितत्वाभाववद्वृत्तित्वोभयसम्बधेन। तथाच 'देवदत्तस्य गुरुकुलम्' इत्यादौ गुरुत्वनिष्ठविशेष्यतायां देवदत्तनिष्ठप्रकारतानिरूपितत्वस्य सत्त्वेऽपि स्वाश्रय (प्रकारताश्रय) देवदत्तनिरूपितत्ववद्गुरुत्ववृत्तित्वस्यैव सत्त्वात्, अगुरुपदार्थस्य गुरुत्वेऽन्वयाभिप्रायेण 'अगुरुर्गुरुः' इत्यादौ चोभयसम्बन्धेन गुरुभिन्ननिष्ठप्रकारताया उभयसम्बन्धेन विशेष्यतायां सत्त्वाच्च न दोषः। विभक्तिभिन्नत्वस्य निवेशेन 'प्रकृत्या चारुः' इत्यादौ तृतीयार्थाभेदस्य चारुत्वे स्वरूपेणान्वयेऽपि नाव्याप्तिः, विभक्तिप्रयोज्यत्वस्यैव सत्त्वात्। 'कारणतायां स्वजन्योपस्थितिः स्वविशिष्टविशेष्यतासम्बन्धेन कारणम्' इति कारणदले स्वपदेनोपस्थितिर्ग्राह्या। उपस्थितिवैशिष्ट्यञ्च विशेष्यतायां स्वनिष्ठजन्यतावच्छेदकत्व—स्वनिष्ठजन्यतावच्छेदकीभूतप्रकारत्वासामानाधिकरण्योभयसम्बन्धेन। तेन 'घटवान् तत्पदशक्यो घटश्च पटपदशक्यः' इति शक्तिज्ञानद्वयजन्यसमूहालम्बनात्मकोपस्थितौ 'नीलो घटः' इति बोधः सिद्ध्यति, घटनिष्ठप्रकारतायाः क्वाचित्कत्वेनोपस्थितीयजन्यतावच्छेदकत्वाभावात्। लक्षणसमन्वयस्तु 'नीलो घटः' इत्यादौ स्वेतरद् (विशेष्यवाचकपदेतरत्) विभक्तिभिन्नं नीलादिपदं तत्प्रयोज्या प्रकारता नीलादिनिष्ठा तद्विशिष्टा विशेष्यता घटादिनिष्ठा तादृशसम्बन्धेन नीलादिप्रकारकघटादिविशेष्यकः शाब्दबोधो घटादौ। स्व (घटपद) जन्योपस्थितिश्च स्व (उपस्थिति) विशिष्टविशेष्यतासम्बन्धेन घटे, इत्येवं बोद्धव्य इत्यन्यत्र विस्तरः। तत्र=देवतायाम्। देवतायामितीति—एकवृन्तगतफलद्वयन्यायेन देवतात्वेन देवतायाम् सम्बन्धित्वेन देये च शक्तिरिति भावः। नच शक्यतावच्छेदकभेदाच्छक्तेर्भेदः, अवच्छेदकभेदेऽपि उभयपर्याप्तावच्छेदकताया एकस्या एव स्वीकारेणावच्छेदकताभेदेनैव शक्तिभेदस्य स्वीकारात्।

बृहद्भूषणकारास्तु—उद्देश्यस्य प्रकृत्यैव लाभात् 'अग्नये' इत्यादौ यथा उद्देश्यत्वमात्रं चतुर्थ्यर्थस्तथा प्रकृते देवतात्वमेव प्रत्ययार्थः। तत्र प्रकृत्यर्थस्याग्न्यादेराधेयतासम्बन्धेनान्वयः। देवतात्वस्य च निरूपकत्वसम्बन्धेन प्रदेयेऽन्वयः। तथाच 'आग्नेयः' इत्यादौ 'अग्निनिष्ठदेवतात्वनिरूपकं हविः' इति बोध इत्याहुः। अत एव—

'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतासङ्गतिस्तत्र दुर्बलन्तु परं परम्॥

इति मीमांसकोक्तिः सङ्गच्छते। 'अग्नये हविः' इत्यादौ पृथक्पदोपस्थितहवीरूपपदार्थे चतुर्थ्या वाक्याद्देवतासम्बन्धलाभः, तद्धितेन तु श्रुत्यैव तत्सम्बन्धलाभ इति वाक्याच् श्रुतेर्बलवत्त्वोपपत्तिः। अथवा देय एव प्रत्ययार्थः। तत्र प्रकृत्यर्थस्य स्वनिष्ठदेवतात्वनिरूपकत्वसम्बन्धेनान्वयः। सम्बन्धविधयैवाग्न्यादेर्देवतात्वलाभः। तादृशसंसर्गे एव 'सास्य देवता' इति शास्त्रतात्पर्यम्, नतु देवत्वस्य प्रकारविधया भाने। 'देवतान्तात्तदर्थे यत्' (५-४-२४) इति सूत्रे 'तत्रेदं न सिद्ध्यति—पितृदेवत्यम्' इति। 'नैष दोषः, दिवेरैश्वर्यकर्मणो देवः, तस्मात् स्वार्थे तल्' इति भाष्यात् देवतात्वं जातिरिति प्रतीयते। अन्यथा 'नहि पितरो देवताः' इत्यत्र पितरोऽपि देवता एवेत्युक्तं स्यात्। यद्वा 'दिवेरैश्वर्यकर्मणो देवः' इत्युक्त्या मन्त्रकरणकह-

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या । नच देवतात्वेन रूपेणोपस्थितये सा कल्प्यते । प्रकृतेर्लक्षणयैव तथोपस्थितिसम्भवात् । उपसर्गाणां द्योतकत्वनये 'प्रजयति' इत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याह—

प्रदेय एव वा शक्तिः प्रकृतेर्वास्तु लक्षणा ।
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ॥ ५४ ॥

प्रभा

विस्त्यागजन्यस्वर्गादिफलातिरिक्तफलाश्रयत्वोद्देश्यत्वं देवतात्वम् । देवतानिष्ठं फलञ्च 'अस्येदं फलं भवतु' इतीच्छात्मकप्रीतिरेव । 'क इदं कस्मै अदात्' इति मन्त्रप्रयोज्यस्वामित्ववति प्रतिग्रहीतरि अतिव्याप्तिवारणाय हविस्त्यागे मन्त्रकरणकेति विशेषणम् । तथाच तादृगर्थस्य मन्त्रबोधितत्वेऽपि तत्र मन्त्रस्य करणताबोधकवचनाभावान्न दोषः । दर्शश्राद्धे मृतपत्नीनां तत्त्ववारणायोद्देश्यत्वनिवेशः, 'न योषिद्भ्यः पृथग्दद्यात्' इत्यादिना तासामुद्देश्यत्वनिषेधात् । नच दर्शश्राद्धे मन्त्रस्य करणत्वाभावात्पित्रादीनामपि देवतात्वानुपपत्तिः, 'अनुमतोऽस्य नमस्कारो मन्त्रः' इति गौतमस्मृतेस्तत्र नमस्कारस्यैव मन्त्ररूपत्वात् । अथवा 'मन्त्रस्तुत्यत्वं देवतात्वम्' । यद्वा समुदायशक्त्या देवताशब्दो दर्शपूर्णमासादौ यागे यत्सम्प्रदानत्वेन चोदितं तत्र सर्वत्र वर्तते न जातिवचन इति । अत एव 'वाय्वृतुपित्रुषसो यत्' 'कालेभ्यो भववत्' इत्युपपद्यते । यस्य वाक्यं स ऋषिः, याऽनेन बोध्यते सा देवता' इत्यनुक्रमणिकायामुक्तेः ॥ ५३ ॥

देवतात्वेनेति—प्रकृत्या इन्द्रत्वादिरूपेणोपस्थितावपि देवतात्वेन रूपेणानुपस्थितेरिति भावः । सा=शक्तिः । प्रकृतेः—इन्द्रादिशब्दस्य । लक्षणयैवेति—इन्द्राभिन्नदेवतात्वावच्छिन्ने लक्षणयैवेत्यर्थः । तथोपस्थितीति—देवतात्वेनोपस्थितीत्यर्थः । द्योतकत्वनय इति—स्वसमभिव्याहृतपदनिष्ठवृत्तिविषयकतात्पर्यग्राहकत्वनये इत्यर्थः । प्रकृष्टेति—शत्रुपराङ्मुखीकरणं जयः, उत्कर्षेण वर्तनं वा । तत्र प्रशब्दसमभिव्याहाराद्यथा प्रकृष्टजयस्य लक्षणया प्रतीतिर्भवति तथाऽत्रापि स्यादिति भावः । लक्षणेत्युक्तिः परवासनया एतन्मतेऽप्रसिद्धा शक्तिरेव । निरूढेतीति – निरूढेत्यस्य लक्षणायामन्वयः । निरूढा लक्षणेत्यर्थः । लक्षणायां निरूढात्वन्तु अनादिप्रयोगावच्छिन्नत्वमेव । तथाच लक्षणायाः प्रयोजनस्यापेक्षा नास्तीति भावः । यत्तु—माणवके संकेतितादग्निशब्दात् प्रत्ययोत्पत्तिवारणाय निरूढेत्युक्तिरिति तन्न,

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्त्तव्यो न शब्देषु तदुक्तिषु ॥ इति ॥

वाक्यपदीयेनैव समाहितत्वात् । युक्तञ्चैतत्—पुराणादिप्रसिद्धेषु निरूढेषु साधुषु सूत्रस्य चारितार्थेनासाधुषु यत्र कुत्रचित् संकेतितेषु शास्त्राप्रवृत्तेः । अत एव क्वचित्क्षत्रिये संकेतितब्राह्मणशब्दवाच्यत्वस्य सत्त्वेऽपि न तद्धनने 'ब्राह्मणो न हन्तव्यः' इत्यस्य विषयता, नापि 'ब्राह्मणमाणववाडवाद्यन्' इत्यस्य तत्र प्रवृत्तिः । पक्षा इति—देवताविशिष्टं देयं प्रत्ययार्थः । १ । देवता देयञ्च पृथक्प्रत्ययार्थः । २ । इन्द्राद्यभिन्नदेवतायां प्रकृतेर्लक्षणा, देयञ्च प्रत्ययार्थः । ३ । देवतात्वं देयञ्च प्रत्ययार्थः । ४ । इन्द्रादिर्देवता प्रकृत्यर्थः, देयं द्रव्यं प्रत्ययार्थः । ५ । इत्यादिपक्षा इत्यर्थः ।

दर्पणव्याख्या

द्योतकत्वनय इति वाचकत्वनये प्रकर्षस्योपसर्गार्थत्वेन तद्विशिष्टे धातोर्लक्षणाया अकल्पनेन दृष्टान्तत्वासम्भवादिति भावः । *प्रकृष्टजयवदिति* प्रकृत्यंशमात्रमादाय दृष्टान्तत्वं बोध्यम् ।

SGDF
Sri Gargeshwari Digital Foundation

नच 'ऐन्द्रं दधि' इत्यादौ द्रव्यस्य पदान्तराल्लाभात् कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यम्, पदान्तराश्रवणेऽपि तत्प्रतीतेः, 'ऐन्द्रं दधि' इति सामानाधिकरण्याच्च।

अन्यथाऽऽख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात्। मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु। द्रव्यं पदान्तराल्लभ्यत एवेति आख्यातस्य कर्तृवद्वाच्यत्वं माऽस्त्विति कुतो न शक्यते वक्तुमिति दिक्।

प्रभा

ऐन्द्रमिति—लक्षणया इन्द्राभिन्नदेवता प्रकृत्यर्थः, देयं द्रव्यं सम्बन्धि प्रत्ययार्थः। संसर्गश्चाकाङ्क्षालभ्यः। तथाच इन्द्राभिन्नदेवतासम्बन्धि (देयम्) हविरिति बोधः। द्रव्यस्य=देयहविरादिद्रव्यस्य। पदान्तरात्- दध्यादिपदात्। अयम्भावः-प्रत्ययस्य सम्बन्धिनि हविरादौ शक्तिर्निष्फला, सम्बन्धमात्रे शक्तिस्वीकारेऽपि सम्बन्धिनो दध्यादिपदादेव लाभात्। सम्बन्धित्वेन रूपेण देयस्य प्रतीतये सम्बन्धे एव शक्तिरुचितेति। पदान्तरेति—दध्यादिपदाश्रयणेऽपि देवतासम्बन्धिदेयप्रतीतेरित्यर्थः। सामानाधिकरण्यादिति—सम्बन्धमात्रार्थकत्वे 'ऐन्द्रं दधि' इति सामानाधिकरण्येनान्वयो नतु 'नामार्थयोरभेदान्वयः' इति व्युत्पत्त्या प्रत्ययार्थसम्बन्धस्याश्रयतारूपभेदेनान्वयस्य बाधादिति भावः।

ननु सम्बन्धिनी निरूढा लक्षणाऽस्तु, किं सम्बन्धिनि देये शक्तिकल्पनयेति शङ्कायामाह-अन्यथेति-सामानाधिकरण्येनान्वयस्य द्रव्यवाचकत्वाभावसाधकत्वे इत्यर्थः। न स्यादिति—अस्य वैयाकरणानां मते इत्यादिः, मीमांसकनैयायिकानां कर्तृवाचकत्वाभावस्येष्टापत्तेः, 'कृतिरेवाख्यातार्थः' इति नैयायिकस्य भावनैव तदर्थ इति च कस्यचिन्मीमांसकस्य च सिद्धान्तत्वात्। मीमांसकैर्देवतार्थकतद्धिते देवताविशिष्टं सम्बन्धिरूपं देयं प्रत्ययार्थ इति स्वीकृतं तन्मतमुत्तरीत्या कटाक्षयन्नाह—मीमांसकानामिति— तन्मते जातिमात्रस्य घटादिशब्दवाच्यत्वेऽपि शाब्दबोधे व्यक्तेराक्षेपाद्यथा भानं भवति तथैव देवतात्वमेव वाच्यमस्तु, आश्रयस्तु प्रकृत्या आक्षेपाद्वा प्रतीयेत। एवं सम्बन्ध एव प्रत्ययार्थोऽस्तु देयरूपसम्बन्धी तु आमिक्षादिपदाल्लभ्येत एव। तथाच न शब्दजन्यसामानाधिकरण्यविरोध इति भावः। पदान्तरादिति— आक्षेपादेरप्युपलक्षणमिदम्। कर्तृवदिति—मीमांसकमते यथा आख्यातस्य भावनैव वाच्या न तदाश्रयः कर्त्ता, तथा

दर्पणव्याख्या

*** लाभादिति *** समभिव्याहृतदध्यादिपदेन देवतारूपसम्बन्धिभानादित्यर्थः। ***कुतः पुनरिति*** "अनन्यलभ्यो हि शब्दार्थः" इति न्यायात्। किन्तु सम्बन्धार्थकत्वमेवोचितमिति भावः। ***तत्प्रतीतेरिति*** देवतासम्बन्धिप्रतीतेरित्यर्थः। तथाच तदनुपपत्त्या तद्धितस्य तदर्थकत्वमावश्यकमिति भावः।

पदान्तराश्रवणे सम्बन्धिप्रतीतेरप्यर्थनिर्णेयत्वादाह—***ऐन्द्रं दधीति*** सम्बन्धमात्रार्थकत्वे सामानाधिकरण्यानुपपत्तिरित्यर्थः। ***अन्यथेति*** उक्तानुपपत्तेस्तदसाधकत्वे इत्यर्थः। 'पचति देवदत्तः' 'पच्यते तण्डुलः' इत्यत्र सामानाधिकरण्यानुपपत्तिर्हि कर्त्रादिवाचित्वसाधिकेति भावः। वैयाकरणान् प्रतीयमापत्तिः। मीमांसकान् कटाक्षीकृत्याह—***मीमांसकानामिति*** तन्मते तत्तद्देवताकत्वरूपप्रत्ययार्थेन धर्मिण आक्षेपाल्लाभेन सामानाधिकरण्योपपत्तेरिति भावः। 'पदान्तरात्' इत्याक्षेपस्याऽप्युपलक्षणम्। ***वाच्यं मास्त्विति*** आख्यातस्य कर्त्तेव तद्धितस्य द्रव्यं वाच्यं मास्त्वित्यर्थः। इष्टापत्तौ 'आमिक्षां देवतायुक्ताम्' इति त्वत्सिद्धान्तभङ्ग इति भावः।

ननु तेषां कर्तुरनन्यलभ्यत्वान्न प्रत्ययवाच्यत्वम्, किन्तु प्राधान्यापत्तेरेव तत्त्वमत आह—*** दिगिति ***। तदर्थस्तु

SGDF Sri Gargeshwari Digital Foundation

देवतायां देवतात्वेन रूपेण। निरूढेति—अनुपपत्तिज्ञानापूर्वकत्वम् , अनादिप्रयोगावच्छिन्नत्वं

प्रभा

तन्मते तद्धितेऽपि स्यादिति कुतो न वक्तुं शक्यते इति भावः। तद्धितस्थले तथात्वस्येष्टापत्तिस्तु तैः कर्तुमशक्याः,

'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः'

इति तद्वचनविरोधात्। नन्वाख्यातस्थले 'प्रकृतिप्रत्ययौ' इति न्यायबलेन कर्तुः प्राधान्यापत्तिवारणाय वाच्यत्वं नेष्यतेऽत्र तु 'प्रकृतिप्रत्ययौ' इति न्याये 'भावप्रधानमाख्यातम्' इति निरुक्तानुरोधेन संख्याद्यन्वये तस्य व्यभिचारदर्शनेन च प्रत्ययार्थे आख्यातार्थातिरिक्तत्वेन संकोचात्प्राधान्यापत्तिवारणसम्भवः। अत एव तद्धितेन देवत्वोपस्थितिः प्रबला, चतुर्थ्या त्यज्यमानद्रव्योद्देश्यप्रतिग्रहीतुर्बोधेनार्थतो देवताप्रतीतावपि श्रुत्याऽनुपस्थितत्वेन दुर्बलत्वम् , चतुर्थ्या सम्प्रदानमात्रस्य बोधात्। एवं मन्त्रवर्णनरूपवाक्यार्थेन देवतात्वप्रतीतावपि तद्धितमात्रेण देवतात्वप्रतीतेर्मन्त्रवर्णनापेक्षया बलवत्त्वम्। तदुक्तम्—

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतासङ्गतिस्तत्र दुर्बलञ्च परं परम्॥ इति।

नन्वग्न्यादिपदैः शक्त्यैव देवतार्थलाभे 'देवतायां निरूढा लक्षणा' इत्युक्तिरसङ्गतेत्याशङ्कायामाह—देवतात्वेनेति—अग्न्यादिपदेनाग्नित्वादिना देवताया भानेऽपि देवतात्वेऽग्न्यादिपदानां शक्त्यभावेन देवतात्वप्रकारकबोधार्थं सा स्वीक्रियत इति भावः। नन्वनुपपत्तिज्ञानापूर्विकाया एव निरूढात्वे प्रवाहस्य घोषेऽन्वयानुपपत्त्या लक्षणायाम् 'गङ्गायां घोषः' इत्यादौ निरूढा लक्षणा' इति व्यवहारानुपपत्तिरत आह—अनादीति—अनादिर्यः प्रयोगः कर्मतासम्बन्धेन तदवच्छिन्नलक्ष्यार्थबोधिका लक्षणा निरूढेत्यर्थः। प्रयोगश्च ज्ञानानुकूलः शब्दोच्चारणरूपो व्यापारः। स च व्यापारः स्वजन्यफलाश्रयत्वरूपकर्मतासम्बन्धेन लक्ष्यार्थे

दर्पणव्याख्या

"प्रकृतिप्रत्ययार्थयोः" इति न्यायस्य सङ्ख्यादौ व्यभिचारेण तेन प्राधान्यापत्त्यभावात्। 'भावप्रधानमाख्यातम्" इति निरुक्तात्तस्याख्यातार्थातिरिक्तप्रत्ययार्थविषयकत्वोपगमाच्चेति। अत्रेदं बोध्यम्—तद्धितस्य देवतात्वाघटितार्थकत्वे "तद्धितेन चतुर्थ्या वा" इति न्यायस्य सर्वसिद्धस्यानुपपत्तिः। नच तद्धितस्य तदर्थकत्वेऽपि कथं तदपेक्षया चतुर्थ्या जघन्यत्वम्, त्यागोद्देश्यकरूपदेवताबोधकत्वस्योभयत्राविशिष्टत्वादिति वाच्यम्, नहि देवतासम्बन्धिदेयमात्रं तद्धितार्थः, किन्तु वेदबोध्यदेवतात्वघटितः। एवञ्च तद्धितार्थेन यागस्य देवतात्वांशे वेदबोध्यत्वावगाहित्वेन तदंशे अप्रामाण्यशङ्काया अनुदयात्तदिति विनियोजकतया बलवत्त्वं चतुर्थ्या तु तदंशे वेदबोध्यत्वानवगाहिबोधस्यैव जननेन तत्राप्रामाण्यशङ्कानिरासार्थमुपायान्तरस्यापेक्षणाज्जघन्यत्वम्।

यद्वा तद्धितेन देवतात्वेन रूपेण देवताबोधे "साऽस्य देवता" (पा० सू० ४। २। २४) इति स्मरणमस्ति। चतुर्थ्यास्तु देवतात्वे न स्मरणम्, "चतुर्थी सम्प्रदाने" इति (पा० सू० २। ३। १३) इति सम्प्रदान एव तत्स्मरणात्। सम्प्रदानत्वञ्च—त्यज्यमानद्रव्योद्देश्यकत्वे सति प्रतिग्रहीतृत्वम्। एवञ्च ततः सम्प्रदानत्वघटकतया देवतात्वप्रतीतावपि तद्धितादिव मुख्यतया देवतात्वानधिगमात् तस्यास्तद्धितापेक्षया जघन्यत्वम्। एवं मन्त्रवर्णादधिष्ठानप्रतीतावपि देवतात्वस्य साक्षादप्रतीतेर्मन्त्रवर्णस्य चतुर्थ्यपेक्षया जघन्यत्वं बोध्यम्। तद्धितस्य देवतार्थकत्वानभ्युपगमे तु तदसङ्गतिः स्पष्टैवेति।

नन्विन्द्रादिपदाच्छक्त्यैव देवतालाभे तत्र लक्षणाऽभ्युपगमो व्यर्थोऽत आह—* देवतात्वेन रूपेणेति *। तथाच "शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा" इति वृद्धोक्तेर्देवताया इन्द्रस्वरूपायाः शक्यत्वेऽपीन्द्राभिन्नदेवतात्वेन तद्भानार्थं

वा तत्त्वमिति भावः ॥ ५४ ॥

अनयैव रीत्याऽन्यत्राप्यवधेयमित्याह—

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता ।
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते ॥ ५५ ॥

"तदस्यां प्रहरणमिति क्रीडायां णः" (पा० सू० ४ । २ । ५७) इत्यत्र प्रहरणविशिष्टा क्रीडा, प्रहरणक्रीडे, क्रीडामात्रं वाऽर्थः । आदिना "सोऽस्य निवासः" (पा० सू० ४ । ३ । ८९)

प्रभा

इति तेन सम्बन्धेन तदवच्छिन्नत्वं तस्य । प्रयोगेऽनादित्वञ्च स्वसदृशपूर्वपूर्वव्यापारध्वंसाधिकरणक्षणवृत्तित्वरूपम् । तत्त्वम्=निरूढात्वम् ॥ ५४ ॥

अनयैवेति—देवतार्थकतद्धितस्थले यथा प्रकृत्यर्थस्य एकदेशेऽन्वयाङ्गीकारे देवतादेवतात्वान्यतरविशिष्टे देये शक्तिः । एकदेशेऽन्वयानङ्गीकारे देवतायां देवतात्वे वा देये (सम्बन्धिनि) च खण्डशः शक्तिः= पृथगुपस्थापिका यथा शक्तिस्तथाऽन्यत्र तद्धितेऽपि शक्तिर्बोध्येत्यर्थः । तदस्यामिति—प्रहरणोपाधिकात् प्रथमान्तात्क्रीडारूपसप्तम्यन्तार्थेन इत्यर्थः । इत्यत्रेति— एतत्सूत्रविहितणप्रत्ययघटितदाण्डादिशब्दे इत्यर्थः, सूत्रे वक्ष्यमाणार्थस्यासम्भवात् । प्रहरणविशिष्टेति—प्रहरणम्=प्रहरणसाधनं दण्डादि, तद्वैशिष्ट्यञ्च क्रीडायां जन्यत्वसम्बन्धेन, प्रकृत्यर्थदण्डादेरभेदेन प्रत्ययार्थैकदेशे प्रहरणेऽन्वयः । तथाच दण्डाभिन्नप्रहरणजन्या क्रीडेत्यर्थः । पदार्थैकदेशेऽन्वयस्य 'पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेन' इति न्यायविरोधादाह— प्रहरणक्रीडे इति—प्रहरणं क्रीडा च पृथक्प्रत्ययार्थ इत्यर्थः । तेन नैकदेशान्वयविरोध इति भावः । क्रीडामात्रमिति—मात्रपदेन प्रहरणार्थस्य निरासः । नचैवं प्रहरणत्वेन बोधानुपपत्तिः, दण्डादिप्रकृत्यर्थस्य स्वनिष्ठप्रहरणतानिरूपकत्वसम्बन्धेन क्रीडायामन्वयाद् दण्डादेर्दण्डप्रहरणे लक्षणास्वीकाराद्वा तदर्थलाभात् ।

वस्तुतस्तु प्रहरणत्वं क्रीडा च प्रत्ययार्थः । तत्र प्रकृत्यर्थदण्डादेराधेयतासम्बन्धेन प्रहरणत्वे, तस्य च निरूपकत्वसम्बन्धेन क्रीडायामन्वयः । तथाच दण्डनिष्ठप्रहरणत्वनिरूपकक्रीडेति बोधः । अत्रैव च सूत्रस्थं प्रहरणपदं तात्पर्यग्राहकम् । सोऽस्येति—प्रथमान्तादस्य निवास इत्यर्थेऽण् स्यादित्यर्थात् निवासः, सम्बन्धी च प्रत्ययार्थ इति लभ्यते । तत्र निवसन्त्यस्मिन्नित्यधिकरणे घञा निष्पन्ननिवासशब्दस्य निवासाधिकरणमर्थः । न्युपसर्गेण च वासे नैरन्तर्यरूपातिशयो द्योत्यते इति न कादाचित्कवासकर्तरि स्त्रौघ्नादिप्रयोगः । सूत्रेऽस्येति कर्तरि षष्ठ्या सम्बन्धिरूपप्रत्ययार्थश्च प्रत्त्यासत्त्या वासकर्त्तैवोच्यते । तथाच निवासविशिष्टाधिकरणम्, निवासः, अधिकरणं वा सम्बन्धी च प्रत्ययार्थो इत्यादिपूर्वोक्तमुन्नेयम् ।

दर्पणव्याख्या

सोचितैवेति भावः । अनुपपत्तिज्ञानपूर्विकायामपि तीरनिष्ठगङ्गापदलक्षणायां निरूढत्वव्यवहारादाह—* अनादीति * एतत्तत्त्वमभिहितं प्राक् ॥ ५४ ॥

एकदेशान्वयप्रसङ्गमाशङ्क्याह—* प्रहरणक्रीडेति * व्युत्पत्तिवैचित्र्यादेकपदोपस्थितयोरपि तयोः परस्परमन्वय इति भावः । प्रहरणस्यापि प्रकृत्यैव लाभमभिप्रेत्याह—* क्रीडामात्रञ्चेति * क्रीडारूपसम्बन्ध्येवेत्यर्थः । मात्रपदेन तत्प्रहरणस्य तद्धितार्थत्वव्यवच्छेदः । तथाच दण्डाभिन्नप्रहारसाधनविशिष्टा क्रीडेति बोधः । * सोऽस्येति * एतत्सूत्रविहितप्रत्ययस्य निवासः सम्बन्धी चार्थः । अत्र निवासशब्दोऽधिकरणघञन्तः—निशब्देन च वासे नैरन्तर्यरूपातिशयः

"साऽस्मिन् पौर्णमासीति" (४ । २ । २१)

प्रभा

अधिकरणे निवासवैशिष्ट्यञ्च-स्वाश्रयाश्रयत्वसम्बन्धेन । स्वः=निवासस्तदाश्रयः कर्ता तदाश्रयत्वम्—अधिकरणस्य=स्रुघ्नादेः । एवञ्च स्रुघ्नाभिन्नं यन्निवासाधिकरणं तत्सम्बन्धी देवदत्तादिरिति स्रौघ्नशब्देन बोधः । साऽस्मिन्निति—अत्र तच्छब्दः प्रथमान्तपदार्थकः । प्रथमा चात्रैव तात्पर्यग्राहिका । सूत्रे 'इति' शब्दश्च निपातानामनेकार्थतया संज्ञापरः । तथाच पौर्णमासीवाचकात्प्रथमान्तादस्मिन्निति सप्तम्यर्थेऽण् स्यात्तदन्तेन चेत्संज्ञा गम्येत इत्यर्थः । इतिशब्दः संज्ञार्थक इत्यत्र भाष्यमेव मानम् । तथाहि—'सास्मिन् पौर्णमासीति संज्ञाग्रहणम्, सास्मिन् पौर्णमासीत्यत्र संज्ञाग्रहणं कर्तव्यम् । असंज्ञायां हि गरीयानुपसंयोगः । अक्रियमाणे हि संज्ञाग्रहणे गरीयानुपसंयोगः कर्तव्यः स्यात् । (उपसंयुज्यत इत्युपसंयोग उपाधिरनेक उपाधिः कर्तव्यः स्यात्) । मासार्धमासयोरिति वक्तव्यं स्यात् । इह मा भूत् पौषी पौर्णमास्यस्मिन्पञ्चदर्शरात्रे दशरात्रे वेति । संवत्सरपर्वणीति च वक्तव्यं स्यात् । भृतकमासे मा भूदिति (संवत्सरस्य द्वादश पर्वाणि-अमावास्या, पूर्णिमा वा मासान्तास्तत्र पर्वविशिष्टे मासे यथा स्यात् । भृता एव भृतकाः=कर्मकरास्तेषां यो मासः कर्मकरणादारभ्य त्रिंशद्रात्रलक्षणो यत्किञ्चित्तिथ्यन्तो भृतकमासः । स यदा पर्वणा तद्वान् भवति तत्र मा भूदित्यर्थः) । तथाच पर्वान्तमासे एव वाच्ये अण् भवति, नतु यत्किञ्चित्त्रिंशद्दिनात्मके । तत्तर्हि वक्तव्यम्, न वक्तव्यम् इति करणः क्रियते । ततश्चेद्विवक्षा (इतिग्रहणादेव संज्ञायां स्याद् वार्तिकं न कर्तव्यमिति भावः) । तथाच मासवाचकानां पौषादिशब्दानां शुक्लप्रतिपन्निष्ठाद्यवयवतानिरूपकदर्शनिष्ठचरमावयवतानिरूपकपौष्यादिपौर्णमासीघटितसमुदायत्वम्, कृष्णप्रतिपन्निष्ठाद्यवयवतानिरूपकपौष्यादिपौर्णमासीनिष्ठचरमावयवतानिरूपकसमुदायत्वं वा प्रवृत्तिनिमित्तत्वम्, नतु यत्किञ्चित्त्रिंशद्दिनात्मकसमुदायत्वम्, संज्ञायामेवाणो भाष्यकृतामिष्टत्वात् ।

अत्रेदं बोध्यम्—'पौषी' इत्यादिशब्दः 'नक्षत्रेण युक्तः कालः' इति विहिताण्न्तप्रकृतिकङीबन्तः । अश्विन्यादिशब्दाश्च न स्वार्थतत्तन्नक्षत्रपराः, किन्तु तत्तन्नक्षत्रयुक्तचन्द्रपरा एव, अन्यथा नक्षत्राणां सर्वदैव सत्त्वेन सर्वदिनेषु 'पौषमहः' इति प्रयोगापत्तेः । तथाच 'पुष्येण युक्तः कालः' इत्यस्य पुष्यनक्षत्रयुक्तचन्द्रमास्तद्युक्तः काल इत्यर्थः ।

दर्पणव्याख्या

प्रत्याय्यते । स च प्रकरणादिना तत्तत्कालघटितो ग्राह्यः । तथाच स्रुघ्नाभिन्ननिवासाधिकरणसम्बन्धीति बोधः । निवासश्च प्रत्यासत्त्या प्रत्ययार्थसम्बन्धिकर्तृक एव । अत एव कादाचित्कस्रुघ्ने वासकर्तरि न तथाप्रयोगः ।

साऽस्मिन्निति सूत्रविहिततद्धितस्य तु पौर्णमासीघटितत्वावच्छिन्नोऽर्थः । नक्षत्रयुक्तकालविहिताण्न्तपौष्यादिशब्दानां पुष्याद्यभिन्ननक्षत्रकर्मकशशिभोगाश्रयकालोऽर्थः । तस्योक्तार्थैकदेशपौर्णमास्याभेदेनान्वयः । तथाच 'पौषोमासः' इत्यादौ पुष्याद्यभिन्ननक्षत्रकर्मकशशिभोगाश्रयकालाभिन्नपौर्णमासीघटितो मास इत्यादिबोधः । पौषादिपदञ्च न केवलयौगिकम्, 'पौषः पक्षः' इति व्यवहारविरहात्, किन्तु रूढमपि । एतद्बोधनायैव सूत्रे संज्ञाग्रहणम् । रूढिनिरूपकताऽवच्छेदकञ्च न त्रिंशत्तिथिसमुदायत्वरूपमासत्वमात्रम् । यत्किञ्चित्तिथ्यवधिकत्रिंशत्तिथिसमुदाये मासादिव्यवहारेऽपि चान्द्रसौरपौषादिबहिर्भूतपौष्यादिघटितत्रिंशत्तिथ्यन्तर्गततिथिषु पौषादिव्यवहारविरहात्, किन्तु शुक्लप्रतिपदादिदर्शान्ततिथिसमुदायत्वमतो नोक्तदोष इत्याद्यन्यत्र विस्तरः ।

Sri Gargeshwari Digital Foundation

प्रभा

ननु यस्मिन्वर्षे मार्गशीर्षे शुक्लाष्टम्यां धनुः संक्रमणम्, मकरसंक्रान्तिश्च पौषनवम्यां सञ्जाता, तस्मिन् वर्षे सौरपौषेऽपि पौषव्यवहारो दृश्यते लोके तदुपपत्तये तत्तद्राशिस्थरविविशिष्टकालत्वमेव रूढ्यर्थतावच्छेदकमस्त्विति चेन्न, तत्र पौष्यादिपदस्य गौणार्थत्वात्। नच संज्ञाशब्दानामन्यद् व्युत्पत्तिनिमित्तमन्यत्प्रवृत्तिनिमित्तं रथन्तरादिशब्दवदिति वाच्यम्, केवलरूढिस्वीकार एव तथात्वात्। अत्र केवलरूढिसंज्ञास्वीकारे 'सास्मिन् पौर्णमासी' इति सूत्रविरोधापत्त्या पङ्कजादिवत् योगरूढित्वस्यैव तत्र स्वीकर्तुमुचितत्वाद्भाष्यसम्मतत्वाच्च। नच यत्र पुनर्वसुनक्षत्रयुक्तशशियुक्ता पूर्णिमा तत्र व्यभिचार इति वाच्यम्, पुष्यादिकतिपयनक्षत्रवाचकैर्लक्षणया नक्षत्रान्तरस्यापि ग्रहणेनादोषात्। तथाचोक्तम्—

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो यतः।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकाऽऽदिव्यवस्थया॥ इति॥
कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम्।
अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्॥ इति च॥

अयमर्थः वर्षस्याद्यो मासः कार्त्तिक इति अस्माकं गुर्जरदेशे प्रसिद्ध इति पक्षे आश्विनो वर्षान्त्यः, भाद्रपदश्चोपान्त्यः। पञ्चमश्च फाल्गुनः सर्वे व्यवह्रियमाणाः कार्त्तिकादिशब्दास्तत्तन्नक्षत्रयुक्तचन्द्रयुक्तपौर्णमासीवाचकशब्दप्रकृतिकाण्प्रत्ययेन निष्पन्नाः। यथा कृत्तिकानक्षत्रयुक्तचन्द्रेण युक्ता पूर्णिमा अस्मिन् मासे इति कार्तिको मासः, मृगशिरोनक्षत्रयुक्तचन्द्रेण युक्ता पूर्णिमा अस्मिन् मासे इति मार्गशीर्ष इत्यादिः। तत्र तत्तन्मासघटकनक्षत्राणां लक्षणया स्वोत्तरनक्षत्रद्वयत्रयबोधकत्वम्। तथाच कार्त्तिकादिचतुष्टयघटककृत्तिकादिशब्दानां स्वस्य, स्वोत्तरनक्षत्रस्य च बोधकतया कृत्तिकया युक्तेत्यस्य कृत्तिकया रोहिण्या वा युक्ता पूर्णिमा कार्तिकी। मृगशिरसा युक्तेत्यस्य मृगशिरसा, आर्द्रया वा युक्ता 'मार्गशीर्षी' इत्याद्यर्थो बोध्यः। फाल्गुने च फल्गुनीशब्दः पूर्वफल्गुन्यामुत्तरफल्गुन्यां हस्ते वा लाक्षणिक इत्यन्यतमनक्षत्रेण युक्ताऽपि पूर्णिमा फाल्गुनीशब्दबोध्या। एवञ्च उक्तान्यतमनक्षत्रयुक्तपूर्णिमा विशिष्टोऽपि मासः फाल्गुन एव। रेवत्यश्विनीभ-

दर्पणव्याख्या

"तदस्यास्त्यस्मिन्" (पा० सू० ५।२।१४) इति सूत्रेण प्रथमान्तादस्त्यर्थोपाधिकात् सम्बन्धिन्यधिकरणे च मत्वर्थीयो विधीयते। यद्यप्यस्येत्युक्तेः षष्ठ्यर्थसम्बन्ध एव मतुबादिविधानमाभाति तथाऽपि 'गोमाँश्चैत्रः' इति सामानाधिकरण्यानुरोधात् सम्बन्धिवाचकतैवेत्युक्तं प्राक्। एवञ्च 'गोमान्' इत्यादौ गोनिरूपितस्वामित्वसम्बन्धवानित्याद्यन्वयबोधः। नच—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

इति सम्बन्धसमकक्षतया भूमाद्यर्थानामप्युपादानात् तेषामपि मतुबादिशक्यत्वमिति शङ्क्यम्, स्यादेवं यदि तेष्वर्थेषु मतुबादीनां विधायकं सूत्रादिकमुपलभ्यते, किन्तु प्रयोगोपाधित्वमेव तेषाम्, अस्त्यर्थवत्, गवादिपदानां बहुत्वादिविशिष्टलाक्षणिकतयैव भूमादिप्रतीतिसौलभ्याच्च। अन्ये त्वस्तिशब्दान्मतुबर्थं तद्ग्रहणमित्याहुरित्यन्यत्र विस्तरः।

इत्यादिकमित्यादिपदात् "तस्यापत्यम्" "तेन रक्तं रागात्" "संस्कृतं भक्षाः" इत्यादिसङ्ग्रहः। तत्र 'गार्गिः' इत्यादिकमित्यादिपदात् "तस्यापत्यम्" "तेन रक्तं रागात्" "संस्कृतं भक्षाः" इत्यादिसङ्ग्रहः। तत्र 'गार्गिः' इत्यादौ तद्धितार्थापत्यस्य जन्यपुरुषरूपस्यैकदेशे जन्यत्वे प्रकृत्यर्थगर्गादेर्निरूपकतयाऽन्वयात् 'गर्गनिरूपितजन्यताश्रयः पुमान्' इत्यादिबोधः। 'गार्ग्यः' इत्यादौ तु जन्यपुरुषजन्यपुरुषाद्यात्मकगोत्रापत्यार्थैकदेशे जन्यत्वे प्रकृत्यर्थान्वयः। 'गार्ग्यायणः' इत्यादौ तद्धितार्थयुवापत्यैकदेशे गोत्रप्रत्ययान्तार्थस्य निरूपकतयाऽन्वयः। परन्तु "जीवति तु वंश्ये युवा"।

"तदस्यास्त्यस्मिन्निति मतुप्" (पा० सू० ५ । २ । १४) इत्यादिकं संगृह्यते ।
वृत्तिमात्रेऽतिरिक्तशक्तेः, "समर्थः पदविधिः" (पा० सू० २ । १ । १) इति सूत्राल्लाभा-

प्रभा

रण्यमन्यतमेऽश्विनीशब्दस्य लक्षणया तद्युक्तपूर्णिमाविशिष्टो मास आश्विनः । एवं शतभिषक्पूर्वाभाद्रोत्तराभाद्रपदैतदन्यतमनक्षत्रे भाद्रपदं लाक्षणिकमिति अन्यतमनक्षत्रयुक्ताऽपि पूर्णिमा भाद्रपदी, तया युक्तो मासो भाद्रपदः । भद्रम्=कल्याणम्, यद्वा भद्रस्य=वृषस्येव पदम्=चरणं यस्या सा भाद्रपदा । चैत्रादिशब्दो द्विविधः—मुख्यार्थपरः, गौणार्थपरश्च । तत्र शुक्लप्रतिपदादिदर्शान्तवाचको मुख्यार्थपरः । अत एव 'चान्द्रः शुक्लादिर्दर्शान्तः' इतिस्मृतिर्बाहुल्येन शिष्टाचारश्च सङ्गच्छते इति केचित् ।

माधवाचार्यास्तु—'मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः, शुक्लः प्राणस्तस्मादेते ऋषयः शुक्ले इष्टिं कुर्वन्ति, इतरे इतरस्मिन्' इति प्रश्नोपनिषद्वाक्ये कृष्णपक्षस्य प्रथमपाठात् ।

'मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके ।
भवेत् प्रजापतिर्ऋक्षं जयन्ती नाम सा स्मृता ॥'

इत्यादिस्मृतिप्रामाण्याच्च कृष्णपक्षादिः शुक्लपक्षान्तो मास इति,

अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने ।

इत्यादिस्मृतेश्च शुक्लपक्षादिः कृष्णपक्षान्तो मास इति च लभ्यते । अन्यथाऽश्वयुक्कृष्णपक्षस्य भाद्रपदान्तर्गतत्वेनाश्वयुक्पक्षत्वाभावेन 'अश्वयुक्कृष्णपक्षे तु' इत्यस्यासङ्गतिः स्यात् । तथाच तन्मते दर्शान्ते, पूर्णिमान्ते च चैत्रादिशब्दो रूढ एवेति प्रतीयते । 'पौर्णमासी' इति शब्दस्य 'पूर्णमासादण् वक्तव्यः' इति वार्तिकानुरोधेन, लोकव्यवहारदर्शनेन, योगरूढत्वस्यावश्यकत्वेन च शुक्लान्तमासस्यैव मुख्यत्वं प्रतीयते । कर्मानुष्ठाने तु तत्तद्वचनविशेषाच्छिष्टाचाराच्च व्यवस्था ज्ञेया । अत एव यतिधर्मप्रकरणे 'ऋतुसन्धिषु वापयन्ति इति स्मृतिसत्त्वेऽपि यतयः पूर्णिमायामेव वापयन्ति नतु दर्शे इति तदाचारोऽपि सङ्गच्छते ।

तदस्यास्तीति—अस्त्यर्थोपाधिकार्थवाचकात्प्रथमान्तात्षष्ठ्यर्थे सप्तम्यर्थे च मतुबित्यर्थः । तत्र षष्ठ्यर्थो यद्यपि सम्बन्ध एव, तथापि विग्रहस्य यत्किञ्चिदर्थोपदर्शकत्वादत्र 'गोमाँश्चैत्रः' इति सामानाधि-

दर्पणव्याख्या

इति परिभाषणाद् गर्गजीवनसमानकालिकत्वमपि प्रधानप्रत्ययार्थे विशेषणम्, तस्यापि प्रत्ययशक्यत्वात् । एवञ्च, गर्गजीवनसमानकालिको गर्गगोत्रापत्यनिरूपितजन्यतावानयं पुमानिति बोधः ।

"तेन रक्तम्" इति विहितप्रत्ययस्य तत्सम्बन्धाधीनतदीयरूपारोपविषयोऽर्थः । तादृशारोपविषयत्वमेव तेन रक्तत्वम् । 'शङ्खः पीतः' इत्यारोपमादाय शङ्खादेरारोप्यपीतिमाश्रयहरितालादिना रक्तत्ववारणायाधीनान्तमारोपविशेषणम् । माञ्जिष्ठपटादेश्चक्षुरादिना रक्तत्ववारणाय तदीयत्वरूपविशेषणम् । अत्र च रागकरणस्य मञ्जिष्ठादेः प्रकृत्यर्थस्य तद्धितार्थस्यैकदेशसम्बन्धे प्रतियोगितया रूपे चाधेयतयाऽन्वयः । तथाच मञ्जिष्ठासम्बन्धाधीनो यो मञ्जिष्ठानिष्ठरूपारोपस्तद्विषयताश्रय इति 'माञ्जिष्ठः' इत्यतो बोध । "शूल्यम्," "उख्यम्" इत्यादौ "संस्कृतं भक्षाः" (पा० सू० ४ । २ । १९) इति सूत्रविहिततद्धितार्थैकदेशे पाकादिसंस्कारे शूलोखादेः प्रकृत्यर्थस्याधिकरणत्वेनान्वयः । अनयैव रीत्या तद्धितान्तराद् बोध ऊहनीयः ।

तद्धितानां क्वचित्प्रकृत्यर्थे स्वार्थैकदेशस्य, क्वचित् स्वार्थस्यैवान्वयबोधकत्वादिति जहत्स्वार्थवृत्तिपक्षमवलम्ब्य मूलमवतारयति - * वृत्तिमात्र इति * तथाच तत्पक्षे पदानामानर्थक्यात् तदर्थनिरूपणे सिद्धान्तप्रच्युतिरिति भावः ।

SGDF Sri Gargeshwari Digital Foundation

दुक्तो विचारः शास्त्रान्तरीयैः सह तद्रीत्यैवोक्तः । आरोपितप्रकृतिप्रत्ययार्थमादाय वा । वस्तुतो विशिष्टशक्त्यैवार्थोपस्थितिरित्याह—वस्तुत इति ॥ ५५ ॥

इति वैयाकरणभूषणसारे देवताप्रत्ययार्थनिर्णयः ॥ १० ॥

प्रभा

करण्येनान्वयानुरोधात् 'सम्बन्धी' । यद्वा सम्बन्धः, आश्रयश्च प्रत्ययार्थः । नच अन्यतरार्थे प्रत्ययविधानेन सिद्धेऽन्यतरग्रहणं व्यर्थम्, 'गावः सन्त्यस्मिन्' इति विवक्षायां क्रियाकारकभावमूलकशेषस्य (सम्बन्धस्य) अभावेऽपि मतुप्सिद्ध्यर्थम् 'अस्मिन्' इति । एवमाधाराधेयभावस्य कारकत्वाविवक्षायामाधाराधेयभावाभावे सम्बन्धत्वेन विवक्षायाञ्च मतुबर्थम् 'अस्य' इत्यप्यावश्यकम् ।

ननु 'सम्भवे व्यभिचारे च सति विशेष्यविशेषणभावो भवति' नीलोत्पलवत् । नच सत्तां पदार्थो व्यभिचरति, सत्तामन्तरा पदस्योच्चारयितुमशक्यत्वात्, यावद्बुद्ध्या पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावेन बुद्धिसत्तासमाविष्टार्थस्यैव बहिः सत्त्वासत्त्वप्रतिपादनाय 'गौरस्ति, गौर्नास्ति' इत्यादिशब्दप्रयोगात् । एवञ्च सत्ताया व्यभिचाराभावेन 'अस्ति' इत्युपाधिग्रहणं व्यर्थमेवेति चेन्न, या सम्प्रति मुख्यावर्तमानलक्षणा बाह्या सत्ता तस्यां यथा स्याद् भूतभविष्यतोरतीतानागतवस्तुपरामर्शिन्या बुद्ध्योत्प्रेक्षितोपचरितरूपा या सत्ता तस्यां मा भूत् । तेन 'गावोऽस्याऽसन्' 'गावोऽस्य भवितारः' इत्यर्थे 'गोमान्' इति प्रयोगाभावः । नन्वेवं विद्यमाने एव देवदत्ते तद्गवीनामतीतानागतत्वप्रतिपादनाय 'गोमानासीत्' 'गोमान् भविता' इति प्रयोगो जायते स न स्यात्, प्रकृत्यर्थस्य सम्प्रति सत्ताया अभावादिति चेन्न, तत्र साक्षाद् गोसत्ताया अकथनेन गोमत एव सत्तायाः कथनात् । यदि तत्र गवां सत्ता विवक्षिता स्यात्तदा गावोऽस्य सन्तीति 'गोमान्' इत्यत्र यथा मतुबन्तेन सहास्तीति न प्रयुज्यते, प्रत्ययेनैवास्त्यर्थस्य प्रतीतत्वात्, तथेहापि 'गोमानासीत्' 'गोमान् भविता' इत्यत्रास्तेः प्रयोगो न स्यात् ।

सत्यपि वा प्रयोगे यथेह बहुवचनं भवति 'गावोऽस्यासन्' 'गावोऽस्य भवितारः' इति, एवमिहापि स्याद् बहुवचनम् 'गोमानासीत्' गोमान् भविता' इत्यत्र । तस्मान्नैषा गवां सत्ता कथ्यते किन्तु गोमत एव । तत्र गोमत्तारूपं तु तस्यातीतानागतमिति भूतभविष्यत्प्रयोगः । यथा 'ईश्वरोऽयमासीत्' 'दरिद्रोऽयं भविष्यति' इत्यत्रेदमर्थस्य सत्त्वेऽपि ईश्वरत्वदारिद्र्यांशमादाय भूतभविष्यत्प्रयोगः । सा वाक्यार्थवशादुपजायमाना बहिरङ्गेति नान्तरङ्गं शब्दसंस्कारं निवर्तयति । यथा—'ग्रामं न गच्छति' इत्यत्र फलाश्रयत्वेनोद्देश्यत्वाभावेऽपि जातं कर्मत्वं न निवर्तयति, इति भूतभविष्यत्सत्तायां 'मा भूत्' इत्यस्तिग्रहणम् ।

दर्पणव्याख्या

* तद्रीत्यैवेति * शास्त्रान्तरीयरीत्यैवेत्यर्थः । ननु वैयाकरणमते जहत्स्वार्थवृत्त्याश्रयणे "न पूजनात्" "तेन रक्तं रागात्" इत्यादिसूत्राणां का गतिरत आह—* आरोपितेति * । * विशिष्टशक्त्यैवेति * । विशिष्टार्थस्येति शेषः । वृत्तौ पक्षद्वयाभ्युपगमेन जहत्स्वार्थपक्षे तद्घटकपदार्थनिरूपणस्यानुपयोगेऽप्यजहत्स्वार्थपक्षे विशिष्टशक्तिग्रहस्य प्रत्येकशक्तिनिरूपणोपजीवकतया तन्निरूपणस्यौचित्यमेव । एतत्सूचनायैव मूलेऽतीवेत्युपात्तमिति तु रहस्यम् ॥ ५५ ॥

इति वैयाकरणभूषणसारदर्पणे देवताप्रत्ययार्थनिरूपणम् ॥ १० ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रभा

केचित्तु—'भूमनिन्दाप्रशंसासु' इत्यादिभाष्यादिप्रामाण्यात् एकत्वस्याविवक्षितत्वेऽपि वर्तमानत्वं विवक्षितमेव ! अत एव 'दण्डिनमानय' इत्युक्ते वर्तमानसत्ताविशिष्टदण्डयुक्त एवानीयते, नान्यः। तथाच 'आसीत्' 'भविता' इति तिङन्तपदानुरोधेन 'गोमान्' इत्यत्रातीतानागतसत्तायामपि 'धातुसम्बन्धे प्रत्ययाः' (३-४-१) इति सूत्रेणैव मतुप्प्रत्ययः। तदुक्तं भाष्ये—प्रत्यय इत्यनुवर्तमाने प्रत्ययग्रहणं किमर्थम् ? अधातुप्रत्ययानामपि धातुसम्बन्धे साधुत्वं यथा स्यात्। 'गोमानासीत्' 'गोमान् भविता' इति। तत्र 'धातुसम्बन्धे' इत्यस्य 'धात्वर्थसम्बन्धे' इत्यर्थः। तथाच मतुबर्थोऽस्त्यर्थ एकः, प्रयुज्यमानास्त्यर्थश्चैक इति धात्वर्थयोः सम्बन्ध उपपन्नः। यद्वा मतुब्विधायकेऽस्तिग्रहणम् 'विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्ति' इति निपातसंज्ञकास्तिशब्दात् 'अस्तिमान्' इति रूपसिद्ध्यर्थम्। सूत्रेऽस्तिग्रहणाभावे न सिद्ध्येत्। किं कारणम्, अस्तिना सामानाधिकरण्ये मतुब्विधीयते। नचास्तेरस्तिना सामानाधिकरण्यम्। तदेतत्क्रियमाणमपि प्रत्ययविध्यर्थं नोपाध्यर्थम्, इति भाष्ये स्पष्टम्। एवञ्च 'गोमान्' इत्यादौ गवादिशब्दो वर्तमानसत्तावत्स्वार्थपरस्तेन वर्तमानसत्तावद्गोसम्बन्धीति बोधः। 'गोमानासीत्' इत्यादौ तु गोमत्पदस्य गोमत्पदव्यवहारविषये लक्षणया गोमत्पदव्यवहारविषय आसीदित्यर्थः। यद्वा—'धातुसम्बन्धे प्रत्ययाः' इत्यनेनातीतकालिकसत्तामादायापि मतुब्विहित इति न दोषः। यद्यपि भाष्ये 'व्रीहिरस्य' 'यवो स्य' इत्यर्थे मतुप्निवृत्त्यर्थम् 'भूमादिग्रहणं कर्त्तव्यम्'। के पुनर्भूमादयः ?

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः॥

इत्युक्तम्। तथाऽपि प्रयोगोपाधयस्ते, न प्रत्ययवाच्याः, शब्दशक्तिस्वभावात्, 'सूत्रे' इतिकरणाच्च भूमादिविषये एव मतुबादीनां साधुत्वं बोध्यम्। अत एव यद्यपि त्रिप्रभृतिषु बहुत्वं व्यवस्थितं तथापि यस्य त्रयो यवाः सन्ति स नहि 'यवमान्' इत्युच्यते, इति यादृशबहुत्वमादाय यत्र व्यवहारस्तादृशबहुत्वमादायैव मतुबादयो विधीयन्ते इत्यन्यत्र विस्तरः। इत्यादिकमिति— आदिना 'तस्यापत्यम्' 'तेन रक्तं रागात्' नक्षत्रेण युक्तः कालः' 'संस्कृतं भक्षाः' 'तदस्मिन्नस्तीति देशे तन्नाम्नि' 'तेन क्रीतम्' इत्यादीनामर्थनिर्देशघटितसूत्राणां संग्रहः। तत्रापत्यशब्देन साक्षाज्जन्यस्य, परम्परया जन्यस्य च परिग्रहः। 'गोत्रे' इति 'यूनि' इति चाधिकारबहिर्भूतसूत्रविहितप्रत्ययानामुभयविधजन्योऽर्थः। गर्गस्यानन्तरापत्ये गोत्राधिकारविहितयञोऽप्राप्त्या 'अत इञ्' इति इञि 'गार्गिः' इत्यत्र जन्य इञर्थः। तत्र जन्यत्वरूपैकदेशे प्रकृत्यर्थगर्गादेर्निरूपितत्वसम्बन्धेनान्वय इति 'गर्गनिरूपितजन्यतावान्' इति बोधः।

यत्र गोत्रापत्ये प्रत्ययस्तत्र 'अपत्यं पौत्रप्रभृति गोत्रम्' इति सूत्रबलात् जन्यजन्यः प्रत्ययार्थः। तत्र प्रथमजन्यतायां निरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वये 'गर्गनिरूपितजन्यतावज्जन्यः' इति 'गार्ग्यः' इत्यादिना बोधः। यून्यपत्येऽर्थे प्रत्यये तु 'जीवति तु वंश्ये युवा' इति शास्त्रेण यस्मिन् वंश्ये सपिण्डे जीवति पौत्रादेर्युवसंज्ञा तज्जीवनसमानकालिकत्वमपि प्रत्ययार्थः। तस्य चाऽश्रयतासम्बन्धेन द्वितीयादिजन्येऽन्वयः। तथाच गर्गनिरूपितजन्यतावज्जन्यः पित्रादिजीवनसमानकालिकः' इति 'गार्ग्यायणः' इति युवापत्यप्रत्ययान्तेन बोधः।

वस्तुतस्तु पौत्रादावपि जन्यत्वेनैव विवक्षायां प्रत्यय इति जन्य एव प्रत्ययार्थो नतु जन्यजन्यादिः। अत एव मूले 'अपत्यत्वेन विवक्षितम्' इत्युक्तम्। 'तेन रक्तं रागात्' अत्र शुक्लस्य वर्णान्तरापादनं रञ्जेरर्थः। तत्पदं तृतीयान्तार्थकम्। अत्रैव तात्पर्यग्राहिका तृतीया, रञ्जने करणत्वार्थिका च। तथाच तृतीयान्ताद्रागवाचकाद्रक्तमित्यर्थेऽणि करणतानिरूपकरञ्जनकर्मप्रत्ययार्थः। प्रकृत्यर्थस्याधेयतासम्बन्धेन

प्रभा

करणतायामन्वयः। तथाच 'माञ्जिष्ठम्' इत्यनेन मञ्जिष्ठानिष्ठकरणतानिरूपकरञ्जनकर्म वस्त्रादि इति बोधः।

परीक्षाकृतस्तु—अत्र यद्यपि 'तेन' इति करणे तृतीया। तदर्थस्य धात्वर्थेऽन्वयेन तत्र तज्जन्यत्वप्रतीतिर्न्याय्या। सा नोपपद्यते, पूर्वस्थितपटसमवेतरूपध्वंसं विना रूपवति रूपान्तरानुपपत्तेः। अत एव 'तेन रक्तम्' इत्यस्य तत्सम्बन्धाधीनतदीयरूपारोपविषयोऽर्थः। प्रकृत्यर्थस्य मञ्जिष्ठायाः सम्बन्धेऽन्वयः प्रतियोगितया। 'तेन' इति तु तृतीयान्तात्प्रत्ययोत्पत्तिं बोधयितुमुपात्तमिति। मञ्जिष्ठासम्बन्धाधीनतदीयरूपारोपविषयो वस्त्रमिति बोधः। पित्तपीतिम्ना यत्र 'पीतः शङ्खः' इति भ्रमः, तत्र तस्य भ्रमस्य न पीतरक्तमिति प्रत्यय इति तत्सम्बन्धाधीनत्वं विशेषणमित्याहुः।

'नक्षत्रेण युक्तः कालः' अत्र भाष्यम्—अयुक्तोऽयं निर्देशः। योगो हि नाम स भवति ययोः सन्निकर्ष—विप्रकर्षौ स्तः। नित्ये हि कालनक्षत्रे.....नैष दोषः, पुष्यसमीपगते चन्द्रमसि पुष्यशब्दो वर्तते इति। अयमभावः—चैत्र्यादिशब्दः 'नक्षत्रेण युक्तः कालः' इति सूत्रविहिताणन्तप्रकृतिकङीबन्तः। तत्र चित्रादिशब्दश्च स्वार्थतत्तन्नक्षत्रयुक्तचन्द्रपरो लक्षणया, अन्यथा सर्वेषां नक्षत्राणां सर्वदैव सत्त्वेन सर्वदैव 'अद्य चैत्रमहः' इति प्रयोगापत्तेः। अत्र युक्त एव प्रत्ययार्थः, नतु कालोऽपि, लाघवेन वस्तुसत एव तस्य प्रत्ययोत्पत्तिनिमित्तत्वौचित्यात्, अहरादिपदेन तल्लाभसम्भवाच्च। तथाच 'चैत्री पूर्णिमा' इत्यनेन 'चित्रानक्षत्रयुक्तचन्द्रयुक्ता पौर्णमासी' इति बोधः। 'चैत्रो मासः' इत्यनेन तु तादृशपौर्णमास्यधिकरणं मास इति बोधः। कस्याञ्चित्पूर्णिमायां चित्रादिनक्षत्रयुक्तचन्द्रयोगाभावेऽपि चित्रादिपदानां स्वसमीपनक्षत्रे लक्षणया नक्षत्रान्तरयुक्तचन्द्रयोगेऽपि तादृशव्यवहार उपपाद्य इति पूर्वोक्तमनुसन्धेयम्।

'संस्कृतं भक्षाः' अत्र प्रत्ययार्थः संस्काराश्रयः। संस्कारश्च सम्बन्धाधीनमार्दवादिविशेषः, विशेषप्रकारकानुभवविषयो वा। एवञ्च 'दाधिक ओदनः' इत्यनेन 'दधिसम्बन्धाधीनमार्दवादिविशेषविशिष्ट ओदनः' इति बोधः। 'शूल्यम्' 'उख्यम्' इत्यादौ संस्कारः पाकादिरूपः। तत्राधिकरणतानिरूपकत्वसम्बन्धेन शूलादेरन्वय इति शूलादिनिष्ठाधिकरणतानिरूपक पाकाश्रयो मांसमित्यादिबोधः। 'तदस्मिन्नस्तीति' अत्युपाधिकात् प्रथमान्तादस्मिन्निति सप्तम्यन्तार्थेऽणादय अणाद्यन्तनामादेशश्चेत्। देशश्चेति शब्दबलात् लोकप्रसिद्ध एव ग्राह्यः। एवञ्च 'औदम्बरो देशः' इत्यनेन वर्तमानकालिकसत्तावदुम्बराधिकरणं देश इति बोध।

'तेन क्रीतम्' तृतीयान्तात् क्रीतार्थे यथाविहितं प्रत्ययाः—ठक्ठञ्कनादयः स्युः। क्रीतञ्च क्रयणकर्म। क्रयणञ्च स्वस्वत्वोत्पत्त्यनुकूलद्रव्यदानक्रियानुकूलव्यापारः। तथाच 'सौवर्णं वस्त्रम्' इत्यनेन सुवर्णकरणकक्रयणकर्मीभूतं वस्त्रमिति बोधः।

'तेन प्रोक्तम्' अत्र प्रोक्तत्वं नाध्यापनेन प्रकाशितत्वम्, सुशर्मणाऽध्यापिते काठके 'सौशर्मणम्' इति प्रयोगापत्तेः। नापि कृतत्वम्, 'कृते ग्रन्थे' इत्यनेनैव सिद्धावेतस्य वैयर्थ्यापत्तेः।

ननु वेदस्य नित्यतया कृतत्वाभावेन 'तैत्तिरीयम्' 'काठकम्' इत्याद्यसिद्धिरिति चेन्न, 'यद्यप्यर्थो नित्यो या त्वसौ वर्णानुपूर्वी साऽनित्या' इति भाष्येणैव समाहितत्वात्। महाप्रलयेषूच्चारयितृपुरुषाभावेनानुपूर्वीविनाशात्पुनरुत्पद्य ऋषयः संस्कारातिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधति, ततश्च कठादयो वेदानुपूर्व्याः कर्तारः, प्रवक्तारश्चेति कैयटः, तत्र प्रोक्तत्वस्य प्रथमप्रकाशितत्वरूपत्वात्। तच्च स्वकृतपरकृतसाधारणम्। एवञ्च माधुरेण प्रथमप्रकाशितायां तेनाकृतायां वृत्तौ 'माधुरी' इति प्रयोगनिष्पत्तये 'तेन प्रोक्तम्' इत्यस्यावश्यकत्वात्। सुशर्मणा काठकन्तु न प्रथमं प्रकाशितमिति नातिप्रसङ्गः। एतत्सर्वं भाष्ये स्पष्टम्। भाष्ये 'वर्णानुपूर्वी' इत्यत्र वर्णशब्दः पदपरः। तेन छन्दसि पदानामभेद इति सूचितम्, कठादिना प्रथमप्रकाशितत्वञ्च। तथाच स्मृतिः—

Sri Gargeshwari Digital Foundation

प्रभा

प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते । इति ।
स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा ।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ॥
युगान्तेऽन्तर्हितान् वेदान् सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥ इति ॥

इति स्मृतिद्वयमुक्तरीत्या सङ्गमनीयम् । 'तस्य पूरणे डट्' 'षष्ठ्यन्तात्सङ्ख्यावाचिशब्दात्स्वप्रवृत्तिनिमित्तसंख्याया पञ्चत्वादेः पूरणे डट् इत्यर्थः । पूर्णत्वञ्च—स्वनिष्ठसंख्यापूर्तिनिमित्तत्वम् । तथाच 'पञ्चमः' इत्यादिना पञ्चनिष्ठपञ्चत्वसंख्यापूर्तिनिमित्तमिति बोधः । गणनायां क्रियमाणायां चरमबुद्धिस्थेन येन प्रकृतिप्रवृत्तिनिमित्तसंख्या पूर्यते स पूरणः । तत्र पूरणत्वस्य स्वनिष्ठसंख्यापूर्तिनिमित्तत्वरूपत्वे द्वितीयादावपि पञ्चमत्वव्यवहारापत्तिः, तत्रापि तादृशनिमित्तत्वसत्त्वात्, इति चेन्न, तत्रापि तादृशव्यवहारस्येष्टत्वात् । अत एव व्युत्क्रमेणाष्टाध्यायेषु गण्यमानेषु 'समर्थः पदविधिः' इत्यस्याध्यायो यदा चरमो गण्यते तदा निर्माणक्रमेण द्वितीयस्यापि गणनाक्रमेणाष्टमत्वव्यपदेशो भवत्येव । अत एव नारदेन सर्वेषामेव देवकीपुत्राणामष्टमत्वं व्यवस्थापितम् ।

'प्रकारवचने थाल्' अत्र थाल्प्रत्ययः प्रकारवदर्थकः' सामानाधिकरण्यानुरोधात्, वचनग्रहणाच्च । 'तज्जातीयकः' इत्यादिभाष्यप्रयोगात्, थला जातीयरादेर्न बाधः । प्रकारश्च सामान्यस्य भेदको विशेषधर्मः। तथाच 'यद्विशेषधर्मवान् हरिस्तद्विशेषधर्मवान् हरः' इति बोधाद् यत्तद्भ्यां धर्मयोरैक्यावगतौ हरिसादृश्यं हरे फलति 'हरिसदृशो हरः' इति ।

'समासाच्च तद्विषयात्' अत्र तत्पदेनेवार्थो निर्दिश्यते । तथाच 'इवार्थविषयात्समासादिवार्थे छप्रत्ययः' इत्यर्थः । 'काकतालीयो देवदत्तस्य वधः' इत्यत्र काकपदं काकागमनपरम् । इदञ्चोपमानम्, अस्योपमेयं देवदत्तागमनम्, तालपदं पूर्वपदार्थसमानाधिकरणतालपतनपरमुपमानम्, अस्योपमेयश्च दस्यूपनिपातः । तथाच काकागमनसमानाधिकरणतालपतनप्रयोज्यं काकमरणम्' काककर्तृकदलिततालफलोपभोगो वा समासार्थ उपमानम् । उपमेयभूते देवदत्तागमनसमानाधिकरणदस्यूपनिपातप्रयोज्यदेवदत्तकर्मको वधः छप्रत्ययार्थ इवार्थः । एवञ्च पूर्वपदार्थस्य उत्तरपदार्थैकदेशे सामानाधिकरण्येऽन्वयसत्त्वान्नासमर्थसमासः शङ्कनीयः ।

सामानाधिकरण्यस्योत्तरपदार्थत्वमस्वीकृत्याऽऽकाङ्क्षाभास्यसामानाधिकरण्यसम्बन्धेनोत्तरपदार्थान्वये सामार्थ्योपपादनन्तु न युक्तम्, सामानाधिकरण्यस्य सम्बन्धत्वाभावात् । अत एव 'चैत्रस्य भ्राता' इत्यादौ षष्ठ्यर्थसम्बन्धो न सम्भवति । एकोदरशायित्वस्य सम्बन्धत्वे पाथयोरेकदेशे रात्रावुषितयोरपि सम्बन्धः स्यात् । तथाच तत्रापि 'देवदत्तस्य यज्ञदत्तः' इति प्रयोगः स्यादित्याशङ्क्य काल्पनिकोऽवयवावयविभावः षष्ठ्यर्थ इति 'अनेकमन्यपदार्थे' इति भाष्ये समाहितं सङ्गच्छते । सामानाधिकरण्यस्य सम्बन्धत्वे त्विदं भाष्यं विरुद्ध्येत ।

अन्येतु—छप्रत्ययान्तविषये काकतालशब्दस्य काकतालसमागमप्रयोज्ये निरूढा लक्षणा । प्रयोज्यञ्च—क्वचित्काककृततालफलोपभोगरूपम्, क्वचित्तालकृतकाकवधरूपञ्चोपमेयवाचकतत्तत्समभिव्याहारवशादुन्नेयम् । प्रयोज्यस्य सादृश्ये प्रतियोगित्वेनान्वयः । तथाच काकतालसमागमप्रयोज्यसदृशो देवदत्तस्य वध

प्रभा

इति बोधः । उपमानोपमेयभावश्च अकस्मादुपनतत्वेन बोध्यः । उपमानतावच्छेदकतादृशकाककृततालफलोपभोगत्व—तादृशवधत्वादिरूपेणाबोधात् छप्रत्ययोपमायामुपमानलोपमालङ्कारिकाः स्वीकुर्वन्ति । वाक्यस्य लक्षणानङ्गीकारे तु तालादिपदस्यैवोक्तप्रयोज्ये लक्षणा बोध्या ।

अतिरिक्तशक्तेरिति—'जहत्स्वार्थावृत्तिः' इति मते समुदाये समासादौ शक्तिस्वीकारादिति भावः । सूत्रादिति—यद्यपि सूत्राभावेऽपि 'तस्यापत्यम्' इत्यादौ तत्सम्बन्ध्यपत्येऽणादय इत्यर्थस्वीकारे 'वस्त्रमुपगोरपत्यं चैत्रस्य' इत्यर्थविवक्षायाम् उपगुशब्दात् प्रत्ययाप्राप्तावदोषः, तथापि 'ऋद्धस्यौपगवः' 'वज्रधर ऐन्द्रः' इत्यादिवारणाय 'समर्थ' इतिसूत्रस्यावश्यकत्वात् ।

शास्त्रान्तरीयैः—नैयायिकादिभिः । तद्रीत्यैव=नैयायिकादिरीत्यैव । ननु वैयाकरणैर्यदि 'जहत्स्वार्थावृत्तिः' इति पक्ष आश्रीयते तर्हि 'तेन रक्तं रागात्' 'न पूजनात्' 'तत्पुरुषः समानाधिकरणः' इत्यादिसूत्राणामनुपपत्तिः, मञ्जिष्ठादिपदे रागादिवाचकत्वाभावात्, एवं समासघटकपदानां समानाधिकरणत्व—पूजनार्थकत्वादिव्यवहारस्याप्यनुपपत्तिश्चेत्यत आह—आरोपितेति—इदमुपलक्षणम्—शब्दनित्यत्ववादिनां मतेऽवयवानां कल्पितत्वा उपसर्ग-निपात-धात्वादिविभागः, स्थानिनो लादय आदेशास्तिबादयस्तेषामर्थाश्च कल्पिता एवेत्यग्रे वक्ष्यमाणस्य समासादिघटकपूजनार्थकत्वादेश्च ।

ननु वैयाकरणनये यदि जहत्स्वार्थावृत्तिरेव तत्र समासे पूर्वोत्तरपदार्थविभागस्तद्धिते प्रकृतिप्रत्ययार्थविभागश्च काल्पनिक एवेत्येव कारिकायां वक्तुमुचितमिति 'नात्रातीव प्रयत्यते' इत्युक्तिरसङ्गता । किञ्च वृत्तौ सर्वत्रैवैकार्थीभावात्मिका शक्तिश्चेत्तदा 'जहत्स्वार्था तु तत्रैव रूढिर्यत्र विरोधिनी' इति सिद्धान्तविरोधश्चेति चेन्न, शब्दनित्यत्ववादिनये तत्तदवयवार्थप्रदर्शनस्य काल्पनिकत्वं विनाऽनुपपत्त्या तल्लाभात्' रूढ्यतिरिक्तस्थलेऽवयवशक्तिसहकृतसमुदायशक्त्योपस्थितिदर्शनेनावयवानामपि शक्तिनिरूपणस्यावश्यकत्वात्, पृथगनुपस्थापकत्वरूपजहत्स्वार्थाकत्वस्य सर्वत्र सत्त्वेऽपि समुदायशक्तावसहकृतत्वरूपजहत्स्वार्थात्वस्य रूढावेवेत्याशयेन तादृशोक्तेश्चेति दिक् ।

देवतानां प्रभावेण देवताद्यर्थनिर्णयः ।
प्रभायां बालकृष्णेन तद्धितानां समापितः ॥

॥ शुभभूयात् ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथाभेदैकत्वसङ्ख्यानिर्णयः ॥

वृत्तिप्रसङ्गात् तत्राभेदैकत्वसङ्ख्या प्रतीयते इति सिद्धान्तं दृष्टान्तेनोपपादयति—

अभेदैकत्वसङ्ख्याया वृत्तौ भानमिति स्थितिः ।
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद् यथोच्यते ॥ ५६ ॥

सङ्ख्याविशेषाणामविभागेन सत्त्वम्=अभेदैकत्वसङ्ख्या । उक्तश्च वाक्यपदीये—

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।

प्रभा

ननु प्रातिपदिकनिरूपणे प्रस्तुते तद्घटकस्यैव निरूपणमुचितमित्यभेदैकत्वसङ्ख्यानिरूपणमसङ्गतमत आह—वृत्तिप्रसङ्गादिति—अर्थविशिष्टवृत्तिनिरूपणस्यापि प्रस्तुतत्वात् स्मृतस्योपेक्षानर्हत्वरूपोपोद्घातसङ्गत्या अभेदैकत्वसङ्ख्यानिरूपणमपि सङ्गतमेव । किञ्च 'तदस्यास्त्यस्मिन्' इति सूत्रे 'अस्ति' इत्येकत्वस्याविवक्षितत्वेन सङ्ख्याया अपि वृत्तौ प्रस्तुतत्वमिति भावः ।

यद्यपि वक्ष्यमाणक्त्वाद्यन्तेऽपि वृत्तित्वसत्त्वात्तन्निरूपणोत्तरमेव सङ्ख्यानिरूपणमुचितम्, तथापि क्त्वाद्यन्ते सङ्ख्याया अभानादाकाङ्क्षाविच्छेदनियमः, पूर्वं सुबन्तवृत्तेरेवोपस्थितत्वाच्च क्त्वाद्यन्तवृत्तिनिरूपणात्प्रागपि सङ्ख्यानिरूपणमुचितमेव । स्थितिः=मर्यादा । कपिञ्जलेति—'कपिञ्जलानालभेत' इति श्रौतवाक्ये इत्यर्थः । शसा बहुत्वेनैव तद्व्याप्यत्रित्वादीनामुपस्थित्या बहुत्वव्याप्येषु त्रित्वस्य प्रथमोपस्थितत्वे न्यायात्=प्रथमोपस्थितत्वरूपप्रत्यासत्तिन्यायात् । यथा 'कपिञ्जलानालभेत' इत्यत्र प्रत्यासत्तिन्यायात् त्रित्वस्य भानम्, तथा वृत्तौ सङ्ख्यात्वेनैव एकत्वादिसङ्ख्यानामुपस्थित्या उपस्थितसङ्ख्यासु एकत्वस्यैव प्राथम्याद् भानमिति भावः । वस्तुतस्तु—'णिजां त्रयाणां गुणः श्लौ' इत्यत्र त्रयाणां ग्रहणेन व्याकरणे तदाश्रयणमसङ्गतम् । अभेदैकत्वसङ्ख्यास्वरूपे मतद्वयम् । तत्रैकमाह—सङ्ख्याविशेषाणामिति । (अभेदेन) इति क्वचित्पाठः । अविभागेन=अविरोधेन । अभेदैकत्वेति—अभेदो भेदाभावः । स च उपसर्जनपदार्थत्वावच्छेदकराजत्वादिधर्मावच्छिन्नप्रतियोगिताकभेदाभावः । यद्वा—भेदस्य=एकत्वत्वभेदस्याभावो यत्र सङ्ख्यायां साऽभेदैकत्वसङ्ख्या सङ्ख्यात्वेन प्रतीयमानैकत्वसङ्ख्याऽभेदैकत्वसङ्ख्येत्यर्थः ।

तादृशसङ्ख्याप्रतीतौ वाक्यपदीयं प्रमाणयति—यथौषधीति—यथा मधुनि सर्वरसानां रसत्वेन भानं तथा वृत्तौ सर्वसङ्ख्यानां सङ्ख्यात्वेन भानम्, विभक्त्यभावेन सङ्ख्याविशेषाणां तत्तद्रूपेणानुपस्थितेः । यत्र द्वित्वादिसङ्ख्याविषयकं तात्पर्यग्राहकं किञ्चिदस्ति तत्र द्वित्वादिकमपि प्रतीयते । अत एव सर्वरसानां दृष्टान्तप्रदर्शनं सङ्गच्छते । आहितेति—यद्यपि आहितशब्दस्य स्थापितार्थकत्वमन्यत्र प्रसिद्धम्,

दर्पणव्याख्या

ननु प्रक्रान्ते प्रातिपदिकघटकप्रत्ययार्थनिरूपणेऽभेदैकत्वसङ्ख्यानिरूपणमसङ्गतमत आह—* वृत्तिप्रसङ्गादिति * तथाच वृत्तिनिरूपणे क्रियमाणे स्मृतिपथप्राप्ततद्धर्मोपेक्षाऽनुचितेति प्रसङ्गसङ्गतिसत्त्वान्नोक्तदोष इति भावः । यद्यपि वक्ष्यमाणक्त्वाद्यन्तेऽपि कृद्वृत्तिसत्त्वात्तदनन्तरमेव सङ्ख्यानिरूपयितुमुचिता, तथापि तत्प्रकृत्यर्थे सङ्ख्याया अभानादाकाङ्क्षाविच्छेदः स्यादित्यत्रैव तन्निरूपितमिति बोध्यम् । अभेदैकत्वसङ्ख्यापदार्थः मतभेदेन द्विधा निर्वक्ति—* सङ्ख्याविशेषाणामिति * एकत्वत्वाद्यवच्छिन्नानामित्यर्थः । अविभागेन=अभेदेन-अविरोधेनेति यावत् । उक्तार्थे हरिवाक्यं प्रमाणयति—*उक्तञ्चेति* । *आहितशक्तयः* आहिता=समर्पिता तत्तद्दोषविभेदनिबन्धना विरोधरूपा शक्तिर्यैरित्यर्थः ।

अविभागेन वर्त्तन्ते सङ्ख्यां तां तादृशीं विदुः ॥ इति ॥

परित्यक्तविशेषं वा सङ्ख्यासामान्यं तत् । उक्तञ्च—

भेदानां वा परित्यागात् सङ्ख्यात्मा स तथाविधः ।

प्रभा

तथापि दार्ष्टान्तिके सङ्ख्यारूपे 'आहितशक्तयः' इत्यस्य आहिता=त्यक्ता विरोधशक्तिः परस्परप्रतिबन्ध्यप्रतिबन्धकभावरूपा 'नहि त्रिपुत्रो द्विपुत्रव्यवहारं लभते' इत्यादिभाष्यादिबोधिता यैरित्यर्थः। दृष्टान्तेऽपि तत्तद्दोषविषयिका या बुद्धिवृत्तिस्तत्प्रयुक्तो यो विरोधस्तस्य त्यागो बोध्यः । ताम्=अविरोधेन वर्तमानाम्। तादृशीम्=अभेदैकत्वपदवाच्याम्। यद्वा मधुरसस्थितितुल्यस्थितिकर्त्रीम्।

एवञ्चैतन्मते एकत्वद्वित्वादेः सत्त्वेऽपि भेदकार्य्ये ये धर्मा एकत्वत्वद्वित्वत्वादयस्तत्परित्यागेन सर्वासां स्थितिकर्तृत्वमात्रम्, सङ्ख्याया जात्यखण्डोपाध्यतिरिक्ततया स्वरूपतो भानासम्भवात्। तथाच 'राजपुरुषः' इत्यनेन 'राज्ञः' 'राज्ञोः' 'राज्ञाम्' वा पुरुष इत्येवं लौकिकविग्रहसत्त्वेऽपि 'राजसम्बन्धी पुरुषः' इत्येव बोधः। नन्विदमयुक्तम्—'द्वित्व-बहुत्वादीनां विरोधादेवैकत्र स्थित्यसम्भवात्। अत एव 'नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते' इति भाष्यं सङ्गच्छते। किञ्च मधुदृष्टान्तोपादानमप्यसङ्गतम्, तत्र नानाजातीयरसवदवयवारब्धे मधुनि रसान्तरोत्पत्तेरभ्युपगमात्। यथा नानाजातीयरूपवदवयवारब्धेऽवयविनि-पटादौ चित्ररूपम्। किञ्च मधुनि सर्वरससत्तया नानारोगनाशः फलम्, इह तु संख्याविशेषाणां सद्भावमात्रस्वीकारे फलाभाव इत्यत आह-परित्यक्तेति-परित्यक्तो विशेषः=एकत्वत्वादिरूपो धर्मो येन तत्। संख्यासामान्यम्=एकत्वत्वाद्यग्रहणकालिकसंख्यात्वप्रकारकप्रतीतिविषयः सङ्ख्या। तत्=अभेदैकत्वसङ्ख्यारूपम्। अत्रैकत्वत्वादिरूपविशेषधर्मपरित्यागश्च ज्ञाततादृशधर्मवत्त्वेन प्रतीतिविषयीभवनाभाव एव। अत्र पक्षे सङ्ख्यात्वेन सङ्ख्यासामान्यं भासते, नत्वेकत्वादिविशेष इति पूर्वपक्षाद्विशेषः। तदुक्तं हरिणा—

अभेदैकत्वसंख्यायास्तत्रान्यैवोपजायते ।

संसर्गरूपं संख्यानामविभक्तं तदुच्यते ॥ इति ॥

अयमर्थः—वृत्तावुपसर्जनपदानां सत्त्वभूतत्वात्सङ्ख्यायोगस्यावश्यकत्वेन 'अन्या संसर्गरूपा' सङ्ख्या जायते, इति।

अत्र हरिसम्मतिमाह—भेदानामिति—भेदानाम्=सङ्ख्याभेदकानामेकत्वत्वादिधर्माणामिति भैरवमिश्राः। वस्तुतस्तु भेदानाम्=एकत्वादिसंख्याविशेषाणाम्। परित्यागात्=अप्रतीतेः। संख्यात्मा=संख्यात्वेन प्रतीयमानासंख्या। तथाविधः=अभेदैकत्वसङ्ख्यापदव्यवहार्य्यः।

दर्पणव्याख्या

त्यक्तविरोधा इति यावत्। अत एव अविभागेन=अविरोधेनेत्यर्थः। ताम्=अभेदैकत्वसङ्ख्याम्। तादृशीं=मधुनिष्ठरसस्थितितुल्यामित्यर्थः। नन्वेकत्वद्वित्वादीनामेकत्र सत्त्वमनुपपन्नम्। नहि द्वावेकत्वेन व्यवह्रियते, नाप्येकं द्वाविति, "नहि द्विपुत्रः" इति भाष्यात्। किञ्च दृष्टान्तोऽपि न समञ्जसः, तत्तद्रसवदारब्धेऽवयविनि माक्षिकेऽवयवसजातीयरसान्तरस्यैवोत्पादाभ्युपगमादत आह—* परित्यक्तेति * वाशब्दः पक्षान्तरे। अगृहीतविशेषधर्मकं संख्यामात्रमित्यर्थः। पूर्वकल्पे उक्तास्वरसाभिसन्धिकं वाक्यपदीयं तत्पक्षेऽपि प्रमाणत्वेनोपन्यस्यति—* भेदानामिति * भेदानाम्=एकत्वत्वद्वित्वत्वादिविशेषधर्माणां परित्यागाद्=अग्रहात्। इदञ्च व्यापारपदार्थे अभेदेनान्वयि। संख्यात्मा-संख्यास्वरूपः। सः=एकत्वादिः। तथाविधः=अभेदैकत्वव्यपदेश्य इत्यर्थः।

SGDF Sri Gargeshwari Digital Foundation

व्यापाराज्जातिभागस्य भेदापोहे (हो) न वर्त्तते ॥
अगृहीतविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न शुक्लादिर्भेदापोहस्तु गम्यते ॥ इति ॥
अस्या वृत्तौ=समासादौ भानं न्यायसिद्धमिति शेषः । इति मतस्थितिर्वैयाकरणानाम् ।

प्रभा

तत्र हेतुमाह—व्यापारादिति । जातिभागस्य=एकत्वत्व-द्वित्वत्वादिरूपस्य । एकत्वत्वादिरूपजातिभागस्य भेदापोहरूपव्यापारात्, सः=संख्यात्मा तथाविधो वर्तत इत्यर्थः ।

जातिभागस्य व्यापारमाह—भेदापोहेनेति—'प्रकृत्यादिभ्य उपसङ्ख्यानम्' इत्यनेनाभेदे तृतीया । तथाच भेदस्य=एकत्वादिसंख्यारूपस्य योऽपोहः=अग्रहस्तद्रूपव्यापारादित्यर्थः, भेदापोहपदार्थस्याभेदेन व्यापारेऽन्वयात् । तथाच 'राजपुरुषः' इत्यनेन 'सङ्ख्यावद्राजसम्बन्धी' इति बोध एतन्मते ।

वस्तुतस्तु राजसम्बन्धी' इत्येव शाब्दो बोधः । संख्याविशेषस्तु तात्पर्यादिवशान्मानसबोधविषय एव । अन्त्यपक्षे दृष्टान्तमाह—अगृहीतेति—न गृहीतो विशेषः=शुक्लत्वादिरूपधर्मो यस्मिँस्तेन रूपत्वेन गृहीतरूपेण रूपवानिति प्रख्यायते । भेदापोहो न वर्तते' इति भेदरूपो योऽपोहः—अतद्व्यावृत्तत्वरूपः=न तत् अतत्, अतस्मात् व्यावृत्तम् अतद्व्यावृत्तम्=एकत्वभिन्नभिन्नमेकत्वम्, तस्य भाव एकत्वत्वमतद्व्यावृत्तत्वं प्रकृते तन्न प्रतीयते इत्यर्थः । यथा दूरस्थितो घटादिः शुक्लः सन्नपि शुक्लत्वादिप्रकारकग्रहासमानकालिकरूपत्वप्रकारकग्रहविशेष्येण रूपेण 'अयं रूपवान्' इत्येव भासते, नतु शुक्लो घट इति, तथा वृत्तावुपसर्जनपदार्थः 'सङ्ख्यावान्' इत्येव भासते, नतु 'एकत्वादिमान्' इति । रूपगतोऽपोहः=विशेषधर्मो न प्रतीयते । अपोहोऽतद्व्यावृत्तिर्विशेषधर्म एव, समनियतत्वात् ।

न्यायसिद्धमिति—'उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावः' इति न्यायसिद्धमित्यर्थः । ननु सङ्ख्यात्वेन सङ्ख्याप्रकारकबोधस्य नैयायिकाद्यनभिमतत्वादिदमसङ्गतमत आह—वैयाकरणानामिति—तथाच वैयाकरणानामेवैतन्मतं नान्येषामिति भावः । सङ्ख्यात्वेन सङ्ख्याभानं समर्थयति—

दर्पणव्याख्या

तदेव विशदयति—* जातिभागस्येति * एकत्वत्वादेरित्यर्थः ।

* भेदापोहेनेति * भेदस्य विशेषणस्य योऽपोहोऽग्रहस्तेनेत्यर्थः । यद्वा भेदापोहेनेत्यस्य व्यापारादित्यनेनान्वयः, प्रकृत्यादित्वात् तृतीया । तथाचैकत्वत्वादेर्जातिविशेषस्य भेदाग्रहरूपो यो व्यापारो विशेषणाऽत्मा ततो वर्त्तत इत्यर्थः । "भेदापोहो न वर्त्तते" इति वा पाठे तु भेदरूपो योऽपोहोऽतद्व्यावृत्तं स न वर्त्तते=न भासते इत्यर्थोऽवसेयः । पद्यान्तरावलोकनेनैतत्पाठस्यैव हरिसम्मतत्वमध्यवसीयते । द्वित्वत्वाद्यग्रहकालिकसङ्ख्यात्वप्रकारकप्रतीतिगोचरः सङ्ख्यापदार्थोऽभेदैकत्वपदव्यपदेश्यो भवतीति समुदितार्थः । तत्र दृष्टान्तरमाह—* अगृहीतविशेषेणेति * शुक्लत्वादिप्रकारकग्रहासमानकालिकरूपत्वप्रकारकप्रतीतिविषयेण शुक्लादिनैव यथा घटादौ रूपवानिति प्रतीयते । शुक्लादेर्यो भेदरूपोऽपोहः शुक्लत्वादिरतद्व्यावृत्तिरूपः स तु न प्रतीयते । तद्वद्राजपुरुष इत्यादौ राजादिपदार्थः सङ्ख्यावानिति प्रतीयते, न तत्र सङ्ख्यांऽशे एकत्वत्वादि भासते इत्यर्थः ।

तादृशसङ्ख्याभानस्य परानभ्युपेतत्वात् कथमियं स्थितिरतः शेषपूरणेन व्याचष्टे—*वैयाकरणानामिति* । ननु तादृशसङ्ख्याया वृत्तौ भाने किं प्रमाणमत आह—

SGDF
Sri Gargeshwari Digital Foundation

अयं भावः—'राजपुरुषः' इत्यादौ राज्ञः, राज्ञोः, राज्ञां वाऽयं पुरुष इति जिज्ञासा जायते। विशेषजिज्ञासा च सामान्यज्ञानपूर्वकेति सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी। अतस्तस्यां शक्तिरिति। तस्या एकत्वत्वेन प्रतीतौ न्यायमाह—कपिञ्जलेति—बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्रूपेणैव भानवद् एकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः।

प्रभा

अयम्भावः—इत्यादिना। 'राजपुरुषः' इति—एतज्जन्यबोधानन्तरमित्यर्थः। राज्ञ इति—एकस्य, द्वयोः, त्रयाणां वेत्यर्थः। सामान्यज्ञानपूर्विकेति—समभिव्याहृतपदार्थतावच्छेदकावान्तरधर्मप्रकारकज्ञानेच्छासामान्यज्ञानपूर्विकैवेत्यर्थः। यदा 'अयं ब्राह्मणः' इति ज्ञानं नास्ति तदा 'कोऽयं ब्राह्मणः' इति ब्राह्मणत्वव्याप्यजातिविशेषजिज्ञासा न जायते। 'सामान्यज्ञानसत्त्वे तु विशेषजिज्ञासा जायते' इत्यन्वयव्यतिरेकाभ्यां विशेषधर्मप्रकारकजिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य कारणत्वं कल्प्यते।

एवञ्च प्रकृतेऽपि यदि 'राजपुरुषः' इत्येतज्जन्यबोधानन्तरमेकत्वादिसङ्ख्याविशेषजिज्ञासा जायते, तदा तत्कारणीभूतसङ्ख्यासामान्यज्ञानमावश्यकमिति वृत्तिवाच्या सामान्यसंख्याऽवश्यं स्वीकार्या। 'द्विपुत्रः' इत्यादौ तु वृत्तेर्न संख्यायां शक्तिः, पूर्वपदेनैव प्रतीतेः। तस्याम्=सङ्ख्यात्वेन सङ्ख्यायाम्। शक्तिरिति—वृत्तेरिति शेषः। तस्या इति—वृत्तिघटकोपसर्जनीभूतव्यक्तेरित्यर्थः। एकत्वेनेति—एकत्वत्वेनेत्यर्थः। एकत्वस्येति—अस्य सङ्ख्यायामिति शेष। प्रथमोपस्थितत्वादिति—अत्र भूषणकारः—त्रित्वस्य प्रथमोपस्थितौ न नियमः, दशत्वादीनामपि प्रथमोपस्थितत्वात्, गणनायाश्चानियमात्, विपरीतगणनायामपि कस्यचिद् व्युत्पन्नत्वाच्च। अन्यथा एकत्वस्य गणनायां प्रथमोपस्थितत्वेन न्यायेनैव तदुपस्थितिसम्भवादेकवचनेन पश्वेकत्वविवक्षा मीमांसकोक्ताऽसङ्गता स्यात्।

ननु न्यायेनैकत्वस्योपस्थितावपि द्वयोरालम्भनेऽपि साङ्ग्यागानुष्ठानं दुर्वारमिति चेन्न,'पशुना यजेत'

दर्पणव्याख्या

अयं भाव इति *। * सामान्यज्ञानपूर्विकेति * तद्धेतुकेत्यर्थः। * आवश्यकीति * तां विनोक्तजिज्ञासाया अभावादिति भावः। सा च संख्यापूर्वोत्तरपदार्थयोः सम्बन्धवद् वृत्तिशक्त्यैव। अजहत्स्वार्थावृत्तिपक्षे पूर्वपदस्य संख्याविशेषवाचकत्वे गमकाभावे, तेन 'द्विपुत्रः', 'मौद्गिकः', 'मासजातः' 'तावकीनः' 'भवद्भिरामवसर' इत्यादौ वृत्तावभेदैकत्वसंख्याया अभानेऽपि न क्षतिः।

आद्ये—संख्याविशेषस्यैव पूर्वपदार्थत्वात्। द्वितीये—एकमुद्गस्य क्रयकरणयोग्यत्वाद् बहुत्वावगतिः। तृतीये—विशिष्टकालावगमाय मासपदप्रयोगात् संख्याऽध्यवसायः। चतुर्थे—तवकाद्यादेशादेकत्वावगतिः। पञ्चमे—प्रकरणाद् द्वित्वावगतिः। एवम्—'कारकमध्ये' इत्यादावप्यूह्यम्, एकस्य मध्यासम्भवात्। सति प्रकरणे 'राजपुरुषः' इत्यादावपि संख्याविशेषप्रकारेणैव भानम्। तदा तत्रापि न तस्य वृत्त्यर्थत्वमिति भेदो भेदसहिता द्वित्वादिसंख्या, तदभावसहितमेकत्वमभेदैकत्वमिति व्युत्पत्त्या संख्यात्वेनैकत्वमेवोपसर्जनपदार्थे भासते। तथा—"एकवचनमुत्सर्गतः करिष्यते" इति वचनात् 'राजन्-अस्-पुरुष-सु' इत्यलौकिकविग्रहे एकवचनं प्रयुज्यते। यत्र तु प्रकरणादिना संख्याविशेषभानं तत्र बहुवचनमपि। यथा—चित्रगुरित्यादौ, चित्रा-अस्-गो-अस्-इत्यभिप्रेत्योत्तरग्रन्थमवतारयति—* तस्या इति * वृत्तिघटकपदार्थोपसर्जनव्यक्तेरित्यर्थः। * प्रतीताविति * संख्यात्वावच्छिन्नैकत्वप्रकारतानिरूपितविशेष्यत्वेन बोध इत्यर्थः। उपसर्जनपदार्थे संख्यात्वेनैकत्वमेव प्रतीयते, न द्वित्वादीत्यत्र दृष्टान्तमाहेति यावत्। *गणनायामिति* बहुत्वविशिष्टानेकसंख्याने इत्यर्थः।

Sri Gargeshwari Digital Foundation

वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा । तथात्वे वा ज्ञानेच्छयोः समान-

प्रभा

इत्यनेन पशुत्वस्य यागसाधनतोच्यते । तच्चैकालम्भनेनापि सम्पन्नमिति नाधिकालम्भनम् व्यर्थत्वात्, गौरवाच्च । 'कपिञ्जलानालभेत' इत्यत्र व्यक्तित्रयाऽलम्भनस्यैव कारणतोच्यते, चतुरादीनां कल्पने गौरवापत्तेरिति न चतुरादीनामालम्भनम् । नच चतुष्टयाद्यालम्भने फलाधिक्यम्, कल्पकाभावात् । 'ब्राह्मणान् भोजयेत्' इत्यत्र व्यक्तित्रयभोजनेऽपि उक्तविधेश्चारितार्थ्येऽपि अधिकभोजने फलश्रवणात् तत्राधिकभोजनम् । एवञ्च कपिञ्जलदृष्टान्तेन वृत्तावेकत्वभानसमर्थनं चिन्त्यमेव ।

ननु विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वेऽपि वृत्तेः सङ्ख्यासामान्ये शक्तिकल्पनमसङ्गतम्, अपूर्वाम्रादिफलदर्शनेनाऽकारादिना स्मरणात्मकरसवत्ताज्ञानपूर्वकरसविशेषजिज्ञासावद् राज्ञः सङ्ख्यावद् द्रव्यत्वस्य नियतत्वेन तादृशद्रव्यत्वहेतुनाऽनुमानिकसंख्यासामान्यज्ञानसम्भवात् । तज्ज्ञानं शाब्दिकमेवेति नियमाभावात् । व्याप्तिज्ञानाद्यभावेऽपि रसविशेषजिज्ञासादर्शनमभिप्रेत्याह—

वस्तुत इति—अयम्भावः—'राजपुरुषः' इत्यतो बोधानन्तरम् 'राज्ञः, राज्ञोः' इत्यादिजिज्ञासैव न जायते, सार्वजनीनानुभवाभावात् । तथाच तादृशजिज्ञासाबलेन तत्कल्पनमयुक्तम् । सामान्यज्ञान—विशेषजिज्ञासयोः कार्यकारणभावो नानेन खण्ड्यते किन्तु जिज्ञासोदय एवेति ।

तथात्वे वेति—अभ्युपेत्यवादेनेदम्, 'राज्ञः' 'राज्ञोः' इत्यादिजिज्ञासाया अनुभवसिद्धत्वे इत्यर्थः । समानेति—यद्धर्मप्रकारिका इच्छा तां प्रति तद्धर्मप्रकारकज्ञानस्यैव कारणताया लोकसिद्धत्वादित्यर्थः । जिज्ञासाकारणीभूतज्ञानञ्च न पदार्थज्ञानमात्रम्, किन्तु इष्टसाधनत्वप्रकारकज्ञानमेव, 'इदं मदिष्टसाधनम्' इति ज्ञानादेव जिज्ञासादर्शनात् । जिज्ञासा=ज्ञानेच्छा, तथाच इच्छायाः स्वातन्त्र्येण विषयो ज्ञानम्, विषयतारूपसाक्षात्सम्बन्धेनैवेच्छाविषयस्य स्वातन्त्र्येणेच्छाविषयत्वात् । विशेषधर्मस्येच्छाविषयत्वञ्च प्रकृते 'याचितमण्डन' न्यायेन । तत्स्वरूपञ्च—कुत्रचिज्जिगमिषुः कश्चित् स्वकीयस्य भूषासाधनीभूतवस्त्रादेरभावेऽपि परतो गृहीत्वाऽऽत्मानं भूषयति । तथाहि—'ब्राह्मणगृहमेतत्' इति ज्ञाने जाते ब्राह्मणत्वव्याप्य-

दर्पणव्याख्या

"कपिञ्जलानालभेत" इति वाक्येन बहुत्वव्याप्यसंख्याविशिष्टकपिञ्जलालम्भनं विधीयते । तत्र त्रयाणाम्, चतुरादीनां वाऽऽलम्भनमिति संशये बहुत्वव्याप्यत्वस्य त्रित्वादिषु सर्वेष्वप्यविशिष्टत्वाद्यथाप्राप्तमेवालब्धव्यमिति पूर्वस्य चतुरादीनामालम्भनम्, "मा हिंस्यात्" इति सामान्यशास्त्रविहितनिषेधस्यालभ्यतावद्व्यक्तीतरपरत्वरूपतात्पर्यसंकोचकल्पने गौरवाद् गणनायां प्रथमोपस्थितत्रित्वपरतयाऽपि वचनस्य चारितार्थ्याल्लाघवाच्च बहुत्वव्याप्यत्वेन त्रित्वमेव बहुवचनार्थ इति सिद्धान्तितम् । तन्न्यायादत्रापि संख्यात्वेनैकत्वस्यैव वृत्त्यर्थत्वम्, नतु द्वित्वादीनामप्रतीयमानविशेषधर्मकैकत्वमभेदैकत्वमिति व्युत्पत्तेरिति भावः । "निजां त्रयाणाम्" (पा० सू० ७ । ४ । ७५) इत्यादिनिर्देशैरस्मिन् व्याकरणे व्याप्तिन्यायस्यैवाश्रयणेन प्रकृते संख्यात्वेनैकत्वप्रतीतिर्हि दुरुपपादेत्यपि केचित् ।

ननु जिज्ञासायां शाब्दमेव सामान्यधर्मप्रकारकज्ञानदर्शनमपेक्षितमिति न नियमः, आम्रादिफलदर्शनेनापि तद्रसास्वादनेच्छाया व्यभिचारात् । नचैवं सामान्यधर्मप्रकारकज्ञानस्यैव हेतुत्वं विलीयेतेति वाच्यम्, आम्रदर्शनस्योद्बोधकतया तद्रसस्मरणेन तदुपपत्तेः । प्रकृते तस्या अशक्यत्वेऽपि तदव्यभिचरितद्रव्यत्वेनानुमानिकतद्बोधसम्भवात् तादृशजिज्ञासाया अननुभवाच्च नोक्तयुक्तिर्वृत्तेरभेदैकत्वसंख्यार्थत्वसाधिकेत्यभिप्रेत्याह—* वस्तुत इति * जिज्ञासैवेति—'राजपुरुषः' इत्यादौ पूर्वपदार्थे एकत्व—द्वित्वादिप्रकारकजिज्ञासैवेत्यर्थः । * अनुभवसिद्धेति * । अस्य येन तदनुरोधेन सामान्यधर्म-

Sri Gargeshwari Digital Foundation

प्रकारकत्वेनैव हेतुहेतुमद्भावात्तद्रूपेणैव वाच्यता स्यादिति ध्येयम् ॥ ५६ ॥

इति वैयाकरणभूषणसारे अभेदैकत्वसङ्ख्यानिरूपणम् ॥ ११ ॥

प्रभा

गुर्जरोदीच्यत्वादिज्ञानं जायतामितीच्छा भवति स्वीयतादृशजिज्ञासाबोधनाय 'कस्य ब्राह्मणस्येदं गृहम्' इति पृच्छति। तथाचोक्तेच्छाया न विशेषधर्मविषयकत्वम्, किन्तु इच्छायाः कारणीभूतं यत् 'ब्राह्मणत्वव्याप्यधर्मज्ञानं मदिष्टसाधनमिति ज्ञानं तस्य विषयो ब्राह्मणत्वव्याप्यो धर्म इतीच्छायाः स्व-(इच्छा) विषय (ज्ञान) विषय (व्याप्यधर्म) कत्वेनैव व्याप्यधर्मविषयकत्वम्, न स्वातन्त्र्येणेति 'याचितमण्डन' न्यायेनैव व्याप्यधर्मविषयकत्वम्।

अत्रेदमवगन्तव्यम्—यदुक्तं मूले (ज्ञानेच्छयोः समानप्रकारकत्वेनैव हेतुहेतुमद्भावात्' इति तद्युक्तमेव। अत एव यस्य पुरुषस्य 'सद्यः शुक्रकरम्पयः' इति ज्ञानं जायते, तस्य 'पयो मे जायताम्' इतीच्छोत्पद्यते। तथाच 'तद्धर्मप्रकारकेच्छाम्प्रति तद्धर्मप्रकारकज्ञानत्वेन कार्यकारणभावः' सर्वसिद्धः। परन्तु इच्छाया यत्र स्वातन्त्र्येण तद्धर्मप्रकारकत्वं तत्रैवोक्तकार्यकारणभावः 'राजपुरुषः' एतज्जन्यसङ्ख्याबोधानन्तरं या जिज्ञासा तत्र तूक्तरीत्या याचितमण्डनन्यायेनैव व्याप्यधर्मप्रकारकत्वमिति न तत्र समानविषयकत्वेन कार्यकारणभावः, किन्तु व्याप्यव्यापकविषयकत्वेनैवेति प्रकृते ज्ञानेच्छयोः समानविषयकत्वेन कार्यकारणभावमाश्रित्य सङ्ख्यासामान्यभानखण्डनमयुक्तमेव। अत एव दीधितिकृता 'अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः सङ्गतिः' इति सङ्गतिलक्षणस्योपजीवकत्वादौ सङ्गमनसमये 'जायते च कार्ये, कारणे वा विज्ञाते 'किमस्य कारणम्, कार्यं वेति जिज्ञासा' इत्युक्तं सङ्गच्छते। 'जिज्ञासैव नोत्पद्यते' इतिरीत्यैव संख्यासामान्यभानखण्डनं युक्तम्। अत एव 'राजपुरुषः' इत्यनेन तत्र तत्र 'राज-

दर्पणव्याख्या

प्रकारकज्ञानस्यावश्यकता स्यादिति शेषः। 'अभेदैकत्वसंख्याया वृत्तौ भानम्' इति मूलं तु प्राचीनग्रन्थानुवाद एवेति भावः।

अनुभवसिद्धत्वस्य शपथनिर्णेयत्वं मत्वाऽऽह—***तथात्वे वेति*** वाशब्दोऽनास्थायाम्, अनुभवसिद्धत्वे वेत्यर्थः। *** समानप्रकारकत्वेनैवेति ***। एवकारेण विभिन्नप्रकारकत्वव्यवच्छेद। तद्धर्म्मप्रकारकेच्छाम्प्रति तद्धर्म्मप्रकारकत्वज्ञानस्य हेतुताया सुखादीच्छास्थले क्लृप्तत्वात्। प्रकृते विशेषधर्मप्रकारकजिज्ञासायाः सविषयविषयकत्वेन ज्ञानप्रकारीभूतविशेषधर्मप्रकारकत्वस्यावश्यकत्वेन तत्पदार्थविशेषधर्मप्रकारकज्ञानकार्य्यताऽवच्छेदकाक्रान्तत्वादिति भावः।

*** तत्तद्रूपेणैवेति *** एकत्वत्वादिविशेषरूपेणैवेत्यर्थः। एवकारेण संख्यासामान्यधर्म्मव्यवच्छेदः। इष्टापत्तिस्तु न, तथा सति शब्दादेव विशेषधर्मावगतौ तत्र जिज्ञासाया असम्भवादिति भावः।

अत्र वदन्ति, तद्धर्मप्रकारकज्ञानस्य कार्य्यतावच्छेदककोटौ स्वातन्त्र्येण तद्धर्मप्रकारकत्वं सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वानुरोधान्निवेशनीयम्। अन्यथा सामान्यधर्मप्रकारकज्ञानस्योक्तजिज्ञासां प्रति हेतुत्वं विलीयेत।

नच तत्र मानाभावः, "जायते च कार्य्ये कारणे वा ज्ञाते किमस्य कार्यं कारणं वा" इति दीधितिकृद्वाक्यस्यैव मानत्वात्। प्रकृते विशेषधर्मस्य पारतन्त्र्येणैवेच्छांशे प्रकारत्वात्तद्धर्मप्रकारकज्ञानं विनापि सामान्यधर्मप्रकारकज्ञानात् तादृशजिज्ञासायाः सम्पादत्वात्। सामान्यधर्मप्रकारकज्ञानं तु विशेषधर्मप्रकारकत्वावच्छिन्नविशेष्यकेच्छात्वमिति न गुणत्वसामान्यज्ञानात् सुखादीच्छाप्रसक्तिरधिकमन्यत्रानुसन्धेयम्। तथाचात्र जिज्ञासायाः सर्वसिद्धत्वे तदुपपत्तयेऽभेदैकत्वे

अथ सङ्ख्याविवक्षानिर्णयः

सङ्ख्याप्रसङ्गादुद्देश्यविधेययोः सङ्ख्याविवक्षाऽविवक्षे निरूपयति—

लक्ष्यानुरोधात् सङ्ख्यायास्तन्त्रातन्त्रे मते यतः ।
पश्चैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ ५७ ॥

"ग्रहं समार्ष्टि" इत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणविवक्षानियमः, 'धातोः' इत्येकत्वस्य विवक्षितत्वात् ,

प्रभा

सम्बन्धी पुरुषः' इत्याकारकबोधप्रदर्शनं सङ्गच्छते । किञ्च 'अभेदैकत्वसङ्ख्या=संख्यासामान्याभावः' इति शब्दरत्नोक्तिरप्यत एव सङ्गच्छते । कुत्रचित्सङ्ख्याविषयकबोधश्च तत्र कारणान्तरवशात् मानस एवेत्यन्यत्र विस्तरः ।

अभेदैकत्वसङ्ख्याया निर्णयोऽगात्समाप्तताम् ।
प्रभायां बालकृष्णस्य तेनाद्वैतं प्रसीदतात् ॥
॥ शुभम्भूयात् ॥



॥ अथ सङ्ख्याविवक्षानिर्णयः ॥

प्रसङ्गादिति—स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गतेरित्यर्थः । अभेदैकत्वसङ्ख्याया निरूपणावसरे 'कपिञ्जलानालभेत' इत्यत्र बहुत्वसङ्ख्याया विवक्षणात् सङ्ख्यायाः स्मृतत्वम् । लक्ष्यानुरोधादिति—यथा मीमांसकानां मते उद्देश्यगता सङ्ख्या न विवक्ष्यते, विधेयगता तु विवक्ष्यत एवेति नियमः । तथा वैयाकरणानाम्मते उद्देश्यत्व-विधेयत्वावच्छेदेन कश्चन नियमो नास्ति । सङ्ख्याया विवक्षाऽविवक्षे लक्ष्यानुरोधिन्यौ । तन्त्रातन्त्रे—विवक्षाऽविवक्षे । तन्त्रशब्दस्य विवक्षार्थकत्वे मूलं मृग्यम् । हेमचन्द्रोक्तदिशा तन्त्रशब्दस्यार्थसाधकार्थस्य लक्षणया कथञ्चिद्विवक्षार्थकत्वं बोध्यम् । उद्देश्येति—मानान्तरप्राप्तत्वे सति विधेयान्वयित्वमुद्देश्यत्वम् । (मी० द० अध्या० ३-पा० १ सू० १३ अधि० ७) ज्योतिष्टोमे श्रूयते—'दशापवित्रेण

दर्पणव्याख्या

वृत्तेर्वृत्तिरावश्यिका । एवञ्च "अभेदैकत्वसंख्याया वृत्तौ" इति मूलस्य सङ्गतिः । एतेन भेदस्य तत्सहचरितद्वित्वादेरेकत्वस्य च या प्रतीतिस्तदभाव इत्यर्थपरतया व्याख्यानं परास्तमिति ॥ ५७ ॥

इति वैयाकरणभूषणसारदर्पणे अभेदैकत्वसंख्यानिरूपणम् ॥ ११ ॥

सङ्ख्याविवक्षाऽविवक्षानिरूपणे सङ्गतिं दर्शयति—* प्रसङ्गादिति * । अभेदैकत्वसङ्ख्यानिरूपणे 'कपिञ्जलानालभेत' इत्यत्र विधेयविशेषणतया त्रित्वसङ्ख्याविवक्षायाः स्मृतत्वात् उपेक्षानर्हत्वाच्चेत्यर्थः । *अविवक्षितमितीति* तद्विवक्षणे यज्ञीयपात्राणां मार्जनालाभ इति भावः । * धातोरितीति * प्रत्ययविधौ "धातोः" (पा० सू० ३ । १।८१) इति सूत्रस्थधातुपदार्थविशेषणीभूतैकत्वादेरेतच्छास्त्रे अविवक्षणादित्यर्थः । अस्मच्छास्त्रे तु उद्देश्यगतविशेषणस्याविवक्षा

उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत् ॥ इति ॥

शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च, "आर्द्धधातुकस्येड् वलादेः" (पा० सू० ७।२।३५) इत्यत्रानुवाद्यार्द्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च ।

प्रभा

ग्रहं सम्मार्ष्टि' इति तत्र गृह्यते सोमादिरनेनेति ग्रहो यज्ञीयपात्रविशेषः, तस्य सोमस्थापनार्थत्वेनार्थतः प्राप्तत्वाद् विधेयसम्मार्जनान्वयित्वाच्चोद्देश्यत्वम् । अविवक्षितमिति—यज्ञीयसर्वपात्राणां सम्मार्जनस्याभिमतत्वादविवक्षितमित्यर्थः । अस्माकम्=वैयाकरणानाम् । उद्देश्यविशेषणेति—संख्यारूपविशेषणेत्यर्थः, 'राजपुरुषः सुन्दरः,' इत्यादावुद्देश्ये पुरुषे राजादिरूपविशेषणस्य वैयाकरणानामपि विवक्षितत्वात् । धातोरिति—"धातोः" (पा० सू० ३ । १ । ९१) इत्यधिकारसूत्रे धातोरित्येकत्वस्य='धातोः' इतिसूत्रजन्यबोधीयविषयतावद्धातुपदार्थगतैकत्वस्य । 'धातोः' इति पदजन्यबोधविषयीभूतैकत्वस्य व्याकरणशास्त्रे विवक्षायां मीमांसकानामपि सम्मतिमाह—उत्पद्येतेति—यद्यत्रैकत्वस्य विवक्षा स्यात्तदा समस्तेभ्यो धातुभ्यः='गा' 'जि' 'ध्या' इत्यादिधातुसमुदायादित्यर्थः । सर्वैरिति=सर्वैर्धात्वर्थैः प्रत्ययार्थो विशेष्येत='गानकर्म 'जयकर्म' 'ध्यानकर्म' इत्येवं प्रत्ययार्थे कर्मादौ गानादिधात्वर्था विशेषणीभूताः स्युरित्यर्थः—द्वन्द्वेति—यथा 'धवखदिरौ छिन्धि' इत्यत्र सुबर्थकर्मणि धवादयो विशेषणतां यान्ति तथेत्यर्थः । शब्दान्तरेति—मीमांसायामङ्गापूर्वभेदाधिकरणे शब्दान्तराधिकरणे=शब्दान्तरे कर्मभेदः, कृतानुबन्धत्वात्' इति सूत्रघटिताङ्गापूर्वभेदाधिकरणे इत्यर्थः । (२ अ० २ पा० १ सू० १ अधि०) तत्र हि 'यजति' 'ददाति' 'जुहोति' एषु प्रत्ययेन भिन्ना भावनाऽभिधीयते एकैव वा ? एकप्रत्ययप्रतिपाद्यत्वादेकैवेति पूर्वपक्षे सिद्धान्तितम् । यदि सर्वधातुभ्य एक एव प्रत्ययः स्यात्तदा एकैव भावना सर्वधात्वर्थानुरक्ता प्रतीयते । तत्रैवोक्तम्—

निष्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
ततः सर्वविशिष्टा स्याद् द्वन्द्वोत्पन्नसुबर्थवत् ॥ इति ॥

अत्र तु 'यजतेः' 'ददातेः' जुहोतेश्च पृथक् पृथक् प्रत्ययो दृश्यते इति नानाधात्वर्थानुरक्ता भिन्नैव भावनाऽभिधीयत इति । भट्टपादैः=कुमरिलभट्टैः । अभिधानादिति—'श्लोकवार्तिके' इति शेषः ।

ननु 'धातोः' इत्यत्र धातुरूपोद्देश्यविशेषणमेकत्वविवक्षितमित्यर्थसाधकत्वेनोपन्यस्ता भाट्टयुक्तिनार्थसाधिका, धातुत्वपर्याप्त्यधिकरणात्प्रत्ययविधानेन धातुसमुदायस्य पर्याप्त्या धातुत्वावच्छिन्नत्वाभावात् प्रत्ययाप्राप्तेरेकत्वस्याविवक्षितत्वेऽपि दोषाभावादित्यत आह—आर्धधातुकस्येति । विवक्षितत्वादिति—अवि-

दर्पणव्याख्या

मीमांसकानामपि सम्मतेत्याह—* उत्पद्येतेति * । * विशिष्येतेति * । तदा स प्रत्ययार्थः सर्वैर्धात्वर्थैर्विशिष्येतेत्यर्थः ।

ननु नेयं युक्तिर्विवक्षासाधिका, तादृशसमुदायस्य क्रियावचनत्वाभावेन ततः प्रत्ययोत्पत्तेर्गगनकुसुमायमानत्वेन स्वत एव विवक्षासत्त्वादत आह—* आर्द्धधातुकस्येड्वलादेरितीति * । * विवक्षितत्वाच्चेति * । अन्यथा तदुपादानवैयर्थ्यापत्तेरिति भावः । * एवमिति * अनुवाद्यविशेषणमविवक्षितमेव । नियमानाश्रयणवदित्यर्थः । 'पशुना यजेत' इत्यत्र यज्यर्थयागस्य करणाकाङ्क्षायां साधनत्वेन पशुर्विधीयते । एवञ्च पशुशब्दस्य विधेयसमर्पकतया तदुपस्थितानां केषाञ्चिद् ग्रहणे, केषाञ्चित् परित्यागे मानाभावेन पशुत्वपुंस्त्वादिवदेकत्वमपि यागसाधनत्वेन विवक्षितम् । तेन नानेकप-

एवम्—'पशुना यजेत' इतिवद् विधेयविशेषणं विवक्षितमित्यपि नियमो न, "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" (८।२।४२) इत्यत्र नकारद्वयविधानानापत्तेः। तथाच 'भिन्नः' इत्यत्र नकारद्वयलाभो न स्यात्। "आद् गुणः" (६।१।८७) इत्यादावेकत्वविवक्षयैवोपपत्तौ "एकः पूर्वपरयोः" (६।१।८४) इत्येकग्रहणवैयर्थ्यापत्तेश्चेति भावः।

प्रभा

वक्षितत्वे 'अवश्यपाच्यम्' 'अवश्यलाव्यम्' इत्यादाविडागमापत्तिः। उद्देश्यगतसंख्याया एवाविवक्षास्वीकारे वलादिग्रहणवैयर्थ्यापत्त्या विवक्षितत्वे च दूषणं चिन्त्यम्। एवम्-अनुवाद्यविशेषणस्य विवक्षाऽविवक्षानियमाभाववत्। पशुनेति—(मी० द० अ० ४ पा० १ सू० ११ अधि० ५) पश्वेकत्वाधिकरणे, ज्योतिष्टोमे श्रूयते—'अग्निषोमीयं पशुमालभते' तत्र स्वर्गकामो यजेत इत्यादिवाक्यान्तरेण यजधात्वर्थयागस्य विहिततया तत्र करणाकाङ्क्षायाम् 'पशुना यजेत' इत्यनेन साधनत्वेन पशुर्विधीयते। तथाच लोके यथा 'पशुमानय' इत्युक्ते एकवचने सति एकत्वविशिष्टपशुकर्मकमानयनं प्रतीयते। पशू आनय' इत्युक्ते द्वित्वविशिष्टं प्रतीयते। तत्र हि एकत्वमपैति, द्वित्वमुपजायते। यस्यागमे यदुपजायते स तस्यार्थ इति गम्यते। यथा 'अश्वमानय' इत्युक्ते अश्वानयनं प्रतीयते, 'गामानय' इत्युक्ते गवानयनम्। तत्राश्वोऽपैति गौश्चोपजायते। तेन ज्ञायते अश्वशब्दस्याश्वोऽर्थो गोशब्दस्य गौरिति। तथाच मीमांसासूत्रम्—'शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथाऽन्येषाम्' इति। 'तद्वच्च लिङ्गम्' इति, तथाच लिङ्गम्' इति च।

अयम्भावः—विधेयसमर्पकस्य 'पशुना' इत्यस्य पशुत्वपुंस्त्वैकत्वविशिष्टपशुबोधकतया पशुत्वपुंस्त्वयोर्विवक्षया न पशुभिन्नस्य नापि छागया यथा यागाङ्गत्वं तथैकत्वस्यापि विवक्षिततया नानेकपशूनां यागाङ्गत्वम्' इति विधेयविशेषणविषये मीमांसकसिद्धान्तः। तद्दर्शनेन नास्माकं सर्वत्र विधेयविशेषणविवक्षानियमः, किन्तु लक्ष्यानुसारात् क्वचिद्विवक्षा, क्वचिदविवक्षा चेति। सर्वत्र विधेयविशेषणस्य विवक्षितत्वे दोषमाह—रदाभ्यामिति—'नः' इत्यत्र विधेये एकत्वस्य विवक्षितत्वे 'भिन्नः' इत्यत्र तकारदकारयोः स्थाने एक एव नकारः स्यात्, नतु नकारद्वयमिति तत्रैकत्वस्याविवक्षैवेति स्थानिद्वयानुरोधान्नद्वयं सिद्ध्यतीति भावः। यदि तु 'रदाभ्याम्' इति सूत्रे चग्रहणाद् वाक्यद्वयम्—'रदाभ्यां निष्ठातो नः' इत्येकम् 'पूर्वस्य च दः' इत्यपरं तदा द्वितीयवाक्येन एकत्वविशिष्टनकारस्य पृथग्विधानेनोक्तदोषः। तदुक्तम्—'एकः पूर्वपरयोः' इति सूत्रे भाष्ये—'इह तावत् 'रदाभ्यां निष्ठातो नः' 'पूर्वस्य च दः' इति द्वे वाक्ये। कथं योगविभागः करिष्यते। रदाभ्यां निष्ठातो नः' ततः पूर्वस्य च द इति—इत्युच्यते तदाह—आद् गुण इति। वैयर्थ्यापत्तेरिति—यदि विधेयविशेषणं नियमेन विवक्षितं स्यात्तदा पूर्वपरयोः द्वयोः स्थानिनोरेकस्यैव गुणादेशस्य सिद्धतया एकग्रहणस्य

दर्पणव्याख्या

शुकरणयागाददृष्टसिद्धिः। एवमन्यत्रापि विधेयविशेषणं विवक्षितम्। अत्राविवक्षाकारणविरहादिति मीमांसकपरिशीलितासरणिस्तदनुसरणनियमो नास्माकमित्यर्थः। एतच्छास्त्रे तदाश्रयणेऽनिष्टं प्रदर्शयति—*रदाभ्यामिति*। * विधानानापत्तेरिति * 'न' इत्येकवचनोपस्थितैकत्वस्यापि विधेयविशेषणतया तद्विवक्षायां नकारद्वयविधानं न स्यादित्यर्थः। ननु मास्तु नद्वयविधानमत आह—* तथाचेति * इदञ्चैकवाक्यतया विधानमभिप्रेत्य, वाक्यभेदेन विधानपक्षे त्वाह—*आद् गुण इत्यादाविति*। *एकत्वविवक्षयैवेति* विधेयगुणगतैकत्वविवक्षयैवेत्यर्थः। तथाचैकग्रहणमेवोक्तार्थे ज्ञापकमिति भावः।

ननु पश्वेकत्वादिविवक्षाहेतूनां जैमिनिसम्मतत्वान्न तदाश्रयणस्यानाकरत्वमित्याशङ्कामपाकरिष्यन् योजनाप्रदर्शन-

शब्दार्थस्तु—सङ्ख्याया लक्ष्यानुरोधात्तन्त्राऽतन्त्रे यतो मते, अतः पश्वेकत्वाधिकरणोक्तहेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति । आदिना ग्रहैकत्वसंग्रहः ॥ ५७ ॥

ननु विधेयविशेषणविवक्षा आवश्यकी, अन्यथा 'सुद्ध्युपास्यः' इत्यादावनन्तयकाराद्यापत्तेः । 'भिन्नः' इत्यत्र नकारद्वयवदन्येषामप्यापत्तेः, 'एकः पूर्वपरयोः' इत्यत्रैकग्रहणञ्च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याह—

प्रभा

वैयर्थ्यं स्पष्टमेव । तस्मादेकग्रहणमेव विवक्षानियमाभावे ज्ञापकम् । तथाच 'उपेयिवाननाश्याननूचानश्च' (३।२।१०९) इति सूत्रे उपेत्यस्याविवक्षा, नञोऽनोश्च विवक्षेत्युभयं सिद्ध्यति । यत इति—यतो लक्ष्यानुरोधरूपहेतोरित्यर्थः । मते=इष्टे प्रथमाद्विवचनान्तं नपुंसकमिदम् । पश्वेकत्वाधिकरणेति—(४ अध्याये १ पादे पञ्चमाधिकरणोक्तेरित्यर्थः । हेतूनामिति—यदि 'पशुना यजेत' 'पशुमालभेत' इत्यादावेकत्वमविवक्षितं स्यात्तदा एकस्यैव पशोः सत्त्वे पश्वन्तरालाभे प्रयोगप्रांशुभावस्य बाधेन यागवैगुण्यापत्तिः, साङ्गयागासिद्धिरिति यावदित्येकः, यागासिद्धिफलं न पशोरिति पशोर्यागोपकारकत्वेन यागाङ्गतया बहुपश्वनुरोधेन यागावृत्तौ यागस्य प्राधान्यभङ्ग इति द्वितीयः, पशुत्वावच्छेदेन यागविधाने सकलपशुलाभासम्भवेन तावत्करणकयागासम्भवश्चेति तृतीय इत्यादिहेतूनाम् । एवम् 'ग्रहं सम्मार्ष्टि' इत्यत्र एकत्वं यदि विवक्षितं स्यात्तदा 'प्राजापत्या नवग्रहाः' इति वाक्यविहितनवग्रहोद्देशेन सम्मार्गो विधीयते, इत्युत्पत्तिवाक्यप्रतिपाद्यनवत्वसंख्याविरोध एकः, 'ग्रहं सम्मार्ष्टि' इति वाक्यस्य नवावृत्त्या तत्तद्ग्रहविशेष्यकबोधजनकत्वकल्पने सम्मार्गविधायकवाक्यस्य ग्रहभेदेन नवभेदापत्तिरिति द्वितीयः, यद्वा 'प्राजापत्या' इत्यनेन विहितग्रहोद्देशेन सम्मार्गविधाने 'ग्रहं सम्मार्ष्टि' तत्रैकमिति वाक्यभेदः, सर्वस्यैकत्वविशिष्टत्वात् । को ग्रह सम्मार्ष्टव्यः, को नेति विशेषानवगमात्सामान्यावगमाच्च सर्वसम्प्रत्यय इति तृतीयः' इत्यादिहेतूनामित्यर्थः । सिद्धान्तेति—सिद्धान्तपदस्य सिद्धान्तप्रतिपादकभाष्ये लक्षणया भाष्यादिसिद्धमित्यर्थः । आदिनेति—कारिकायाम् 'पश्वेकत्वादि' इत्यत्रादिनेत्यर्थः ॥ ५७ ॥ इत्यादाविति—'आदिना मध्वरिः' इत्यादीनां संग्रहः । यकारादीति—अस्य 'इको यणचि' इति सूत्रेणेति शेषः । आदिना वकारादीनां ग्रहणम् । ननु विधेयविशेषणीभूतसंख्याया विवक्षितत्वे 'एकः पूर्वपरयोः' इत्यत्रैकग्रहणवैयर्थ्यापत्तिरित्याशङ्कायामाह—एकग्रहणञ्चेति । स्थानिभेदादिति—स्थानिनोः पूर्वपरयोः परस्परं भेदादित्यर्थः । यद्वा स्थानिविशेषादित्यर्थः । पूर्वपररूपभिन्नभिन्नस्थानिसत्त्वादिति यावत् । एवमादेश इत्यस्याप्यर्थो बोध्यः । इदं सूत्रकाराशयवर्णनमात्रम् । वस्तुतस्तु 'अनयोः

दर्पणव्याख्या

भिषेणाऽकरपदार्थं व्याचष्टे—*शब्दार्थस्त्वित्यादि* । *पश्वेकत्वाधिकरणोक्तहेतूनामिति* 'पशुना यजेत' इत्यत्र विधेयगतैकत्वस्याविवक्षणे पश्वन्तरालम्भे प्रयोगप्रांशुभावबाधेन यागवैगुण्यापत्तिः, गुणानुरोधेन यागाऽऽवृत्तौ प्रधानत्वभङ्गापत्तिर्यावत्पशुकरणकयागासम्भवश्चेत्येवमादयो दोषा हेतवस्तेषामित्यर्थः । *सिद्धान्तसिद्धमिति* सिद्धान्तार्थप्रतिपादकमहाभाष्यादिसिद्धमित्यर्थः ॥ ५७ ॥

* आदेशभेदवारणायेति * । वस्तुतस्तु नैकग्रहणं विधेयगतविशेषणाविवक्षायां तन्त्रम्, 'अनयोः पूलयोः कटं कुरु' इत्यादाविव 'आद् गुणः' इत्यादावपि 'पूर्वपरयोः' इति द्वन्द्वनिर्देशेनैकवाक्यतयैवोभयोः स्थाने एकविधानसम्भवात् स्थानिभेदान्नानेको गुण इत्येकग्रहणस्य भाष्ये प्रत्याख्यानादिति रहस्यम् ।

SGDF Digitized by Sri Gargeshwari Digital Foundation

विधेये भेदकं तन्त्रमन्यतो नियमो नहि ।
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ ५८ ॥

भेदकम्=विशेषणम् । तन्त्रम्=विवक्षितम् । विधेयविशेषणं विवक्षितमित्यस्तु, तथाप्यन्यतः—अनुवाद्यस्य नियमो नहि । क्वचित् तन्त्रम्, क्वचिन्नेत्यर्थः । ग्रहैकत्वादौ यो हेतुर्वाक्यभेदादिस्तस्या-

प्रभा

पूलयोः कटं कुरु' इत्यनेन द्वित्वविशिष्टपूलसम्बन्ध्येककटकरणकप्रतीतिरिव 'पूर्वपरयोः' इति इतरेतरद्वन्द्वनिर्देशेनोद्भूतावयवकसमूहस्यैव स्थानित्वात् नानेकगुणप्रसङ्ग इति प्रत्याख्यातमेवैकग्रहणम् । स्पष्टञ्चेदं भाष्यकैयटशब्दरत्नेषु, इति न विधेयविवक्षायान्तद्बीजम् । विधेय इति—विधेये=विधेयविषये । भेदकम्=विशेषणम् । तन्त्रम्=विवक्षितम् । अन्यतः=विधेयादन्यत्र=उद्देश्ये । नियमः=विवक्षारूपः, अविवक्षारूपो वा नास्ति । हि=यतः 'ग्रहं सम्मार्ष्टि' 'पशुना यजेत' इत्यत्र प्रदर्शितविवक्षाऽविवक्षानियमसाधकहेतूनामाश्रयणम्=तत्तत्साधकत्वेनोपन्यसनमनाकरम्, आकीर्यन्ते=प्रकाश्यन्ते सिद्धान्ता यत्र स आकरः=सिद्धान्तोद्भवस्थानं भाष्यादिः, तद्विरुद्धमनाकरमित्यर्थः । अनुवाद्यस्य=उद्देश्यस्य । वस्तुतस्तु 'विधेये' इत्यस्य सप्तम्यन्तत्वादत्रापि सप्तम्यन्तादेव तसिरुचितः । वाक्यभेदादिरिति—'प्राजापत्या नवग्रहाः' इति वाक्यविहितग्रहोद्देशेन 'ग्रहं सम्मार्ष्टि' इत्यनेनैकत्वविशिष्टग्रहस्य सम्मार्गविधाने उत्पत्तिवाक्यप्रतिपाद्यनवत्वसङ्ख्याविरोधपरिहाराय 'ग्रहं सम्मार्ष्टि' इति वाक्यस्य नवावृत्त्या तत्तग्रहविशेष्यकबोधजनकत्वकल्पने नवसङ्ख्याकवाक्यभेदापत्तिरित्यर्थः । यद्वा 'ग्रहं सम्मार्ष्टि' 'तच्चैकम्' इति वाक्यभेदापत्तिरित्यर्थः । वाक्यभेदादिरित्यत्रादिना संख्याविवक्षाबीजाभावस्य संग्रहः । तथाहि—संख्येयस्य परिच्छेद्यत्वेन संख्यायाश्च परिच्छेदकत्वेन परिच्छेदकाकाङ्क्षया संख्याया सम्बन्धो वाच्यः । प्रकृते सा चाऽकाङ्क्षा नास्ति, 'प्राजापत्या नवग्रहाः' इति वाक्येनैव नवत्वरूपपरिच्छेदकस्य लब्धतया परिच्छेदकसंख्यान्तरानपेक्षणात् । ग्रहमिति ईप्सते कर्मणि द्वितीयाबलादुद्देश्यस्य ग्रहस्य संस्कार्यत्वरूपार्थप्राधान्यं प्रतीयते । एवञ्च 'प्रतिप्रधानं गुणाऽवृत्तिः, इति न्यायेन विनिगमनाविरहेण च सोमरसावसकानरसनपलकस्य सम्मार्गस्य सकलग्रहैरपेक्षणात् सर्वेषु सम्मार्गसिद्ध्या, एकत्वसंख्याया विवक्षाफलाभावरूपहेतोः परिग्रहः । पशुना यजेत' इत्यत्र यागं प्रति करणीभूतपशुर्गौणः । नच गुणानुरोधेन प्रधानावृत्तिर्भवतीति वैषम्यम् । नचैकत्वस्याविवक्षायां यागे वैगुण्यापत्तिः, वैगुण्यस्याङ्गवैकल्यप्रयुक्ततया पश्वादिविशेषणवदत्रैकत्वस्य क्रियाङ्गत्वाभावात् । भगवता जैमिनिनाऽपि 'ग्रहं सम्मार्ष्टि' इत्यत्रैकत्वस्याविवक्षितत्वं सिद्धान्तितम् । तथाहि—'एकत्वयुक्तमेकस्य श्रुतिसंयोगात्' (३ । १ । १३) एकत्वयुक्तं द्रव्यं सम्मार्गोद्देश्यम्, श्रुतिः=एकवचनशब्दः, तस्याः सम्बन्धादेकस्य ग्रहस्य सम्मार्गः प्राप्नोतीति पूर्वपक्षे सिद्धान्तः । 'सर्वेषां लक्षणत्वादविशिष्टं लक्षणम्' (३ । १ । १४) सर्वेषां ग्रहाणां सम्मार्जनम्, लक्षणत्वात्=ग्रहत्वेनोपादानात्, हि=यतः, लक्षणम्=ग्रहत्वम्, अविशिष्टम्=सर्वग्रहसमानम्; सामान्यावगमाद्विशेषानवगमाच्च सर्वप्रत्यय इति ।

दर्पणव्याख्या

* वाक्यभेदादिरिति * 'प्राजापत्या नवग्रहाः' इति वाक्यविहितग्रहोद्देशेन सम्मार्गो विधीयते ग्रहं सम्मार्ष्टीत्यनेन । तत्रानुवाद्यग्रहैकत्वविवक्षायामुत्पत्तिवाक्यगतसङ्ख्याया विरोधाद् वाक्यस्य यो भेदो विभिन्नविशेष्यकबोधजनकत्वं तादपायादीत्यर्थः । अन्ये तु—'ग्रहं समार्ष्टि' तच्चैकम्' इत्यावारवाक्यभेदापत्तिमाहुः । आदिपदेनोत्पत्तिवाक्यगतन-

SGDF

त्राश्रयणमनाकरम् । एकत्वविशिष्टं धातुम्, वलादित्वविशिष्टमार्द्धधातुकञ्चोद्दिश्य प्रत्ययेडागमादेर्विधिसम्भवादिति भावः ॥ ५८ ॥

प्रभा

ननु ग्रहैकत्ववत् 'धातोः' इत्येकत्वस्य 'आर्धधातुकस्येड् वलादेः' इत्यादौ वलादित्वादेश्चाविवक्षा स्यादत आह—एकत्वविशिष्टमिति—धातुसमुदायस्य क्रियावाचकत्वाभावेन धातुत्वाभावाद् धातुत्वपर्याप्त्यधिकरणादेव प्रत्ययविधानाच्चैकत्वविशिष्टस्यैव धातोः प्रत्ययोद्देश्यत्वमिति भावः । यदि तु धातुत्वपर्य्याप्त्यधिकरणादेव प्रत्ययविधानात् एकत्वस्याविवक्षितत्वेऽपि दोषाभावस्तदाह—वलादित्वेति—वलादिग्रहणसामर्थ्यात्तत्र वलादित्वस्य विवक्षितत्वमेवेति भावः ।

केचित्तु—एकत्वविशिष्टाद् धातोः प्रत्ययविधाने एकस्मादेव धातोः प्रत्ययः स्यात्, नतु धात्वन्तरादिति तु न, सर्वस्यैव धातोरेकत्वविशिष्टतया विनिगमनाविरहेण सर्वेभ्य एवोद्देश्यताऽवच्छेदकाक्रान्तेभ्यो धातुभ्यः प्रत्ययविधानसम्भवात् । नचोक्तरीत्या ग्रहैकत्वविवक्षायामपि दोषाभावः, इष्टत्वात् । नच तथा सति 'एकं ब्राह्मणं भोजयेत्' इति विधावपि बहुब्राह्मणभोजनाऽपत्तिः, सर्वस्यैव ब्राह्मणस्यैकत्वविशिष्टतया विनिगमनाविरहेण बहुब्राह्मणग्रहणसम्भवादिति वाच्यम्, तत्रैकपदोपादानसामर्थ्येन भोजयितुरिच्छाया एव विनिगमकायाः सत्त्वेन चोक्तदोषाभावात् । विधेयगतसंख्याऽन्वये मीमांसकाः—संख्यायाः समानप्रत्ययोपात्तत्वप्रत्यासत्त्या कारके एवान्वयः, नतु प्रकृत्यर्थे, विभक्त्यर्थस्य चारुणाधिकरणन्यायेन क्रियाविशेषणत्वम् । एवञ्च 'पशुना यजेत' इत्यनेन पश्वेकत्वोभयकरणको याग इति बोधः । 'एकत्वविशिष्टः पशुः' इति तु पाणिनीयो मानसबोधः । तथाच टाविभक्त्यैवैकत्वस्य यागाङ्गत्वावगमान्न तद्विवक्षाऽऽवश्यकीति तत् 'स्वौजसमौट्' इति सूत्रस्य 'कर्मणि द्वितीया' इत्यादिभिः 'द्व्येकयोः' इत्यादिभिश्चैकवाक्यत्वे एकत्वविशिष्टे कर्मणि द्वितीयैकवचनविधानेन प्रकृत्यर्थातिरिक्तान्वयेऽसाधुत्वप्रसङ्गात्, किञ्च भिन्नपदोपात्तक्रियान्वयापेक्षया समानपदोपात्तप्रकृत्यर्थान्वय एव उचितः, प्रत्यासत्तेः । एतेन यत्तु सूत्रत्रयस्यैकवाक्यत्वेऽपि नैकत्वादेः कर्मादौ विशेषणत्वम्, किन्तु विधेयतया प्रधाने एव, 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायात् । तथाच 'प्रातिपदिकात् कर्मणि एकत्वे च द्वितीयैकवचनम्' इत्याकारक एव वाक्यार्थबोधः, नोक्ताकारक इति विभक्त्यकारकान्वये न किञ्चिद्बाधकमिति तत्परास्तम् । यागान्वयापेक्षया प्रत्यासत्त्या प्रकृत्यर्थान्वये बाधकाभावात् । कारकान्वयेऽपि प्रकृत्यर्थस्य तदभिन्नतया तत्रान्वयस्यापि लब्धत्वाच्च । अत एव 'प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्' इति व्युत्पत्तिरपि सङ्गच्छते । भगवतो जैमिनेरपि एकत्वविशिष्टपशुबोधे एव तात्पर्य्यम् । तथाहि—तत्रैकत्वमयज्ञाङ्गम्, अर्थस्य गुणभूतत्वात् (४।१।११।५) इति भाष्यम्, तत्र='पशुना यजेत' इत्यत्र एकत्वमयज्ञाङ्गम्=यज्ञाङ्गत्वेन अविवक्षितम्, अर्थस्य=एकत्वस्य, गुणभूतत्वात्=न आलम्भस्य गुणभूता संख्या, नियोजनस्य वा, कस्य तर्हि ? पशोः, विभक्तिर्हि श्रुत्या प्रातिपदिकार्थगतां संख्यां ब्रूते इति पूर्वपक्षे 'शब्दवत्तूपलभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथाऽन्येषाम्' (४।१।१५।५) इति सिद्धान्तसूत्रम् । शब्दवत्=शब्दबोध्यं

दर्पणव्याख्या

वत्वसङ्ख्यया ग्रहपदार्थस्य परिच्छिन्नत्वात्परिच्छेदकाङ्क्षाभावस्य 'ग्रहम्' इति द्वितीयया संस्कार्य्यत्वलक्षणप्राधान्यबोधानात् 'प्रतिप्रधानं गुणावृत्तिः' इति न्यायाद्विनिगमनाविरहात् सोमावसेकनिरासफलकसम्मार्गस्य सर्वैर्ग्रहैरपेक्षणाद्विधेयपश्वादिविशेषणवत् क्रियाङ्गत्वाभावेन तद्वैकल्यप्रयुक्तक्रियावैकल्याप्रसक्तेश्च तद्विवक्षाविरहबीजस्य च संग्रहः, * अनाकरमिति *

नन्वेवम् 'भिन्नः' इत्यत्र नकारद्वयलाभो न स्यादित्यत आह—

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ॥ ५९ ॥

चकारसूचितम्—निष्ठातस्य नः, पूर्वस्य दकारस्य च न इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः ॥ ५९ ॥

* इति वैयाकरणभूषणसारे सङ्ख्याविवक्षानिर्णयः ॥ १२ ॥

प्रभा

यथा भवति तथोपलभ्यते एकत्वम्। हि=यतः, तदागमे=एकवचनागमे, दृश्यते=बुद्ध्यते एकत्वम्, तस्य=एकत्वस्य, ज्ञानम्=यज्ञाङ्गत्वेन ज्ञानम्, यथाऽन्येषाम्=पशुशब्दबोध्यपुंस्त्व—पशुत्वादीनां पशौ विशेषणानां यज्ञाङ्गत्वम्, तथैकत्वस्यापि। पशौ विशेषणानामिति भाष्योक्त्या एकत्वस्यापि पशुविशेषणत्वं स्पष्टमेवोक्तम्। हरिणाप्युक्तम्—'यजेत पशुना' इत्यत्र संस्कारस्यापि सम्भवे यथा जातिस्तथैकत्वं साधनत्वेन गम्यते इति। नन्वेकवचनमौत्सर्गिकम्, नतु संख्यार्थकं तत्राह—'न केवला प्रकृतिः प्रयोक्तव्या' इति न्यायाद्विभक्तेः शब्दसंस्कारार्थत्वसम्भवेऽपि जातेरिव संख्यायाः क्रियासाधनत्वम्, विशिष्टस्यैवोपस्थितेरिति हेलाराजः। किञ्च संख्याया अमूर्तत्वात्साक्षात्क्रियासाधनत्वासम्भवात् परम्परया क्रियासाधनत्वकल्पनापेक्षयोक्तयुक्त्या प्रकृत्यर्थान्वयकल्पनमेव युक्तम्। नचारुणाधिकरणविरोधः, आरुण्यस्य प्रातिपदिकार्थतयाऽगत्या परम्परया क्रयणक्रियाकरणत्वकल्पनात्। किञ्चैकत्वाविवक्षायामेकेनैव पशुना यागसिद्धौ पश्वन्तरालम्भनस्य वैयर्थ्यापत्तिः, तथापि मध्ये पश्वन्तरालम्भने प्रयोगविध्यवगतप्रयोगप्रांशुभावबाधः स्यात्। तदुक्तं हरिणा—

प्रत्याश्रयं समाप्तायां जातावेकेन चेत्क्रिया। पशुना न प्रकल्पेत न स्यादेतत्प्रकल्पना ॥
एकेन तु प्रसिद्धायां क्रियायां यदि सम्भवात्। पश्वन्तरमुपादेयमुपादानमनर्थकम् ॥
यथैवाहितगर्भायां गर्भाधानमनर्थकम्। तथैकेन प्रसिद्धायां पश्वन्तरमनर्थकम् ॥ इति ॥

अविवक्षा विवक्षा च सङ्ख्याया वर्णिता मया ।
प्रभायां बालकृष्णेन तेन प्रीयात्परेश्वरः ॥
॥ शुभम्भूयात् ॥

दर्पणव्याख्या

पूर्ववत्। 'इडागमादेः' इत्यादिना—'उदीचामातः स्थाने यकपूर्वायाः', इति विहितेत्वसंग्रहः। तत्राऽऽकारस्थानिकाऽतमुद्दिश्येत्वविधानात्। अत एवेण्निषेधविधायकैकाजिति सूत्रे 'अचः' इत्येकत्वविवक्षादरेणानेकाच्कोपदेशव्यावृत्तिर्ग्रन्थकृद्भिर्व्याख्याता। वस्तुतस्तु ग्रहैकत्वदृष्टान्तेनात्राप्यनुवादविशेषणानाम्, सङ्ख्यादीनां कचिदविवक्षाऽस्तु, तदितरविशेषणानां विक्षयायान्तु न किञ्चिद्बाधकम्। मीमांसायामनुवाद्यांशे जातिलिङ्गसङ्ख्यातिरिक्तविशेषणास्यादर्शनात्। तेषाञ्चोत्पत्तिवाक्यादेवावगमेनानुषङ्गिकत्वादविवक्षा युज्यते। प्रकृते तु न तथेति बोध्यम् ॥ ५९ ॥

इति वैयाकरणभूषणसारदर्पणे सङ्ख्याविवक्षाऽदिनिर्णयः ॥ १२ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ क्त्वाद्यर्थनिर्णयः ॥

क्त्वाप्रत्ययादेरर्थं निरूपयति—

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः ।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ॥ ६० ॥

तुमादयः=तुमुन्नादयः । प्रकृत्यर्थे=भावे ।

प्रभा

उद्देश्यगतैकत्वविवक्षायाम् 'धातोरित्येकत्वस्य' इत्युक्तम् । तेन तत्प्रकृतिकसूत्रानुक्तार्थकक्त्वादीनां स्मरणात् स्मृतिकालावच्छिन्नोपेक्षानर्हतावच्छेदकधर्मवत्त्वरूपप्रसङ्गसङ्गत्या आह—क्त्वाप्रत्ययादेरिति— 'रदाभ्याम्' इति कारिकोपस्थापित 'रदाभ्यां निष्ठातः'—इति सूत्रस्य निष्ठापदेन स्वप्रकृतिभूतधातोः स्मरणात् तत्प्रकृतिकसूत्रानुक्तार्थकतुमुन्नादीनाञ्च स्मरणादाह—अव्ययकृत इति । तुमादय—'अव्ययकृतो भावे' इति वार्तिकात् प्रकृत्यर्थे भावे भवन्ति । एषाम्=क्त्वादीनाम्, द्योत्यम्=व्यञ्जनादिना बोध्यम्, नत्वभिधेयम् । अयम्भावः—क्त्वाद्यर्थो भावः साध्यावस्थापन्न एव । स च धातुनैव लब्धः, तत्र क्त्वाप्रकृत्यर्थक्रिया, क्रियान्तरविशेषणम्, तयोर्यः सम्बन्धः सामानाधिकरण्यादिस्तत्र तात्पर्य्यग्राहकाः क्त्वादयः । प्रकृत्यर्थयोः क्रिययोः सम्बन्धे तात्पर्य्यग्राहकत्वमेव द्योतकत्वं क्त्वादीनाम् । नैयायिकादयस्तु सामानाधिकरण्यादीनां क्त्वादिवाच्यत्वं मन्यन्ते । अनेकसम्बन्धनिरूपितशक्तिकल्पने गौरवादाकाङ्क्षाभास्यत्वमेव सामानाधिकरण्यादीनाम्, तत्र तात्पर्यग्राहकास्तुमुन्नादय इति वैयाकरणाः ।

तुमुन्नादय इति—यद्यपि 'क्त्वादेरर्थं निरूपयति' इत्युक्तेः कारिकायाम् 'तुमादय इत्यनेन सह वैषम्यम्, तथापि भाष्यकृता तुमर्थो भाव इति व्यवस्थाप्य 'तुमर्थे सेसेनसेऽसेन्वसेवसेन्' इति सूत्रात् क्त्वाद्यव्ययकृद्विधायकेषु 'तुमर्थे, इत्यनुवृत्त्या तेषां भावे विधानसिद्धेः 'अव्ययकृतो भावे' इति वार्तिकं प्रत्याख्यातं तद्द्योतनाय कारिकायाम् 'तुमादयः' इत्युक्तम् । तथाहि—'तुमर्थे इत्युच्यते, कस्तुमर्थो नाम, कर्ता तुमर्थः, यद्येवं नार्थस्तुमर्थग्रहणेन । येनैव खल्वपि हेतुना कर्तरि तुमुन्भवति तेनैव हेतुना क्त्वादयोऽपि भविष्यन्ति (अस्य 'कर्तरि कृत्' इत्यनेन कर्तरि इति शेषः) । एवं तर्हि सिद्धे सति यत्तुमर्थग्रहणं करोति, तज्ज्ञापयत्याचार्योऽस्त्यन्यः कर्तुस्तुमुनोऽर्थ इति । कः पुनरसौ ? भावः । कुतो नु खल्वेतद्भावे तुमुन्भविष्यति, न पुनः कर्मादिषु स्यादिति । ज्ञापकात्तावदयं कर्तुरपकृष्यते, नचान्यस्मिन्नर्थे आदिश्यते, 'अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति' इति स्वार्थे भविष्यति । तद्यथा—'गुप्तिज्किद्भ्यः सन्' 'यावादिभ्यः कन्' इति । सोऽसौ स्वार्थे

दर्पणव्याख्या

अवसरसङ्गतिं क्त्वाद्यर्थनिरूपणे दर्शयति—*क्त्वाप्रत्ययादेरिति* । प्रकृत्यर्थत्वस्य फलेऽपि सत्त्वादाह—*भाव इति* तत्रापि सद्भूते व्यापारे एव, नतु पूर्वकालादावित्यर्थः । 'पाकः' इत्यादाविव 'पक्तुम्' पक्त्वेत्यादिजन्यबोधे भावांशे वैलक्षण्यस्या ननुभवादिति भावः । वस्तुतस्तु पक्त्वा इत्यादिजन्यबोधे भावे लिङ्गसङ्ख्यानन्वयित्वं तदनुभूयत एव । एवं 'पक्तुम्' इत्यादौ फलार्थकतुमुना साध्यत्वेन तद्बोधाच्चेत्युक्तप्रायमिति ।

Sri Gargeshwari Digital Foundation

आदिना–क्त्वादेः संग्रहः । भावे इत्यत्र मानमाह—अव्ययकृत इति—अव्ययकृतो भावे' इति वार्त्तिकादित्यर्थः । ननु 'समानकर्तृकयोः पूर्वकाले' इत्यादिसूत्राणां का गतिस्तत्राह—समानकर्तृकत्वादीति । अयं भावः—'भोक्तुं पचति' 'भुक्त्वा व्रजति' इत्यादावेकवाक्यता

प्रभा

भवन् भावे भविष्यति । किमेतस्य ज्ञापने प्रयोजनम् । अव्ययकृतो भावे भवन्तीति एतन्न वक्तव्यं भवतीति ।

यद्वा मूले 'तुमादयः' इत्युक्त्या तुमाद्यर्थं निरूपयतीति वक्तव्ये क्त्वाद्यर्थमित्युक्तिस्तद्विषये बहुवक्तव्यार्थानुरोधात् । धातुरूपप्रकृत्यर्थत्वस्य फलेऽपि सत्त्वादाह—भाव इति भावश्चात्रासत्त्वभूत एव ग्राह्यः, तुमुन्नादिना तथैव प्रतीतेः । आदिनेति–तुमादय इत्यत्रादिनेत्यर्थः । क्त्वादेरिति—आदिना णमुलादेः सङ्ग्रहः । अव्ययकृत इति—अव्ययसंज्ञाप्रयोजकाः कृत्प्रत्यया असत्त्वभूते भावे भवन्तीत्यर्थः । नच 'पाकः' इत्यादौ घञादेरपि भावार्थकत्वदर्शनादव्ययेति विशेषणेन तेषामसङ्ग्रह इति वाच्यम्, लिङ्गानन्वयिरूपासत्त्वभूतार्थप्रतिपादककृतामेव वार्तिके ग्रहणात् । घञादीनाञ्च 'घञजपः पुंसि' इति लिङ्गानुशासनानुरोधाल्लिङ्गान्वयर्थप्रतिपादकत्वात् । एवञ्च धात्वर्थानुवादक एव क्त्वादिरिति फलितम् । ननु क्त्वादीनां भावमात्रार्थकत्वाङ्गीकारे समानकर्तृकत्वादेस्तदर्थत्वाभावेन 'समानकर्तृकयोः पूर्वकाले' इति सूत्रविरोध इत्याह—समानकर्तृकयोरिति—अत्र समानशब्द एकवाची । तुल्यार्थकत्वे तु विभिन्नकर्तृकयोरपि क्रिययोः कर्त्रोस्तुल्यत्वे क्त्वाद्यापत्तिः । अत्र 'समानकर्तृकयोः' इति द्विवचनमतन्त्रम् । तेन 'स्नात्वा भुक्त्वा पीत्वा व्रजति' इत्याद्यपि सिद्धम् । तदुक्तम्भाष्ये 'नान्तरीयकत्वाद् द्विवचनेन निर्देशः क्रियते । नह्यत्र निर्देशस्तन्त्रम्' इति । समानकर्तृकत्वस्य, पूर्वकालत्वस्य च भेदाधिष्ठानत्वाद् भेदनिबन्धनयोर्द्विवचनबहुवचनयोर्मध्ये द्विवचनस्य प्राथम्यात्तेन निर्देशः । नत्वत्र द्वित्वं विवक्षितं प्रयोगनिमित्तत्वेन । नन्वेवमपि 'अमीषां ब्राह्मणानां पूर्व आनीयताम्' इत्युक्ते सर्वपूर्व एवानीयते । एवमिहापि सर्वपूर्वायाः क्रियायाः प्राप्नोति, नतु, मध्यस्थाया इति शेषः । नैष दोषः, सर्वेषामत्र व्रजिक्रियाम्प्रति पौर्वकाल्यम् । स्नात्वा व्रजति, भुक्त्वा व्रजति, पीत्वा व्रजतीति । आख्यातवाच्यायाः क्रियायाः विशेष्यत्वात् । प्राधान्यात्ताम्प्रति सर्वासां विशेषणत्वात् परस्परेणासम्बन्धः, 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायादिति कैयटः । अत एव उक्तार्थे 'पीत्वा' भुक्त्वा स्नात्वा व्रजति, इत्येवं प्रयोगानियमोऽपि उपपद्यते । तथाच 'एककर्तृकयोर्धात्वर्थयोः पूर्वकालावच्छिन्नार्थप्रतिपादकाद् धातोः क्त्वादिप्रत्यय इति सूत्रजबोधे जातेऽर्थाकाङ्क्षायाम् 'कर्तरि कृत्' इत्यस्यानुपस्थित्यर्थम् 'अव्ययकृतो भावे' इति वार्तिकारम्भे सति समानकर्तृकत्वादेः शाब्दबोधे भानं द्योत्यत्वेनैव, नतु वाच्यत्वेनेति सूचितम् । वस्तुतस्तु—द्योत्यत्वेऽपि व्यञ्जनावृत्त्यादिस्वीकारे गौरवात् संसर्गविधयैव भानं स्वीकार्य्यमित्याह—अयम्भाव इति—वक्ष्यमाणभाव इत्यर्थः । एकवाक्यता=साक्षात्परम्परया वा विशेष्यविशेषणभावापन्नविषयताप्रयोजकत्वरूपा, 'धातुसम्बन्धे' इत्यस्यात्राधिकारात् ।

दर्पणव्याख्या

* का गतिरिति * तत्र 'पूर्वकाले' इत्याद्युपादानात् पूर्वकालादीनां वाच्यता प्रतीयते । भावमात्रार्थकत्वे तु तदनुपपत्तिरिति भावः । * समानकर्तृकत्वादीति * । तथाच समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकालसम्बन्धी योऽर्थस्तद्वाचकात् क्त्वेत्यर्थेऽर्थाकाङ्क्षायाम् 'कर्तरि कृत्' इत्यस्य प्रसक्तौ तद्बाधनार्थं वार्त्तिकारम्भेण भावस्यैव वाच्यता निर्धार्य्यते । कर्तुः प्रत्ययविशेषणत्वे तु समानकर्त्तरीत्येव ब्रूयात् । सूत्रोपात्तानां तु द्योत्यत्वमेव, वर्त्तमानत्वादिवदिति भावः । वस्तुतस्तु न द्योत्यतायामपि निर्भरः, संसर्गमर्यादयैव तद्भानसम्भवादित्याह—* अयं भाव इति * ।

सर्वसिद्धा भोजनपाकक्रिययोर्विशेष्यविशेषणभावमन्तरेणानुपपन्ना । अन्यथा 'भुङ्क्ते' 'व्रजति' इत्यादावप्येकवाक्यताऽऽपत्तेः । तथाच तयोर्विशेष्यविशेषणभावनिरूपकः संसर्गः, जन्यत्वम्, सामानाधिकरण्यम्, पूर्वोत्तरभावः, व्याप्यत्वञ्चेत्यादिरनेकविधः । तथाच—'भोक्तुं पचति' 'भुक्त्वा तृप्तः' इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या तृप्तिरिति बोधः । अत एव जलपानानन्तर्यस्य

प्रभा

सर्वसिद्धा=सर्वानुभवसिद्धा । अत्र 'धातुसम्बन्धे'—इत्यस्याधिकारे अनुभवः, 'सर्वेषां व्रजनक्रियाम्प्रति पौर्वकालयम्' इति भाष्यम्, 'आख्यातवाच्याया क्रियाया विशेष्यत्वात् प्राधान्यात्ताम्प्रति सर्वासां विशेषणत्वात्' इति कैयटश्चैकवाक्यत्वे मानम् । अनुपपन्नेति—एकवाक्यत्वस्य विशेष्यविशेषणभावघटितत्वादिति भावः । अन्यथेति—विशेष्यविशेषणभावमन्तरा पदसमूहमात्रस्यैकवाक्यत्वे इत्यर्थः । भुङ्क्ते इति- यत्किञ्चित्कर्तृका भुजिक्रिया यत्किञ्चित्कर्तृका व्रजनक्रिया च । अत्र पदसमुदाये एकमुख्यविशेष्यताशालिबोधजनकत्वरूपमेक वाक्यत्वं नास्तीत्यर्थः । यद्यप्यत्रैकवाक्यत्वेऽपि दोषाभावस्तथापि सर्वजनानुभवविरोध एव दोषो बोध्यः । किञ्च पदसमूहमात्रस्यैकवाक्यत्वे 'समानवाक्ये निघात' इति वार्तिकवैयर्थ्यापत्तिः, सर्वत्रैवोक्तैकवाक्यत्वस्य सत्त्वात् । यद्यपि क्त्वाप्रत्ययस्य कर्त्रर्थकत्वं भाष्यवार्तिकादिविरुद्धम्, तथापि कर्त्रर्थकत्वं स्वीकृत्य उभयक्रियाकर्त्रोरभेदान्वयेन भोजनकर्त्रभिन्नकर्तृवृत्तिभुजिक्रियेति 'भुक्त्वा व्रजति' इत्यादिना बोधे एकवाक्यत्वसम्भवेऽपि सर्वानुभवविरुद्धत्वात्तदुपेक्ष्यमेव । तथाचेति – एकवाक्यत्वे चेत्यर्थः ।

तयोरिति—निष्ठत्वं षष्ठ्यर्थस्तस्य विशेष्यविशेषणभावेऽन्वयः । यद्वा प्रतियोग्यनुयोगिभावः षष्ठ्यर्थस्तस्य निरूपकतासम्बन्धेन संसर्गेऽन्वयः । जन्यत्वमिति=इदमुपलक्षणं जनकत्वस्य । इदं नैयायिकवाऽनया । तन्मते जन्यत्वस्य संसर्गे तस्य विशेषणनिष्ठत्वं जनकतया विशेष्यनिष्ठत्वञ्चाश्रयतया, जनकत्वस्य तथात्वे आश्रतया विशेष्यनिष्ठत्वं जन्यतया च विशेषणनिष्ठत्वमभ्युपेत्य द्विष्ठत्वं समर्थनीयम् । शाब्दिकनये जन्यजनकभाव एव संसर्गः । तस्य स्वरूपसम्बन्धेनैव द्विष्ठत्वम् । जन्यतया, जनकतया च द्विष्ठत्वं चिन्त्यम्, तयोर्वृत्तित्वानियामकत्वात् । वृत्तितानियामकत्वस्यैव संसर्गत्वात् । सामानाधिकरण्यमिति—एकाधिकरणवृत्तित्वमित्यर्थः । तच्च समानकर्तृकत्वमेवेति न पृथक् तद् द्योत्यम् । पूर्वोत्तरेति—पूर्वोत्तरकालिकत्वमित्यर्थः । आनन्तर्यमिति यावत् पूर्वक्रियाया उत्तरक्रियायामानन्तर्यञ्च—पूर्वक्रियाधिकरणकालिकप्रागभावप्रतियोगित्वरूपम् । तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिमत्त्वरूपं वा । स एव पूर्वोत्तरभावः । अत एव जलपानानन्तर्य्यस्य सत्त्वेऽपि' इति मूलोक्तिः सङ्गच्छते । अन्यथा आनन्तर्यसम्बन्धस्य द्योत्यताया अनुक्तत्वादसङ्गतमेव तत्स्यात् । आनन्तर्य्यस्येति—आनन्तर्य्यम्=अव्यवहितत्वम्, तच्च क्रियायाः क्रियायाम्

दर्पणव्याख्या

'समानकर्तृकयोः' इत्यादिसूत्राणां धातुसम्बन्धाधिकारीयात्वादिति भावः । * अनुपपन्नेति * विशेष्यविशेषणत्वयोः संसर्गविषयतानिरूप्यत्वेन सम्बन्धं विना विशिष्टबुद्धेरेवासम्भवात्सम्बन्धभानं तद्वाच्यतां विनाप्युपपन्नमिति भावः । * अन्यथेति * विशेष्यविशेषणभावमन्तरेणाप्येकवाक्यताभ्युपगमे इत्यर्थः । * सामानाधिकरण्यमिति * एकाऽश्रयवृत्तित्वमित्यर्थः । पूर्वोत्तरभावः=स्वोत्तरसमयोत्पत्तिकत्वम्, स्वपूर्वसमयवृत्तित्वं वा । व्याप्यत्वम्=अविनाभावित्वम् । तुमुनाद्यन्ते शाब्दबोधदिशमाह—*तथाचेति* ।

* भोजनजनिकेति * जनकत्वस्यात्र संसर्गतेति स्फुटीकर्तुमियमुक्तिः । बोधाकारस्तु भोजनविशिष्टेत्येव, जनकत्वस्यापदार्थतयाऽप्रकारत्वात् । क्रिययोः जन्यजनकभावस्यापि सम्बन्धत्वे युक्तिमाह—अत एवेति । जन्यत्वस्य

SGDF

प्रभा

स्वविशिष्टत्व—स्वविशिष्टत्वैतदन्यतरसम्बन्धेन स्वविशिष्टत्वम् । आद्यवैशिष्ट्यञ्च स्वध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणक्षणावृत्तित्व—स्वाधिकरणक्षणध्वंसाधिकरणक्षणवृत्तित्वैतदुभयसम्बन्धेन । आद्यसम्बन्धेनाव्यवहितत्वं पूर्वक्रियाया उत्तरक्रियायाम् । तथाहि—क्रियाया ध्वंसोत्पत्त्यधिकरणीभूतो यः क्षणः स क्रियाध्वंसाधिकरणक्षणः तत्क्षणस्य यो ध्वंसस्तदधिकरणीभूतस्तदुत्तरक्षणस्तद्ध्वंसानधिकरणीभूतः क्षणः पूर्वक्षणध्वंसाधिकरणीभूतस्तत्क्षणावृत्तित्वमुत्तरक्रियायाम् । आद्यवैशिष्ट्यघटकद्वितीयसम्बन्धस्त्वेवम्—स्वपदबोध्या पूर्वक्रिया तदधिकरणीभूतक्षणस्य यो ध्वंसस्तदधिकरणक्षणवृत्तित्वमप्युत्तरक्रियायाम् । पूर्वक्रियानिरूपिताव्यवहितत्वं यथोत्तरक्रियायान्तथोत्तरक्रियानिरूपिताव्यवहितत्वम्पूर्वक्रियायां द्वितीयस्वविशिष्टत्वसम्बन्धेन । तत्र वैशिष्ट्यञ्च—स्वाधिकरणक्षणवृत्तिध्वंसप्रतियोगिक्षणवृत्तित्व—स्वाधिकरणक्षणवृत्तिध्वंसप्रतियोगिक्षणवृत्तिध्वंसप्रतियोगिक्षणावृत्तित्वोभयसम्बन्धेन । अत्र स्वपदेनोत्तरक्रिया ग्राह्या । तथाच स्वा (उत्तरक्रिया) धिकरणक्षणवृत्तिध्वंसः पूर्वक्रियाधिकरणक्षणप्रतियोगिकस्तत्प्रतियोगी पूर्वक्षणस्तद्वृत्तित्वं पूर्वक्रियायाम् । एवं स्वाधिकरणक्षणवृत्तिध्वंसप्रतियोगी पूर्वक्रियाधिकरणक्षणस्तद्वृत्तिध्वंसस्ततोऽपि पूर्वक्षणस्येति तादृशक्षणावृत्तित्वमपि पूर्वक्रियायामिति लक्षणसमन्वयः । यद्वा प्रागभावस्वीकर्तृनैयायिकमते द्वितीयस्वविशिष्टत्वे वैशिष्ट्यम्—स्वप्रागभावाधिकरणक्षणवृत्तित्वस्वप्रागभावाधिकरणक्षणप्रागभावाधिकरणक्षणावृत्तित्वोभयसम्बन्धेन । व्याप्यत्वम्=नियतसाहचर्यम् । इत्यादिरिति—आदिना अव्यवहितत्वस्य सङ्ग्रहः । तच्च योग्यता । सा च तात्पर्य्यादिभिर्दण्डमासमुहूर्त्तादिरूपा । तथाच 'अद्य भुक्त्वा श्वो व्रजति' इत्यादौ यथायथं व्यवधानेऽपि न दोषः । क्त्वोपस्थाप्यकालस्याद्येत्यनेनाभेदेनान्वयादिति नैयायिकाः । पूर्वकालिकत्वं न शक्यम् , 'भुक्त्वा व्रजति' इत्यादौ भोजनोत्तरं व्रजतीत्यन्वयबोधात् , 'व्रजनपूर्वकालिकं भोजनम्' इत्यबोधाच्च । एवं नाव्यवहितत्वमपि शक्यम् । नच वर्षान्तरीयव्रजनमादाय 'भुक्त्वा व्रजिष्यति' इत्यापत्तिः, सति तात्पर्य्ये इष्टापत्तेः । सति तात्पर्य्ये योग्यताया अभावस्य वक्तुमशक्यत्वादिति नवीनाः । पूर्वकालिकत्वस्य प्रत्ययार्थत्वे 'प्रकृतिप्रत्ययौ' इति न्यायेन प्रत्ययार्थस्यैव प्राधान्ये 'भोजनपूर्वकालिकत्वविशिष्टं व्रजनम्' इत्यन्वयबोधापत्तिस्तु न, 'क्रियाभेदाय कालः स्यात्' इत्यभियुक्तोक्त्या पूर्वकालिकत्वस्य विशेषणतयैव भानात् भोजनस्य निष्ठत्वसम्बन्धेन पूर्वकालिकत्वेऽन्वये दोषाभावाच्चेति पञ्चोलिनः । भोजनजनिकेति—जनकत्वस्य संसर्गविधया भाने जनकत्वसम्बन्धेन भोजनविशिष्टा पाकक्रियेति बोधः । एवं जन्यत्वसम्बन्धेन भोजनविशिष्टा तृप्तिः । अत एव=जन्यत्वस्य भानस्वीकारादेव ।

भोजनजनिकेति—'तुमुन्ण्वुलौ' (३ । ३ । १०) अत्र 'भविष्यति' इत्यनुवर्तते, धातोरिति च । तथाच क्रिया अर्थः फलं यस्याः क्रियाया इत्यर्थे बहुव्रीहिणा स्त्रीलिङ्गनिर्देशात् 'क्रियायाम्' इत्यस्य लाभे क्रियाग्रहणसामर्थ्यात् साध्यमात्रस्वभावा इतराविशेषणत्वेनोपस्थितिविषयीभूता क्रिया गृह्यते । तथाच तादृशक्रियावाचके उपपदे फलीभूतभविष्यत्क्रियावाचकाद् धातोस्तुमुन्' इत्यर्थात् 'भोक्तुं पाकः' इत्यादेर्न साधुत्वम् , आद्ये घञर्थक्रियायां साध्यक्रियाया विशेषणत्वात् , अन्त्ये ण्वुलर्थकर्तरि विशेषणत्वात् । एवञ्च तिङन्तस्यैव तादृशोपपदत्वमिति नान्यत्र तुमुनः साधुत्वम् । 'भोक्तु पचति पश्य' इत्यत्र तु नासाधुत्वम् , पाकस्य दर्शने कर्मतयाऽन्वयेऽप्युपस्थितौ साध्यक्रियाया मुख्यविशेष्यत्वरूपप्राधान्याक्षतेः । स्पष्टञ्चेदम् 'उपपदमतिङ्' (२ । २ । १९) इति सूत्रभाष्ये । 'भोक्तुं पचति' इत्यत्र पचिभोजनक्रिययोर्जन्यजनकभावः सम्बन्धः, समानकर्तृकत्वञ्च तुमुन्द्योत्ये भासेते, 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्युक्तेः, शब्दशक्तिस्वभावाच्च । तेन विभिन्नकर्तृकक्रियाद्वयतात्पर्य्येण 'देवदत्ताय भोक्तुं

प्रभा

पचति मैत्रः' इति न प्रयोगः । नच समानकर्तृकत्वस्य तुमुन्नादिद्योतकत्वं मास्तु 'अव्ययकृतो भावे' इति च मास्तु 'कर्तरि कृत्' इत्यनेन कर्तर्येव तुमुन्नादयः सन्तु, उपपदभूतक्रियाकर्तुस्तुमुन्नर्थकर्तुश्चाभेदान्वयान्न दोष इति वाच्यम्, पच्यते भोक्तुं भोक्तुं स्थीयते इत्यादावाख्यातार्थकर्तुरभावे तदसम्भवात् । नच कर्तुरध्याहारेण निर्वाहः, अध्याहारमभेदान्वयञ्च विनाऽपि बोधदर्शनात् भाष्यादिविरुद्धत्वाच्च । केचित्तु क्रियायां क्रियार्थत्वं भविष्यत्क्रियेच्छाधीनेच्छाविषयत्वरूपम्, नतु जन्यजनकभावरूपम् । तथाच 'भोजनेच्छाधीनेच्छाविषयो यानम्' इति 'भोक्तुं याति' इत्यनेन बोधः, तेन यानान्तरं भोजनाभावेऽपि न तादृशप्रयोगबाध इत्याहुः । 'समानकर्तृकेषु तुमुन्' (३।३।१५८) अत्र 'इच्छार्थेषु लिङ्लोटौ' इत्यत इच्छार्थेषु इत्यनुवर्तते, तथाच 'तुमुन्प्रकृतिभूतधात्वर्थकर्तृकर्तृकेच्छार्थकेषु उपपदेषु इच्छाकर्तृकर्तृकक्रियार्थकाद् धातोस्तुमुन् भावे' इति तदर्थः । 'इच्छति भोक्तुम्' अत्र तुमुन्नर्थस्येषधात्वर्थेच्छाम्प्रति विषयितासम्बन्धेन विशेषणतया 'भोजनविषयिणी भोजनकर्तृकर्तृकेच्छा' इति, स्वनिरूपितविषयित्व-स्वकर्तृकर्तृकत्वोभयसम्बन्धेन 'भोजनविशिष्टेच्छा' इति वा बोधः । नत्वत्र क्रियार्थत्वस्य प्रतीतिरित्यप्राप्तस्तुमुन् विधीयते । एवमेव 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रविहितसन्नन्तेन 'पिपक्षति' इत्यादिनापि बोधः । 'शकधृष' (३।४।६५) अयमप्यक्रियार्थोपपदार्थः । शक्यर्थश्च अनुकूलसामर्थ्यविषयकनिश्चयः । निरूपितत्वसम्बन्धेन तद्घटकानुकूलत्वे भुजादिधात्वर्थस्यान्वयः, तथाच 'शक्नोति भोक्तुम्' इत्यादिना 'भोजननिरूपितानुकूलत्ववत्सामर्थ्यविषयकनिश्चय इति बोधः । यद्वा अनुकूलत्वसम्बन्धेन भोजनस्य सामर्थ्येऽन्वय इति अनुकूलत्वं न शक्यम्, संसर्गमर्यादयैव तल्लाभसम्भवात् । धृषेरपि सामर्थ्यविषयकनिश्चय एवार्थो बोधोऽपि पूर्ववत् । ग्लाधात्वर्थः—सामर्थ्याभावनिश्चयः, हर्षक्षयो वा । भोक्तुं ग्लायति, भोजनसम्बन्धिहर्षः क्षीयत इत्यर्थः । 'कालसमयवेलासु' इत्यत्र धात्वर्थस्य कालिकसम्बन्धावच्छिन्नकार्यतानिरूपितकारणत्वात्मकयोग्यत्व-स्वानुकूलप्रवर्तनाप्रयोजकनिश्चयविषयवत्त्वैतदुभयसम्बन्धेन कालेऽन्वये तुमुन् इत्यर्थः । एवञ्च 'भोक्तुं कालः' इत्यनेन कालिकसम्बन्धेन भोजनकारणीभूतः, भोजनानुकूलप्रवर्तनाप्रयोजकनिश्चयविषयः काल इति बोधः । 'परावर' (३।४।२०) इत्यत्र अवरशब्दोऽत्र पूर्ववृत्तिवाची । परशब्दश्चोत्तरवाची । योगः=सम्बन्धः । तथाच पररूपार्थस्य पूर्वसाकाङ्क्षतयाऽवरार्थस्य चोत्तरसाकाङ्क्षतया तयोर्द्वयोरप्यर्थयोर्निमित्तत्वं लभ्यते । दाक्षिणात्यानां काशीमुद्दिश्य गमनसमये यादृशी व्यवस्था तदनुसारेणोदाहरणम्—'अप्राप्य नदीं पर्वतः' इति । नदीपदेनात्र गङ्गा विवक्षिता । पर्वतोऽत्र विन्ध्यः । दाक्षिणात्यानामागमने पूर्वं विन्ध्यलाभस्ततो गङ्गोपलब्धेः पूर्वेण परयोगश्च—स्वकर्मकप्राप्तिप्रागभावाधिकरणक्षणवृत्तिप्राप्तिक्रिया कर्मत्वरूपः । स्वार्थो नदी । अत्र 'पर्वतः' इत्यस्य वाक्यैकदेशन्यायेन पर्वतकर्मकप्राप्तिक्रियार्थः । नञः प्रागभावोऽर्थः, एवञ्च 'दक्षिणदेशस्थपुरुषकर्तृका गङ्गाकर्मकप्राप्तिप्रागभावसमानकालिका पर्वतकर्मकप्राप्तिक्रियेति बोधः । 'अतिक्रम्य पर्वतं स्थिता नदी' अत्र अतिक्रमणञ्च प्राप्तिक्रियाध्वंसः । पूर्वपर्वतयोगोऽत्र गङ्गायाः । 'दक्षिणदेशस्थपुरुषकर्तृकपर्वतकर्मकप्राप्तिक्रियाध्वंससमानाधिकरणस्थितिकर्त्री नदी' इति बोधः । अत्र पूर्वपर्वतस्य परनद्यां सम्बन्धश्च स्वकर्मकपुरुषकर्तृकप्राप्तिक्रियाध्वंससमानकालिकस्थितिकर्तृनदी' इति बोधः । अत्र पूर्वपर्वतस्य परनद्यां सम्बन्धश्च स्वकर्मकपुरुषकर्तृकप्राप्तिक्रियाध्वंससमानकालिकस्थितिकर्तृत्वरूपः । सम्बन्धश्च प्रायः क्रियाद्वारक एव । क्वचित्साक्षात्क्रिययोरपि । तथाहि 'द्विगोर्लुगनपत्ये (४।१।८८) इति सूत्रभाष्ये 'अवेर्मासम्' इति विगृह्य अविकशब्दादुत्पत्तिर्भविष्यति आविकमिति वाक्ये । विग्रहश्च विभिन्नत्वेन=पृथक्त्वेन, ग्रहः = उपस्थितिः, तादृशोपस्थित्या वृत्त्यर्थावबोधो

तृप्तौ सत्त्वेऽपि 'पीत्वा तृप्तः' इति न प्रयोगः। सामानाधिकरण्यस्यापि संसर्गत्वेनार्थात्समानकर्तृकत्वमपि लब्धम्। 'भुक्त्वा व्रजति' इत्यादौ पूर्वोत्तरभावः, सामानाधिकरण्यञ्च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः। 'अधीत्य तिष्ठति' मुखं व्यादाय स्वपिति' इत्यादावध्ययनव्यादानयोरभावकालेऽप्रयोगात् यदा यदाऽस्य स्थितिः, स्वापश्च—तदा तदाऽध्ययनम्, मुखव्यादानञ्चेति कालविशेषावच्छिन्नव्याप्यत्वबोधात्।

प्रभा

वा। एवञ्च 'अवेर्मासम्' इतिवाक्यजन्यज्ञानस्य स्वोत्तरकालिकत्वसम्बन्धेन अविकशब्दावधिकप्रत्ययोत्पत्तावन्वयः। तथाच 'उक्तवाक्यजन्यज्ञानोत्तरकालिकाविकशब्दावधिकाणप्रत्ययोत्पत्तिरिति बोधः। न प्रयोग इति—तृप्तौ भोजनजन्यत्वविवक्षायां न तथाप्रयोगः। पानजन्यत्वविवक्षायान्तु, 'पीत्वा तृप्तः' इत्यस्येष्टत्वमेव। सामानाधिकरण्यस्यापीति—तेन विभिन्नपुरुषकर्तृकक्रियाद्वयमादाय न 'भुक्त्वा तृप्तः' इति प्रयोगः। वस्तुतस्तु जन्यजनकभावस्य संसर्गत्वे तस्य सामानाधिकरण्यनियतत्वेन सामानाधिकरण्यस्य पृथक्सम्बन्धत्वंव्यर्थम्, विभिन्नकर्तृकक्रिययोर्जन्यजनकभावाभावात्। नच विभिन्नकर्तृकयोरपि प्रयोज्यप्रयोजककर्तृनिष्ठक्रिययोर्जन्यजनकभावदर्शनादिदमसङ्गतमिति वाच्यम्, साक्षात्सम्बन्धावच्छिन्नजन्यजनकभावस्यैवात्र संसर्गत्वेन विवक्षितत्वात्। समानकर्तृकत्वमिति—तच्च क्रिययोरेकाधिकरणवृत्तिकर्तृतानिरूपकत्वरूपम्। तस्य व्यापारयोः सामानाधिकरण्ये एव सम्भवादिति भावः। ननु अध्ययनस्य स्थितेश्चैककालिकत्वे 'अधीत्य तिष्ठति' इति प्रयोगो न स्यात्, स्थितावध्ययनानन्तर्याभावादित्याह—अधीत्येति—अध्ययनञ्च—ज्ञानानुकूलः शब्दप्रयोगरूपो व्यापारः। नन्वानन्तर्यस्य प्रकृते संसर्गत्वास्वीकारे सामानाधिकरण्यमात्रस्य संसर्गत्वेऽप्युक्तप्रयोगयोर्बाधकाभाव इति चेन्न, यत्रैकदिवसमात्रेऽध्ययनं स्थितिस्तु मासं यावत् तत्र 'अधीत्य तिष्ठति' इति प्रयोगापत्तेः। व्याप्यत्वस्य सम्बन्धत्वे तु न तादृशप्रयोगः, स्थितावध्ययनव्याप्यत्वाभावात्। यदा यदेति—एतेन स्थितेः, स्वापस्य च व्याप्यत्वम्, अध्ययनस्य व्यापकत्वञ्च दर्शितम्। कालविशेषेति—व्याप्यताया व्यापकतायाश्चावच्छेदकः सम्बन्ध एकः कालविशेष एव। अत्र कालः वक्तृतात्पर्य्यविषयीभूतः क्षणादिरूपो ग्राह्य इति न किञ्चित्कालं मुखव्यादानविशिष्टः स्वापः, ततो मुखव्यादानाभावेऽपि स्वापसत्त्वे मुखव्यादानविशिष्टस्वापाधिकरणं तदभावविशिष्टस्वापाधिकरणञ्चैकं कालं व्याप्यताद्यवच्छेदकं मत्वा तादृशप्रयोगः, व्यादानाधिकरणतदभावानधि-

दर्पणव्याख्या

संसर्गत्वाभ्युपगमादेवेत्यर्थः। 'जलपानानन्तर्यस्य' इत्यनेन पूर्वोत्तरवाक्यसम्बन्धसत्त्वं बोध्यते। तज्जन्यत्वविवक्षाया ननु प्रयोग इष्ट एवेति भावः। सामानाधिकरण्यस्य प्रकृतपदवृत्तिग्रहाविषयतया संसर्गताभ्युपगमस्तु यत्र पूर्वापरीभावापन्नभोजनतृप्त्योर्वैयधिकरण्यं तत्र भुक्त्वा तृप्यति' इतिप्रयोगवारणाय। अव्यवहितोत्तरत्वस्य तु—दिनान्तरितपूर्वकालवृत्तिसमानाधिकरणभोजनादिक्रियामादाय क्त्वावारणाय। व्यवधानञ्च—तात्पर्यवशाद्दण्डमुहूर्त्तादिना ग्राह्यम्, अतो भोजनानन्तरं दण्डादिव्यवधानेऽपि न तादृशप्रयोगानुपपत्तिरिति बोध्यम्।

ननु पूर्वोत्तरभावस्य सम्बन्धताभ्युपगमेऽध्ययनकाले 'अधीत्य तिष्ठति' इति प्रयोगानुपपत्तिः, स्थितावध्ययनानन्तर्याभावात्। एवम् 'मुखं व्यादाय स्वपिति' इति न स्यात्, ओष्ठपुटविभागरूपव्यादानकाले एव स्वापादिसत्त्वे तादृशप्रयोगस्येष्टत्वेन व्यादानस्य स्वापपूर्वकत्वाभावादत आह—***अधीत्य तिष्ठतीत्यादि***। ***कालविशेषेति*** विभिन्नकालिकयोः

SGDF Sri Gargeshwari Digital Foundation

व्याप्यत्वम्, सामानाधिकरण्यञ्च संसर्गः ।

प्रभा

करणकालस्यैव संसर्गतया विवक्षितत्वात्। नच देवदत्तीयनिद्रादिकाले तत्स्थितेः सत्त्वादध्ययनस्य चासत्त्वात् स्थितावध्ययनव्याप्यत्वं बाधितमिति वाच्यम्, निद्रादिशून्यकालिकस्थितित्वस्यैव व्याप्यताऽवच्छेदकधर्मत्वात्। अत्र स्थाधातुरपि तादृशस्थितिपर एवेति देवदत्तस्थितित्वसामान्यनिरूपितव्यापकताया अध्ययनेऽभावेऽपि न क्षतिः।

सामानाधिकरण्यमिति—नच व्याप्यत्वस्य सामानाधिकरण्यघटिततया इदं व्यर्थमिति वाच्यम्, सामानाधिकरण्यघटितमेवात्र व्याप्यत्वं ग्राह्यमित्यत्र तात्पर्यग्राहकत्वात्, तदघटितस्यैव व्याप्यत्वस्य विवक्षितत्वाद्वा। यद्वा विभिन्नकर्तृकक्रिययोरपि कालिकसम्बन्धसम्भवात्तत्र 'अधीत्य तिष्ठति' इत्यादिवारणाय सामानाधिकरण्यस्यावश्यकत्वात्। एवञ्च क्त्वाद्यन्तस्थले समानकर्तृकत्वस्य, सामाधिकरण्यस्य च संसर्गत्वमावश्यकम्। तदतिरिक्तजन्यत्वादीनान्तु क्वाचित्कत्वमेव संसर्गत्वं भासते इति बोध्यम्। नच

'अवजानासि मां यस्मादतस्ते न भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वा शशाप सा'।

इत्यत्र मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यति, इत्यर्थे प्रजाकर्तृकभवनक्रियानिरूपितपूर्वकालिकदिलीपकर्तृकाराधनार्थकात् क्त्वादर्शनात् समानकर्तृकत्वसम्बन्धोऽपि क्वाचित्क एवेति वा 'स्थितस्य' इत्यध्याहारेण तत्समानकर्तृकत्वसत्त्वात्। भाष्यकृता तु 'स्वप्नस्यापरकालत्वात्' व्यादानोत्तरकालभाविस्वप्नापेक्षया व्यादानस्य पूर्वकालतेति पूर्वोत्तरभावस्यैव संसर्गत्वं स्वीकृतम्, नतु व्याप्यत्वस्य। एतेन स्वापानन्तरमेव मुखव्यादानमिति व्यादानस्य पूर्वकालत्वं चिन्त्यमिति परास्तम्, तदुत्तरभाविस्वापापेक्षया पूर्वकालत्वस्य सत्त्वात्। नचैवमांशिकोत्तरकालभाविक्रियामादाय पूर्वकालिकत्वोपपादने भुञ्जाने देवदत्ते उत्तरकालभाविक्रियांशमादाय पूर्वकालिकभुजिक्रियांशस्य पूर्वकालिकत्वात् 'भुक्त्वा भुङ्क्ते' इति प्रयोगापत्तिरिति वाच्यम्, तत्र ओष्ठपुटविभागजनकस्वापविशेषरूपव्यापारानन्तरं सुखविशेषजनकव्यापारान्तरस्यापि सत्त्वेन क्रमजन्मावयवसमूहरूपतत्क्रियापूर्वत्वस्यैव व्यादाने सुलभत्वात्। भुजिक्रियांशे तत्क्रियांशे निरूपितपूर्वत्वस्य सत्त्वेऽपि क्रियान्तरनिरूपितपूर्वत्वाभावेनोक्तापत्तेरभावात्। भुजिक्रियायान्तु तृप्तिरूपैकफलजनकैकव्यापारस्यैव सत्त्वेन व्यापारान्तरनिरूपितपूर्वत्वाभावान्नोक्तापत्तिः, प्रयोगानुसारित्वात्कल्पनायास्तत्र तादृशकल्पनायां मानाभावात्। 'मध्याह्ने भुक्त्वा रात्रौ भुङ्क्ते' इति त्विष्यत एव, विवक्षितकालातिरिक्तव्यवधानशून्यत्वस्यैवाव्यवहितत्वात्।

नैयायिकास्तु—प्रागभावावच्छिन्नकालवृत्तित्वरूपं पूर्वकालिकत्वं कर्ता च क्त्वार्थः। प्रागभावे चोत्तरकालिकक्रियायाः प्रतियोगितयाऽन्वयः, क्त्वार्थकर्तरि उत्तरक्रियाकर्तुरभेदेनान्वयः, कर्तृत्वस्याश्रयतया। तथाच 'भुक्त्वा व्रजति' इत्यादिना 'व्रजनप्रागभावावच्छिन्नकालवृत्तिभोजनानुकूलकृतिमान् व्रजनकर्तृत्वाश्रय

दर्पणव्याख्या

कालिकसम्बन्धघटितव्याप्यव्यापकभावाभावेन तत्सम्बन्धावच्छिन्नव्याप्यत्वस्यापि संसर्गतोपगन्तव्या। न केवलं तत्र व्याप्यत्वस्यैव संसर्गता किन्तु सामानाधिकरण्यस्यापीत्याह—* सामानाधिकरण्यञ्चेति * नातो विभिन्नकर्तृकैककालिकाध्ययनादिकमादायोक्तप्रयोगापत्तिः। एवञ्च 'समानकर्तृकयोः' इति सूत्रविहितक्त्वान्तस्थले समानकर्तृकत्वरूपसामानाधिकरण्यसंसर्गस्य शाब्दबोधविषयता सार्वत्रिकी। जन्यत्वादीनां तु तात्पर्य्यवशात् क्वाचित्की सेति भावः।

अन्येतु—सामानाधिकरण्यस्यैव पूर्वोत्तरभावस्यापि क्त्वान्तजबोधविषयता सार्वत्रिकी, 'मुखं व्यादाय' इत्यादौ 'सुप्त्वा

एवञ्चान्यलभ्यत्वान्न सूत्रात्तेषां वाच्यत्वलाभः इति युक्तम्– 'अव्ययकृतो भावे' इति। एवञ्च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्य्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम्। अत एव समानकर्तृकयोः' इति सूत्रे 'स्वशब्देनोपात्तत्वान्न' इति भाष्यप्रतीकमादाय '—पौर्वापर्य्यकाले द्योत्ये क्त्वादिर्विधीयते,

प्रभा

इति बोधः। 'चैत्रो न भुक्त्वा व्रजति' इत्यनेन व्रजनकर्तृत्वविशिष्टो यो व्रजनप्रागभावाधिकरणक्षणवृत्ति-भोजनानुकूलकृतिमान् तद्भिन्नश्चैत्र इति बोधः। क्त्वार्थकर्तुर्यत्क्रियाकर्तर्यन्वयस्तत्क्रियाया एव क्त्वार्थ-प्रागभावेऽन्वय इति व्युत्पत्तेरन्यकर्तृकक्रियाद्वयमादाय न क्त्वान्तप्रयोग इत्याहुः। मणिकारास्तु पूर्वकालि-कत्वस्य क्त्वावाच्यत्वे प्रत्ययार्थतया पूर्वकालिक्रियाविशेष्यक एव बोधः स्यात्, नतु उत्तरकालिकक्रिया-विशेष्यकः, इति दोषभिया आनन्तर्य्यस्य क्त्वावाच्यत्वमङ्गीकृत्य इति न प्रत्ययार्थप्राधान्यविरोध इत्याहुः। अन्यलभ्यत्वादिति=वृत्त्यभास्यः सम्बन्ध आकाङ्क्षाभास्य इति मते आकाङ्क्षालभ्यत्वादिति, 'वाक्यार्थः संसर्गः' इति मते वाक्यलभ्यत्वादिति वार्थः। तेषाम्=आनन्तर्यादीनाम्। वाच्यत्वेति—'अनन्यलभ्यो हि शब्दार्थः' इति न्यायात्। प्रकृत्यर्थेति—ननु प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यताश्रयस्यैव प्रकृतित्वेन प्रत्या-सत्त्या क्त्वाप्रकृतेरेव प्रकृतिपदेनात्र ग्रहणात् 'क्रिययोः' इत्ययुक्तमिति चेन्न, प्रकृत्यर्थश्च (क्त्वाप्रकृत्य-र्थश्च) क्रिया च (उत्तरकालिकक्रिया च) इति द्वन्द्वाभिप्रायेण क्त्वासमभिव्याहारे प्रत्ययान्तरस्यापि नियतत्वेनोभयप्रकृतेर्ग्रहणात् प्रकृत्यर्थौ च ते क्रिये चेति कर्मधारयाभिप्रायेण वा तथोक्तेः। प्रकृतिश्च प्रकृतिश्च प्रकृती=क्त्वाप्रत्ययप्रकृतिस्तत्समभिव्याहृततिबादिप्रकृतिश्च तयोरर्थौ ये क्रिये तयोरित्यर्थः। संसर्गे=संसर्ग-विधया भाने। अत एव=क्त्वादेः सामानाधिकरण्यादिसम्बन्धद्योतकत्वादेव।

भाष्यप्रतीकमिति—'समानकर्तृकयोः' (३।४।२१) इति सूत्रे भाष्ये हि 'इह कस्मान्न भवति—पूर्वं भुङ्क्ते पश्चाद् व्रजति' इति। स्वशब्देनोक्तत्वान्न भवति। न तर्हीदानीमिदं भवति 'पूर्वं भुक्त्वा ततो व्रजति' इति। नैतत्क्रियापौर्वकाल्यम्। किन्तर्हि? कर्तृपौर्वकाल्यमेतत्। पूर्वं ह्यसौ भुक्त्वाऽन्येभ्यो भोक्तृभ्यः ततः पश्चाद् व्रजति। अत्र 'विभाषाग्रेप्रथमपूर्वेषु' इत्यनेन क्त्वा, अग्रादीनां साधनापेक्षपूर्वकालवाचकत्वे एवास्य प्रवृत्तिः, भाष्यकृता 'अप्राप्ते विभाषा' इत्युक्तेः। क्रिययोः पौर्वकाल्ये तु 'समानकर्तृकयोः' इत्यनेनासिद्धत्वात्तदुक्तिर्विरुद्ध्येत। अस्यायमाशयः—पूर्वशब्दोऽन्यभोजनकर्त्रपेक्षया पूर्वत्वं गमयति। ततः पश्चादित्यपि अन्यव्रजनकर्त्रपेक्षमेवोत्तरत्वं प्रत्याययति, नतु क्रिययोः। क्रिययोः पौर्वापर्य्यस्यैव

दर्पणव्याख्या

मुखं व्यादत्ते' इत्यत्रेव व्यादानोत्तरमपि स्वापानुवृत्तेस्तथा पौर्वापर्य्यमादाय प्रयोगोपपत्तिः। एवञ्चोक्तसम्बन्धद्वयातिरिक्त-सम्बन्धभानस्यैव क्वाचित्कत्वमित्याहुः। नच 'अवजानासि मां यस्मादतस्ते न भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा'॥ इत्यत्र मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यतीत्यर्थाद्विभिन्नकर्तृकादपि क्त्वादर्शनात् समानकर्तृकत्वस्यापि क्त्वान्तजन्यबोधविषयता न सार्वत्रिकीति वाच्यम्, सूत्रस्वरसात्तादृशस्थले स्थित्यादिक्रियामध्याहृत्याऽनाराध्य स्थितस्येति बोधस्याभ्युपगमेन सार्वत्रिकत्वाक्षतेरिति। * अन्यलभ्यत्वादिति * आकाङ्क्षानियम्यत्वाद्वाक्यशक्तिलभ्यत्वाद्वेत्यर्थः।

* क्रिययोः संसर्ग इति * प्रकृत्यर्थविशेषकत्वरूपस्य तस्यासम्भवेऽपि निरुक्तं तदिह बोध्यमित्यर्थः। * अत एवेति * क्त्वः समानकर्तृकत्वादिद्योतकत्वादेवेत्यर्थः। * भाष्यप्रतीकमिति * 'इह कस्मान्न भवति—'पूर्वं भुङ्क्ते

नतु विषये इति भाव इति' कैयटः ।

प्रभा

क्त्वाप्रत्ययो द्योतकः । धात्वर्थक्रियाणां सम्बन्धे' इत्येतदर्थके 'धातुसम्बन्धे' इत्यधिकारस्थत्वात् 'समानकर्तृकयोः' इत्यादीनाम्, अत्र चेदमेव भाष्यं मानम्। भोजनकर्त्रोः, व्रजनकर्त्रोश्च पौर्वापर्य्यस्य पूर्वादिशब्दा वाचका इति क्त्वाप्रत्ययस्य, पूर्वादिशब्दस्य च प्रयोगसार्थक्यमिति भाष्याशयः ।

विषय इति—प्रकृतवाक्यघटकयत्किञ्चित्पदवाच्ये पौर्वापर्य्ये इत्यर्थः, 'उक्तार्थानामप्रयोगः' इति न्यायात्। 'समानकर्तृकयोः' इति निर्द्धारणे षष्ठी, सौत्रत्वाद्द्विवचनम्। पूर्वः कालो यस्येत्यर्थे बहुव्रीहिणा पूर्वकालिकव्यापारवाचकः, तथाच 'पूर्वकालिकभावे विद्यमानाद्धातोः क्त्वा' इत्यर्थः। वस्तुतस्तु पूर्वकाल इति कर्मधारयः। नचैवं पूर्वकाल इत्यनेन भूतकाल इत्युपलभ्यते, तथाच लाघवात् 'भूते' इत्येव वक्तुमुचितमिति वाच्यम्, पर्यायवाचकेषु लाघवानादरात्, पूर्वकालत्वेन प्रतीतये तथोक्तेरावश्यकत्वाच्च। तथाच पूर्वकाले द्योत्ये क्त्वेत्यर्थः। अत एव 'इह कस्मान्न भवति 'पूर्वं भुङ्क्ते पश्चाद् व्रजति' इति स्वशब्देन पूर्वकालस्योक्तत्वान्नेति' भाष्योक्तिः सङ्गच्छते, अन्यथा पूर्वकालिकक्रियायाः क्त्वार्थत्वे पूर्वकालस्य विशेषतया विशेष्यार्थविषयकस्य 'उक्तार्थानामप्रयोगः' इति भाष्योक्तन्यायस्यासङ्गत्यापत्तेः; 'पूर्वं भुङ्क्ते' इत्यत्र पूर्वशब्देन कालस्यैवाभिधानात्। केचित्तु पूर्वकालः क्त्वावाच्यः, धात्वर्थश्च तत्र प्रकारः, कृत्प्रत्ययस्थले प्रत्ययवाच्यस्यैव विशेष्यतया भानदर्शनात्। अत एव 'इह कस्मान्न भवति 'आस्यते भोक्तुम्' इत्यत्रासेः क्त्वाप्रत्ययशङ्कापरं भाष्यं सङ्गच्छते। अन्यथा तुमुना आसिक्रियायां पूर्वकालत्वस्य द्योतनात् भाष्यासङ्गति। तुमुन्प्रकृत्यर्थक्रियायाः फलत्वेनोत्तरकालभावितया आसौ पूर्वकालत्वस्य प्रतीतौ बाधकाभावात्। तथाच षष्ठ्याः सम्बन्धवाचकत्ववत् क्त्वादीनामपि सम्बन्धवाचकत्वमेवेति। अन्ये तु पूर्वकालस्य धातुवाच्यत्वे एव क्त्वादीनां द्योतकत्वं सम्भवति, तच्च दुर्वचम्, तत्र मानभूतस्य 'आस्यते भोक्तुम्' इति भाष्यस्यान्यथो-

दर्पणव्याख्या

पश्चाद् व्रजति' इति, स्वशब्देनोपात्तत्वात्' इति भाष्यम्। तत्र समानकर्तृकत्वेन पूर्वकालत्वेन, च क्त्व आपादनम्। * नतु विषय इति * नतु प्रयोगघटकयत्किञ्चित्पदबोध्य इत्यर्थः, 'उक्तार्थानामप्रयोगः' इति न्यायादिति भावः। तथाच 'समानकर्तृकयो·' इति निर्द्धारणे षष्ठी, 'पूर्वकाल' इति च षष्ठ्यर्थे बहुव्रीहिरिति कैयटाशयः। वाक्यार्थस्तु पूर्वमेवोक्तः। नच पूर्वकालस्य पूर्वादिशब्देनाभिधाने क्त्वोऽसाधुत्वे 'पूर्वं भुक्त्वा पश्चाद् 'व्रजति' इत्यत्र क्त्वोऽनुपपत्तिस्तदवस्थैवेति वाच्यम्, भाष्यकृतैव तत्समाधानात्। तथाच भाष्यम्—'नैतत् क्रियापौर्वकाल्यम्, किं तर्हि कर्तृपौर्वकाल्यमेतत्—पूर्वमसौ भुक्त्वान्येभ्यो व्रजितृभ्यः पश्चाद् व्रजतीति। अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वाऽपरेभ्यो गन्तृभ्यः पश्चाद् व्रजतीत्यर्थे साधनान्तरक्रियाऽपेक्षं पौर्वकाल्यमादाय—'विभाषा ग्रह' इति क्त्वः सम्भव इति तदाशयः। नव्यास्तु—'पूर्वकाल' इति कर्मधारयः, भूत इति तु नोक्तम्, पर्यायशब्दत्वात्, तेन रूपेण बोधाननुभवाच्च। तथाच समानकर्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तिधातोः क्त्वेति सूत्रार्थः। तथाच पूर्वकालः क्त्वार्थो धात्वर्थप्रकार एव। अत एव समानकर्तृकत्वेन 'पूर्वं भुङ्क्ते पश्चाद् व्रजति' इत्यत्र क्त्वाप्रत्ययमाशङ्क्य—'स्वशब्देनोपात्तत्वान्न' इति परिहृतं भाष्ये। पूर्वशब्दस्य पूर्वकालोऽर्थः, नतु धातोस्तत्र वृत्तिरिति तदर्थो नतूक्तार्थानामप्रयोग इति। अत एव इह कस्मान्न भवत्यास्यते भोक्तुम्' इत्यग्रिमशङ्कासङ्गतिः। अन्यथा फलार्थकतुमुना पूर्वकालत्वस्यासिक्रियायां द्योतनात्तदसङ्गति स्पष्टैव। पूर्वकालत्वस्य ततोऽप्रतीतौ तु कथं क्त्व आपादनम्, वाऽसरूपन्यायेन लटा साधितमित्यन्यत्। एवञ्च षष्ठ्याः सम्बन्धवाचकत्ववदमीषामपि सम्बन्धवाचकत्वं सुवचमित्याहुः।

SGDF
Sri Gargeshwari Digital Foundation

यत्तु—'समानकर्तृकयोः' इति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यम्, अन्यथौदनं पक्त्वाऽहं भोक्ष्ये' इत्यत्र भयेति तृतीयाप्रसङ्गश्च। नचाख्यातेन कर्तुरभिधानान्न सेति वाच्यम्, भोजनक्रियाकर्तुरभिधानेपि पाकक्रियाकर्तुस्तदभावात्।

प्रभा

पपत्तेः। तथाहि—तुमुनः फलीभूतक्रियावाचकत्वेऽपि तेनासिक्रियायां पूर्वकालिकत्वस्याद्योतनात् द्योतकत्वपक्षेऽपि भाष्योक्तशङ्काया उत्थानसम्भवात्। तस्मात् क्रियानिरूपितपौर्वापर्यादिसम्बन्धविशेषद्योतकमेव क्त्वादीनां कर्मप्रवचनीयवदिति कैयटोक्तं सम्यगेवेति।

समानकर्तृकत्वमिति—अत्र समानकर्तृकपदं धर्मपरम्। नच समानकर्तृकत्वरूपधर्मस्यैकत्वेन द्विवचनासङ्गतिः, क्रियारूपधर्मिगतद्वित्वस्यारोपेण सामानाधिकरण्येन वा धर्मेऽपि द्वित्वप्रतीतिसम्भवात्। समानेतिपदस्य धर्मिपरत्वेऽपि क्रियारूपधर्मिणो धातुतो लाभादनन्यलभ्यन्यायेन, लाघवेन च धर्ममात्रं क्त्वावाच्यम्। तत्र समानशब्द एकार्थकस्तथाच कर्तृकर्तृकत्वं समानकर्तृकत्वम्। पूर्वकालिकक्रियाया निरूपितत्वसम्बन्धेन प्रथमे कर्तृत्वेऽन्वयः। भोजनादिक्रियानिरूपितकर्तृत्वाश्रयाभिन्नकर्तृवृत्तिव्रजनादिक्रियेति 'भुक्त्वा व्रजति' इत्यादिना बोधः। अन्यथा—समानकर्तृकत्वस्यावाच्यत्वे। ननु 'अनभिहिते' इत्यत्र प्रसज्यप्रतिषेधाश्रयणेन प्रकृते कर्तुस्तिङाभिधानात् तृतीया न स्यादित्यभिप्रेत्याह—नचेति। भोजनेति—भोजनक्रियाकर्तृत्वस्येत्यर्थः। पाकेति—पाकक्रियाकर्तृत्वस्येत्यर्थः। यथाश्रुतन्तु न युक्तम्, उभयोरेककर्तृकत्वेन भोजनक्रियाकर्तुरस्मदर्थस्यैव पाकक्रियाकर्तृतया भोजनकर्तुरभिधाने पाककर्तुरप्यभिहितत्वेन 'अभिहिते तृतीया न' इति निषेधस्य दुर्वारत्वात्। कर्तृत्वधर्मस्य तु क्रियाभेदेन भेदादेकस्याभिधानेऽपि पाककर्तृत्वस्यानभिधानात्तत्र निषेधाप्रवृत्त्या तृतीयापत्तेर्वक्तुं शक्यत्वात्। वस्तुतस्तु प्रसज्यप्रतिषेधे एकाधिकरणिकायां कस्याञ्चिच्छक्तावभिहितायाम् 'अभिहितायां शक्तौ तदाश्रयवाचकात् कारकविभक्तिर्नेति निषेधस्य दुर्वारतया 'अनभिहिते' इति पर्युदास एव, 'शक्तिः कारकम्' इति पक्षश्च श्रेयान्।

दर्पणव्याख्या

अत्रेदं चिन्त्यम्—ननु धातेस्तत्र वृत्तिरित्यर्थे—'आस्यते भोक्तुम्' इत्यग्रिमशङ्कानुपपत्तेरुपष्टम्भकत्वेनोपन्यसनं शिथिलम्, यतः कैयटमतेऽपि प्रतीयमानस्यार्थे पूर्वकालसम्बन्धित्वस्य केनचिदनभिधानेनोक्तार्थानामप्रयोग इति न्यायानवतारादाशङ्कोत्थानसम्भवात्। प्रत्ययवाच्यस्य कृत्प्रत्ययस्थले धात्वर्थविशेष्यताया नव्यानामपि सम्मतत्वेन 'पूर्वकालः क्त्वार्थो धात्वर्थप्रकार एव' इति पूर्वग्रन्थविरोधाश्च। नच द्योतकत्वाभ्युपगमादुक्तसङ्गतिः, षष्ठ्याः सम्बन्धवाचकत्ववदमीषामपि सम्बन्धवाचकत्वम्' इत्युत्तरग्रन्थविरोधात्। नच तदपि सुवचम्, समानकर्तृकत्वादीनां वाच्यतायाः सूत्रादलाभात्। तस्मात् कर्मप्रवचनीयवत् क्रियासम्बन्धविशेषकत्वमेव क्त्वादीनामिति कैयटोक्तमेव सम्यगिति।

मतान्तरं दूषयितुमुपन्यस्यति—* यत्त्विति *। * क्त्वावाच्यमिति * 'समानकर्तृकयोः पूर्वकाले' इत्युभयोः पदयोर्बहुव्रीहित्वाविशेषेण पूर्वकालस्य वाच्यत्वमितरार्थस्य द्योत्यत्वमिति वैषम्ये बीजाभावादिति भावः। वैषम्ये बाधकमाह—* अन्यथेति * तस्य क्तप्रत्ययावाच्यत्वे इत्यर्थः। * तृतीयाप्रसङ्गश्चेति * क्त्वाप्रत्ययेन कर्तुरनभिधानादिति भावः। ननु 'अनभिहिते' इति सूत्रे नञः प्रसज्यप्रतिषेधार्थकतया प्रकृते कर्तुराख्यातेनाभिधानान्न तृतीयाप्राप्तिरित्याशङ्क्य निराचष्टे—* नचेति * 'अनभिहिते' इति न प्रसज्यप्रतिषेधः, वाक्यभेदादिदोषात्। नचानुपपत्त्या तत्स्वीकारः, वक्ष्यमाणभाष्यविरोधात्। तथाचैकेनाभिधानेप्यन्येनानभिधाना तृतीया दुर्वारेत्यभिप्रायेणाह—*पाकक्रियाकर्तुरित्यादि *

अनभिहिते भवति इति पर्युदासाश्रयणात्। अत एव 'प्रासादे आस्ते' इत्यत्र प्रसादनक्रियाधिकरणस्याभिधानेऽप्यास्तिक्रियाधिकरणस्यानभिधानात्सप्तमीति भाष्ये स्पष्टम्। तस्मात् क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यकमिति, तन्न, सूत्रात्तस्य वाच्यत्वालाभात्, 'समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वा' इत्येव तदर्थात्। अन्यथा 'समानकर्त्तरि' इत्येव सूत्रन्यासः स्यात्। तृतीयापादनन्तु--आख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न सम्भवति। उक्तञ्च वाक्यपदीये--

प्रभा

तथाच अभिहितशक्तिभिन्नशक्त्याश्रयवाचकात्कारकविभक्तेर्विधाने एकगतयोः शक्त्योरन्यतराभिधानेऽपि अभिहितशक्तिभिन्नत्वस्यापरस्यां शक्तौ सत्त्वेन ततः कारकविभक्तिर्निष्प्रत्यूहा सिद्ध्यति। तदुक्तं भाष्ये—'प्रसज्यप्रतिषेधपक्षे 'कुतो नु खल्येतत्सत्यभिधाने चानभिधाने चानभिहिताश्रया सप्तमी 'प्रासादे आस्ते' 'शयने आस्ते' इत्यादौ भविष्यति। न पुनरभिहिताश्रयः प्रतिषेध इति। पर्युदासाभिप्रायेण समाहितम्-'अनभिहिते विधानम्' अनभिहिते हि सप्तमी विधीयते। 'नाभिहिते प्रतिषेधः इति' इत्याह—अनभिहिते भवतीति—अभिहितभिन्ने कर्तृत्वादिधर्मे तदाश्रयवाचकात्कारकविभक्तयो भवन्तीति पर्युदासाश्रयणादित्यर्थः। अत एव=लाघवात् पर्युदासाश्रयणादेव। प्रसदनेति—प्रसदनक्रियाधिकरणत्वस्येत्यर्थः। प्रसदनेति पाठः, प्रसदेरेवाधिकरणे घञि 'उपसर्गस्य घञि' इति दीर्घे प्रासादशब्दसिद्धेः। आस्तीति—आस्तिक्रियाधिकरणत्वस्येत्यर्थः। आस्तीति पाठः, आसेः श्तिपि 'अस्ति' इति रूपासम्भवात्। तस्मात्--तृतीयाद्यतिप्रसङ्गात्। तस्य=समानकर्तृकत्वस्य। वाच्यत्वालाभात्=क्त्वावाच्यत्वालाभात्। समानकर्तृकयोरिति—धात्वर्थक्रियारूपान्यपदार्थे बहुव्रीहिस्तदुक्तम्—क्रिययोरिति—निर्द्धारणे षष्ठी सौत्रत्वाद् द्विवचनम्। अत एव 'समानकर्तृकयोरिति बहुष्वप्राप्तिः द्विवचनेनायं निर्देशः क्रियते। तेन द्वयोरेव पौर्वकाल्ये स्याद्, बहूनां न स्यात्, सिद्धन्तु क्रियाप्रधानत्वात्' इति भाष्यं सङ्गच्छते। अन्यथा=समानकर्तरि क्त्वादेर्विधाने। तृतीयेति—तृतीयापादनम्=तृतीयापत्तिः। अस्य 'न सम्भवति' इत्यनेनान्वयः। आख्यातार्थेति—'भोक्ष्ये' इति लृटा प्रधानीभूतभोजनक्रियानिरूपितकर्तृत्वशक्तेरभिहितत्वेन क्त्वान्तार्थपाककियानिरूपितकर्तृत्वस्यानभिधानेऽपि 'स्वादुमि णमुल्' इति सूत्रभाष्यमूलवाक्यपदीयकारिकासिद्धात् 'प्रधानानुरोधेन गुणे कार्यप्रवृत्तिः' इति न्यायात् प्रधानक्रियानिरूपितकर्तृत्वादिगताभिहितत्वानभिहितत्वयोर्गुणक्रियानिरूपितकर्तृत्वादावारोपेण तत्प्रयुक्तकार्यस्यैव न्याय्यतया गुणक्रियानिरूपितकर्तृत्वादौ वास्तविकाभिहितानभिहितत्वयोरकिञ्चित्करत्वेन तृतीयाद्यापत्तिः

दर्पणव्याख्या

* तदभावादिति * अभिहितभिन्नत्वादित्यर्थः। * अत एवेति * तत्सूत्रस्थनञः पर्युदासार्थकत्वादेवेत्यर्थः। 'भाष्ये' 'इत्यस्यानभिहितसूत्रस्थे' इति शेषः। तस्येति * समानकर्तृकत्वस्येत्यर्थः। द्विवचनप्रकृतिबहुव्रीहिणा समानकर्तृकत्वस्य धात्वर्थविशेषणतैव प्रतीयते, नतु विधीयमानक्त्व इति भावः। तदेव विशदयति—* अन्यथेति * एतत्सूत्रस्य कर्तृशक्तिप्रतिपादकत्वे इत्यर्थः। * समानेति * तदुपादानाच्च कर्तृद्वयस्यैक्यलाभः। * न्यासः स्यादिति * 'कर्त्तरि कृत्' इतिवत्। वस्तुतस्तु न तथा सम्भवति, 'कर्त्तरि कृत्' इति सूत्रेणैव गतार्थत्वात्, 'अव्ययकृतो भावे' इति वार्त्तिकविरोधाच्चेति भावः। उक्तापत्तिं निरस्यति--* तृतीयापादनं त्विति *। * आख्यातार्थक्रियाया इति * क्रियाद्वयनिरूपितकर्तृशक्त्योरनेकत्वेऽपि प्रधानतिङन्तार्थक्रियानिरूपितकर्तृशक्तेराख्यातेनाभिधाने तत्र कृदन्तार्थक्रियानिरूपितत

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानमनुरुद्ध्यते ।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते । इति ।
किञ्चान्यथा कर्मणोऽपि क्त्वार्थताऽऽपत्तिः, 'पक्त्वौदनो मया भुज्यते' इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणादित्यास्तां विस्तरः ॥ ६० ॥

इति वैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः ॥ १२ ॥

प्रभा

चेरभावात् । प्रधानेतरयोरिति—यत्र=वाक्ये. प्रधानेतरयोः=प्रधानाप्रधानयोः । क्रिययोरिति—निरूपितत्वं सप्तम्यर्थः । द्रव्यस्येति—निष्ठत्वं षष्ठ्यर्थः । तथाच यद्वाक्यघटकपदबोध्यप्रधानाप्रधानक्रियानिरूपिता एकद्रव्यनिष्ठा पृथक्शक्तिस्तत्र गुणाश्रया—गुणक्रियानिरूपिता शक्तिः प्रधानम्=प्रधानक्रियानिरूपितकर्तृत्वधर्ममनुरुद्ध्यते। अनुरोधमेव विशदयति—प्रधानविषयेति—प्रधानक्रियावाचिनो धातोरुत्पन्नेन प्रत्ययेन यदा प्रधानक्रिया विषया (निरूपिता) शक्तिरभिधीयते तदा गुणक्रिया विषया शक्तिः साक्षादनुक्ताऽपि तद्वत्—उक्तावत्प्रकाशत इत्यर्थः । इदमुपलक्षणम्—प्रधानशक्तिरनुक्ता चेत्तदा गुणाश्रया शक्तिरुक्ताऽपि अनुक्तावत्प्रतीयते । यथा 'प्रासादे शेते' इत्यत्र । गुणे इत्यत्र निरूपितत्वं सप्तम्यर्थः । तस्य शक्तावन्वये गुणनिरूपिता शक्तिरित्यर्थः । तेनाप्रधानक्रियानिरूपितशक्त्यभिधायकोऽनभिहिताधिकारस्थः प्रत्ययो नेति सिद्धम् । एवञ्च 'पक्त्वा ओदनो भुज्यते' इत्यादौ कदाऽपि द्वितीया न भवति । तदेवाह—किञ्चेति । अन्यथा='प्रधानेतरयोः' इति न्यायानङ्गीकारे । यदा तु गुणक्रियानिरूपितकर्मत्वादेरेव विवक्षा, नतु प्रधानक्रियानिरूपितकर्मत्वादेस्तदा 'पक्त्वा ओदनं भुज्यते' इत्यपि साधु । तथाच 'प्रधानेतरयोः' इति न्याय उभयनिरूपितशक्तेर्युगपद्विवक्षायामेव नियामक इति बोध्यम् । अत्रेदमपि बोध्यम्—यत्र प्रधानीभूता क्रियैका 'अप्रधानीभूताश्च बह्वस्तत्र सर्वाः पूर्वकालिकाः क्रियाः पूर्वोक्तसम्बन्धेन प्रधानीभूतक्रियायामेव विशेषणतयाऽन्वयं लभन्ते, नतु परस्परम् , 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायात् । तेन क्त्वान्तापेक्षया न क्त्वान्तस्य विशेषणत्वमिति 'भुक्त्वा, स्नात्वा पीत्वा गतः' इति 'स्नात्वा पीत्वा भुक्त्वा गतः' इति च यथेच्छक्रमेण प्रयोगो जायते । यत्र च समानकर्तृकक्रियावाचकात् भावेऽपि क्त्वान्तप्रयोगस्तत्रान्वययोग्याप्रधानक्रिया अध्याहार्य्या, यथा—

दर्पणव्याख्या

च्छक्तेरनभिहिताया अप्यभिहितत्वातिदेशस्य, अनभिधाने त्वनभिहितत्वातिदेशस्य चोक्तभाष्यप्रामाण्येनाभ्युपगमान्न तृतीयापत्तिः प्रकृते इति भावः । * प्रधानेतरयोरिति * गुणप्रधानक्रियानिरूपितशक्तिद्वयं यत्रैकस्मिन् द्रव्ये तत्र गुणक्रियानिरूपितशक्तिः प्रधानक्रियानिरूपितशक्तिधर्ममनुरुणद्धीत्यर्थः । उक्तातिदेशेऽपि तत्सम्मतिमाह—* प्रधानविषयेति * प्रधानम्—विषयः=निरूपकं यस्याः सा शक्तिर्यदा प्रत्ययेन तिङाऽभिधीयते। तदा गुणक्रियावाचकधातूत्तरप्रत्ययेनाभिहिताप्यभिहितवत् प्रतीयते इत्यर्थः । इदमुपलक्षणम्—अभिहिताया अपि अनभिहितत्वप्रतीतेः । तत्र 'प्रासादे आस्ते' इत्युदाहार्य्यम् । अवश्यं चेत्थमभ्युपेतव्यम्—अन्यथा कर्तुः क्त्वार्थत्वाभ्युपगमेनोक्तस्थले तृतीयापत्तिवारणेऽपि 'पक्त्वौदनो मया भुज्यते' इत्यत्रौदनपदोत्तरं द्वितीयाऽऽपत्तिर्दुर्वारा । तत्र पाकक्रियानिरूपितकर्मत्वशक्तेः कृतानभिधानादुक्तरीतेरसम्भवादित्याह—* किञ्चेति * अत्रेदं बोध्यम्—यदौदने पाकक्रियानिरूपितकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतम् , नतु प्रधानक्रियानिरूपितकर्मत्वस्यापि, तदा 'ओदनं पक्त्वा भुज्यते' इत्यपि साधु, ओदनस्य भोजनकर्मताया आर्थिकत्वात् । यदा

प्रभा

अवजानासि मां यस्मादतस्ते न भविष्यति, मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा।

इत्यत्र आराधनकर्तृकर्तृका अन्या क्रिया नास्तीति 'स्थितस्य ते' इत्यध्याहृत्य व्याख्येयम् । एवम् 'स्नात्वा कनखले तीर्थे पुनर्जन्म न विद्यते' प्रातःकाले शिवं दृष्ट्वा निशि पापं व्यपोहति' इत्यादावप्यूह्यम्। विद्यते इति कर्मणि प्रत्यये लभ्यते इत्यर्थकत्वेन वा समानकर्तृकत्वमुपपाद्यम् । ननु प्रागभावो घटादि-कपालतत्संयोगादिस्वसामग्रीवशादुत्पन्नस्य घटस्य पुनरुत्पादाभावाय घटं प्रति कारणत्वेन स्वीक्रियते। यदि तु तत्कार्योत्पत्तिम्प्रति समवायादिना तत्कार्य्यस्य प्रतिबन्धकत्वकल्पनेन उत्पन्नस्य पुनरुत्पादं निरा-कृत्य प्रागभावो न स्वीक्रियते तदा ध्वंस एव क्त्वाप्रत्ययार्थो वाच्यः। तथाच क्त्वाप्रकृत्यर्थयत्किञ्चित्क्रि-यायाः प्रतियोगितया ध्वंसम्प्रति विशेषणत्वम् , क्रियासामान्यस्य वा। नाद्यः, काशीं गत्वा काशीं रमते' इति प्रयोगापत्तेः, आद्यक्रियाध्वंसवैशिष्ट्यस्य रमिक्रियायां सत्त्वात् । नान्त्यः, स्थित्वा पश्यति पुस्तकम्' 'स्थित्वा जक्षिति जमेनम्' इत्यादिप्रयोगानुपपत्तेः, स्थितिक्रियाया दर्शनोत्तरं भोजनोत्तरञ्च सत्त्वेन स्थितिक्रियासामान्यप्रतियोगिकध्वंसवैशिष्ट्यस्य दर्शनादनयोरभावादिति चेदुच्यते—क्त्वाप्रत्ययस्य पूर्व-काले एव शक्तिः । शक्यतावच्छेदकञ्च लाघवात्कालत्वमेव । तत्र कालिकसम्बन्धावच्छिन्नाधारता-सम्बन्धेन प्रकृत्यर्थक्रियाया अन्वयः। कालस्य तु स्वध्वंसाधिकरणक्षणोत्पत्तिकत्वसम्बन्धेनोत्तरक्रियाम्प्रति विशेषणता। कालश्च पूर्ववत्तात्पर्य्यविषयघट्यादिरूपो ग्राह्यः। 'ईश्वरो ज्ञात्वा सृजति' इति तु तज्ज्ञानस्य नित्यत्वेन ध्वंसासम्भवेऽपि खण्डकालगतध्वंसारोपेण कथञ्चिन्निर्वाह्यम्। प्रकारान्तरेणेति—क्त्वाप्रत्ययस्य कर्तरि शक्त्यङ्गीकारेण तृतीयावारणेऽपि पक्त्वा भुज्यते ओदनः' इत्यत्र पाकक्रियाकर्मत्वस्यानभिधानात् द्वितीयापत्तिर्दुष्परिहरैव। तत्परिहाराय कर्मण्यपि शक्तिस्वीकारे गौरवं मानाभावश्च । 'प्रधानेतरयोः' इति न्यायानुसरणे तु न कश्चिद् दोषः। अपिच क्त्वादीनां वाचकत्वं न युक्तम् , अन्यत्वानन्तर्य्यव्याप्यत्वाद्यने-कार्थकत्वेन नानार्थकत्वापत्तेः। किञ्च जन्यत्वादीनां प्रत्ययार्थतया विशेष्यत्वापत्त्या 'भुक्त्वा भुक्त्वा व्रजति' इत्यत्र 'आभीक्ष्ण्ये द्वे वाच्ये' इति द्वित्वानापत्तिः, क्रियाप्रधानार्थकत्वाभावात् । विशेषणीभूतक्रिया-वाचकस्यापि द्वित्वाङ्गीकारे तु 'पाचकः' इत्यादावपि तदापत्तिः, साक्षाद् धात्वर्थानां सम्बन्धे प्रत्ययविधेय-ताप्रयोजकस्य 'धातुसम्बन्धे' इत्यधिकारस्य 'लुनीहि लुनीहि' इत्येवायं लुनाति' इत्यादौ दृष्टस्य प्रत्ययार्थद्वार-कपरम्परासम्बन्धमादाय प्रवृत्त्या तद्बाधापत्तिश्चेति द्योतकत्वमेव न्याय्यम् ॥ ६० ॥

ईश्वरानुगृहीत्यैव क्त्वादीनामर्थनिर्णये ।
प्रभा स्वप्रभया पूर्णा बालकृष्णविनिर्मिता ॥
॥ शुभम्भूयात् ॥

दर्पणव्याख्या

तूभयकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतं तदौदनपदाद् द्वितीया असाध्वेव, उक्तव्यवस्थितेः। परन्त्वाख्यातवाच्यक्रियाश्च प्राधान्यात्तां प्रत्येव क्त्वान्तोपस्थिताः सर्वाः क्रिया गुणीभवन्ति, नतु तासां परस्परं विशेष्यविशेषणभावः, 'गुणानाञ्च परार्थत्वात्' इति न्यायात्। एवञ्च 'स्नात्वा पीत्वा भुक्त्वा व्रजति' इत्यविशेषेण प्रयोगाः। तुमुनस्तादर्थ्यरूपमुद्देश्यत्वमपि द्योत्यम् 'क्रियार्थायां क्रियायाम्' इत्युक्तेः। तन्निष्कर्षश्च पूर्ववदेव। तुम्प्रकृत्यर्थोपपदार्थयोस्तादर्थ्यवत्समानकर्तृकत्वादिकमपि सम्बन्धः। तथाच,—'हरिं द्रष्टुं याति' इत्यतो हरिकर्मकभविष्यद्दर्शनोद्देश्यकं दर्शनकर्तृकर्तृकं यानमिति शाब्दधीः। अनयैव दिशा 'एधानाहारको व्रजति' इति बोध ऊहनीयः ॥ ६० ॥

॥ इति वैयाकरणभूषणसारदर्पणे क्त्वाद्यर्थनिरूपणम् ॥

Digital Foundation

॥ अथ स्फोटनिरूपणम् ॥

प्रभा

प्रथमं मतभेदेन शब्दस्य नित्यत्वानित्यत्वे प्रदर्श्येते 'शब्दोऽनित्यः' इति नैयायिकवैशेषिकाः। तथाहि—'आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च' (अ० २ आ० २ सू० १३) इति गौतमसूत्रम्। अत्र न्यायभाष्यकारवात्स्यायनः। आदिः=योनिः=कारणम्, आदीयतेऽस्मादिति कारणवदनित्यं दृष्टम्। संयोगविभागश्च शब्दः कारणवत्त्वादनित्य इति। किमुत्पत्तिकारणं संयोगविभागौ शब्दस्य? आहोस्विद भिव्यक्तिकारणम्? इत्यत आह—ऐन्द्रियकत्वादिति। इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः।

इन्द्रियग्राह्यत्वादनित्यः शब्दो रूपादिवत्। किमयं व्यञ्जकेन समानदेशोऽभिव्यज्यते रूपादिवत्? अथ संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नो गृह्यते? इति। दारुव्रश्चने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्दो गृह्यते, नच व्यञ्जकाभावे व्यङ्ग्यस्य ग्रहणं भवति तस्मान्न व्यञ्जकः संयोगः। उत्पादके तु संयोगे संयोगजाच्छब्दाच्छब्दसंताने सति श्रोत्रप्रत्यासन्नस्य ग्रहणमिति। ननु नायं नियमः—येनेन्द्रियेण यद् गृह्यते, तज्जातिरपि तेनेति घटत्वस्य चाक्षुषत्वेऽपि नित्यत्वदर्शनादित्यत आह—कृतकेति—इतश्च शब्दो नाभिव्यज्यते—कृतकवदुपचारात्—तीव्रं मन्दमिति कृतकमुपचर्य्यते। तीव्रं सुखं मन्दं सुखं 'तीव्रं दुःखं मन्दं दुःखम्' इति। उपचर्य्यते च 'तीव्रः शब्दो मन्दः शब्द इति। नच व्यञ्जकस्य संयोगस्य तीव्रमन्दतया शब्दे तीव्रमन्दतोपचारः प्रकाशस्य तीव्रमन्दतया रूपज्ञानस्य यथा तीव्रमन्दत्वमिति वाच्यम्, तीव्रो भेरीशब्दो मन्दं तन्त्रीशब्दमभिभवति, भेदाभावेऽभिभवानुपपत्तेः। किञ्च व्यञ्जकत्वपक्षे व्यञ्जकभेरीदेशस्थेन शब्देन भिन्नदेशस्थस्य तन्त्रीशब्दस्याभिभवोऽनुपपन्नः, परस्परं सम्बद्धस्यैवाभिभावकत्वाभिभूतत्वयोरुल्काप्रकाशसूर्यप्रकाशयोर्दर्शनात्। अत एव रात्रिस्थोल्काप्रकाशस्य आदित्यप्रकाशेनाभिभवो न जायतेऽसम्बद्धत्वात्। उत्पत्तिपक्षे तु 'वीचितरङ्ग' न्यायेन भेरीजशब्दजशब्दस्य तन्त्रीजशब्दजशब्देन सम्बद्धत्वादभिभव उपपद्यते। सम्बन्धाभावेऽप्यभिभवस्वीकारे भेरीशब्दे जाते जगति तन्त्रीशब्दो न श्रूयेत। इत्थं बहुभिस्तर्कैः द्वितीयाध्याये द्वितीयाह्निके त्रयोदशसूत्रमारभ्यैकोनषष्ठितमं सूत्रं यावन्न्यायदर्शने शब्दानित्यत्वं व्यवस्थापितम्। तत्र प्रथमक्षणे वर्णः उत्पद्यते, द्वितीयक्षणे तिष्ठति, पूर्ववर्णस्थितिक्षण एव द्वितीयो वर्ण उत्पद्यते। तृतीयक्षणे पूर्ववर्णो नश्यति द्वितीयो वर्णस्तिष्ठति, तत्रैव वर्णान्तरमुत्पद्यते, द्वितीयश्च नश्यति, इत्येवं क्रमेणोत्पन्नाश्च शब्दाः शब्दान्तरमुत्पादयन्तः श्रोतुः कर्णदेशं गत्वा श्रावणप्रत्यक्षविषयतां यान्ति। प्रयत्नजनितः शब्दो मात्रया वायुं प्रेरयति। स च वायुः पूर्वशब्दाच्छब्दान्तरमुत्पादयति। सोऽयं शब्दसन्तानो यावद्वायुवेगमनुवर्तते। वेगोपरमे चोपरमति। एतेन शब्दाच्छब्दोत्पत्तिस्वीकारे शब्दधारा नोपरमेदिति परास्तम्।

दर्पणव्याख्या

इत्थं व्याकरणादिना गृहीतशक्तिकपदसमुदायादनासन्नादगृहीतार्थतात्पर्य्यकादयोग्यादनाकाङ्क्षाच्च शाब्दबोधादर्शनादासत्त्यादिकमपि शक्तिज्ञानजन्यपदार्थोपस्थित्या बोधे जननीये सहकारि। आसत्तिश्च—प्रकृतबोधानुकूलपदाव्यवधानम्। अस्ति च 'पर्वतो वह्निमान्' इत्यत्र तादृशपदाव्यवधानम्, नतु 'गिरिर्भुक्तं वह्निमान् देवदत्तेन' इति न ततो बोधः। अत एव "स्थाल्यां तण्डुलं पचति" इत्यत्र तण्डुलकर्मकस्थाल्यधिकरणकक्रियेति बोधे नानासन्नता, तद्घटकसर्वेषां पदानां तादृशबोधानुकूलत्वात् 'स्थाल्यां पचति' इत्येतावन्मात्रबोधे तु तदनासन्नमेव। श्लोकादौ तु योजनावाक्यादेव बोधः। तद्भ्रमेणानासन्नाद् बोधदर्शनात्तज्ज्ञानमेव हेतुरिति सम्प्रदायः। नव्यास्तु—मौनिश्लोकादन्वयबोधानुदयप्रसङ्गान्नोक्ताव्यवधानमासत्तिः, आकाङ्क्षादिसत्त्वे, तात्पर्य्यज्ञाने च सति व्यवहितादव्यवहिताच्च बोधदर्शनात्तज्ज्ञानविलम्बेन शाब्दाविलम्बाच्च। किन्त्विदं पदमेतत्पदेन सम्भूयान्वयबोधं जनयत्वित्याकारकपदतात्पर्य्यरूपाभिसन्धापयित्रिच्छा सा, नतु वक्त्रिच्छा,

प्रभा

न्यायमूलभूता वैशिषिका इत्थं शब्दस्यानित्यत्वं समर्थयन्ति । तथाहि—कर्माप्याशु विनश्यति, शब्दोऽप्याशु विनश्यति, सोऽयं गुणस्य सतोऽपवर्गः—आशुविनाशः, स खलु कर्मभिः साधर्म्यम्। अनित्यस्य कर्मणः साधर्म्याच्छब्दोऽप्यनित्य इति भावः । तथाच सूत्रम्—'गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्' (वै० अ० २ आ० २ सू० २५) इति। सतः=नित्यस्य शब्दस्य लिङ्गाभावात्=शब्दनित्यत्वसाधकप्रमाणाभावादनित्यत्वम्। यदा त्वसौ नोपलभ्यते, तदैतस्य सत्त्वे न किञ्चित्प्रमाणमस्ति । नित्यत्वे प्रमाणाभावादनुपलब्धिकाले नास्तीति प्रतीयते। नच नित्यस्यापि शब्दस्यावरणेनावृत्तत्वान्नोपलब्धिः, वस्त्राद्यावृतरूपादिवदिति वाच्यम्, रूपावरणवस्त्राद्युपलब्धेरिव शब्दावरणानुपलब्धेः। तदुक्तम्—'सतो लिङ्गाभावात्' इति (अ० २ आ० २ सू० २६)। 'चैत्रो वक्ति' 'मैत्रो वक्ति' इति कुड्यादिनाऽऽवृतोऽपि चैत्रादिर्वचनेनानुमीयते, तत्तद्वचनस्य भिन्नरूपत्वात्। शब्दस्य नित्यत्वे तु तस्यैक्याद् भिन्नभिन्नवक्त्रनुमित्यनुपपत्तिः। तदुक्तम्—'नित्यवैधर्म्यात्' (वै० अ० २ आ० २ सू० २७) इति। यत्तु नित्यः शब्दः, अनित्यत्वे द्वयोर्गुरुशिष्ययोरध्यापनेऽध्ययने च या प्रवृत्तिस्तस्या अभावप्रसङ्गात् । आचार्यस्थः शब्दो यदन्तेवासिनमापद्यते तदध्यापनम्, यदि नित्यः शब्दस्तदा विद्यमानस्य शिष्यस्य देशान्तरप्राप्तिरुपपद्यते, अनित्यत्वे नास्य

दर्पणव्याख्या

मौनिश्लोकादौ दोषतादवस्थ्यात्। शुकवाक्ये तु भगवत्तात्पर्य्यमादायैव गतिरित्याहुः। वस्तुतस्तु सत्यर्थतात्पर्य्यज्ञाने पदतात्पर्य्यज्ञानविलम्बेन शाब्दबोधाविलम्बात् 'वृत्त्या पदजन्यपदार्थानामव्यवधानेनोपस्थितिरेवासत्तिः' स्वरूपसत्यन्वयबोधे हेतुः। नहि पदार्थानामनुपस्थितान्वयधीः केनाप्यनुभूयते इति। अर्थतात्पर्य्यं त्विदं पदमेतस्मिन्नर्थेऽपदार्थान्वयं बोधयत्वित्यभिसन्धापयित्रिच्छा। संवादिशुकवाक्ये तु भगवत एव सा। विसंवादिनि तु शिक्षयितुरेव। अस्य संशये व्यतिरेकनिश्चये चान्वयाबोधात्, तद्भ्रमेणान्वयबोधदर्शनाच्च तज्ज्ञानमप्यन्वयबोधे हेतुः। अधिकमग्रे वक्ष्यते।

'शाब्दबोधे योग्यताया ज्ञानं कारणम्' इति बहवः। सा चैकपदार्थेऽपरपदार्थस्य यादृशसंसर्गवत्त्वं तादृशसंसर्गवत्त्वैव, प्रकृतशाब्दबोधविषयसंसर्गवत्त्वमिति यावत्। अस्ति च 'पयसा सिञ्चति' इत्यत्र सेके पयःकरणत्वस्य संसर्गः। अत एव करकाभिप्रायप्रयुक्तपयसा सिञ्चतीति वाक्यं न योग्यम्, पयःपदार्थकरकायां सेककरणताभावात्। यादृशेति विशेषणाच्च 'आकाशं शब्दः' इति वाक्यं समवायसंसर्गमादाय नाभेदान्वये योग्यम्। अयोग्येऽप्येतद्भ्रमेणान्वयदर्शनादेतज्ज्ञानस्यापि हेतुता। ननु संसर्गस्य वाक्यार्थत्वेन तद्बोधात् प्रागनुपस्थित्या कथं तद्बोधस्य तत्र सत्त्वमिति चेत्, नहि योग्यताज्ञानस्य शाब्दबोधे निश्चयत्वेन हेतुतां ब्रूमः, येनोक्तदोषोऽवकाशमासादयेत्। किन्तु संशयनिश्चयसाधारणज्ञानत्वेन, तस्य च न दौर्लभ्यम्, पयसा सिञ्चतीत्यादौ सेकः पयःकरणको न वेति संशयात्मकस्य भूतले घटोऽस्तीत्यादौ च प्रात्यक्षिकनिश्चयरूपस्यापि तत्प्राक्सौलभ्यात्। स्वजन्यशाब्दबोधस्यैवान्वयबोधप्रतिबन्धकतयोक्तबोधात्तत्सम्भवात्। केचित्तु—लौकिकसन्निकर्षजन्यदोषविशेषाजन्यतद्वत्ताबुद्धित्वावच्छिन्नम्प्रति तदभाववत्ताज्ञानाभावस्य हेतुतया शाब्दबोधस्यापि तत्कार्य्यतावच्छेदकाक्रान्ततया अयोग्यताज्ञानस्त्वे तदभावादेव शाब्दबोधवारणे कृतं योग्यताज्ञानस्य तद्धेतुतया। कार्यतावच्छेदककोटौ प्रत्यक्षान्यत्वनिवेशेनैव लौकिकप्रत्यक्षनिरासेऽपि घटाद्युपनीतभानसंग्रहाय तद्विहायाजन्यान्तद्वयनिवेशः।

नच बाधनिश्चयाभावत्वापेक्षया संशयनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुत्वे लाघवमिति वाच्यम्, स्यादेवं यदि बाधाभावस्य शाब्दत्वं कार्य्यताऽवच्छेदकं कल्प्येत, किन्तु शाब्दबोधस्य बाधाभावकार्य्यतावच्छेदकाक्रान्ततया तद्दशायां तं प्रतिषेधामः। अत एव 'घटोऽभिधेयः' इत्यादावुक्तबाधाप्रसिद्धावपि न क्षतिः, तत्संसर्गावच्छिन्नतत्प्रकारकतद्विशेष्यकबुद्धित्वस्यैव तत्कार्य्यताऽवच्छेदकत्वात्, घटाभावेऽभिधेयत्वप्रतियोगिकत्वभ्रमदशामादाय तदभावस्यापि प्रसिद्धेश्चेत्याहुः।

अत्र वदन्ति— नहि तद्विशिष्टबुद्धिसामान्ये बाधाभावः कारणम्, किन्तु बाधावतारे इच्छासत्त्वे आहार्य्यप्रत्यक्षोदया-

प्रभा

देशान्तरप्राप्तिर्घटते । किञ्च अध्यापनन्नाम–शिष्येभ्यः शब्दस्य दानम् , स यदा स्थिरो भवेत्तदा तस्य दान सम्भवेत् । किञ्च दीयमानं वस्तु दातृप्रतिगृहीत्रोरन्तराले तिष्ठति, गौरिवायं शब्दोऽपि तादृशः, अन्तरालस्थेनापि श्रवणात् । अनित्यस्य मध्ये स्थितिर्न स्यात् । किञ्चाभ्यासादपि शब्दस्य नित्यता, यथा पञ्चकृत्वो रूपं पश्यति स्थिरस्य रूपस्याभ्यासो दृष्टः, तथा दशकृत्वोऽधीतोऽनुवाकः, इत्यभ्यासः शब्दस्य स्थैर्य्ये प्रमाणम् , एकस्यैव दशवाराध्ययने हि तथाव्यवहारात् । सिद्धे च स्थैर्य्ये विनाशकानुपलब्धेः 'तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति' इति न्यायान्नित्यत्वम् , तन्न, अनित्यत्वे नानात्वेऽपि अध्ययनस्य, अभ्यसनस्य, प्रत्यभिज्ञानस्य च दृष्टत्वात् । तथाहि—'नृत्यमधीते' 'नृत्यमभ्यस्यति' द्विरनृत्यत् , यदेव नृत्यं परुदकार्षीत् तदेवैषमः करोति' 'यदेव नृत्यमेकेन चारणेन कृतं तदेवायं करोति' इत्यादौ क्रियारूपे नृत्ये शब्दनित्यत्ववादिनाऽपि नित्यतुल्यव्यवहारस्य दृष्टत्वात् , अध्ययनादिना शब्दनित्यत्वस्य साधयितुमशक्यत्वात् । नचोपाधिभेदान्नानात्वं शब्दानाम् , नानित्यत्वादिति वाच्यम् , जवासापिञ्जादिसंयोगान्नीलपीतादिभावेन स्फटिकमणेः कृपाण–मणि–दर्पणेषु दीर्घादिभावेन भासमानस्य मुखस्य सहस्रदीपाभिव्यक्तघटस्य च नानात्वादर्शनेनोपाधिना शब्दे तथात्वस्य वक्तुमशक्यत्वादित्याहुः ।

मीमांसका वेदान्तिनः साङ्ख्या योगिनश्च शब्दानां नित्यत्वं संगिरन्ते । तथाहि—'गौः' इत्यत्र वर्णा एव शब्दः । तेषामेवार्थेन शक्तिरूपः सम्बन्धः । नच स्फोटात्मकः शब्दः, वर्णत्रयातिरिक्तस्य बुद्धावप्रतिभासमानत्वेन तदभावात् । नचार्थप्रतीतिरूपकार्येण तदवगतिः, अन्योन्याश्रयात् । स्फोटरूपकारणसिद्धावर्थप्रतीतिरूपकार्यसिद्धिः , अर्थप्रतीतिरूपकार्यसिद्धौ च स्फोटावगतिरित्यन्योऽन्याश्रयः । वर्णनित्यतावादिनान्तु गकारौकारविसर्जनीया एव गोशब्दास्ते च श्रोत्रग्राह्याः । अत एव लोके श्रोत्रग्राह्ये वस्तुनि शब्द-

दर्पणव्याख्या

दिच्छाया उत्तेजकत्वानुरोधेन प्रत्यक्षत्वस्यैव प्रतिबन्ध्यताऽवच्छेदकत्वावश्यकतयोपनीतभानसाधारणप्रतिबन्ध्यतायाः शाब्दबोधेऽसम्भवात् । नच तथाप्यनुमितिसाधारणप्रतिबन्ध्यतायाः शाब्दबोधसाधारण्यं शङ्क्यम् , तत्साधारणस्य प्रत्यक्षान्यज्ञानत्वस्य प्रतिबन्ध्यतावच्छेदकत्वे प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथो विशेष्यविशेषणभावे विनिगमनाविरहेणानेकप्रतिबन्ध्यप्रतिबन्धकभावापत्तेः, प्रतिबन्ध्यतावच्छेदकगौरवापत्तेश्च, अनुमितित्वस्यैव तदवच्छेदकत्वस्याङ्गीकरणीयत्वात् । अतो बाधाभावस्य स्वातन्त्र्येणैव शाब्दबोधं प्रति हेतुता वाच्या । तत्र चोक्तगौरवेण संसर्गरूपयोग्यताज्ञानस्यैव हेतुत्वमुचितम् । अपिच शाब्दबोधे तद्वन्योन्याभावतदभावव्याप्यवत्ताज्ञानादीनां प्रतिबन्धकत्वकल्पनाऽपेक्षया लाघवाद् योग्यताज्ञानस्यैव हेतुत्वमुचितम् । किञ्च 'पयसा सिञ्चति' इति शाब्दसामग्रीकाले सेकः पयःकरणकत्वाभाववानिति मानसवारणाय तत्रशाब्दबोधसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवम् । मन्मते तत्र योग्यताज्ञानस्याऽवश्यतया विपरीतज्ञानोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुतया तदभावादेव तद्वारणात् । विशेषदर्शनसत्त्वे तु तदभावव्याप्यवत्तानिर्णयरूपप्रतिबन्धकसत्त्वेन शाब्दसामग्र्या एवाभावेन तथा मानसे इष्टापत्तेः ।

नच निर्णयं प्रत्येव विशेषदर्शनस्य हेतुतया शाब्दसामग्रीकाले मानससंशयवारणाय शाब्दसामग्र्याः प्रतिबन्धकत्वे कल्पनीये संशयत्वमनिवेश्य सेकत्वावच्छिन्नविशेष्यकपयःकरणत्वाभावप्रकारकमानसत्वमेव तत्प्रतिबन्ध्यतावच्छेदकमिति नातिरिक्तप्रतिबन्ध्यप्रतिबन्धकभावकल्पनेति वाच्यम् , सेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वप्रकारकमानसे शाब्दसामग्रीप्रतिबन्धकत्वान्तरस्योभयकल्प्यतया तेनैव संशयवारणे तत्संशये प्रतिबन्धकत्वान्तराकल्पनात् । नच विपरीतज्ञानोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वसिद्धावेव योग्यताज्ञानस्य हेतुत्वसिद्धिरिति वाच्यम् , गुरुभूतशाब्दसामग्रीप्रतिबन्धकत्वकल्पनापेक्षया तद्धेतुत्वकल्पनाया एवोचितत्वादनयैव दिशेष्टसाधनत्वादिज्ञानानां प्रवृत्तौ हेतुतासिद्धिरित्यलं परमतानुवर्णनेन ।

'घटः कर्मत्वम्' इत्याधाराधेयभावेनान्वये निराकाङ्क्षवाक्याद् घटीया कर्मतेति बोधानुदयादाकाङ्क्षाऽपि सहकारिणी ।

प्रभा

प्रयोगः। ते च वर्णाः परमाणुवन्निरवयवाः। एते च एकत्वविशिष्टा एव। यथा एक एव अकारः, इकारः, उकारश्चेत्येवं रूपेण। अवर्णादेरेकत्वे तत्र अत्वकत्वादिजातयोऽपि न सन्त्येव। अत एव 'सोऽयं गकारः' इति व्यक्त्येकत्वप्रत्यभिज्ञाऽपि सङ्गच्छते। नन्वकारदीनामैक्ये ह्रस्वदीर्घप्लुतोदात्तादिभेदो न स्यादिति चेन्न, व्यञ्जकध्वनिधर्माणां ह्रस्वत्वादीनामेव वर्णेष्ववभासात्। एवमेव कत्वादीनामवभासोऽपि बोध्यः। एवञ्च परमार्थतो न वर्णधर्मा ह्रस्वत्वकत्वादयः, किन्तु ध्वनिधर्मास्त्वेते वर्णे केवलमाभासन्ते। ननु वायवीयानां ध्वनीनां श्रोत्रेन्द्रियाग्राह्यत्वात्कथं वर्णेषु कत्वादिधर्मावभासः? उच्यते—द्विविधः शब्दः—वर्णो ध्वनिश्च। शब्दत्वमुभयानुगतम्। वर्णविशेषाः ककारादयः, ध्वनिविशेषाः शङ्खघोषादयः। ध्वन्यात्मकश्च शब्दो वायुः। सच वायौ कर्णविवरं प्राप्ते संयुक्तसमवायेन श्रोत्रेन्द्रियं संस्कृत्य तेन (श्रोत्रेण) गृह्यमाणः कदाचित्कत्वादिधर्मरहितः शङ्खघोषादिषु केवलो गृह्यते। कदाचिच्च वर्णानभिव्यञ्जयन् वर्णोपश्लिष्ट एव प्रतीयते। अथवा नास्त्येव ध्वनीनां ग्रहणम्, वायवीयत्वात्। परन्तु द्रुतादिसंस्कृतं श्रोत्रेन्द्रियमेकस्मिन्नपि गकारादौ संस्कारानुसारेण भेदप्रत्ययं जनयति। यथैव हि गत्वादिजातिवादिवैशेषिकनयेऽविद्यमानमेव शब्दैऽल्पत्वं महत्त्वञ्च ध्वनिसंस्कारानुसारिण्या बुद्ध्या प्रतीयते तथा द्रुतादिकमपि श्रोत्रं प्राप्य क्षिप्रमन्यतः प्रयातेषु ध्वनिषु तत्संयोगरूपसंस्कारस्य श्रोत्रेऽल्पकालमवस्थानाच्छब्दोऽपि तत्क्षण एवाविर्भूय तिरोभवन् द्रुत इति गृह्यते। तथा मध्यमो विलम्बित इति। युक्तो व्यञ्जकधर्माणां द्रुतादीनां व्यङ्ग्ये शब्दे भ्रान्त्या समारोप इति। नच कथमनवगतेषु नादेषु तद्धर्मप्राप्तिर्व्यङ्ग्येषु शब्देषु इति वाच्यम्, यथा पित्तदोषदूषितं रसनेन्द्रियं मधुरगतं मधुरत्वमगृह्णदेव मधुरं तिक्तत्वेन गृह्णाति, यथा वा चक्षुरिन्द्रियं पित्तगतं पीतत्वमगृह्णदेव शङ्खगतं श्वेतत्वं पीतत्वेन गृह्णाति, तथा ध्वनिगतान् द्रुतादीनगृह्णदेव श्रोत्रं द्रुतादित्वेन

दर्पणव्याख्या

सा च यत्पदे यत्पदसमभिव्याहारप्रयुक्तं यद्विशेष्यकयत्संसर्गकयत्प्रकारकबोधजनकत्वं तत्पदे तत्पदनिरूपिताकाङ्क्षा। यथा 'घटमानयति' इत्यत्र घटपदे कर्मताविशेष्यकाधेयतासंसर्गकघटीया कर्मतेति बोधौपयिकाम्पदनिरूपिताकाङ्क्षा, तां विना घटः कर्मत्वमित्यत्र घटपदेन तादृशबोधाजननात्। एवं धातुपदेऽप्याख्यातनिरूपिताकाङ्क्षोह्या। अत एवानयनं कृतिरित्यत्र नानयानुकूला कृतिरिति बोधः, धातावाख्यातासमभिव्याहारात्। इयमेवाकाङ्क्षा व्याकरणेन प्रतिपाद्यते। तथाच तत्तत्पदे तत्तत्पदपूर्वापरीभावरूपसमभिव्याहारः सेति फलति, तां विना यद्यप्युक्तानाकाङ्क्षे कर्मत्वपदेऽम्पदत्वभ्रमदशायां घटीया कर्मतेति बोधोदयेन तज्ज्ञानं हेतुर्नतु स्वरूपसती सा। नच जनितान्वयबोधाद्वाक्यात् पुनरपि तादृशबोधापत्तिः, उक्ताकाङ्क्षायास्तदानीमप्यविकलत्वादिति वाच्यम्, प्रकृतान्वयबोधसमानाकारबोधानुपहितत्वस्यापि स्वरूपसत आकाङ्क्षात्वेन जनितान्वयबोधस्थले तदभावेनापत्त्यसम्भवात्, तात्पर्य्यविषयत्वरूपप्रकृतत्वेन बोधविशेषणाच्च। बोधद्वयं जायतामिति तात्पर्य्यसत्त्वेन जनितान्वये बोधस्य द्वितीयबोधे निराकाङ्क्षत्वं स्वसमानेत्युक्तेश्च न जनितावान्तरबोधस्य महावाक्यार्थबोधे तत्त्वम्। अत एव "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यताम्" इत्यादौ राज्ञः पुरुषेण सहान्वयबोधजनने सर्वदा निराकाङ्क्षत्वम्।

नव्यास्तु—यत्पदस्य यत्पदव्यतिरेकप्रयुक्ततात्पर्य्यविषयीभूतान्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षा। 'अयमेति पुत्रो राज्ञः पुरुषः' इतिवाक्ये राजपुरुषसंसर्गप्रतीतीच्छयोच्चरिते राज्ञ इत्यस्य पुरुषेण साकाङ्क्षत्ववारणायान्वयबोधे तात्पर्य्यविषयत्वं विशेषणम्। पुरुषेणान्वये तात्पर्य्यसत्त्वे तु साकाङ्क्षत्वमपि, एवञ्च न तात्पर्य्यज्ञानस्य शाब्दबोधे पृथग्धेतुता अनुगृहीतार्थतात्पर्य्यके निरुक्ताऽऽकाङ्क्षाज्ञानाभावादेवान्वयबोधापत्त्यभावादित्याहुः। एवञ्च शाब्दबोधात् प्रागवश्यक्लृप्ततत्तत्पदसमभिव्याहाररूपाकाङ्क्षयैवान्वयरूपवाक्यार्थभानोपपत्तौ वाक्यस्य तत्र शक्तिर्निष्प्रमाणेति नैयायिका वदन्ति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Digital Foundation

प्रभा

शब्दं प्रतिपद्यते । एवं वर्णैक्यनित्यत्ववादिमीमांसकानाम्मते वर्णातिरिक्तं पदं वाक्यञ्च नास्त्येव, गकारादीनामयोगपद्यात्, सर्वगतत्वाच्च। गोपदादिरूपावयव्यारम्भकं सामर्थ्यमपि नोपपद्यते, युगपदवस्थितैरेवानेकावयवैरवयवव्युत्पत्तिदर्शनात्। वर्णानां विभिन्नप्रयत्नाभिव्यङ्ग्यत्वेनोपलब्ध्या यौगपद्याभावात्। किञ्च तन्तुपटयोरिव कारणपरिमाणादधिकं परिमाणं कार्य्यस्य। नच विभुभ्यो वर्णेभ्यो परिमाणाधिक्यं पदादिरूपकार्य्यस्य सम्भवतीत्यतो नावकल्प्यतेऽवयवी। नच वर्णमात्रस्वीकारेऽर्थबोधानुपपत्तिः, प्रत्यक्षरं बोधादर्शनात्। नच वर्णसमुदायादर्थधीः, युगपदभिव्यक्तिरहितानां समुदायस्याप्यसम्भवादिति वाच्यम्, क्रमवर्तिनां वर्णानां क्रमिकसंस्कारेण साहित्यकल्पनात्। यथा 'स्वर्गकामो यजेत' इत्यत्र क्रियारूपयागस्य क्रमिकत्वेन समुदायासम्भवाद्विनाशित्वाच्च कालान्तरभाविस्वर्गं प्रति वेदबोधितकारणत्वानुपपत्त्या चिरस्थायि यागजन्यमदृष्टं कल्प्यते, तथैकवर्णेनार्थबोधादर्शनात् सकलोच्चारणेऽर्थबोधदर्शनाच्च संहत्यकारित्वे सिद्धिते युगपदनवस्थानात् स्वरूपतो वर्णसमुदायासम्भवेन संस्कारतः समुदायकल्पनम्। तत एव चार्थबोधोपपत्तिः। अत्र स्फोटवादिनो वैयाकरणाः—शब्दानित्यत्ववादिनामनन्तवर्णानन्त्यतद्द्वारा तद्ध्वंसप्रागभावकल्पनम्, पदादीनां बोधकत्वसिद्धये तत्प्रयोजकसंस्कारस्मृतिस्वीकारे च महद्गौरवम्। एवं मीमांसकादीनां मते वर्णानां विभुत्वनित्यत्वस्वीकारे यद्यपि अनन्तवर्णतद्ध्वंसप्रागभावाकल्पनया वर्णनित्यत्ववादिनाऽपेक्षया लाघवं वर्तते, तथापि नवस्वराणां त्रयस्त्रिंशद्व्यञ्जनानां विसर्गादीनाञ्च नित्यानां स्वीकरणे तद्व्यञ्जकानां ध्वनीनां क्रमेणाभिव्यक्तिमता प्रत्येकवर्णेनार्थाबोधात् सकलोच्चारणानन्तरं बोधदर्शनात् संहत्यकारितोपपत्तये तत्प्रयोजकभावनाऽऽख्यसंस्कारस्मृतिकल्पने च गौरवात् सर्वानुभूतपदवाक्यादीनां मिथ्यात्वकल्पनस्यानुचितत्वाच्च तन्मतं चिन्त्यम्। अतोऽत्वकत्वादिधर्मवन्तो वर्णरूपा ध्वनय एवार्थप्रत्यायकं स्व (ध्वनि) रूपरुषितं कालत्रयाबाधितं शब्दब्रह्मैव व्यञ्जयन्ति। तदेव शब्दब्रह्म स्फोट इत्युच्यते। स्फुटत्यर्थोऽनेनास्माद्वेति स्फोटः। करणेऽपादाने वा 'अकर्तरि च कारके संज्ञायाम्' इति घञि साधुः। स एव स्फोटस्तत्तदर्थनिरूपिततत्तच्छक्तिमान्। कत्वादिविशिष्टवर्णातिरिक्तः पूर्वपूर्ववर्णानुभवसहचरितान्त्यवर्णानुभवव्यङ्ग्योऽर्थप्रत्यायकः शब्द इति यावत्। तत्तदर्थनिष्ठविषयतानिरूपकशक्तिमत्त्वं स्फोटत्वम्। नच शब्दस्य श्रोत्रेन्द्रियरूपप्रत्यक्षप्रमाणग्राह्यत्वाच्छ्रोत्रेण च वर्णातिरिक्तस्य शब्दस्यानुभवाभावात्स्फोटासिद्धिः, 'गौः' इत्येकं पदम् 'गामानय शुक्लाम्' इत्येकं वाक्यम्' इत्येकपदवाक्यानुभवस्य, 'सोऽयं ककारः' 'सोऽयं गकारः' इति प्रत्यभिज्ञायाश्च प्रमाणत्वात्। नच वर्णविषयकत्वेनैव तदुपपत्तिः, वर्णानां नानात्वेनैकत्वानुभवस्य तत्र बाधितत्वात्। नच वर्णसमुदायविषयकं तत्, वर्णोत्पत्तेस्तदभिव्यक्तेर्वा क्षणस्थायित्वेन, क्रमिकत्वेन च समुदायासम्भवात्। नच प्रत्येकवर्णानुभवभावितैः संस्कारैः संहत्य सर्ववर्णविषया एका स्मृतिर्जायते इति स्मृतिगतैकत्वमादाय तथाव्यवहारः, असति बाधके 'एकं पदमेकं वाक्यम्' इत्यनुभवे मिथ्यात्वस्य वक्तुमशक्यत्वात्। नच वर्णेष्वेवौपाधिकैकत्वग्रहः, तादृशोपाधेर्वक्तुमशक्यत्वात्। उपाधिः खलु एकधीविषयत्वम्, एकार्थबोधकारणत्वं वा। तथाहि—चरमवर्णप्रत्यक्षानन्तरं बोधदर्शनान्यथानुपपत्त्या नानावर्णविषयकसंस्कारकल्पनया एका स्मृतिः कल्प्यते इति एकस्मृतिरूपधीविषयत्वस्योपाधेः सत्त्वेनैकत्वं वाच्यम्, तच्च न सम्भवति, एकधीविषयाणां शशकुशपलाशानामैक्यापत्त्या 'शशकुशपलाशाः' इति बहुवचनानापत्तेः। नाप्येकार्थबोधकारणत्वस्योपाधित्वम्, प्रतिवर्णं बोधादर्शनेन वर्णेषु बोधहेतुत्वस्याभावात्। नच चरमवर्णानुभवानन्तरं दृष्टबोधान्यथानुपपत्त्योक्तसाहित्यकल्पनया समूहे च बोधहेतुत्वस्य सत्त्वात्तादृशोपाधिकृतमेकत्वं वर्णेषु सुलभमिति वाच्यम्, बोधहेतुत्वे सति साहित्यकल्पनं साहित्ये सति बोधहेतुत्वसिद्धिरित्यन्योन्याश्रयस्य दुष्परिहरणीयत्वात्। तस्मादनुपाधिकोऽबाधितश्च पदवाक्यैकत्वप्रत्ययो वर्णातिरिक्त-

प्रभा

वाचकमन्तरा न सम्भवतीति तादृशप्रत्ययविषयः स्फोटः स्वीकार्य्यः। ननु तव मतेऽपि प्रत्येकवर्णाभिव्यक्तस्फोटेनार्थबोधादर्शनाद् वर्णसमुदायाभिव्यक्तस्फोटस्यैव वाचकता वाच्येति समुदायस्यावश्यकत्वे तेनैवार्थप्रतीतिसिद्धौ स्फोटो व्यर्थ इति चेन्न, प्रत्येकवर्णाभिव्यक्तस्फोटस्य वाचकत्वेनैवोपपत्तौ वर्णसमुदायकल्पनस्यानावश्यकत्वात्। अन्तिमवर्णातिरिक्तपूर्ववर्णेनाभिव्यक्तात्स्फोटादर्थबोधस्तु न, रत्नपरीक्षणन्यायात्। यथा—वज्रादिरत्नानां परिचयो बहुवारं चाक्षुषप्रत्यक्षे कृते जायते। एवं पूर्वपूर्ववर्णेनाभिव्यक्तस्फोटविषयकप्रत्ययेनाहितसंस्कारे चित्तदेशेऽन्तिमवर्णाभिव्यक्तस्फोटेनैवार्थप्रत्ययो न पूर्ववर्णाभिव्यक्तेन, शब्दशक्तिस्वाभावात्। यथा दूरेऽवस्थितः सहकारतरुः हस्ति-कलालराशिरूपेण प्रतिभाति, ततोऽपि सामीप्ये वृक्षत्वेन, ततः सहकारात्मना प्रतीयते, तथैवान्तिमवर्णाभिव्यक्तः सम्यक् प्रतीतः स्फोटोऽर्थबोधं जनयति। तथाच 'ऋलृक्'सूत्रे भाष्ये उक्तम्—'उभयतः स्फोटमात्रं निर्दिश्यते—रश्रुतेर्लश्रुतिर्भवति' इति। 'तपरस्तत्कालस्य' इति सूत्रे भाष्येऽपि 'एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः (शब्दव्यञ्जकत्वेनोपकारकः)। कथम्? भेर्य्याघातवत्' तद्यथा भेर्य्याघातः (भेरीताडकः) भेरीमाहत्य कश्चिद्विंशतिपदानि गच्छति कश्चित्त्रिंशत् कश्चिच्चत्वारिंशत् स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥ इति॥

ननु भेर्य्याघातस्थलेऽर्थबोधकस्फोटाभावात्स्फोटस्तावानेवेति भाष्यासङ्गतिरत आह भाष्ये ध्वनिरिति—भेर्य्याघातस्थले ध्वनिः स्फोटश्च स्तः। व्यञ्जको ध्वनिर्व्यङ्ग्य स्फोटश्च स्त इत्यर्थः, परन्तु व्यङ्ग्यानां स्फोटरूपाणां शब्दानां व्यञ्जकत्वेन सम्बन्धी यो ध्वनिः स एवाल्पो महाँश्च प्रतीयते। व्यङ्ग्यः स्फोटस्तु अभिन्नकाल एवेत्यर्थः। अयम्भावः—ध्वनिर्द्विविधः—प्राकृतो वैकृतश्च। तत्र प्राकृतः कत्वह्रस्वत्वाद्युदात्तत्वानुनासिकत्वादिधर्मविशिष्टः। स्फोटः स्वयं प्रकाशोऽपि स्तिमित (पिण्डीभूत) वायुना प्रतिरुद्ध इति तदवरोधनिराकरणद्वारा स्वाभिन्नत्वेनैव स्फोटं प्रकाशयति। अत एको नित्यो व्यापकः स्फोटः नानारूपध्वनिरूपाक्रान्तो ज्ञातवृत्तिकोऽनेकरूपेण भासमानोऽन्तिमवर्णाभिव्यक्तोऽर्थं प्रत्याययति। प्राकृतध्वनिरेव वर्णशब्देन व्यवह्रियते। वर्णरूपानाक्रान्तः स्फोटः पृथग् नैव प्रतीयते इति सूक्ष्मेक्षिकयाऽपर्य्यालोचयन्तो नैयायिकादयः स्फोटो नैवास्तीति ब्रुवन्ति। वैकृतो ध्वनिश्च प्राकृतध्वनिनाभिव्यक्तस्फोटस्योपलब्धौ (प्रतीतौ) चिराचिरकालत्वसम्पादकः। अत एव 'एक एवाकारोऽनेन द्रुतमुच्चारितोऽनेन विलम्बितम्' इति वृत्तेर्भेदेऽपि वर्णस्यैकत्वव्यवहारः सङ्गच्छते। द्रुतत्वादेर्वृत्तिगतत्वादेव 'अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता। शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता' इत्युक्तम्। भाष्ये 'ध्वनिकृता वृद्धिः' इत्यस्य वैकृतध्वनिकृतोपलब्धिकालवृत्तिरित्यर्थः इत्यलमतिविस्तरेण। स्फोटशब्दश्च योगरूढः। योगमात्रस्वीकारे तु अर्थेभ्योऽपि अर्थान्तरं व्यज्यते इत्यर्थस्यापि स्फोटत्वापत्तिः। किञ्च चेष्टयाऽप्यर्थबोधनाच्चेष्टायामतिव्याप्तिः। नापि केवलरुढत्वं तस्य, व्याकरणकल्पितप्रकृतिप्रत्ययजन्यबोधाभावसमानाधिकरणसमुदायशक्तिनिरूपकार्थविषयकबोधजनकत्वरूपरुढलक्षणाक्रान्तत्वात्। स च स्फोटोऽष्टविधः—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः अखण्डवाक्यस्फोटश्चेति। वर्णस्फोटस्य सखण्डाखण्डभेदेन द्वैविध्यन्तु न, सुबन्ततिङन्ततदादिभिन्नस्य, वाक्यभिन्नस्य च प्रकृतिप्रत्ययसमुदायरूपस्य, प्रकृतिरूपस्य, प्रत्ययरूपस्य चैकवर्णमात्रवर्णस्फोटघटकवर्णशब्देन ग्रहणात्। तदवयवानाञ्चार्थाप्रत्यायकतयाऽर्थप्रत्यायकस्यैव खण्डस्य सखण्डस्फोटपदेन ग्रहणात् सखण्डवर्णस्फोटानुक्तिरित्याशयः। १—तथाच वर्णपदबोध्यचरमवर्णाभिव्यक्तस्फोटेन यत्र बोधस्तत्रैव वर्णस्फोटपदव्यवहार्य्यत्वम्। २—एवं सुबन्ततिङन्ततदादिघटकान्त्यवर्णाभिव्यक्तस्फोटेनार्थप्रतीतौ पदस्फोट इति व्यव-

॥ अथ स्फोटनिरूपणम् ॥

सिद्धान्तनिष्कर्षमाह—

प्रभा

द्वारः। ३—सुबन्ततिङन्तपदजन्यबोधपूर्वकवाक्यचरमवर्णाभिव्यक्तस्फोटस्य बोधकत्वे वाक्यस्फोट इति व्यवह्रियते। ४—प्रकृतिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधेऽखण्डपदस्फोटः। यथा—मणि-नूपुरादि, 'वः' 'नः' इत्यादि च ५—पदजन्यबोधाभावे सति वाक्यस्फोटेन बोधेऽखण्डवाक्यस्फोटः। यथा—व्याकरणज्ञानशून्यानां वाक्यतो बोधे वाक्यम्। वर्णपदवाक्यगतजातिव्यङ्ग्यस्फोटैर्बोधे क्रमशः ६—वर्णजातिस्फोटः। ७—पदजातिस्फोटः। ८—वाक्यजातिस्फोट इत्युच्यते। तत्र वाक्यस्फोटज्ञानार्थमेवेतरेषां स्फोटानामुपयोगः। नच स्फोटस्य प्रतीयमानत्वात् 'उच्चरितः शब्दः सम्प्रत्यायको भवति न प्रतीयमानः' इत्यणुदित्सूत्रभाष्यविरोधात्स्फोटेन बोधानापत्तिरिति वाच्यम्, 'न प्रतीयमानः' इति भाष्यस्य अश्रूयमाणः सन् प्रतीयमानः प्रत्यायको न भवतीत्यर्थात् स्फोटस्य च व्यञ्जकरूपेण श्रोत्रग्राह्यत्वेन भाष्यविरोधाभावात्। संज्ञासंज्ञिभावेन प्रतीयमानस्यैवानुच्चारितस्याप्रत्यायकत्वमिति तदर्थाद्वा। नैयायिकमीमांसकमतं खण्डयितुं स्वमतं स्थापयितुमुपक्रमते—सिद्धान्तेति—वैयाकरणसिद्धान्तेत्यर्थः।

नैयायिका वाक्ये शक्तिं नाङ्गीकुर्वन्ति। तथाहि—शक्तं पदम्। पदसमुदायो वाक्यम्। तथाच 'पचति' इति वाक्यम्, पाके 'पच' इति, कृतौ 'ति' इति शक्तम्, तयोः समुदायरूपत्वात्। पाकस्य कृतौ जनकतारूपो यः सम्बन्धः स स्वस्वार्थाभिधानसमर्थयोः प्रकृतिप्रत्यययोः पौर्वापर्यरूपसमभिव्याहाररूपाकाङ्क्षया लभ्यते। एवञ्च जनकत्वसम्बन्धावच्छिन्नपाकत्वावच्छिन्नप्रकारतानिरूपितकृतित्वावच्छिन्नविशेष्यताशाली बोधः 'पचति' इत्यनेन जायते। तत्र प्रकृतिप्रत्ययार्थयोः सम्बन्धभानप्रयोजिका प्रकृतिप्रत्यययोः समभिव्याहाररूपाकाङ्क्षैव। एवम् 'घटम्' इत्यत्र घटस्याधेयतासम्बन्धेनामर्थकर्मतायामन्वयेन आधेयत्वसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितकर्मतात्वावच्छिन्नविशेष्यताकबोधेऽपि सम्बन्धभानप्रयोजिका घटपदाव्यवहितोत्तरत्वविशिष्टाम्पदत्वरूपाकाङ्क्षैव। अन्यथा घटः, कर्मत्वम्, आनयनम्, कृतिः, इतिपदसमुदायेनापि 'आधेयत्वसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितकर्मत्वत्वावच्छिन्नविशेष्यताकः, निरूपकत्वसम्बन्धावच्छिन्नकर्मत्वत्वावच्छिन्नप्रकारतानिरूपितानयनत्वावच्छिन्नविशेष्यताकः, अनुकूलत्वसम्बन्धावच्छिन्नानयनत्वावच्छिन्नप्रकारतानिरूपितकृतित्वावच्छिन्नविशेष्यतानिरूपको बोधः स्यात्। यादृशसमभिव्याहारप्रयुक्तं यत्प्रकारकयत्संसर्गकयद्विशेष्यकबोधोऽनुभवसिद्धः, तादृशपदसमभिव्याहाररूपाकाङ्क्षा तादृशशाब्दबोधप्रयोजिका। अस्ति च 'घटमानय' इत्यत्र घटनिष्ठकर्मतानिरूपकानयनजनिका कृतिरिति बोधप्रयोजिकाकाङ्क्षा। घटः, कर्मत्वम्, आनयनम्, कृतिः, इत्यत्र तु सा नास्त्यतो न तादृशो बोधोऽनेन। सैव शाब्दबोधप्रयोजिकाकाङ्क्षा व्याकरणेन प्रकृतिप्रत्ययादिबोधनद्वारा प्रतिपाद्यते। सा चाकाङ्क्षा ज्ञाता

दर्पणव्याख्या

मीमांसकादयस्तु वाक्यस्य तत्र लक्षणैव, नतु तत्र शक्तिरिति तन्मतं खण्डयितुं स्फोटनिरूपणमित्याशयेन मूलमवतारयति— * सिद्धान्तेति *। यद्वा ननूक्तरीत्या व्याकरणस्य प्रकृतिप्रत्ययेषु तत्तदर्थबोधकत्वशक्तिप्रतिपादकत्वमनुपपन्नम्, प्रकृतिप्रत्ययानां क्रमिकाशुविनाशिनानावर्णाऽऽत्मकतयाऽस्थिरत्वेन अप्रत्यक्षतया तत्र शक्तिग्रहस्य कथमप्यसम्भवेन तत्प्रतिपादकस्यास्य शास्त्रस्याप्रामाण्यप्रसङ्ग इत्याशङ्कानिराकरणाय स्फोटनिरूपणमित्याशयेन मूलमवतारयन्नाह—

सिद्धान्तनिष्कर्षमिति तथाचोपोद्घातसङ्गतिरत्रेत्यवधेयम्। तत्तन्मतनिराकरणन्तु मूल एव सुव्यक्तम्। अष्टानां

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका नतु तत्स्मृताः ॥ ६१ ॥

प्रभा

सती शाब्दबोधप्रयोजिका, दाहं प्रति वह्निरिव न स्वरूपसती प्रयोजिका । घटः, कर्मत्वम् , इति केनचित्प्रयुक्तम् । तत्र यदा कर्मत्वपदे घटपदाव्यहितोत्तराम्पदत्वभ्रमः कस्यचिच्छ्रोतुर्जातस्तदा तस्य ततो 'घटनिष्ठं कर्मत्वम्' इति बोधो जायते । यस्य तु अम्पदे कर्मत्वपदभ्रमस्तस्य तादृशो बोधो न जायते इत्यन्वयव्यतिरेकाभ्यां ज्ञाताया एव तत्तच्छाब्दबोधकारणीभूताकाङ्क्षायाः कारणत्वं न स्वरूपसत्याः । नच 'प्रथमक्षणे घटमानय' इत्याकाङ्क्षाज्ञानं जातं द्वितीयक्षणे 'घटकर्मकानयनम्' इति शाब्दबोधोऽपि निष्पन्नः, तृतीयक्षणे उक्ताकारः शाब्दबोधः पुनरपि स्यात्ततः प्राक्क्षणे आकाङ्क्षाज्ञानस्य सत्त्वादिति वाच्यम्, आकाङ्क्षायां तात्पर्य्यविषयान्वयबोधानुपहितत्वस्यापि विवक्षितत्वात् । जातबोधस्थलेऽजनितान्वयबोधत्वरूपस्य तात्पर्य्यविषयान्वयबोधानुपहितत्वस्याभावेनोक्तदोषानवकाशात् । यदि तु अनेन वाक्येन शाब्दबोधद्वयं जायतामिति तात्पर्य्यन्तदा तत्र बोधद्वयस्य तात्पर्य्यविषयतया प्रथमशाब्दबोधे जातेऽपि स्वरूपतः शब्दनिष्ठस्य बोधद्वयानुपहितत्वस्य सत्त्वात्पुनरपि शाब्दबोधो जायत एव, तात्पर्य्यविषयबोधसमानाकारबोधानुपहितत्वस्यैव शाब्दबोधजनकशब्दे प्रविष्टत्वात् । नन्वेवमपि वाक्यसमुदायरूपमहावाक्यतो बोधानुपपत्तिः, तात्पर्य्यविषयबोधसमानाकारबोधोपहितत्वस्यैव सत्त्वादिति चेन्न, बोधे समानाकारकत्वस्य अन्यूनानतिरिक्तविषयकत्वरूपस्य विवक्षितत्वेन महावाक्यजन्यबोधस्य चाधिकविषयकतया तज्जन्यबोधे बाधकाभावात् । तथाच साकाङ्क्षपदसमुदायादेव शाब्दबोधोपपत्तेः पदसमूहस्य वाक्यस्य पदार्थसंसर्गरूपवाक्यार्थे शक्तिकल्पनमप्रामाणिकं विफलं गौरवग्रस्तञ्च । पदार्थसंसर्गस्तु वृत्त्या अनुपस्थित एवोक्ताकाङ्क्षातात्पर्य्याभ्यां भासते, नतु तत्र शक्तिः कल्पनीयेत्याहुः । मीमांसकास्तु संसर्गे वाक्यस्य लक्षणा । नच पदसमुदायरूपवाक्यस्य क्वचिदप्यशक्ततया शक्यसम्बन्धरूपलक्षणाया असम्भवः, 'ज्ञाप्यसम्बन्धो लक्षणा' इत्यस्यैव तैः स्वीकारात् । भवति च वाक्यार्थोऽपि वाक्यज्ञाप्य इति 'वाक्यस्य लक्षणा' इति नासङ्गतम् । अत एव 'गभीरायां नद्यां घोषः' इत्यत्र गभीराभिन्ननदीसम्बद्धतीरे घोषः' इति बोधः । शक्यसम्बन्धस्य लक्षणात्वस्वीकारे तु 'गभीरायां नद्याम्' इति द्वयोः पदयोः समान विभक्तिकतयाऽभेदेनान्वयस्यावश्यकत्वेन नदीपदस्य तीरे लक्षणायां गभीरपदार्थानन्वयापत्तिः, तदभेदस्य तीरे बाधात् , गाम्भीर्य्यस्य जलगुणत्वात् । गभीरपदस्य तीरलक्षकत्वे तीराभेदस्य नद्यां बाधादनन्वयापत्तिस्तदवस्थैवेति 'गभीरायां नद्याम्' इति समुदायस्य लक्षणया 'गभीराभिन्ननदीपदसम्बद्धतीरे घोषः' इति शाब्दबोध उपपद्यते । तदुक्तम्—'सर्वत्रैव वाक्यार्थो लक्ष्य एवेति च स्थितम्' इति मन्यन्ते तत्सर्वं नैयायिकमीमांसकोक्तं खण्डयितुमाह—वाक्यस्फोट इति । यद्वा—उपायाः शिक्षमाणानां बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते । इत्यभियुक्तोक्त्या कल्पितेन प्रकृतिप्रत्ययादिविभागेन तत्तदर्थविभागेनच परमार्थतश शक्तस्य वाक्यस्फोटस्यैव बोधने व्याकरणतात्पर्य्येण प्रकृतिप्रत्ययादिनिरूपणमपारमार्थिकमिति सूचयितुमाह—वाक्यस्फोट इति । ननु वर्णस्फोटादिभेदेनाष्टौ स्फोटा अत्रैवावतरणे उक्ता वाक्यस्फोटमात्रोक्तिरसङ्गतेत्यत आह—अतिनिष्कर्ष इति—प्रमाणैर्निर्णीतः संक्षिप्तोऽर्थो निष्कर्ष इत्युच्यते । यद्यपीति—स्फुटति=प्रकाशते=ज्ञातो भवत्यर्थोऽनेनास्माद्वेति व्युत्पत्त्याऽर्थनिष्ठविषयतानिरूपकोपस्थितिजनकतावच्छेदकशक्तिमतः शब्दस्य स्फोटपदार्थतया वर्णस्फोटशब्देन कल्पितसुप्तिङन्ततदादिरूपपदतत्समुदायरूपवाक्येतरो यः प्रकृतिप्रत्ययादिस्तद्व्यङ्ग्यस्फोटस्यैव ग्रहणं बोध्यम् । यथा 'पचति' इत्यत्र

यद्यपि वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकम्, दुरर्थकञ्च, तथाऽपि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम्। एतदेव ध्वनयति—अतिनिष्कर्ष इति—इति मतस्थितिर्वैयाकरणानाम्=महाभाष्यकारादीनाम्। तत्र क्रमेण सर्वांस्तान् निरूपयन् वर्णस्फोटं प्रथममाह—साधुशब्द इति—साधुशब्दान्तर्गता वाचका नवेति विप्रतिपत्तिः।

प्रभा

पच्' इति प्रकृतिव्यङ्ग्यः 'ति' इति प्रत्ययव्यङ्ग्यः स्फोटः वर्णस्फोटः तार्किकाणां मते यच्छक्तं पदमिति 'तद्व्यङ्ग्यस्फोटस्यैव शाब्दिकनये वर्णस्फोटशब्देन व्यवहार इति भावः। वर्णस्फोटो द्विविधः—वर्णव्यक्तिस्फोटः, वर्णजातिस्फोटश्च। तत्तत्प्रकृतिप्रत्ययादिरूपव्यक्तिव्यङ्ग्यस्फोटः वर्णव्यक्तिस्फोटो वर्णस्फोटो वा। प्रकृतिप्रत्ययादिगतजातिव्यङ्ग्यः स्फोटो वर्णजातिस्फोटः, प्रकृतिप्रत्यययोर्वर्णानाञ्चावयवानामनर्थकतया न तत्र सखण्डस्फोटव्यवहारः। पदस्फोट इति—स च त्रिविधः—सखण्डपदव्यक्तिस्फोटः, अखण्डपदव्यक्तिस्फोटः, पदजातिस्फोटश्चेति। वाक्यस्फोट इति—अयमपि त्रिविधः—सखण्डवाक्यव्यक्तिस्फोटः, अखण्डवाक्यव्यक्तिस्फोटः, वाक्यजातिस्फोटश्चेति। इतीति—इतिहेतोरित्यर्थः। वाक्येति—स्फोटस्यैव वाचकत्वस्वीकारे कारिकायां स्फोट इत्येव वक्तव्ये वाक्यग्रहणं निष्प्रयोजनमिति भावः। उपाधिभेदेन स्फोटस्याप्यष्टविधत्वेऽन्येषामसंग्रहापत्तिरूपदोषोऽपीत्याह—दुरर्थकमिति—दुष्टु अर्थः प्रयोजनं यस्य तद् दुरर्थकम्=अन्यासंग्रहरूपदोषग्रस्तञ्चेत्यर्थः। अन्येषाम्=वर्णादिस्फोटानाम्। अवास्तवत्वेति—प्रकृतिप्रत्ययव्यङ्ग्यस्फोटस्यार्थोपस्थितिजनकत्वे तयोरपि तादृशशक्तिमत्त्वेऽपि प्रकृतिमात्रस्य प्रत्ययमात्रस्य वा निराकाङ्क्षबोधजनकत्वाभावादवास्तवत्वमिति भावः। तदुपादानम्=वाक्यपदोपादानं कारिकायाम्। एतदेव—अवास्तवत्वमेव। यथा आनन्दवल्यां शुद्धब्रह्मज्ञानाय अन्नमय—प्राणमय—मनोमय-विज्ञानमयानन्दमयेषु पञ्चसु कोशेषु अपारमार्थिकब्रह्मत्वबोधनमुपायः। यथा बालानां वास्तविककत्वादिबोधाय चक्षुर्ग्राह्यासु लिपिषु श्रोत्रग्राह्यकत्वाद्यभावेऽपि कत्वप्रतिपादनम्। तथा वास्तविकाखण्डवाक्यस्फोटबोधनायैते वर्णस्फोटादयोऽप्युपायभूता एव। तदुक्तं हरिणा—'उपायाः' इति। अतिनिष्कर्षे—वास्तविकसिद्धान्ते। मतस्थितिः—अभिप्रेतमर्यादा। तत्र=बुद्धिस्थेषु अष्टसु। तान्=स्फोटान् निरूपयन्=बोधयन्। कतिचित् प्रकृतिप्रत्ययाः द्विविधाः—प्रयोगानन्तर्गताः (स्थानिरूपाः) प्रयोगान्तर्गताश्च (आदेशरूपाः)। तत्र साधुशब्दस्यैव प्रस्तुतत्वादाह—साधुशब्देति। विप्रतिपत्तिरिति—संशयात्मकज्ञानविषययावत्कोट्युपस्थापकं वाक्यमित्यर्थः। प्राचीननैयायिकमते प्रत्यक्षातिरिक्तस्य सर्वस्यैव ज्ञानस्य निश्चयात्मकतया वाक्यजन्यज्ञानस्य परोक्षतया निश्च-

दर्पणव्याख्या

स्फोटानामाकरसि तया तद्व्यावृत्त्यालाभ इत्याशयेनाह—* अनर्थकमिति * निष्प्रयोजनकमित्यर्थः। *दुरर्थकमिति* तदुपादाने वाक्यातिरिक्तानामसंग्रहापत्तेरिति भावः। समाधत्ते—*तथापीति*। *अन्येषाम्* वर्णादिपञ्चस्फोटानामित्यर्थः।

तत्र स्फोटत्वं स्फुटति=अभिव्यक्तीभवत्यर्थोऽस्मादिति व्युत्पत्त्याऽर्थप्रकाशकत्वम्, प्रकाशश्च—ज्ञानम्। तथाचार्थनिष्ठविषयताप्रयोजकशक्तिमत्त्वं पर्य्यवस्यति, वर्णस्यैव तत्त्वाभ्युपगमे वर्णस्फोटः। पदादीनां तत्त्वाभ्युपगमे तु पदादिस्फोट इति व्यवहारः। * अवास्तवत्वेति * वर्णस्फोटादीनामाकाङ्क्षानिवर्त्तकत्वाभावादवास्तवत्वं शास्त्रीयप्रक्रियानिर्वाहाय परं सिद्धान्ते तत्स्वीकारः। पारमार्थिकत्वन्तु वाक्यस्फोटस्यैवेति भावः। * विप्रतिपत्तिरिति * संशयीययावत्कोट्युपस्थापकं

प्रभा

यात्मकत्वेन वाक्ये संशयजनकत्वस्यासम्भवात्। 'संशयजनकं वाक्यं विप्रतिपत्तिः' इत्यस्य वक्तुमशक्यत्वात्। वस्तुतस्तु प्रत्यक्षातिरिक्तज्ञानमात्रस्य निश्चयात्मकमनुभवविरुद्धं निर्मूलञ्च। अत एव गौतमेन 'समानाऽनेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः' इति सूत्रेण (अ० १ आ० २३) संशयलक्षणं वदता विप्रतिपत्तेः संशयजनकत्वमुक्तम्। संशयस्य चत्वारि कारणानि प्रदर्शितानि। तथाहि—१—समानाः=सदृशा येऽनेके धर्माः आरोह (उन्नतत्व) परिणाहा (विस्तार) दयस्तेषामुपपत्तेः=ज्ञानात् संशयो जायते। यथा स्थाणुपुरुषयोः सदृशौन्नत्यविस्तारादीनां ज्ञानात् स्थाणुर्वा पुरुषो वेति संशयः। २—विप्रतिपत्तेः—परस्परविरुद्धधर्मप्रकारकमेकधर्मिकं ज्ञानं विप्रतिपत्तिस्ततोऽपि संशय इति। एवञ्च परस्परविरुद्धधर्मज्ञानजनकवाक्यद्वयस्यापि विप्रतिपत्तित्वमुक्तप्रायम्। नचैवं संशयविप्रतिपत्त्योरैक्यापत्त्या जन्यजनकभावानुपपत्तिः, संशये विरुद्धधर्मद्वयज्ञानस्यैकात्मसमवेतत्वम्। विप्रतिपत्तौ तु विभिन्नात्मसमवेतत्वमिति विशेषात्। वस्तुतस्तु 'साधारणधर्मावगाहि' विशेषधर्मानवगाहि' किंस्विदिदम्' इति ज्ञानमेव संशयः। अत एव 'विशेषापेक्षो विमर्शः संशयः' इत्युक्तं गौतमेन। अत्र स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टञ्च तयोर्विशेषं बुभुत्सानः तदनवधारणं ज्ञानं संशयः' इति वात्स्यायनः। आर्थिकार्थन्त्वादाय एकधर्मिकं विरुद्धकोटिद्वयावगाहि ज्ञानं संशयः' इत्युक्तं नैयायिकैः। विप्रतिपत्तिः, व्याघातः, असहभावः, इत्यनर्थान्तरम्। यथा केचिदात्मनो विभुत्वमाहुः, केचिदणुत्वम्। ततो विरुद्धज्ञानात् संशयो जायते। 'आत्मा विभुर्वाऽणुर्वा' इति। ३—उपलब्ध्यव्यवस्थातः—उपलब्धिर्ज्ञानं तस्याव्यवस्थातः=अनियमादपि संशय उत्पद्यते। यथा तडागादिषु सच्चोदकमुपलभ्यते मरुमरीचिषु असच्चोदकमुपलभ्यते इति सत एव ज्ञानम्, असत एवाज्ञानमिति नियमो नास्ति इति 'सदुपलभ्यतेऽसद्वा' इति संशयो जायते। ४—अनुपलब्ध्यव्यवस्थातः=अनुपलब्धिः=अप्रतीतिः, तस्या अव्यवस्थातः=अनियमात्। यथा पृथिव्यन्तर्गतं स्तम्भमूलं सदपि नोपलभ्यते। एवं कष्ठाद्यनन्तर्गतं जलं सदपि नोपलभ्यते। तथा असदप्यनुत्पन्नं विनष्टं वा वस्तु नोपलभ्यते। एवञ्च सत एव ज्ञानाभावोऽसत एव इति अनुपलब्धेरपि नियमाभावात्संशयोत्पत्तिः। किं सन्नोपलभ्यते उतासन्नपि' इति संशयः। ननु साधुशब्दान्तर्गता वर्णाः प्रकृतिप्रत्ययान्यतररूपाः वाचका नवेत्यनेन साधुशब्दान्तर्गतवर्णा वाचकतावन्तः, तत्स्मृतास्तु वाचकताभाववन्त इति लभ्यते। तथाचैकत्र साधुशब्दान्तर्गतवर्णानां धर्मित्वम्, अपरत्र तत्स्मृतवर्णानामित्युक्तवाक्यस्य विप्रतिपत्तित्वानुपपत्तिः, एकधर्मिकविरुद्धकोटिद्वयावगाहिसंशयजनकवाक्यस्यैव विप्रतिपत्तित्वात्। अयम्भावः—विरुद्धा या प्रतिपत्तिः=एकधर्मिकं विरुद्धधर्मप्रकारकं ज्ञानम्, तदपि विप्रतिपत्तिः, तज्जन्यं यद्वाक्यद्वयन्तदपि विप्रतिपत्तिः। ज्ञाने विरुद्धत्वञ्च—प्रतिबन्ध्यप्रतिबन्धकभावरूपम्। यथा 'शब्दो नित्यः' इत्येकम्, 'शब्दोऽनित्यः' इत्यपरम्, इति वाक्यद्वयरूपा विप्रतिपत्तिः। एवञ्चैकस्मिन् धर्मिणि सामानाधिकरण्येनासम्भवद् यद्धर्मद्वयन्तद्बोधकवाक्यद्वयस्यैव विप्रतिपत्तित्वमिति। किञ्च साधुशब्दान्तर्गतवर्णत्वरूपपक्षतावच्छेदकावच्छेदेन वाचकत्वं साध्यम्, तादृशपक्षतावच्छेदकसामानाधिकरण्येन वा। नाद्यः, विकरणानां निरर्थकत्वस्य वैयाकरणानां नैयायिकानाञ्च सम्मतत्वे विकरणे वाचकत्वाभावरूपबाधसत्त्वेन पक्षतावच्छेदकावच्छेदेन वाचकत्वस्य साधयितुमशक्यत्वात्। नान्त्यः, पक्तादिशब्दघटकप्रकृतिप्रत्ययानां वाचकत्वस्य नैयायिकादीनामपि सम्मतत्वेन अंशतः सिद्धसाधनताऽऽपत्तेः। तस्मात्साधुशब्दान्तर्गता इत्यस्य साधुशब्दान्तर्गतस्मारिता इत्यर्थकत्वेनोक्तदोषा निरसनीयाः। वस्तुतस्तु तादृशस्मारितेषु लक्षणायामपि विकरणानां निरर्थकत्वे सिजाद्यादेशस्मारितच्लौ बाधो दुर्वार एव। तस्माद्वैयाकरणनये 'प्रयत्य' इति महासंज्ञाकरणसामर्थ्यात् प्रत्येत्यर्थं बोधयति यस्तस्यैव प्रत्ययसंज्ञा विधानेन प्रत्ययमात्रस्य

विधिकोटिरन्येषाम् , नेति वैयाकरणानाम् । साधुशब्दे 'पचति' 'रामः' इत्यादिप्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव

प्रभा

स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकत्वेन विकरणानामपि प्रकृत्यर्थेनार्थवत्त्वादुक्तदोषो निरसनीय इति गुरवः । तथाच साधुशब्दान्तर्गतस्मारितानां लादीनां वाचकत्वं नवेति तात्पर्य्यम् । अयम्भावः—नैयायिकादीनाम्मते साधुशब्दान्तर्गतादेशानां स्थानिस्मारकत्वेनैवोपयोगो नत्वर्थप्रत्यायने । अर्थप्रत्यायकत्वन्तु 'लः कर्मणि' 'स्वौजसमौट्' इत्यादिसूत्रविहितलादीनामेव । वैयाकरणनये तु प्रयोगान्तर्गतास्तिब्विसर्गादय एवार्थप्रत्यायकाः, नतु लाघवेन शास्त्रप्रक्रियानिर्वाहाय कल्पिता लकारसकारादयः, कल्पनामूलकतया तेषामनियतत्वात् । किञ्च णलादिना तिबादिस्मरणम् । तेन च लस्मरणम् , एवं विसर्गादिना रोः स्मरणम् , तेन च सकारस्मरणम् । तथाचातिगौरवम् । किञ्च स्थान्यादेशभावमजानतामवैयाकरणानामादेशमात्रश्रवणाद् बोधदर्शनेन स्मारितानां बोधकत्वं दुर्वचम् । एवञ्च साधुशब्दान्तर्गतवर्णस्मृतिवर्णा वाचका नवेति विप्रतिपत्तिः । एवञ्च 'वटो भिक्षामट, गाञ्चानय' इति समुच्चये एकत्र वटौ भिक्षाकर्मकप्राप्तिकर्तृत्वम्, गोकर्मकानयनकर्तृत्वञ्च यथा भासते न तथा संशये इति तद्व्यावृत्ता कोटिताख्या विषयतेति सूचयन्नाह—विधिकोटिरिति—अत्र प्रकृताभावप्रतियोगिसत्ताबोधनं विधिकोटिः (पक्षः, कोटिः' इति पर्य्यायः) पक्षश्च—'एकाधिकरणस्थः विरुद्धो धर्मः । यथा 'अस्त्यात्मा' नास्त्यात्मा' इति । नानाधिकरणस्थस्तु विरुद्धो धर्मो न पक्षः । यथा 'नित्य आत्मा' 'अनित्या बुद्धिः' इति । अयमेव च प्रतिपक्षः, प्रत्यनीकभावात् । तथाच स्मृतानां वाचकत्वमित्यन्येषाम्=नैयायिकानाम्मतम् । नेतीति— स्मृताः=वाचकत्वाभाववन्त इत्यभावसत्ताबोधनरूपा निषेधकोटिर्वैयाकरणानान्तदेव वैयाकरणमतं विशदयति —साधुशब्द इति । ननु साध्वन्तर्गतानामादेशानां परम्परया बोधजनकत्वेऽपि न शक्तिमत्त्वरूपवाच-

दर्पणव्याख्या

वाक्यमित्यर्थः । नतु संशयजनकं वाक्यमेव सा । परोक्षं ज्ञानं निश्चयात्मकमेवेति प्राचीनप्रवादेन संशयजनकत्वस्य वाक्ये असम्भवात् । वस्तुतस्तु संशयजनकवाक्यत्वमेव विप्रतिपत्तित्वम् । तत्तदभावसहचरितधर्मवद्धर्मिज्ञानस्येव समानानेकेति सूत्रेण विप्रतिपत्तेरप्याहत्येव संशयहेतुत्वोत्कीर्त्तनादित्यवधेयम् । मूले असाधुशब्दान्तर्गतवर्णवाचकताविचारस्याप्रस्तुतत्वं मत्वा— * साध्विति * अत्र साध्वन्तर्गतवर्णत्वसामानाधिकरण्येन वाचकत्वादिसाधने तद्वाक्यस्य विप्रतिपत्तित्वासम्भवः, नैयायिकैरपि साध्वन्तर्गतानां केषाञ्चिद् वाचकत्वाभ्युपगमात् । तादृशवर्णत्वावच्छेदेन वाचकत्वादिसाधने तु वैयाकरणानां परेषां विकरणेषु बाधश्चेत्यत आह—*तत्स्मृता इति* । ननु यथाश्रुते साधुशब्दान्तर्गता वाचकास्तदन्तर्गतवर्णस्मारिता नेत्यर्थलाभादेतद्वाक्यस्य विभिन्नधर्मिबोधकत्वाद्विप्रतिपत्तित्वस्यैवासम्भवः, एकधर्मिकविरुद्धकोटिकसंशयजनकस्यैव तत्त्वादतो व्याचष्टे सारे— * साधुशब्दान्तर्गता इति * साध्वन्तर्गतवर्णस्मारिता इत्यर्थः । यथाश्रुते साध्वनन्तर्गतविपरीतानुपूर्वीकवर्णानां वाचकत्वस्य केनाप्यनभ्युपगमाद् बाधसिद्धसाधनयोरापत्तेः । तत्स्मारितत्वञ्च—शास्त्रबोधितादेशादेशिभाव-निमित्तनिमित्तिभावान्यतरसम्बन्धेन । तेन अस्यापत्यम् 'इ.' 'इयान्' इत्यादेर्नासंग्रहः । * विधिकोटिरिति * समुच्चयव्यावृत्ता कोटिताख्या विषयता संशये आवश्यकीति सूचनायोक्तम्—कोटिरिति । अन्येषाम्—नैयायिकानाम् । तैः "लः कर्मणि" 'स्वौजसमौट्" इत्यादिविहितप्रत्ययानामेव वाचकत्वम् , तिब्विसर्गादीनां त्वादेशिस्मृतिद्वारा बोधकत्वमेव लिपिवदित्यभ्युपगमात् । तथाच साध्वन्तर्गतवर्णस्मारितवर्णत्वावच्छेदेन मतभेदेनोभयसाधनान्नोक्तदोष इति भावः । यथाश्रुतमूलोक्तविप्रतिपत्तिमनुसृत्याह—* साधुशब्द इत्यादि * । ननु साध्वन्तर्गतवर्णानां बोधकत्वसाधनेऽपि न

बोधकाः=वाचकाः, तस्यैव शक्तत्वस्य प्राग्व्यवस्थापितत्वात्। नतु तैः स्मृताः लादयः, स्वादयश्चेत्यर्थः॥६१॥ ये तु प्रयोगान्तर्गतास्तिब्विसर्गादयो न वाचकाः, तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः, 'एधाञ्चक्रे'

प्रभा

कत्वमत आह—वाचका इति। अत्र हेतुमाह—तस्यैवेति—बोधजनकत्वस्यैवेत्यर्थः। शक्तत्वस्य=वाचकत्वस्य। प्रागिति—शक्तिनिरूपणे 'इन्द्रियाणां चक्षुरादीनां स्वविषयेषु=चाक्षुषेषु=घटादिषु यथाऽनादिर्योग्यता=तदीयचाक्षुषादिकारणता, तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिः' इत्युक्तम् शक्तिर्न बोधकतारूपा, किन्तु पदार्थान्तरमिति मतेऽपि बोधकत्वान्यथानुपपत्त्या कल्प्यमाना शक्तिर्बोधकत्वसमानाधिकरणैव स्यात्। एवञ्च स्मृतेषु बोधकत्वाभावे सिद्धे शक्त्यभावोऽपि तत्र सिद्ध्यत्येवेति भावः। तैः=तिबादिभिः। नैयायिकाभिमतं स्मृतानां बोधकत्वं दूषयितुमाह—ये त्विति—तिबादीनां वाचकत्वाभावे हेतुमाह—तेषामिति=तिबादीनामित्यर्थः। बहुत्वेनेति=लादिरूपस्थान्यपेक्षया तिबाद्यादेशानां बहुसंख्याकत्वेनेत्यर्थः। अस्य शक्त्यानन्त्यापत्तौ हेतुत्वात्तृतीया। शक्त्यानन्त्येति—शक्तेरानन्त्यञ्च—'तिप्पदं कर्तृत्वावच्छिन्नविषयकबोधजनकतावत्' 'तस्पदं कर्तृत्वावच्छिन्नविषयकबोधजनकतावत्' इत्येवंरूपेण शक्तेरनन्तपदघटिततया बोध्यम्। एवं शक्तावच्छेदकतिप्त्वादीनामप्यानन्त्येन शक्त्यानन्त्यम्। यद्यप्यादेशाः परिगणिता एवेत्यानन्त्योक्तिरसङ्गता, तथापि लादिस्थान्यपेक्षयाऽऽदेशानां बहुत्वेन आनन्त्यपदं तदपेक्षबहुत्वपरकमेव। ननु स्थानिनां वाचकत्वपक्षेऽपि शाब्दबोधात् प्रागनेकस्मृतिकल्पनायां लाघवाभावः। किञ्च स्थानिनो लकारस्यापि कालरूपार्थभेदेन लट्त्व—लिट्त्वादिनैव शक्तत्वं वाच्यमित्यत्रापि पक्षेऽवच्छेदकभेदेन शक्तिबाहुल्यम्। किञ्च तिङ्त्वादीनां शक्तावच्छेदकत्वेऽर्थोपस्थितिम्प्रति तद्धर्मप्रकारकशक्तिज्ञानस्य कारणता वाच्या, सा च न सम्भवति, लत्वेनोपस्थितशक्त्याऽर्थोपस्थितौ तच्ज्ञानस्य व्यभिचरितत्वादित्यरुचेराह—एधामिति—ननु अनुप्रयुज्यमानकृञाद्युत्तरलिडादेशेनैव कालकारकादिबोधोपपत्तिः, नचानुप्रयुज्यमानधातूत्तरलिडादेशार्थस्य स्वप्रकृतिकृञाद्यर्थे एवान्वयेनाम्प्रकृत्यर्थे कालकारकाद्यप्रतीत्यापत्तिः, अनुप्रयुज्यमानकृञाद्यर्थक्रियासामान्ये कालकारकप्रतीतौ तत्राभेदेनान्वयिनि आम्प्रकृत्येधाद्यर्थे व्यापारविशेषेऽपि आर्थिककालकारकादिप्रतीतिसम्भवात्। तदुक्तं कौमुद्याम्—'तेषाम् (कृञादीनाम्) क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः' इति। शाब्दबोधश्चेत्थम्—एधादयो वृद्ध्यादितत्तत्फलानुकूलव्यापारवाचकाः, कृञ्तु उत्पत्त्यनुकूलव्यापारवाची, भ्वस्ती च सत्तानुकूलव्यापारवाचकौ अनुप्रयुज्यमानधात्वर्थसत्तोत्पत्ती च प्रत्यासत्त्या आम्प्रकृत्येधादिधात्वर्थफलनिष्ठे एव ग्राह्ये। तथाच 'एधाञ्चक्रे' इत्यतः 'एककर्तृकवृद्ध्यनुकूलव्यापाराभिन्नपरोक्षानद्यतनभूतकालिकोत्पत्त्यनुकूलो व्यापार इति बोधः। यत्राकर्मकधातुप्रकृतिकामन्तात्कृञोऽनुप्रयोगस्तत्रानुप्रयुज्यमानस्य फलसमानाधिकरणव्यापार-

दर्पणव्याख्या

वाचकत्वसिद्धिरत आह—*बोधका वाचका इति*। *तस्यैवेति* बोधकत्वस्यैवेत्यर्थः। *प्रागिति*। शक्तिनिरूपणावसर इत्यर्थः। नत्विति—बोधकत्वसिद्धौ च तदन्यथानुपपत्त्या पदार्थान्तररूपा शक्तिरपि सिद्ध्येत्, तदभावे तु साऽपि नेति वाचकत्वसामान्याभावसिद्धिरिति भावः॥६१॥ नैयायिकमतं दूषयितुमुपन्यस्यति—*ये त्विति*। वाचकत्वाभावे प्रयोजकमाह—*तेषामिति*। बहुत्वेन—इत्युपलक्षणम्—अनुगमकधर्माभावस्यापि, तिङ्त्वसुप्त्वादीनामेकवचनत्वादिवदनुगमकत्वासम्भवात्तिङ्त्वाद्युपस्थितिं विनाऽपि कृत्याद्यर्थोपस्थितेर्व्यभिचारेण शक्तानवच्छेदकत्वाच्चेति बोध्यम्। ननु तिबाद्यादेशिनामपि तत्तदनुबन्धभेदेन नानात्वान्नोक्तरीत्या तेषां वाचकत्वमत आह—*एधामिति*।

'ब्रह्म' इत्यादावादेशलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च । किन्तु तैः स्मृता लकाराः, स्वादयश्च वाचकाः, लत्वस्य जातिरूपतया शक्तताऽवच्छेदकत्वौचित्यात् ,

प्रभा

वाचकतयाऽकर्मकत्वेन भावकर्त्रोरेव लिट् । यत्र तु ईक्षादिभ्यः सकर्मकेभ्य आम्, तत्रानुप्रयुज्यमानस्यापि सकर्मकतया कर्मण्यपि लिट् सिद्ध्यति । नच नव्यमते कर्मणि तिङ्प्रत्यये फलस्यैव प्राधान्येन आम्प्रकृत्यनुप्रयुज्यमानोभयधात्वर्थफलयोः प्राधान्येनाभेदान्वयानुपपत्तिः, फलबलेनाम्समभिव्याहारे उभयधात्वर्थव्यापारयोरेव कर्मणि प्रत्ययेऽपि प्राधान्यस्वीकारेणाभेदान्वयोपपत्तिः । फलव्यापारयोः पृथक्शक्तिस्वीकर्तृमते तु कर्तरि कर्मणि वा तिङ्प्रत्यये व्यापारस्यैव प्राधान्यस्वीकारेण दोषाभावः । एवञ्चानुप्रयुज्यमानोत्तरलिडादेशेन भावरूपेण कालकारकादिबोधः स्यादत आह—ब्रह्मेत्यादाविति—आदिना तिष्यनक्षत्रेण युक्तः कालः 'अद्य तिष्यः' इत्यत्र कालार्थकस्याणो 'लुबविशेषे' इत्यनेन लुपि, 'लिट्' इत्यादौ कर्त्रर्थकस्य क्विपो लोपे तत्तदर्थबोधानुपपत्तेः सङ्ग्रहः, लुब्लोपयोरप्यभावरूपत्वात् । एवम् 'वारि' 'आनय' 'अपाचि' इत्यादिष्वपि बोधानुपपत्तिरूपो दोषो बोध्यः । नच यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन प्रकृत्यैव प्रत्ययार्थस्यापि बोध इति वाच्यम्, प्रकृतेः शक्त्यन्तरकल्पनापेक्षयाऽन्यत्र श्रूयमाणप्रत्ययस्थले कृप्तेन प्रत्ययस्य वाचकत्वेन लुगादिस्थलेऽपि प्रकृत्या प्रत्ययस्य स्मरणकल्पनाया एव युक्तत्वादर्द्धजरतीयानौचित्यात् अभावरूपस्येति—हेतुगर्भं विशेषणमिदम्, यतो लुकोऽभावरूपत्वमतस्तस्य बोधकत्वासम्भवः, शाब्दबोधकत्वस्य भावनिष्ठतयाऽभावेन कुत्रापि बोधाजननात् अभावस्य शाब्दबोधजनकत्वे यत्किञ्चिच्छब्दाभावेऽपि बोधापत्तेश्च । असम्भवाच्चेति—शाब्दिकमते उच्चरितः शब्दः प्रत्यायको भवति नानुच्चरितः, इति भाष्याच्छ्रूयमाणशब्दानामेव बोधकत्वम् । तथाच प्रकृते ब्रह्मेत्यादावादेशानामश्रवणेन बोधो न स्यादिति भावः । तैः=आदेशैः । आदेशानां वाचकत्वपक्षे तिप्त्वादीनां बहूनां शक्तावच्छेदकापेक्षया स्थानिनो वाचकत्वपक्षे शक्तावच्छेदके लाघवमप्यस्तीत्याह—लत्वस्येति—लडादिघटकलेषु 'ल' इत्यनुगतप्रतीत्या लत्वरूपजातिसिद्धिः । तदुक्तं सरूपसूत्रे भाष्ये (१ । २ । ६४) 'कथं पुनर्ज्ञायते एकाकृतिरिति, प्रख्याऽविशेषात्' इति । प्रख्या=बुद्धिस्तस्या अविशेषः=एकरूपता । भिन्नभिन्नव्यक्त्यवगाहिन्यामपि बुद्धौ 'घटः' इति प्रतीतिरेकरूपैव । तत्र बुद्धेरैक्यं तद्विषयजातेरैक्यादेव । गौतमेनापि समानप्रसवात्मिका जातिः' (न्या० द० २-२-७०) इति वदता अनुगतप्रतीतेर्जातिसाधकत्वं सूचितम् । एतेन कारणताऽवच्छेदकतया कार्य्यताऽवच्छेदकतयैव वा जातिसिद्धिरिति नैयायिकोक्तमपास्तम् । यदि तु 'लकारः दन्तस्थानवायुसंयोगविशेषजन्यः' इति प्रतीत्या लकारे जन्यता, तदा नैयायिकाभिमतकार्य्यतावच्छेदकतयाऽपि लत्वजातिसिद्धिः । नच लत्वस्य धातु-प्रातिपदिक-प्रत्ययघटकसकललकारवृत्तितया कृतिनिरूपितशक्तताया दशलकारमात्रवृत्तित्वेनातिप्रसक्तत्वान्न लत्वं शक्तावच्छेदकमिति वाच्यम्, लट्त्वादिसमानाधिकरणलत्वस्यानतिप्रसक्तत्वेनावच्छेदकत्वसम्भवादतिप्रसक्तधर्मस्याप्यवच्छेदकत्वस्वीकाराच्च । नव्यनैयायिकास्तु लत्वस्य कृतिनिरूपितशक्तताया अधिकवृत्तितया लट्त्वादिसमानाधिकरणलत्वस्य कृतिनिरूपितशक्तत्वाभाववति कर्त्रर्थकशतृस्मृतेऽपि लकारे सत्त्वेन व्यभि-

दर्पणव्याख्या

अनुप्रयुज्यमानधातूत्तरैधादिनापि तदर्थबोधोपपत्तेर्नोक्तदोषोऽत आह—* ब्रह्मेति * । आदिना 'अद्य तिष्यो लिड्, धुक्' इत्यादिसंग्रहः । लुगादेरित्यादिना, लुब्लोपयोः सः * तैरिति * आदेशैरित्यर्थः । उक्तदोषमाशङ्क्याह—* लत्वस्येति * । * जातिरूपतयेति * लडादिलेषु ल-इत्यनुगतप्रतीत्या तत्सिद्धिरित्यभिमानः ।

SGDF Sri Gargeshwari Digital Foundation

अव्यभिचाराच्च । आदेशानां भिन्नतया परस्परव्यभिचरितत्वात् । लः कर्मणीत्याद्यनुशासनानुगुण्याच्च । नह्यादेशेष्वर्थवत्ताबोधकमनुशासनमुपलभामहे इत्याहुः । तान् स्वसाधकयुक्तिभिर्निराचष्टे—

प्रभा

चाराच्च न लत्वं शक्तावच्छेदकम्, किन्तु तिप्त्वादिकमेवेत्याहुः। तथाच उक्तविप्रतिपत्तौ प्राचीननैयायिकैः सहैव विवादो बोध्यः। अव्यभिचाराच्चेति—यत्र यत्र तिपा, तसा, झीत्यादिना च यत्र यत्रात्मनि कृतिविषयकोपस्थितिस्तत्र तत्रात्मनि तादृशोपस्थित्यव्यवहितपूर्वक्षणावच्छेदेन 'लपदं कृतिविषयकबोधजनकतावत्' इति शक्तिज्ञानस्य सत्त्वेन कार्य्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावीयप्रतियोगितानवच्छेदकधर्मवत्त्वरूपकारणत्वं लकारनिष्ठशक्तिज्ञाने सिद्ध्यति । तिबादिपदनिष्ठशक्तिज्ञानन्तु यत्र तिपा कृतिबोधः, तत्र तस्पदनिष्ठशक्तिज्ञानं नास्तीत्यभावस्य सत्त्वेन तस्पदनिष्ठशक्तिज्ञानत्वमभावीयप्रतियोगितावच्छेदकमेवेति तज्ज्ञानस्य कारणत्वं न स्यात्, व्यभिचारात्। एवं यत्र तसादिना कृतिबोधस्तत्र तिप्पदनिष्ठशक्तिज्ञानं नास्तीत्यभावमादाय तिप्पदनिष्ठशक्तिज्ञानत्वमप्यभावीयप्रतियोगितावच्छेदकमेवेति तस्यापि व्यभिचारात् कारणत्वासिद्धिरिति चालनिन्यायेनैकेन शक्तिज्ञानेन कृतिबोधेऽपरशक्तिज्ञानस्यासत्त्वात्कस्यापि तिबादिपदनिष्ठशक्तिज्ञानस्य कारणत्वं न स्यात्। लकारस्य वाचकत्वे तु केनाऽपि लादेशेन कृतिबोधस्थले आदेशस्मृतलपदनिष्ठशक्तिज्ञानं नास्तीत्यस्य वक्तुमशक्यतया लकारनिष्ठशक्तिज्ञानस्याव्यभिचारित्वम्। व्यभिचारित्वादिति—यत्रैकमेव कार्य्यम्, तत्कारणञ्चानेकं तत्रैकस्मात्कारणात्कार्य्यसिद्धौ कारणान्तरस्याभावाद् व्यभिचारः। यदि तु कार्य्यमपि प्रतिकारणं भिन्नं तदा व्यभिचाराभावः। एवञ्च यदा कृतिविषयकोपस्थितिरूपमेकमेव कार्य्यन्तदा व्यभिचारः। यदि तु तिप्पदनिष्ठशक्तिज्ञानविशिष्टकृतिविषयकोपस्थितिम्प्रति तिप्पदनिष्ठशक्तिज्ञानं कारणम्। उपस्थितौ शक्तिज्ञानवैशिष्ट्यञ्च—स्वाव्यवहितोत्तरत्व—स्वसामानाधिकरण्योभयसम्बन्धेन। एवं तस्पदनिष्ठशक्तिज्ञानविशिष्टकृतिविषयकोपस्थितिम्प्रति तस्पदनिष्ठंशक्तिज्ञानं कारणम्। वैशिष्ट्यञ्च—पूर्ववत्तदा व्यभिचाराभावादाह—लः कर्मणीति—अनेन लत्वस्य शक्तावच्छेदकत्वे पाणिनिसम्मतिरपि सूचिता । आदेशेष्विति—आदेशानामर्थवत्ताबोधकं किमपि पाणिनिसूत्रं नोपलभ्यते इति भावः। यद्यपि शब्दत आदेशानामर्थवत्त्वं पाणिनिना न बोधितन्तथापि 'स्थानेऽन्तरतमः' इति सूत्रनिर्माणेन, भाष्यकृता चास्य सूत्रस्य प्रयोजनम् 'तस्थस्थमिपां तान्तंतामः' इत्यत्र 'एकार्थस्यैकार्थः' 'द्व्यर्थस्य द्व्यर्थः' बह्वर्थस्य बह्वर्थो यथा स्यात्' इत्युक्त्या यदर्थाभिधानसमर्थः स तस्यादेश इति प्रयोजनं प्रदर्शयता, आदेशानामर्थवत्त्वं सूचितन्तथापि तदजानतामियमुक्तिः। तान्=नैयायिकादीन् । स्वसाधकेति—स्वकीयं तन्मतं प्रयोगान्तर्गतश्रूयमाणादेशानामेव वाचकत्वमिति तन्मतपोषकयुक्तिभिर्नैयायिकादीन् । तन्मतं निराचष्टे—प्रत्याययतीत्यर्थः।

दर्पणव्याख्या

नव्यास्तु—शक्तावच्छेदकतया न तत्सिद्धिः । सर्वलकारसाधारणलत्वस्यातिप्रसक्तत्वाद्दशलकारमात्रवृत्तेस्तु शक्तिग्रहात् पूर्वमनुपस्थितेः पचन्नित्यादौ कृतिबोधापत्त्या तस्य शक्तत्वाऽवच्छेदकत्वासम्भवाच्च तिप्त्वतस्त्वादिकमेव तदवच्छेदकमित्याहुः। तथाचोक्तविप्रतिपत्तौ प्राचीनैः सह विवाद एवेति बोध्यम्।

* अव्यभिचाराच्चेति * लत्वावच्छिन्नशक्तिग्रहस्य कृतिबोधात् पूर्वं नियमेन सत्त्वात् तिप्त्वादीनां शक्यतावच्छेदकत्वे तु तदवच्छिन्नशक्तिग्रहं विनाऽपि तसादिशक्तिग्रहवत् कृतिबोधेनाऽदेशवाचकतावादिमते व्यभिचारो दुर्वार इति भावः। ननु कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशान्नेयमापत्तिरत आह—*लः कर्मणीतीति * । *इत्याहुरिति* तथाचादेशिनामेव वाचकत्वं सप्रमाणमिति तद्भावः । * स्वसाधकेति * । स्वमतपरिपोषकेत्यर्थः । व्यवस्थितेरित्यादि-

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।
किञ्चाऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥ ६२ ॥
कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय ।

व्यवस्थानुरोधात् प्रयोगान्तर्गता एव वाचकाः, नतु तैः स्मृता इत्यर्थः । तथाहि—पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वम् । नच तेषां तिङ्षु शक्तिभ्रमाद् बोधः; तस्य भ्रमत्वे मानाभावात्, आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात्, कः शक्तः को नेति

प्रभा

व्यवस्थितेरिति—हेतुत्वद्योतकस्य व्यवस्थितेरित्यादिपञ्चम्यन्तत्रयस्य पूर्वकारिकोत्तरार्द्धगते 'बोधकाः' इत्यत्रान्वयः । तथाच व्यवस्थित्यादिहेतोः साधुशब्दान्तर्गता आदेशा एव वाचकाः, नतु तत्स्मृताः स्थानिनो लादय इति दर्शयन्नादौ व्यवस्थितेरिति प्रथमं पञ्चम्यन्तं विवृणोति-व्यवस्थानुरोधादिति-प्रमाणैर्वस्तुतत्त्वावधारणं व्यवस्था । अविदुष इति—तद्धर्मावच्छिन्नविषयकबोधम्प्रति तद्धर्मावच्छिन्नार्थनिरूपितवृत्तिविशिष्टज्ञानं हेतुः । ज्ञाने वृत्तिवैशिष्ट्यञ्च-स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्य—स्वाश्रयपदविषयकत्वोभयसम्बन्धेन । तथाच लकारादिस्थानिनो वाचकत्ववादिनये 'लपदं कृतित्वावच्छिन्नविषयकबोधजनकतावत्' इत्याकारिका या वृत्तिस्तस्या व्यवहारादिना यदा कदाचिज्ज्ञानं जातम् । तज्ज्ञानञ्च तृतीयक्षणे नश्यति । परन्तु तस्माज्ज्ञानादुक्तवृत्तिविषयकः संस्कार उत्पन्नः, स च स्थायी उच्चारितपदश्रवणेनोद्बुद्धात् तस्मात्संस्कारात्स्मरणात्मकं वृत्तिज्ञानं जायते । तदेव च ज्ञानं वृत्तिविशिष्टम् । पदश्रोतृनिष्ठवृत्तिस्मरणात्मकज्ञाने वृत्तिविषयकोद्बुद्धसंस्कारसामानाधिकरण्यं वृत्त्याश्रयपदविषयकत्वञ्च वर्तत इति तादृशज्ञानात्कृतिविषयोपस्थितिरपेक्ष्यते । लकारस्यैव वृत्त्याश्रयत्ववादिमते वृत्त्याश्रयं लकारमजानतस्तिबादिकञ्च शृण्वतोऽवैयाकरणस्य बोधानापत्तिः । तस्यापि बोधदर्शनेनान्वयव्यतिरेकाभ्यां तिबाद्यादेशानामेव शक्तत्वम्, नतु लादिस्थानिन इत्यनुमीयते इति भावः । तस्य=स्थानिनो लकारस्य । तेषाम्=लकारमविदुषाम् । भ्रमादिति-कृतिनिरूपितशक्त्यभाववत्सु तिङ्षु तादृशशक्तिमत्ताज्ञानादित्यर्थः । तस्य=तिङि शक्तिमत्त्वज्ञानस्य । मानाभावादिति=बोधोत्तरकाले 'तिङ्पदं न कृतिबोधकम्' इति भ्रमत्वसाधकबाधरूपमानाभावादित्यर्थः । नन्वादेशानां बाहुल्यमेव तिङादिषु शक्तिमत्त्वे बाधकमत आह—आदेशिनामिति—स्थानिनामित्यर्थः । चेदिति—शाकटायनापिशल्यादिभिरित्यर्थः । लाघवेन प्रक्रियानिर्वाहार्थमेव स्थानिनां कल्पनया भिन्नभिन्नवैयाकरणाः स्वस्वेच्छया लड्लिडादिवत् 'कड्—किट्, खट्—खिट्', गड्—गिट्, इत्यादिरूपेण स्थानिनां कल्पनासम्भवेन स्थानिनामप्यनियततया लकारो वाचकः, ककारादयः स्थानिनो न वाचका इत्यत्र इदमेव वाचकमिति निर्णयो न स्यात् । किञ्च विनिगमनाविरहेण सर्वेषां वाचकत्वे लाघवाभावः । अष्टादशतिङः, शतृशानचौ क्वसुकानचौ' इति द्वाविंशतिलादेशाः, स्थानित्वस्य च सर्वेषां वर्णानां कल्पयितुं शक्यतया प्रत्युत

दर्पणव्याख्या

पञ्चम्यन्तत्रयस्य पूर्वकारिकास्थबोधकपदार्थेऽन्वयं प्रदर्शयन्नादौ व्यवस्थितेरित्येतद्विवृणोति-* व्यवस्थानुरोधादिति * प्रमाणेन पदार्थनिर्द्धारणं व्यवस्था' तदन्यथाऽनुपपत्तेरित्यर्थः । *शक्तिभ्रमादिति* लत्वावच्छिन्ननिष्ठवाचकत्वस्य तत्रारोपादित्यर्थः । * मानाभावादिति * विषयबाधस्यैव भ्रमत्वे तन्त्रतया प्रकृते बोधकत्वशक्तेस्तत्राबाधादिति भावः ।

नन्वादेशानां बहुत्वमेव तत्र शक्तिस्वीकारे बाधकमत आह-*आदेशिनामपीति* । *वैयाकरणैः*-शाकटाय-

व्यवस्थानापत्तेश्च । सर्वेषां शक्तत्वे गौरवम् , व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वम्। तथाचादेशिस्मरणकल्पना नेति लाघवम्। साधकान्तरमाह—व्यवहृतेरिति—व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः ।

प्रभा

स्थानिनां वाचकत्वे एव गौरवमित्याह—सर्वेषां शक्तत्वे गौरवमिति। व्यभिचार इति—यथा बहूनां तिबाद्यादेशानां वाचकत्वे त्वया (नैयायिकेन) व्यभिचार उक्तस्तथा तव मतेऽपि बहूनां स्थानिनां वाचकत्वेऽपि यदा एकेन स्थानिना बोधस्तदा स्थान्यन्तरं नास्तीति 'चालनि'न्यायेन व्यभिचारात् कस्यापि स्थानिनो वाचकत्वं न स्यादिति भावः । कारणाव्यवहितोत्तरत्वादिकं निवेश्य व्यभिचारवारणे तु गौरवादिदोषकदम्बस्य तत्परिहारस्य चोभयोः स्थान्यादेशवाचकतावादिनोः समत्वेऽपि स्थानिस्मरणकल्पनाऽभावरूपं लाघवम् , प्रयोगघटकत्वेन शीघ्रोपस्थितिकत्वं स्थानिज्ञानशून्यानां तिबादेशं च शृण्वतामवैयाकरणानां बोधदर्शनञ्चादेशानां वाचकत्वे विनिगमकमित्यादेशानां वाचकत्वमेव ज्याय इत्याह—तथाचेति । ननु बोधकत्वरूपा यदि शक्तिस्तदा तिङाद्यादेशादिभिरेव बोधात् तेष्वेव बोधकत्वरूपा शक्तिः सिद्ध्यति। परन्तु नैयायिकमते ईश्वरसंकेतरूपा शक्तिः, पदार्थान्तरं वा। तस्याश्च शक्तेः पाणिन्यादिसूत्रेण स्थानिष्वेव प्रतिपादनात्तत्रैवेश्वरसंकेतरूपा पदार्थान्तररूपा वा सा कल्प्येति तिबादिषु शक्त्यसिद्धिः । यद्यपि स्थानिस्मरणकल्पनारूपगौरवमत्र पक्षेऽतिरिच्यते। तथापि प्रमाणतः सिद्धार्थे गौरवस्यादोषत्वमित्यत आह—साधकान्तरमिति—प्रयोगान्तर्गतादेशानां वाचकत्वे साध्ये हेत्वन्तरमित्यर्थः। व्यवहृतेरिति—व्यवहृतिर्व्यवहारस्तत इत्यर्थः। व्यवहारस्य प्रकृते प्रतिपादकव्यक्त्योः शब्दद्वारा परस्पराभिप्रायावेदनरूपः। व्यवहार इति—'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इत्यभियुक्तोक्ते र्व्यवहारस्य शक्तिग्राहकत्वम्। धातुप्रकृतिप्रत्ययादीनां शक्तिज्ञानं व्याकरणाज्जायते। उपमानम्=उपमितिकरणम्=सादृश्यज्ञानम्। अज्ञातशक्तिकपदे सादृश्यज्ञानेन यच्छक्तिज्ञानं तदेवोपमितिः। यथा 'गौरिव गवयः' इति वाक्यार्थज्ञानोत्तरं गवयदर्शनेन यद्गोसादृश्यज्ञानं तेन 'गवयपदं पुरो दृश्यमानार्थनिरूपितशक्तिमत्' इति यच्छक्तिज्ञानं तदुपमानात्=सादृश्यज्ञानात्। कोशः=शब्दतदर्थप्रतिपादको ग्रन्थविशेषः। ततः शक्तिज्ञानं यथा 'हर्म्यादिधनिनां वासः, प्रासादो देवभूभुजाम्' इत्यतः। वस्तुतस्तु कोशस्याप्याप्तवाक्येष्वेव गतार्थत्वात्पृथगुपादानं 'ब्राह्मणवशिष्ठ' न्यायेनेति गुरव.। आप्तवाक्याच्छक्तिग्रहः।

दर्पणव्याख्या

नप्रभृतिभिः—*व्यवस्थेति* , इदमेव वाचकमिति निर्द्धारणानुपपत्तेरित्यर्थः, अनुशासनस्य सर्वत्रापि सत्त्वादिति भावः। सर्वेषामित्यस्य विनिगमकाभावादित्यादिः। ननु तथाप्यादेशापेक्षयाऽऽदेशिनामल्पत्वेन तत्प्रयुक्तलाघवादादेशिष्वेव वाचकत्वं सेत्स्यतीत्यत आह—* व्यभिचारश्चेति *। ननु विनिगमनाविरहादेवादेशिनां वाचकतासिद्धिरत आह—* आदेशानामिति * तथाच गौरवादिदोषस्य तत्परिहारस्य चोभयोः साम्येऽप्यादेशिस्मरणकल्पनाविरहप्रयुक्तलाघवसहकृतप्रयोगनैयत्यमेवादेशानां वाचकत्वे विनिगमकमित्याखण्डलार्थः। ननु बोधकतायाः शक्तित्व एव भवदुक्तव्यवस्थोपपत्तिः। नच बोधकत्वस्य शक्तित्वं तन्मतसिद्धम् , किन्तु सङ्केतस्य पदार्थान्तरस्य वा तत्त्वम्। तथाचानुशासनेन यत्र सा प्रतिपाद्यते तत्रैव तदङ्गीकारेण कथं तिबादिषु तत्सिद्धिः। स्मरणकल्पनागौरवं तु प्रामाणिकत्वादपि न दुष्टमित्यस्वरसात् प्रयोगे श्रूयमाणानां तिबादीनां वाचकत्वे साधकान्तरमुपन्यस्यतीत्याह—* साधकान्तरमिति *। * मुख्य इति * मुख्यत्वञ्च—तस्मिन् शक्तिग्राहकान्तरनिरपेक्षत्वम् , व्याकरणादिना शक्तिग्रहे नियमेन तद्ग्राहकान्तरापेक्षणात्।

SGDF Sarga Digital Foundation

प्रभा

आप्तोऽत्र शब्दप्रयोगहेतुभूतयथार्थज्ञानवान् । यथा 'कोकिलः पिकपदवाच्यः' इत्याप्तवाक्यात् कोकिले पिकपदशक्तिग्रहः । व्यवहारतः शक्तिग्रहो यथा—आज्ञापकप्रयोजकवृद्धेन 'घटमानय' इत्युक्तम् । ततः आज्ञाप्यप्रयोज्यवृद्धेन घट आनीतः, ततो 'गामानय' इत्युक्ते गौरानीयते इति गोघटशब्दयोरन्वयव्यतिरेकाभ्यां गोत्वावच्छिन्ने, घटत्वावच्छिन्ने च शक्तिरवधार्य्यते । वाक्यशेषात्=प्रकृतार्थोपपादकान्तिमवाक्याच्छक्तिग्रहो यथा—'यवमयश्चरुर्भवति' इति यज्ञप्रकरणे उक्तम् । तत्र यवपदस्य क शक्तिरित्याकाङ्क्षायां वाक्यशेषेण 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमानास्तिष्ठन्ति' इति । 'वसन्ते सर्वसस्यानां जायते यत्र शातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिकशालिनः ।' इति वाक्यशेषे दीर्घशूकस्य वर्णनाद् दीर्घशूके एव शक्तिर्नतु म्लेच्छप्रसिद्धेऽर्थे प्रियङ्गौ । तत्र तु म्लेच्छानां शक्तिभ्रमात्प्रयोग इति मुक्तावलीकारादयः । वस्तुतस्तु यवशब्दस्य दीर्घशूके शिष्टानां व्यवहारदर्शनात्तत्र शक्तिः । प्रियङ्गौ 'सर्षपविशेषे' म्लेच्छानां व्यवहारात्तत्रापि शक्तिः, इत्थं नानाशक्तिकत्वात् । 'यवमयश्चरुः' इत्यत्र कस्य ग्रहणमित्याशङ्कायां सिद्धान्तसूत्रम्—'शास्त्रस्था वा तन्निमित्तत्वात्' (मी० द० १ अ० ३ पा० ५ अ०) शास्त्रस्थाः=शिष्टा हि अर्थनिर्णायका इति शेषः । तन्निमित्तत्वात्=शिष्टनिमित्तत्वात् । वेदार्थस्येति शेषः अत्र भाष्यम्—यः शास्त्रस्थानां स शब्दार्थः । के शास्त्रस्थाः ? शिष्टाः='कः पुनरार्य्यावर्तः ? प्रागादर्शात् प्रत्यक् कालकवनात्' दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्य्यावर्ते निवासा ये ब्राह्मणाः कुम्भीधान्या अलोलुपाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः' इति महाभाष्ये (६।३।१०९) पतञ्जलिः । 'तेषामविच्छिन्ना स्मृतिः शब्देषु वेदेषु (वेदार्थेषु) च । तेन शिष्टा निमित्तं श्रुतिस्मृत्यवधारणे । तैर्हि एवं समामनन्ति यवमयेषु करम्भपात्रेषु वाक्यशेषम्—'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' इति दीर्घशूकान् यवान् दर्शयति वेद इति । शिष्टा हि वाक्यशेषेण 'यत्रान्या' इत्यादिना यवपदवाच्या दीर्घशूका एवेति निर्णयन्ति । एवञ्च 'तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्' इत्यादिसूत्रार्थपर्य्यालोचनेन मञ्जूषाकारसम्मत्या च शक्तिविषयकतात्पर्य्यनिर्णायकोऽयं वाक्यशेषो नतु शक्तिग्राहक इति प्रतीयते । तस्माद्वाक्यशेषाच्छक्तिग्रहस्य नैयायिकोक्तमिदमुदाहरणं चिन्त्यम् । तदुदाहरणन्तु—'अश्वबालः प्रस्तरः' इति वैदिकवाक्ये अश्वस्य बालः (केशः) इति प्रतीयते । परन्तु अश्वबालपदमत्र काशनिरूपितशक्तिमत् 'यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रमत्सोऽपः प्राविशत् । स बालधौ गृहीतस्तान् बालान्मुक्त्वा विवेश ह । ते बालाः काशतां प्राप्ताः कार्य्योऽतः प्रस्तरस्तु तैः' इति वाक्यशेषात् ।

एवम् 'ऐक्षव्यौ विधती' इति वैदिकवाक्ये ऐक्षव्यपदं लोकाद् 'व्यवहारात्' इक्ष्ववयवपरम्, वाक्यशेषात्तु काशमूलके इति बोध्यम् । विवृतेः=विवरणात् शक्तिग्रहः । विवरणञ्च—तत्समानार्थकशब्दान्तरेण तदर्थकथनम्, तत्समानार्थकवाक्यं वा । यथा सुत्रामा=इन्द्रः । पचति=पाकं करोति' इति । सिद्धपदस्य सान्निध्यात्=प्रसिद्धार्थकपदसम्बन्धात् । यथा 'इह सहकारतरौ मधुरं पिको रौति' इत्यत्र सहकारतरौ रौति' इत्यादिसान्निध्यात् पिकपदस्य कोकिले शक्तिग्रहः । वस्तुतस्तु प्रसिद्धपदसमभिव्याहारोऽपि अनुमानविधयैव शक्तिग्राहकः । तद्यथा—'इह आम्रवृक्षे मधुररावकर्ता पिकपदवाच्यः' इत्येव सान्निध्याद् बोधः । पिकपदस्य शक्तिग्रहाभावात्कोकिलत्वेन रूपेण बोधासम्भवात् । आम्रतरौ रुवन्तं कोकिलं चक्षुषा दृष्ट्वा 'कोकिलः पिकपदवाच्यः, सहकारतरौ मधुररावकर्तृत्वात्' इत्यनुमानादेव कोकिलत्वेन शक्तिग्रहः । तत्र शक्तिग्राहकेषु व्यवहारो मुख्यः । तत्रान्यापेक्षया मुख्यत्वञ्च—शक्तिग्राहकान्तरानपेक्ष्य शक्तिग्राहकत्वम् । व्याकरणादीनां शक्तिग्राहकत्वे तु व्यवहारज्ञानमपेक्ष्यते । तथाहि—'तस्यापत्यम्' इत्यादिना अणादिपदस्य शक्तिग्रहेऽपत्यादिपदशक्तिज्ञानमपेक्ष्यते, अपत्यपदस्य शक्त्यज्ञानेऽणपदस्य शक्तिग्रहासम्भवात् । अपत्यपदस्य शक्तिज्ञानन्तु नाहि

स च श्रूयमाणतिङादिष्वेवेति ते एव वाचका इत्यर्थः। किञ्च तद्धेतुन्यायत इति—

प्रभा

तदर्थकपदान्तरशक्तिज्ञानेन, पदान्तरशक्तिज्ञाने पदान्तरशक्तिज्ञानस्यापेक्षणेऽनवस्थाप्रसङ्गात्। किन्तु अपत्यपदे व्यवहारेणैव शक्तिज्ञानं वाच्यम्। व्यवहारेण शक्तिज्ञाने च नहि शक्तिग्राहकान्तरापेक्षेति व्यवहारे शक्तिग्राहकान्तरानपेक्षत्वरूपं मुख्यत्वं सिद्धम्। स च=व्यवहारशक्तिग्रहश्च। ते=तिबाद्यादेशाः। यत्तु प्रवर्तकवृद्धस्य प्रवृत्तिप्रयोजकलिङादिप्रत्ययघटितपदप्रयोगद्वारा अज्ञाप्यवृद्धस्य प्रवृत्तिनिवृत्तिरूपव्यवहारेणोदासीनबालानां शक्तिज्ञानसम्भवेऽपि लिङाद्यघटितपदघटितवाक्यघटकपदानां शक्तिज्ञानासम्भवः, तेषां व्यवहाराविषयत्वादिति तन्न, प्रवर्तनार्थकप्रत्ययघटितवाक्ये 'घटमानय' पटं नय, इत्यादौ व्यवहारतः कार्य्यान्विते घटादौ शक्तिग्रहेऽपि आवापोद्वापाभ्यां तादृशवाक्यघटकपदानां शुद्धघटाद्यर्थेऽपि शक्तिग्रहे बाधकाभावात्, कार्य्यान्वितघटविषयकशाब्दत्वावच्छिन्नं प्रति कार्य्यान्वितघटत्वावच्छिन्नविषयकशक्तिज्ञानं कारणमिति कार्य्यकारणभावमादाय कार्य्यान्वितघटशाब्दबुद्धित्वस्य कार्य्यताकारणतावच्छेदकत्वापेक्षया घटविषयकशाब्दबुद्धित्वस्य कार्य्यतावच्छेदकत्वे घटशक्तिज्ञानत्वस्य कारणतावच्छेदकत्वे लाघवाच्च। किञ्च कार्य्यान्वितघटादिविषयकबोधम्प्रति कार्य्यान्वितघटादिविषयकशक्तिज्ञानस्य कारणत्वे 'चैत्र ? पुत्रस्ते जातः 'कन्या ते गर्भिणी' इत्यादिप्रवृत्तिप्रयोजकक्रियावाचकपदाघटितवाक्येन शाब्दबोधानापत्तौ श्रोतुश्चैत्रादेः सुखदुःखानापत्तिः। नचात्मान्तरस्थसुखदुःखयोर्ज्ञातुमशक्यतया तादृशवाक्यार्थबोधजन्यसुखदुःखे नैवोत्पद्येते इति वाच्यम्, मुखप्रसादमुखमालिन्यादिदर्शनेन लिङ्गेन सुखदुःखयोरनुमानस्यानुभवसिद्धत्वात्। नचोक्तस्थलेऽपि 'तं पुत्रं पश्य' इति कार्य्यत्वबोधकपदाध्याहारेण कार्य्यान्वितस्यैव बोध इति वाच्यम्, पुत्रो जातः, मृतः, दग्धश्च इत्युक्तौ तद्दर्शनासम्भवेन 'तं पश्य' इत्यध्याहारस्य कर्तुमशक्यत्वात्। एतेन व्यवहारे लोडाद्यादेशघटितप्रयोगस्यैव दर्शनेन तत्रादेशेषु व्यवहारतः शक्तिसिद्धावपि प्रवर्तकक्रियारहितेषु 'देवदत्तः पचति' रामस्य, आगत्य, इत्यादीनां व्यवहाराविषयत्वेन तद्घटकादेशेषु 'लः कर्मणि' इत्याद्यनुशासनेनैवार्थनिर्णयस्यावश्यकतया लादिरूपस्थानिनां वाचकत्वसिद्धौ कार्य्यान्वितार्थबोधकवाक्यघटकपदेष्वपि स्थानिनामेवानुशासनानुगुण्याद् वाचकत्वमस्तु, अर्धजरतीयस्यानौचित्यादित्यपास्तम्, व्यवहारेणैवोक्तरीत्या सर्वत्र पदान्तर्गतानामेव शक्त्यवधारणात्। नन्वाद्यशक्तिग्रहस्य व्यवहारेण वाक्येष्वेव सम्भवेऽपि पश्चादावापोद्वापाभ्यां लाघवात् पदशक्तिग्रहे वाक्यशक्तेस्त्यागस्तथा व्यवहारादादेशेषु शक्तिग्रहे ऽपि स्थान्यर्थबोधकानुशासनानुरोधेन लाघवेन चादेशेषु शक्तिग्रहस्याप्रामाण्यकल्पनेन स्थानिनामेव वाचकत्वसिद्धिरत आह—किञ्चेति। तद्धेतुन्यायत इति—तस्य=कारणीभूतस्य हेतुस्तद्धेतुः, सचासौ न्यायश्च तद्धेतुन्यायस्तस्मादित्यर्थः। तद्धेतोरेव कारणत्वमस्तु किं तेन (तस्य कारणत्वे-

दर्पणव्याख्या

* सचेति * व्यवहारजन्यशक्तिग्रहश्चेत्यर्थः * तिङादिष्वेवेति * व्यवहारेण पूर्वं वाक्ये तद्ग्रहेऽप्यावापोद्वापाभ्यां पश्चात्तद्घटकतिङादिष्वेव तन्निर्णयादिति भावः। ननु प्रयोगान्तर्गतवर्णेषु सर्वसिद्धव्यवहारेण शक्तिग्रहे 'घटमानय' इत्याद्यन्तर्गतशबादीनामपि वाचकत्वापत्तिः। नच सेष्टा, विकरणानां नैरर्थक्यमिति सिद्धान्तव्याकोपात्। किञ्चानयनादिव्यवहारस्य लोडाद्यन्तप्रयोगं विनाऽसम्भवेन तादृशप्रयोगान्तर्गतवर्णानां तेन तत्त्वासिद्धावपि तद्रहितवाक्यान्तर्गतवर्णेषु वाचकत्वमनुशासनेनैवेष्टव्यम्। तथाच तत्रादेशिनां वाचकत्वसिद्धावन्यत्राप्यादेशिषु सा कल्प्येत्यस्वरसादाह—* किञ्चेति *। * तद्धेत्विति * "तद्धेतोरेव तत्त्वे किं तेन" इति न्यायाकारः। लाघवमूलकश्चायं न्यायः। उभयोर्हेतुत्वे

लकारस्य बोधकत्वे 'भू ल्' इत्यतोऽपि बोधापत्तिः स्यात्। तादृशबोधे भवतीति सम
भिव्याहारोऽपि कारणमिति चेत् तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः।

प्रभा

र) इति न्यायाकारः। अयम्भावः—यथा समाप्तिं प्रति मङ्गलस्य कारणत्वं वदतां मते भोगादिना
ारयविघ्नध्वंसपूर्वकसमाप्तौ विघ्नध्वंसस्य नियतपूर्ववर्तित्वेन कारणतायाः क्लृप्तत्वेन मङ्गलस्य-
ऽपि विघ्नध्वंसेनैव समाप्त्युपपत्तौ मङ्गलस्यान्यथासिद्धत्वेन कारणत्वाभावः। नच विघ्नध्वंसस्य
ङ्गलव्यापारत्वेन व्यापारेण व्यापारिणो नान्यथासिद्धिः, अन्यथा दण्डकुलालादिव्यापारस्यैव घटं
ति कारणत्वे दण्डादीनामप्यन्यथासिद्धत्वापत्तिरिति वाच्यम्, यत्र व्यापारिणः प्रमाणबोधितकारण-
बोपपत्तये व्यापारस्य कारणत्वमुपेयते तत्रैव व्यापारेण व्यापारिणोऽन्यथासिद्धत्वाभावकल्पनात्। यथा
स्वर्गकामः सोमेन यजेत' इति श्रुत्या बोधितकारणताकक्रियारूपयागस्य चतुःक्षणमात्रस्थायितया कतिपय-
र्षानन्तरं सम्भावितमरणोत्तरभाविस्वर्गम्प्रति प्रागव्यवहितक्षणवर्तित्वाभावेन कारणत्वासम्भवात् तत्कारण-
बोपपत्तये स्वर्गाव्यवहितप्राक्क्षणस्थाय्यपूर्वरूपव्यापारेण यागरूपव्यापारिणो नान्यथासिद्धिः। लाघव-
मूलकं 'तद्धेतुन्यायतः' इति न्यायं सङ्गमयति—लकारस्येति। भू ल् इति—नच 'ल्' इत्यतोऽपीत्येव वक्तव्ये
पूग्रहणं व्यर्थम्, न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययः' इति भाष्योक्तन्यायानुसारेणोभयोक्तेः।
लिबाद्यादेशैः स्मृतस्य लकारस्य बोधकत्वे प्रत्यक्षश्रुतस्य बोधकत्वं सुतरां सिद्ध्येदिति भावः। नच भू ल् इत्यत्र
लत्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वे सति शास्त्रजन्यबोधीयविधेयताश्रयघटितत्वरूपस्य तद्व्यङ्ग्यजाति-
रूपस्य वा साधुत्वस्याभावेनासाधुत्वज्ञानं बोधप्रतिबन्धकम्, असाधुनाऽपभ्रंशेनापि बोधदर्शनादसाधुत्व-
ज्ञानस्याप्रतिबन्धकत्वात्। स्मृते लकारेऽपि असाधुत्वस्य सत्त्वेन ततोऽपि बोधानापत्तेश्च। बोधापत्तिरिति—
कर्त्रीयबोधापत्तिरित्यर्थः। नचेष्टापत्तिः, अन्यथा लकारस्याबोधकत्वे 'यदर्थाभिधानसमर्थः स तस्यादेशः' इति
न्यायविरोध इति वाच्यम्, प्रक्रियालाघवाय कल्पितबोधकत्वमादाय प्रक्रियानिर्वाहार्थमेव वैयाकरणैः स्वी-
कारेण तात्त्विकबोधकत्वस्य लकारेऽभावेऽपि न्यायविरोधाभावात्। तादृशबोध इति—'भू ल्' इत्यत एककर्तृक-
वर्तमानकालिकभवनानुकूलव्यापारविषयक इत्यर्थः। समभिव्याहार इति—पूर्वापरीभावापन्नपरिनिष्ठितसमुदा-
यघटकयावद्वर्णोच्चारणमित्यर्थः। आवश्यकत्वादिति। परिनिष्ठितसमुदायघटकयावद्वर्णोच्चारणं विना के-
वललकारेण बोधादर्शनेन समभिव्याहारज्ञानस्य कारणताया आवश्यकत्वादित्यर्थः। समभिव्याहारस्यैवेति—
एवकारेण लकारव्यवच्छेदः। तद्धेतुन्यायतः=तस्य=कार्य्यजनकत्वेनाभिमतनिष्ठकारणत्वस्य हेतुत्वेनाभिमतो यः
समभिव्याहारादिस्तेनैव लाघवमूलकन्यायेन समभिव्याहारस्यैव कारणत्वं स्यात्, लकारस्य त्वन्यथासिद्धत्वं
स्यादिति भावः। वाचकत्वशक्तिः=बोधजनकत्वरूपा शक्तिः। पौर्वापर्य्यभावरूपस्य समभिव्याहारस्य वाचक-

दर्पणव्याख्या

गौरवात्तं सङ्गमयति—* लकारस्येति *। * बोधापत्तिरिति * भवनकर्तृबोधापत्तिरित्यर्थः। न केवलेति न्यायात्
केवललकारस्य प्रयोगानर्हत्वात् 'भू' इत्युक्तम्। लकारदशायां शपोऽसम्भवान्न भवतीत्युपात्तम्। तथाच 'भवति इत्यत्रानु-
पहिताल्लकाराद्यथा कर्तृबोधस्तथा प्रत्यक्षश्रुतलकारादपि कर्तृबोधापत्तिरिति भावः।

नचासाधुत्वज्ञानं प्रतिबन्धकम्, शक्तत्वरूपसाधुताया अपि सत्त्वादपभ्रंशादपि बोधोदयेन तदीयज्ञानस्याप्रतिबन्ध-
कत्वाच्चेति भावः। * तादृशेति * आपादितकर्तृबोधे इत्यर्थः। समभिव्याहार इति * पूर्वापरीभावापन्नवर्णसमुदाय
इत्यर्थः, आवश्यकत्वात्तं विना लकारेणापि बोधाजननेनोक्तसमभिव्याहारस्यापेक्षत्वादित्यर्थः। * वाचकत्वशक्तिरिति *

अन्यथा लकारस्य वाचकत्वम्, समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात्। तथाच तादृशसमभिव्याहृता वर्णा वेत्यत्र विनिगमनाविरहात् प्रयोगान्तर्गता वर्णा वाचका इति सिद्ध्यतीति भावः।

प्रभा

त्वसाधनं वक्ष्यमाणवर्णस्फोटोपयोगीति नादौ प्रतिज्ञा तेन स्फोटस्य वाचकत्वेन विरुद्ध्यत इति भावः। एतेन साध्वन्तर्गतवर्णानां वाचकत्वसाधनमप्राप्तकालिकमित्यपास्तम्, तादृशवाचकत्वसाधनस्य वर्णस्फोटोपयोगित्वात्। तिबाद्यादेशानां वाचकत्वमनभ्युपगच्छतां स्थानिनां वाचकत्वञ्च वदतां मते गौरवं द्रढयति—अन्यथेति—तिबाद्यादेशसमभिव्याहारस्य वाचकत्वानङ्गीकार इत्यर्थः। ननूक्तरीत्या वर्णानां पूर्वापरीभावविशिष्टवर्णसमुदायरूपसमभिव्याहारस्य वाचकत्वं सिद्धम्, नतु साधुप्रयोगान्तर्गतवर्णानामत आह—तथाचेति। तादृशसमभिव्याहारे इति—अव्यवहितोत्तरत्वसम्बन्धेन धातुविशिष्टो यो विकरणस्तद्विशिष्टो यस्तिस्तद्रूपः=भवति शब्दरूप इत्यर्थः। पौर्वापर्य्यविशिष्टवर्णसमुदाय इति यावत्। समभिव्याहृता इति पूर्वापरीभावापन्नपरिनिष्ठितप्रयोगघटका इत्यर्थः। विनिगमनेति—द्वयोः पक्षयोर्मध्ये एकस्यैव पक्षस्य साधिका युक्तिर्विनिगमनेत्यर्थः। वस्तुतस्तु वर्णा एव वाचकाः, प्रत्येकावृत्तिनो धर्मस्य समुदायावृत्तित्वनियमाद् वर्णानामवाचकत्वे समुदायस्य वाचकत्वासम्भवात्तद्धेतुन्यायतस्तेषामेव वाचकत्वौचित्यात्। नच प्रत्येकावृत्तिनोऽपि द्वित्वधर्मस्य समुदायवृत्तित्वदर्शनाद्वाचकत्वस्य प्रत्येकवर्णावृत्तित्वेऽपि समुदायस्य वाचकत्वे बाधकाभाव इति वाच्यम्, द्वित्वस्यापि समवायेन प्रत्येकवृत्तित्वात्। केचित्तु आदेशेन स्थानी स्मार्य्यते स्मृतश्च स्थानी वाचक इति मते ये आदेशानां वाचकत्वपक्षे वाचकत्वावच्छेदेनाभिमतास्तिबादयस्ते एव तन्मते स्मारकतावच्छेदका वाच्या इति तद्धेतुन्यायेन ते तिप्त्वादयो वाचकतावच्छेदका एव सन्तु। नचादेशानां येन केनापि रूपेण स्मारकत्वमस्त्विति न तद्धेतुन्यायावसर इति वाच्यम्, अतिप्रसङ्गात्, यत्किञ्चिद्रूपेण स्मारकत्वे यथेच्छरूपाणां स्मारकतावच्छेदकत्वे गौरवात्। किञ्च एकत्वादिबोधकत्वं शास्त्रेणापि एकवचनादिष्वेव बोध्यते, 'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति पाणिन्युक्तेश्च। एतेन स्थानिनो लकारादय एव वाचका इति मतं निरस्तम्। नचादेशानां वाचकत्वे तेषां बहुत्वाद्गौरवम्, स्थानिनां यथेच्छकल्पना-

दर्पणव्याख्या

अर्थबोधकत्वरूपा शक्तिरित्यर्थः। नचाप्राप्तकालता, वर्णस्फोटोपयोगित्वात् तस्या इति भावः। वाचकत्वानभ्युपगमे आदेशिशक्तिवादिमते गौरवं प्रदर्शयति—* अन्यथेति * उक्तसमभिव्याहारस्य वाचकतानभ्युपगमे इत्यर्थः। * गौरवमिति * यद्यप्यादेशवाचकतावादिमते 'भू ति' इत्यतो विद्यमानभवनकर्तृबोधवारणाय तादृशबोधे 'भवति' इति समभिव्याहारस्य हेतुताया अवश्यकल्प्यत्वाद्, गौरवसाम्यमेव, तथाप्यादेशिस्मृत्यकल्पनप्रयुक्तलाघवमक्षुण्णमेवेति भावः। नन्वेतावता समभिव्याहारस्य वाचकत्वमायातम्, न प्रयोगान्तर्गतधातुप्रत्ययघटकानां वर्णानामत आह—* तथाचेति * विनिगमनाविरहादिति * नच वर्णानां बाहुल्यमेव विनिगमकम्, उक्तानुपूर्व्यास्तदनुगमकत्वादिति भावः। वस्तुतस्तु समभिव्याहारस्य वाचकत्वे तत्घटकनानावर्णानामवच्छेदकतायां गौरवम्, वर्णानां वाचकत्वे तूक्तानुपूर्व्या एकस्या एव तत्त्वमिति लाघवस्यैव विनिगमकत्वमिति बोध्यम्। ननु प्रयोगान्तर्गतवर्णस्मारितवर्णत्वावच्छेदेन वाचकत्वसिद्धौ प्रकृतायां वाचकत्वाभावसाधनाय 'भू ल्' इत्यतो भवनक्रियाकर्तृबोधापादनमनुचितम्, तादृशलकारस्य प्रयोगान्तर्गतवर्णास्मारितत्वात्। तथाच नोक्तयुक्तिः समभिव्याहारस्य वाचकत्वसाधिका। नाप्यत्र तद्धेतुन्यायावकाशः, समभिव्याहारस्य लवाचकताग्रहोपयोगितया शाब्दबोधे हेतुत्वेऽपि तद्वाचकतायां मानाभावेन तेन तदन्यथासिद्ध्यसम्भवात्। लकारस्य वाचकत्वे त्वनुशासनस्यैव मानत्वादित्यप-

अपिच लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याह—किञ्चेति—आदेशानां वाचकत्वे च तिङ्त्वेन भावनायाम्, शानचादिना कर्त्तरि शक्तिरित्युपपद्यते विभाग इति भावः। नच शानजादौ कृतिर्लकारार्थः, आश्रयः शानजर्थ इत्यस्तु, "कर्त्तरि कृत्" इत्यनुशासनादिति शङ्क्यम्, स्थान्यर्थेन

प्रभा

विषयत्वेनादेशानाञ्च नियतत्वेन स्थानिनां ततोऽपि बोधसम्भवात्। अत्र वर्णपदेनादेशानामेव ग्रहणम्। ननु कत्वगत्वाद्यवच्छिन्नानां समुदायघटकानां तेषामानर्थक्यात्। नचैवमवयवावृत्तिनो धर्मस्य समुदायावृत्तित्वमिति न्यायविरोधः, तादृशनियमाभावात्। अत एव भाष्येऽर्थवन्तो वर्णाः' इति प्रतिज्ञाय 'अनर्थका वर्णाः' इत्यप्ययुक्तम्। पुनः 'उभयमिदं वर्णोपूक्तम् अर्थवन्तोऽनर्थका इति च। किमत्र न्याय्यम्, उभयमित्याह। कुतः स्वभावतः। तद्यथा समानमीहमानानाञ्चाधीयानानां केचिदर्थैर्युज्यन्ते, अपरे न। नचेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भि. शक्यं भवितुम्, कश्चिदनर्थक इति कृत्वा सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुम्। यद्धातुप्रत्ययप्रातिपदिकनिपाता एकवर्णा अर्थवन्तोऽतोऽन्येऽनर्थका इति। स्वाभाविकमेतत्। इत्थम् अर्थवत्समुदायघटकवर्णानामनर्थकत्वं सिद्धान्तितम्। तस्मात् 'प्रयोगान्तर्गता वर्णा वाचकाः' इति मूले वर्णपदेनादेशा एव ग्राह्याः। अन्यथा उक्तभाष्यविरोधापत्तिः, स्थानिनां वाचकत्वमादेशानां वेत्यस्यैव प्रकृतत्वाच्च। ननु परिनिष्ठितप्रयोगान्तर्गतादेशस्मारितस्थानित्वावच्छेदेन स्थानिनां वाचकत्वस्यैवास्मन्मते प्रकृतत्वेन 'भू ल्' इत्यतो बोधापादनमसङ्गतम्, स्थानिनो लकारस्यात्रादेशस्मारितत्वाभावात्। तथाच नोक्ता युक्तिरादेशानां वाचकत्वसाधिका। किञ्च स्थानिनो वाचकत्वसाधकम् 'लः कर्मणि' इत्यनुशासनमुपलभ्यते, आदेशानां वाचकत्वसाधकञ्च न किञ्चिच्छास्त्रम्। किञ्च पूर्वापरीभावापन्नवर्णसमुदायतिबाद्यादेशरूपसमभिव्याहारस्य लकाररूपस्थानिगतशक्तिज्ञानोपयोगितया शाब्दबोधे हेतुत्वेऽपि आदेशानां शक्तिमत्त्वे मानाभावः, नापि तद्धेतुन्यायावसर इत्यत आह—अपि चेति। कृत्तिङोरिति—नैयायिकनये तिङः कृत्यर्थकत्वेनात्र भावनापदं कृत्यर्थकम्। लादेशशतृशानजादिस्मारितस्य लस्य कृत्याश्रयरूपकर्तृबोधकत्वम्, तिङ्स्मारितस्य कृतिबोधकत्वमिति त्वदभिमता व्यवस्था न सिद्ध्येत्, त्वन्मतेऽनुशासनेन कृतावेव लकारस्य शक्तेर्बोधनात्। आदेशानां वाचकत्ववादिमते तु आदेशानां भिन्नतया तिङः कृतौ शक्तिः, कृतश्च कर्तरीति व्यवस्था स्वरसः सङ्गच्छते इति भावः। प्राचीननैयायिकमते एव स्थानिनां वाचकत्वम्, नव्यानान्तु नेयमापत्तिः, तैरपि वैयाकरणाभिमतादेशवाचकत्वस्यैव स्वीकारात्। लकारार्थ इति—शानजादिना स्मारितलकारेण 'लः कर्मणि' इति शास्त्रबोधितार्थस्य कृतेरेवोपस्थितिः, शानचा तु 'कर्तरि कृत्' इत्यनुशासनेन कृत्याश्रयरूपकर्तरि विधानेऽपि कृतेर्लकारेणैव लभ्यतया 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायेनाश्रयमात्रमर्थः। कृतेर्गुणतया समवाय-

दर्पणव्याख्या

रितोषान्मूलमवतारयति—* अपिचेति *। * न स्यादिति * स्थानिनो लकारस्योभयत्रैक्यादिति भावः। नव्यनैयायिकनये तु नेयमापत्तिः, तैः प्रयोगान्तर्गततिबादीनामेव वाचकताया अभ्युपगमात्। धातुप्रत्ययलोपस्थले तत्तदर्थबोधोपपादनन्तूभयोः समप्रयत्नकमित्यवधेयम्। * इत्यस्त्विति * तथाच तदुभयशक्त्यैव कर्तृलाभः। कृत्याश्रयस्यैव कर्तृत्वादिति

SGDF

निराकाङ्क्षतया शानजादौ कर्तरीत्यस्याप्रवृत्तेः। अन्यथा घञादावपि प्रवर्त्तेत ॥ ६२ ॥

'देवदत्तः पचमानः' इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याह-

प्रभा

सम्बन्धेनाश्रयेऽन्वये कृत्याश्रयः कर्ता लभ्येतेति भावः। निराकाङ्क्षतयेति—'यदर्थाभिधानसमर्थः स तस्यादेशः' इत्यभियुक्तोक्त्या 'स्थानेऽन्तरतमः' इति परिभाषया च कर्त्रर्थकलकारस्थाने कर्त्रर्थकः शानजादेशः, कर्मार्थकलकारस्थाने कर्मार्थक इत्येवमादेशवाच्यार्थविषयकाऽऽकाङ्क्षाया निवृत्त्या 'कर्तरि कृत्' इत्यस्यानुपस्थितिरिति भावः। अन्यथा=अर्थाकाङ्क्षाभावेऽपि शास्त्रप्रवृत्तौ। प्रवर्तेतेति-'भावे' इत्यधिकारेण घञोऽर्थाऽकाङ्क्षाया निवृत्तावपि 'कर्तरि कृत्' इति सूत्रं प्रवर्तेतेत्यर्थः। ननु नैयायिकस्य मते शानजादेः कर्तृवाचकत्वे मानान्तरमप्यस्तीत्याह—देवदत्त इति—देवदत्तादिनामार्थस्य शानजाद्यन्तार्थेन सममभेदान्वयस्य सर्वानुभवरूपव्यवहारदर्शनात् लकारस्य कृतिवाचकत्वेऽपि शानजादीनां कर्तृवाचकत्वं स्यादिति भावः। नच शतृशानचोः कर्त्रर्थकत्वे 'कर्तरि कृत्' इत्यनेन तृजादिवत् स्वातन्त्र्येण कर्तरि विधानेनैव सिद्धे लटः स्थाने आदेशत्वविधानं व्यर्थम्, लटो वर्तमानकालार्थकतया शतृशानचोरपि तदर्थकत्वलाभार्थमादेशत्वकल्पनात्। नचैवं 'वर्तमाने लट्' इत्यतो 'वर्तमाने' इत्यनुवर्त्य स्वातन्त्र्येण कर्तरि विधानेऽपि तदर्थलाभः स्यादिति वाच्यम्, लटः कर्मार्थकत्वे शानचोऽपि कर्मार्थकत्वोपपत्तये आदेशस्यावश्यकत्वात् स्वातन्त्र्ये तु कर्मणि शानचो विधायकाभावात्कर्मार्थकत्वासिद्धेः। किञ्च लटः स्थाने आदेशविधाने लडादेशात्प्रागेव लटः कृत्प्रत्ययत्वात्प्रातिपदिकत्वे सुपि च सति 'सिद्धन्तु प्रत्ययोत्तरपदयोश्चेति वचनात्'। सिद्धमेतत्, कथम्? प्रत्ययोत्तरपदयोश्च शतृशानचौ भवत इति वक्तव्यम्, इति भाष्यात्प्रत्यये तद्धिते समासे च कृते तयोः परतः शतृशानचौ भवत। तथाच कुर्वतः पचतो वा, कुर्वाणस्य पचमानस्य वाऽपत्यम् 'कौर्वतः' 'पाचतः' इति, 'कौर्वाणिः' 'पाचमानिः' 'कुर्वतो भक्तिः कुर्वद्भक्तिः, कुर्वाणभक्तिः' इत्यादि सिद्ध्यति। स्वातन्त्र्येण तद्विधाने शतृशानचः पूर्वं तद्धितप्रत्ययस्य, समासस्य चासम्भवात्पूर्वोक्तप्रयोगासिद्धिः। अयम्भावः—'कुर्वतः पचतो वा देवदत्तस्य अपत्यं भक्तिर्वा' इत्यर्थे तद्धितसमासौ न प्राप्नुतः, शत्राद्यन्तस्याप्रथमान्तत्वेन देवदत्तादिना सामानाधिकरण्यादपत्यभक्त्योर्योगाभावेनासामर्थ्यात्। यदि तु भक्त्यपत्ययोरेव सम्बन्धस्तदाऽपि सामानाधिकरण्याभावात् तौ न स्याताम्। प्रथमाया अन्याऽप्रथमा=द्वितीयादिविभक्तिस्तदन्तेन समानार्थके लटि शतृशानचोर्विधानात्। उक्तवार्तिकबलात्तु प्रत्यये उत्तरपदे च परतो विधानसामर्थ्याद् वैयधिकरण्येऽपि, सामर्थ्याभावेऽपि च प्रवर्तते। तदुक्तं भाष्ये—नवा एष दोषः, किं कारणम्, लकारस्य प्रातिपदिकत्वम्, लकारः कृत्, कृत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा। प्रातिपदिकसंज्ञाश्रया स्वाद्युत्पत्तिर्भविष्यति। 'तस्मादुत्तरपदसिद्धिः' इति। यद्यप्यत्र पक्षे 'कौर्वाणिः' इत्यादि न सिद्ध्येत्, लडन्तस्यादन्तत्वाभावेन 'अत इञ्' इत्यस्याप्राप्तेः। तत्सिद्ध्यर्थञ्च व्यवस्थितविभाषाया

दर्पणव्याख्या

भावः। * अन्यथेति * अनाकाङ्क्षेऽपि शास्त्रप्रवृत्तावित्यर्थः। शक्तावच्छेदकभेदस्य तत्रापि सत्त्वादिति भावः ॥ ६२ ॥

* सामानाधिकरण्यानुरोधादिति * शानचः कृतिवाचकत्वे सर्वानुभवसिद्धाभेदान्वयबोधानुपपत्तेरित्यर्थः। लडादेशत्वबोधनफलं धात्वर्थे वर्तमानत्वप्रतीतिरेवेति बोध्यम्। * पचतिकल्पमिति * इदञ्च स्वाद्यन्तं नामेति मतमनुसृत्य। 'सत्त्वप्रधानानि नामानि' इति निरुक्तात् द्रव्यविशेष्यकबोधजनकत्वं नामत्वम्। तदेव च नामार्थयोरिति व्युत्पत्तिघटकम्। अत एव निपातार्थस्य भेदान्वय इति मतेनेदं दूषणमिति तु परे। लक्षणेत्यस्य लस्येति शेषः।

SGDF Digital Foundation

तरबाद्यन्ततिङ्त्वस्ति नामता कृत्स्विव स्फुटा ॥ ६३ ॥
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्य्यताम् ।

'पचतितरां मैत्रः' 'पचतिकल्पं मैत्रः' इत्यादिषु नामार्थत्वाभेदान्वययोः सम्भव एवेति कर्तृवाचकता स्यादिति भावः । नच पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात् कर्त्तरि लक्षणा, 'पचमानः' इत्यत्राप्यापत्तेरिति ।

प्रभा

आश्रयणं कृतम् । तदाश्रयणाच्च यथेष्टं प्रयोगसिद्धिः, तथापि यत्र गत्यन्तराभावस्तत्रैव तदाश्रयणस्यौचित्यादुपायस्योपायान्तरादूषकत्वाच्च तत्पक्षे शतृशानजादेर्लडाद्यादेशत्वमावश्यकम् । नन्वेवमपि कथं लटो द्वितीयाद्यन्तेन सामानाधिकरण्यम्, यतो लकारः क्रियाम्प्रति गुणीभूते कर्तृकर्मणी प्रतिपादयति । द्वितीयाद्यन्तादयश्च क्रियान्तरयोगात्कर्मादिवाचकाः । नहि भवति 'पचत्योदनं देवदत्तं पश्य' 'पच्यते ओदनेन तृप्तः', इति, इति चेत्सत्यम्, तिङ्भाविनो लकारस्यायं स्वभावो यत्क्रियां प्रति गुणभूते कर्तृकर्मणी प्रतिपादयति । शत्रादिभाविनो लकारस्य चायं स्वभावो यत्क्रियोपसर्जनकं कर्तृकर्माद्यभिदधातीति । एवञ्च क्रियान्तरयोगयोग्यतायाः सत्त्वात् द्वितीयाद्यन्तसामानाधिकरण्यमुपपद्यते । यद्यपि अधिकरणम्=अभिधेयम्-अर्थ, इति यावत्, समानमधिकरणं यस्य तत्समानाधिकरणं समानार्थकमित्यर्थः । अप्रथमान्तेन समानाधिकरणम् अप्रथमासमानाधिकरणम् । 'सुप्सुपा' इति समासः । 'यस्य च भावेन भावलक्षणम्' इति षष्ठ्यर्थे सप्तमी, द्वितीयाद्यन्तेन समानार्थकस्य लटः शतृशानजावादेशौ । तथाच लटः क्वापि प्रयोगाभावादप्रथमान्तेन सामानाधिकरण्यं दुर्लभम्, तथापि तदादेशयोः शतृशानचोः सामानाधिकरण्यं सूत्रारम्भसामर्थ्यात्काल्पनिके लकारे आरोप्य अप्रथमान्तेन सामानाधिकरण्यमुपपादनीयम् । 'वर्तमाने लट्' इत्यतो लडित्यनुवर्त्य षष्ठ्यन्तेन विपरिणम्य विधानेनादेशत्वे लब्धे 'पुनर्लड्ग्रहणं प्रथमासामाधिकरण्ये 'सन् ब्राह्मणः' इत्यादौ, 'कौर्वतः' कुर्वद्भक्तिः' इत्यादौ अप्रथमासामानाधिकरण्याभावेऽपि शतृशानज्विधानार्थम्, भाष्यकृता तु व्यवस्थितविभाषया एतत्सर्वं साधितमित्यलं प्रसक्तान्तरेण । सामानाधिकरण्यदर्शनेनार्थनिर्णये 'पचतितराम्' पचतिकल्पम् 'पठतिकल्पम् देवदत्तः' इत्यादौ सामानाधिकरण्यानुरोधात्तिङोऽपि कर्त्राद्यर्थकत्वमस्त्वित्याह—तरबाद्यन्तेति—'पचतितरां मैत्रः' इत्यत्र अतिशयिता या विक्लित्तिस्तदनुकूलभावनया, 'पचतिकल्पं मैत्रः' इत्यत्र ईषदसमाप्ता या विक्लितिस्तदनुकूलभावनया समं मैत्रस्याभेदान्वयासम्भवात्तदर्थं तिङामपि कर्ता वाच्यः स्यान्नैयायिकानाम् । तच्च तेषामनिष्टम्, 'कृतिराख्यातार्थः' इत्यस्यैव तैः स्वीकृतत्वादिति भावः । इदञ्च दूषणम् 'सुबन्तन्नाम' इति मताभिप्रायेण । यदि तु 'नामाख्यातोपसर्गनिपाताः' इति भाष्योक्तवाक्ये उपसर्गनिपातयोरपि प्रातिपदिकत्वेन सुबन्तत्वेनैव वा ग्रहणे सिद्धे पृथगुपादानसामर्थ्यात्, सत्त्वप्रधानानि' इति निरुक्ताच्च द्रव्यविशेष्यकबोधजनकस्यैव 'नामार्थयोरभेदान्वयः' इति व्युत्पत्तौ गृह्येत तदा नेयमापत्तिः, तिङन्तप्रकृतिकतद्धितानां साध्यक्रियाविशेष्यकबोधजनकत्वात् । लक्षणेति—कृत्यर्थकस्य लस्य लक्षणेत्यर्थः । स्थानिनां वाचकत्वनये शानचः शक्त्यभावेन शक्यसम्बन्धरूपलक्षणायास्तत्रासम्भवादिति भावः । नच 'नामार्थयोरभे-

दर्पणव्याख्या

* आपत्तेरिति * नच सा तवेष्टेति भावः । नन्वादेशानां वाचकत्वे आदेशिशक्तिप्रतिपादक 'लः कर्मणि' इत्यादि-

लः कर्मणीत्यनुशासनञ्च लाघवात् कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् । ॥ ६३ ॥ इति वर्णस्फोटनिरूपणम् ॥

प्रभा

दान्वयः' इति व्युत्पत्तौ नामजन्यप्रतीतिविशेष्ययोरेव ग्रहणम् । इत्थञ्च वैयाकरणनयेऽपि 'पचतितरां मैत्रः' 'पचतिकल्पं मैत्रः' इत्यत्र भावनायां विशेषणीभूतस्य तिङर्थकर्तुर्मैत्रे कथमभेदान्वयः, एकत्र विशेष्यतयाऽन्वितस्यापरत्र विशेषणत्वायोगात् । नच लक्ष्यानुरोधात् तिङन्तप्रकृतिकतद्धितान्ते नामजन्यप्रतीतिविषययोरेवाभेदान्वयः, नतु विशेष्यभूतयोरिति व्युत्पत्तौः संकोचः, अस्मन्मतेऽपि लस्थानिककृत्प्रत्ययस्थलानुरोधेन तथा संकोचसम्भवादिति वाच्यम्, नामपदेन 'नामार्थयोः' इति व्युत्पत्तौ निपातेतरस्य प्रातिपदिकमात्रस्य सुबन्तमात्रस्य ग्रहणात् । द्रव्यमुख्यविशेष्यकबोधजनकस्यैव ग्रहणे तु न मानम् । 'नामाख्यात' इति पदविभाजकभाष्यवाक्येऽपि तथैव । सत्त्वप्रधानस्यैव ग्रहणे स्वरादिगणपठितानां पुनरादीनामसङ्ग्रहापत्तिः । उपसर्गनिपातग्रहणन्तु गोबलीवर्दन्यायेन । नच नामत्वेन सामानाधिकरण्यात्, स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मव्याप्यमिथोविरुद्धयावद्धर्मबोधनरूपविभागानुपपत्तिः, प्रातिपदिकत्वरूपनामत्वेन समसुपसर्गत्वनिपातत्वयोर्विरुद्धत्वाभावादिति वाच्यम्, निपातभेदविशिष्टनामत्वेनैव विभागस्य विवक्षितत्वात् । 'पचतितराम्' 'पचतिकल्पम्' इत्यादितद्धितान्तवृत्तावेकार्थीभावात्मकशक्तिस्वीकारेण कर्त्राद्यर्थविशेष्यकबोधजनकतया न सामानाधिकरण्येनान्वयानुपपत्तिः । 'नामजन्यप्रतीतिविशेष्ययोरेवाभेदान्वयः' इत्यत्र प्रतीतिः शक्तिज्ञानजन्योपस्थितिरूपा ग्राह्या । तथाच 'पचतितराम्' इत्यादावेकार्थीभावाभावेऽपि न दोषः, तिङा कर्तुर्मुख्यविशेष्यतयैवोपस्थितिसत्त्वात् । शाब्दबोधे भावनायां विशेषणमित्यन्यत् । नचादेशानां वाचकत्वे 'लः कर्मणि' इति सूत्रविरोध इत्यत आह—लः कर्मणीति । उक्तमिति—आख्यातार्थनिरूपणे इति शेषः । एवञ्च पदघटकप्रकृतिप्रत्ययादिरूपरुषितः स्फोटो वर्णस्फोट इति तत्त्वम् ।

वादिभिर्दूष्यतान्नीतो वर्णस्फोटश्चिकित्सया ।
व्यशोधि बालकृष्णेन मानभेषजसूरिणा ॥
॥ शुभम्भूयात् ॥

वर्णपदवाक्याखण्डपदाखण्डवाक्यस्फोटरूपाः पञ्चव्यक्तिस्फोटाः, मीमांसकमते लाघवादर्थगतजातेरेव यथा शक्यत्वं तथा शक्तत्वमपि शब्दगतशक्तावच्छेदकजातेरेवेति वर्णजातिस्फोटपदजातिस्फोटवाक्यजातिस्फोटभेदेन त्रयो जातिस्फोटाः पूर्वं परिगणिताः । तत्र यथा पारमार्थिकब्रह्मज्ञानाय आनन्दवल्याम् 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयरूपाः पञ्चकोशा अपारमार्थिकब्रह्मत्वेऽपि उपयोगित्वेन प्रदर्शिताः । तेषु पूर्वपूर्वकोशस्य ब्रह्मज्ञानाय बहिरङ्गत्वम्, उत्तरोत्तरस्यान्तरङ्गत्वम्, तथा पारमार्थिकस्फोटात्मकब्रह्मज्ञानायाष्टौ स्फोटा अपारमार्थिका उपायत्वेन प्रदर्शिता हर्य्यादिभिः । तेष्वपि पूर्वपूर्वस्फोटस्य बहिरङ्गत्वमुत्तरोत्तरस्यान्तरङ्गत्वम् । अत एव वाक्यस्फोटस्य सर्वापेक्षयाऽन्तरङ्गत्वेन 'वाक्यस्फोटोऽतिनिष्कर्षे' इत्यु-

दर्पणव्याख्या

त्राणां वैयर्थ्यमत आह—* लः कर्मणीति * । * उक्तमिति * आख्यातशक्तिनिरूपणावसर इति शेषः । एवञ्च प्रयोगे श्रूयमाणप्रकृतिप्रत्ययघटकवर्णेषु शक्तिर्वर्णस्फोटमिति पर्य्यवसन्नम् ॥ ६३ ॥ इति वर्णस्फोटनिरूपणम् ॥ १३ ॥

SGDF

अथादेशा वाचकाश्चेत् पदस्फोटस्ततः स्फुटः ॥ ६४ ॥

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह—अथेत्यादि। आदेशाः= तिब्विसर्गादयः। अयं भावः—समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति, प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्, प्रत्येकं वर्णानामर्थवत्त्वे प्रातिपदिकत्वाऽपत्तौ "न लोपः प्रातिपदिकान्तस्य" इत्यादिभिः 'धनम्' 'वनम्' इत्यादौ नलोपाद्यापत्तेश्च।

प्रभा

क्तम्। निरुपाधिकं निखिलनामरूपात्मकप्रपञ्चकारणीभूतं शब्दब्रह्म तु स्फोटाष्टकाद्भिन्नमेव। तत्रैतावता ग्रन्थेन सर्वबहिरङ्गभूतो वर्णस्फोटो वर्णितः, अतः परं तदपेक्षयाऽन्तरङ्गभूतं पदस्फोटं निरूपमितुमाह—अथादेशा इति। एवम्—पूर्वोक्तरीत्या। सिद्ध इति— साधुप्रयोगान्तर्गतानां प्रकृतिरूपाणां प्रत्ययरूपाणाञ्च पूर्वापरीभूतवर्णसमुदायरूपाणां वर्णस्फोटानां वाचकत्वे सिद्धे तुल्ययुक्त्या प्रकृतिप्रत्ययसमुदायरूपपदस्फोटस्यापि वाचकत्वस्य सिद्धिरेव, तेषामवाचकत्वे पदस्यापि वाचकत्वं न स्यादिति भावः। एतेनादेशानां वाचकत्वमुपजीव्यम्, पदस्य वाचकत्वमुपजीवकमिति सूचनादुभयोरुपजीव्योपजीवकभावात्मिका हेतुताऽऽख्यसङ्गतिर्ध्वानता। अभावरूपा अपि लुग्लोपादय आदेशाः सन्ति तन्निरासायाह—तिब्बिति। इदमुपलक्षणम् प्रयोगान्तर्गतादेशानाम्। ननु यावद्वर्णानामेव वाचकत्वे कथं प्रकृतिप्रत्ययसमुदायरूपपदस्य प्रकृतिप्रत्ययरूपादेशानाञ्च वाचकत्वसिद्धिरत आह—अयम्भाव इति। पूर्वापरीभावविशिष्टवर्णानां प्रकृतिरूपाणां प्रत्ययरूपाणाञ्च समभिव्याहृतवर्णानां वाचकत्वं नतु प्रत्येकवर्णानान्तत्त्वम्। तथाच आनुपूर्वीविशिष्टवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति, पदस्य प्रकृतिप्रत्ययसमुदायरूपत्वादिति भावः। ननु समुदायस्य वाचकत्वे तस्यावयवानतिरिक्ततया प्रत्येकवर्णानामपि वाचकत्वं स्यादत आह—प्रतिवर्णमिति। अनुभवविरुद्धत्वादिति। घकारादर्थबोधो जायते इति नानुभवः, किन्तु घटशब्दादर्थप्रत्ययो भवति, इत्येवानुभवः। स च प्रतिवर्णमर्थानुभवे विरुद्ध्येतेति भावः। प्रत्येकं वर्णानां वाचकत्वे दोषान्तरमाह—प्रत्येकमिति। अर्थवत्त्वे=अर्थवत्त्वापत्तौ। न लोपेति—आदिना जश्त्वादिसंग्रहः। सुपः श्रवणन्तु नापादितम्, सुब्घटितसमुदायस्यापि प्रातिपदिकत्वेन 'सुपो धातुप्रातिपदिकयोः' इति लुका निवृत्तेः। नच प्रत्येकवर्णात्सुपि समासग्रहणकृतेन 'यत्र संघाते पूर्वो भागः पदन्तस्य चेत्समासस्यैव' इति नियमेन समुदायस्याप्रातिपदिकत्वे लुगभावः,समाससाजात्येन विभिन्नप्रवृत्तिनिमित्तकपदघटितवाक्येष्वेव नियमप्रवृत्त्या पदघटकवर्णानामेकप्रवृत्तिनिमित्ताश्रयपदार्थस्यैव बोधकत्वेन नियमाप्रवृत्तेः। प्रतिवर्णं संख्यार्थकत्वाभावे औत्सर्गिकैकवचनस्यापि प्रमाणसत्त्वे एव प्रवृत्तिस्वीकारे तु सुपोऽनुत्पत्तेर्नेयमापत्तिः। नचाव्य-

दर्पणव्याख्या

पदस्फोटनिरूपणे उपजीव्योपजीवकभावस्यापि सङ्गतित्वं सूचयन् मूलमवतारयति—* एवमिति * उक्तरीत्येत्यर्थः। आदेशानामपि केषाञ्चित् प्रयोगान्तर्गतत्वादाह—* तिब्विसर्गादय इति * प्रयोगान्तर्गतवर्णा इति यावत्। ननु तादृशयावद्वर्णानां वाचकत्वे कथं पदस्फोटसिद्धिरतो भावार्थमाह—* अयमिति * समभिव्याहृतं तूक्तार्थम्। * सिद्ध इति * आनुपूर्वीविशिष्टतावतां वर्णानामवाचकत्वे आनुपूर्वीरूपपदस्य वाचकत्वाशा दुराशेति भावः। ननु समुदायस्य प्रत्येकानतिरिक्तत्वेन वाचकतायाः प्रत्येकवर्णे विश्रामो वाच्यः, तथाच कथं समुदितताद्दशवर्णरूपपदस्य वाचकतेत्यतः प्रत्येकवर्णवाचकतां निरस्यति—* प्रतिवर्णमिति *।* अनुभवविरुद्धत्वादिति * घटशब्दादमुमर्थं प्रत्येमीत्येव प्रतीतेरित्यर्थः। बाधकान्तरमप्याह—* प्रत्येकमिति *। * अर्थवत्त्व इति * तदभ्युपगम इत्यर्थः। नलोपादीत्यादिना जश्त्वादि परिग्रहः।

एतच्च चरमवर्णे एव वाचकत्वशक्तिः,

प्रभा

येभ्य इव संख्याया अभावेऽप्येकवचनोत्पत्तिः, 'अव्ययादाप्सुपः' इति ज्ञापकात्ततः सुप्यपि अत्रोत्पत्तौ मानाभावात्। संख्याभाववदर्थबोधकात्संख्यावाचकत्वाभाववतोऽव्ययाज्ज्ञापकात्सुबुत्पत्तिस्वीकारेऽपि संख्यावदर्थबोधकात्संख्यावाचकत्वाभाववतो वर्णादुत्पत्तौ मानाभावाच्च। नच धातुघटकवर्णानां प्रातिपदिकत्वे सुपः श्रवणं स्यात्। धात्ववयवत्वेन लुक् तु न, सुब्घटितस्य भ्वादित्वाभावेन धातुत्वाभावादिति वाच्यम्, प्रातिपदिकसंज्ञाविधायकेऽधातुपदस्य धात्ववयवभिन्नार्थकत्वेन धात्ववयववर्णानाम्, व्यपदेशिवद्भावेन धातोरपि धात्ववयवत्वात्प्रातिपदिकत्वाप्राप्तेरित्यन्यत्र विस्तरः। एवञ्चोक्तदोषवारणाय प्रकृतीनां प्रत्ययानां तत्समुदितपदानाञ्च वाचकत्वमुपेयमिति भावः। एवञ्च प्रकृतेः, प्रत्ययस्य च बोधजनकत्वे तत्समुदायरूपपदस्य बोधजनकत्वं सुतरां सिद्धिमिति भावः। ननु प्रकृतिप्रत्ययसमुदायात्मकपदस्य वाचकत्वोपपत्तये आदेशानां वाचकत्वस्य हेतुत्वोपन्यसनं व्यर्थम्, पदघटकप्रत्येकवर्णानामर्थवत्त्वस्य गौरवेणैव पराहतत्वेन निरस्तत्वादित्याशङ्कायामाह—एतच्चेति—प्रकृतिप्रत्ययरूपसमभिव्याहारस्य वाचकत्वसमर्थनञ्च। चरमेति—प्रकृतेः, प्रत्ययादेश्च चरमवर्णे एव वाचकत्वम्, नतु वर्णसमुदाये। अयमेव वर्णस्फोट इति यत्केषाञ्चिद्वर्णस्फोटवादिनाम्मतं तद्दूषणायोक्तम्। समुदायस्य वाचकत्वसमर्थनेन चरमवर्णस्य वाचकत्वं दूषितं यथा स्यात्तथोक्तमित्यर्थः। इदञ्च न स्फोटरहस्यविदाम्मतमिति सूचनायैव 'केषाञ्चित्' इत्युक्तम्। तत्त्वविदान्तु प्रकृतिप्रत्ययात्मकसमुदायस्याभिव्यङ्ग्यस्य तद्रूपापन्नस्य स्फोटस्यैव वर्णस्फोटत्वमिति। प्रकृतिप्रत्यययोरेव वाचकत्वम्, नतु तच्चरमवर्णयोः। स्फोटस्य प्रत्येकवर्णाभिव्यङ्ग्यत्वेऽपि चरमवर्णेनाभिव्यक्तौ सत्यामेवार्थोपस्थापकत्वमिति त्वन्यत्। यदि तु 'चरमवर्णे एव वाचकत्वम्' इत्यस्य 'चरमवर्णाभिव्यङ्ग्यस्फोटे' एव वाचकत्वमित्यर्थस्तदा न विवादः। चरमवर्णस्यैव वाचकत्ववादिनः, प्रथमादिवर्णे तु न वाचकत्वम् तदव्यवहितोत्तरं बोधाभावात्, तदुत्तरवर्णानुभवजन्यसहकारीभूतसंस्काराणां तदानीमभावात्। नचोत्तरोत्तरवर्णानुभवजन्यसंस्कारसहकृतप्रथमवर्णानुभवजन्यसंस्कारस्य हेतुत्वमस्तु, उत्तरोत्तरवर्णानुभवजन्यसंस्कारकाले बोधात्पूर्वकाले च प्रथमादिवर्णानुभवजन्यसंस्कारस्य सत्त्वादिति वाच्यम्, विनिगमनाविरहेण तादृशवर्णसमुदाये एव वाचकत्वशक्तिसिद्धेः। शक्तिरिति—चरमवर्णश्रवणमन्तरा बोधाभावेनान्वयव्यतिरेकाभावेन तत्रैव शक्तिः कल्प्यत इति भावः। किञ्च बोधजनकतारूपा शक्तिः स्वरूपसम्बन्धात्मिका, तस्याश्च पर्य्याप्तिसम्बन्धेन वृत्तित्वासम्भवः। अपेक्षाबुद्धिजन्यानां द्वित्वादीनामेव पर्य्याप्तिप्रतियोगित्वात्। समुदायत्वस्य तु अवयवगतापेक्षाबुद्धिजन्यतया पर्याप्तिप्रतियोगित्वमक्षतमेव। ननु वर्णानां समभिव्याहारो न समूहरूपः, क्रमेणोत्पत्तिशीलानामाविर्भावशीलानां वाऽऽशुविनाशितया, तिरोहिततया च तदसम्भवात्। नाप्यव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्त्वमुत्तरोत्तरवर्णे, विनष्टानां तेषां तादृशसम्बन्धासम्भवात्, सतोरेव सम्बन्धस्यानुभवसिद्धत्वात्, द्विष्ठस्यैव सम्बन्धत्वाच्च। नाप्यनेकवर्णसमवेतं किञ्चिदनुगतधर्मान्तरम्, घटत्वे-

दर्पणव्याख्या

तथाच समुदितानामेव तेषां वाचकत्वमभ्युपेयम्। तत्र चोक्तयुक्त्या तत्समुदायस्य वाचकत्वं निराबाधम्। स एव चास्माकं पदशब्दव्यपदेश्य इति भावः। ननु प्रत्येकवर्णानां वाचकत्वस्य गौरवपराहतत्वादेवासम्भवात्समुदायस्यैव तत् सेत्स्यतीत्यादेशा वाचकाश्चेति समभिव्याहृतवर्णानां वाचकताया हेतुत्वोपन्यासो विफलः, उन्मत्तप्रलपितत्वशङ्काया अवसरेणैव निरासादित्यत आह—* एतच्चेति * समभिव्याहृतवर्णानां वाचकत्वोपन्यसनञ्चेत्यर्थः। * चरमवर्ण एवेति * पदान्ते श्रूयमा

शक्तेर्व्यासज्यवृत्तित्वे मानाभावात् । पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतान्तरस्य दूषणायोक्तम् । रामोऽस्तीति वक्तव्ये राम् इत्यनन्तरं घटिकोत्तरमोकारोच्चारणेऽर्थबोधापत्त्या तादृशानुपूर्व्या एव

प्रभा

नानुगतीकृतघटानामिव तादृशधर्मेणानुगतप्रतीतिविषयीकृतवर्णानां वाचकत्वे सिद्धे तस्माच्चरमवर्णे एव शक्तिरित्याह—शक्तेर्व्यासज्येति-समुदायवृत्तित्वेत्यर्थः व्यासज्यवृत्तित्वञ्च-स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकधर्मत्वरूपम् । यथा द्वित्व—त्रित्वादिकम् । तथाहि—'घटपटौ द्वौ' इत्यत्र घट एकः, पटश्चैकः, इत्यपेक्षाबुद्ध्या उत्पन्नं द्वित्वं पर्य्याप्तिसम्बन्धेन घटपटसमुदाये वर्तते, परन्तु तदेव द्वित्वं समवायसम्बन्धेन प्रत्येकं घटे पटे च विद्यते । तथाच समवायसम्बन्धेन द्वित्वाश्रयो घटः, पटो वा, तन्निष्ठो भेदो घटः पर्याप्तिसम्बन्धेन द्वित्ववान्नेत्याकारकः । तदीया प्रतियोगिता द्वित्ववन्निष्ठा, तदवच्छेदको धर्मो द्वित्वमिति तत्र स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकधर्मत्वं सुलभम् । यस्य व्यासज्यवृत्तित्वं चिकीर्षितं तत्स्वम् । मानाभावादिति—अन्तिमवर्णोच्चारणोत्तरमेवार्थविषयकबोधजननात्तत्रैव बोधजनकतारूपा शक्तिरिति भावः । पूर्वपूर्वेति—उच्चरितपदघटकपूर्वपूर्ववर्णेत्यर्थः । अत एव न पूर्वपूर्ववर्णानां नैरर्थक्यम् । सहकारिणः—सहायकाः । तन्मात्रेति चरमवर्णमात्रेत्यर्थः । मतान्तरस्येति=अवयवानामवाचकत्वे तत्समुदायरूपपदस्याप्यवाचकत्वमिति-यन्मतान्तरम्—ग्रन्थकारमताद्भिन्नं केषाञ्चित्स्फोटवादिनां मतं तद्दूषणाय समुदायस्य वाचकत्वमुक्तमित्यर्थः । स्थानिनां वाचकत्वपक्षे दोषनिकरणस्योक्ततया समुदायस्य वाचकत्वव्यवस्थापनं चरमवर्णस्य वाचकत्वं निराकर्तुमेवोपन्यस्तमिति तत्त्वम् । अर्थबोधापत्त्येति—इदञ्च दूषणं चरमवर्णश्रवणसमये पूर्वपूर्ववर्णविषयकसंस्काराणामुद्बोधकसमवधानात्समुद्बोधनेन तावतां वर्णानां स्मरणे सत्येव । वस्तुतस्तु संस्कारोद्बोधकस्य फलानुमेयतया चरमवर्णमात्रश्रवणेन बोधरूपफलाभावात्तादृशस्थले उद्बुद्धसंस्काराभाव एवेति नायं दोषः । आनुपूर्व्या एवेति=एवशब्देन चरमवर्णवादिनां मते वाचकतावच्छेदकत्वेनाभिमतस्य चरमवर्णवृत्तितद्व्यक्तित्वस्य व्यवच्छेदः । नन्वेवमपि घटवृत्त्यानुपूर्व्या घकारोत्तराकारोत्तरटकारोत्तरात्वरूपाया अपि चरमेऽकारे एव सत्त्वेन समुदाये तदभावेन तस्य वाचकत्वासिद्धिरिति चेन्न, अव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णविशिष्टोत्तरोत्तरवर्णसमुदायत्वरूपानुपूर्व्याः समुदाये एव सत्त्वात् । नचाव्यवहितपूर्वत्वसम्बन्धेनोत्तरोत्तरवर्णविशिष्टपूर्वपूर्ववर्णसमुदायत्वरूपाया आनुपूर्व्याः विनिगमनाविरहेण शक्तावच्छेदकत्वे गौरवम्, शाब्दबोधाव्यवहितप्राक्काले पूर्वोक्तानुपूर्व्या एव सत्त्वेन तस्या एव शक्तावच्छेदकत्वस्यौचित्यात् । चरमवर्णनिष्ठा या घटत्वरूपाऽऽनुपूर्वी तत्प्रतियोगिका या विषयिता तादृशविषयिताव्यापिका या घटशब्दघटक-

दर्पणव्याख्या

णवर्णे एवेत्यर्थः । एवकारेण पदघटकतत्प्राक्तनवर्णव्युदासः । तत्र हेतुमाह—* शक्तेरिति * स्वरूपसम्बन्धात्मिकायां-बोधकारणतायां पर्य्याप्तत्वासम्भवाच्चरमवर्णादेव बोधोदयेनान्यत्र तत्सत्त्वे मानाभावादिति वार्थः ।

ननु तस्यैव वाचकत्वे तन्मात्रश्रवणादर्थबोधापत्तिरत आह—* पूर्वपूर्ववर्णेति * तत्पदघटकपूर्वपूर्ववर्णेत्यर्थः । * मतान्तरेति * समभिव्याहृतवर्णानामवाचकत्वे तत्समुदायरूपपदस्य सुतरामवाचकत्वमिति यन्मतान्तरं तत्खण्डनायेत्यर्थः। उक्तमित्यस्य मूल इति शेषः । वस्तुतस्तु नेयमापत्तिः । उद्बोधकतत्कल्पे दूषणान्तरमप्याह—* रामोऽस्तीत्यादि * । * अर्थबोधापत्त्येति * उद्बोधकसमवधानस्य फलानुमेयत्वेन तादृशस्थले फलाभावेनोद्बुद्धसंस्काराभावादिति बोध्यम् ।

शक्तताऽवच्छेदककत्वौचित्यादिति दिक् ॥ ६४ ॥

प्रभा

वर्णविषयकज्ञाननिष्ठा विषयिता तत्प्रतियोगित्वरूपानुपूर्वीघटकत्वस्य समुदायनिष्ठवाचकतावच्छेदकत्व स्वीकारात्, तादृशघटकत्वसम्बन्धेन आनुपूर्व्या वा शक्ततावच्छेदकत्वेनादोषाच्च। विषयिता च ज्ञाननिष्ठो धर्मविशेषः। तथाच यत्र यत्र घटत्वरूपानुपूर्वीज्ञाननिष्ठा विषयिता, तत्र तत्र घत्वादिरूपेण घकारादिवर्ण-विषयिता। तत्र स्वसमानाधिकरणात्यन्ताभावीयप्रतियोगितानवच्छेदकधर्मवत्त्वरूपं व्यापकत्वं घकारा-दिज्ञाननिष्ठविषयितायां वर्तते, घटत्वानुपूर्वीज्ञाने घकारादिविषयिता नास्तीत्यस्य वक्तुमशक्यत्वात्। तादृ-शविषयितासम्बन्धेन घकारादिविशिष्टं घकारादिज्ञानमिति विषयितासम्बन्धप्रतियोगित्वरूपमानुपूर्वी-घटकत्वं घकारादिषु सुलभमिति तेन सम्बन्धेनानुपूर्व्याः सकलवर्णेषु सत्त्वात् समुदायनिष्ठवाचकतावच्छे-दकताऽपि तत्र सुलभेत्यलं पल्लवितेन। दिगिति--दिगर्थस्तु समुदायस्य वाचकत्वाभावेऽर्थवत्त्वाभावात्प्राति-पदिकत्वानापत्तिः, यदि तु पूर्वपूर्ववर्णानां सहकारितामात्रेण समुदायस्यापर्यवत्त्वात्प्रातिपदिकत्वमित्युच्यते तदा चरमवर्णमात्रस्यापि प्रातिपदिकत्वापत्तिर्दुर्वारा। वस्तुतस्तु चरमवर्णे एव शक्तिरिति मते समुदायस्य स्व-पर्यापवृत्त्याऽर्थविषयकबोधजनकत्वाभावात्प्रातिपदिकत्वं दुर्वचम्। किञ्च चरमवर्णस्यैव वाचकत्वे समुदायस्य प्रातिपदिकत्वेन विभक्त्युत्पत्तौ 'घटं पश्य' इत्यादौ विभक्त्यर्थकर्मत्वान्वयानुपपत्तिः, घटरूपार्थस्य प्रकृत्यर्थ-त्वाभावेन 'प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्' इति व्युत्पत्तिविरोधात्। किञ्च चरमवर्णस्यैव प्राति-पदिकत्वात्तत एव सुपि चरमवर्णरूपतदादिसुबन्तस्यैव पदतया 'अस्ति घटः' इत्यादौ समुदायस्यापदत्वाच्चर-मस्य व्यवहितत्वाच्च 'तिङतिङः' इति निघातानुपपत्तिः। किञ्च चरमस्यैव वाचकत्वे यौगिकं रूढं योगरूढं यौगिकरूढञ्चेति पदविभागानुपपत्तिः। तथाहि—रूढम्—गौः, यौगिकम् पाचकः, योगरूढम्—पङ्कजम्। यौगिकरूढम्—'अश्वकर्णः' इति। तच्च चरमवर्णस्यैव वाचकत्वेऽसम्भवि। ननु यत् स्वघटकप्रकृत्यादिचर-मवर्णशक्त्यैवार्थोपस्थापकं तद्यौगिकम्। यत् स्वघटकचरमवर्णशक्त्यैवार्थोपस्थापकं तद्रूढम्। यत् स्वप्रकृत्या-दिचरमवर्णशक्त्या, स्वीयचरमवर्णशक्त्या चार्थोपस्थापकं तद्योगरूढम्। यत् स्वप्रकृत्यादिचरमवर्ण-शक्त्याऽर्थान्तरोपस्थापकत्वे सति स्वीयचरमवर्णमात्रशक्त्यैवार्थान्तरोपस्थापकं तद्यौगिकरूढम्, इति चेन्न, पाचकादिपदे यौगिकलक्षणासम्भवापत्तेः, स्वीयचरमवर्णशक्त्याप्यर्थोपस्थापकत्वात्। तथाचो-क्तदोषकदम्बनिरासाय समुदायशक्तिरुपेया। किञ्च घटपटादिस्थले घकारादिवर्णसमुदायः पदं न वर्ण इति प्रतीतेः पूर्वापरीभूतावयवात्मकसमुदायरूपं पदमावश्यकम्। अत एव 'पदे वर्णः' इति सर्वज-नीनव्यवहारस्य नासङ्गतिः। नच वर्णानामाशुविनाशितया पौर्वापर्यासम्भवः, वैयाकरणनये वर्णानां नित्यत्वस्य सिद्धान्तितत्वात्। पौर्वापर्यञ्चात्र पक्षे उत्पत्तिकालानवच्छिन्नस्वज्ञानाधिकरणकालोत्पत्तिकज्ञा-नविषयत्वरूपम् तथाहि—घटशब्दे घस्याविर्भावानन्तरं घविषयकज्ञानमुत्पद्यते। तज्ज्ञानं द्वितीयक्षणे

दर्पणव्याख्या

ननु समभिव्याहारो न समूहः, वर्णानां क्रमिकाणामाशुविनाशिनाञ्च तदसम्भवादत एवाव्यवहितोत्तरत्वसम्बन्धेन न पूर्वपूर्ववर्णवत्त्वम्, तस्यैवाभावात्। नापि वर्णसमवेतं पदार्थान्तरम्, मानाभावात्, अन्यथा तादृशधर्मानुगतीकृतवर्णानां वाचकत्वेनैवोपपत्तौ पदस्फोटस्य निरालम्बनताऽऽपत्तेः, पदप्रयुक्तकार्य्याणां वर्णेष्वेव दर्शनाच्चेति कथं पदस्फोटसिद्धिरित्यत आह—*दिगिति*। तदर्थस्तु वर्णसमुदायः पदम्, न वर्ण इति प्रतीतेर्वर्णातिरिक्तपूर्वापरीभूततत्समुदायात्मकपदस्वीकार आवश्यकः। अत एव 'पदे वर्णः इति व्यवहारोऽपि स्वरसतः सङ्गच्छते। नित्याश्च वर्णास्तेषु पौर्वापर्य्यञ्च—पूर्वपूर्ववर्णानुस-

'सुप्तिङन्तं पदम्' इति पारिभाषिकपदस्य वाचकत्वस्वीकर्तॄणां मतमाह—

घटेनेत्यादिषु नहि प्रकृत्यादिभिदा स्थिता ।
वस्नसादाविवेहापि सम्प्रमोहो हि दृश्यते ॥ ६५ ॥

घटेनेत्यादौ 'घटे' इति प्रकृतिः, 'न' इति प्रत्ययः, 'घट्' इति प्रकृतिः, 'एन' इति प्रत्यय इति विभागस्य, 'सर्वे सर्वपदादेशाः' इति स्वीकारे विशिष्य

प्रभा

तिष्ठति, तृतीयक्षणे नश्यति । अकारश्च घज्ञानस्योत्पत्तिकालेनानवच्छिन्ना घज्ञानाधिकरणकालिकी या उत्पत्तिस्तादृशोत्पत्तिकज्ञानविषय इत्येवमुक्तपौर्वापर्यं वर्णस्य वर्णान्तरे सुलभम् । तथाच वर्णसमुदायो वाचक इति तद्व्यङ्ग्यः पदस्फोटः सिद्ध्यति । विभजनीयप्रकृतिप्रत्ययात्मकसमुदायरूपः पदस्फोटो एतावतोक्तः । सम्प्रति 'अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तसुप्तिङन्तरूपपदस्य वाचकत्वपक्षमाह—सुप्तिङन्तमिति । पारिभाषिकमिति—इदं पदमेतदर्थविषयकबोधजनकं भवतु' इतिपदविशेष्यिका, अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्यर्थविशेष्यिका वा शरीरिणामिच्छा परिभाषा,तद्विषयीभूतं पदं पारिभाषिकम् । 'सुप्तिङन्तं पदम्' इति सूत्रप्रणयनात् 'पदपदं सुप्तिङन्ततदादिविषयकबोधजनकं भवतु' इति पाणिनेरिच्छाऽनुमीयते । तादृशेच्छाविषयतया सुप्तिङन्तपदस्य पारिभाषिकत्वमिति भावः । वाचकत्वेति—पूर्वोक्तप्रकारेण यादृशसमुदायस्यावयवानां प्रकृतिप्रत्ययादिरूपाणां वाचकत्वं तादृशसमुदायस्यैव वाचकत्वं स्यादित्याशङ्कानिरासायाखण्डपदस्फोटस्य वाचकत्वस्वीकर्तॄणां मतमित्यर्थः । सर्वपदादेशा इति—'युस्मदस्मद्भ्यां ङसोऽश्' (पा० ७।१।२७) इति सूत्रभाष्ये 'किमर्थः शकारः ? सर्वादेशार्थः, नैतदस्ति प्रयोजनम् , अक्रियमाणेऽपि शकारेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्याकारादेशे त्रयाणामकाराणामतो गुणे पररूपत्वे सिद्धं रूपं स्यात् । यद्येतत् 'सकारस्याकारः' लभ्येत कृतं (सिद्धम्) स्यात् । तत्तु (सकारस्याकाररूपन्तु) न लभ्यम् । किं कारणम् ? अत्र हि 'आदेः परस्य' इत्यकारस्य (ङसोऽकारस्य) प्रसज्येत । अत उत्तरं पठति अकारस्या (आद्याकारस्य) कार वचने (अकारस्याकारादेशे) प्रयोजनं नास्तीति कृत्वाऽन्तरेणापि शकारं (अकारस्य स्वत एव सत्त्वेन तदादेशविधानवैयर्थ्येन सामर्थ्यात्सर्वादेश एव स्यात्) सर्वादेशो भविष्यति । अकारस्याप्याकारादेशफलमाशङ्क्य खण्डयति—'अर्थवत्तु आदेशे लोपार्थम्' । 'अनादेशे आत्वादिना बाधाद् आदेशे 'शेषे लोपः' इति लोपार्थम् अकारस्याकारादेशः, इति' । ननु 'अनादेशे' इत्यस्य आदेशभिन्ना या विभक्तिस्तत्रात्वादि इत्यकारस्याकारादेशेऽपि ङसिविभक्तेरादेशभिन्नत्वेनात्वादिना बाधात् शेषे लोप इति न स्यादित्यादेशविधानं व्यर्थीभूय कल्पयति—सर्वे आदेशाः सर्वपदादेशा इति । सर्वे आदेशा अर्थवतः समुदायस्य स्थाने

दर्पणव्याख्या

स्थानस्याव्यवहितोत्तरत्वसम्बन्धेनोत्तरवर्णानुसन्धाने वाक्यस्फोटवक्ष्यमाणरीत्या सत्त्वाचेन स्वविषयकानुसन्धानविशिष्टानुसन्धानविषयत्वरूपमिति नानुपपत्तिरिति । यथा चैतत् तथा वाक्यस्फोटनिरूपणे वक्ष्यत इति । तथाच 'वर्णसमुदायो वाचकः' इति पदस्फोटपक्षे पर्यवस्यति ॥ ६४ ॥ ❀पारिभाषिकेति❀ पाणिन्यादिसङ्केतितेत्यर्थः । पूर्वं तु आदेशस्मारितवर्णानां बोधकत्वनिरासेन प्रकृतिघटकवर्णसमुदायरूपस्य, प्रत्ययघटकवर्णसमुदायरूपस्य च तस्य वाचकतोक्ता । इदानीन्तूभयघटकवर्णसमुदायस्यैव सेति भेदः । 'घट्' इति प्रकृतिः, एनेति प्रत्यय इति प्रकृतिप्रत्ययोर्विभागस्य ज्ञानासम्भवादिति योजनीयम् । सर्वे सर्वपदेति❀ वर्णनित्यताप्रतिपादकं भाष्यमेतत् । वस्नसादेरपि पक्षत्वादाह—❀व्याजेनेति❀ तथाच निश्चित-

प्रकृतिप्रत्यययोर्ज्ञानासम्भवान्न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाह—वस्नसादाविति—'बहुवचनस्य वस्नसौ' इति समुदायस्याऽऽदेशविधानान्नात्र तद्विभागः सम्भवतीत्यर्थः ॥ ६५ ॥

प्रभा

आदेशाः शब्दानां नित्यतया विकाररूपादेशासम्भवाद् बुद्धिविपरिणामेनैवादेशत्वं वक्तव्यम्। बुद्धेश्चार्थवच्छब्दमात्रविषयकत्वाद् आदेशानां समुदायादेशत्वमावश्यकम्। तथाच अस् इत्यस्य 'अस्' इत्यादेशे विभक्तेरादेशभिन्नत्वाभावेनात्वादिना बाधाभावात्, 'शेषे लोपः' इत्यस्य प्रवृत्त्यर्थमादेशविधानं चरितार्थमिति भावः। एवञ्च शित्त्वाभावे अस् इत्यस्य 'अस्' एव स्यात्तन्मा भूत् किन्तु असःस्थाने शित्त्वाय अशि कृते 'तव मम' इति सिद्ध्यर्थं शित्करणम्। तदुक्तं भाष्ये—'आदेशे एषा विभक्तिः। कथम्? सर्वे 'सर्वपदादेशा दाक्षिपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते' इति। तदुक्तं भाष्ये—'तस्माच्छित्करणम्' सर्वादेशार्थं कर्त्तव्यमिति शेषः। अग्रे शित्त्वं भाष्ये प्रत्याख्यातम्। तथाहि—न कर्त्तव्यः। क्रियते न्यास एव। प्रश्लिष्टनिर्देशोऽयम्। 'अ-अ' इति। तथाचानेकाल्त्वात्सर्वस्य भविष्यतीति शित्त्वं न कर्त्तव्यमिति। अत्र यदमर्थवत्तरम्। स्वीकार इति—'आद्गुणः' इत्यनेनापि 'घट इन' इत्यस्य स्थाने 'घटेन' इति बुद्धिः कर्तव्या, इत्यस्यैव बोधनाद्विशिष्टादेशे प्रकृतिप्रत्यययोः पार्थक्येन ज्ञानासम्भावात्सुबन्तस्यैवाखण्डस्य वाचकत्वं स्वीकरणीयमित्यखण्डपदस्फोटः सिद्ध्यतीति भावः। ज्ञानासम्भवादिति—पूर्वपरवर्णयोः स्थाने एक एकार आदेश इति पक्षे स एकारः पूर्वस्थान्यकारघटितसमुदायावयवः परस्थानीकारघटितसमुदायावयवो वेति संशयकृतः प्रकृतिप्रत्ययविभागसंशयः। 'सर्वे सर्वपदादेशाः' इति पक्षे तु प्रकृतिप्रत्ययं दूरीकृत्य समुदायस्यादेशत्वेन बीजे शाखापत्रादीनां लय इव प्रकृतिप्रत्ययोः सम्मोहाज्ज्ञानाभाव एव। कश्चिद्भागः प्रकृतिः, कश्चिन भागः प्रत्यय इत्येवं भागत्वरूपसामान्येन सम्भवेऽपि विशिष्य=तत्तदानुपूर्वीरूपेण न सम्भवतीति विशिष्य ज्ञानासम्भवादित्युक्तमिति भावः। वाचकत्वमिति—पार्थक्येनार्थनिरूपितं वाचकत्वमित्यर्थः। किन्त्वगत्या समुदायस्यैव वाचकत्वमुपेयमिति भावः। व्याजेनेति=अन्यप्रदर्शनेनान्यगतधर्मस्यान्यत्र बोधनमत्र व्याजः। तथाहि—घटेनेत्यादिसमुदायः, घटाद्यभिन्नकरणाद्यर्थे शक्ताः, घटाद्यभिन्नकरणादिप्रतीत्यन्वयव्यतिरेकानुविधायिज्ञानविषयत्वादित्येवं वस्नसादिवदित्यनुमित्या प्रकृतिप्रत्ययविभागाभावबोधनेनेत्यर्थः। नच वस्नसादीनामपि पक्षताऽवच्छेदकतादृशसमुदायत्वाक्रान्तत्वाद् दृष्टान्तत्वेनोपादानमसङ्गतमिति वाच्यम्, निश्चितत्साध्यवत एव दृष्टान्तत्वस्य सम्भवेन तस्य चात्र सत्त्वेन तदुपादानमित्याशयात्। अत एव 'व्याजपदमुपात्तम्। समुदायस्येति—पदात्परयोरपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीयाश्रूयमाणबहुवचनान्तयोर्युष्मदस्मदोर्वस्नसौ स्याताम्' इत्यर्थकेन बहुवचननिष्ठचरमावयवतानिरूपकयोर्युष्मदस्मदन्यतरनिष्ठाद्यवयवतानिरूपकयोः समुदाययोः स्थाने आदेशविधानादित्यर्थः। अत्र='वः' 'नः' इत्यत्र। विभागः=प्रकृतिप्रत्ययविभागः। सम्भवतीति=तथाच यथा—वस्नसादौ वैयाकरणानामपि विभागज्ञानासम्भवस्तथा 'सर्वे सर्वपदादेशाः' इति

दर्पणव्याख्या

साध्यवत्त्वस्यैव दृष्टान्तत्वे तन्त्रत्वेन तस्य पक्षभिन्नत्वाभावेऽपि न दृष्टान्तत्वमनुपपन्नमिति भावः। *तत्र*=वस्नसादिस्थले। *विभाग*=प्रकृतिप्रत्यययोः पार्थक्येन निर्णय इत्यर्थः। अस्य वैयाकरणानामपीति शेषः। परे तु आमादौ प्रत्ययत्वस्य दृष्टत्वेन वामित्यादावामो व इत्यादेर्वसादेः प्रत्ययत्वमितरांशस्य प्रकृतित्वमनुमातुमशक्यमित्युक्तरीत्या न प्रकृतिप्रत्ययसमुदायरूप-

SGDF

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह—

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ।
अर्थे विशिष्यसम्बन्धाग्रहणं चेत् समं पदे ॥ ६६ ॥
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत् तथा ।

प्रभा

पक्षे 'घटेन' इत्यादावपि तदसम्भवः । ननु भाष्यकृता 'टाङसि' इति सूत्रे 'न' 'अत्' इति न्यस्य इकाराकारग्रहणं प्रत्याख्यातमिति तन्मते 'घटे' इति प्रकृतिः, 'न' इति प्रत्यय इत्येवं विभागज्ञानं सुशकमिति चेन्न, समुदायस्य स्थानित्वं समुदायस्यैवादेशत्वमिति पक्षेऽवयवे प्रकृतित्व—प्रत्ययत्वकल्पकवचनाभावेन वैयाकरणानामपि शास्त्रानुसारिज्ञानस्यैवौचित्येन तदसम्भवात् । यद्यपि 'सर्वे सर्वपदादेशाः' इति भाष्योक्तवाक्ये पदपदमर्थवत्परमेव, न सुबन्तपरम्, तथा सति 'तव अश्' इत्यस्य स्थाने 'तव अश्' इत्यादेशभिन्नत्वेनात्वाद्यापत्तिर्दुर्वारैव स्यात् । अतः 'अस्' इत्यस्य 'अश्' इत्यादेश इत्यत्रैव भाष्यतात्पर्यम् । तथापि शब्दानित्यत्ववारणाय सुब्घटितस्य स्थाने सुबादेशघटित आदेश इत्यस्यापि सम्भवेन 'घटेन' इत्यादौ तथोक्तिरिति बोध्यम् । केचित्तु यत्र प्रकृतिप्रत्ययविभागकल्पना न सम्भवति तत्र सुबन्तादिपदस्य वाचकत्वं कल्पनीयम् । यत्र तु तादृशविभागसम्भवस्तत्र प्रकृतिप्रत्यययोरेव वाचकत्वं न सुबन्तस्येत्याहुः । भाष्यतत्त्वविदस्तु वस्तसादिस्थले पदस्यैव वाचकत्वे सिद्धे सर्वत्रैव तस्यैव वाचकत्वं न प्रकृत्यादीनाम्, अर्द्धजरतीयस्यानौचित्यात्, वृद्धव्यवहारेण तत्रैव शक्तिग्रहस्य सिद्धत्वात्वाच्च । नचैवं प्रकृतिप्रत्ययादिनिमित्तककार्य्यानुपपत्तिः, प्रक्रियानिर्वाहाय कल्पितप्रकृतिप्रत्ययादिवाचकत्वमादाय तदुपपत्तेरिति वदन्ति । दर्पणकारास्तु—आमादौ प्रत्ययत्वस्य दृष्टत्वेन 'वाम्' 'व' इत्यादौ 'व' इति प्रकृतिः, 'आम्' 'अस्' इति प्रत्यय इत्येवमनुमातुं शक्यत्वेन प्रकृतिप्रत्ययसमुदायरूपपदस्य वाचकत्वम् । 'घटेन' इत्यत्र 'न' मात्रस्यादेशत्वं भाष्यकृतैवोक्तमिति न तत्र विभागो दुर्ज्ञेयः । 'अजर्घाः' 'अचकात्' इत्यादौ तु अगत्या शिष्यमाणं लुप्यमानार्थाभिधायि' इति न्यायेन प्रकृतेरेव वाचकता । अस्तु वा तत्रापि लुप्तप्रत्ययानुसन्धानेन प्रकृतेः स्वार्थविशिष्टप्रत्ययार्थे लक्षणया बोधः । 'सर्वे सर्वपदादेशाः' इति न्यायस्तु वर्णानित्यत्ववादिनां मते नास्त्येवेत्याहुः । पूर्वोक्तपदस्फोटसाधकयुक्तेः निपातानुपूर्वीकतत्तच्छब्दानां तत्तदर्थबोधकत्वे निर्णीतेऽपि विकृतानुपूर्वीघटितैः 'दध्यत्र' 'मध्वत्र' इत्यादिसमूहैरपि बोधदर्शनात्, वृद्धव्यवहारेण वाक्ये एव प्रथमं शक्तिग्रहाच्च वाक्यस्फोटं निरूपयितुमाह—सुप्तिङन्तचयेति—सुप् च तिङन्तञ्च सुप्तिङन्ते, सुब्विशिष्टं तिङन्तं सुप्तिङन्तम् । सुप्तिङन्ते च सुप्तिङन्तञ्चेत्येकशेषे सुप्तिङन्तानि, तेषां चयः सुप्तिङन्तचय इति सुबन्तचयः, तिङन्तचयः, सुबन्ततिङन्तचयश्च वाक्यमित्यर्थः । सुबन्तचयः—'रामेण गन्तव्यम्' । तिङन्तचयः—'पचति भवति'—पाको भवतीत्यर्थः । सुबन्ततिङन्तचयः—'चैत्रः

दर्पणव्याख्या

पदस्य वाचकत्वसिद्धिः । घटेनेत्यत्र तु नशब्दस्य टादेशत्वं भाष्यकृतैवोक्तमिति न तत्र विभागासिद्धिः । 'अजर्घाः, अचकात्' इत्यादौ त्वगत्या "शिष्यमाणं लुप्यमानार्थाभिधायि" इति न्यायात् प्रकृतेरेव वाचकता । अस्तु वा तत्रापि लुप्तप्रत्ययानुसन्धानाद् बोधः । प्रकृतेरेव वा स्वार्थविशिष्टप्रत्ययार्थे लक्षणा । सर्वे सर्वपदादेशाः' इत्यपि वर्णानित्यत्ववादिनां मते दूरापास्तमित्याहुः ॥ ६५ ॥ युक्तेरैक्यात् क्रमप्राप्तं वाक्यस्फोटनिरूपणमित्याशयेन मूलमवतारयति—*सुप्तिङन्तेति* । *तत्*

रहितस्यापि बोधप्रसङ्गः । 'घटमानय' इत्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्य्यज्ञाने बोधाभावाच्च । तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्म्मत्ववाचकविभक्तेस्ततो

प्रभा

शवाक्ये बोधजनकत्वप्रकारकशक्तिभ्रमवतस्तु बोधो भवत्येवेति सूचितम् । बोधप्रसङ्ग इति—घटकर्मकानयनजनककृतिविषयकबोधापत्तिरित्यर्थः, पदानामेव वाक्यार्थे शक्तिरिति ज्ञानवतां पदजन्यपदार्थोपस्थितिसत्त्वात् वाक्ये शक्तिस्वीकर्तॄणान्तु न दोषः, तद्वाक्ये तादृशबोधजनकशक्त्यभावात् । तत्र शक्तिज्ञानसत्त्वे तु तादृशबोध इष्ट एव । घटमानयेत्यत्रैव--वाक्ये शक्तिमनङ्गीकुर्वतः पुंसो यथा 'घटमानय' इत्यनेनापि पदशक्तिज्ञानादेव पदार्थानामुपस्थितौ बोधस्तथा 'घटः कर्मत्वम्' इत्यादिनाऽपि बोधः स्यादिति भावः । ननु शाब्दबोधे वक्तस्तात्पर्य्यज्ञानस्यापि कारणत्वात् 'घटः कर्मत्वम्' इत्यत्र 'इदं वाक्यं घटकर्मकानयनविषयकबोधजनकं भवतु' इत्याकारकेच्छारूपं यद्वक्तुस्तात्पर्य्यं तज्ज्ञानाभावादेव बोधो न स्यादत आह—सत्यपीति । बोद्धुरुक्तवक्तृतात्पर्य्यज्ञानसत्त्वेऽपि बोधादर्शनाद्वाक्ये शक्तिरुपेयेति भावः । बोधाभावादिति- घटकर्मकानयनविषयकबोधाभावादित्यर्थः । ननु तादृशबोधजनकतात्पर्य्यज्ञानसत्त्वेऽपि कारणान्तरमपि किञ्चिदपेक्ष्यते तदभावादेव न बोध इत्याशयेन कारणान्तरं दर्शयति—तत्रैवेति—'घटमानय' इत्यत्रैवेत्यर्थः । अत्र वाक्ये शक्तिज्ञानाभावेऽपि यथाऽत्र पदार्थानामुपस्थितिस्तथा 'घटः कर्मत्वमानयनं कृतिः' इत्यत्रापि, परन्तु अव्यवहितोत्तरत्वसम्बन्धेनाम्पदे घटपदवत्त्वरूपायाः, अव्यवहितोत्तरत्वसम्बन्धेन घटपदेऽम्पदवत्त्वरूपाया वा, एवमम्पदविशिष्टमानयपदं तद्विशिष्टमम्पदं तत्त्वरूपाया आकाङ्क्षाया अभावेन 'घटमानय' इत्यत्र च तादृशाकाङ्क्षायाः सत्त्वेन बोधो जायते । 'घटः कर्मत्वम्' इत्यनेन तदभावादेव बोधो न जायते इति 'यदभावे कार्य्याभावो यत्सत्त्वे कार्य्यसत्ता, इत्यन्वयव्यतिरेकाभ्याम् 'घटादिपदाव्यवहितोत्तरत्वविशिष्टामादिपदत्वरूपायाः, आङ्उपसर्गविशिष्टनयपदत्वरूपायाश्चाकाङ्क्षायाः कारणत्वमवगम्यते । वाक्यशक्त्यस्वीकारेऽपि दोषः । घटार्थकेति—बहुव्रीहिणा कलशादिसंग्रहः । विभक्तेरिति—अम्, औ, शस्, इत्यस्यैकरूपेण संग्रहः । धातोस्तत आख्यातस्येति—एतेन 'आहर' इत्यादेरपि संग्रहः । एकविधकार्य्यकारणभावेनैव 'घटम्' 'घटौ' 'घटान्' 'कलशम्' 'कलशौ' 'कलशान्' 'आनय' आनयतम्' 'आनयत' 'आहर' 'आहरतम्' 'आहरत' इत्यादिघटितवाक्यानामप्येकरूपेण कार्यकारणभावः सूचितः । यद्यपि प्रातिपदिकत्वेन, धातुत्वेन, आख्यातत्वेन च ज्ञानशून्यानां घटमानय' इत्याद्यानुपूर्वीमात्रेण बोधदर्शनात्तद्घटितकार्य्यकारणभावोऽसङ्गतस्तथापि वैयाकरणानां बोध्यबोधकभावाभिप्रायेण तदुक्तिर्नेया । वस्तुतस्तु तत्तदानुपूर्वीरूपेणैव कार्य्यकारणभाव इति कार्य्यकारणभावानन्त्यमगत्या

दर्पणव्याख्या

एवेति भावः । *बोधप्रसङ्गः*=घटकर्मकानयनानुकूलकृतिबोधापत्तिः, पदवृत्तिज्ञानजन्यपदार्थोपस्थितेः सत्त्वादिति भावः । *घटमानयेत्यत्रेवेति* । अत्र तादृशव्युत्पत्तिरहितस्येत्यनुपज्यते । ननु शाब्दबोधकारणार्थतात्पर्य्यज्ञानरूपसहकार्यन्तराभावादेव न बोधोऽत आह—*सत्यपीति* । *बोधाभावादिति* तादृशबोधाभावादित्यर्थ । तथाच यदभावात् कार्याभावस्तस्य तद्धेतुतया वाक्यशक्तिरावश्यकेति भावः । एतेन व्यतिरेकसहचारकारणताग्राहकः प्रदर्शितः । अन्वयं प्रदर्शयन् वाक्यशक्तिं व्यवस्थापयति—*तत्रैवेति* घटमानयेत्यत्रैवेत्यर्थः । बोधादित्यनेन स्वरूपसतो हेतुत्वस्य व्यवच्छेदः । तादृशसाकाङ्क्षज्ञाननिष्ठबोधहेतुत्वस्यैवास्मन्मते वाक्यशक्तित्वेनाकाङ्क्षाशक्तिरिति परिभाषामे-

तोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्य्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः, घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्य्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्, अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात् ।

प्रभा

वाकरणीयमेव । तज्ज्ञानमपीति—एतेनाकाङ्क्षायाः स्वरूपतः कारणत्वनिरासः । तथाच घटः, कर्मत्वम् इत्यत्र अमन्तघटपदत्वस्य 'आनयनं कृतिः' इत्यत्र आनयपदत्वस्य च भ्रमदशायां घटकर्मकानयनबोधस्य 'घटमानय' इत्यत्र 'घटः कर्मत्वमानयनं कृतिः' इति भ्रमसत्त्वे बोधाभावस्य चेष्टत्वं सूचितम् । तादृशबोधसिद्धेति—अयम्भावः समभिव्याहाररूपाकाङ्क्षायाः तादृशबोधकारणत्वे सिद्धे सुबन्ततिङन्तसमभिव्याहाररूपस्य तादृशसमभिव्याहारविशिष्टपदरूपस्य वा वाक्यस्य कारणत्वमार्थसमाजग्रस्तम् । तादृशाकाङ्क्षानिष्ठबोधजनकत्वस्यैव वैयाकरणनये वाक्यशक्तित्वेन नाममात्रेण भेद इति तादृशवाक्यव्यङ्ग्यो वाक्यस्फोट सिध्यतीति । वाक्यस्फोट इति—वाक्यस्य वाचकत्वे सिद्धे तद्व्यङ्ग्यस्यैवोक्तरीत्या वाक्यस्फोटत्वेन तत् सिध्यतीत्यर्थः । ननु शाब्दबोधं प्रति पदार्थोपस्थितिर्हेतुः । पदार्थोपस्थितिम्प्रति च शक्तिज्ञानं हेतुरिति शाब्दबोधजनकपदार्थोपस्थितिजनकज्ञानविषयत्वरूपमेव शक्तित्वम् । तच्च पदे एव न वाक्ये । अत एव कोशे पदशक्तेरेव प्रदर्शनम् । वाक्यशक्तिस्तु न पदार्थोपस्थापिका, किन्तु संसर्गोपस्थापिकैवेत्यत आह—घटादिपदार्थबोधेति—घटत्वादिविशिष्टार्थविषयकबोधम्प्रति अन्वयव्यतिरेकाभ्यां यथा घटादिपदनिष्ठबोधजनकतारूपशक्तिज्ञानस्य कारणतया पदे शक्तिसिद्धिस्तथा एकपदार्थप्रतियोगिकापरपदार्थानुयोगिकसंसर्गविषयकबोधम्प्रति अन्वयव्यतिरेकाभ्यां वाक्यशक्तिज्ञानस्यापि कारणतया तत्रापि शक्तेरावश्यकत्वमिति भावः । शक्तिज्ञानकार्य्येति—'पदशक्तिज्ञानकार्य्यकारणभावस्य' इत्यस्य पदनिष्ठा या शक्तिस्तद्विषयकज्ञाननिष्ठा या शाब्दबोधरूपकार्य्यस्य कारणता (कार्य्यनिरूपितकारणता) तद्वदित्यर्थः । विशिष्टेति—विशिष्टः-विशेष्यविशेषणभावापन्नो यो वाक्यार्थः (घटकर्मकानयनादिरूपः) तस्य बोध इत्यर्थः । पदसमभिव्याहारेति—समभिव्याह्रियन्ते=पौर्वापर्य्यविशिष्टानि क्रियन्ते पदान्यस्मिन्निति समभिव्याहारः समुदायः । पदानां य समभिव्याहारस्तदूपं यद्वाक्यं तन्निष्ठा या बोधकता (बोधजनकता) तद्रूपा वाक्यशक्तिस्तज्ज्ञानस्यापीत्यर्थः । अपिना पदशक्तिज्ञानस्य संग्रहः । 'घटमानय' 'आनय घटम्' इति विपर्य्ययेणापि बोधदर्शनात् स्वोत्तरत्व-स्वपूर्वत्वान्यतरसम्बन्धेन परस्परविशिष्टत्वरूपं पदसमुदायत्वरूपं वाक्यं बोध्यम् । हेतुत्वकल्पनादिति—उक्तकार्य्यकारणभावानुरोधेन विशिष्टवाक्यार्थबोधे हेतुत्वानुमानादित्यर्थः । पदार्थविषयकशक्तिज्ञानेन संसर्गविषयकवाक्यार्थबोधे घटविषयकशक्तिज्ञानात् पटविषयकशाब्दापत्तिर्दुर्वारेति विषयभेदेन कार्य्यकारणभाव आवश्यक इति भावः । ननु वाक्ये बोधजनकत्वस्य सत्त्वेऽपि न तस्य शक्तित्वम्, शाब्दबोधकारणीभूतपदार्थोपस्थितिजनकत्वस्यैव शक्तित्वात् । तच्च पदे एव, न वाक्ये इत्यत आह—अर्थोपस्थापकेति—अर्थस्य=संसर्गरूपस्य पदार्थरूपस्य वा उपस्थापकम्=उपस्थितिजनकं यज्ज्ञानं तस्य विषयः=विषयतया भासमानो यः शब्दस्तत्र वृत्तिः

दर्पणव्याख्या

ऽपि वाक्यस्फोटसिद्धिर्निराबाधेत्याशेयनाह— * तर्हीति * । ननु शाब्दबोधहेत्वर्थोपस्थितिजनकत्वं शक्तित्वम् । तु पदे एव न वाक्ये, तन्निष्ठबोधकतायास्तादृशोपस्थित्यजनकत्वादत आह—* अर्थोपस्थापकेति * । * शब्दवृत्तीति * शब्दनिष्ठं यद्बोधकारणत्वमित्यर्थः । तथाचोपस्थितौ शाब्दहेतुत्वनिवेशे एतत्कल्पे प्रयोजना-

प्रभा

रूपे सम्बन्धे वाक्यशक्तेरभावे विशेष्यत्वस्य त्यागः, विशेषणत्वस्य चोत्याग इति भाष्योक्तिरसङ्गता स्यात्। तादृशविषयतायाः स्वरूपेणैव शक्यत्वं न विषयतान्तरेणेति नानवस्था। जात्याकृतिव्यक्तयस्तु पदार्थः' इति सूत्रे न्यायवार्तिककृताऽपि विषतायाः शब्दशक्यत्वम्' 'प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वम्' इत्युक्त्या स्पष्टमेव सूचितम्। प्रातिपदिकार्थसूत्रे भाष्ये 'वीरपुरुषः' इत्यत्र प्रथमा न प्राप्नोति, आधिक्यात्। 'व्यतिरिक्तः प्रातिपदिकार्थः' इति प्रथमा न प्राप्नोति, नवा वाक्यार्थत्वात्। यदत्राधिकम्—'विशेष्यविशेषणभावो वाक्यार्थः स इत्युक्तम्। ननु संसर्गस्य वाक्यार्थत्वे 'राज्ञः पुरुषः' इत्यत्र राजपुरुषयोः सम्बन्धस्य षष्ठी वाचिका' 'कष्टं श्रितः' इत्यत्र क्रियाकारकयोः सम्बन्धस्य द्वितीया वाचिका, इति समर्थसूत्रस्थभाष्यविरोधः, प्रकारतया भासमानसम्बन्धाभिप्रायेण तदुक्त्या विरोधाभावात्, विशेष्यविशेषणभावरूपसम्बन्धस्यैव वाक्यशक्यत्वेनादोषाच्च। यद्यपि विभक्तिप्रकृत्यर्थगतविशेषणत्वमपि विभक्तिवाच्यमेव, तथापि विशेष्यनिष्ठमितरपदार्थनिष्ठविशेषणतानिरूपितविशेष्यत्वं वाक्यशक्यमेव। वाक्यार्थभूतश्च विशेष्यविशेषणभावो न ज्ञाननिरूप्य इति शाब्दबोधात्पूर्वमनुपस्थितत्वाच्छक्तिग्रहासम्भव इति तन्त्रान्तरोक्तिः शाब्दिकसिद्धान्तानवबोधप्रयुक्ता। तथाहि विशेषणत्वम्–तदधीनस्थितिकत्वरूपम्। विशेष्यत्वञ्च–तत्स्थितिनियामकत्वरूपं वस्तुधर्म एव। गुणकर्मसामान्यविशेषसमवायानां द्रव्यं प्रति विशेषणत्वमेव, द्रव्याधीनस्थितिकत्वात्तेषाम्। गुणादीनान्तु परस्परमव्यवस्थितो विशेष्यविशेषणभावः, आश्रयद्वारैव तेषामुक्तधर्मवत्त्वात्। अभावस्य तु सर्वान्प्रति विशेषणत्वमेव। द्रव्याणान्तु यस्य यदधीनस्थितिकत्वं नास्ति तयोर्धर्मपर्यालोचनया विशेष्यविशेषणभावो भवति। 'राज्ञः पुरुषः' इत्यत्र राज्ञः पुरुषाधीनस्थितिकत्वाभावेऽपि तन्निष्ठस्वामित्वस्य पुरुषाधीनस्थितिकत्वाद्विशेषणत्वम्। 'पुरुषाणां राजा' इत्यत्र पुरुषनिष्ठस्वत्वस्य राजाधीनस्थितिकत्वाद्विशेषणत्वम्। एवम् 'घटे रूपम्' इत्यत्र द्रव्यस्य गुणाद्यनपेक्षणात्वेऽपि आधारत्वस्य गुणाद्यपेक्षणाद्विशेषणत्वम् इति तदधीनस्थितिकत्वं यत्र विवक्ष्यते तद्विशेषणम्। तत्स्थितिनियामकत्वविवक्षणे विशेष्यत्वम्। तद्ज्ञाननियामकश्च घटपदं घटत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वाश्रये शक्तम्' इत्याकारकशक्तिग्रह एव। 'नीलो घटः' इत्यादौ वाक्ये च नीलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताभानप्रयोजको वाक्यशक्तिग्रहः। ज्ञानमात्रे शब्दभानाङ्गीकारेण प्रत्यक्षादिज्ञानप्रयोजकसामग्र्या एव तत्तज्ज्ञाने भासमानशब्दप्रयोज्यबोधसमानाकारकबोधजनकत्वस्यैव नियमेन तत्तत्सामग्र्येव सम्बन्धभानप्रयोजिका। ज्ञानानपेक्षपूर्वोक्तविशेषणतासन्निकर्षस्यैवाभावप्रत्यक्षे कारणत्वं नैयायिकैरप्यङ्गीकृतम्। अन्यथा ज्ञानात्पूर्वं विशेषणतासन्निकर्षस्यासत्त्वादभावप्रत्यक्षानुपपत्तिर्दुष्परिहरैव स्यात्। नन्वाकाङ्क्षादिसहकारेण पदान्येव वाक्यार्थबोधकानि भविष्यन्तीति वाक्यशक्त्यङ्गीकारोऽजागलास्तनसम एवेति चेन्न, गुरुभूतानन्ताकाङ्क्षायोग्यतादिज्ञानस्य कारणत्वकल्पने एव गौरवात्। अथ 'घटमानय' इत्यत्र घटपदाम्पदयोः प्रत्येकं गृहीतशक्तिकस्य तादृशानुपूर्वीज्ञानतात्पर्यज्ञानादिमतश्च घटकर्मकमानयनमिति बोधाभावात् तादृशबोधे घटपदोत्तरं द्वितीयादेः, ततो धातोस्तत आख्यातादिप्रत्ययस्य समभिव्याहारः कारणमिति कार्य्यकारणभावज्ञानवतश्च बोधदर्शनात्तादृशबोधे तादृशकार्य्यकारणभावज्ञानस्य हेतुत्वावश्यकत्वात्स एवाकाङ्क्षा। 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यताम्' इत्यत्र विपरीतबोध-

दर्पणव्याख्या

ज्ञानवतो यत्किञ्चिद्वृत्तिज्ञानवतो घटमानयेति वाक्याद् बोधापत्त्या घटशाब्दबोधे घटार्थकपदवृत्तिज्ञानजन्योपस्थितित्वेन हेतुता वाच्येत्यर्थभेदेनानन्तकार्य्यकारणभावकल्पने गौरवम्। अस्मन्मते तु विषयतासम्बन्धेन घटवृत्तिज्ञानजन्योपस्थितेर-

SGDF

प्रभा

वारणाय तात्पर्य्यज्ञानमपि हेतुरिति चेत्तथापि सिद्धो वाक्यस्फोटः । पदज्ञानकार्य्यकारणभावरूप-पदशक्तिज्ञानस्येव तत्समुदायरूपवाक्यज्ञानकार्यकारणभावरूपवाक्यशक्तिज्ञानस्य नैयायिकादिभिरपि शाब्दे हेतुतायाः स्वीकृतत्वात् । एवञ्च वाक्यशक्तिरेवाकाङ्क्षेति परेषां नाममात्रकृत एव भेदः । वाक्यशक्त्यङ्गीकारादेव समासग्रहणस्य नियमार्थत्वपरं भाष्यमपि सङ्गच्छते । अन्यथा वाक्यरूपसमासे शक्त्यभावेन 'अर्थवत्' सूत्रेण प्रातिपदिकत्वाप्राप्त्या भाष्योक्तनियमत्वानुपपत्तिः स्पष्टैव । ननु विषयतासम्बन्धेन शाब्दबोधम्प्रति विषयतासम्बन्धेन वृत्तिज्ञानस्य कारणत्वस्वीकारे घटादौ चैत्रीयवृत्तिज्ञानस्य सत्त्वदशायां घटपदवृत्तिमजानतो मैत्रस्यापि बोधापत्तिः । कारणस्य तत्र सत्त्वादिति वाच्यम्, तत्पुरुषीयशाब्दबोधम्प्रति विषयतया तत्पुरुषीयवृत्तिज्ञानस्य हेतुत्वकल्पनेनादोषात् । नच पुरुषा-णामानन्त्यात् कार्य्यकारणभावानन्त्यमिति समवायेन शाब्दं प्रति समवायेन वृत्तिज्ञानस्य कारणत्वे त्वदुक्त-कार्य्यकारणभावासिद्ध्या वाक्यशक्त्यसिद्धिरिति वाच्यम्, विषयमनिवेश्य समवायेन शाब्दम्प्रति समवा-येन वृत्तिज्ञानस्य कारणत्वे अन्यविषयकवृत्तिज्ञानसमवायिनश्चैत्रादेरन्यविषयकशाब्दवारणाय घटविषय-कशाब्दम्प्रति घटविषयकवृत्तिज्ञानस्य कारणत्वमिति एकस्यैव चैत्रस्य सहस्रशो बोधे सहस्रविषयाणां निवेशेन कार्य्यकारणभावकल्पनापेक्षया विषयतासम्बन्धेन चैत्रीयशाब्दबोधं प्रति विषयतासम्बन्धेन चैत्रीयवृत्तिज्ञानत्वमित्येकेनैव कार्य्यकारणभावेन यत्र विषयतासम्बन्धेन वृत्तिज्ञानं तत्रैव विषयतासम्बन्धेन शाब्दबोधस्य कार्य्यतावच्छेदककारणतावच्छेदकसम्बन्धेन कार्य्यकारणयोः सामानाधिकरण्यनियमेनोत्प-त्त्याऽनन्तविषयनिवेशाभावेऽप्यन्यविषयकवृत्तिवृत्तिज्ञानेनान्यविषयकशाब्दबोधासम्भवेन तत्पुरुषीयत्वनिवे-शेऽपि सहस्रशो विषयमनिवेश्यैव कार्य्यकारणभावेनानन्तविषयकृतानन्तकार्य्यकारणभावस्य तत्तत्पुरु-षम्प्रति अनपेक्षणेन विषयतासम्बन्धेनैव कार्य्यकारणभावे महालाघवस्य सत्त्वादित्यन्यत्र विस्तरः । एवञ्चो-क्तरीत्या वाक्यशक्तेः प्रमाणैर्युक्तिभिश्च सिद्धौ 'अत्र वदन्ति' इत्यादिना दर्पणकारोक्तं वाक्यस्फोटखण्ड-नमपास्तम् । तथाहि—प्रकृतिप्रत्ययादिरूपपदस्यार्थे सम्बन्धं विनाऽर्थोपस्थापकत्वासम्भवादर्थनिरूपितो वृत्त्यात्मकः सम्बन्ध आवश्यकः । नतु प्रकृतिप्रत्ययात्मकसमुदायस्य सुबन्ततिङन्तरूपस्य तत्समुदायरूप-वाक्यस्य वा विशिष्टार्थे शक्तिः, वाक्ये शक्तिं विनाऽपि आकाङ्क्षादिरूपकारणसमवधानादेव विशिष्टार्थ-बोधसिद्धेरिति तन्न, समभिव्याहाररूपाकाङ्क्षाया वाक्यशक्तिरूपत्वेन तत्खण्डनायोगात् । यत्तु—वाक्यज-न्योपस्थितेः शाब्दबोधात्मकत्वेन तस्याः शाब्दबोधम्प्रति कारणत्वासम्भव इति तन्न, 'घटमानय' इति वाक्यं घट-कर्मकानयनविषयकबोधजनकतावत्, इति वृत्तिज्ञानविषयबोधीयविषयताया एव वृत्तिज्ञाननिष्ठकारणतावच्छे-कतया तस्य चोपस्थितिरूपत्वेन शाब्दबोधभिन्नतयोक्तदोषाप्रसक्तत्वस्योक्तत्वात् । घटत्वादिनिर्विकल्पक-ज्ञानवत् शाब्दातिरिक्तकेवलसंसर्गविषयकोपस्थितेः सम्भवस्योक्तत्वाच्च । वाक्यशक्तिमविदुषो विवरणादि-ना घटादिपदशक्तिमजानत आकाङ्क्षादिना बोधोदयेन व्यभिचारप्रदर्शनन्तु समभिव्याहाररूपाकाङ्क्षा-या वाक्यशक्तितोऽभिन्नत्वेनैव परिहृतम् । यदपि वाक्यस्य समभिव्याहाररूपाकाङ्क्षारूपत्वे 'घटः कर्म-त्वम्' 'घटीया कर्मता' इत्यर्थे निराकाङ्क्षम्, 'घटमानय' इति वाक्यञ्च तत्र साकाङ्क्षम्' इति व्यवहारा-नुपपत्तिरिति तदपि न, पौर्वापर्य्यरूपसमभिव्याहारस्य शक्तिरूपत्वेन 'निराकाङ्क्षम्' इत्यस्य निःशक्ति-कत्वार्थकतया निःशक्तिकमित्यर्थेन 'साकाङ्क्षम्' इत्यस्य सशक्तिकत्वार्थकतया सशक्तिकत्वमित्यर्थेन चोक्त-दोषानवकाशात् । एतेन वाक्यस्य समभिव्याहाररूपत्वे 'पदयोः समभिव्याहारः' इत्यर्थे 'पदयोर्वाक्यम्' इति व्यवहारस्यापत्तिरित्यप्यपास्तम्, समभिव्याहारस्य वाक्यशक्तिरूपत्वेनोक्तापत्तेरज्ञानविजृम्भि-तत्वात् । यत्र क्वचन समभिव्याहाररूपाकाङ्क्षैव वाक्यमिति शाब्दिकानामुक्तौ समभिव्याहारपदम-

प्रभा

धिकरणघञन्तमिति पदसमुदायपरकतया न दोषावहम् । समभिव्याहारस्य वाक्यशक्तिरूपतया तज्ज्ञानस्य शाब्दबोधहेतुत्वं नैयायिकानामपि सम्मतमिति शाब्दे वाक्यशक्तिज्ञानं हेतुरिति शाब्दिकानां रिक्तं वच इति त्वदुक्तिरेव रिक्तेति बोध्यम् । शाब्दबोधात् प्राक् संसर्गस्य यथोपस्थितिस्तथानुपदमेवाभिहितम् । शाब्दबोधात् प्राङ् मनसा वाक्यार्थोपस्थित्यभ्युपगमे वाक्यार्थोपस्थितेः शाब्दबोधरूपतया अनधिगतार्थज्ञानकारणत्वरूपप्रमाणत्वस्य शब्दे बाध इति न वाच्यम् , स्वज्ञानविषयबोधीयविषयतया वृत्तिज्ञानस्यैव शाब्दे कारणत्वस्वीकारेण वृत्तिज्ञानस्य च शाब्दबोधातिरिक्ततया शब्दे उक्तप्रामाण्यस्याक्षतत्वात् , एतेन 'अनधिगतार्थगन्तृता वेदस्य मीमांसाद्वयसिद्धोच्छिद्येतेत्यपास्तम् , वृत्तिज्ञानजन्योपस्थितिमन्तरैव शाब्दोपपत्तेः, निर्विकल्पकज्ञानवत् केवलसंसर्गस्यैवोपस्थित्या शाब्दबोधस्य वक्तुं शक्यत्वाच्च । 'सामयिकः शब्दादर्थप्रत्ययः' इति कणादोक्तेः वाक्यशक्तिग्राहकानुशासनाभावेन तद्ग्रहासम्भवाच्च वाक्यस्फोट आपातरमणीय इत्यप्यापातरमणीयम् , शक्तिग्राहकशिरोमणे व्यवहारस्यैव वाक्यशक्तिग्राहकत्वात् । कोशे धातूनां प्रत्ययानाञ्चार्थानामबोधनेऽपि तच्छक्तिग्रहवत् वाक्येऽपि शक्तिग्रहसम्भवात् , अवयवशक्तिबोधनद्वारा वाक्यशक्तिबोधने एवानुशासनतात्पर्य्यात् । अत्र वदन्तीत्यारभ्य वाक्यस्फोट आपातरमणीय एवेत्यन्तेन वाक्यस्फोटं निराकुर्वन्तो दर्पणकारा उक्तरीत्या प्रमाणोपपत्त्यादिभिर्वाक्यस्फोटसाधनेन परास्ताः । वाक्यशक्त्यङ्गीकारे तदानन्त्यापत्तिरपि न, 'घटमानय' 'पटमानय' इत्याद्यमाद्यन्तपदसमभिव्याहृतानयादिपदघटितसकलवाक्येष्वेकैव वाक्यशक्तिः शक्तिविषयस्याधेयत्वनिरूपितत्वादेः कर्मत्वादिसम्बन्धस्यैक्यात् । 'घटमानय' इत्यत्र पटस्य पदजन्योपस्थित्यभावेन न पटादिकर्मकानयनबोधापत्तिः । घटपदे गृहीतशक्तिकस्य कलशपदे शक्तिमजानतो निराकाङ्क्षघटपदाद् घटोपस्थितौ 'कलशमानय' इति वाक्याद् घटकर्मकानयनबोधापत्तिस्तु न, कार्य्यकोटौ कारणाव्यवहितोत्तरत्वस्य निवेशेन तत्सामग्र्यसिद्धेः । एतेनोक्तदोषनिरासाय तत्तत्पदमन्तर्भाव्यैव कार्य्यकारणभावकल्पनमावश्यकमिति काशिकोक्तं नादरणीयम् । नन्वेवमपि वाक्यनिष्ठबोधकतायाः शक्तित्वे मानाभाव इति चेन्न, शाब्दधीविषयताया वृत्त्या पदजन्योपस्थितिविषयताप्रयोज्यत्वनियतत्वेन शाब्दबोधे सम्बन्धभानान्यथानुपपत्तेरेव मानत्वात् । नच संसर्गताख्यविषयतातिरिक्तविषयतायामेव तादृशोपस्थितीयविषयताप्रयोज्यत्वनियम इति वाच्यम् , तादृशसंकोचे कार्य्यकारणभावे गौरवात् तद्वानाय कारणान्तरकल्पने गौरवतरत्वादनुमित्यादिस्थलेषु सम्बन्धभानस्यानुमित्यादिप्रयोजकप्रमाणप्रयोज्यत्वस्यैव दर्शनाज्ज्ञानरूपाया विषयताया विशेष्यादित्रयसाधारण्या ऐक्यात्तद्भेदनिवेशस्य वक्तुमशक्यत्वाज्ज्ञानातिरिक्तत्वेऽपि तस्या ऐक्येनैवोपपत्तौ त्रैविध्यकल्पने प्रमाणाभावात् विषयरूपत्वे त्रैविध्यसम्भवेन भेदस्य निवेशयितुं शक्यत्वेऽपि तत्र पूर्वमेव गौरवदोषस्यावेदितत्वाच्च । किञ्च वाक्यशक्त्यनङ्गीकारे 'संसर्गं शाब्दयामि' इत्यनुव्यवसायानुपपत्तिः, शब्दसम्बद्धबोधस्यैव तथाविधानुव्यवसायविषयत्वात् । नच शब्दजन्यबोधविषयप्रकारविशेष्यनिरूपितत्वेन संसर्गस्यापि शब्दप्रयोज्यतया तथाविधानुव्यवसायोपपत्तिः, शब्दप्रयोज्यत्वेन 'शाब्दयामि' इत्यनुव्यवसायस्वीकारे धूमपदोपस्थितधूमलिङ्गिकाया अनुमितेरपि शब्दप्रयोज्यतया तथानुव्यवसायापत्तेः । शब्दनिष्ठवृत्तिविषयार्थविषयकशाब्दविषयस्येव 'शाब्दयामि' इत्यनुव्यवसायविषयत्वस्य सर्वसम्मतत्वात् । ननु शाब्दत्वजातिरेव तथाविधानुव्यवसायप्रयोजिकेति नानुमितेः पदप्रयोज्यत्वे तदापत्तिः । सा च जातिराकाङ्क्षाज्ञानादिसामग्रीजन्यशाब्दप्रयोज्यबोधनिष्ठैवेतिचेत्, तथापि वाक्ये शक्त्यस्वीकारे 'इमे वाक्ये परस्परं सम्बद्धे' इति व्यवहारानुपपत्तिर्दुष्परिहरैव, शब्दानामर्थद्वारकसम्बन्धस्यैवाङ्गीकारेण वाक्ययोस्तदसम्भवात् । नच बोधरूपप्रयोजनद्वारक एव वाक्ययोः सम्बन्ध इति वाच्यम् , ईदृशपरम्परासम्बन्धस्य सम्बद्धत्वव्यवहारप्रयोजकत्वे स्वनिष्ठद्रव्यत्वादिमत्त्वमादाय उदया-

प्रभा

नाचलयोरपि 'सम्बद्धाविमौ' इत्यस्यापत्तेरित्यलं विस्तरेण। यत्र शास्त्रेण वाक्यस्यैव संस्कारस्तत्र वाक्यादेर्थबोध इति तत्र वाक्यस्फोट एव नतु पदस्फोटः, 'डः सि धुट्' इति भाष्यात्तथैव प्रतीतेः। तथाहि—डः से धुट्, नश्च, शि तुक्, ङ्णोः कुक् टुक् शरि, ङमो ह्रस्वादचि ङमुण्नित्यम्, इह केचित्पूर्वान्ताः क्रियन्ते, केचित्परादयः। यदि सर्वे पूर्वान्ताः कितः स्युः—धुगादिषु ष्टुत्वणत्वप्रतिषेधो न सिद्ध्यति। मधु लिट् साये, पूर्वन्नास्ते, इत्यादौ। परादित्वे टिति कुर्वञ्छेते इत्यादौ पदान्तझयोऽभावाच्छत्वं न प्राप्नोति। प्रत्यङ्क्सेच्च, इत्यत्र षत्वनिषेधो न सिद्ध्यति, पदादिसकाराभावात्, इत्युक्तम्भाष्ये। अत्र धुगादिषु कित्सु 'षट्त् सन्तः' इत्यत्र 'षट्त्' इत्यस्यैव षट्त्वावच्छिन्नवाचकत्वं स्वीकार्य्यम् तकारस्य तदवयवत्वात्, धुटि तु 'त्सन्तः' इत्यस्य वाचकत्वम्, षट्त्वावच्छिन्नवाचकत्वन्तु 'षट्' इत्यस्यैवेति वाचकत्वावाचकत्वरूपफलभेदस्यापि सत्त्वात् ष्टुत्वादिमात्रदोषदानं भाष्यकृतोऽसङ्गतं स्यात्। तत्र वाक्यस्यैव वाचकत्वे तु कित्त्वे टित्त्वे वा वाक्यगतानुपूर्व्या भेदाभावेन ष्टुत्वादिमात्रदोषदानपरं भाष्यं चरसतः सङ्गच्छते। एतेन 'षट्त्सन्तः' इत्यादौ टित्किद्विकल्पपरभाष्यप्रामाण्यादागमरहितानुपूर्वीमत्पदानामेव वाचकत्वमित्यपास्तम्, सर्वत्रागमविशिष्टपदस्थले आगमविशिष्टेष्वेव शक्तत्वदर्शनेनात्र तद्वैपरीत्ये मानाभावात्। तत्प्रमाणत्वेनाभिमतस्य भाष्यस्यान्यथासुयोजितत्वात्। ननु वाक्यस्य शाब्दबोधात्प्राक् शक्तिग्रहासम्भवः, संसर्गरूपवाक्यार्थस्य शाब्दबोधमात्रविषयतया ततः प्रागनुपस्थितेरित्याशङ्क्य समाधत्ते—

दर्पणव्याख्या

स्वान्न शाब्दे तस्य भानमित्येक एव कार्य्यकारणभावः कल्प्यत इति लाघवेनेत्यर्थः। ननु घटघटत्वयोर्विशेष्यविशेषणभावे विपरीतव्युत्पन्नस्य घटमानयेत्यतो घटत्वविशिष्टबोधवारणाय घटत्वविशिष्टबोधे उपस्थितेर्घटपदवृत्तिज्ञानजन्यघटत्वविशिष्टाया हेतुताया अवश्यवाच्यतया तत एवानतिप्रसङ्गे उक्तकार्य्यकारणभावे मानाभावोऽत आह—* विवेचितञ्चैतदिति * पदपदार्थभेदेनानन्तकार्य्यकारणभावेषु वृत्तिप्रवेशमपेक्ष्य उपस्थितेः पदज्ञानजन्यत्वेनैव शाब्दसामग्रीकुक्षौ प्रवेश उचितः। तथा सति समवायेनाकाशस्य जनकतयोपस्थितस्य देवदत्तादेश्च शाब्दे भानवारणाय विषयतया शाब्दसामान्ये वृत्तिजन्योपस्थितेर्विषयतया हेतुत्वं वाच्यम्। एवञ्च संसर्गस्य शाब्दे भानानुरोधेन संसर्गेऽपि वृत्तिकल्पनमावश्यकम्। तथाच पदैः पदार्थानां वाक्येन वाक्यार्थस्य बोध इति न विशेष्यविशेषणव्यत्यासेन शाब्दबोधे पदार्थानां भानम्। तदोपस्थितानामेव संसर्गस्य वाक्यशक्त्या बोधादिति वृत्तिज्ञानस्येति यथाश्रुतार्थकमेव तत्र विवेचितम्। वस्तुतस्तु वृत्तिज्ञानपदं यथाश्रुतार्थकमेव। वृत्तिज्ञानस्येत्यनन्तरम् अनुषक्तविषयतासम्बन्धेनेत्यस्य वृत्तिज्ञानविषयबोधकत्वघटकबोधीयविषयतासम्बन्धेनेत्यर्थः। अन्यथा वाक्यवृत्तिज्ञानजन्योपस्थितेरेव शाब्दबोधत्वेन तस्मिँस्तेन सम्बन्धेन तद्धेतुत्वासम्भवेन वाक्यशक्तेर्गर्भस्रावादिति बोध्यम्। अत्र वदन्ति—पदजन्यपदार्थोपस्थितिमन्तरेण शाब्दबोधानुदयात्तादृशपदार्थोपस्थितेः शाब्दबोधे हेतुतेति तावन्निर्विवादम्। पदस्य च प्रकृत्याद्यात्मकस्यार्थे सम्बन्धं विना तदुपस्थापकत्वासम्भवात्तस्मिन् प्रकृत्यात्मकसम्बन्धोऽप्यावश्यक एव, नतु तत्समुदायरूपपारिभाषिकपदस्य तत्समूहरूपवाक्यस्य विशिष्टार्थे सः, तं विनाऽपि तस्य आकाङ्क्षादिरूपकारणसमवधानादेव विशिष्टबोधोपपत्तेः। एकपदार्थविशिष्टापरपदार्थशाब्दत्वस्यैव तत्कार्य्यतावच्छेदकत्वात्। यत्तु लाघवाद् वृत्तिज्ञानजन्योपस्थितेर्विषयतासम्बन्धेन हेतुत्वमेव वाक्यशक्तौ प्रमाणमिति, तन्न, स्वातन्त्र्येण तद्धेतुत्वस्यैवासिद्धेः। तथाहि—तादृशकार्य्यकारणभावे वृत्तित्वेन पदवृत्तेर्निवेशः, किं वाक्यवृत्तेः, किं वा वृत्तिसामान्यस्य ? । न तावदाद्यः, पदवृत्तिज्ञानजन्योपस्थितेः शाब्दबोधहेतुत्वस्य सर्वैरेवाभ्युपगमात्। न द्वितीयः, वाक्यवृत्तेस्ततः प्रागसिद्धेः। अत एव न तृतीयः, किञ्च तव मते वाक्यशक्तिजन्योपस्थितेः शाब्दबोधात्मकत्वेन तस्मिंस्तद्विषयत्वासम्भवादपि नोक्तरीतिः साधीयसी। अपिच वाक्यवृत्तिज्ञानस्य शाब्दसामान्ये न स्वातन्त्र्येण हेतुत्वं यदा कदाचिद्विवरणादिना घटादिपदशक्ति

ननु वाक्यार्थस्यापूर्वत्वात् कथं तत्र शक्तिग्रह इत्याशङ्क्याह—अर्थ इति—वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणश्चेत्तर्हि पदेऽपि समम्। पदे एवान्वयांशे शक्तिरिति पक्षेऽपि

प्रभा

अर्थे इति—संसर्गरूपवाक्यार्थे। निरूपितत्वं सप्तम्यर्थः, तेन सम्बन्धेन सम्बन्धाग्रहणैकपदार्थे सम्बन्धेऽन्वयोऽर्थस्य। विशिष्य=तत्तद्रूपेण। तथाच शाब्दबोधात्प्राग् वाक्यार्थनिरूपितशक्तिरूपसम्बन्धस्य अग्रहणम्=ज्ञानाभावश्चेद्वाक्ये इति शेषस्तदा पदेऽपि समम्=संसर्गरूपवाक्यार्थनिरूपिता वृत्तिः पदनिष्ठैवेति मतेऽपि वाक्यार्थबोधात्प्राक् संसर्गानुपस्थित्या संसर्गनिरूपितशक्तिरूपसम्बन्धज्ञानाभावः पदेऽपि तुल्यपरिहार इत्यर्थः। अयम्भावः—येषां मते संसर्गः पदेन लक्षणया बोध्यः, येषां वा पदे एवान्वयांशेऽपि शक्तिस्तेषामपि शाब्दबोधात्प्राक् संसर्गानुपस्थित्या तदंशे पदे लक्षणायाः शक्तेश्च ज्ञानासम्भवात्कथं निस्तारः। यदि पदैः पदार्थोपस्थितौ तत एव समभिव्याहाररूपाकाङ्क्षावशात् संसर्गोपस्थितावपि वृत्त्याऽनुपस्थितत्वान्न स बोधः शाब्दः स्यादिति शाब्दत्वोपपत्तये पदे शक्तिं लक्षणां वाऽऽश्रित्य यथा पदनिष्ठवृत्तिज्ञानं जायते इत्युच्यते तदा 'वाक्यार्थः संसर्गः' इति मतेऽपि वाक्ये शक्तिज्ञानं तथैव सम्भवेत्। यथा प्रागविज्ञातहरिद्रानामकनदीविशेषेण पुंसा 'हरिद्रायां नद्यां घोषः' इति वाक्ये श्रुते नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दे नदीविशेषनिरूपितां शक्तिं गृहीत्वा लक्षणया तत्सम्बन्धितटे घोष इत्यवगम्यते तथैव वाक्येऽपि शक्तिग्रहे बाधकाभाव इति। अपूर्वत्वादिति—शाब्दबोधात्प्रागनुपस्थितत्वादित्यर्थः। पदशक्त्यभास्यसम्बन्धस्य शाब्दबोधमात्रगम्यत्वादिति भावः। यद्यपि क्वचित् 'भूतले घटः' इत्यादौ संयोगादिसम्बन्धस्य शाब्दबोधात्प्रागपि चक्षुरादिसन्निकर्षेण ज्ञानमादाय शक्तिग्रहसम्भवस्तथापि इन्द्रियायोग्यस्य तथात्वासम्भवात्सर्वत्र तदभावाच्च 'अपूर्वत्वादित्युक्तिः। तत्र=वाक्यार्थे। निरूपितत्वं त्रलर्थः वाक्यार्थनिरूपितशक्तिग्रह इत्यर्थः विशिष्य=तत्तत्संसर्गतावच्छेदकरूपेण। अन्वयांश इति—अयम्भावः—तत्तत्पदेन वृत्त्या पदार्थज्ञानं जायते। तच्च पदार्थज्ञान-

दर्पणव्याख्या

ज्ञानजन्यपदार्थोपस्थितिदशायां घटमानयेति वाक्यशक्तिमविदुष आकाङ्क्षादिवशाच्छाब्दबोधोदयेन व्यभिचारात्। यदपि समभिव्याहाररूपाकाङ्क्षैव वाक्यमिति तदपि न, तथा सति 'घटीया कर्मता' इत्यादिबोधे घटमानयेति वाक्यं साकाङ्क्षम्। निराकाङ्क्षञ्च—घटः कर्मत्वमिति सर्वसिद्धव्यवहारानुपपत्तिः। 'पदयोः समभिव्याहारः' इतिवत् पदयोर्वाक्यमिति व्यवहारप्रसङ्गश्चेति समभिव्याहृतपदानामेव वाक्यत्वमुपगन्तव्यम्। तथाच समभिव्याहारस्य शाब्दबोधहेतुत्वेऽपि वाक्यस्य तत्त्वं दुरुपपादमेवेति क्व वाक्यशक्तिसिद्धिः। समभिव्याहारनिष्ठबोधजनकत्वग्रहवतो बोधे तज्ज्ञानं हेतुरित्यपि रिक्तं वचः। अन्वयव्यतिरेकाभ्यां समभिव्याहारज्ञानस्यैव शाब्दधीहेतुत्वेन तन्निष्ठबोधजनकत्वज्ञानस्य हेतुताया एवाभावात्। न च तदपि सम्भवति, शाब्दबोधात् प्राक् संसर्गस्यैवानुपस्थितेः। सामान्यतस्तदुपस्थितावपि विशेषरूपेण भानार्थं तात्पर्य्यज्ञानाद्यपेक्षणे च मूलशैथिल्यात् तव वाक्यशक्तेरेवासिद्ध्यापत्तिः। वक्ष्यमाणरीत्या शाब्दबोधात् प्राक् तदुपस्थित्यभ्युपगमे वाक्यवृत्तिज्ञानजन्योपस्थित्यनन्तरं शाब्दबोधाभ्युपगमे वा शाब्दप्रामाण्यभङ्गापत्तिः, अनधिगतार्थग्रहकारणस्यैव प्रमाणत्वात्। अत एव सूत्रकृता "कृत्तद्धितसमासाश्च" इत्यत्र समासग्रहणं कृतम्। वाक्यशक्तौ तु तद्वैयर्थ्यं स्पष्टमेव। "सामयिकः शब्दादर्थप्रत्ययः" इति कणादोक्तेर्वाक्यशक्तिग्राहकानुशासनादेरभावेन तद्ग्रहासम्भवाच्चेति वाक्यस्फोट आपातरमणीय एवेति पूर्वोक्तशक्तिग्रहप्रकारस्य शैथिल्यं मनसि निधाय तस्मिन् प्रकारान्तरं वक्तुमग्रिमग्रन्थ इत्याशयेनाह—*नन्विति*। * अपूर्वत्वात् *—शाब्दबोधात् प्रागनुपस्थितत्वात्। ननु शाब्दबोधात् पूर्वं पदे प्रत्यक्षाद्युपस्थितपदार्थनिरूपितशक्तिग्रहः सुलभ एवेति पदे समभिति मूलमनुपपन्नमत आशयं प्रकाशयति—* पदे एवेति * पदानामेवान्वितपदार्थे

तद्ग्रहासम्भवस्तुल्य इत्यर्थः । यदि च पदशक्तिः पदार्थांशे ज्ञाता, अन्वयांशे चाज्ञातोपयुज्यत इति कुञ्जशक्तिवादस्तदा ममापि वाक्यस्य

प्रभा

उपस्थितिशब्देन व्यवह्रियते । तत उपस्थितयोः पदार्थयोर्वक्तृतात्पर्य्यविषयसम्बन्धेन यद्विशिष्टज्ञानं तदेव शाब्दबोध इत्युच्यते । तथाच 'घट' इत्यत्र घटशब्देन घटस्य प्रथमया एकत्वस्य चोपस्थितिः । तत्रैकत्वं समवायसम्बन्धेन घटे विशेषणतया भासते 'समवायसम्बधेन एकत्ववान् घटः इति । स एव शाब्दबोधः' अन्वयबोध इति वा व्यवहारविषयः । तत्र समवायस्य यद्भानं तत्कीदृशशब्दप्रयोज्यम् ? इति जिज्ञासायां नैयायिकैः उपस्थापकघटपदसुपदयोः पौर्वापर्य्यरूपसमभिव्याहारप्रयोज्यम् इति । माध्वैस्तु सम्बन्धविशिष्टैकत्वे सुपदस्य, एवमन्विते एव घटे घटपदस्य शक्तिरिति तत्तत्पदप्रयोज्यम्, इति मीमांसासिद्धान्तसिद्धिः, तत्तत्पदानां स्वबोध्यार्थसम्बन्धरूपलक्षणाप्रयोज्यमिति, वैयाकरणैर्वाक्यशक्तिप्रयोज्यमिति चाख्यायते । तथाच यथा 'अन्वयांशेऽपि पदस्यैव शक्तिः, इति मते शाब्दबोधात्प्रागनुपस्थितेऽपि सम्बन्धविशेषे सामान्यतः शक्तिं स्वीकृत्य 'गाम्' इति पदं सम्बन्धविशिष्टं गां प्रतिपादयति, 'आनय' इति पदमपि सम्बन्धविशिष्टमानयनं बोधयति 'गामानय' इति परस्परसमभिव्याहारे जाते च 'गोकर्मकानयनम्' इति अमादिसमभिव्याहारबलेन कर्मत्वादिसम्बन्धविशेषस्यावगतिः । अत एवैकपदार्थे ज्ञाते अत्रान्विताभिधानवादिनः - न वाक्यार्थबोधकतया वाक्यस्फोटः, पदानामेवान्विताभिधायकत्वात् । पदानामन्वयसामान्ये शक्तौ समभिव्याहृतपदोपस्थापितपदार्थविशेष्यनिरूपितान्वयविशेषः सेत्स्यति । किञ्चैकपदप्रयोगेऽपि अन्वयविशेषस्य नियमेनाकाङ्क्षादर्शनात् तस्याश्चान्वयसामान्यज्ञानपूर्वकत्वनियमात्तत्र सामान्यान्वयज्ञानस्यान्यतोऽसम्भवाच्छब्द एवान्वितघटादिकमभिधत्त इति तन्न, 'घटमानय' इत्यत्र चतुष्टयबोधापत्तेः । 'इतरान्वितो घटः' 'इतरान्वितं कर्मत्वम्' 'इतरान्वितमानयनम्' 'इतरान्विता कृतिरिति । वाक्यशक्तिनये तु घटप्रकारककर्मविशेष्यकशाब्दबोधे घटपदोत्तरद्वितीयाया इत्यादिकार्य्यकारणभावनानात्वविरहान्न दोषः । एवम् 'पदमेव लक्षणया सम्बन्धरूपं वाक्यार्थत्वेन वैयाकरणैरभिमतं बोधयति' इत्यस्यायमाशयः— 'गामानय' इत्यत्र गोपदं गोकर्मके लाक्षणिकं सत् आनयनादिकं प्रतिपादयति । एवमानयतिरपि लक्षणया तत्तद्व्यक्तिं बोधयति । यत्र यत्र वाक्ये यो योऽर्थो विशेष्यत्वेन विवक्षितस्तमेवार्थं स्वपदेन सामान्यवाचिना लक्षितं सन्तमितराणि पदानि स्वार्थाभिधानद्वारेण तत्सम्बन्धिरूपेण लक्षयन्ति इति तथैव रीत्या एतन्मतद्वयेऽपि शाब्दबोधात्प्राक् सम्बन्धार्थनिरूपितं शक्तिज्ञानं लक्षणाज्ञानं वा सम्भवेत्तथैव वाक्येऽपि शक्तिग्रहो वैयाकरणनयेऽपि । 'यश्चोभयोः समो दोषः परिहारस्तयोः समः' इति न्यायेन स्यात्तदुक्तम्—'शक्तिग्रहासम्भवस्तुल्यः' इति ॥ कुञ्जशक्तिवाद इति—हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्' क्रुद्धो वायुर्यदा

दर्पणव्याख्या

शक्तिः, अन्वयश्च—सामान्यरूपेण ज्ञानम्ः, अत एव घटादिपदादन्वितघटाद्युपस्थितौ नियमेन तत्प्रतियोग्याकाङ्क्षा भवति—किमन्वितो घटः, किमन्वितं कर्मत्वमित्याद्याकारा, सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात् । विशेषरूपेण भाने त्वमादिपदसमभिव्याहारो नियामकोऽत एव तस्य शाब्दे भानम्, पदवृत्तिविषयत्वात्, अशक्यस्यापि भानेऽतिप्रसङ्गात् । नचैवं घटमानयेत्यत्रेतरान्वितं कर्मत्वमितिरीत्याऽनेकधा संसर्गस्य भानापत्तिः, तत्तत्पदेभ्यस्तथार्थोपस्थितावप्याकाङ्क्षावशादेकधैव तद्भानप्रसङ्गात् । नचाकाङ्क्षायास्तद्भाननियामकत्वावश्यकत्वेन तत्र वृत्तिकल्पनाऽपार्थेति वाच्यम्, अशक्यभानभियैव तदभ्युपगमात् । तथाच पदशक्त्यैव संसर्गभानोपपत्तौ तत्र न वाक्यशक्तिः, पदत्वापेक्षया वाक्यत्वस्य गुरुत्वाच्चेति तन्मतम् । तथाचान्विताभिधानमतेऽपि पदे वाक्यार्थशक्तिग्रहासम्भवः समान इत्यर्थः । * ज्ञातेति *

शक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रह इति चेत् तुल्यमित्याह—लक्षणादिति—लक्ष्यते=तर्क्यतेऽनेनेति लक्षणम्=मनस्तस्मात्। अपिपदं पदपदोत्तरं बोध्यम्। पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं

प्रभा

कुर्यात्तदा तं कुब्जमादिशेत्, इत्युक्तलक्षणः कुब्जो यथा विकृताङ्गेन किञ्चित्कर्तुमशक्तोऽविकृतेन चक्षुरादिना कार्य्यं कर्त्तुं समर्थश्च, तथा शाब्दबोधात्प्रागनुपस्थितत्वात् पदेऽन्वयांशनिरूपिता शक्तिरज्ञाता सत्यनुपकारिका पदार्थांशे च ज्ञाता शाब्दबोधोपकरिकेति भावः। शक्तिरिति—वाक्यार्थनिष्ठाऽन्वयांशनिरूपिता शक्तिरित्यर्थः। अभ्युपगम इति—सदसद्विवेकेन स्वीकारोऽभ्युपगम इति तदुक्तिरज्ञातशक्तेरनुपयोगान्निर्मूलत्वं तत्पक्षस्य सूचयति। पश्यत इति—अस्य पुंस इति शेषः। अज्ञातायाः शक्तेरनुपयोगान्न कुब्जशक्तिवादः साधुरित्याशयेन प्रकारान्तरमाह—लक्षणादिति—यद्यपि लक्षणशब्दश्चिह्ने योगरूढस्तथापि प्रकृतानुरोधेन लक्षणशब्दो मनःपर एवेति व्याचष्टे—लक्ष्यत इत्यादिना। अयम्भावः—एक आज्ञापकवृद्धोऽपर आज्ञाप्यवृद्धस्तयोः 'गामानय' इत्यादिना गोकर्मकानयनादिव्यवहारदर्शनात् व्युत्पित्सु र्बालो यथा प्रथम वाक्ये एव गोकर्मकानयननिरूपितां शक्तिं मनसा गृह्णाति, तथा पदैः पदार्थोपस्थितौ मनसाऽन्वयांशेऽपि पदानां शक्तिग्रहः स्यादित्याह—पदेऽपीति—अस्य तद्ग्रह इत्यत्रान्वयः। लक्षणात्=मनसः। तद्ग्रहः=अन्वयांशे शक्तिग्रहः। वाक्येऽपीति—वाक्येऽपि मनस एव शक्तिग्रहोऽस्त्विति भावः। वस्तुतस्तु तात्पर्य्यज्ञानरूपामुपस्थितिमादाय वाक्येऽन्वयांशे शक्तिग्रहस्तात्कालिक एवेति न शक्तिग्रहानुपपत्तिरिति ध्येयम्। एतावता प्रघट्टकेन पूर्वं पदे शक्तिग्रहस्ततः पदार्थोपस्थितौ मनसा सम्बन्धांशे शक्तिग्रह इत्युक्तम्। अधुना प्रयोज्यप्रयोजकवृद्धव्यवहारदर्शनसहकृतमनसा प्रथमं वाक्ये एव शक्तिग्रहस्तदनन्तरम् 'गामानय' इत्यनुक्त्वा 'घटमानय' इत्युक्तौ घटकर्मकानयनप्रतीत्या घटपदस्यावापे 'योजने' गोपदस्योद्वापे 'निष्कासने' अन्वयव्यतिरेकाभ्यां तत्तत्पदस्य तत्तदर्थे शक्तिग्रह इत्याह—वस्तुतस्त्विति। वाक्यस्यैवेति—तत्तत्पदसमभिव्याहारविशिष्टवाक्यस्येत्यर्थः। अस्य वृद्धव्यवहारदर्शनेनेति शेषः। तेन वाक्यशक्तिग्रहात्पूर्वकोशादितः शक्तिग्रहेऽपि न दोषः। पदानामेवान्वये शक्तिकल्पनं तु न युक्तम्, सामान्यतोऽन्वितार्थे

दर्पणव्याख्या

पदार्थानां प्रागुपस्थित्या तत्र पदार्थशक्तिग्रहसम्भवादिति भावः। * **अज्ञातैवेति** * वृत्त्यभ्युपगमस्तु शाब्दे भानानुपपत्त्यैवेति भावः। * **पदार्थवदिति** * सप्तम्यन्ताद्वतिः, उपमेये सप्तमीदर्शनात्। * **वाक्यार्थेऽपि** * संसर्गेऽपीत्यर्थः। इदञ्च बोध्यत्वं शक्तिरित्यभिप्रेत्य * **तद्ग्रहः** *=शक्तिग्रहः। लक्षणशब्दस्य चिह्नादौ प्रसिद्धेः प्रकृतोपयोग्यर्थपरतया तं व्याचष्टे—* **लक्ष्यत इति** *। मूले * **अर्थे इति** * निरूपितत्वं सप्तम्यर्थः। तच्छब्दार्थे शक्तिज्ञानेऽन्वेतीत्यभिप्रेत्य व्याचष्टे—* **पदेऽपीत्यादि** * * **तद्ग्रह इति** * वाक्यार्थनिरूपितशक्तिग्रह इत्यर्थः। अयं भावः—घटमानयेत्यादिवृद्धव्यवहाराद्यस्य पदे पदार्थशक्तिनिर्णयस्तस्य तद्वाक्यश्रवणे पदैः पदार्थोपस्थित्यादिसमवधाने मनसा तत्संसर्गोपस्थितिर्नानुपपन्ना। परन्तु मानसस्य प्रायः संशयात्मकस्यापि सम्भवात्तन्निश्चयार्थं शब्दाऽऽदरः। तत्र शक्तिग्रहहेतुलिङ्गादेर्निर्णायकस्य सत्त्वेन संशयकत्वासम्भवादिति। ननु शब्दनिष्ठशक्तिनिर्णयस्यैव शाब्दबोधे हेतुताऽवधारणेन तस्य शाब्दबोधात् प्रागुक्तरीत्याऽसम्भवेन वाक्यशक्तेः शाब्दबोधहेतुत्वं दुर्घटमेवेत्यत आह—* **वस्तुतस्त्विति** *।

तद्ग्रहः । आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् ॥ ६६ ॥
इयमेव मीमांसकानां वेदान्तैकदेशिनाञ्च गतिरित्याह—

प्रभा

पदानां शक्तिस्वीकारेऽपि सम्बन्धविशेषबोधाय तत्तत्समभिव्याहारे तत्तत्सम्बन्धबोधकारणत्वमभ्युपेयम् । अज्ञाते कारणत्वे बोधादर्शनेन तज्ज्ञानस्यापि कारणत्वमिति गौरवम् । 'गामानय' इत्यादौ चतुष्टयादिबोधापत्तिश्चेति वाक्यशक्तिस्वीकारे एव लाघवम् । संसर्गस्य कथञ्चिच्छाब्दविषयत्वोपपादनेऽपि विशिष्टबुद्धौ भासमानस्य विशेष्यविशेषणभावनिरूपितैव वाक्यशक्तिरिति पूर्वोक्तं न विस्मर्त्तव्यम् । तद्ग्रहः=विशेष्यविशेषणभावापन्नवाक्यार्थशक्तिग्रहः । तथाच शाब्दबोधम्प्रति वाक्यवृत्तिविशिष्टज्ञानमेव कारणम् । वृत्तिवैशिष्ट्यञ्च—स्वाश्रय (वाक्य) विषयकत्व—स्व 'वाक्यशक्ति' विषयकोद्बुद्धसंस्कारसामानाधिकरण्योभयसम्बन्धेन । तादृशवृत्तिविशिष्टज्ञानस्येदानीन्तनवाक्येष्वपि सुलभत्वान्न शाब्दबोधहेतुत्वे व्यभिचारसम्भवः । शाब्दबोधात्प्राग् वाक्यार्थोपस्थितेरनपेक्षणाच्च नोक्तदोषावकाशः । नन्वेवं यदि तर्हि पदस्फोटासिद्धिरत आह—आवापोद्वापाभ्यामिति—योजनवियोजनाभ्यामित्यर्थः । परम्=केवलम् । तद्ग्रहः=प्रत्येकपदे पदार्थनिरूपितशक्तिग्रहः । एवञ्च प्रत्येकपदशक्तिज्ञानसहकृताऽऽकाङ्क्षादिवशेन यदा वाक्यार्थबोधस्तदा पदस्फोट इति व्यवह्रियते । प्रकृतिप्रत्ययज्ञानमन्तरा 'वः' 'नः' इत्यादौ पदस्फोटवत् । यदा तु प्रत्येकपदशक्तिनिरपेक्ष्यैव वाक्यशक्तिज्ञानं बोधं जनयति तदा वाक्यस्फोट एव । यथा 'षट्सन्तः' इत्यत्र । यत्तु उपस्थिताः पदार्थास्तदुपस्थितिर्वा शाब्दबोधहेतुर्नतु पदज्ञानं वाक्यज्ञानं वा, तद्विनाऽपि शाब्दबोधदर्शनेन व्यभिचारात् । उक्तं हि—

'पश्यतः श्वेतिमारूपं ह्रेषाशब्दञ्च शृण्वतः । खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः' इति ।

तन्न, तथा सति चक्षुरादिना पदार्थोपस्थितौ शाब्दबोधापत्तेः । नचेष्टापत्तिः, केनाप्यननुमतत्वात् , 'पश्यामि' इत्यनुव्यवसायाविरुद्धत्वाच्च । चाक्षुषस्थले शाब्दत्वव्यवहारराभावान्न तथात्वमिति चेत्प्रकृतेऽपि तथात्वस्य वक्तुं शक्यत्वात् । श्वेतोऽश्वो धावति' इति धियोऽनुमानेनैवोपपत्तेः । एतेन पदार्था एव वाक्यार्थबोधका इत्यपि परास्तम्, प्रत्यक्षेण गवाद्युपस्थितौ कस्येयमिति जिज्ञासमानस्यापि सन्निहितं देवदत्तं पश्यतश्च पुंसस्तत्र स्वामित्वाध्यवसायाभावात् । तस्मान्निर्मूलाः पदार्था एव वाक्यार्थप्रत्यायका इति । किञ्च शाब्दबोधो नानुभवरूपोऽपि, स्वर्गनरकादिकं शाब्दयतः पुरुषस्य स्वर्गादिकमनुभवामीत्यप्रतीतेः । किन्तु स्मृत्यनुभवभिन्नज्ञानत्वव्याप्यं शाब्दत्वं जात्यन्तरमेव, तादृशव्यवहारदर्शनात् ॥ ६६ ॥

इयमेवेति—स्फोटस्वीकाररूपैवेत्यर्थः । गतिः=उपाय ।

दर्पणव्याख्या

* तद्ग्रहः * विशिष्टवाक्यार्थशक्तिग्रहः । तथाच शक्तिग्राहकशिरोमणिना व्यवहारेण पूर्वं वाक्ये एव शक्तिग्रहेण तस्यैव शाब्दबोधहेतुत्वावधारणात्तादृशवृत्तेश्च—स्वाश्रयविषयकत्व—स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्योभयसम्बन्धेन वैशिष्ट्यस्येदानीन्तनवाक्यज्ञानेऽप्यक्षतत्वान्न वृत्तिज्ञानस्य शाब्दबोधे हेतुतायां व्यभिचारः, मध्ये वाक्यार्थोपस्थितेरनपेक्षणाच्च नोक्तदोषावसर इति भावः । ननु तर्हि पदस्फोटस्य निरालम्बनतापत्तिरत आह—* आवापोद्वापाभ्यामिति * आनयनापसारणाभ्यामेकपदोपादानापरापदानुपादानाभ्यामित्यर्थः । * तद्ग्रहः *=प्रत्येकपदे प्रत्येकपदार्थशक्तिग्रहः । तथाच प्रत्येकपदशक्तिसाचिव्येनाऽऽकाङ्क्षादिवशात् पदाद्वाक्यार्थशाब्दबोधस्तदा पदस्फोटः, यदा तु तन्निरपेक्ष्यैव सा बोधं जनयति तदा वाक्यस्फोट इति मतद्वयं पर्य्यवस्यतीति भावः । केचित्तु—उपस्थिताः पदार्थास्तदुपस्थितिर्वा शाब्दबोधहेतुर्नतु पदज्ञानमपि, तद्विनाऽपि शाब्दबोधदर्शनेन व्यभिचारात् । तदुक्तम्—'पश्यतः श्वेतमारूपं ह्रेषाशब्दञ्च शृण्वतः । खुरविक्षेपशब्दञ्च

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ।
भाट्टास्तेऽपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम् ॥ ६७ ॥

भाट्टा इति—इति तदनुयायिनां वाचस्पति—कल्पतरुप्रभृतीनामुपलक्षणम् । ननूक्तपक्षद्वयमनुपपन्नम्, उत्पत्ते

प्रभा

सर्वत्र=सर्वविधिवाक्यजन्यबोधस्थले । वाक्यार्थः=संसर्गरूपः । लक्ष्य एव=लक्षणया बोध्य एव । भाट्टाः=कुमारिलभट्टानुयायिनो मीमांसकाः । अयमाशयः—तन्मते पदाभिहितैः प्रत्यासत्याऽऽकाङ्क्षायोग्यत्वसनाथैः पदार्थैर्लक्षणया वाक्यार्थः प्रतिपाद्यते । तत्र 'गामानाय' इत्यत्रानयतिरानयनत्वमभिधाय नयनव्यक्तिं लक्षयति । गोपदमपि गोकर्मके लक्षणाया स्वार्थद्वारेणानयनमेव प्रतिपादयति । एवं यत्र यत्र वाक्ये यो योऽर्थो विशेष्यत्वेन विवक्ष्यते तमेवेतराणि पदानि स्वार्थाभिधानद्वारेण तत्सम्बन्धिरूपेण लक्षयन्तीति । एतन्मते 'गभीरायां नद्यां घोषः' इत्यत्र प्रत्येकपदस्य तीरे लक्षणा न सम्भवति । तथाहि न नदीपदं तीरलक्षकम्, गभीरत्वस्य नदीधर्मतया तीरे गभीरपदार्थानन्वयापत्तेः । न गभीरं तीरम् । नापि गभीरपदं तथा, तीरे नद्यामित्यापत्तेः । नहि तीरं नदी, गभीरनदीतीरे घोषः इत्यर्थलाभाच्च । नापि गभीरपदं नदीपदं वा गभीरतीरे लाक्षणिकमन्यतरत्तात्पर्य्यग्राहकञ्चेति कस्य तात्पर्य्यग्राहकत्वं कस्य लक्षकत्वञ्चेत्यत्र विनिगमनाविरहेण यथात्वासम्भवादिति 'गभीरायां नद्याम्' इति वाक्यबोध्यस्य गभीराभिन्ननदीरूपार्थस्य स्वबोध्यसंयुक्तत्वसम्बन्धेन वाक्यस्यैव यथा लक्षणा तथा सर्वत्र वाक्यार्थभूतसंसर्गे उक्तरीत्या लक्षणा । एवञ्च यथा तन्मते वाक्यार्थज्ञानं तथा वैयाकरणमतेऽपि वाक्यात्मकः स्फोटः सिद्ध्येदिति भावः । उपलक्षणमिति=वस्तुतस्तु 'भाट्टाः' इत्यस्यैव भट्टानुयायिन इत्यर्थकतया शक्त्यैव वाचस्पत्यादिसंग्रहसम्भवेनोपलक्षणोक्तिश्चिन्त्येति गुरवः । लक्षणाया इति—पदसमूहात्मकस्य वाक्यस्य वाक्यार्थे (संसर्गे) शक्त्यभावात्तद्बोधोपपत्तये वाक्यस्य या लक्षणा तस्याः ग्रहे=ज्ञाने । इत्थमेव वैयाकरणाभिमतस्फोटरीत्यैव गतिम्=उपायं विदुरित्यर्थः । पक्षद्वयमिति=पदवाक्यस्फोटद्वयमित्यर्थः । यद्वा वाक्यलक्षणपक्षः, वाक्यस्फोटपक्षश्चेत्यर्थः । उत्पत्तेरिति=प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेरित्यर्थः । वर्णानित्यत्ववादिमतेनेदम् । तन्मते हि प्रथमक्षणे वर्णे उत्पद्यते । द्वितीयक्षणे तस्य स्थितिः । तत्रैव क्षणे वर्णान्तरस्योत्पत्तिः । तृतीयक्षणे वर्णस्य द्वितीयक्षणोत्पन्नवर्णेन नाशः, प्रत्यक्षयोग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्, शब्दस्य चाकाशरूपविभुविशेषगुणत्वात् । वैयाकरणनये तु 'परः सन्निकर्षः' (१।४।१०९) इति सूत्रे भाष्ये 'गौः' इत्यत्र 'यावद्गकारे वाग् वर्तते न तावदौकारे' इत्युक्त्या येनैव यत्नेनैको वर्णे उच्चार्य्यते तेन यत्नेन सहैव विनष्टे तस्मिन् वर्णे वर्णान्तरमुत्पद्यते इत्यर्थलाभेन न पूर्ववर्णस्थितिकाले उत्तरवर्णोत्पत्तिरिति प्रतीयते इति । वैयाकरणाभिमतवर्णनित्यतापक्षे आह—

दर्पणव्याख्या

श्वेतोऽश्वो धावतीति धीः' इति, तत्र, शब्दं विना जायमानस्य घटादिचाक्षुषस्यापि शाब्दत्वापत्तेः । तत्र पश्यामि, न शाब्दयामीत्यनुव्यवसायान्न शाब्दत्वं यदि तदा प्रकृतेऽपि समम्, उक्तप्रतीतेरनुमानेनैव निर्वाहात् तत्र शाब्दप्रत्ययस्तु सिद्ध एवेत्यादि स्वयमूह्यम् ॥ ६६ ॥ * उपलक्षणमिति * त्वन्मते 'गभीरायां नद्यां घोषः' इत्यादौ प्रत्येकपदशक्त्या स्वशक्यसम्बन्धरूपलक्षणया वोक्तदिशाऽभीप्सितार्थान्वये बोधासम्भवात् स्वबोध्यसम्बन्धस्य लक्षणत्वाभ्युपगमेन वाक्यार्थमात्रे वाक्यलक्षणाङ्गीकारादिति भावः । * पक्षद्वयमिति * पदवाक्यभेदेन व्यवस्थितं स्फोटद्वयमित्यर्थः । अनुपपत्तिमेवाह—

भिव्यक्तेर्वैकदाऽसम्भवेन उत्पन्नानामभिव्यक्तानां वर्णसमूहरूपपदज्ञानासम्भवात् । तथाच सुतरां तत्समूहरूपवाक्यज्ञानासम्भव इति चेन्न, उत्तरवर्णप्रत्यक्षसमये तस्मिन्नव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्ववर्णवत्त्वम्, तथा तदुत्तरप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन् सुग्रहमिति तादृशापूर्वीघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वात् ॥ ६७ ॥

प्रभा

अभिव्यक्तेरिति--प्रत्यक्षाविषयीभूतस्य सतोऽप्यर्थस्य प्रत्यक्षात्मकज्ञानविषयीभवनरूपाया अभिव्यक्तेरित्यर्थः। सा च वर्णोत्पादकत्वेन पराभिमता या कण्ठताल्वाद्यवच्छिन्नवायुसंयोगादिघटितसामग्री तया जन्यते। तथाचाभिव्यक्तेरपि योग्यविभुविशेषगुणज्ञानघटिततया उत्तरया तया पूर्वस्या नाशादेकोऽनेकवर्णाभिव्यक्तेरसम्भवः। ज्ञानविशेषविषयतारूपाभिव्यक्तिविशिष्टानेकवर्णानामपि युगपदवस्थानासम्भव एवेति भावः। तथाचानेकवर्णघटितपदस्य, तादृशपदघटितवाक्यस्य च श्रावणप्रत्यक्षात्मकज्ञानासम्भवः, विषयतासम्बन्धेन ज्ञानम्प्रति तादात्म्येन विषयस्य कारणतया पदवाक्यरूपविषयाभावेन तत्तादात्म्यासम्भवादिति भावः। उत्पन्नानामिति--अस्य मेलनासम्भवेनेति शेषः। तत्समूहेति--पदसमूहरूपेत्यर्थः, अवयवाभावेऽवयविनोऽवस्थानासम्भवात्। अभिव्यक्तिपक्षे पदवाक्ययोः प्रत्यक्षप्रकारमाह—उत्तरवर्णेति—वर्णानां क्रमेणोत्पत्तिस्तेष्वेव पूर्वोत्तरत्वं वक्तुं शक्यम्। वर्णनित्यत्वपक्षे तु वर्णानां सदैव सत्त्वात् पौर्वापर्यं न सम्भवतीति तदभिव्यक्तेरुत्पत्तिमत्तया तद्गतं पूर्वोत्तरत्वं वर्णेष्वारोप्यते, परम्परया बुध्यते वा। अत एव हि 'उत्तरवर्णप्रत्यक्षसमये' इति उपस्थितपूर्ववर्णवत्त्वमिति चोक्तम्। अभिव्यक्ता उच्चारिता वा वर्णा इति व्यवहारो नतूत्पादिता इति। अभिव्यक्तिश्च ज्ञानात्पूर्वं स्वाविषयत्वे सति स्वविषयत्वरूपैव। तथा—अव्यवहितत्वं येषां मते प्रागभावकालो न ध्वंसाधिकरणमिति ध्वंसाधिकरणकालश्च न प्रागभावाधिकरणमिति तन्मते अव्यवहितत्वम्—स्वध्वंसानधिकरणक्षणवृत्तित्वरूपम्। प्रकृते घटशब्दे घकाराकारयोर्यथा—घकाराव्यवहित अकारः, अकाराव्यवहितो घकारः। वर्णस्य नित्यत्वेन स्वविषयकाभिव्यक्तिविशिष्टाभिव्यक्तिविषयत्वरूपमेवाव्यवहितत्वं वर्णयोः। वैशिष्ट्यञ्च—स्वध्वंसानधिकरणक्षणवृत्तित्वसम्बन्धेन। अभिव्यक्तज्ञानरूपैव प्रथमक्षणे कण्ठतालवादिना घविषयकं ज्ञानमुत्पन्नं द्वितीयक्षणे तस्य स्थितिस्तत्क्षणे एवाकारस्य ज्ञानमुत्पन्नम्। तृतीयक्षणे पूर्वज्ञाननाश उत्तरज्ञानस्य स्थितिः। एवञ्च पूर्वज्ञानस्थितिक्षणे उत्तर-

दर्पणव्याख्या

* **उत्पन्नानामिति** * वर्णानित्यतावादिमते वर्णानां योग्यविभुविशेषगुणत्वेन स्वोत्तरोत्पन्नगुणनाश्यत्वादेकदाऽवस्थानासम्भवः। तन्नित्यतावादिमते त्वाह—* **अभिव्यक्तानामिति** * वर्णा नित्याः, किन्तु तदभिव्यक्तिरेवानित्या, वर्णोत्पादकत्वेनान्याभिमतानामेव कण्ठाद्यभिघातादीनां तदभिव्यञ्जकत्वाभ्युपगमात्। तथाचाभिव्यक्तेरपि योग्यविभुविशेषगुणतया स्वोत्तरोत्पन्नगुणनाश्यत्वाविशेषात् क्षणिकत्वात्तद्विशिष्टवर्णानामपि युगपदवस्थानासम्भव एवेत्यर्थः। नन्वस्तु वर्णानां युगपदनवस्थानं किमस्माकमनिष्टमत आह—* **वर्णसमूहेति** *। वाक्यस्फोटकल्पेऽपि तदाह—* **तथाचेति** *। * **ज्ञानासम्भव इतीति** * आशुविनाशिनां क्रमिकाणां मेलकासम्भवादन्तिमवर्णोत्पत्तिकाले, तदभिव्यक्तिकाले वा पूर्वपूर्ववर्णानां तावदभिव्यक्तानां वाऽवस्थानासम्भवेन तत्समूहरूपपदस्य, वाक्यस्य वा तादात्म्येन प्रत्यक्षकारणस्याभावात् प्रत्यक्षत्वाऽसम्भवेन तत्रोक्तशक्तिग्रहस्य गगनकुसुमायमानत्वादित्याखण्डलार्थः। अभिव्यक्तिपक्षमादाय समाधत्ते—* **उत्तरवर्णप्रत्यक्षेति** *। * **अव्यवहितोत्तरेति** * एतन्नये वर्णानां नित्यत्वेन सर्वेषामेव वर्णानामव्यवधानेन स्वाधिकरणक्षणो-

इदानीमखण्डपक्षमाह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा नच ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ ६८ ॥

पदे=पचतीत्यादौ, न वर्णाः, नातो वर्णसमूहः पदमिति शेषः । दृष्टान्तव्याजेनाह—वर्णेष्विति—एकारौकारऋकारादिवर्णेऽष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः ।

प्रभा

ज्ञानस्योत्पत्त्या स्वध्वंसानधिकरणोभूतोत्पत्तिस्थितिक्षणयोश्चान्यतरस्मिन् पूर्वस्य स्थित्या उत्तरस्योत्पत्त्या च वृत्तित्वेन उभयोरभिव्यक्त्योः परस्परविशिष्टत्वादवर्णयोरपि स्वविषयकाभिव्यक्तिविशिष्टाभिव्यक्तिविषयताऽव्यवहितत्वं सिद्धम् । वर्णानित्यत्वे च घकारस्थितिक्षणे एव द्वितीयवर्णोत्पत्तिरिति ध्वंसानधिकरणक्षणे उत्पत्तेः स्थितेश्च । अव्यवहितत्वेनाभिमतयोर्वर्णयोर्वृत्तित्वस्य सत्त्वादव्यवहितत्वं सिद्धम् । एवञ्चाव्यवहितत्वं पूर्ववर्णे उत्तरवर्णे च सिद्धम् । यन्मते प्रागभावाधिकरणकालोऽपि ध्वंसानधिकरणम्, तन्मतेऽव्यवहितत्वञ्च स्वविशिष्टत्वम्, वैशिष्ट्यञ्च—स्वाधिकरणक्षणोत्पत्तिकत्व—स्वोत्पत्त्यधिकरणस्थितिकत्वैतदन्यतरसम्बन्धेन । यन्निरूपितमव्यवहितत्वं तत्स्वपदग्राह्यम् । पूर्वत्वञ्च-स्वोत्पत्तिप्रागभावाधिकरणक्षणोत्पत्तिकत्वम् । उत्तरत्वञ्च—स्वोत्पत्तिक्षणवृत्तिप्रागभावप्रतियोगित्वरूपम् । प्रागभावानङ्गीकर्तृमते च पूर्वत्वम्—स्वोत्पत्त्यधिकरणक्षणध्वंसानधिकरणक्षणोत्पत्तिकत्वम्, उत्तरत्वञ्च-स्वोत्पत्तिक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वरूपम्बोध्यम् । वर्णनित्यत्वपक्षे तु स्वोत्पत्तिस्थाने स्वविषयकाविर्भावोत्पत्तिं निवेश्य पूर्वत्वोत्तरत्वाव्यवहितत्वानि ऊह्यानि । प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालावच्छिन्नावश्यवक्तव्यत्वरूपावसरसङ्गत्या शिष्याजिज्ञासितसखण्डस्फोटनिरूपणानन्तरमखण्डस्फोटनिरूपणमारभते—इदानीमिति—सखण्डस्फोटनिरूपणानन्तकाल इत्यर्थः । अखण्डेति—लाघवादिति शेषः । अखण्डत्वञ्चावयवाघटितत्वम् । ननु 'वर्णेषु अवयवा नच' इति प्रकृतानुपयुक्तमत आह—दृष्टान्तेति—दृष्टोऽन्तो निश्चयः=वादिप्रतिवादिनो बुद्धिसाम्येन सम्मतिर्यत्र स दृष्टान्त इत्युच्यते । न्यायनये निश्चित्साध्यको दृष्टान्तः । प्रकृते एकारादिवर्णेषु अवयवप्रयुक्तकार्य्यस्यादर्शनेनाखण्डत्वस्य वादिप्रतिवाद्युभयसम्मतत्वात् दृष्टान्तत्वम् । व्याजेनेति—वर्णानामप्यवयवशून्यत्वसाधयितुमिष्टमिति सूचयितुं व्याज-

दर्पणव्याख्या

त्तरकालवृत्तित्वादव्यवस्थापत्त्या स्वस्वाभिव्यक्तिगतमेवाव्यवहितोत्तरत्वं वाच्यम् । तदारोपादेव वर्णेष्वव्यवहितोत्तरत्वव्यवहारः । अत एव तत्रोपस्थितेर्विशेषणतया निवेशः । तच्चाव्यवहितत्वे सत्युत्तरत्वम् । अव्यवहितत्वञ्च—स्वध्वंसानधिकरणक्षणसम्बन्धित्वम् । तेन 'घटित घट' इत्यादौ नातिप्रसङ्गः । उत्तरत्वन्तु स्वाधिकरणक्षणध्वंसाधिकरणसमयोत्पत्तिकत्वम् । तेन, 'पिब, मधु, शीघ्रम्' इत्यादौ न शीधुभागस्य पदत्वम् । अन्यनिरूपिताव्यवधानादेरन्यसम्बन्धत्वाभावेन स्वत्वस्य परिचायकतया प्रवेशान्नानुगमशङ्काऽपि, उत्तरोत्तरवर्णोपस्थितेः पूर्वपूर्ववर्णोपस्थितिध्वंसानधिकरणसमयसम्बन्धित्वात्तदधिकरणक्षणध्वंसाधिकरणत्वाच्च निरुक्तसम्बन्धेन तद्वत्त्वमविकलम् । इत्थञ्च पूर्वपूर्ववर्णांऽशेऽलौकिकस्य चरमवर्णांऽशे लौकिकप्रत्यक्षस्य सम्भवात्तत्रार्थे बोधकत्वरूपशक्तेः सुग्रहत्वादुक्तपदवाक्यस्फोटसिद्धिर्निराबाधेति भावः ॥ ६७ ॥

इति पदवाक्यस्फोटनिरूपणम् ॥ १४ ॥

अखण्डस्फोटनिरूपणेऽवसरस्य सङ्गतित्वं सूचयन्नाह—* इदानीमिति * सखण्डस्फोटनिरूपणानन्तरमित्यर्थः । * अखण्डेति * पदवाक्ययोरखण्डत्वञ्च—अविद्यमानावयवकत्वम् । वर्णानामवयवाघटितत्वस्यापि सिषाधयिषितत्वादाह—* दृष्टान्तेति * दृष्टान्तवाक्यस्येत्रादिघटितत्वनियमेन तदभावात् कथं वर्णेष्वित्यादेस्तत्त्वमित्याशङ्क्य यथाशब्दान्तर्भावेण

क्वचिदिवेत्येव पाठः। एवं वाक्येऽप्याह—वाक्यादिति। पदानामपि वाक्याद्विवेकः=भेदो नास्तीत्यर्थः। अयं भावः—वाक्यम्, पदञ्चाखण्डमेव, नतु वर्णसमूहः, अनन्तवर्णकल्पने मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकतायाः, व्यञ्जकताया वाऽवच्छेदकं

प्रभा

पदमुपात्तम्। तथाच अन्योद्देशेनान्यसाधनमत्र व्याजः। ननु दृष्टान्तवाक्यानामौपम्यबोधके वादिपदघटितत्वनियमेन प्रकृते तदभावाद् दृष्टान्तेत्युक्तिरसङ्गतेत्याशङ्कायां यथाशब्दमध्याहृत्य दृष्टान्तत्वमुपपादयति—यथेति। वस्तुतस्तु वर्णस्फोटशब्देन प्रकृतिप्रत्ययस्फोटस्य ग्रहणमभिप्रेतमिति पूर्वमुक्तमिति वर्णस्फोटस्याप्यखण्डत्वं सूचयितुं 'वर्णेष्ववयवा नच' इत्युक्तम्। क्वचिदिति--क्वचित्पुस्तके 'वर्णेष्ववयवा इव' इति पाठ उपलभ्यते इत्यर्थः। ऋकारादिवर्णेषु प्रतीयमाना अपि रेफादयो यथा रेफादिग्रहणेन न गृह्यन्ते तथा पदे वर्णाः, वाक्ये पदानि च प्रतीयमानान्यपि तत्त्वतो न गृह्यन्त इत्यर्थः। तथाचेवपदघटित्वेन दृष्टान्तेत्युक्तिः सङ्गतैवेति भावः। विवेक इति--प्रविवेक इति सूचितम्, कारिकायां तथैव पाठात्। भेद इति--पृथग्भावार्थकाद् विच्धातोर्भावे घञि विवेकः=पृथग्भावः, स च भेदो एवेत्युक्तम्—भेद इति। प्रशब्दोऽत्रात्यन्तपरस्तथाच पदत्वेन वाक्यत्वेन भेदसत्त्वेऽपि अखण्डत्वेन भेदो नास्त्येव। एतच्च कारिकायामत्यन्तपदेन सूचितम्। ननु घटपटादिपदश्रावणप्रत्यक्षे घकारपकारादिवर्णानां श्रूयमाणतया वर्णानामसत्त्वप्रतिपादनमसङ्गतमित्याशङ्कायामाह—अयम्भाव इति। अखण्डमेवेति—अवयवाघटितमेवेत्यर्थः। एवकारव्यावृत्त्यर्थं दर्शयति—नत्विति। वर्णसमूहः=वर्णावयवकसमूहः। अनन्तेति--अनेकेत्यर्थः। एतेन अन्तशब्दस्य चरमावयववाचितया प्रत्येकशब्देषु चरमावयवस्य सत्त्वेनानन्तेत्यसङ्गतमित्यपास्तम्। मानाभावादिति—ननु 'करोति' 'गच्छति' इत्यादौ ककारो गकार इति विलक्षणप्रतीतिरेव मानमित्यत आह—तत्तद्वर्णेति— वर्णोत्पादः=वर्णोत्पत्तिरतज्जनकत्वेनेत्यत्र वैशिष्ट्यं तृतीयार्थः, तच्च प्रकारतानिरूपकत्वरूपम्। तस्य च सम्मतपदार्थैकदेशे ज्ञानेऽन्वयः। तथाच वर्णनिष्ठजन्यतानिरूपितजनकत्वप्रकारकज्ञानविषयीभूतो यो वायुसंयोगः=कण्ठताल्वाद्यभिघातरूपस्तन्निष्ठं पदवैजात्यमित्यन्वयः। विभिन्ना जातिः=धर्मो यस्य स विजातिः पदार्थस्तस्य भावो वैजात्यम्=असाधारणो धर्मः। प्रकृतेवायुसंयोगनिष्ठोऽत्वकत्वादिरूपः। स च 'अवर्णनिष्ठजन्यतानिरूपिता, अवर्णाभिव्यक्तिनिष्ठजन्यतानिरूपिता वा या वायुकण्ठसंयोगनिष्ठा जनकता सा यत्किञ्चिद्धर्मावच्छिन्ना, जनकतात्वाद् घटनिष्ठकार्यतानिरूपितकपालनिष्ठकारणतावत्, इतिकारणतावच्छेदकतया सिद्ध्यति। तथाच वायुसंयोगविशेषसमवेतं यदत्वकत्वादिकं

दर्पणव्याख्या

मूलं व्याचष्टे—* यथेति *। * इवेतीति * अवयवा इवेत्यर्थः। तथाच यथाश्रुतस्यैव दृष्टान्तत्वं नानुपपन्नमिति। 'विचिर् पृथग्भावे' इति प्रव्युपसृष्टघञन्तभावसाधनप्रविवेकशब्दार्थः पृथग्भावो भेदे पर्य्यवस्यतीत्याशयेनाह—* भेद इति * ननु पदादिप्रतीतौ तदवयवानां वर्णानामुपलभ्यमानत्वात् कथं तदसत्त्वमत आह—* अयम्भाव इति * अखण्डमेवेति * व्याख्यातार्थमेवकारव्यवच्छेद्यं स्पष्टयति—* नत्विति * अनन्तेति * अनेकेत्यर्थः। ननु 'ककारः' 'गकारः' इति प्रतीतिरेव वर्णकल्पने मानम्। यदि च वर्णाभिव्यञ्जकत्वेनोत्पादकत्वेन वाऽभिमतवायुसंयोगविशेषाभिव्यक्तस्फोटे एव कत्वादिना तादृशप्रतीतिविषय इति विभाव्यते, तदापि 'उत्पन्नः ककारः, नष्टः ककारः' इत्यादिप्रतीत्यनुपपत्तिः। स्फोटातिरिक्तककारादीनां त्वयाऽनभ्युपगमात्। तस्य च नित्यत्वात् व्यञ्जकनिष्ठाया उत्पत्तेस्तद्विषयत्वे सुखादीनामपि नित्यताऽऽपत्तिरत आह—* तत्तद्वर्णोत्पादकत्वेनेति * वैजात्ये प्रमाणं दर्शयति—* वर्णजनकताया इत्यादि *

वैजात्यमादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसम्भवात् । स्पष्टं हि भामत्याम्—"तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते" इत्युक्तं देवताधिकरणे । नचैवं वायुसंयोग एव वाचकोऽपि किं न

प्रभा

तत्स्फोटे आरोप्याकारादिप्रतीतिवैलक्षण्यसम्भव इति न सा पदवाक्यात्मकस्फोटस्य वर्णादिघटितत्वसाधिकेत्याह—वैजात्यमादायेति—आदायेत्यस्य समवायेन स्फोटे आरोप्येत्यर्थः । तथाचारोपितकत्वादिना स्फोट एव कः, गः, इत्यादिप्रतीतिविषयो नतु ककारादिवर्णान्तरमित्याशयः । नचोत्पन्नः ककार इत्यादिप्रतीतेः सर्वानुभूतत्वात् कत्वेन प्रतीयमानस्य स्फोटस्यानित्यत्वापत्तिः, 'सोऽयं ककारः' इति प्रत्यभिज्ञादर्शनेनोत्पत्तिप्रतीतेर्भ्रमत्वकल्पनात्, अभिव्यञ्जकगतोत्पत्तिनाशाद्यारोपेण तत्प्रतीत्युपपत्तेश्च । नच घटादेरपि कपालसंयोगविशिष्टस्फोटरूपत्वापत्त्या नित्यत्वापत्तिरिति वाच्यम्, सत्कार्य्यवादिना तन्नित्यतायाः स्वीकृतत्वात् । अविद्याकल्पितस्य मृद एवावस्थाविशेषस्य घटादेराविद्यकजलाहरणादिकार्य्यानुरोधेन स्वीकारस्यावश्यकत्वात् । भामत्याम्=वाचस्पतिमिश्रकृतायां भामतीनाम्न्यां शाङ्करभाष्यटीकायाम् । तारत्वेति=उच्चैस्त्वनीचैस्त्वादीत्यर्थः । आरोप्यत इति=भामत्याम् 'आरोप्यते' इत्युक्ते मूले 'आदाय' इत्यस्यारोप्येति व्याख्यातम् । देवताधिकरण इति—विद्यायज्ञादौ देवानामधिकारित्वतदभावान्यतरसाधको न्यायः=देवताधिकरणम् । तदुक्तम्—'नाधिक्रियन्ते विद्यायां देवाः, किं वाधिकारिणः, विदेहत्वेन सामर्थ्यहाने नैषामधिक्रिया । 'अविरुद्धार्थवादादिमन्त्रादेर्देहसत्त्वतः । अर्थित्वादेश्च सौलभ्याद्देवाद्या अधिकारिणः' इति । विषयसंशयपूर्वपक्षोत्तरपक्षनिर्णयबोधकवाक्यसमूहोऽधिकरणम् । तदुक्तम्—'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्' इति । वायुसंयोग एवेति—'तद्धेतोः' इति न्यायेन आरोपितकत्वादेर्वाचकत्वावच्छेदकत्वकल्पनापेक्षया वायुसंयोगनिष्ठस्यारोपितस्य तस्य वाचकतावच्छेदककल्पने लाघवाच्च वायुसंयोग एव वाचकोऽस्त्विति भावः । 'पदं वाक्यं वा शृणोमि' इत्यनुभवात् स्फोटात्मकवाचकप्रत्यक्षमनुभवसिद्धम् । यदि वायुसंयोग एव वाचकः स्यात् तदा तस्यातीन्द्रियतया प्रत्यक्षं न स्यात् । नच स्फोटवादिनयेऽपि अतीन्द्रियवायुसंयोग एव वाचकः स्यात् तदा तस्यातीन्द्रियतया प्रत्यक्षं न न स्यात् । नच स्फोटवादिनयेऽपि अतीन्द्रियवायुसंयोगगतकत्वादेः प्रत्यक्षं स्यादिति वाच्यम्, 'सुरभि चन्दनम्' इति चाक्षुषप्रत्यक्षे चक्षुरयोग्यस्यापि सौरभस्य भानवच्छ्रवणायोग्यस्यापि अभिव्यञ्जकगतकत्वादिधर्मस्य श्रावणप्रत्यक्षत्वसम्भवात् । वायुगतस्य, वायुसंयोगगतस्य वा कत्वादेः स्फोटे भानसम्भवे पक्षद्वयेऽपि कादिवर्णा अनर्थका इति शब्दकौस्तुभे स्पष्टम् । नच कत्वादेः स्फोटेऽभावेऽपि समवायेन प्रतीतौ भ्रमत्वं स्यादिति वाच्यम्, स्वाश्रयाभिव्यङ्ग्यत्वसम्बन्धेनैव कत्वादेः स्फोटे भानाङ्गीकारात् । तेन सम्बन्धेन च तत्र तस्य सत्त्वेन भ्रमत्वासम्भवात् । नच स्वाश्रयाभिव्यङ्ग्यत्वस्य सम्बन्धत्वे मानाभावः, कादिविषयकविशिष्टबुद्धेरेव मानत्वात्, प्रतियोग्यनुयोगिभ्यां भिन्नो विशिष्टबुद्धिनियामकश्च सम्बन्ध इति निय-

दर्पणव्याख्या

तथाच तादृशवैजात्यं समवायेन स्फोटांशे आदाया आरोप्योक्तप्रतीतिवैलक्षण्योपपत्तौ न तदनुपपत्तिरतिरिक्तककारादिवर्णसाधिका । नाऽप्युत्पन्नः क इत्यादिप्रतीतिस्तथा, 'सोऽयं कः' इत्यभेदप्रत्यभिज्ञारूपबाधकसत्त्वेन तादृशप्रतीतेर्भ्रमत्वात् । नापि सुखादीनां नित्यताऽऽपत्तिः, तन्नाशकस्य स्वोत्तरवर्त्तियोग्यात्मकविशेषगुणस्य जागरूकत्वादिति भावः । *भामत्याम्*= तन्नामकवाचस्पतिग्रन्थे । *आरोप्यत इतीति* एतदनुरोधेनैवादायेति पदमारोपपरतया व्याख्यातम् । मतान्तरन्तु वक्ष्यते- * एवेति । * वायुसंयोग एवेति *— [illegible] वायुसंयोग एवेत्यर्थः । एवकारेण वर्णात्मकस्फोटव्यवच्छेदः

स्यादिति वाच्यम् , प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात् तथाच वाचकत्वा-न्यथानुपपत्त्या तदेवेदं पदम् , 'तदेवेदं वाक्यम्' सोऽयं गकारः, इति प्रतीत्या च स्फोटोऽखण्डः सिद्ध्यति । एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचकत्वमस्तीत्यपास्तम् ।

प्रभा

मात् । अत एव 'लोहितः स्फटिकः' इति बुद्धौ स्वाश्रयसंयोगस्य विशिष्टबुद्धिनियामकत्वोपपत्तिः । नच स्फोटे समवायेन कत्वादिप्रतीत्या भ्रमत्वमेवास्त्विति वाच्यम्, उत्तरकाले बाधाभावेन भ्रमत्वासम्भवात्. उक्तपरम्परासम्बन्धेन तत्प्रतीतेः प्रमात्वोपपत्तौ भ्रमत्वकल्पनाया अन्याय्यत्वात् । एवञ्चोक्तरीत्या कत्वादिना स्फोटस्य प्रत्यक्षत्वसम्भव इत्याह—प्रत्यक्षोपलभ्यमानेति । कादिरेवेति—कत्वादिना प्रतीयमानस्फोटस्यैवेत्यर्थः । तथाचेति—वर्णानामनङ्गीकारे वायुसंयोगानामवाचकत्वे चेत्यर्थः । वाचकत्वेति—वर्णानां तत्समूहरूपपदवाक्यानाञ्च स्वीकारे उत्पत्तावाविर्भावे वा वर्णानां युगपदवस्थानासम्भवेन तेषां वाचकत्वानुपपत्त्या वर्णानामनित्यत्वे प्रत्यभिज्ञानुपपत्त्या पदवाक्ययोरेकत्वानुपपत्त्या चेत्यर्थः । प्रत्यभिज्ञाद्यनुपपत्तिमेव दर्शयति—तदेवेति—अव्यवहितोत्तरत्वाद्युक्तसम्बन्धेन वैशिष्ट्यमादाय पदादिज्ञानोपपादनेऽप्यनित्यवर्णघटितत्वेन पदवाक्ययोरप्यनित्यत्वापत्त्या, नित्यत्वपक्षेऽनन्तवर्णानन्ततदाविर्भावकल्पनापत्त्या च प्रत्यभिज्ञा दुर्वचैव स्यादित्यखण्ड एव स्वीकार्य्य इति भावः । नच व्यक्तिभेदेऽपि 'तदेवेदं शाटकम्' तदेवेदमौषधम्' इति तत्त्वेन प्रत्यभिज्ञादर्शनाद्वर्णानामनित्येऽपि साजात्येनोक्तप्रत्यभिज्ञोपपत्तिः. साजात्यमादाय 'तज्जातीयमिदम्पदम्' इति व्यवहारस्याप्यापत्तेः । नचेष्टापत्तिः, 'तदेवेदम्पदम्' इतिव्यवहारस्यैवेष्टत्वप्रसिद्धेः । एकस्फोटास्वीकारेऽपि 'एकं वनम्' एको धान्यराशिः' इति तदुपपत्तिरित्यपि न, वनराश्यादेरपि पलाशाम्रादिभेदेनातिरिक्तस्यैव स्वीकारात् । तदाह—अखण्ड इति । एतेनेति—प्रत्यभिज्ञाऽनुपपत्त्याऽनन्तवर्णानामकल्पनया, लाघवेन च नित्यत्वेन सिद्धस्य स्फोटस्य वाचकत्वव्यवस्थापकेत्यर्थः । व्यतिरेकेण=भिन्नत्वेन । अननुभवादिति=एतेन स्फोटे एव माना-

दर्पणव्याख्या

समवायस्यानारोपितस्य वाचकतावच्छेदकत्वे लाघवात् । तथापि संयोगस्यैव काद्यात्मकत्वमस्त्वित्यर्थः । समाधत्ते—*प्रत्यक्षेति * अयमाशयः—कादिवर्णानामुक्तसंयोगात्मकत्वेऽतीन्द्रियताऽऽपत्तिः । नच सेष्टा, अनुभवविरोधात् । नचोक्तकत्वस्यातीन्द्रियधर्मत्वेन कथं साक्षात्कारविषयत्वमिति वाच्यम्, सुरभि चन्दनमिति प्रतीतौ चक्षुरयोग्यस्यापि सौरभादेश्चाक्षुषविषयत्ववत्तस्यापि श्रावणप्रत्यक्षत्वसम्भवात् । विषयबाधेन परं स्फोटांऽशे कत्वप्रतीतेर्भ्रान्तित्वमिति । अन्ये तु—कादिप्रतीतिर्यदि स्फोटांशे कत्वादिकं समवायेनावगाहेत तदा तस्याभ्रान्तत्वसम्भावना, किन्तु स्वाश्रयाभिव्यङ्ग्यत्वसम्बन्धेनैव तदंशे वैजात्यम् । नच स्वाश्रयाऽभिव्यङ्ग्यत्वस्य सम्बन्धत्वे प्रमाणाभावः, कादिप्रतीतेरेव मानत्वात् । विशिष्टप्रतीतिनियामकविशेषो हि सम्बन्धः । अत एव 'लोहितः स्फटिकः' इति बुद्धेः स्वाश्रयसंयोगस्य सम्बन्धतामामनन्ति । नच समवायविषयैव सा भ्रान्तिः । यथाकथञ्चित् प्रतीतेः प्रमात्वोपपत्तौ भ्रमत्वकल्पनाया अन्याय्यत्वात् अधिकमग्रे वक्ष्यत इत्याहुः । उपसंहरति—* तथाचेति * वाचकत्वानुपपत्त्येति * पदवाक्ययोर्वर्णसमूहरूपत्वे उक्तरीत्या वर्णानां युगपदवस्थानासम्भवेन वाचकत्वग्रहानुपपत्त्येत्यर्थः । वर्णानामनित्यत्वे प्रत्यभिज्ञाऽनुपपत्तिः, साऽप्यभिन्नये नास्तीत्याह—* तदेवेदमित्यादि * तत्तद्व्यक्त्यभेदावगाहिपदाविशेष्यकप्रत्यभिज्ञानुपपत्त्या चेत्यर्थः । उक्तरीत्या कथञ्चिच्छक्तिग्रहोपपादनेऽप्यनित्यवर्णघटितपदवाक्ययोरनित्यतया प्रत्यभिज्ञाऽनुपपत्तिर्दुष्परिहरैवेति भावः । * एतेनेति * 'अपास्तम्' इत्यन्वयि, प्रत्यभिज्ञानुपपत्तिसिद्धाखण्डस्फोटस्य वाचकत्वव्यवस्थापनेनेत्यर्थः । * अननुभवादिति *

तेषां स्फोटातिरिक्तत्वाभावात्। यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसम्भाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कार-

प्रभा

भावेन तस्य वाचकत्वं दूरापास्तमेवेति सूचितम्। तेषाम्=गकारादिवर्णानाम्-अतिरिक्तत्वाभावादिति-परम्परया प्रतीयमानवायुसंयोगगतगत्वादिप्रकारकप्रतीतिविषयस्फोटस्यैव वाचकत्वस्वीकारेणातिरिक्तस्वतन्त्रवर्णानामभावादित्यर्थः। कैयटोक्तं स्फोटसाधनप्रकारं दूषयितुं तन्मतमुपन्यस्यति—यत्त्विति—वर्णानां प्रत्येकं वाचकत्वं समुदायभावमापन्नानां वेति विकल्प्याद्यं दूषयति—वर्णानामिति। द्वितीयपक्षं निरस्यति—समुदायस्येति—'समुदायस्य 'ज्ञानमसम्भाव्यम्' इत्यन्वयः। क्रमवतामिति—क्रमः=पौर्वापर्यम्। तेनोत्पत्तिमतामाविर्भवतां वेत्यर्थः। ननु क्रमेणोत्पन्नां ज्येष्ठमध्यमकनिष्ठपुत्रादीनामिव समूहवद्वर्णानामपि तत्सम्भव इत्यत आह—आशुतरेति—क्रमेणोत्पन्नानां सहोत्पन्नानां वा स्थायित्वे एव समुदायत्वसम्भवादाशुतरोत्पन्नानां पूर्ववर्णस्थित्यधिकरण-द्वितीयक्षणोत्पन्नानां समुदायस्य ज्ञानमसम्भवि। एकक्षणोत्पन्नानां मुरज-मृदङ्ग-वीणादिशब्दानां समुदाय-प्रत्यक्षस्यानुभवसिद्धत्वादत्राशुतरोत्पन्नपदमाशुतरविनाशिनाम् तृतीयक्षणवृत्तिध्वंसप्रतियोगिनामुपलक्षणम्। तृतीयादिक्षणे पूर्वपूर्ववर्णानां नाशेन वर्णद्वयसमुदायस्य प्रत्यक्षसम्भवेऽपि वर्णत्रयादिसमुदायस्य ज्ञानमसम्भाव्येव। तदुक्तम्—ज्ञानमसम्भाव्यमिति। अभिव्यक्तेरपि तृतीयक्षणवृत्तिध्वंसप्रतियोगितया सैव गतिरिति भावः। विषयतासम्बन्धेन प्रत्यक्षं प्रति तादात्म्यसम्बन्धेन विषयस्य कारणतया वर्णसमुदायरूपविषयस्यैवासत्त्वे प्रत्यक्षासम्भवादित्याशयात्। वर्णसमूहस्यैव वाचकत्वसमर्थनं केनाचिदुक्तं खण्डयन् कैयट आह—पूर्वपूर्ववर्णेति—वर्णस्यानित्यत्वनये वर्णस्य श्रावणप्रत्यक्षात्मकानुभवासम्भवात् तज्जन्यसंस्कारासम्भवः। तथाहि-प्रथमक्षणे वर्ण उत्पद्यते, द्वितीयक्षणे तस्य स्थितिः, वर्णान्तरस्य चोत्पत्तिः, तृतीयक्षणे उत्पन्नेन वर्णान्तरेण पूर्ववर्णस्य नाशः, योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वनियमात्। तथाच द्वितीयक्षणे एव वर्णस्य श्रावणानुभवो वाच्यः। स च न सम्भवति, गत्वादिधर्मविशिष्टव्यक्तिविषयात्मकस्य तस्य विशिष्टबुद्धित्वेन तत्र च विशेषणज्ञानं कारणमिति नैयायिकैः स्वीकृतत्वात्। तथाच ततः पूर्वं गत्वादिधर्ममात्रस्य निर्विकल्पं ज्ञानमपेक्ष्यते। तस्य चोत्पत्तिक्षणे गत्वरूपविषयाभावेनासम्भवः, विषयतासम्बन्धेन प्रत्यक्षम्प्रति तादात्म्येन विषयस्य कारणतया विषयस्यैवासत्त्वे प्रत्यक्षासम्भवात्। तदुक्तम्—'सम्बद्धं वर्तमानञ्च दृश्यते चक्षुरादिना' इति गकाराद्युत्पत्तिक्षणोत्पन्नतया गत्वादिस्मृत्यैव द्वितीयक्षणे एव सविकल्पकज्ञानसम्भव इति तु न वाच्यम्, पूर्वं जातकादाचित्कगत्वाद्यनुभवजस्मृत्या विशिष्टबुद्धिसम्भवेऽपि प्राथमिकगत्वादिविशिष्टबुद्धेरुपपादनस्य वक्तुमशक्यत्वादिति चेदत्रोच्यते—संसारस्यानादितया कस्यापि गत्वादिज्ञानस्य प्राथम्यासम्भवेन नवजातशिशोर्जीवनादृष्टवशात् प्रबुद्धसंस्कारजन्यस्तनपानप्रवृत्तिप्रयोजकेष्टसाधनत्वविषयकस्मृतेरिवैतज्जन्मनि प्राथमिकगत्वादिविशिष्टबुद्धिजनकगत्वादिस्मृतेः कल्पनेनोक्तानुपपत्तेरभावात्। गत्वादिस्मृति-

दर्पणव्याख्या

तथाच तत्रैव प्रमाणाभावेन वाचकत्वं दूरपराहतमिति भावः। * तेषाम् * गकारादिवर्णानाम् * स्फोटातिरिक्तेति * गत्वप्रकारकप्रतीतिविषयगादिस्फोटस्यैवास्माभिर्वाचकत्वाभ्युपगमादिति भावः। आशुतरविनाशिनां सहोत्पन्नानां समुदायासम्भवादुक्तम्—* क्रमवतामिति *। क्रमिकाणामपि स्थायिनां सहावस्थानादुक्तम्—* आशुतरेति * तृतीयक्षणवृत्तिध्वंसप्रतियोगिनामित्यर्थः। * असम्भाव्यमिति * प्रत्यक्षे तादात्म्येन विषयस्य हेतुतया समूहरूपविषयस्यैवाभावादिति भावः। * पूर्वपूर्वेति * ननु वर्णानित्यतावादिमते तृतीयक्षणवृत्तिध्वंसप्रतियोगिनां तेषां प्रत्यक्षस्यैवा-

सहकारेणैकदा समूहालम्बनरूपसकलज्ञानसम्भवस्तु सरो रसः, राज-जरा, नदी-दीनादिसाधारणं इत्यतिप्रसङ्ग

प्रभा

प्रयोजकसंस्कारस्योद्बोधकल्पने मानन्तु गत्वादिविशिष्टानुभव एव। केचित्तु प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वसामानाधिकरण्य—स्वाव्यवहितपूर्ववर्तित्वोभयसम्बन्धेन योग्यविभुविशेषगुणः कारणम्, इति सामान्यतः कार्य्यकारणभावो यदि स्यात्तदोक्तरीत्या गत्वादिविशिष्टस्य प्रत्यक्षं न स्यात्। परन्तु मरणाव्यवहितप्राक्कालोत्पन्नशब्दनाशे, सुषुप्तिप्राक्कालोत्पन्नज्ञानादिनाशे चोक्तोभयसम्बन्धेन योग्यविभुविशेषगुणस्याभावेनोक्तकार्य्यकारणभावे व्यभिचारवारणाय कार्य्यतावच्छेदककोटौ चरमगुणातिरिक्तत्वेन योग्यविभुविशेषगुणे संकोचकल्पनवत् प्राथमिकगत्वादिविशिष्टबुद्धिविषयवर्णातिरिक्तत्वेनापि संकोचात् प्राथमिकगत्वादिविशिष्टबुद्धिविषयवर्णस्य तृतीयक्षणस्थायित्वस्यापि स्वकारेण द्वितीयक्षणस्थगत्वादिनिर्विकल्पकज्ञानमादाय तृतीयक्षणे सविकल्पकज्ञानकल्पने न काचिदाननुपपत्तिः। गुणे योग्यत्वञ्च—न लौकिकप्रत्यक्षविषयत्वम्, निर्विकल्पकस्य प्रत्यक्षाविषयत्वेन स्वोत्तरोत्पन्नज्ञानादिना नाशानुपपत्तेः। किन्तु 'लौकिकसाक्षात्कारविषयत्व—निर्विकल्पकान्यतरत्वरूपम्। प्राथमिकगत्वादिविशिष्टबुद्धिनाशम्प्रति स्वोत्तरचतुर्थक्षणवृत्तित्वविशिष्टं स्वयमेव कारणम्। एवमेव चरमज्ञाननाशम्प्रति स्वोत्तरक्षणवृत्तित्वविशिष्टं स्वयमेव कारणमिति सर्वं सुस्थम्। समूहालम्बनेति—'गौः' इत्यत्र 'गकारः' औकारः, 'विसर्गश्च' इत्येवंरूपः, गत्वौत्वविसर्गत्वादिनानाधर्मनिष्ठप्रकारताकनानात्तद्व्यक्तिनिष्ठमुख्यविशेष्यतारूपसमूहालम्बनात्मकेत्यर्थः। प्रकारताद्वयादिनिरूपितमुख्यविशेष्यताद्वयादिनिरूपकज्ञानत्वस्यैव समूहालम्बनत्वात् समूहः उक्तरूपः, आलम्बनं विषयो यस्य ज्ञानस्य तत्समूहालम्बनम्। सकलेति—तत्तत्पदघटकसर्ववर्णेत्यर्थः। सरः रसः, इत्युभयत्रापि सकाराकाररेफाकारविसर्गात्मकवर्णसंस्कारसहकारेण तादृशवर्णसमूहस्य ज्ञानसत्त्वेन सरोरसयोः, जरा राजा, नदी दीनादिपदानां समानार्थत्वापत्तिरित्याह—अतिप्रसङ्ग इति—सरःशब्दादिघटकसकलवर्णानुभवजन्यसंस्कारसहकारेण तादृशवर्णसमुदायविषयकसमूहालम्बनात्मकज्ञानेन तत्तदर्थबोधापत्त्या पर्य्यायापत्तिरूपातिप्रसङ्ग इति भावः। नच येन क्रमेण वर्णानुभवस्तेनैव क्रमेण स्मरणेऽपि वर्णभाने न दोष इति वाच्यम्, पूर्वं ज्ञातस्य पश्चात्, पश्चाज्ज्ञातस्य पूर्वमपि स्मरणदर्शनेन तादृशनियमासिद्धेः। नचान्यत्र घटपटादिविषयेऽनुभवस्मरणयो क्रमनियमाभावेऽपि वर्णविषयेऽनुभवस्मरणयोः क्रमनियम इति वाच्यम्, परश्वो ज्ञातपदस्य प्रथमं श्वो ज्ञातपदस्य पश्चादपि स्मरणदर्शनेन क्रमेणैव वर्णस्मरण-

दर्पणव्याख्या

सम्भवात् कथं तज्जन्यसंस्कारस्य सहकारितासम्भवः। तथाहि—कादिप्रतीतिः ककारादौ विशेषणतया कादित्वमवगाहते। विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतया ककाराद्युत्पत्तिर्द्वितीयक्षणे निर्विकल्पकमभ्युपेत्य तृतीयक्षणे विशिष्टज्ञानं वाच्यम्, तच्च न सम्भवति, 'सम्बद्धं वर्तमानञ्च दृश्यते चक्षुरादिना' इति वृद्धोक्तेः। प्रत्यक्षे विषयस्य कार्य्यसहभावेन हेतुतया तृतीयक्षणे तद्वर्णरूपविषयस्याभावात्। नच ककाराद्युत्पत्तिक्षणोत्पन्नकत्वादिस्मृत्यैव द्वितीयक्षणे एव सविकल्पसम्भव इति वाच्यम्, एवमपि प्राथमिकविशिष्टबुद्धेर्दुरुपपादत्वादिति चेत्। अत्र वदन्ति—संसारस्यानादितया बालस्य स्तनपानप्रवृत्तिहेत्विष्टसाधनत्वस्मृतेरिव प्राथमिककत्वादिविशिष्टबुद्धिजनकस्मृतेः सम्भवान्न तदनुपपत्तिः। ककाराद्युत्पत्त्यनन्तरं ककारो गकार इति विशिष्टबुद्धेरेव च तादृशकल्पने मानमिति। अन्ये तु—प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वसामानाधिकरण्य—स्वाव्यवहितपूर्ववृत्तित्वोभयसम्बन्धेन—यदि सामान्यतस्तादृशविशेषगुणस्य कारणता स्यात्तदा ककारादिप्रत्यक्षानुपपत्तिः प्रसज्येत अपि, सैव न, अन्तिमशब्दनाशे सुषुप्तिप्राक्कालोत्पन्नज्ञानादिनाशे च व्यभिचारात्। किन्तु विजातीयगुणनाशे वैजात्यं चरमशब्दादिव्यावृत्तमिव प्राथमिकविशिष्टबुद्धिविषयवर्णव्यावृत्तमपि। नच तादृशवैजात्ये माना-

इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः, तत्तुच्छम्; पदज्ञानमसम्भवस्योपपादितत्वात्। वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च।

प्रभा

स्याप्यनुभवविरुद्धत्वात्। इतीति—अतिप्रसङ्गरूपहेतोरित्यर्थः। अखण्डः—वर्णावयवशून्यः। नादाभिव्यङ्ग्य इति—नादो ध्वनिस्तदन्तर्गतवर्णाभिव्यङ्ग्य इत्यर्थः। तुच्छमिति—पौर्वापर्य्यभावानापन्नसकलवर्णज्ञाने सत्येवोक्तातिप्रसङ्गभीत्या स्फोटसाधनं सङ्गच्छेत। तच्च न सम्भवति, पौर्वापर्य्यभावापन्नवर्णघटितपदज्ञानस्य सम्भवेन स्फोटसाधकातिप्रसङ्गरूपहेतोरसिद्धिः, स्फोटासिद्धिप्रसङ्गादित्युक्तम्—तुच्छमिति। उपपादितत्वादिति—उत्तरवर्णप्रत्यक्षसमये तस्मिन्नव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्वपूर्ववर्णवत्त्वम्, इत्यादिग्रन्थेन खण्डस्फोटनिरूपणावसरे उपपादितत्वादित्यर्थः। स्वाव्यवहितोत्तरत्वसम्बन्धेन प्रथमवर्णवैशिष्ट्यं द्वितीयवर्णे, प्रथमवर्णविशिष्टद्वितीयवर्णवत्त्वोक्तसम्बन्धेन तृतीयवर्णे इत्येवंरीत्या चरमवर्णविषयकश्रावणप्रत्यक्षेण तदन्यवर्णविषयकज्ञानलक्षणसन्निकर्षेण पदज्ञानमुपपादितमिति भावः। यदुक्तं 'नादाभिव्यङ्ग्यो वाचकः' ध्वन्यन्तर्गतवर्णाभिव्यङ्ग्यः स्फोटो वाचक इत्येव तदर्थस्तद्विकल्प्य दूषयति—वर्णानामिति। विकल्पग्रासाच्चेति—एवञ्च प्रत्येकं व्यञ्जकत्वे प्रथमवर्णाभिव्यक्तस्फोटेनार्थबोधे सिद्ध इतराभिव्यक्तेर्वैयर्थ्यम्। समुदितानां व्यञ्जकत्वन्तु न सम्भवति, वर्णानां नित्यत्वानित्यत्वयोरुभयोरपि पक्षयोः समुदायासम्भवस्य पूर्वमुपपादितत्वादिति कैयटमतं खण्डयितुर्ग्रन्थकारस्याशयः। अपरे तु कैयटमतमेव समर्थयन्ति—पूर्वं पदज्ञानं निराक्रियते। तथाहि—पूर्वपूर्ववर्णस्थित्यधिकरणद्वितीयक्षणे यदि द्वितीयादिवर्णोत्पत्तिः स्यात्तदा यथाकथञ्चित् पदवाक्यप्रत्यक्षमपि स्यात्तदेव तु न सम्भवति, शब्दानित्यत्वपक्षे पूर्ववर्णज्ञाननाशानन्तरमेव द्वितीयवर्णोत्पत्ते वैयाकरणाभिमतत्वात्। तदुक्तम्—'परः सन्निकर्षः संहिता' इति सूत्रे भाष्ये 'यावद्गकारे वाग्वर्तते न तावदौकारे' येनैव यत्नेनैको वर्ण उच्चार्यते तेनैव विच्छिन्ने तस्मिन्वर्णे उपसंहृत्य तं यत्नमन्यं यत्नमुपादाय द्वितीयः प्रवर्तते' इति। एवञ्च पूर्ववर्णाभावोऽव्यवहितोत्तरत्वेन वैशिष्ट्यमप्यसम्भवि। किञ्च वर्णानां क्षणिकत्वमते तेषामुच्चरितप्रध्वंसित्वेन तदुत्पत्तेरभिव्यक्तेर्वा क्षणिकत्वेन चातीन्द्रियक्षणावच्छिन्नत्वाद्वर्णप्रत्यक्षानुपपत्तौ सुतरां पदादिप्रत्यक्षं दुर्वचम्। किञ्च नष्टविद्यमानयो र्यथा कालिकसम्बन्धो न सम्भवति तथा अव्यवहितोत्तरत्वादिरप्यसम्भव्येव। अन्यथा 'नष्टो घटो जलवान्' इति व्यवहारस्यापि प्रमात्वापत्तिः। ननु 'नष्टो घटो जलवान्' इति नापादयितुं शक्यते, 'तदस्यास्त्यस्मिन्' इति सूत्रविहितमतुपा वर्तमानसम्बन्धस्यैवाभिधानादिति चेन्न, तत्रास्तिग्रहणस्य भाष्यकृता 'अस्तिमान्' इति प्रयोगोपपत्तये स्वीकृतत्वात्। तदुक्तं भाष्ये—'अस्तिसामानाधिकरण्ये मतुब्विधीयते। नचास्तेरस्तिना सामानाधिकरण्यम्, तदेतत्क्रियमाणमपि प्रत्ययविध्यर्थम्, नोपाध्यर्थम्' इति। यद्यपि

दर्पणव्याख्या

भावः, नाश्यताऽवच्छेदककोटिप्रविष्टतयैव तत्सिद्धेः। तथाचान्तिमशब्दनाशे तद्द्वितीयक्षणस्थैव तादृशवर्णनाशेऽपि न तत् तृतीयक्षणस्थतद्व्यक्तित्वेन हेतुत्वकल्पनान्न तृतीयक्षणस्थायिनस्तस्य प्रत्यक्षानुपपत्तिरुक्तहेतुमद्भावस्वीकारेऽपीत्याहुः। * अतिप्रसङ्ग इति * सदृशशब्दघटकसकाराकाररेफविसर्गानुभवजन्यसंस्कारे रसबोधापत्तिरित्यर्थः। * अखण्डः *= वर्णाघटितः। * नादाभिव्यङ्ग्य इति * ध्वन्यन्तर्गतवर्णाभिव्यङ्ग्य इत्यर्थः। उपपादितत्वादित्यस्य खण्डस्फोटनिरूपणावसर इति शेषः। तादृशप्रत्यक्षस्यान्तिमवर्णांशे लौकिकस्यातीतवर्णांशेऽलौकिकस्य सरो रस इत्यानतिप्रसक्तस्योपपादितत्वादित्यर्थः। अतिरिक्तस्य वाचकत्वे दूषणमाह—* वर्णानामिति *। * विकल्पग्रासादिति *। प्रत्येकव्यञ्जकत्वे आद्यवर्णादेव तदभिव्यक्तिसम्भवे इतरोच्चारणवैयर्थ्यापत्तेरतिप्रसङ्गाच्च। समुदायस्य तूक्तरीत्या दुरुपपादकत्वेन तद्व्यञ्ज

प्रभा

'अस्त्यत्र वर्तमानकालोऽस्ति, कथं तर्हि भूत-भविष्यत्सत्ता गम्यते 'धातुसम्बन्धे प्रत्ययाः' इति भाष्यात् मतुपा वर्तमानकालिकसत्ताया एव प्रत्ययकत्वबोधनात् 'नष्टो घटो जलवान्' इत्यादिप्रयोगापत्तेर्न सम्भवस्तथापि यथाकथञ्चित्पदादिप्रत्यक्षत्वोपपादनेऽपि तत्र वृत्त्याश्रयत्वज्ञानासम्भवः, पदादेरविद्यमानत्वात्। नन्विदानीम् अतीते पदादौ वृत्त्याश्रयत्वाभावेऽपि पूर्वकालावच्छेदेनातीते घटे रूपाश्रयत्ववत् अतीते पदे वृत्त्याश्रयत्वं सुवचमिति चेन्न, वर्णसमुदायात्मकपदस्य कदाप्यसत्त्वात्। नच बुद्धिविषयवर्णसमुदायात्मकपदे वृत्त्याश्रयत्वाङ्गीकारे बाधकाभाव, 'अतीतं घटं जानामि' इति सर्वप्रतीतिसिद्धज्ञानाश्रयत्ववदिति वाच्यम्, पदवाक्ययोरभावेन शब्दार्थसम्बन्धस्यैव हान्यापत्तेः। तदुक्तं वाक्यपदीये—'अशाब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत्' इति। एतस्यायमर्थः—यदि पदसमूहरूपवाक्यासम्भवेन तेन वाक्यार्थस्य शक्तिग्रहासम्भवाद् वाक्यार्थो न शब्दशक्यस्तर्हि वर्णसमूहरूपपदस्याप्यसम्भवेन तेन पदार्थस्यापि शक्तिग्रहासम्भवात्पदार्थेऽपि शब्दजन्यबोधविषयो न स्यात्। तथाच शब्दस्य प्रमाकरणत्वानुपपत्तिः। किञ्च उच्चारणभेदाद् भिन्नानामपदानामानन्त्याद् व्यक्तिवाद इव शक्तिग्रहासम्भवः। एवञ्च गृहीतशक्तिकस्यैव बोधकत्वमिति नियमेनाश्रुतपूर्वापदान्तरात्पदार्थोपस्थित्यनुपपत्तिः। नच सामान्यलक्षणप्रत्यासत्त्या घटत्वजात्यनुगतीकृतसकलघटव्यक्तिष्विव शक्तावच्छेदकपदगतघटत्वादिरूपानुपूर्व्याऽनुगतीकृतघटादिपदेष्वपि शक्तिग्रहः स्यादिति वाच्यम्, आनुपूर्व्याः कालघटितया कालभेदेन भेदादनुगमासम्भवेन प्रकृते सामान्यलक्षणप्रत्यासत्तेरनुपयोगादानुपूर्व्याः शक्तावच्छेदकत्वासम्भवात्। किञ्चेदमेकं पदमेकं वाक्यमिति बुद्धेस्तदेवेदम्पदमिति बुद्धेश्चानुपपत्तिः, अनुगमकधर्माभावादित्यखण्डः स्फोटः स्वीकार्यः। स्वीकृते तु तस्मिन् नित्ये ब्रह्मणि अन्तःकरणोपाधिभेदेनानेकजीवव्यवहारवत्, नानारञ्जनसाधनद्रव्याहितनानावर्णोपरागेण पटादेर्भानवद्बोधरितवर्णक्रमेणैव तत्तद्वर्णगतकत्वादिनाऽभिव्यक्ते तत्र शक्तिग्रहः आरोपितपौर्वापर्यग्रहश्च सिध्यति। तथाच भिन्नभिन्नरूपेणाभिव्यक्ते स्फोटे शक्तिग्रहान्न सरो रस इत्यादिनैकबोधापत्तिः। नाप्येकपर्य्यायाभिव्यक्तस्फोटे शक्तिग्रहात्पर्य्यायान्तरे शक्त्यग्रहेऽपि बोधः, पर्य्यायान्तर्गतवर्णाभिव्यक्ते स्फोटे शक्तिग्रहाभावाद् गृहीतशक्तिकस्यैव बोधकत्वनियमात्। तस्य च स्फोटस्य तत्तदानुपूर्व्यन्तर्गतप्रथमादिवर्णाभिव्यक्तिसत्त्वेऽपि रत्नपरीक्षणन्यायेन चरमवर्णाभिव्यक्तस्फोटस्यैव बोधकत्वनियमान्न प्रत्येकवर्णाभिव्यक्ताद् बोधापत्तिः। नचैवमपि चरमवर्णातिरिक्तवर्णानां वैयर्थ्यम्, पूर्वपूर्ववर्णरूपेण स्फोटानुभवजन्यसंस्काराणामपि चरमवर्णाभिव्यक्तस्फोटेनार्थबोधजनने सहकारित्वात्। चरमत्वञ्चानतिदिष्टं ग्राह्यमिति एकवर्णाभिव्यक्तस्फोटेनार्थबोधेऽपि न क्षतिः। यथा 'अ' शब्दादिना वासुदेवादिबोधे। अनुभवश्च चरमवर्णाभिव्यञ्जनीयस्फोटविषयकस्तदानीन्तनो ग्राह्य इति न कालान्तरीयानुभवजन्यसंस्कारसहकारेण प्रथमवर्णाभिव्यक्तस्फोटादर्थबोधापत्तिः। किञ्च पूर्वानुभवजन्यसंस्कारसत्त्वेऽपि तस्य सहकारित्वासम्भवोऽनुद्भूतत्वात्तदुद्बोधनार्थमेव प्रथमादिवर्णानां चारितार्थ्यात्। नचैवं स्फोटवैयर्थ्यम्, अतिरिक्तानन्तवर्णतत्प्रागभावध्वंसाकल्पनेन लाघवात्। तदेवेदम्पदमित्यादिप्रत्यभिज्ञोपपत्तये च स्फोटस्यावश्यकत्वादित्यन्यत्र विस्तरः। स्फोटस्यैकत्वादेकं पदमेकं वाक्यमित्यादिव्यवहारोऽप्युपपद्यते। भिन्नं पदं भिन्नं वाक्यम् इत्यादिव्यवहारस्तु अभिव्यञ्जकभेदादेवोपपादनीय इति कैयटोक्तः—वर्णसमुदायस्य बोधकत्वासम्भवः स्वतन्त्रवर्णस्वीकाररूपं लाघवञ्चाखण्डस्य वाचकत्वस्वीकारे बीजमित्याहुः। स्फोटस्तु भूषणकारमते सकलशब्दार्थप्रपञ्चात्मकविवर्तकारणीभूतं ब्रह्मैव शब्दब्रह्मपदेनाभिधीयते इति मूले एव वक्ष्यते। शेखरकारास्तु परा पश्यन्ती मध्यमा वैखरीति चतुर्विधवाङ्मये या मध्यमा वाक् तस्या यो नादांशस्तदात्मकः। तदुक्तं मञ्जूषायाम्—'तत्र मध्यमायां यो नादांशस्तस्यैव स्फोटात्मनो वाचकत्वेन' इति 'स्फोटपदस्य च तत्तद्वर्ण—

प्रभा

पदादिरूपेण ताल्वाद्यभिघाताज्ज्ञानविषयो मध्यमावस्थोऽर्थः' इति च । तादृशनादांशस्य जन्यत्वेऽपि पारिभाषिकं नित्यत्वमुक्तं तत्रैव । 'नित्यत्वञ्चैषां सृष्ट्यादिकालोत्पत्तिकत्वं प्रलयकालनाश्यत्वञ्चेत्येतावदेव' इति । तत्र भूषणकारमतमेव समीचीनम् , पारिभाषिकोक्तनित्यत्वस्य भाष्यकाराद्यनुक्तेः, 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति हर्य्युक्तेश्च । यत्र कुत्रचिदुत्पत्तिमत्त्वेन वर्णानन्तु अभिव्यञ्जकगतानित्यत्वमादायैव तेषामिति गुरवः । 'परः सन्निकर्षः संहिता' इति सूत्रे भाष्ये उक्तम्—'नहि वर्णानां पौर्वापर्य्यमस्ति । किं कारणम् । एकवर्णवर्तित्वाद्वाचः (वागिन्द्रियस्य) । उच्चरितप्रध्वंसित्वाच्च वर्णानाम् । एकैकवर्णवर्तिनी वाक् । न द्वौ युगपदुच्चारयति । गौरिति यावद् गकारे वाग्वर्तते नौकारे न विसर्जनीये । यावद्विसर्जनीये न गकारे नौकारे, उच्चरितप्रध्वंसित्वात् । उच्चरितप्रध्वंसिनः खल्वपि वर्णाः । एवं तर्हि 'बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः । शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्य्यात्पौर्वापर्य्यम् । स्फोटात्मकशब्दव्यञ्जकध्वन्यपेक्षया चेदमुक्तम्—पूर्वं भाष्ये 'येनोच्चरितेन (अभिव्यक्तेन) सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इत्यनेन स्फोटात्मकं नित्यं शब्दमुक्त्वा 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तद्यथा—शब्दं कुरु' मा शब्दं कार्षीः, इत्यादिना लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णरूपध्वनिसमूहः शब्द उक्तः । तस्याविचारितरमणीयस्यैवार्थबोधकताऽपि लोके प्रसिद्धा । तादृशध्वनेरेव शास्त्रेणान्वाख्यानमिति तात्पर्य्यम् । अन्यथा 'अइउण्' सूत्रे भाष्ये 'नित्याश्च शब्दा नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोजनविकारिभिः' इत्यनेन नित्यत्वोक्तिरसङ्गता स्यात् । तथाच ध्वनिगतकत्वाद्यारोपेणैव स्फोटात्मकशब्दस्य नित्याखण्डतया वर्णानां नित्यत्वम् , नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम् , इत्यनेन प्रदर्शितम् । एवञ्च युगपदवस्थितानामेव देशकृतं पौर्वापर्य्यं दृष्टम् । ध्वन्यात्मकवर्णास्त्वेकैकश उपलभ्यमाना यौगपद्येनासन्निधानात्कथं पौर्वापर्य्यमश्नुवीरन् । इत्यतः धीरः=धियं राति=ददातीति धीरः शब्दतत्त्वज्ञः, तत्वन्नीतिः=तननं तत्=व्याप्तिः, तद्वती नीतिः=नीयते=ज्ञायतेऽनयेति नीतिर्बुद्धिरन्तःकरणवृत्तिविशेषः सकलबोद्धव्यविषयव्याप्तिमती बुद्धिर्यस्य स तत्वन्नीतिः । कर्ता=ध्वनिकर्ता सर्वाश्चेष्टाः=चेष्ट्यन्त इति चेष्टाः शसन्तमेतत् । कण्ठाद्यभिघातव्यापारजन्यशब्दान् , बुद्धौ=अन्तःकरणरूपदेशे प्रतिबिम्बितान् कृत्वा शब्देनेति सहार्थे तृतीया, शब्देन सहैव वाच्यान् अर्थान् बुद्धिदेशे एव दृष्ट्वा=ज्ञात्वा तत्रैवान्तःकरणे क्रमशः प्रतिबिम्बितेषु वर्णेषु पौर्वापर्य्यव्यवहारं कुर्यादिति तदर्थः । तदुक्तम्भाष्ये—'बुद्धिविषयमेव शब्दानां पौर्वापर्य्यम्' बुद्धि-

दर्पणव्याख्या

कत्वस्याप्यसम्भवदुक्तिकत्वादित्यर्थः । कैयटानुयायिनस्तु—पूर्वपूर्ववर्णकाले चेद् द्वितीयादिवर्णोत्पत्तिः सम्भवेत् तदा स्यादपि कथञ्चिद्भवदुक्तरीत्या पदवाक्यप्रत्यक्षनिर्वाहः, सैव न, किन्तु 'यावद्गकारे वाग् वर्तते न तावदौकारे तेनैव यत्नेनैको वर्ण उच्चार्य्यते । तेनैव विच्छिन्ने तस्मिन् वर्णे उपसंहृत्य तं यत्नमन्यमुपादाय द्वितीयः प्रवर्त्तते" इति "परः सन्निकर्षः" (१।४।१०४) इति सूत्रस्थभाष्यप्रामाण्यात् पूर्ववर्णविनाशानन्तरं यत्नान्तरेण द्वितीयवर्णाभ्युपगमात् । किञ्च भवन्मते वर्णप्रत्यक्षस्यैवानुपपत्तिः, तेषामुच्चरितप्रध्वंसितत्वेन तदुत्पत्तेरभिव्यक्तेर्वा क्षणिकत्वेनातीन्द्रियक्षणावच्छिन्नत्वात् । तथाच "इको यणचि" इत्यादिसूत्रोपयोगिनोऽयं पूर्वोऽयं पर इति प्रत्यक्षविषयार्थकेदंशब्दाभिव्यज्यमानपौर्वापर्य्यव्यवहारस्यासम्भवः । एवं नष्टविद्यमानयोः सम्बन्धिनोरव्यवहितोत्तरत्वस्य सम्बन्धतया वक्तुमशक्यतयाऽपि पूर्वोक्तरीत्या पदप्रत्यक्षानुपपत्तिः । अपिच गृहीतशक्तिकस्यैव बोधकत्वमिति नियमेनोच्चारणभेदाद्भिन्नेषु शक्तिग्रहासम्भवः । आनुपूर्व्यास्तत्तत्कालघटिताव्यवहितोत्तरत्वघटितत्वेनाननुगमकत्वाच्छक्तावच्छेदकत्वासम्भवात् । अखण्डस्फोटाङ्गीकारे तु तत्तद्वर्णोपाध्यवच्छिन्ने तस्मिन् पौर्वापर्य्यादिव्यवहारविषयत्वस्य सूपपादत्वान्नोक्तानुपपत्तिः । तस्य चाऽनुपूर्व्यन्तर्गतसमस्तवर्णा एव यद्यप्यभिव्यञ्जकास्त-

ननु त्वन्मतेऽप्येष दोषः। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य सद्भावादिति चेत्। उच्यते। प्रत्येकमेव संयोगा अभिव्यञ्जकाः, परन्तु केचिद् गत्वेन, केचिदौत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते। एवञ्चाव्यवहितोत्तरत्वसम्बन्धेन घवत्त्वं टकारे गृह्यते। एतादृशपदज्ञानकारणताया अविवादात्।

प्रभा

विषयमित्यस्य बुद्धिस्थशब्दविषयमित्यर्थः। बुद्धिश्चात्रान्तःकरणरूपदेशः। इह य एव मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेऽयं तावद्वर्णस्ततोऽयं ततोऽयमिति। एष दोष इति—मूलोक्तविकल्पात्मकदोष इत्यर्थः। विकल्पमेवाह—तत्तद्वर्णेति। नाभिप्रदेशादुद्गतवायोः क्रमेणैव संयोगोत्पत्त्या समुदितानां वायुसंयोगानामसम्भवात् प्रत्येकमेव वायुसंयोगस्याभिव्यञ्जकत्वम्। प्रत्येकं संयोगस्याभिव्यञ्जकत्वेऽपि कश्चन संयोगो गत्वेन कश्चनौत्वेन कश्चन विसर्गत्वेन स्फोटमभिव्यनक्ति। प्रथमादिवर्णेनैव किञ्चित् किञ्चित्स्फोटाभिव्यक्तिर्जायते। अग्रेऽग्रे विशदेति पूर्वं जाताऽपि नार्थबोधोपयोगिनी। यथा रत्नतत्त्वस्यैकदा दर्शनेऽपि नाभिव्यक्तिर्वारं वारं दर्शने तु भवति। तदुक्तम्—'सामस्त्येन तु तद्व्यक्तिः सर्वान्ते मणितत्त्ववत्' इति। तावद्रूपवैशिष्ट्येनाभिव्यक्तस्फोटस्यैव तत्तदर्थबोधकत्वमिति न कस्यापि वायुसंयोगस्य वैयर्थ्यम्, नापि घटाद्यर्थान्तरबोधापत्तिरित्याशयेनाह—प्रत्येकमेवेति। अत एवेति—तत्तद्वायुसंयोगस्य स्ववृत्तिगत्वादिना स्फोटाभिव्यञ्जकत्वादेवेत्यर्थः। वर्णानाम्—स्फोटाभिव्यञ्जकसंयोगानाम्, ध्वनीनां वा। तदतिरेकेति—तस्माद् गत्वादिनाऽभिव्यक्तात् स्फोटादतिरेकः=भेदस्तस्यास्वीकारोऽपीत्यर्थः। गत्वादिना प्रतीयमानस्फोटस्य गत्वादिविशिष्टसंयोगस्य ध्वनेर्वाऽभेद इति यावत्, उभयोरपि गत्वप्रकारकप्रतीतिविषयत्वात्। यद्वा तत्तद्वायुसंयोगादेव कत्वादिप्रकारककारविशेष्यकप्रतीत्युपपत्तौ स्फोटातिरिक्तककारादिकल्पनाभावोऽप्युपपद्यत इत्यर्थः। ननु सरो रस इत्यादौ सत्त्वादिरूपेणाभिव्यञ्जकवायुसंयोगानां तुल्यत्वात्समानार्थबोधापत्तिः, किञ्च पदाभावेन पदज्ञानस्यार्थधीकारणताऽप्यसङ्गतेत्याशङ्कां निराकरोति—एवञ्चेति—उपाधिभेदाद् घकारटकारयोर्भेदः स्फोटभेदकल्पकस्तत्र घवत्वं यथा टकारे कल्प्यते, तथा सर इत्यत्रापि कल्पनया सवत्वं रेफे ततः सविशिष्टरवत्वं विसर्गे गृह्यते। रस इत्यत्र तु रवत्वं सकारे तत रविशिष्टसवत्वं विसर्गे इति वैपरीत्यग्रहसत्त्वाद् भिन्नार्थप्रतीत्युपपत्तौ चेत्यर्थः। एतादृशेति—अव्यवहितोत्तरत्वसम्बन्धेन घविशिष्टटरूपेत्यर्थः। ननु भवन्मते घकारादिवर्णस्य स्फोटातिरिक्तत्वाभावेन नित्यतया तद्ध्वंसाधिकरणक्षणानुत्पत्तिकत्वविशिष्टतदधिकरणक्षणोत्पत्तिकत्वरूपस्य प्रथमवर्णस्य नाशे चतुर्थक्षणे वर्णान्तरोत्पत्तिरिति भाष्यमते तद्ध्वंसाधिकरणक्षणोत्पत्तिकत्वविशिष्टतद्ध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणानुत्पत्तिकत्वरू-

दर्पणव्याख्या

थापि चरमवर्णाभिव्यक्त एव स बोधहेतुरिति नोक्तविकल्पस्याप्यवसर इत्याहुः। ननु वायुसंयोगानां प्रत्येकमभिव्यञ्जकत्वाभ्युपगमेऽपि गौरित्यत्र घत्वेन टत्वेन च स्फोटोऽभिव्यज्येतेत्यत आह—* परन्त्विति * तथाच विलक्षणवायुसंयोगस्य गत्वप्रकारकस्फोटाभिव्यञ्जकत्वाभ्युपगमान्नोक्तदोष इति भावः। * अत एवेति * विलक्षणवायुसंयोगस्य तत्तद्रूपेण स्फोटाभिव्यञ्जकत्वाभ्युपगमादेवेत्यर्थः। * तदतिरेकास्वीकार इति * तत्तत्संयोगादेव कत्वादिप्रकारककारप्रतीत्युपपत्तौ स्फोटातिरिक्ततत्कल्पने मानाभावादिति भावः। ननु सरो रस इत्यादावतिप्रसङ्गस्तदवस्थ एव, सत्वादिरूपेणाभिव्यञ्जकवायुसंयोगानामुभयत्र तौल्यादत आह—* एवञ्चेति * * घवत्वमिति * तथाचौपाधिकभेदमादाय तस्मिन्नेव टकारात्मके घत्वप्रकारकप्रतीतिविषयाव्यवहितत्वग्रहविषये यथा घटपदव्यवहारविषयता तथा रात्मके

परन्त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम् । अत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादिर्नैयायिकवृद्धानां व्यवहारः । एवञ्च न कश्चिद्दोषः । एतेन पर्य्यायस्थलेष्वेक एव स्फोटो नाना वा ? नाद्यः, घटपदे एव गृहीतशक्तिकस्य कलशादेर्बोधप्रसङ्गात् । नच तत्पर्य्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्य्यायश्रवणेऽर्थधीहेतुरिति वाच्यम् ,

प्रभा

पस्य वाऽव्यवहितोत्तरत्वस्य नित्ये टकारेऽभावेन कथं तेन सम्बन्धेन घवत्वं टकारे इत्याशङ्कायामाह-परमिति-वस्तुतस्तु उक्तसम्बन्धेन घवत्वं टकारे इत्यसङ्गतम् , घकारटकारयोर्मध्येऽकारस्य सत्त्वेन घकारटकारयोरव्यवहितत्वस्य दुर्वचत्वात् । नच घवत्वमित्यस्य उक्ताव्यवहितोत्तरघकारविशिष्टो योऽकारस्तद्वत्त्वमित्यर्थः, तथा सति घवत्वमकार इत्यस्यैव प्राथम्येन वक्तुमुचितत्वात् । स्वज्ञानेति--स्वः=घत्वादिना भासमानः स्फोटः । प्रथमक्षणे ज्ञानमुत्पद्यते । द्वितीयक्षणे तस्य स्थितिस्तृतीयक्षणे नाश इति क्रममादाय घविषयकज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वरूपमव्यवहितोत्तरत्वं टकारे सुलभमिति न पदज्ञानकारणताऽसङ्गता, वर्णानां नित्यत्वेऽपि तदभिव्यक्तेरनित्यतया तामादाय स्वविषयकाभिव्यक्त्यधिकरणक्षणोत्पत्तिकाभिव्यक्तिविषयत्वरूपाव्यवहितोत्तरत्वस्य तदुत्तरवर्णेऽबाधेन पदज्ञानोपपत्तेरिति भावः । ननु एतादृशाव्यवहितोत्तरत्वं न दृष्टिगोचरमित्याशङ्कायामाह—अत एवेति—ईदृशाभिव्यक्तिघटिताव्यवहितोत्तरत्वस्य शक्तावच्छेदकानुपूर्वीनियामकत्वादेवेत्यर्थः । एवञ्चेति—अभिव्यक्ते र्ज्ञानरूपत्वेन ज्ञानघटितस्याव्यवहितोत्तरत्वस्य निर्वचने चेत्यर्थः । दोष इति-पदज्ञानासम्भवादिरूपदोष इत्यर्थः । एतेन=उक्तानुपूर्व्यवच्छिन्नवर्णात्मकस्फोटस्य वाचकत्वव्यवस्थापनेन । इदञ्चापास्तमित्यनेनान्वेति । स्फोट इति-वाचकत्वेनाभिमतोऽखण्डनित्यस्फोट इत्यर्थः । नाद्य इति—एक एव स्फोट इति नेत्यर्थः । घटपद इति—घटत्वरूपानुपूर्व्यवच्छिन्नस्फोटे गृहीतशक्तिकस्येत्यर्थः । कलशादेरिति—यच्चम्यन्तमेतत्, अगृहीतशक्तिककलशत्वादिरूपानुपूर्व्यवच्छिन्नस्फोटात्मककलशादेरित्यर्थः । बोधप्रसङ्गादिति-घटरूपार्थबोधजनकत्वेन क्लृप्तकारणताके कलशपदाभिव्यक्तस्फोटे गृहीतशक्तिकत्वात्तादृशस्फोटस्य नित्याखण्डस्यैक्यादिति भावः । वर्णसमुदायरूपपदस्य वाचकत्वे तु नोक्तदोषः, वर्णसमुदायरूपपदस्य घटपदभिन्नतया तत्रागृहीतशक्तिकत्वादित्याशयः । तत्पर्य्यायेति--तत्पर्य्यायश्रवणजन्यशाब्दबोधं प्रति तत्पर्य्यायाभिव्यक्तिशक्तिज्ञानं कारणमिति कार्य्यकारणभावो घटरूपपर्य्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहस्थले च

दर्पणव्याख्या

स्फोटे सत्वप्रकारकप्रतीतिविषयाव्यवहितत्वग्रहे सरःपदव्यवहारविषयतेति न सरआत्मकस्फोटस्य रसरूपतेति भावः । ननु तव मते गकारादिवर्णस्य नित्यस्फोटरूपतया नित्यत्वेन तद्ध्वंसाधिकरणक्षणानुत्पत्तिकत्वविशिष्टतदधिकरणक्षणोत्पत्तिकत्वरूपाव्यवहितोत्तरत्वासम्भवात् कथमुक्तप्रकारसम्भवोऽत आह—* परन्त्विति * । तथाच वर्णानां नित्यत्वेऽपि तदभिव्यक्तेरनित्यत्वस्य सांख्यानामपि सम्मतत्वेन तदव्यवहितोत्तरत्वस्य वर्णान्तराभिव्यक्ताबाधेन तदादाय घटादिपदप्रत्ययोपपत्तिरिति भावः । * अत एवेति * अभिव्यक्तिनिरूपिताव्यवहितोत्तरत्वस्यानुपूर्वीव्यवहारनियामकत्वादेवेत्यर्थः । नवीनैस्तथानभ्युपगमादाह—* वृद्धेति * । * एतेनेति * आनुपूर्व्यवच्छिन्नवर्णात्मकस्फोटस्य वाचकत्वव्यवस्थापनेनेत्यर्थः । अपास्तमित्यनेनान्वयि । * स्फोट इति * वाचकत्वेनाभिमतोऽखण्डपदार्थ इत्यर्थः । * नाद्य इति * नैक इत्यर्थः । तत्पक्षे दूषणमाह--* घटपद इति * घट इत्यानुपूर्व्यवच्छिन्नस्फोटे गृहीतशक्तिकस्येत्यर्थः । कलशपदादित्यस्यागृहीततदवच्छिन्नस्फोटशक्तिकादित्यादिः । * बोधप्रसङ्गादिति * । घटबोधक्लृप्तकारणताककलश इत्यानुपूर्व्यवच्छिन्नस्फोटस्य तदानीं सत्त्वान्नित्येकरूपत्वात् तस्य वर्णसमुदायरूपपदस्य वाचकत्वे तु नोक्तदोष इति भावः । * अर्थधीहेतुरिति *

एवं सति प्रतिपर्य्यायं शक्तिग्रहावश्यम्भावेन तत्तत्पर्य्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवात्। अन्यथा तत्पर्य्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः, अनन्तपदानां तेषां शक्तिश्चापेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम्। पर्य्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्,

प्रभा

कलशरूपपर्य्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहाभावान्नोक्तापत्तिरिति भावः। एवमिति—स चासौ पर्य्यायश्च तत्पर्य्यायः। तत्पर्य्यायजन्यबोधम्प्रति तत्पर्य्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहस्य कारणत्वे सतीत्यर्थः। अवश्यम्भावेनेति—स्फोटवादिनये तत्पर्य्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहत्वेन कारणत्वस्यावश्यकत्वेनेत्यर्थः। उचितत्वादिति—तत्पर्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहत्वस्य कारणतावच्छेदकत्वापेक्षया तत्पर्य्यायावच्छिन्नशक्तिग्रहत्वस्य कारणतावच्छेदकत्वेऽवच्छेदकतयाऽभिव्यक्तेरप्रवेशेन लाघवकृतौचित्यादित्यर्थः। शक्तिग्रहत्वेनेति—तत्पर्य्यायावच्छिन्नशक्तिग्रहत्वेनेत्यर्थः। लाघवाच्चेति—चो हेतौ यत उक्तरूपेण हेतुत्वे लाघवं तत इत्यर्थः। स्फोटवादिमते गौरवमाह—अन्यथेति=उक्तवैपरीत्ये इत्यर्थः। गौरवस्य पूर्वमुक्तत्वेऽस्पष्टप्रतिपत्तये आह—तत्पर्य्यायेति। तत्त्वे=हेतुत्वे। न द्वितीय इति—पर्य्यायभेदेन स्फोटभेद इति पक्षोऽपि वक्तुं न शक्यत इत्यर्थः। अनन्तेति=प्रतिपर्य्यायाभिक्तानामित्यर्थः। तेषाम्=स्फोटानाम्, अस्य कल्पनामिति शेषः, उत्तरत्र शक्तित्वञ्चेत्यत्र समुच्चायकस्य च श्रवणात्। शक्तिञ्चेति=स्फोटभेदात् तद्गतशक्तेपि भेदेन नानाशक्तिकल्पनाञ्चेत्यर्थः। लघुत्वादिति—वर्णानां तद्घटितपदानाञ्च कल्पने एव लाघवाद् वर्णातिरिक्तस्फोटकल्पना मुधेति भावः। परिमलोक्तमिति=स्फोटाकल्पने एव लाघवात् स्फोटवादोऽयुक्त इति परिमलाचार्य्योक्तमित्यर्थः। आदिना न्यायरक्षामणेः संग्रहः। पर्य्यायेष्विति=एकधर्मावच्छिन्नार्थवाचकनानापदेष्वित्यर्थः। शक्तावच्छेदकभेदेन शक्तिभेदस्य न्याय्यत्वादिति भावः। अनेकेति=पर्य्यायभेदेन भिन्नभिन्नशक्तिस्वीकारस्येत्यर्थः। सर्वसिद्धत्वादिति—तथाच पर्य्यायभेदेन भिन्नेऽपूर्वस्फोटेऽपि वाचकत्वकल्पनाप्रयुक्तं दूषणं नेत्यर्थः। नच कारणतावच्छेदकदलेऽवच्छेदकतयाऽभिव्यक्तिनिवेशप्रयुक्तं गौरवं तदवस्थमेव, स्फोटस्य वाचकत्वनयेऽपि अभिव्यक्तिमनिवेश्य स्फोटानतिरिक्ततत्तत्पदस्यैव विषयितया शक्तिग्रहेऽवच्छेदकत्वकल्पनेनोक्तगौरवस्याप्यभावात्। अयम्भावः—वर्णाः, पर्य्यायाश्च स्फोटातिरिक्ताः, ते स्फोटाभिव्यञ्जकाः, इति यदि वैयाकरणाभिमतमभविष्यत् तदा 'पर्य्यायस्थलेषु एक एव स्फोटो नाना वा।' इत्यादिपूर्वोक्तदूषणावकाशोऽभविष्यत्। तदेव तु नास्ति, किन्तु

दर्पणव्याख्या

उक्तस्थले च स्फोटस्य कलशरूपपर्य्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहविषयत्वाभावान्न अर्थबोधप्रसङ्ग इति भावः। ***एवमिति*** तत्पर्य्यायजन्यशाब्दबोधे तत्पर्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहस्य हेतुत्वाभ्युपगम इत्यर्थः। *** शक्तिग्रहावश्यम्भावेनेति *** नागृहीतविशेषणन्यायेन तत्पर्य्याये शक्तिग्रहस्यावश्यमभ्युपेयत्वादिति भावः। *** उचितत्वादिति *** औचित्यमेवाह—*** तथा सतीति ***। **शक्तिग्रहत्वेनेति *** तत्पर्य्यायगतशक्तिग्रहत्वेनेत्यर्थः। *** लाघवादिति *** उक्तरूपापेक्षयैतस्य कारणतावच्छेदकत्वे लाघवादित्यर्थः। चो हेतौ। पूर्वकल्पे गौरवं प्रकाशयति—*** अन्यथेति *** उक्तिवैचित्र्यमेतत्। *** न द्वितीय इति *** पर्य्यायस्थले स्फोटनानात्वमित्यपि पक्षो नेत्यर्थः *** अनन्तेति *** प्रतिपर्य्यायभिन्नानां स्फोटानां कल्पनामित्यर्थः *** शक्तिमिति *** तत्तद्भेदभिन्नानन्तशक्तिकल्पनाञ्चापेक्ष्येत्यर्थः। *** लघुत्वादिति *** तथाच वर्णातिरिक्तस्फोटकल्पनाऽपार्थेति तद्भावः। *** पर्य्यायेष्विति *** एकधर्मावच्छिन्नबोधकनानापदेष्वित्यर्थः। *** अनेकेति *** पर्य्यायभेदभिन्नेत्यर्थः। *** सर्वसिद्धत्वादिति *** तथाच पर्य्यायेषु नानाशक्तिकल्पना नापूर्वेति न दोषः। अयमाशयः—

तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक् ।

प्रभा

आरोपितकत्वादिविशिष्टाः स्फोटा एव वर्णाः पर्य्यायाश्चेति स्फोटास्वीकर्तॄणामनन्तवर्णादिस्वीकर्तॄणां परेषां मत इव पर्य्यायस्थलेऽपि समान एव कार्य्यकारणभावः । इयानेव विशेषो यदतिरिक्तवर्णवादिनये स्वरूपतो भिन्न एव पर्य्यायः, स्फोटस्वीकर्तृमते तु स्फोटस्यैक्येऽपि भिन्नभिन्नपर्य्यायरूपरूपितत्वेनौपाधिकः स्फोटभेदः पर्य्यायानतिरिक्त इति नास्ति कार्य्यकारणभावे वैषम्यम् । वायुसंयोगादिगतकत्वादिवैशिष्ट्येन स्फोटत एव वर्णादिव्यवहारस्याप्युपपत्तौ अतिरिक्तनाम् अनन्तवर्णानान्तत्प्रागभावध्वंसादीनाञ्च स्फोटवादिनयेऽभावेन तत्प्रयुक्तं महल्लाघवं तन्मत इति । नच पर्य्यायभेदेन स्फोटभेदेऽपि तत्त्वतः स्फोटैक्यमते घटपदात्मके स्फोटे गृहीतशक्तिकस्य पुंसः कलशादिपदाच्छाब्दबोधापत्तिरूपदोषतादवस्थ्यम् , स्फोटस्यैक्यादिति वाच्यम् , वर्णवादिमते घटत्वप्रकारकघटविशेष्यकबोधम्प्रति घटपदनिष्ठशक्तिज्ञानस्य कारणत्वे कलशादिपदाद् घटबोधस्थले प्राप्तव्यभिचारवारणाय घटपदनिष्ठशक्तिज्ञानाव्यवहितोत्तरजायमानघटत्वप्रकारकघटविशेष्यकबोधम्प्रति घटपदनिष्ठशक्तिज्ञानं कारणम् , इत्येवं कार्य्यदले कारणव्यवहितोत्तरत्वस्य निवेशवत् , स्फोटवादिमतेऽपि उक्तरीत्या कारणाव्यवहितोत्तरत्वस्य निवेशेन दोषस्य वारणीयत्वात् । कार्य्ये कारणाव्यवहितोत्तरत्वनिवेशप्रयुक्तगौरवमपि स्फोटवादिनामतिरिक्तवर्णवादिमततुल्यमेव । ननु स्फोटस्य नानात्वे नानावर्णैरेव निर्वाहे स्फोटवैयर्थ्यम् , एकत्वे शक्तेरप्यैक्येन पर्य्यायस्थलोक्तदोषप्रसङ्ग इत्यत आह—तदवच्छेदकेति—शक्तावच्छेदकेत्यर्थः । स्फोटस्यैक्येऽपि शक्तावच्छेदिका तत्तत्पदवृत्त्यानुपूर्व्यैव । तथाच शक्यतावच्छेदकभेदेन पीलुशब्दादौ शक्तिभेदवत् शक्तावच्छेदकानुपूर्वीभेदात्स्फोटेऽपि शक्तिभेदान्नोक्तदोषावकाश इति भावः । ननु स्फोटस्य नित्यतया तदभिन्ना वर्णा अपि नित्या एवेत्युत्पत्तिध्वंसघटिताव्यवहितोत्तरत्वघटितानुपूर्व्यपि वक्तुमशक्येति तस्या अवच्छेदकत्वमपि दुर्वचमित्यत आह—प्रागुपपादनादिति—'स्वविषयकाभिव्यक्त्यधिकरणक्षणोत्पत्तिकाभिव्यक्तिविषयत्वसम्बन्धेन वर्णविशिष्टवर्णरूपाया आनुपूर्व्याः प्रागुपपादनादित्यर्थः । ननु यदि वर्णा नित्यास्तदा नित्यानां तेषामानुपूर्व्यपि ग्रन्थकृतैवोपपादिता । तथाच तादृशानुपूर्वीविशिष्टानामेव तेषां पदत्वम्, तद्विशिष्टानां वाक्यत्वञ्चास्तु। नित्यत्वादेव सोऽयं ककारः, तदेवेदम्पदम्, तदेदं वाक्यम् , इति प्रत्यभिज्ञाऽप्युपपत्स्यते कृतं स्फोटेनेत्यत आह—दिगिति—तदर्थस्तु यदि अनारोपितकत्वादिविशिष्टा वर्णास्तदा तेषां बहुत्वाद् गौरवम् । यदि आरोपितं कत्वादिकं वर्णस्त्वेक एव तर्हि वर्णः, स्फोट इति शब्दमात्रे भेद इति स्फोटपक्ष एव सिद्धः । यदि तु न नित्या वर्णाः, नापि नित्यः

दर्पणव्याख्या

वर्णाः स्फोटाऽभिव्यञ्जका इति स्वीकारे भवदुक्तदूषणस्यावसरः, ननु स्फोटस्य वर्णानतिरेकपक्षे, तत्र पृथक्शक्तिकल्पनाया अभावेन गौरवासम्भवात् । पर्य्यायशक्तिग्रहकार्य्यताऽवच्छेदककोटावव्यवहितोत्तरत्वनिवेशेन व्यभिचारवारणन्तूभयोः समम्मिति । ननु त्वन्मते स्फोटानतिरेकेण वर्णानां नित्यत्वादुत्पत्तिघटिताव्यवहितोत्तरवर्णेषु पूर्वपूर्ववर्णवत्त्वरूपशक्तावच्छेदकानुपूर्व्यसम्भवोऽत आह—* तदवच्छेदकेति * शक्तावच्छेदकेत्यर्थः । *प्रागिति* स्वाभिव्यक्त्यधिकरणक्षणोत्पत्तिकाभिव्यक्तिविषयत्वमिति ग्रन्थेनेति शेषः । ननु वर्णानां नित्यत्वाभ्युपगमे नित्यवर्णैरेव स्फोटकार्योत्पत्तौ स्फोटस्यैवासिद्धिः । तथाहि—आनुपूर्व्या भवद्भिरेवोपपादितत्वात्तद्विशिष्टानामेव तेषां पदत्वेन तत्प्रत्ययस्य सौलभ्येन शक्तिग्रहस्य सूपपादत्वात्तदेवेदं पदं वाक्यमिति प्रत्यभिज्ञोपपत्तेश्चेत्यत आह—* दिगिति * तदर्थस्तु यदि स्वतन्त्रा नित्या वर्णाः स्युस्तदा स्यादेव तैः स्फोटान्यथासिद्धिः । किन्तु कत्वादिना प्रतीयमानः स्फोट एव ककारादिवर्ण इत्यभ्युपगमेनोक्तान्यथासिद्ध्यसम्भवादत एव

शब्दकौस्तुभे तु वर्णमालायां पदमिति

प्रभा

कश्चन स्फोटः, किन्तु अनित्या ध्वनय एव सन्तोत्युच्यते तदा द्रुतमध्यमविलम्बितवृत्तिभेदेन भिन्नेषु ध्वनिषु अन्यतमस्मिन् 'अतो भिस ऐस्' इत्यादिषु तपरकरणे तद्भिन्नेषु अकारादिषु ऐसाद्यनापत्तिः। स्फोटस्वीकारे तु वृत्तिभेदेन ध्वनिभेदेऽपि वायुसंयोगादिगतेन एकमात्रकत्वविशिष्टात्वेन प्रतीयमानस्फोटस्यैक्यात् तत्रैव तपरकरणात् सर्वासु वृत्तिषु तस्यैक्यादैसादिः सिध्यति। तदुक्तम्भाष्ये—तपरसूत्रे 'सिद्धन्तु अवस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते' इति 'ये द्रुतायां वृत्तौ वर्णाः' 'ते त्रिभागाधिका मध्यमायाम्' 'ये च मध्यमायां वर्णाः त्रिभागास्ते तु विलम्बितायामिति च। अत्र कैयटः द्रुतं श्लोकम्, ऋचं वोच्चारयति वक्तरि नाडिकाया (जलघटिकातः) यस्या नवपानीयपलानि (जलबिन्दवः) स्रवन्ति, तस्या एव मध्यमायां वृत्तौ द्वादशपलानि स्रवन्ति·····बिलम्बितायां तु षोडशपलानि स्रवन्ति' इति। तत्रान्तःकरणस्य परिणामविशेष एव वृत्तिरूपलब्धिरिति वोच्यते। पूर्वोक्तबिन्दुस्रवणकालपरिच्छिन्ना वृत्ति द्रुतमध्यमबिलम्बितादिशब्देन व्यवह्रियते। उद्योतकारस्तु—नाडिकापदेन सुषुम्नां नाडीमाह। 'सुष्' इत्यव्यक्तं या मनति=शब्दायते सा सुषुम्ना, म्ना अभ्यासे इत्यतः के रूपम्। ग्रीवास्थमेरुदण्डबाह्यस्था, इडापिङ्गलानाड्योर्मध्यगता या सूक्ष्मा नाडी सा सुषुम्ना। सा हि योगक्रियया ब्रह्माण्डसम्बद्धा सती अमृतबिन्दुस्राविणीति योगिनां प्रसिद्धिः। एवञ्च हृदयप्रदेशगतेन वायुसंयोगेन जनितो नादः प्राकृतध्वनिरुच्यते। तेनाभिव्यक्ता सूक्ष्मा मध्यमा वाक् वाचकस्फोटशब्देनोच्यते। तत आस्यपर्यन्तमागच्छता तेन वायुना स्फोटस्योपलब्धि (ज्ञान) जनको वैकृतो ध्वनिर्जायते। तस्या ध्वने र्यावत्कालं सत्ता तावता कालेन व्यक्तस्य स्फोटस्योपलब्धिः परिच्छिद्यते, नतु स्फोटः। स तु यादृशप्राकृतध्वनिना व्यक्तो ह्रस्वत्वादिरूपस्तादृश एव वैकृतध्वनिगतकालभेदेन स्फोटे कालभेदाभाव एव। यथा गन्तॄणामालस्यादिभेदाद्गतिभेदेऽपि न मार्गभेदस्तथा चिराचिरकालोच्चारणजनकयत्नाज्जायमानवैकृतध्वनेरुपलब्धीनामेव कालभेदो नतु स्फोटकालभेदस्तदुक्तम्भाष्ये—'स्फोटस्तु तावानेवेति'। दीक्षितमतमाह—शब्दकौस्तुभ इति—कुम्=पृथ्वीम्, स्तुम्नाति=रुणद्धीति कुस्तुभः=समुद्रः मूलविभुजादित्वात्के रूपम्। तत्र भवः कौस्तुभो मणिः अण्। तदुक्तम्—'कौस्तुभस्तु महातेजाः सूर्यकोटिसमप्रभः' इति। कौस्तुभ इव कौस्तुभः। शब्दानां प्रकाशकत्वेन, सर्वश्रेष्ठत्वेन स्पृहणीयत्वेन च लक्षणया ग्रन्थविशेषपरः। वर्णमालायामिति—

दर्पणव्याख्या

नानावर्णकल्पनाप्रयुक्तगौरवशङ्कापि नेति। ननु कोऽसौ स्फोटो यदनतिरिक्ता वर्णा इति चेदत्राहुः—ईश्वरसिसृक्षात्मकमायाबिन्द्वपरपर्यायत्रिगुणात्मकाव्यक्तप्रभवः शब्दब्रह्माख्यनामा चेतनाधिष्ठितोऽनभिव्यक्तवर्णविशेषो रवः परादिशब्दैर्व्यवह्रियमाणो नादः स्फोट इत्युच्यते। स च सर्वगतोऽपि पुरुषस्य ज्ञातार्थविवक्षाधीनप्रयत्नाधिष्ठितमूलाधारस्थपवनेनाभिव्यक्तः परेति व्यवह्रियते। नाभिपर्यन्तमागच्छता तेनाभिव्यक्तः पश्यन्तीति। पुनर्हृदयमागच्छता तेनैवाभिव्यक्तस्तत्तदर्थोल्लेखिज्ञानविषयः परश्रोत्राग्राह्यत्वात् सूक्ष्मो मध्यमा वागिति। वक्त्रा तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेनोपांशुशब्दप्रयोगे च श्रूयते। स एव चाऽऽस्यपर्यन्तमागच्छता तेन वायुना कण्ठदेशे गत्वा मूर्द्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्तः परश्रोत्रेणापि ग्रहीतुं शक्यो वैखरीति व्यवह्रियते। उक्तार्थे प्रमाणञ्च—"चत्वारि वाक्परिमिता (नि)पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः, गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति" इति श्रुतिः, 'बिन्दोस्तस्माद्विद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्। स एव श्रुतिसम्पन्नः शब्दब्रह्मेति गीयते' इति पुराणवाक्यञ्च। भागवतेऽप्येकादशस्कन्धादौ स्फुटोऽयमर्थः। शिक्षायामपि—आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाऽग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते—इत्यनेन। तथाच हृदयावच्छिन्नमध्य-

प्रतीतेर्वर्णातिरिक्त एव स्फोटः। अन्यथा कपालातिरिक्त घटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम् ॥६८॥

प्रभा

वर्णपरम्परारूपसमूहे इत्यर्थः। प्रतीतेरिति—आधाराधेयभावावगाहिप्रतीतेरित्यर्थः। अयन्तदाशयः—वर्णसमूहात्मकपदस्यैव स्फोटरूपत्वे वर्णमालापदयो भेदाभावादाधाराधेयभावो न स्यात्, चैत्रे चैत्र इति व्यवहारादर्शनेनाधाराधेयभावस्य परस्परभेदनियतत्वात्। अभेदेऽपि आधाराधेयभावस्वीकारे 'कपाले घटः' इति प्रतीत्या नैयायिकैः साधितं घटस्य कपालातिरिक्तत्वं विरुद्ध्येतेत्याह—अन्यथेति—प्रतीतेः पदार्थसाधकत्वाभावे इत्यर्थः। नच कपालातिरिक्तघटाभावे घटे कपालसंयोगः कारणम् इति व्यवहारानुपपत्तिः, कपालसमूहात्मकघटसाधकतयैव तदुपपत्तेः। 'शब्दकौस्तुभे तु' इत्यत्र तुनाऽरुचिः सूचिता। तथाहि-स्फोटस्य वर्णसमूहानतिरिक्तत्वेऽपि 'वर्णमालायां पदम्' इति प्रतीतिर्नानुपपन्ना, वर्णमालापदेनानुपूर्व्यवच्छिन्नवर्णानाम्, पदशब्देनानुपूर्व्याश्च ग्रहणे आधाराधेयभावे बाधकाभावात्। कपालस्याल्पपरिमाणवदवयवजन्यतया घटस्य तु तदधिकपरिमाणवदवयवजन्यतया वैजात्येन 'कपाले घटः' इति प्रतीतेरपि नानुपपत्तिः, कारणभेदेन कार्यभेदस्य सर्वसम्मतत्वात्। ननु कोऽसौ नित्यः स्फोटः? यमाश्रित्योक्तव्यवस्थोपपादनाय व्यापृतोऽसीति चेत् सूक्ष्मं प्रणवरूपम्ब्रह्मतत्त्वमेव स्फोट इति गृहाण। तथाहि—ईश्वरस्य सिसृक्षात्मिका या माया चिद्रूपापरपर्याया व्यक्तरूपा तत्प्रभवः शब्दब्रह्मापरनामा चेतनाधिष्ठितोऽनभिव्यक्तवर्णविशेषो खपरादिशब्देन व्यवह्रियमाणो नाद एव स्फोटशब्देनाभिधीयते। स च यद्यपि सर्वगतस्तथापि पुरुषस्य ज्ञातार्थविवक्षया जायमानप्रयत्नविशेषेण मूलाधारस्थपवनेनाभिव्यक्तः सूक्ष्मतः 'परा' इति व्यवह्रियते। नाभिलिङ्गयोर्मध्यगतस्य प्रदेशस्य शरीरस्थसकलनाडीनां मूलस्थानत्वात् मूलाधारत्वेन व्यवहारः। षण्णवत्यङ्गुलो देहायामः। तत्राङ्गुलार्द्धसहितं सप्तचत्वारिंशदङ्गुलात्मकम् अध उपरि च परित्यज्यैकाङ्गुलपरिमितं मध्यं मूलाधार इत्युच्यते। तदुक्तम् 'पाय्वन्ताद् द्व्यङ्गुलादूर्द्ध्वं लिङ्गाच्च द्व्यङ्गुलादधः। मध्यमैकाङ्गुलं यच्च देहमध्यं प्रचक्षते॥ इति। मूलाधारादुत्थितः पवनो नाडीद्वारेण कार्य्याणि करोति, इति योगपातञ्जले स्पष्टम्। नाभिपर्यन्तमागच्छता पवनेनाभिव्यक्तः सूक्ष्मतरः पश्यन्तीशब्देनोच्यते। हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तः परपुरुषश्रोत्रेन्द्रियाग्राह्यत्वात् सूक्ष्मः मध्यमा वागुच्यते। स एव च वक्त्रा कर्णपिधाने, सूक्ष्मतरवाग्वभिधातेनोपांशुशब्दप्रयोगे च श्रूयते। तत आस्यपर्यन्तमागच्छता तेन वायुना कण्ठदेशङ्गत्वा मूर्द्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्तः स्थूलः परपुरुषेणापि ग्राह्यो वैखरी वागित्यभिधीयते। तत्र परा पश्यन्ती च योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय ईश्वराधिदैवा। मध्यमा बुद्धिविषयो हिरण्यगर्भ-

दर्पणव्याख्या

मायां यो नादांश आन्तरप्रणवरूपः स एव वाचकः। "ओंकार एव सर्वा वाक् सेषा स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भवति" इति श्रुतेः। सर्वप्राणिहृद्देशस्थत्वाच्च ब्रह्मादव्यवहार्य्योऽपीत्यन्यत्र विस्तरः। * इति प्रतीतेरिति * अन्यथा वर्णपरम्परारूपमालायास्तत्समूहरूपपदानतिरिक्ततयाऽऽधाराधेयभावावगाहिप्रतीत्यनुपपत्तिरिति भावः। * अन्यथेति * प्रतीतेः पदार्थासाधकत्व इत्यर्थः। 'कपाले घटः' इति प्रतीत्या भेदावगाहिन्या तत्सिद्धिः, प्रतीतेस्तदसाधकत्वे तु घटाद्यसिद्धिः स्पष्टैव। कपालतत्संयोगानादायैव तादृशप्रतीत्युपपत्तेरिति भावः। कौस्तुभे त्विति तुशब्देनारुचिः सूचिता। तद्बीजन्तु वर्णातिरिक्तस्फोटानङ्गीकारेऽपि नोक्तप्रतीत्यनुपपत्तिः। आनुपूर्व्यवच्छिन्नवर्णानां मालापदार्थत्वेन तत्रानुपूर्वीरूपदस्याधाराधेयभावसम्भवात्। घटकपालादीनां विजातीयकारणजन्यत्वेन तद्भेदस्यापलपितुमशक्यत्वेनोक्तातिप्रसङ्गाभावा-

नन्वेवं शास्त्रस्याप्रामाण्यप्रसङ्गः, पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमा-

प्रभा

देवत्या। वैखरी वाग् विराडधिदेवत्या। तदुक्तम्भाष्ये चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ इति ॥ पुराणेऽपि—

विन्दोस्तस्माद् भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्। स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते ॥ इति।

शिक्षायामपि—आत्मा बुद्ध्या समेत्यर्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ्जनयते। इति एवञ्च हृदयावच्छिन्नमध्यमायां यो नादांश आन्तरः प्रणवरूपः स एव वाचकः। 'ओङ्कार एव सर्वा वाक् एषा स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भवति' इति श्रुतेः।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति हर्य्युक्तेः।

सर्वप्राणिहृदयदेशत्वाच्च स एव ब्रह्मपदव्यवहार्य्योऽपीत्यन्यत्र विस्तरः। अन्ये तु वर्णानां न स्फोटात्मकत्वम्। किन्तु स्फोटस्य वर्णाभिव्यङ्ग्यत्वमेव। नच प्रत्येकवर्णाभिव्यक्तादर्थबोधापत्तिः, चरमवर्णाभिव्यक्त्यनन्तरमेव बोधदर्शनेन चरमवर्णाभिव्यक्तस्फोटस्यैव वाचकत्वोपगमात्। तस्यैकत्वेऽपि व्यञ्जकरूपप्रतिबिम्बनात्तद्रूपरुषितस्यैव प्रतीत्या नानात्वप्रतीतिरौपाधिक्येव। एकस्यैव मुखस्य दर्पणकृपाणाद्यभिव्यञ्जककृतदैर्घ्यवर्तुलत्वादिभेदेन भेदवत्। दर्पणादिगतस्य मुखत्वाभावे तु प्रतिबिम्बभेदस्य रक्तपीताद्यावरणभेदेन विद्युत्प्रकाशभेदस्य च दृष्टान्तत्वं बोध्यम्, स्फोटस्यैकत्वादेव न तत्र जातिकल्पनम्। वर्णाभिन्नव्यञ्जकाभावाद्वर्णरूपरुषितस्यैवाभिव्यक्तेश्च न कदाचिदपि वर्णराहित्येन भानम्। नच वर्णानां प्रतिबिम्बसमर्पणे बीजाभावः, अनादिसंस्कारस्यैव तत्र बीजत्वात्। ते च स्फोटा येन क्रमेण चित्तस्थास्तेनैव क्रमेण व्यञ्जकरूपरुषितता तत्रेति न सरो रस इत्यनयोरैक्यप्रसक्तिः। व्यञ्जकरूपरुषिते एव तत्रार्थनिरूपितशक्तिग्रहान्न घटादिपर्य्यायाभिव्यक्ते शक्तिग्रहवतः पुंसोऽगृहीतशक्तिकात्कलशादिपदादर्थबोधापत्तिः। अत एवेदमेकं पदमेकं वाक्यमित्यादिव्यवहारोऽप्युपपद्यत इत्याहुः। ६८। एवमिति—अखण्डस्फोटस्यैव वाचकत्वाङ्गीकार इत्यर्थः। शास्त्रस्येति—व्याकरणशास्त्रस्येत्यर्थः। प्रकृतिप्रत्ययाभ्यां व्युत्पादनद्वारा तत्तदर्थप्रतिपादनपरत्वात्तस्येति भावः। पदस्येति—इदं वाक्यस्याप्युपलक्षणम्। अखण्डत्वादिति—निरवयवत्वादित्यर्थः। पदव्युत्पादनेति—पदादिघटकप्रकृतिप्रत्यया-

दर्पणव्याख्या

च्चेति। अन्ये तु—न वर्णानां स्फोटात्मकत्वम्। किन्तु स्फोटस्य वर्णाभिव्यङ्ग्यत्वमेव। नच प्रत्येकव्यञ्जकत्वपक्षोक्तदोषः, प्रयोगान्तर्गतसकलवर्णानां तद्व्यञ्जकत्वेऽपि चरमवर्णाभिव्यक्तस्यैव तस्य वाचकत्वोपगमादत एव नाद्यवर्णजाभिव्यक्त्युत्तरमर्थबोधः, तस्यैकत्वेऽपि तत्र व्यञ्जकरूपप्रतिबिम्बजन्यतद्रूपारूषितस्यैव प्रतीत्या नानात्वेन प्रतीतिरौपाधिकी, एकस्यैव मुखस्य कृपाणदर्पणाद्यभिव्यञ्जकवशाद्दैर्घ्यवर्तुलत्वादिप्रतीतिवत्। अत एवानुगमार्थं न तत्र जातिकल्पनाऽपि। वर्णाभिन्नव्यञ्जकाभावाच्च न कदाचिदपि वर्णराहित्येन तत्प्रतीतिस्तत्प्रतिबिम्बसमर्पकाश्च संस्कारा एव। ते च येन क्रमेण चित्तस्थास्तेनैव क्रमेण व्यञ्जकरूपरूषितता तस्येत्यभ्युपगमाच्च न सरो सर इत्यनयोरविशेषः। व्यञ्जकरूपरूषितस्यैव तस्यार्थे शक्तिग्रहाच्च न घटादिपर्य्यायाभिव्यक्तस्फोटे गृहीतशक्तिकस्याप्रसिद्धपदश्रवणेऽर्थबोधापत्तिः, अत एवेदमेकं पदमेकं वाक्यमिति व्यवहारः स्वरसतः सङ्गच्छत इत्याहुः ॥ ६८ ॥ *एवमिति* अखण्डस्फोटस्यैव वाचकत्वे इत्यर्थः। अप्रामाण्यप्रसङ्गमेवोपपादयति—*पदस्येति* वाक्यस्याप्युपलक्षणमिदम्। *अखण्डत्वादिति* प्रकृतिप्रत्ययविभागशून्यत्वादित्यर्थः। तथाभूतस्यैव वाचकताया भवद्भिरुपपादितत्वादिति भावः। *शास्त्रस्य* व्याकरणात्मकस्य। *प्रकृतिप्रत्ययाभ्यामिति*

त्रार्थत्वादित्याशङ्कां समाधत्ते—

पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता । उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥ ६९ ॥

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः । अयं भावः—यथा भृगुवल्ल्याम् "भृगुर्वै वारुणि वरुणं ब्रह्म पृष्टवान् । स उवाच 'अन्नम्' इति, तस्योत्पत्त्यादिकं बुद्ध्वा पृष्टे—प्राणमनोविज्ञानाऽनन्दा-

प्रभा

दितत्तदर्थतदन्वयादिविषयकज्ञानमात्रफलादित्यर्थः । एवञ्च प्रकृतिप्रत्ययादिविभागेन पदवाक्यार्थवाचकत्वबोधकस्यास्य शास्त्रस्य पदादेरखण्डत्वेऽप्रामाण्यापत्तिरिति भावः । तस्मात्—पदे न वर्णाः' इति पूर्वकारिकया पदस्य वाक्यस्य चाखण्डत्वप्रतिपादनेनाखण्डपदादिरूपस्य स्फोटस्य निरूपयितुमशक्यत्वात्पञ्चकोशादिवत् उपेयप्रतिपत्त्यर्था एषा कल्पना समाश्रिता । एषा कल्पना=असतोऽपि प्रकृतिप्रत्ययादेरुहः । 'उपेयप्रतिपत्त्यर्था' इत्यस्यैकवचनेन स्त्रीत्वरूपलिङ्गेन च विपरिणमय्य 'उपेयप्रतिपत्त्यर्था' इति योऽन्तस्तेनान्वयः कार्य्यः । अस्य कारिकापूर्वार्द्धस्येति शेषः । यद्वा उत्तरत्र यत इत्यध्याहार्य्य यतो हेतोरुपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः, तस्मात्=अव्यवस्थितत्वात् पञ्चकोशादिवदेषा कल्पना समाश्रितेत्यन्वयः । उपेयस्य=प्राप्तुं योग्यस्यार्थस्य प्रतिपत्तिः=प्राप्तिः, ज्ञानं वा । समाश्रितेत्यस्य पाणिनिमुनिनेति शेषः । अयम्भाव इति—तैत्तिरीयोपनिषद्गता अनुवाकसमूहात्मिका भृगुप्रश्नाश्रिता भृगुवल्ली । तत्र वरुणपुत्रो भृगुः स्वपितरं वरुणं ब्रह्म पृष्टवान् । वरुणश्च तस्मै 'अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति' ब्रह्मोपलब्धौ द्वाराण्युक्तवान् । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति' इति ब्रह्मलक्षणञ्चोक्तवान् । स च भृगुः पितुर्ब्रह्मोपलब्धिद्वाराणि ब्रह्मलक्षणञ्च श्रुत्वा तपोऽतप्यत । तपसि प्रवृत्तौ चेदं कारणं यद् भृगुणा विचारितं यत् पिता स्वरूपतो ब्रह्म नोपदिष्टवानतोऽवगम्यते नूनं तत्प्रापकं साधनान्तरमप्यपेक्षते पिता । सर्वेषां हि साधनानां तप एव साधकतमं साधनमिति तपश्चचार भृगुः । तच्च तपोऽन्तःकरणसमाधानम्, तद्द्वारकत्वाद् ब्रह्मप्रतिपत्तेः ।

तदुक्तम्—'मनसश्चेन्द्रियाणाञ्चैकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ इति ॥

स च तपस्तप्त्वा 'अन्नं ब्रह्मेति व्यजानात्' यतोऽन्नाद् जायन्ते । तेन जीवन्ति । तत्राभिसंविशन्ति इति ब्रह्मलक्षणदर्शनात् । अत्र अद्यते=भुज्यते=उपलभ्यते सर्वैरिति सर्वप्रतिपत्तृसाधारणं स्थूलदेहकारणं भूतपञ्चकं विराट्संज्ञकमन्नशब्देनोच्यते । अन्नपदवाच्यस्य भूतपञ्चकस्य विराज उत्पत्त्यादिदर्शनात्पुनः तपस्तप्त्वा प्राणो ब्रह्मेति व्यजानात्' अत्र प्राणशब्देन लक्षणया प्राणकारणं क्रियाशक्तिविशिष्टतया हिरण्यगर्भ उच्यते । तस्याप्युत्पत्त्यादिदर्शनात् । मनो ब्रह्मेति व्यजानात् । अत्र मनः शब्देन संकल्पात्मकशक्तिविशिष्टं चैतन्यमुच्यते । ततस्तस्याप्युत्पत्त्यादिदर्शनात् 'विज्ञानं ब्रह्मेति व्यजानात्' तपसैव तस्यापि ब्रह्मलक्षणानाक्रान्तत्वं

दर्पणव्याख्या

ताभ्यां यद् व्युत्पादनम्=शक्तिबोधनं तन्मात्रप्रयोजनत्वादित्यर्थः । तथाच प्रकृतिप्रत्ययविभागेन पदार्थवाचकत्वबोधकस्यास्य शास्त्रस्य पदस्याखण्डत्वेऽप्रामाण्यापत्तिरिति भावः । * उपेयप्रतिपत्त्यर्थेति * वचनविपरिणामेन उत्तरत्राप्यन्वेति । उपेयस्य=बोधनीयस्य प्रतिपत्तये एषा कल्पना श्रिता=स्वीकृता मुनिनेति शेषः । तत्र दृष्टान्तमाह—*पञ्चकोशादिवदिति* । दृष्टान्तमेव स्फुटयति—*अयम्भाव इति* तत्र हि "भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्, स उवाचान्नं ब्रह्म" इति तस्योत्पत्त्यादि बुद्ध्वा पुनस्तेन पृष्टः "प्राणो ब्रह्म" इति तस्यापि तथात्वं बुद्ध्वा पृष्टः "मनो ब्रह्म" इति । तस्याऽप्यशितमन्नं त्रेधा भवति—"यत्स्थूलं तत्पुरीषम्, यन्मध्यमं तन्मांसं यदणीयस्तन्मनः" इति श्रवणादनित्यत्वमवधार्य्य

पञ्चकोशोत्तरं "ब्रह्मपुच्छं प्रतिष्ठा" इति ज्ञेयं ब्रह्म प्रतिपादितम् । तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय । यथा वा आनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय । एवं प्रकृतिप्रत्य-

प्रभा

बुद्ध्वा 'आनन्दो ब्रह्मेति व्यजानात्' एवं तपसा विशुद्धात्मा प्राणादिषु ब्रह्मलक्षणमपश्यत् शनैः शनैरन्तरमुपविश्यान्तरतमानन्दं ब्रह्म विज्ञातवान् । ब्राह्मान्तःकरणसमाधानलक्षणं परमं तपोऽनुष्ठेयमिति प्रकरणतात्पर्य्यम् । पञ्चकोशोत्तरमिति=असिकोशवदात्माच्छादकत्वं कोशत्वम् , पञ्चीकृतेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नमयः कोशः । तदुक्तम् १—स्यात्पञ्चीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः' इति । २—कर्मेन्द्रियपञ्चकविशिष्टवायुपञ्चकरूपः प्राणमयाख्यः कोशः । तदुक्तम्—'लिङ्गे तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह' इति । ३—ज्ञानेन्द्रियपञ्चकविशिष्टमनोरूपो मनोमयः कोशः । 'सात्त्विकै र्धीन्द्रियैः साकं विमर्शात्मा (संशय त्मा) मनोमय इति । ४—ज्ञानेन्द्रियपञ्चकविशिष्टबुद्धिरूपो विज्ञानमयः कोशः । तदुक्तम्—'तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका' इति । ५—कारणशरीरभूतायामविद्यायां यन्मलिनसत्त्वं तदेव प्रियमोदप्रमोदाख्याभिः, इष्टदर्शनलाभभोगजन्यसुखात्मिकाभिरन्तःकरणवृत्तिभिः सममानन्दमयकोश इत्युच्यते । तदुक्तम्—कारणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः' इति तत्तत्कोशतादात्म्यापन्न आत्माऽपि अन्नमयादिशब्देनोच्यते । अत एव 'तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तरात्मा प्राणमयोऽन्योऽन्तरात्मा मनोमयः' इति श्रुतिः सङ्गच्छते इति पञ्चकोशात्मकातात्त्विकं ब्रह्म यथा वरुणेन तात्त्विकब्रह्मज्ञानोपायतया उपदिष्टम् । तथैव व्याकरणे पाणिनिना अखण्डनित्यस्फोटरूपपदवाक्यज्ञानोपायतया प्रकृतिप्रत्ययादय उपदिष्टा इति भावः । ततः परम् 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्तम् । 'प्रतिष्ठा' इति द्व्यचोऽतस्तिङः' इति दीर्घः । सर्वस्याविद्याकल्पितस्य द्वैतस्य पुच्छम्=अवसानभूतम् आधारभूतं वा ब्रह्म प्रतिष्ठ' इत्येवमद्वैतं ब्रह्म उपदिष्टम् । वस्तुतस्तु वरुणेनोपदिष्टस्य कोशचतुष्कस्योत्पत्त्यादिकं बुद्ध्वा पुनः पृष्टो वरुणः 'तपसा ब्रह्म विजिज्ञास्व' इत्युक्तवान् । ततस्तपस्तप्त्वा 'आनन्दो ब्रह्मेति व्यजानात् तदनन्तरं नापि प्रश्नो नाप्युत्तरम् । नापि 'पुच्छं ब्रह्म प्रतिष्ठा' इति वाक्यं भृगुवल्यां वर्तते । अतस्तत्रानन्दपदं न आनन्दमयकोशपरम् , किन्तु शुद्धब्रह्मपरमेवेति । पञ्चकोशादिवत्' इति कारिकायां यो दृष्टान्तः स आनन्दवल्लीस्थपञ्चकोशाभिप्रायेणैव । अत एव 'भृगुर्वारुणि वरुणं पितरं ब्रह्म पृष्टवान् । वरुण उवाच—'अन्नम्' इति । अस्योत्पत्त्यादिकं समीक्ष्य पुनः पप्रच्छ । तत उत्तरत्=प्राणो ब्रह्म' इति । तस्यापि अतथात्वावधारणानन्तरं पुनः प्रश्ने आह—मन इति—तस्यापि 'अशितमन्नं त्रेधा भवति—यत्स्थूलं तत्पुरीषं यन्मध्यमं तन्मांसम् यदणीयस्तन्मनः, इति श्रुतावुत्पत्तिश्रवणात् पुनः प्रश्ने आह—विज्ञानमयमिति । तस्यापि वृत्त्युपहितत्वेनातथात्वं बुद्ध्वा पुनः पृष्टवान् । ततः 'आनन्दो ब्रह्म' इत्युत्तरिते वस्तुतत्त्वं प्राप्तः स्थितो भृगुः । एवञ्च पञ्चमस्य शुद्धब्रह्मपरकत्वात्तज्ज्ञानोपायभूतकोशत्वाभावात् पञ्चपदोपादानं न सङ्गच्छेतेति । तस्माद् भृगुवल्ली नोदाहरणम् , किन्तु आनन्दवल्ल्येव । तत्र हि पञ्चापि कोशा उपाया एव । तत्र हि 'अन्नाद्वै प्रजायन्ते । याः काश्च पृथिवीश्रिताः अथैनदपि यन्त्यतः । सर्वे वैतेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्म उपासते ॥ १ ॥ अन्नमयः कोशः । 'तस्माद्वा एतस्मा-

दर्पणव्याख्या

पुनः पृष्टः, "विज्ञानं ब्रह्म" इति तस्यापि वृत्त्युपहितत्वं ज्ञात्वा पुनः पृष्टेनोपदिष्टम्—"आनन्दो ब्रह्मेति व्यजानात्" । ततो वस्तुत्त्वं प्राप्य स्थित इति प्रतिपादितम् । ननु नेयं वल्ली पञ्चकोशप्रतिपादिका । पञ्चमस्यानुपायत्वादकोशत्वातस्यैव तत्र ब्रह्मत्वबोधनादित्याशङ्क्यानन्दवल्लीस्थपञ्चकोशोदाहरणमाह—* यथा वेति * तत्रत्या हि पञ्चकोशा उपाया एव,

SGDF

यादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति। ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसम्भवात्

प्रभा

दन्नरसमयादन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एव पुरुषविध एव।'' प्राणं देवा अनुप्राणन्ति। मनुष्याः पशवश्च ये'' 'सर्वमेव ते आयुर्यन्ति ये प्राणं ब्रह्म उपासते॥ २॥ प्राणकोशः। 'तस्माद्वा एतस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयः॥ ३॥ इति मनोमयः कोशः। 'तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः॥ ४॥ इति विज्ञानमयकोशः। 'तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्मा आनन्दमयः॥ ५॥ इति आनन्दमयकोशः। नन्वानन्दवल्ल्यामपि यदानन्दपदं तदपि मुख्यब्रह्मपरमेव। अत एव 'आनन्दमयोऽभ्यासात्' (अ० १ पा० १ अ० ६ सू० १२) इत्यादिसूत्रकदम्बैस्तत्रत्यानन्दपदस्य आनन्दमयकोशतादात्म्यापन्नजीवपरकत्वं ब्रह्मसूत्रकृता खण्डितमिति चेन्न, यद्यन्नमयादिभ्य इवानन्दमयादन्योऽन्तर आत्मेति न श्रूयते, तथापि नानन्दमयस्य ब्रह्मत्वम्, यत आनन्दमयं प्रकृत्य श्रूयते तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा' (तै० २।५) इति तत्र यद् ब्रह्मतन्त्रवर्णं प्रकृतम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' इति। तदिह ब्रह्मपुच्छं प्रतिष्ठा' इत्युच्यते। तद्विजिज्ञासाविषयैवान्नमयादय आनन्दमयपर्यन्ताः पञ्चकोशाः कल्प्यन्ते' इति शारीरिकभाष्यकृतैव समाहितत्वात्, सूत्रे 'आनन्दमयपदस्य तद्वाक्यशेषे श्रूयमाणब्रह्मपदे एव तात्पर्य्याच्चेत्यन्यत्र विस्तरः। अत्राप्यन्नादिशब्देन पूर्वोक्त एव कोशो ग्राह्यः। आनन्दशब्देनात्र 'करणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः' इत्युक्त एव ग्राह्यः, उत्तरत्र शुद्धब्रह्मोक्तः। ततो 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्तम्। अत्र पुच्छमविद्याकल्पितस्य सर्वस्यावसानम्, सर्वाधारं वा ब्रह्म प्रतिष्ठा, इत्युक्त्या अनेनैव वास्तविकं ब्रह्म उपदिष्टम्। अत्र श्रूयमाणं यद् ब्रह्मपदं तदेव मुख्यब्रह्मपरम्। अत एव जगदाधारार्थकपुच्छपदोपादानं सङ्गच्छते। लाङ्गूलात्मकमुख्यार्थस्य तत्र बाधादाधारे लाक्षणिकमत्र पुच्छपदम्। ब्रह्म तु पञ्चकोशतादात्म्यापन्नचैतन्यादन्यदेव। तदुक्तम्—

'अन्वयव्यतिरेकाभ्यां पञ्चकोशविवेकतः। स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते'॥ इति।

एवञ्च यथा पञ्चकोशाः सर्वाधारणब्रह्मप्रतिपादनाय औपयिकत्वेनोक्ताः, ननु तेषां वास्तवब्रह्मत्वम्। तथेहापि अवास्तवयोः प्रकृतिप्रत्यययोर्वाचकत्वव्युत्पादनं वास्तवस्फोटनिष्ठवाचकत्वबोधनायेति निर्गलितोऽर्थः। प्रत्यक्षस्येति—व्यञ्जकरूपेण श्रवणेन्द्रियगोचरस्येत्यर्थः। श्रवणादित इति—आदिना मनननिदिध्यासनयोः सङ्ग्रहः। श्रवणञ्चात्र न कर्णेन्द्रियजन्यज्ञानपरम्, प्रत्यक्षस्येत्युक्त्या पौनरुक्त्यापत्तेः। किन्तु 'उपक्रमादिभिः षड्भिर्लिङ्गै र्वाक्यानामद्वितीये स्फोटाख्ये ब्रह्मणि तात्पर्यावधारणम्। तात्पर्यनिश्चायकोपक्रमादियुक्त्यनुसन्धानमित्यद्वैतिनः। वाक्यानां कुत्र तात्पर्यमिति जिज्ञासायां तन्निर्णयानुकूलो व्यापार इति केचित्। मननञ्च—श्रुतार्थस्योपपत्तिभिश्चिन्तनम्। अथासत्त्वशङ्कानिवर्तकयुक्त्यनुसन्धानमित्यद्वैतिनः। शब्दावधारितेऽर्थे मानान्तराविरोधाशङ्कायां तन्निराकरणाय तर्कात्मकज्ञानजनको मानसो व्यापार इति अध्वरीन्द्रधर्मराजः। बाधकसाधकप्रमाणोपन्यासरूपयुक्तिभिर्वाक्यार्थानुचिन्तनमिति तार्किकाः। निदिध्या-

दर्पणव्याख्या

उपदिष्टाञ्चमानन्दकोषस्यापि वैषयिकतयाऽनित्यत्वेनाब्रह्मत्वात् किन्तु 'ब्रह्म पुच्छं प्रतिष्ठा'' इत्यत्र श्रूयमाणब्रह्मपदस्यैव मुख्यब्रह्मपरत्वम्। अत एवाऽधारार्थकः पुच्छशब्दोऽप्युपपद्यते, तस्य लाङ्गूलरूपमुख्यार्थस्य बाधात्। एवञ्चानन्दवल्ल्यां यथा पञ्चकोशाः सर्वाधारब्रह्मबोधनायोपायतयोपात्ताः, ननु तेषां वास्तवब्रह्मत्वम्, तथेहाप्यवास्तवप्रकृति-प्रत्यया वाचकत्वव्युत्पादनं वास्तवस्फोटनिष्ठवाचकत्वबोधनायेत्याखण्डार्थः। ***श्रवणादित इति*** आदिना मननादिपरिग्रहः।

न शास्त्रं तदुपाय इत्यत आह--उपाया इति--उपायस्योपायान्तरादूषकत्वात्। तथाच व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते। मन्त्रजन्यमिवार्थस्मरणे। वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीना-

प्रभा

सानञ्च निपूर्वकाद् ध्यायतेः सनि बाहुलकाल्ल्युटि रूपम्। तच्चापरोक्षनिश्चयत्वसम्पादकस्तर्कः। विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणमिति वेदान्तिनः। श्रुतार्थस्य नैरन्तर्य्येण दीर्घकालमनुसन्धानमिति नैयायिकाः। न शास्त्रमिति--व्याकरणशास्त्रं विनापि श्रवण-मनन-निदिध्यासनैः स्फोटबोधसम्भवेन व्यभिचारात् स्फोटज्ञानसाधनत्वं व्याकरणे न सम्भवतीति भावः। नन्वेकं कार्यम्प्रति यत्रानेकस्य कारणता तत्र कार्य्यतावच्छेदकदले कारणाव्यवहितोत्तरत्वनिवेशाद् व्यभिचाराभाव इत्याशयेनाह--उपाय इति--ननु सुखसाध्यश्रवणादिना स्फोटज्ञानसम्भवे ब्रह्मायाससाध्यव्याकरणज्ञानजन्यस्फोटज्ञाने गौरवमित्यत आह--तथाचेति--अन्यथासिद्धस्फोटज्ञानार्थं व्याकरणारम्भे चेत्यर्थः। कल्प्यत इति--व्याकरणाध्ययनस्य स्फोटज्ञानत्वमात्रं न कार्य्यतावच्छेदकम्, किन्तु वैजात्यसमानाधिकरणस्फोटज्ञानत्वम्। एवञ्च तादृशज्ञानत्वावच्छिन्नश्रवणादिसाध्यमिति न गौरवस्य दोषावहत्वं प्रकृते, लघुसाध्यस्य गुरुसाध्यत्वस्वीकारे एव गौरवस्य दोषत्वात्। वस्तुतस्तु श्रवणादीनामनेकजन्मसाध्यत्वेन दुष्करत्वाल्लाघवेन स्फोटज्ञाने एव व्याकरणस्योपयोग इति बोध्यम्। नच वैजात्यविशिष्टस्य कार्य्यतावच्छेदकत्वे प्रमाणाभावः, व्याकरणशास्त्रारम्भस्यैव प्रमाणत्वात्। तच्च वैजात्यं पुण्यजनकतावच्छेदकधर्मविशेषरूपम्। नच स्फोटज्ञानरूपकार्य्यगतवैजात्यस्य कार्य्यात्प्रागनुपस्थितेः कार्य्यकारणभावग्रहासम्भवः, स्फोटज्ञानानुत्तरकालावृत्तित्वस्यैव स्फोटज्ञानत्वसामानाधिकरण्येन स्वीकारादिन्यत्र विस्तरः। जन्यतावच्छेदकवैजात्यकल्पनायां दृष्टान्तमाह--मन्त्रजन्यमिवेति--तत्र तत्र हविरादिदाने मन्त्राणां विनियोगो दृश्यते। तत्र मन्त्रं विनाऽपि हविर्दानादिकं स्यात् किं मन्त्रेणेति संशयेऽर्थस्मरणार्था हि मन्त्रा इत्युत्तरितम्। प्रकारान्तरेणापि मन्त्रार्थस्मरणं स्यात् किं मन्त्रेणेति पुनराक्षेपे समहितं मीमांसायाम्--मन्त्रजन्यार्थस्मरणे किञ्चिद्वैजात्यं स्मरणे कल्प्यते। तथाच वैजात्यविशिष्टमन्त्रार्थस्मृतित्वं मन्त्रजन्यतावच्छेदकम्, नतु मन्त्रार्थस्मृतित्वमात्रमिति तादृशकार्य्यकारणभावस्वीकारे यथा न व्यभिचारः। एवं ब्रह्मज्ञानस्य भाषाग्रन्थतोऽपि निष्पत्त्या व्यभिचारेण वेदान्तवाक्यानां ब्रह्मज्ञानम्प्रति कारणत्वं न स्यादिति तत्र तादृशकारणत्वोपपत्तये व्यभिचारवारणाय यथा वेदान्तवाक्यजन्यतावच्छेदकं वैजात्यविशिष्टब्रह्मज्ञानत्वम्, नतु ब्रह्मज्ञानत्वमात्रम्। तथा व्याकरणजन्यस्फोटज्ञानेऽपि वैजात्यं कल्पयित्वा कार्य्यकारणभावस्वीकारे नास्ति व्यभिचार इति भावः। वेदान्तजन्यमेवेति--अत्रापि 'वेदान्तजन्यपदम्' वैजात्यविशिष्टवेदान्तजन्यतावच्छेदकपरम्। नन्वेवमपि पुरुषार्थचतुष्टयान्यतमसाधनस्यैव फलतया व्याकरणजन्यस्य स्फोटज्ञानस्य चतुर्विधपुरुषार्थेषु कस्याप्यसाधनतया वैयर्थ्यमत आह--तस्य चेति--व्याकरणशास्त्राभ्यासजनितस्फोटज्ञानस्येत्यर्थः। यज्ञादीनामिति--फलमनुद्दिश्येश्वरार्पणबुद्ध्या कृतानां यज्ञादीना-

दर्पणव्याख्या

न शास्त्रमिति एतच्छास्त्रं विनाऽपि श्रवणाऽदिना तद्बोधेन व्यभिचारादिति भावः। उपायस्योपायान्तरादूषकत्वे सदृष्टान्तां युक्तिमाह--*तथाचेति* व्याकरणाध्ययनस्य स्फोटज्ञानत्वं न कार्य्यतावच्छेदकम्, किन्तु तादृशज्ञानगतवैजात्यम् तदवच्छिन्नञ्च नोपायान्तरादिति न व्यभिचारः। वैजात्यस्य प्रागनुपस्थितावपि कारणताग्रहो विधिवादोक्तदिशाऽवसेय इति भावः। *मन्त्रजन्यमिवेति* मन्त्रजन्यताऽवच्छेदकमिवेत्यर्थः। एवमग्रेऽपि। ननु पुरुषार्थासाधकस्य तस्य सम्पादनवैयर्थ्यमत आह--*तस्य चेति* स्फोटज्ञानस्य चेत्यर्थः। *यज्ञादीनामिति* कामनापरित्यागेन विधीयमानानां

मन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः, साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वञ्च । तदुक्तं वाक्यपदीये— तद्द्वारमपवर्गस्य वाङ्मलानां

प्रभा

मित्यर्थः । तदुक्तम्—'ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्' इति । आदिना विधिपूर्वकदानादिपरिग्रहः । तथाच श्रुतिः—'तमेतं वेदान्तानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवति' इति (बृ० आ० ४ अ० ४ ब्रा० २२ म०) वेदानुवचनेन=वेदाध्ययनेन । अनाशकेन=उपवासरूपव्रतविशेषेण । उपवासस्य तपसैव गतार्थत्वात् कामानशनेन=कामत्यागेनेति वार्थः । अनया श्रुत्या यथा यज्ञादीनां परम्परया मोक्षसाधनत्वं तथा शास्त्रजन्यस्फोटज्ञानस्यापि परम्परया मोक्षसाधनत्वं ध्वन्यते । अन्तःकरणेति—साक्षादित्यादिः । शरीरादिशुद्धाविति—स्फोटज्ञानस्यापि शरीरशुद्धौ साक्षादुपयोग इत्यर्थः । आदिनेन्द्रियपरिग्रहः । एवञ्च न शास्त्रवैयर्थ्यमिति भावः । ननु शरीरादिशुद्धेरप्यपुरुषार्थतया तत्साधने स्फोटज्ञाने प्रवृत्तिर्न स्यादत आह—साक्षादिति—साक्षात्स्वर्गहेतुत्वम्, परम्परया च मोक्षहेतुत्वमिति भावः । अत एव 'एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति' इति भाष्योक्ता श्रुतिः सङ्गच्छते । अत्र कामधुक्पदश्रवणात् कामफलकत्वमप्युक्तम् । मोक्षसाधनत्वमपि 'चत्वारि शृङ्गाः त्रयोऽस्य पादाः द्वे शीर्षे सप्त हस्तासोऽस्य । त्रिधाबद्धो वृषभो रोरवीति । महो देवो मर्त्यामाविवेश, इति श्रुत्या स्पष्टमेव भाष्यकृतैव प्रदर्शितम् । अत्र भाष्यम्—'महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्' इति । कैयटोऽपि 'महता=परब्रह्मणेत्यर्थः । इति 'द्वे ब्रह्मणी वेदितव्ये' इति स्मृतिरपि तत्र मानं बोध्यम् । परम्परयेति—यज्ञाद्यनुष्ठानद्वारा वेत्यर्थः, यज्ञेऽपभाषणस्य निषेधात् । तदुक्तम्—'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सरस्वतीमिष्टिं निर्वपेदिति' इति । परम्परा च आत्मज्ञानघटिता ग्राह्या 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुत्या मोक्षस्यात्मज्ञानैकसाध्यत्वबोधनात् । तत्र हरिं प्रमाणयति—तदुक्तमिति=स्फोटज्ञानस्य मोक्षम्प्रति हेतुत्वं हरिणाप्युक्तमित्यर्थः । तद्=व्याकरणम् । द्वारम्=उपायः । अपवर्गस्य=आत्यन्तिकमोक्षस्य । वाङ्मलानामिति=वाचां मलाः—'ग्रस्तं निरस्तमबिलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम् । संदष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमेता स्वरदोषभावना इति । अतोऽन्ये व्यञ्जनदोषा, इति भाष्योक्तग्रस्तादयः, अपभ्रंशा वा । व्याकरणतो हि प्रत्यवायहेतुभूतानपशब्दान्न प्रयुङ्क्ते । ज्ञानं हि तस्य शरणम् । यद्वा वाचां मलाः=ब्रह्मभेदरूपाः । तदुक्तम्भाष्ये 'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि' इति । अस्यार्थः—यथा तितउना=चालनिना सक्तोस्तुषाद्यपनीयते, तथा व्याकरणेन वाचोऽपशब्दा अपनीयन्ते इत्यर्थः । तदाह='धीराः=ध्यानवन्तो वैयाकरणाः ।

दर्पणव्याख्या

तेषामित्यर्थः । यज्ञादीत्यादिना 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति श्रुत्युक्तदानादिपरिग्रहः । शरीरादीत्यादिना वागिन्द्रियपरिग्रहः । ननु शरीरादिशुद्धेरप्यपुरुषार्थतया तदुद्देशेनापि प्रवृत्तिर्दुर्घटेत्यत आह—***साक्षादिति***स्वर्गादीत्यादिनाऽपवर्गपरिग्रहः । साक्षात्स्वर्गहेतुत्वम्, परम्परयाऽपवर्गहेतुत्वञ्चेत्यर्थः । स्वर्गहेतुत्वे "चैकः शब्दः" इति भाष्यपठितश्रुतिः, परम्परया मोक्षहेतुत्वे च, 'द्वे ब्रह्मणी वेदितव्ये" इति स्मृतिः प्रमाणम् । परम्पराघटकं चात्मतत्त्वज्ञानम् "तमेव विदित्वा" इति श्रुत्या तदतिरिक्तस्य साक्षान्मोक्षहेतुत्वव्यवच्छेदबोधनादिति बोध्यम् । उक्तार्थे हरिसम्मतिमाह—***तदुक्तमिति***। तत्=नादात्मकस्फोटप्रतिपादकं शास्त्रम् । ***अपवर्गस्येति***मोक्षस्येत्यर्थः । ***द्वारमिति*** तदुपयोगीत्यर्थः । हेतुगर्भविशेषणमाह—***वाङ्मलानामिति***।

चिकित्सितम् । पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते । इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।

प्रभा

मनसा प्रज्ञानेन=निर्विकल्पकज्ञानेनैव वाचमकृत=असाधुभ्यो विविक्तां कृतवन्तस्ते तत्करणेन शुद्धचित्ताः । अत्रा=ब्रह्मप्रतिपादकशब्दे सखायः=शब्दार्थयोरभेदबुद्ध्या समानज्ञानाः । तच्छब्दे ब्रह्मैकत्वज्ञानवन्तः । तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मनिरूपिताभेदज्ञानवन्तः सख्यानि=सायुज्यानि=ब्रह्मैकत्वमिति यावत् । यानते=प्राप्नुवन्ति । यत एतेषां वाचि भद्रा लक्ष्मीः=स्वप्रकाशब्रह्मरूपा अधि=अधिकं निहिता=स्थिता भवतीति ऋगर्थः । अयम्भावः—ये शास्त्रतः प्रकृतिप्रत्ययादिविभागेन साधुत्वं ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचमसाधुभ्यः पृथक् कृतवन्तस्ते तज्ज्ञानपूर्वकसाधुशब्दप्रयोगैर्लब्धान्तःकरणशुद्धयोऽत्र एष दुर्गो मार्गो ब्रह्मरूपस्तत्रात्मना सह समाने ख्यातयः=त्यक्तभेदभावाः सख्यानि=सायुज्यानि प्राप्नुवन्ति । यत एतेषां वाचि वेदाख्ये ब्रह्मणि भद्रा लक्ष्मीः सर्वभासकब्रह्मरूपा 'अधि=अधिकं निहिता भवति । एतच्छास्त्रसाध्यप्रयोगव्यङ्ग्यस्य ध्वनिरूपवैखरीरूपरुषितस्यैव तैर्वाचकत्वस्वीकारेण तस्य चात्यन्तविचारे ब्रह्मातिरिक्तेभानानुपलम्भनेन तत्तदुपाधिभिन्नचित्त एव बोधकतया ग्रहादेव सर्वबोधकेषु ब्रह्मबुद्धौ जातायां तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मबुद्धिर्वैयाकरणानाम् । यत्तु—पदपदार्थवाक्यार्थमर्य्यादया 'सत्यं ज्ञानम्' इत्यादितस्तद्बोधात्सा तेषां वाचि निहितेति तन्न, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुत्या ब्रह्मणस्तन्मर्य्यादया शब्दाबोध्यत्वोक्तेरित्यन्यत्र विस्तरः । चिकित्सितमिति=चिकित्स्यतेऽनेनेति चिकित्सितम्, अपनयनार्थकात् कितेः सन्नन्ताद् बाहुलकात्करणे क्ते साधु । यतो वाङ्मलकर्मकापनयनसाधनं व्याकरणमतो मोक्षद्वारम्=मोक्षोपयोगीत्यर्थः । पवित्रम्=शब्दब्रह्मप्रकाशकतया सर्वविद्यानां पवित्रम् । किञ्च "अधिविद्यम्=सर्वासु विद्यासु इत्यधिविद्यम्, विभक्त्यर्थेऽव्ययीभावः । सर्वासु विद्यासूपयोगितया प्रकाशत इत्यर्थः । तथाचोक्तम्—'आपः पवित्रं परमम्पृथिव्या अद्भ्यः पवित्रं परमं हि मन्त्राः । तेषाञ्च सामर्ग्यजुषाम्पवित्रमृषयो व्याकरणं निराहुः इति । अत्र मन्त्रपदेन 'ऋग्यजुःसामात्मकमन्त्रकारणीभूतानाम्—अग्निवाय्वादिस्थानां मध्ये वात्वपेक्षयाऽग्नेरधिकपवित्रत्वस्यौचित्येन तत्कार्यभूतानाम्-ऋगादिमन्त्राणां पवित्रतमत्वं स्फुटमेवोक्तम् । मन्त्रापेक्षया व्याकरणस्य पवित्रतमत्वन्तु सकलप्रपञ्चकारणीभूतपरावाग्रूपब्रह्मप्रापकत्वेन बोध्यम् । एतेन जलापेक्षया मन्त्राणाम्, तदपेक्षयाव्याकरणस्य च पवित्रतमत्वम् 'तस्मादात्मन आकाशः सम्भूतः' 'आकाशाद् वायुः' 'वायोरग्निः' 'अग्नेरापः' अद्भ्यः पृथ्वी इति श्रुत्युक्तक्रमविरुद्धमित्यपास्तमिति—पञ्चोलिनः । इदम्=व्याकरणशास्त्रम् । पदे ते=स्थीयतेऽस्मिन्निति स्थानम्, अधिकरणे ल्युट् प्रथमं पादस्थित्यधिकरणमित्यर्थः । सिद्धीति-सिद्धिः=मोक्षस्तस्य साधनानि एव सोपानानि=उपरिगमनाय निःश्रेणयः, उपपूर्वकादनीतेर्भावे घञि उपानं श्वासग्रहणम्, उपरिगमनं वा तेन सह वर्तन्तेऽत्रेति सोपानानि, तेषां पर्वाणि=ग्रन्थयः परम्परा वा तेषामाद्यम्—मोक्षमार्गगमने यावन्ति सोपानानि सन्ति तेषु व्याकरणं प्रथमं सोपानमिति भावः । इयम्=व्याकरणम् । व्याकरणमुद्दिश्य राजपद्धतित्वं विधीयते इति विधेयप्राधान्याद् व्याकरणस्य नपुंसकत्वेऽपि 'इयम्' इति स्त्रीलिङ्गनिर्देशः, शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत्' तदुक्तम्-'उद्देश्यविधेययोरैक्यमापादय-

दर्पणव्याख्या

चिकित्सितमिति अपनयनार्थकसन्नन्तात् कितेः क्तप्रत्यये वाङ्मलकर्मकापनयनसाधनं यतस्ततो मोक्षद्वारमित्यर्थः । मनः शुद्धौ यज्ञादीनामिव वाक्शुद्धावेव तस्योपयोगादिति भावः । यतः सर्वविद्यानां मध्ये पवित्रमतोऽधिविद्यम् विद्यासु प्रकर्षेण दीप्यत इत्यर्थः । तथाचोक्तम्-"तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः" इति । *इदमिति*

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः । अत्रातीतविपर्यासः केवलामनुपश्यति ॥ इति ।

नचालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः, तस्या अलीकत्वासिद्धेर्वक्ष्यमाणत्वात् । एवम् 'रेखागवयन्यायः' आदिपदेन गृह्यते ॥ ६९ ॥

ननु स्फोटस्य वर्णजातीनाञ्च नित्यतया ककार उत्पन्न इति

प्रभा

त्सर्वनाम पर्य्यायेण तत्तल्लिङ्गभाग्भवति' इति । मोक्षमाणानाम्—मुमुक्षूणाम् । अजिह्मा=अवक्रा । राजपद्धतिः=राजमार्गः । अत्र=व्याकरणज्ञेये स्फोटरूपे राजमार्गे । अतीतेति=अतीतः=अपास्तो विपर्य्यासः=भ्रमो यस्य पुंसः स भ्रमशून्य इति यावत् । केवलाम्=परां वाचम् । अनुपश्यति=योगजधर्मसाहाय्येन जानातीत्यर्थः । एवं योगित्वसिद्धौ तत्त्वज्ञाने न कोऽपि प्रतिबन्धक इति भावः । तदुक्तं भागवते-समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः । हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ ३७ ॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः । द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् ॥ ३८ ॥ इति । अस्यार्थः—समाहितात्मनः=कृतसमाधेः, परमे ब्रह्मणि तिष्ठति=लीयते इति परमेष्ठिनश्चतुर्मुखस्य ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् । यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधादस्मदादिष्वपि विभाव्यते=वितर्क्यते । यस्य नादस्य पराख्योपासनयाऽऽत्मनो मलं द्रव्यमधिभूतम्, क्रिया=अध्यात्मम्, कारकम्=अधिदैवम्, इत्याख्यं मलं पापं धूत्वा=अपोह्य योगिनोऽपुनर्भवम्=मोक्षं यान्ति इति । अलीकत्वासिद्धेरिति—प्रकृतिप्रत्ययविभागस्य शशशृङ्गादिवच्च नात्यन्तिकासत्त्वम्, किन्तु अन्नमयादिपञ्चकोशादिवन्मायिक वादनिर्वचनीयत्वमेवेत्यस्य वक्ष्यमाणप्रायत्वादित्यर्थः । नच वास्तविकदर्पणस्थसूर्य्यप्रतिबिम्बेनान्धकारनाशो यथा न भवति तथाऽवास्तवेन प्रकृत्यादिना वास्तवस्फोटबोधो न स्यादिति वाच्यम्, अवास्तवमणिप्रभाबिम्बेन प्रभामन्वेषयतः पुरुषस्य मणिप्राप्तिवदवास्तवेनापि वास्तवोपलब्धिसम्भवात् । रेखागवयवदिति-रेखालिखितेनावास्तवेन गवयाकारेण यथा वास्तविकगवयस्य बोधस्तथाऽवास्तवेनापि प्रकृत्यादिना वास्तविकस्फोटज्ञानं स्यादिति भावः । आदिपदेनेति=पञ्चकोशादिवदित्यत्रादिपदेनेत्यर्थः । ननु वर्णानां स्फोटात्मकत्वे कत्वगत्वादिकं स्फोटनिष्ठं तद्व्यञ्जकवायुनिष्ठं वा ? आद्ये स्फोटस्यैवकत्वादिविशिष्टतया तस्य च नित्यतया 'ककार उत्पन्नः' इति न स्यादित्याह—ककार उत्पन्न इति । कत्व विशिष्टस्यानित्यत्वे 'सोऽयं ककारः' इति प्रतीतिर्न स्यात्, तस्या नित्यत्वेन व्यक्तेर्भेदात् । ननु जातेराविद्यकधर्म-

दर्पणव्याख्या

सिद्धिसोपानवर्णानां मध्ये इदं प्रथमं पदस्थित्यधिकरणमित्यर्थः । *अत्र*=स्फोटे * अतीतविपर्य्यासः *=भ्रान्तिशून्य एतत्तत्त्वज्ञानवानिति यावत् । *केवलाम्* पराख्याम् । *अनुपश्यतीति* योगजधर्मेण प्रत्यक्षीकरोतीत्यर्थः । तथाच योगित्वासिद्धौ किमवशिष्यते तत्त्वज्ञान इत्यर्थः तदुक्तं भागवते द्वादशे नादनिरूपणान्तरं—

यदुपासनया ब्रह्म योगिनो मलमात्मनः । द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् ।

इति भावः । *अलीकत्वासिद्धेरिति* ॥ पञ्चकोशादिवत् प्रकृतिप्रत्ययविभागस्यापि मायिकत्वेन नात्यन्तासच्छशशृङ्गादिवदलीकत्वमिति वक्ष्यमाणप्रायत्वादित्यर्थः । अवास्तवत्वेऽपि मणिप्रभाप्रतिबिम्बस्य मणिप्राप्तिवदेतस्यापि परमात्मदर्शने उपयोगसम्भवादिति भावः । * आदिपदेनेति * पञ्चकोशादिवदित्यत्रोपात्तेनादिशब्देनेत्यर्थः । न्यायस्तु समासवादे प्रपञ्चितः ॥ ६९ ॥ उत्पत्तिविनाशप्रतीतिसाक्षिकं वर्णानामनित्यत्वं तादृशवर्णात्मकस्फोटाभ्युपगमे तस्याप्यनित्यत्वप्रसङ्ग इत्याशङ्कासमाधानपरतया मूलमवतारयति—* नन्विति * * वर्णजातीनामिति * वर्णानाम्; तद्वृत्ति-

न स्यात् । वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह--
कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि । स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते ॥ ७० ॥

प्रभा

विशेषरूपतयाऽनित्यतयोत्पत्तिप्रतीतिनिर्वाह इत्याह—वायुसंयोगेति—अन्त्ये (व्यञ्जकवायुसंयोगनिष्ठत्वे) कत्वाभाववति स्फोटे कत्वप्रतीत्या भ्रमत्वं ककारो गकार इत्येवं रूपाणां कादिप्रतीतीनां दुर्वारमित्याह—भ्रमत्वापत्तिश्चेति--इदञ्च दूषणं प्रतीतेः समावायसम्बन्धावच्छिन्ना या वायुसंयोगनिष्ठजातिवृत्तिप्रकारता तन्निरूपकत्वाभिप्रायेण । ननु स्वसमवेताभिव्यञ्जकसमवायस्य प्रत्यक्षप्रयोजकता न क्वापि दृष्टेत्यत आह-कल्पितानामिति—समवायेन वायुसंयोगवृत्तीनामपि स्वाश्रयाभिव्यङ्ग्यत्वसम्बन्धेन स्फोटे प्रतीतानामित्यर्थः । स्वं कत्वादि तदाश्रयो वायुसंयोगस्तदभिव्यङ्ग्यत्वं स्फोटे । उपाधित्वम्=स्वाश्रयाभिव्यङ्ग्यत्वसम्बन्धेन कत्वादिप्रकारकप्रतीतिजनकत्वम् । एवञ्चैतादृशसम्बन्धस्य वायुसंयोगसत्त्वकाले एव सत्त्वमिति तस्यानित्यतयोत्पत्तिप्रतीति र्नानुपपन्नेति भावः । वायुसंयोगगतधर्मस्य कत्वादेः श्रोत्रेन्द्रियग्राह्यत्वमपि स्वसमवेताभिव्यञ्जकसमवेतत्वसम्बन्धेन । स्वम्=श्रोत्रम्, तत्समवेतः स्फोटस्तदभिव्यञ्जको वायुसंयोगस्तत्समवेतत्वं कत्वादौ । नच षड्विधसन्निकर्षान्यतमसन्निकर्षेण जायमानप्रतीतेरेव लौकिकप्रत्यक्षतयोक्तसन्निकर्षस्य तत्राभावेन कत्वादिलौकिकप्रत्यक्षत्वानुपपत्तिरिति वाच्यम्, प्रत्यक्षानुरोधेन वायुसंयोगगतधर्मत्वेन 'कत्वं साक्षात्करोमि' इति प्रतीतेरेव तन्मते कल्पनेनादोषात्, अनेकत्र भ्रमत्वप्रतीतिकल्पनापेक्षया तेन रूपेण एकविधायाः प्रतीतेरेव कल्पने लाघवात् । कल्पितानामित्यत्र मीमांसकाभिमतं दृष्टान्तमाह-स्वरदैर्घ्याद्यपीति-अयमभावः-मीमांसकमते अकारादयो वर्णा नित्या एकत्वविशिष्टा एत्र ध्वनिगतोदात्तत्वादीनामारोपादुदात्तादिभेदेन भिन्ना इति मन्यन्ते । वेदान्तिनोऽप्येवाहुः । इयान् विशेषस्तन्मते यद् ब्रह्मातिरिक्तस्य सर्वस्याप्यनित्यतया सृष्ट्याद्यकालिकोत्पत्तिकत्वविशिष्टप्रलयकालिकनाशप्रतियोगित्वरूपमेव नित्यत्वं वर्णेषु, नत्वनुत्पत्तिकत्वे सति ध्वंसाप्रतियोगित्वरूपम् । मीमांसकमते तु इदमेव नित्यत्वं वर्णेष्विति । तदाह-स्वरदैर्घ्याद्यपीति—वर्णेभ्योऽन्यस्य=भिन्नस्य ध्वनेः ध्वनिनिष्ठोदात्तत्व—दीर्घत्वाद्यपि नित्येषु वर्णेषु मीमांसकादयो यथा मन्यन्ते तथा नित्ये एकस्मिन् ब्रह्मरूपे स्फोटे वायुसंयोगनिष्ठाः कत्वादय उत्पत्तिविनाशाश्च प्रतीयन्ते । तद्वशाच्चोक्तव्यवहाराणामुत्पत्तिस्तन्मत इव स्यादिति न स्फोटवादिमते किञ्चिदनुपपन्नम् ।

दर्पणव्याख्या

कत्वादिजातीनाञ्चेत्यर्थः । * न स्यादिति * अयं भावः-'उत्पन्नो नष्टो वा ककारः' इत्यादिप्रतीतिः ककारादिवर्णात्मकः स्फोटस्तद्वृत्तिजातिर्वोत्पत्त्यादिमत्त्वेन विषयो वाच्यः । तथाच न सम्भवति, द्वयोरेव नित्यत्वाज्जायमानायास्तस्या विषयबाधेन भ्रमत्वापत्तेरिति तादृशप्रतीतेर्भ्रान्तत्वे इष्टापत्तावाह-*वायुसंयोगेति* । * कादिप्रतीतीनाम्, *=ककारो गकार इत्यादिबुद्धीनाम् । *भ्रमत्वापत्तिरिति* यथाश्रुताभिप्रायेणेदम्. पूर्वोक्तान्तिमकल्पे भ्रमत्वाप्रसङ्गात् । नच त्वन्मतेऽपि कत्वादीनां लौकिकविषयत्वानुपपत्तिस्तद्व्यञ्जकश्रोत्रसमवेतसमवायस्य लौकिकसन्निकर्षस्याभावादिति वाच्यम्, तन्मते कत्वादीनां वायुसंयोगवृत्तिधर्मत्वेन 'कत्वं साक्षात्करोमि' इति प्रतीत्या स्वसमवेतव्यञ्जकसमवायस्यैव संसर्गतोपगमेन लौकिकविषयत्वानपायात् । तादृशानेकप्रतीतीनां भ्रमत्वकल्पनापेक्षया एतत्कल्पनाया एवोचित्यात् । 'आरोपे सति निमित्तानुसरणम्' इति न्यायात् । मूलं तु तन्मते इत्थमवतारणीयम्, ननु स्वसमवेताभिव्यञ्जकगतसमवायस्य सम्बन्धता न केनाप्यादृतेत्यत आह-*कल्पितानामिति * कल्पितानां समवायसम्बन्धेन तदवृत्तीनामप्युक्तसम्बन्धेन तत्र कल्पितानां वायुसंयोगगतधर्मविशेषाणामुपाधित्वमुदात्तत्वादिप्रकारप्रतीतिजनकत्वमित्यर्थः । अधिकं त्वग्रे वक्ष्यते । दृष्टान्तस्फुटीकरणाय मीमांसकमतमाह—

स्वीकारस्थलमाह—स्वरदैर्घ्याद्यपीति। आदिनोत्पत्तिविनाशसंग्रहः। उदात्तत्वादि न वर्णनिष्ठम्, तस्यैकत्वात्, नित्यत्वाच्च। तच्च, स एवायमिति प्रत्यभिज्ञानात्। नच गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः। व्यक्त्यंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात्। नचोत्पत्तिप्रतीतिर्बाधिका, प्रागसत्त्वे सति सत्त्वरूपाया

प्रभा

आदिनेति-दैर्घ्यादीत्यत्रादिनेत्यर्थः। भूषणे तु 'आदिना ह्रस्वत्वादिकमपि गृह्यते' इत्युक्तम्। मीमांसकमतमाह-उदात्तत्वादीति-आदिनाऽनुदात्तत्वादिसंग्रहः। उदात्तत्वानुदात्तत्वादयो विरुद्धधर्मा एकस्मिन्नकारादौ न सम्भवन्ति। किन्तु वर्णभेदे एव। वर्णभेदश्च तेषामनित्यत्वे अकारादीनामनेकत्वे वा स्यात्, तदेव तु न सम्भवतीत्याह-तस्येति -अकारादेरित्यर्थः। एकत्वादिति-अकारादेरेकत्वादुदात्तत्वादिविरुद्धधर्माणां सन्निवेशासम्भवः। एकत्र सन्निवेशे तेषां सामानाधिकरण्याभावरूपो विरोधो विहन्येतेति भावः। तच्च=मीमांसकाभिमतं वर्णानां नित्यत्वमेकत्वञ्च। प्रत्यभिज्ञानादिति-तत्रेदन्तावगाहि, संस्कारेन्द्रियसन्निकर्षोभयजन्यं वा ज्ञानं प्रत्यभिज्ञानं तस्मादित्यर्थः। यदि तूक्तप्रत्यभिज्ञायाम् 'तदेवेदं रजतम्' इति भ्रमेऽतिव्याप्तिः, तदा अभिज्ञाम्=अनुभवं प्रतिगता प्रत्यभिज्ञेति प्रतीत्या 'अनुभवरूपं तज्जन्यसंस्कारसहकृतसन्निकर्षजन्यं ज्ञानं प्रत्यभिज्ञेति परिष्करणीयम्। अनुभवानुरूपत्वाभावान्नोक्तभ्रमेऽतिव्याप्तिः। सा च 'सोऽयमकारः' 'सोऽयं चैत्रः' इत्यादिरूपा। या व्यक्तिः पूर्वमनुभूता सैव व्यक्तिः पुनः प्रत्यक्षविषयीभूता चेत्तदा प्रत्यभिज्ञाशब्देन व्यवह्रियते। तथाच तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदावगाहिन्या बुद्धेरेव तद्रूपतया भेदस्य प्रतियोगितावच्छेदकेन सह विरोधात्प्रत्यभिज्ञायां व्यक्तिभेदे प्रतियोगितावच्छेदकीभूततद्व्यक्तित्वस्य व्यक्त्यन्तरेऽभावेन तत्र भेदस्यैव सत्त्वेन प्रत्यभिज्ञानुपपत्तिः। तद्व्यक्तेरेव तद्विषयत्वे तु तद्व्यक्तित्वेन सह तद्भेदस्य विरोधेन तद्व्यक्तित्वसत्त्वे तद्भेदाभावसत्त्वेन प्रत्यभिज्ञोपपद्यत इति भावः। तद्विषय इति—'सोऽयं गकारः' इति प्रत्यभिज्ञाविषय इत्यर्थः। तथाच पूर्वगकाराद् भिन्नेऽपि गकारे गत्वरूपप्रतियोगितावच्छेदकस्य सत्त्वेन तद्विरुद्धस्य भेदस्य तत्राभावेन व्यक्तिभेदेऽपि प्रत्यभिज्ञा न विरुध्येतेति भावः। व्यक्त्यंशाभेदस्येति—अतीतकालवृत्तिव्यक्तेरेतत्कालवृत्तिव्यक्तौ तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाभावस्येत्यर्थः। त्यागायोगादिति—तत्प्रतीत्यविषयत्वकथनस्यायुक्तत्वादित्यर्थः। उत्पत्तिप्रतीतिरिति-'उत्पन्नो गकारः' इति प्रतीतिर्नित्यत्वे बाधिका=व्यक्त्यभेदांशप्रतीते भ्रमत्वसाधिकेत्यर्थः। प्रागसत्त्वे सतीति=स्वाधिकरणक्षणध्वंसाधिकरणत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्समयवृत्तित्वरूपायाः स्वाधिकरणक्षणप्रागभावाधिकरणम्; स्वाधिकरणक्षणप्रागभावाधिकरणक्षणप्रागभावानधिकरणञ्च यः क्षणस्तद्वृत्तित्वरूपाया उत्पत्तेरित्यर्थः। स्वम्=उत्पद्यमानं वस्तु। यथा 'इदानीं घट उत्पद्यते' इत्यत्र इदानींपदवाच्यसमये घटोत्पत्त्यधिकरणक्षणोत्तरक्षणो घटाधिकरणम्, तत्क्षणध्वंसाधिकरणत्वसम्बन्धस्तदुत्तरक्षणे तेन सम्बन्धेन घटाभाववाँस्तदुत्पत्तिक्षणः तद्वृत्तित्वं घटस्यास्तीति लक्षण-

दर्पणव्याख्या

* उदात्तत्वादीति * आदिनाऽनुदात्तत्वपरिग्रहः। उदात्तत्वानुदात्तत्वयोः परस्परविरोधाद्वर्णभेदेन तत्सत्ता वाच्या। वर्णभेदश्च तदनित्यत्वे, अनेकत्वे वा स्यात्, तदेव तु न सम्भवतीत्याह—* तस्यैकत्वादित्यादि * नित्यत्वे प्रमाणमाह—* तच्चेति * नित्यत्वम्, एकत्वञ्चेत्यर्थः। * त्यागायोगादिति * अविषयत्वायोगादित्यर्थः। * बाधिकेति * व्यक्त्यभेदे प्रतीतिर्बाधिकेत्यर्थः। * प्रागसत्त्वे सतीत्यादि * स्वाधिकरणसमयध्वंसवत्त्वसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छिन्नकालिकविशेषणतासम्बन्धरूपाया इत्यर्थः। द्वितीयादिक्षणसम्बन्धस्य निरुक्तसम्बन्धेन स्ववत्त्वान्न तत्रातिप्रसङ्गः।

उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात् । अत एव वर्णमुच्चारयतीति प्रत्ययः, नतूत्पादयतीति प्रत्ययो व्यवहारश्च। उच्चरितत्वञ्च—ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम् । किञ्च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाऽप्युपपत्तेर्न साऽतिरिक्तवर्णसाधिका । परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम् । साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते ।

प्रभा

समन्वयो बोध्यः । यदि तु उत्पत्त्यधिकरणक्षणनिरूपितवृत्तित्वं घटे नास्तीत्युच्यते तदा पूर्वोक्ता प्रागभावघटितोत्पत्तिर्बोध्या । अनुभवविरुद्धत्वादिति=उत्पत्तिपदार्थघटकप्रागसत्त्वरूपविशेषणांशस्य वर्णेष्वभावेन उत्पत्तिविषयकानुभवविषयताया अभावादित्यर्थः । ननु 'उत्पन्नो गकारः' इत्यनुभवस्य सत्त्वाद्विरुद्धत्वोक्तिरसङ्गतेति चेन्न, तादृशानुभवस्य 'अभिव्यक्तो गकारः' इत्यर्थविषयकत्वात् । अत एवेति=अनुभवविरुद्धत्वादेवेत्यर्थः। प्रत्ययः=प्रतीतिः । व्यवहारः=अर्थविशेषबोधनाय शब्दविशेषोच्चारणम् । ननूच्चरितत्वमपि प्रयत्नविशेषजन्यत्वमेवेति कथं नित्यत्वमत आह—उच्चरितत्वञ्चेति । अभिव्यक्तिविशिष्टत्वमिति—अभिव्यक्तिः=ज्ञानम्, तद्विषयत्वामत्यर्थः । ननु 'उत्पन्नो घटः' इतिवत् 'उत्पन्नो गकारः' इति प्रतीतेरपि प्रागसत्त्वविशिष्टसत्त्वरूपोत्पत्तिरेव विषयो वाच्यः, समानाकारकप्रतीत्योर्विभिन्नविषयकत्वस्यानुचितत्वात् । किञ्च वर्णाभिव्यक्तिजनकः कण्ठताल्वाद्यभिघात एवोच्चारणपदार्थो नतु वर्णोत्पत्त्यनुकूल इत्यत्र मानाभावः। किञ्च शब्दानित्यत्ववादिनये 'उत्पद्यते वर्णः' 'वर्णमुत्पादयति' इत्यादिव्यवहार इष्ट एवेति नानुभवविरोधोऽपीत्यत आह—किञ्चेति । उत्पत्त्यादेरिति—आदिना 'विनष्टो वर्णः' इति प्रतीतिसाक्षिको विनाशो ग्राह्यः। परम्परया=स्वाश्रयध्वनिव्यङ्ग्यत्वसम्बन्धेन । स्वः=उत्पत्तिः। नाशस्य च स्वप्रतियोगिव्यङ्ग्यत्वरूपा परम्परा । स्वः=नाशः, तत्प्रतियोगी ध्वनिः। सा 'उत्पन्नो वर्णः' विनष्टो वर्णः, इत्यादिरूपा प्रतीतिः। अतिरिक्तवर्णेति—अनित्यवर्णेत्यर्थः । अतिरिक्तवर्ण इत्यस्य 'स्फोट' इत्यर्थस्तु न, वर्णनित्यत्ववादिमीमांसकमते स्फोटानङ्गीकारात् । ननु ध्वनिनिष्ठोत्पत्त्यादेरुक्तपरम्परया नित्यवर्णेष्वपि प्रतीतौ भ्रमत्वापत्तिरत आह—परम्परयेति—स्वाश्रयसंयोगसम्बन्धेन स्फटिके जपाकुसुमगतरक्तत्वावगाहिन्याः 'रक्तः स्फटिकः' इति प्रतीतेर्यथा न भ्रमत्वं तेन सम्बन्धेन रक्तत्वस्य स्फटिके सत्त्वात्, तथोक्तपरम्परया नित्यवर्णेष्वप्युत्पत्त्यादेः सत्त्वाद् भ्रमत्वाभाव इति भावः । ननु परम्परया प्रतीतौ भ्रमत्वाभावेऽपि साक्षात्सम्बन्धेन उत्पत्तेः स्वाश्रयत्वेन नाशस्य स्वप्रतियोगित्वेन नित्यवर्णेष्वभावाद् भ्रमत्वं तदवस्थमेवेत्यत आह—भ्रम इत्यवशिष्यत इति— साक्षात्सम्बन्धेन

दर्पणव्याख्या

अत एवेति अनुभवविरुद्धत्वादेवेत्यर्थः। *प्रत्ययः*=ज्ञानम् । *व्यवहारः*=शब्दप्रयोगः । ननूच्चारणमपि तदुत्पत्त्यनुकूलो व्यापार एव । तथाच सर्वप्रतीतिर्वर्णानित्यत्वसाधिकेत्यत आह—* उच्चरितत्वञ्चेति * अभिव्यक्तिविशिष्टत्वं तद्विषयत्वम् । तथाच तादृशप्रत्ययाभिव्यक्तिनिष्ठं वर्णनिरूपितविषयित्वमेव विषयीक्रियते, नतूत्पत्तिनिष्ठ वर्णवृत्तित्वामति न साऽनित्यत्वसाधिकेति भावः । ननु वर्णाभिव्यक्तिजनकः कण्ठताल्वाद्यभिघात एवोच्चारणपदार्थः, नतु वर्णोत्पत्तिजनक इत्यत्र किं प्रमाणम् । किञ्च वर्णानित्यत्ववादिनामुत्पद्यते वर्णो वर्णमुत्पादयतीत्यादिप्रयोगा इष्टा एवेति नानुभवविरोधोऽपीत्यत आह—* किञ्चेति * उत्पत्त्यादेरित्यादिना 'विनष्टो वर्णः' इति प्रतीतिसाक्षिकविनाशः परिगृह्यते । * परम्परया *= स्वाश्रयध्वनिव्यङ्ग्यत्वरूपया । * नातिरिक्तेति *—वर्णानित्यत्वसाधिकेत्यर्थः । ननु स्फोटातिरिक्तेति तदर्थः, तैः स्फोटानङ्गीकारात् । नन्वेवं ध्वन्युत्पत्त्यादेस्तादृशप्रतीत्या वर्णोष्ववगाहने भ्रान्तत्वापत्तिरत आह—* परम्परया वर्णेति * स्वाश्रयसंयोगावगाहिन्या 'लोहितः स्फटिकः' इति प्रतीतेर्यथा न भ्रमत्वम्, तथाऽस्या अपीति भावः । * अवशिष्यते *

तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। परन्तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। नच वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसम्भवश्चेति वाच्यम्, ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनात्, जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात्।

प्रभा

नित्यवर्णपूत्पत्त्याद्यवगाहिनी या प्रतीतिस्तस्या भ्रमत्वरूपदूषणमवशिष्यत इत्यर्थः। तदपि=नित्यवर्णवादिनये उक्तभ्रमत्वरूपदूषणमपि। व्यक्त्यभेदांश इति–'अनित्यो वर्णः' इति नैयायिकमते कालान्तरे उच्चरितस्य अधुना उच्चरितस्य च गकारस्य तद्व्यक्तित्वेन भेदोऽपि 'सोऽयं गकारः' इत्यभेदावगाहिनी या प्रतीतिस्तस्या अभेदांशविषये इत्यर्थः। तव भ्रमत्ववदिति––तस्याः प्रतीतेर्यथा तव नैयायिकस्य मते भ्रमत्वं तथा साक्षात्सम्बन्धेन नित्यवर्णपूत्पत्त्यादिप्रतीतेर्भ्रमत्वं मम (मीमांसकस्य) मते तुल्यमित्यर्थः। एकस्याः प्रतीतेर्भ्रमत्वापत्तिरूपं दूषणमुभयोः समानमिति फलितोऽर्थः। तथाच 'यस्तूभयोः समो दोषः परिहारस्तयोः समः' इति न्यायेन तद्दूषणमुभाभ्यां सोढव्यमिति भावः। ननु मतद्वयेऽपि दूषणसाम्ये 'अनित्या वर्णाः साक्षादुत्पत्त्यादिमन्तश्च' इति मतोपेक्षा मीमांसकानां निर्बीजा स्यादित्याशङ्कामाह—परन्त्विति। मम=नित्यवर्णवादिनः। अतिरिक्तेति=नित्यवर्णवादे एक एव ककारः, एको गकारः, इत्येवं रूपेण परिगणिता वर्णाः। अनित्यवर्णवादे अनन्ताः ककारगकारादयस्तदुक्तम्—अतिरिक्तवर्णेति=अधिकवर्णेत्यर्थः। तथाचानित्यत्वेऽनन्ता वर्णास्तत्प्रागभावास्तद्ध्वंसाश्च। नित्यत्वे परिगणिता एव वर्णाः। नापि तत्प्रागभावो नापि तद्ध्वंस इति लाघवम्। तदुक्तम्—लाघवमतिरिच्यत इति—अधिकं लाघवमस्तीति भावः। एवञ्चानन्तवर्णतत्प्रागभावतद्ध्वंसकल्पनापेक्षया परम्परासम्बन्धेन नित्यवर्णपूत्पत्त्यादिप्रतीतिकल्पनायामतिलाघवं वर्णनित्यतावादिनयेऽस्तीति भावः। ननु नित्यवर्णस्थले ध्वने नैयत्यं यदि स्यात् तदा परम्परासम्बन्धेन तद्मतोत्पत्त्यादिकमादाय 'उत्पन्नो गकारः' विनष्टो गकारः, इत्यादिप्रतीतीनामुपपत्तिः स्यात्, तदेव तु न सम्भवति वर्णस्थले ध्वनिसत्त्वे मानाभावादित्याशङ्क्य निराचष्टे—नचेति—वर्णस्थले पार्थक्येन ध्वनेरनुपलम्भादिति भावः। ननु लाघवाद् वर्णानां नित्यत्वे सिद्धे 'उत्पन्नो गकारः' इत्यादिप्रतीत्यन्यथानुपपत्तिरेव तत्र ध्वनिसत्त्वे मानं स्यादत आह-तदुत्पादकेति––शङ्खाद्योष्ठाभिघातजवायुसंयोगरूपस्य ध्वनिकारणस्याभावादित्यर्थः। तदसम्भव इति=वर्णस्थले ध्वन्युत्पत्तेरसम्भव इत्यर्थः। वर्णस्थले ध्वनिनैयत्यं समर्थयति—ककाराद्युच्चारणेति–ककाराद्युच्चारणस्वरूपयोग्यतासत्त्व इत्यर्थः। वर्णानुत्पत्तेरिति=वर्णानभिव्यक्तेरित्यर्थः। नित्यत्वपक्षे वर्णोत्पत्तेरभावात्। ध्वन्युत्पत्तेरिति—ध्वनेः श्रावणप्रत्यक्षविषयत्वेन तद्गतोत्पत्तेरपि श्रावणप्रत्यक्षविषयत्वमित्यभिप्रायेणेदम्। दर्शनादिति–दृशिरत्र ज्ञानसामान्ये। तेन न श्रावणज्ञानविषयत्वेऽपि तदसङ्गतिः। जिह्वाभिघातजेति–संयोगजसंयोगाभिप्रायेणेदम्। जिह्वातत्तत्स्थानयोरभिघाताख्यसंयोगस्तज्जन्यो यो वायुकण्ठसंयोगादिस्तस्य

दर्पणव्याख्या

इत्यस्योत्पन्नो वर्ण इति प्रतीतेरिति शेषः। ननु तादृशप्रतीतेर्नियमेन परम्परासम्बन्धविषयत्वकल्पने गौरवमत आह—* परन्त्विति *। * अतिरिक्तेति * अधिकेत्यर्थः। तथाचानेकवर्णतद्ध्वंसादिकल्पनापेक्षया तत्प्रतीतेर्नियमतस्तादृशसम्बन्धावगाहित्वकल्पनैव लघीयसीति भावः। यदि वर्णस्थले ध्वनिनैयत्यं स्यात् स्यादेव तदोत्पत्तेस्तद्घटितपरम्परासम्बन्धेन वर्णनिष्ठता। तत्रैव च मानाभाव इत्याशङ्क्य निराचष्टे–* नचेति * वर्णपार्थक्येन ध्वनेरननुभवादिति भावः। हेत्वसमवधानादपि तत्सत्त्वं न घटत इत्याह—* तदुत्पादकेति * शङ्खौष्ठाभिघातजवायुसंयोगादेरित्यर्थः।

तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्तवैव प्रतिबन्ध्यप्रतिबन्धकभावकल्पना निष्प्रमाणिकी स्यादिति विपरीतगौरवम् । एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः । एवञ्चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि

प्रभा

ध्वनिनिष्ठजन्यतानिरूपितजनकत्वानुमानादित्यर्थः । तथाहि—तत्तत्स्थानजिह्वाभिघातजवायुकण्ठसंयोगाव्यवहितोत्तरजायमानध्वनिं प्रति तत्तत्स्थानजिह्वाभिघातजवायुकण्ठसंयोगः कारणम् , तादृशसंयोगस्य तादृशध्वन्यव्यवहितपूर्वक्षणवृत्त्यन्ताभावाप्रतियोगित्वात् , इत्याद्यनुमानेन कार्य्यकारणभावः सिद्ध्यति । तस्य=तादृशवायुसंयोगादेः । वर्णोत्पत्तिस्थले=वर्णाभिव्यक्तिस्थले । सत्त्वादिति=एवञ्च वर्णतः पार्थक्येनानुभूयमानाया ध्वनिप्रतीतेः, तत्तत्स्थानजिह्वाभिघातजवायुकण्ठसंयोगादिरूपस्य कारणस्य च सत्त्वात् । 'वर्णोत्पत्तिस्थले न ध्वनिनैयत्यम्' इति केषाञ्चिदुक्तिः परास्ता । नच वर्णाभिव्यक्तिस्थले ध्वनेः पार्थक्येनानुपलम्भात् तादृशध्वन्युत्पत्तिम्प्रति वर्णाभिव्यञ्जकसामग्र्या अवच्छेदकतासम्बन्धेन, ध्वनिम्प्रति समवायेन वायुकर्णसंयोगस्य वा प्रतिबन्धकत्वकल्पनाद् ध्वनिनैयत्याभाव इत्याशङ्कायामाह—तवैवेति—वर्णस्थले ध्वन्यसत्त्ववादिन एवेत्यर्थः । निष्प्रमाणिकेति=निर्गतं प्रमाणं यस्याः सा निष्प्रमाणिका इत्येव पाठः । 'निष्प्रमाणिकी' इति त्वपपाठः । विपरीतेति=लाघवविपरीतेत्यर्थः । वर्णाभिव्यक्तिस्थलेऽध्वनिसत्तावादापेक्षया स्वकारणबलाज्जायमानध्वनौ वर्णाभिव्यञ्जकसामग्र्याः प्रतिबन्धकत्वकल्पनायामेव गौरवमिति भावः । एवम्=वर्णानां नित्यत्वे एकत्वे चेत्यर्थः । परस्परेति=एकस्मिन्नकारादौ घटत्वपटत्वयोरिवोदात्तत्वानुदात्तत्वादीनां सामानाधिकरण्याभावरूपविरोधादित्यर्थः । वर्णनिष्ठमिति—नित्यवर्णनिष्ठमित्यर्थः, किन्तुध्वनिनिष्ठमेव । वर्णे तु सम्बन्धान्तरेण प्रतीयते । तेषाम्=मीमांसकानाम् । नच कुड्यादिव्यवधानादिना शब्दे श्रुते प्रमदाशब्दोऽयम्' बालोच्चारितशब्दोऽयम्' इति भेदज्ञानानुपपत्तिः, अकारादिवर्णानामैक्यात् , अनित्यत्वे तु न दोषः, वर्णानां भेदादिति वाच्यम् , तन्मते बालोच्चरितत्वाद्यनुमापकस्य तत्तदुच्चारितवर्णे वैजात्यस्यासम्भवेऽपि बालाद्युच्चरितत्वतालवोष्ठसंयोगादिगतवैजात्यस्य वर्णेष्वारोपेण बालाद्युच्चरितत्वानुमित्युपपत्तेः, धूमत्वेन ज्ञायमानधूलयादिपदार्थान्तरेणापि वह्न्यनुमितेर्दृष्टत्वात् । नच 'सोऽयं गकारः' इति प्रत्यभिज्ञानुरोधेन वर्णानां नित्यत्वमिव 'सेयं दीपकलिका' इति प्रत्यभिज्ञया दीपकलिकाया अपि नित्यत्वमेकत्वञ्च सिद्ध्येदिति वाच्यम् , तत्र प्रत्यक्षप्रमाणेन दीपकलिकाया नाशप्रतियोगित्वे सिद्धे अगत्या प्रत्यभिज्ञाया भ्रमत्वस्य, सादृश्यमूलकाभेदालम्बनस्य वा स्वीकारात् । वर्णानामेकत्वे 'घटिकः' इत्यत्र द्व्यजलक्षणष्ठन् , 'घटेन' इत्यादौ 'सावेकाचः' इति एकाजलक्षणमुदात्तत्वादिकञ्च आवृत्तिगतद्वित्वसङ्ख्यया अकारगतैकत्वस्य बाधाद्वारणीये । स्पष्टञ्चेदमइउण् सूत्रे भाष्ये । एवञ्चेति=उत्पत्त्यादीनां वर्णावृत्तित्वे चेत्यर्थः । प्रतीतीनामिति=नित्यवर्णेषूत्पत्त्यादिप्रतीतीनां निर्वाह इत्यर्थः । तत्प्रमात्वस्येति—वर्णानां नित्यत्वेऽपि 'उत्पन्नो गकारः' 'विनष्टो गकारः' इत्यादिप्रतीतीनां प्रमात्वस्य च निर्वाह इत्यर्थः, नित्येऽपि वर्णे परम्परयोत्पत्त्यादेः सत्त्वात् । परेषाम्=वर्णनित्यत्ववादिनां मीमां-

दर्पणव्याख्या

वर्णानुत्पत्तेरिति वर्णानभिव्यक्तेरित्यर्थः । *दर्शनादिति* दृशिर्ज्ञानसामान्यार्थः । सत्त्वादेति—तथाच पार्थक्येनानुभूयमानायाः प्रतीतेर्जिह्वाभिघातजकण्ठवायुसंयोगादेर्हेतोश्च सत्त्वान्न वर्णाभिव्यक्तिस्थले ध्वन्यनैयत्यमित्युक्तसम्बन्धविषयकप्रतीतिर्निराबाधेति भावः । * तवैवेति * वर्णस्थले ध्वन्यसत्त्ववादिन एवेत्यर्थः । * विपरीतगौरवमिति * स्वकारणबलाज्जायमाने ध्वनौ वर्णोत्पादकसामग्र्याः प्रतिबन्धकत्वकल्पनाध्वन्यकल्पनाप्रयुक्तलाघवापेक्षया विपरीतगौरवग्रस्तेति भावः । तेषामिति वर्णनित्यतावादिनां मीमांसकानामित्यर्थः । * एवञ्चेति * उत्पत्त्यादीनां वर्णावृत्तित्व इत्यर्थः ।

समान इति प्रतिबन्द्यैवोत्तरमिति भावः ॥ ७० ॥

प्रभा

सकानाम् । समान इति=गकाराविषयकोक्तप्रतीतीनां तासां प्रमात्वस्य च तुल्य एव निर्वाह इत्यर्थः । एवञ्चाखण्डस्फोटस्वीकारे बाधकाभाव इति भावः । प्रतिबन्द्यैवेति=उभयपक्षे प्राप्तशङ्कायाः तुल्ये समाधाने प्रतिबन्दीवदिधातोरौणादिके इन्प्रत्यये ङीषि प्रतिबन्दीति तयेत्यर्थः । क्वचित्प्रतिबन्द्येवोत्तरम् , इति पाठः । तथाच क्वचित् प्रतिबन्देरप्युत्तरत्वमिति भावः । अन्यथा प्रतिबन्देरनुत्तरत्वे परसिद्धान्तस्यैव भङ्गापत्तेः । एवञ्च स्फोटमस्वीकुर्वद्भिः नित्यानकारादीननेकवर्णान् स्वीकुर्वद्भिश्च मीमांसकैरुत्पत्त्यादिप्रतीतेस्तत्प्रमात्वस्य चोपपत्तये यः समाधिः समाश्रयणीयः स एव अकारादीन् अनेकवर्णान् स्वीकुर्वद्भिः, एकं नित्यञ्च स्फोटं लाघवात् स्वीकुर्वद्भिर्वैयाकरणैरुक्तप्रतीतेस्तत्प्रमात्वस्य च सिद्धये आश्रयणीय इति भावः । एवञ्च लाघवानुगृहीतो

दर्पणव्याख्या

* प्रतिबन्द्यैवेति * पराभिमतसमाधिसमाधेयम् प्रतिपादकमुत्तरं प्रतिबन्दिस्तयेत्यर्थः । तथाच तत्र मीमांसकैरुत्पत्त्यादिप्रतीते प्रमात्वे यः समाधिराश्रितः स एवास्माभिरप्यनुसर्त्तव्य इति भावः । तथाचाखण्डवाक्यस्फोटस्वीकारे न किञ्चिद् बाधकमिति फलितम् । नन्वेतत्कल्पे पदानामसत्त्वेन मीमांसकसिद्धान्तविरोधः । तथाहि—'व्रीहिभिर्यजेत' इत्यत्र यागेन द्रव्यमात्राक्षेपे व्रीहिश्रुतिर्नियमार्था—'व्रीहिभिरेव नान्यैरिति । तत्र व्रीह्यभावे नित्यकर्मणः, प्रारब्धकाम्यकर्मणश्च लोपो मा भूदिति प्रतिनिधिरुपादीयते । व्रीहित्वस्य शक्त्युपलक्षणत्वेन प्रतिनिधेरपि श्रौतत्वात् । भवन्मते तत्र प्रतिनिध्युपादाने तद्वाक्याखण्डार्थाननुष्ठानान्नित्यादेर्विलोपापत्तिः, नीवारकरणकक्रियाया अन्यत्वात् । 'क्रिया न प्रतिनिधीयते, द्रव्यन्तु प्रतिनिधीयते एव' इति परिभाषाया उच्छेदश्च । एवम् "श्वेतं छागमालभेत" इत्यत्र क्रियायाश्छागद्रव्येण सम्बन्धः श्रौतः, द्वितीयाश्रुत्या तस्य साक्षात्प्रतिपादनात् । श्वेतगुणस्य तु वाक्यीयः सः । तत्सामानाधिकरण्यात्तस्य निर्गुणस्य द्रव्यस्य निरधिकरणस्य गुणस्य चासम्भवात् । श्वेतगुणस्य छागसम्बन्धमुपजीव्यैव क्रियासम्बन्धाच्छ्रुतिप्रतिपादितद्रव्यसम्बन्धाद् वाक्यप्रतिपादितगुणसम्बन्धस्य दुर्बलत्वात्, श्वेतच्छागाभावेऽन्यगुणकश्छाग आलभ्यते, नतु श्वेतगुणयुक्तो मेषः, श्रुतिबाधापत्तेः, तस्य चाखण्डपक्षे असम्भवात् । एवमेव इतरपदार्थनिबन्धनमीमांसान्यायासम्भवोऽपि । अखण्डस्फोटस्यैव भवन्मते अखण्डार्थत्वेन केन कस्य बाधो भवेदिति चेत् , अत्राहुः—अखण्डवाक्यादखण्डतत्तदर्थाच्च रेखागवयन्यायेन पदपदार्थावापोद्वापाभ्यां कल्पितपदपदार्थमादाय प्रतिनिध्युपादनस्योपपत्तिः, ऋषीणां तत्त्वार्थावबोधेऽपि तत्त्वभूतेन वस्तुना व्यवहारासम्भवाद् व्यवहारकालेऽनिर्द्धारिततत्त्वसदृशैस्तैर्नानाप्रकारैः पदतदर्थानां व्यवह्रियमाणत्वान्न तद्वचोभिः पदपदार्थानां वास्तवसत्यत्वम्, वाक्यार्थस्यापि तदापेक्षिकमेव, परमार्थदशायां सर्वस्यापि व्यावहारिकस्यासत्यत्वादिति । नैयायिकास्तु—सर्वमिदं वर्णानां नित्यत्वे सम्भवेत् । तत्रैव तु प्रमाणाभावः, शब्दमात्रस्याकाशसमवायिकारणकत्वात् । भेरीदण्डसंयोगादीनां ध्वन्यात्मकशब्दं प्रतीव कण्ठादिस्थानवाय्वभिघातस्यापि वर्णात्मकशब्दं प्रत्यन्वयव्यतिरेकाभ्यां निमित्तत्वावधारणाच्च । एवञ्च तादात्म्यसम्बन्धेन जन्यभावस्य प्रतियोगितासम्बन्धेन ध्वंसत्वावच्छिन्नं प्रति हेतुतयोच्चरितवर्णस्य क्षणान्तरितस्याप्रतीतेर्नष्टो वर्ण इत्येव प्रतीतेश्च, स्वाव्यवहितोत्तरवर्णस्यैव नाशकताकल्पने प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशम्प्रति स्वसामानाधिकरण्य—स्वाव्यवहितपूर्ववर्तित्वोभयसम्बन्धेन योग्यविभुविशेषगुणस्य हेतुताया ज्ञानादिस्थले क्लृप्तत्वाच्च । कण्ठताल्वाद्यभिघातस्य च कत्वादिकमेव कार्य्यतावच्छेदकम्, नतु तत्तद्वर्णाभिव्यक्तित्वम्, गौरवात् । नच लौकिकविषयितया कत्वमेव तदवच्छेदकं वाच्यमिति न गौरवमिति वाच्यम्, तथा सति कोलाहलप्रत्यक्षप्रसङ्गात् । नहि कोलाहलप्रत्यक्षं कत्वादिविषयकम्, येन तल्लौकिकविषयितायाः कार्य्यताऽवच्छेदकघटकता सम्भाव्येत । किञ्च घटाद्युत्पादकदण्डादेरपि तदभिव्यक्तित्वस्यैव कार्यताऽवच्छेदकत्वापत्तौ घटादीनामपि नित्यत्वापत्तिरिति बहुव्याकोपः । नच सत एवाभिव्यक्तिरिति साङ्ख्यमताश्रयणादुक्तापत्तिरिष्टैवेति वाच्यम् , तन्मतस्याप्यापातमनोरमत्वात् । तथाहि—

पञ्च पञ्चधा व्यक्तिस्फोटाः ।

प्रभा

प्यादिसम्मतेऽखण्डस्फोटवादे न किञ्चिद्बाधकमिति तत्त्वम् । इत्थञ्चेति=उक्तप्रकारैरित्यर्थः । पञ्चेति—१ स्फोटः, २ सखण्डपदस्फोटः, ३ सखण्डवाक्यस्फोटः, ४ अखण्डपदस्फोटः, ५ अखण्डवाक्यस्फोटश्चेति व्यक्तिस्फोटा इत्यर्थः । वर्णस्फोटे सखण्डभेदस्तु न, वर्णावयवानां निरर्थकत्वात्, सार्थकस्यैव स्फोटत्वात् । तु स्फोटवादिनये मीमांसकसिद्धान्तो विरुद्ध्येत । तथाहि—'स्वर्गकामो यजेत' इत्यत्र यागे साधनाकाङ्क्षायां यस्य कस्यचन द्रव्यस्याक्षेपे प्राप्ते 'व्रीहिभिर्यजेत' इति श्रुतिर्नियमयति—'व्रीहिभिरेव यजेत नान्यैः' ति । तत्र कचन यागे आरब्धे व्रीहेरलाभे सति नित्यकर्मणः प्रारब्धकर्मणश्च लोपो मा भूदिति प्रतिनिधिरुपादीयते । नच प्रतिनिधेरुपादाने व्रीहिश्रुतिविरोधः, तत्र श्रुतौ व्रीहे र्यागसाधकशक्त्युपलक्षणत्वेन शक्तिमतः प्रतिनिधेरपि श्रौतत्वात् । तथाच स्फोटवादिनये 'व्रीहिभिर्यजेत' इति श्रुत्या अखण्डार्थस्यैव बोधेन व्रीहेः यागानुपस्थित्या प्रतिनिधिर्नोपपद्यते । मुख्यस्यालाभे तत्सदृशो य उपादीयते स प्रतिनिधिरित्युच्यते । प्रकृते वाक्यार्थस्याखण्डतया मुख्यस्य नृशृङ्गतुल्यत्वेन श्रुतेर्नियमार्थत्वस्य प्रतिनिधित्वस्य चानुपपत्तिः । व्रीहिभिर्यजेत' इत्यखण्डवाक्यार्थस्य अखण्डवाक्यार्थः नीवारककरणयागः प्रतिनिधिः क्रियते चेत्तर्हि व्रीहिश्रुतिविहितयागक्रियातः नीवारकरणकयागक्रियाया भिन्नतया 'क्रिया न प्रतिनिधीयते द्रव्यन्तु प्रतिनिधीयते' इति सिद्धान्तभङ्गः । एवम् 'श्वेतछागमालभेत' इति श्रुत्या आलम्भनं विधीयते । तत्र छागस्यालम्भनक्रियया श्रौतः सम्बन्धः, द्वितीयाश्रुत्या (शब्देन) बोधितत्वात् । श्वेतगुणस्य त्वालम्भनासम्भवाद् वाक्यप्राप्तद्रव्यद्वारा सम्बन्धः । तत्र श्वेतच्छागालाभे श्वेतगुणविशिष्टो मेषो नालभ्यते, किन्त्वन्यवर्णविशिष्टोऽपि छाग एवालभ्यते, आलम्भनक्रियया छागसम्बन्धस्य छागपदोत्तरद्वितीयारूपश्रुत्या बोधितत्वादिति द्रव्यान्तरसम्बन्धस्य वाक्येन प्रापितत्वात् 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पारदौर्बल्यम्, अर्थवि-

दर्पणव्याख्या

अभिव्यक्तिः सती, असती वा । नाद्यः, घटानुत्पत्तिदशायां घटस्येव तस्या अपि सत्त्वाद् घट इति प्रतीत्यापत्तेः । अभिव्यक्तेरभिव्यक्त्यङ्गीकारे तु तस्या अपि कार्य्यत्वेन सत्त्वादुक्तदोषो दुरुद्धर एव । अन्त्ये—स्वसिद्धान्तव्याघातः, युक्तितौल्येन पदार्थान्तरस्याप्युत्पत्तिसिद्धेरिति । किञ्चोत्पन्नो घटो नष्टो घट इति प्रतीत्या घटादीनामनित्यत्ववदुत्पन्नः ककारो नष्टः स इत्यविलक्षणप्रतीत्या ककारादीनामनित्यत्वमेवावधार्य्यते । कत्वादीनां सयोगधर्मत्वन्तु दुरुपपादमेव । वर्णसमवेतत्वेन तेषामग्राह्यत्वप्रसङ्गात् । नचोक्तसन्निकर्षादेव तत्प्रत्यक्षोपपत्तिः, तथा सति शब्दत्वादिप्रत्यक्षानापत्तेः । नच तत्सम्बन्धस्य ककारं शृणोमीति प्रतीतौ भाने प्रमाणमस्ति, शब्दं शृणोमीति प्रतीतेः समवायविषयकत्वदुक्तप्रतीतेरपि तद्विषयकत्वेनोपपत्तेश्च । समवायांशे सर्वत्र तादृशप्रतीतीनां भ्रमत्वमित्यपि न, वर्णसमवेतत्वस्य तत्राभ्युपगमेन विषयाबाधात् । एवञ्च वर्णानामनेकत्वेन तत्रोदात्तत्वादिप्रतीतिरपि स्वरसतः सङ्गच्छेत इति दृष्टान्तदौर्भिक्ष्यमेव । एवञ्च वर्णप्रागभावध्वंसानां प्रमाणसिद्धानामपलपितुमशक्यत्वान्न तत्कल्पनागौरवमपि । नच वर्णानित्यतावादिमते सोऽयं गकार इति प्रत्यभिज्ञानुपपत्तिः, तस्यास्तज्जातीयत्वविषयत्वेनोपपादने तु तज्जातीयोऽयमित्येवाकारः स्यादिति वाच्यम्, यत्र प्रत्यभिज्ञायां गत्वादेर्जातित्वेन भानं तत्रैव तस्यास्तज्जातीयोऽयमित्याकारः, तत्र तु स्वरूपेण तत् तत्र सोऽयमित्याकार इत्यभ्युपगमात्, तज्जातीयाभेदावगाहिन्यास्तदेवौषधमित्याकारायाः प्रत्यभिज्ञायाः सर्वसिद्धत्वाच्च । तस्माद् वर्णात्मकस्फोटस्य वाचकत्वमसम्भवदुक्तिकमेव । स्फोटस्य ध्वन्यतिरिक्तत्वाभावाच्च योगशास्त्रादौ तस्य निरूपणं तूपासनार्थमेवेति प्रागुक्तप्रायम् । सखण्डस्फोटस्तु प्रागेव निरस्त इत्यानुपूर्व्यवच्छिन्नवर्णानां वाचकत्वमूह्यमिति वदन्ति । * इत्थमिति * पूर्वोक्तप्रकारैरित्यर्थः । * पञ्चधेति * पदवाक्याखण्डपदाखण्डवाक्यभेदभिन्ना इत्यर्थः ॥ ७० ॥ इति भूषणसारदर्पणे व्यक्तिस्फोटनिरूपणम् ॥

प्रभा

प्रकर्षात्' इति न्यायेन श्रुत्यबोधितगुणसम्बन्धस्यैव त्याग इति गुणान्तरविशिष्टच्छागालम्भनं युक्तमित्युक्तं तत्सर्वं विरुद्ध्येत। किञ्च व्याकरणसिद्धान्तविरोधोऽपि स्यात्। तथाहि—समानाधिकरणपदार्थयोरभेदान्वयः, पूर्वपदार्थोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, इत्यादिवैयाकरणनिकायप्रसिद्धव्यवहारानुपपत्तिः, अखण्डपक्षे पूर्वोक्तस्य सर्वस्यासम्भवात्। पदार्थनिबन्धनमीमांसकोक्तस्य 'श्रुति-लिङ्ग' इति न्यायस्यासङ्गत्यापत्तेश्चेति चेन्न, यथा पदेषु कल्पितप्रकृतिप्रत्ययविभागमादाय प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्प्रत्ययानामित्यादिव्यवहारस्तथाऽखण्डेषु वाक्येषु वस्तुतः पदानामसत्त्वेऽपि आवापोद्वापाभ्यां कल्पितपदान्यादाय मीमांसाभिमतस्य वैयाकरणसम्मतस्य च सकलप्रकृतिप्रत्ययपदाद्याश्रितविचारस्य निर्बाधमुपपादयितुं शक्यत्वात्। बलाबलाद्यधिकरणेषु श्रुति-लिङ्गादीनां बलाबलाभावविचारो जैमिनीयैरेवमेवोपपाद्य। यद्यपि वस्तुतो वाक्यस्याखण्डत्वे तादृशकल्पनाया भ्रमरूपत्वाद् ऋषीणां तत्त्ववेत्तृत्वेन तदसम्भवः (कल्पनाऽसम्भवः' तथापि व्यवहारकाले तत्त्वज्ञैरपि तैरतत्त्वज्ञैरिव तत्त्वभूतेन वस्तुना व्यवहारासम्भवात् कल्पितैरेव पदपदार्थैर्वाक्यार्थविचारः क्रियते इति स्वीकारेण तेषां वचनावलम्बेनैव तदीयानां विचारसरणिरिति सर्वमनवद्यम्। नैयायिकास्तु उत्पत्त्यादिप्रतीतिदर्शनाद् वर्णानामनित्यत्वमेव। भेरीदण्डादीनां ध्वन्यात्मकशब्दं प्रति कारणत्वमिव कण्ठादिस्थानवायुसंयोगादीनामपि अन्वयव्यतिरेकाभ्यां वर्णोत्पादकत्वमेव प्रतीयते। नचोत्पत्तिस्वीकर्तृमते तन्नाशकसामग्र्यभावात् उत्पन्नस्य वर्णस्य तृतीयक्षणे नाशायोगः, प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशम्प्रति स्वाव्यवहितोत्तरत्व-स्वसामानाधिकरण्योभयसम्बन्धेन योग्यविभुविशेषगुणस्यैव हेतुताया ज्ञानादिस्थले क्लृप्तत्वात्। नच वर्णोत्पादकत्वेनाभिमतसामग्र्या वर्णाभिव्यक्तिरेव जायते, नतु वर्णोत्पत्तिरिति वाच्यम्, वर्णाभिव्यक्तित्वस्य कार्य्यतावच्छेदकत्वे गौरवेण वर्णवृत्तिकत्वादिजातेरेवावच्छेदकत्वकल्पने लाघवात्। नचाभिव्यक्त्युत्पत्तिवादेऽपि स्वविषयकत्वादिजातेरेव विषयितासम्बन्धेनावच्छेदकत्वेन गौरवाभाव इति वाच्यम्, एवं स्वीकारे कोलाहलादौ कत्वादेरभावेन तदप्रत्यक्षत्वापत्तेः। नहि कोलाहलप्रत्यक्षं कत्वादिविषयकं येन लौकिकविषयतया कार्य्यतावच्छेदकं स्यात्। किञ्चैवं घटाद्युत्पादकसामग्र्या अपि तदभिव्यक्तित्वस्यैव कार्य्यतावच्छेदकत्वापत्तौ घटादिजन्यमात्रस्य नित्यत्वापत्तेः। नच साङ्ख्यमताभिप्रेतसत्कार्य्यवादिसिद्धान्तेन भावमात्रे नित्यत्वस्येष्टतया नापत्तिरिति वाच्यम्, सूक्ष्मेऽक्षिकया पर्य्यालोचनेन तन्मतस्याप्यापातरमणीयत्वात्। तथाहि—कारणेन कार्य्यस्याभिव्यक्तिरेव, नतूत्पत्तिरिति तन्मतम्, तच्चानुपपन्नम्, कार्य्याणामभिव्यक्तिः कारणव्यापारात्प्राक् सती, असती वा। नाद्यः, त्वन्मते घटोत्पत्तेः प्रागपि घटस्य सत्त्वैव अभिव्यक्तिरूपकार्य्यस्यापि सत्त्वस्यावश्यकतया घटस्य प्रत्यक्षत्वापत्तेः। नच कारणव्यापारात्प्रागनभिव्यक्ताया एवाभिव्यक्तेः सत्त्वेनाभिव्यक्ताया अभिव्यक्तेरेव प्रत्यक्षत्वप्रयोजकतया नोक्तापत्तिरिति वाच्यम्, अभिव्यक्तेरप्यभिव्यक्त्यङ्गीकारेऽनवस्थापत्तेः। नान्त्यः, कारणव्यापारात्प्राक् कार्य्यमात्रस्य सत्त्वमते अभिव्यक्तेरपि कार्य्यतया तदसत्त्वाङ्गीकारे स्वसिद्धान्तभङ्गापत्तेः। किञ्च 'उत्पन्नो घटः' 'नष्टो घटः' इति प्रतीत्या घटादीनामनित्यत्ववत् 'उत्पन्नः ककारः' नष्टः ककारः' विनष्टः ककारः इति प्रतीतिवशाद्वर्णानामनित्यत्वमेवोचितम्, प्रतीतेः समत्वे वैषम्ये बीजाभावात्। किञ्च वायुगतस्य, तत्संयोगगतस्य वा कत्वादे र्वर्णे स्फोटे वा भानाङ्गीकारे तत्प्रत्यक्षानुपपत्तिः, स्वसमवेतसमवायसन्निकर्षस्यैव कत्वादिप्रत्यक्षप्रयोजकतया कत्वादेर्वर्णसमवेतत्वेन प्रत्यक्षत्वस्य दुरुपपाद्यत्वात्। स्वः=श्रोत्रेन्द्रियम्। नच स्व (श्रोत्र) संयुक्त (वायु) समवायसन्निकर्षेण स्वसमवेतव्यञ्जकसमवायसन्निकर्षेण वा तत्प्रत्यक्षसम्भव इति वाच्यम्, तथा सति शब्दत्वादेरपि प्रत्यक्षत्वापत्तेः। नच 'ककारं शृणोमि' इति प्रतीतौ शब्दत्वसम्बन्धाप्रतीत्या न शब्दत्वभानमिति वाच्यम्, 'शब्दं शृणोमि' इति प्रतीतेः सत्त्वात्, 'शब्दं शृणोमि' इति प्रतीतेः

जातिस्फोटमाह —

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् । औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत् ॥ ७१ ॥

अयं भावः—वर्णास्तावदावश्यकाः । उक्तरीत्या च 'सोऽयं गकारः' इतिवत्,

प्रभा

समवायविषयकत्वदुक्तप्रतीतेरपि समवायविषयकत्वस्यौचित्याच्च । नच 'ककारं शृणोति' इति प्रतीतेः समवायविषयकत्वांशे भ्रमः, सर्वत्र तादृशप्रतीतेर्भ्रमत्वकल्पने मानाभावेन प्रतीतेः समवायविषयत्वकल्पनस्यैवौचित्यात् । एवञ्च वर्णानामेकत्वे उदात्तत्वादीनां साक्षात् वर्णधर्मत्वेऽपि बाधकाभावेनान्यगतधर्मारोपे दैर्घ्यादिदृष्टान्तस्यापि दौर्भिक्ष्यमेव । प्रामाणिकगौरवस्यादोषावहत्वादनित्यत्वे अनन्तवर्णतत्प्रागभावध्वंसकल्पनमपि न दोषाधायकम् । न चानित्यत्वे 'सोऽयं गकारः' इति प्रत्यभिज्ञानुपपत्तिः, 'तदेवेदं शकटम्' इति वत्तज्जातीयविषयकत्वेनापि प्रत्यभिज्ञोपपत्तेः । नचैवं 'तज्जातीयोऽयम्' इति व्यवहारस्यापत्तिरिति वाच्यम्, यत्राभिज्ञायां गत्वादेर्जातित्वेन भानं तस्यैव प्रत्यभिज्ञायाः 'तज्जातीयोऽयं गकारः' इत्याकारकत्वनियमेन स्वरूपतो गत्वाद्यभिज्ञाने एव स्वरूपतो गत्वाद्यभिज्ञाया एव नियमात् । एवञ्च नित्यवर्णसमुदायात्मकपदादेः स्फोटस्य च वाचकत्वं दुर्वचम् । पुराणादौ योगादिशास्त्रे च स्फोटनिरूपणन्तूपासनार्थमेव, इत्यानुपूर्व्यवच्छिन्नानां वर्णानामेव वाचकत्वं युक्तियुक्तमित्याहुः ॥ ७० ॥

जातिस्फोटमिति—अत्रेदं तत्त्वम्, यथा घटादिशब्दानामर्थगता जाति (धर्म) रेव वाच्या, लाघवाद्व्यभिचाराच्चेति शक्तिनिरूपणे उक्तम्; तथा जातेर्वाचकघटादिशब्दस्तद्गता घटत्वादिजातिर्वेति विकल्पे व्यक्तिवाद इव घटशब्दानामानन्त्याद् व्यभिचाराच्च शब्दगता जातिरेव वाचिका लाघवाद्व्यभिचाराच्च । तथाहि व्यक्तिरूपस्य घटाद्यर्थस्य यथाऽऽनन्त्यम्, तथा व्यक्तिरूपस्य घटशब्दस्याप्यानन्त्यम् । तथाच तस्य वाचकत्वं न सम्भवति प्रत्युच्चारणं शब्दभेदेन इदानीमुच्चरिते एतदुच्चरिते वा शक्तिस्वीकारे कालान्तरे उच्चरिते भिन्नपुरुषेण वोच्चरिते शक्तिर्न सिद्ध्येत्, वृद्धव्यवहारादिनैकत्रैव शक्तिग्रहात् । बोधस्तु एकत्र शब्दे शक्तिग्रहे वृते घटादिशब्दमात्रादिष्यते । किञ्च सर्वेषां शब्दानां शक्तिमत्त्वे वाचकानन्त्यं तज्ज्ञानासम्भवश्चेति घटादिशब्दगता जातिरेव वाचिका न जात्याश्रयः शब्दः । तदयं निर्गलितोऽर्थः—जातिरूपरुषित एव स्फोटो वाचको न तु जात्याश्रयरूपरुषितः, अनन्तस्फोटानां वाचकत्वापत्तेः । जातिस्फोटस्य वाचकत्वे तु जातेरैक्यात्तत्तादात्म्यापन्नस्फोटस्याप्यैक्यमिति न दोषः । यद्यपि घटत्वपटत्वजातिभेदेन स्फोटस्यापि भेदस्तथापि व्यक्तिकृतभेदो नास्तीति हि तत्त्वं तदाह—जातिस्फोटमाहेति । शब्दगता या जातिः सैव नैयायिकादिभिरानुपूर्वीशब्देन व्यवह्रियते । शक्यत्व इवेति—जातेः शक्यत्वे लाघवमिव शब्दगतजातेः शक्तत्वे लाघवम्—ईक्ष्यताम्=द्रष्टव्यम् । वाशब्द एवार्थे । भेदस्तु=स्फोटभेदस्तु—औपाधिक एव—नानाजातिरूपोपाधिकृत एवास्त्वित्यर्थः । वर्णानाम्=मीमांसकाभिमतानां नित्यानां वर्णानाम् । तारत्वम्=उच्चैस्त्वम् । मन्दत्वम्=अल्पत्वं यथाऽऽरोपितं भासते, नतु वास्तविकम् । यथा वा परम्परया भासते न तु साक्षादिति भावः । ननु स्फोटस्य ब्रह्मरूपत्वेनाखण्डत्वान्निधर्मत्वाच्च तत्र जातेरभावेन तद्वाचकत्वविचारो गगनकुसुमायमान इत्याशङ्कामपनेतुमाह—अयम्भाव इति । आवश्यका इति—गत्वविशिष्टव्यक्तयो गकारादय अवश्यं स्वीकार्य्याः । उक्तरीत्येति—अस्य 'अन्यथा' इत्यादिः । वर्णमस्वीकृत्य स्फोटाङ्गीकाररीत्ये-

दर्पणव्याख्या

क्रमप्राप्तं जातिस्फोटं निरूपयति—* शक्यत्व इवेति * ननूक्तरीत्या स्फोटातिरिक्तवर्णानामसत्त्वात्तद्गतजातेर्वाचकत्वविचारः काकदन्तपरीक्षासमोऽत आह सारे—*अयम्भाव इति* हकारगकारयोरभेदे साधकमाह—

योऽयं गकारः श्रुतः सोऽयं हकार इत्यपि स्यात्, स्फोटस्यैकत्वात्, गकारोऽयं न हकार इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयम्, न वा? आद्ये तदेव गकारोऽस्तु। वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथाचातिरिक्तस्फोटकल्पने एव गौरवम्। अन्त्ये—गकारादिप्रतीतिविरोधः। वायुसंयोगवृत्ति, ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न, प्रतीतेर्विना बाधकं भ्रमत्वायोगात्। अस्तु वा वायुसंयोग एव गकारोऽपि।

प्रभा

त्यर्थः। सोऽयं गकार इति—यथापूर्वमुच्चरितगकारविषयिका इयं प्रत्यभिज्ञा स्फोटस्यैक्येनोपपद्यते। तथा वर्णाभावे स्फोटमात्राङ्गीकारे गकारहकारयोरप्यैक्येन गकाराभिज्ञानेऽपि हकारविषयिणी प्रत्यभिज्ञा प्रमात्मिका स्यादित्याह—इत्यपि स्यादिति। स्फोटस्यैकत्वादिति—एकस्यैवाखण्डस्फोटस्य सकलवर्णरूपत्वादित्यर्थः। यत्तु दर्पणकारादयः—'तदभिन्नाभिन्नस्य तदभिन्नत्वम्' इति नियमेन हकाराभिन्नस्फोटाभिन्नगकारे तद् (हकार) अभेदावगाहिबुद्धेः प्रमात्वापत्तिरित्यर्थ इति तन्न, स्वाभिन्नद्वारकस्वस्वरूपानुगमस्थले एव तन्न्यायविषयत्वात्। यथा कार्यकारणयोरभेदवादिनये प्रकृतेः कार्य्यं महत्तत्त्वमिति तयोरभेदः, महतः कार्य्यमहङ्कार इति तयोरप्यभेदः। तथाचाहङ्कारे प्रकृत्यभिन्नमहदभिन्नत्वेन प्रकृत्यभिन्नत्वम्। नहि प्रकृते हकाराभिन्नस्फोटद्वारकगकारस्वरूपानुगमः, स्फोटे हकाराभेदाज्ञानेऽपि गकारे स्फोटाभेदानुगमात्। ननु स्फोटमात्रवादिनये 'योऽयं गकारः श्रुतः सोऽयं हकारः' इति प्रतीतिरिष्टैव, अद्वैतवादिमते 'योऽयं देवदत्तः स यज्ञदत्तः' इति वदित्यत आह—अनापत्तेश्चेति—स्फोटात्मकगकारहकारयोरैक्येन भेदावगाहिबुद्धेर्बाधादिति भावः। ननु स्फोटस्यैक्येऽपि कत्त्वगत्वादिविरुद्धधर्माध्यासमूलकभेदानुभवेन नोक्तापत्तिः। नचाध्यस्तकत्वादिमादाय भेदावगाहित्वे तत्प्रतीतेः प्रमात्वानुपपत्तिः, प्रमात्वस्य तन्मते दूरापास्तत्वादित्यत आह—किञ्चेति। गत्वादीति—उपाधित्वेनाभिमतमनारोपितं गत्वादीत्यर्थः, आरोपितगत्वादेर्नित्यानेकवर्णवादिनाप्यङ्गीकाराद्यथाश्रुतासङ्गतेः। आद्ये—स्फोटे गत्वाद्यङ्गीकारे। तदेव=अनारोपितगत्वाद्येव। गकारोऽस्त्विति—नच गत्वं जातिर्नतु वर्ण इतीदमसङ्गतम्, वर्णनित्यतावादिना मीमांसकेन धर्मधर्मिणोरभेदेन गत्वाद्यतिरिक्तवर्णानङ्गीकारात्। तदाह—अतिरिक्तेति। एवेति=एवेन स्फोटनिरासः। गकारोऽपीति—गत्वेन प्रतीति विषयोऽपीत्यर्थः। तथाच

दर्पणव्याख्या

स्फोटस्यैकत्वादिति तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन हकारात्मकस्फोटाभिन्नगकारे तदभेदावगाहिबुद्धेः प्रमात्वापत्तिरित्यर्थः। ***अनापत्तेश्चेति*** अभेदादेव च तादृशभेदावगाहिबुद्धेः प्रमात्वानुपपत्तेरित्यर्थः। ननु वर्णात्मकस्फोटस्यैकत्वेऽपि गत्वादिविरुद्धधर्माध्यासमूलकभेदप्रतीतेर्नानुपपत्तिः। प्रामाण्यन्तु तस्या वर्णैक्यवादिमते दूरापास्तमेवेत्यत आह—***किञ्चेति*** उपाधित्वाभिमतगत्वादीत्यर्थः। ***आद्ये***—स्फोटे गत्वाभ्युपगमपक्षे। ***तदेव***=गत्वमेव। ननु गत्वादेर्वर्णधर्मतया भेदेन कथं तस्य तदात्मकत्वमत आह—*** वर्णनित्यतावादिभिरिति *** मीमांसकादिभिरित्यर्थः। *** अतिरिक्तेति *** धर्मधर्मिणोरभेदाभ्युपगमादित्यर्थः। *** गौरवमिति *** गकारादिप्रतीतीनां गत्वादिविशिष्टगकारादिविषयकत्वेनोपपत्तिसम्भवादिति भावः। ***अन्त्ये***—स्फोटे गत्वाद्यनभ्युपगमकल्प इत्यर्थः। ***विरोध इति***। गादिप्रतीत्यनुपपत्तिरित्यर्थः। गत्वस्यान्यधर्मस्य स्फोटावृत्तित्वेन तद्विशिष्टविषयकप्रतीत्यनुपपत्तिरिति भावः। **वायुसंयोगावृत्तीति *—स्वमते *ध्वनिवृत्तीति***—मतान्तरे। पूर्वोक्तरीत्या तादृशवैजात्यारोपेण प्रतीतेः सूपपादत्वादाह—*** आरोप्येति ***। *** भ्रमत्वायोगादिति*** साक्षात्सम्बन्धेन प्रमात्वोपपत्तावारोपितसम्बन्धविषयकत्वे प्रमाणाभावादिति भावः। नन्वतिरिक्तानेकवर्णकल्पनापेक्षया तादृशप्रतीतीनां भ्रमत्वमेव न्याय्यमत आह—***अस्तु वेति*** तथाच तावतैव प्रतीतेः प्रामाण्यनिर्वाहेऽलं स्फोटकल्पनयेति

तथातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन । तस्मात् सन्त्येव वर्णाः, परन्तु न वाचकाः, गौरवात्, आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च ।

प्रभा

प्रतीतेर्न भ्रमत्वम् । तस्य=वायुसंयोगस्य । वायुस्पर्शस्य प्रत्यक्षानुरोधेन अतीन्द्रियपदार्थमात्रगतधर्मः साक्षात्कारविषयत्वाभावव्याप्य इति यथा न स्वीक्रियते तथा वायोरतीन्द्रियत्वेऽपि तत्संयोगगतगत्वादेरपि 'गकारः' इत्यादिप्रत्यक्षानुरोधेनेन्द्रियाविषयत्वं न स्वीक्रियत इति भावः । अतीन्द्रियत्वं दोष इति—प्रतिबन्धक इत्यर्थः । संयोगप्रत्यक्षम्प्रति सकलतदाश्रयप्रत्यक्षस्य हेतुत्वं वक्तव्यम्, अन्यथा घटाकाशसंयोगादेरपि प्रत्यक्षत्वापत्तिः । एवञ्च वायोरप्रत्यक्षत्वेन वायु—कण्ठादिस्थानसंयोगस्यापीन्द्रियाविषयत्वेन संयोगरूपगकारादेरप्रत्यक्षत्वापत्तिरिति भावः । 'यश्चोभयोः समो दोषः परिहास्तयोः समः' इति प्रतिबन्धोत्तरयति—धर्मवदिति— धर्मपदेनात्र वाय्वनुयोगिकवृत्तिमतः स्पर्शस्य ग्रहणम् । यथा वायोरप्रत्यक्षत्वेऽपि तद्गतस्पर्शस्य त्वगिन्द्रियेण प्रत्यक्षं तथा कण्ठाद्यनुयोगिकवायुसंयोगरूपस्य गकादेः श्रोत्रेन्द्रियेण प्रत्यक्षं स्यात् । नच संयोगप्रत्यक्षम्प्रति यावदाश्रयप्रत्यक्षस्य हेतुत्वात्संयोगाश्रयीभूतस्य वायोरप्रत्यक्षत्वे गकारादेः प्रत्यक्षज्ञानविषयत्वमनुपपन्नमिति वाच्यम्, बहिरिन्द्रियग्राह्यद्रव्यानुयोगिकसंयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतुत्वात् । यद्वा 'गगने शब्दः' इतिवत् 'वायुसंयोगे गत्वम्' इत्यत्र संयोगांशे ज्ञानलक्षणलौकिकसन्निकर्षजन्यं गत्वांशे श्रोत्रेन्द्रियलौकिकसन्निकर्षजन्यं प्रत्यक्षमस्तु, संयोगांशे लौकिकप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतुत्वात् । अत्र पक्षे धर्मवदित्यस्य गगनधर्मशब्दवदित्यर्थः । कृतमिति—स्फोटेन किञ्चित्साध्यं नास्तीत्यर्थः । तत्तद्वायुसंयोगरूपगकारादिभिरेवार्थबोधसम्भवादतिरिक्तस्फोटकल्पना व्यर्थेति भावः । तस्मादिति—उक्तरीत्या वर्णानां प्रत्यक्षत्वसम्भवादित्यर्थः । गौरवादिति—तत्तद्वर्णभेदेनानन्तबोधकत्वशक्तिकल्पने गौरवादित्यर्थः । आकृत्यधिकरणेति—'विशयो विषयश्चैव पूर्वपक्षस्तथोत्तरम, निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्' इति मीमांसकोक्ताकृत्यधिकरणरीत्येत्यर्थः । तत्र हि 'नह्यसत्यामाकृतौ व्यक्तिभिः शब्दस्यापौरुषेयः सम्बन्धः शक्तिरूपः सिद्ध्यति, तासामनित्यत्वात्, व्यक्तीनामानन्त्याद् व्यभिचाराच्च जातिरेव वाच्येति निर्णीतम् । ननु 'आकृतिस्तु क्रियार्थत्वात्' (मी० १ पा० ३ अ० १० सू० ३३) इति सूत्रे आकृतिः पदार्थः । 'श्येन चितं चिन्वीत' इति 'चयनमाकृतौ सम्भवति न व्यक्तौ' इत्युक्तं । अवयवसंस्थानमाकृतिस्तस्या एव चयनसम्भवात् । तच्च प्रतिपिण्डं भिन्नमित्यानन्त्यादिदोषस्तत्रापीति चेन्न, आक्रियते=निरूप्यते व्यक्तिर-

दर्पणव्याख्या

भावः । * तस्य *=संयोगस्य । * अतीन्द्रियत्वमिति * लौकिकविषयताशून्यत्वमित्यर्थः । *दोषः*=बाधकमित्यर्थः । प्रतिबन्धोत्तरयति—*धर्मवदिति* यथा अतीन्द्रियमात्रवृत्तिधर्मत्वस्य साक्षात्काराविषयत्वव्याप्यत्वं त्वया न स्वीक्रियते, तथाऽतीन्द्रियसंयोगगतविशेषस्य मयाऽपीत्यर्थः । यद्यतीन्द्रियस्यैवेन्द्रियकत्वमत्यन्तासम्भवदुक्तिकं तदा तादृशवैजात्यस्य स्फोटधर्मवत्त्वमपि, तथैव प्रत्यक्षानुपपत्तेरिति भावः ।' ननु कत्वादिधर्माणामतीन्द्रियत्वेऽपि ज्ञानलक्षणया कादिप्रतीतौ तद्भाने बाधकाभाव इति चेन्न, ककार इति प्रत्यये, कत्वं साक्षात्करोमीत्यनुव्यवसाये कत्वांशे लौकिकविषयत्वावगाहेनोक्तप्रकारोऽसम्भवात् । 'शङ्खः पीतः' इति ज्ञानानन्तरोत्पन्नः पीतत्वं पश्यामीति प्रत्ययस्तु भ्रम एव । दोषविशेषस्य तादृशविषयतानियामकत्वकल्पने गौरवादिति विभावनीयम् । उपसंहरति—* तस्मादिति * कत्वादिविशिष्टविषयकसाक्षात्कारानुपपत्तिप्रमाणसद्भावादित्यर्थः । * सन्त्येवेति * त्वदभिमतस्फोटातिरिक्ता वर्णाः सन्त्येवेत्यर्थः । * परमिति * किन्त्वित्यर्थः । * गौरवादिति * तत्तद्वर्णभेदभिन्नानन्तशक्तिकल्पने गौरवादित्यर्थः । ननु तावद्वर्णगतपदत्वादिजात्यनुगतीकृतेष्वेकस्या एव शक्तेरभ्युपगमान्न नानात्वप्रयुक्तगौरवमत आह—* आकृत्यधिकरणेति * । न्यायस्तु नामाय

इदं हरिपदमित्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात्। नच वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभिश्चान्यथासिद्ध्यापत्तेः।

प्रभा

रनयेति जातेरेवात्राभिधानात्। तदुक्तम्—द्रव्यगुणकर्मणां सामान्यमाकृतिः' इति। एवं पदानामानन्त्याद् व्यभिचाराच्च पदगता जातिरेव वाचिका, जातिरूपेण भासमानः स्फोट एव वाचक इति यावत्। ननु तावद्वर्णगतपदत्वजातिसत्त्वे मानाभाव इत्यत आह—इदमिति—उच्चारणभेदेन पदानामानन्त्याद् 'इदं हरिपदम्' इत्येकाकारकसकलश्रावणप्रत्यक्षात्मकप्रतीतेर्जातिविषयकत्वं विना नोपपद्यत इत्यनुगतप्रतीत्या जातिः सिध्यति। नन्वनुगतप्रतीतेर्जातिसाधकत्वे विभुत्वादेरपि जातित्वापत्तिरिति कार्य्यकारणतावच्छेदकतयैव जातिसिद्धिरिति नैयायिकसिद्धान्तः। प्रकृते च तदभावान्न पदत्वजातिरित्यतः साधकान्तरमाह—हर्य्युपस्थितीति—शाब्दत्वव्याप्यहर्य्युपस्थितित्वावच्छिन्नं प्रतीत्येर्थः। तेन चक्षुरादिना हर्य्युपस्थितिमादाय न व्यभिचारः हरिपदज्ञानस्य कारणत्वे ज्ञाते विषयित्वसम्बधेन पदस्य विशेषणतया पदावच्छिन्ना कारणता वाच्या। पदनिष्ठाऽवच्छेदकता यदि तद्व्यक्तित्वावच्छिन्ना तदा तद्व्यक्तित्वस्यानन्त्येन कारणतावच्छेदकतावच्छेदकत्वे आनन्त्यव्यभिचारयोरापत्तिः। पदगतजातेः कारणतावच्छेदकतावच्छेदकत्वे च जातेरैक्याद् व्यभिचारानन्त्ययोरभाव इत्याह—तदवच्छेदकतयेति=हेतुतावच्छेदकतावच्छेदकतयेत्यर्थः। यद्वा तदवच्छेदकतया=स्वाश्रयावच्छिन्नत्वसम्बन्धेन हेतुतावच्छेदकतयेत्यर्थः। जातिविशेषस्य=पदगतजातिविशेषस्य। आवश्यकत्वादिति—लाघवादिति शेषः। ननु हरिपदत्वादिजातेर्घटपदादिष्वतिप्रसक्तिवारणाय हरिपदादिगतानुपूर्व्यास्तन्नियामकत्वं वाच्यमित्येकस्या आनुपूर्व्या एवावच्छेदकत्वेनानन्त्यव्यभिचारापत्तिरित्याशङ्कां निराचष्टे—नचेति। प्रतीतिरिति=पदभेदभेदेऽपि 'हरिपदम्' इत्येकस्या प्रतीतेः, एकस्या अवच्छेदकतायाश्च निर्वाहे जातिकल्पना व्यर्थेति भावः। अन्यथा सिद्ध्यापत्तेरिति=अवयवानां संयोगविशेषविशिष्टा मृदेव घटः। तया आकारादिभिः=अवयवसंस्थानविशेषैश्च 'घटः' इत्यादिप्रतीतिसिद्धौ अवयवाद्भिन्नोऽवयवी न सिद्ध्येदिति भावः। न च दण्डादिकार्य्यतावच्छेदकतया घटत्वादिजातेरावश्यकता, संयोगविशेषावच्छिन्नमृत्तिकात्वस्यैव दण्डादिकार्य्यतावच्छेदकत्वस्य वक्तुं शक्यत्वात्। यद्यवयवसंयोगविशेषाणामानन्त्येनाननुगमाद्, एवं संयोगविशेषविशिष्टावयवानां नानात्वात् 'घटः' इति प्रतीतेस्तद्विषयकत्वे गौरवात् 'एको घटः' इति प्रतीत्यनुपपत्तेश्च घटत्वादिजातेराश्रयणमितिचेत्तदा प्रकृतेऽपि तथैव पदादिगतजातिसिद्धिस्तुल्या।

दर्पणव्याख्या

निरूपणे प्रपञ्चितः। ननु तादृशजातौ मानाभावोऽत आह—* हरिपदमिति * अनुगतधर्मं विना सकलतादृशपदेष्वेकाकारतादृशप्रतीत्यनुपपत्तेरिति भावः। नन्वनुगतप्रतीतिमात्रस्य जातिसाधकत्वे विभुत्वादेरपि जातित्वापत्तिरतः कारणतावच्छेदकत्वादिनैव तत्सिद्धिर्वाच्या, तदभावात् प्रकृते कथं तस्य जातित्वमत आह—* हर्य्युपस्थितित्वावच्छेदेनेति * कार्यतावच्छेदकप्रदर्शनमिदम्। * अवश्येति * अन्यथा तावत्पदानां तत्तद्व्यक्तित्वेन हेतुतया व्यभिचारेणासम्भवादिति भावः। * प्रतीत्यवच्छेदकत्वयोरिति * अनुगतप्रतीत्यवच्छेदकत्वयोरित्यर्थः। * वर्णानुपूर्व्येति * तादृशजात्यभिव्यञ्जकत्वेनावश्यकल्प्यया तयेत्यर्थः। * निर्वाह इति * तथावश्यक्लृप्तनियतपूर्ववृत्तिताऽवच्छेदकतानुपूर्व्यैवानुगतप्रतीतिकारणतावच्छेदकत्वयोः सम्भवेन तद्रूपविशिष्टपदोपस्थितित्वेन हेतुत्वमन्यथासिद्धिरिति भावः। * अन्यथासिद्ध्यापत्तेरिति * न च सेष्टा, प्रत्यक्षाऽदिप्रमाणविरोधादिति भावः। ननु जातेः शक्तत्वे जातित्वं शक्तावच्छेदकं वाच्यम्,

मात् सा जातिरेव वाचिका, तादात्म्येनावच्छेदिका चेति। ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वार्थ-
भेदो न स्यादित्यत आह—औपाधिको वेति। वा त्वर्थे उपाधिरानुपूर्व्वी, सैव जातिविशेषाभिव्य-
ञ्जकेति भेदः करणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह—
र्णानामिति ॥७१॥ ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधापत्तिः स्यादित्यत आह—
नेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता। कैश्चित् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥७२॥
अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता। योगार्थतया बोधिकेति

प्रभा

मात्=उक्तरीत्या जातिस्वीकारात्। ननु पदगतजातेर्वाचकत्वे घटपदत्वत्वं वाचकताच्छेदकं वाच्यम्,
सकलघटपदसमवेतत्वे सति तदितरासमवेतत्वरूपमिति जगतः प्रवेशादतिगौरवमत आह—तादात्म्येनेति—
भेदेनेत्यर्थः। अवच्छेदिकेति—पदत्वजातिगतवाचकताया अवच्छेदिकेत्यर्थः। तथा च जातिगतवाचकताया
तिरेवावच्छेदिकेति न गौरवमिति भावः। तादात्म्यस्य वृत्त्यनियामकत्वेऽपि अवच्छेदकतावच्छेदकत्वे
नुपपत्तिः, स्वाधिकरणसम्बद्धत्वस्यैवावच्छेदकतानियामकत्वात्। जात्योरिति—पदद्वयेऽपि जात्याश्रयीभूत-
र्णानां तुल्यतया रसविषयकोपस्थापिकायाः, सरोविषयकोपस्थापिकायाश्च जातेरेकत्र सत्त्वे विरोधाभावे-
भाभ्यामुभयबोधापत्तिरितिभावः। उक्तापत्तिं निराकरोति—औपाधिको वेति। प्रकृते विकल्पार्थस्यासङ्गतत्वा-
ह—त्यर्थ इति। त्वर्थोऽत्रावधारणमित्याह—सैवेति=आनुपूर्व्येवेत्यर्थः। तथाच वर्णानां तुल्यत्वेऽपि पौर्वापर्य्य-
पानुपूर्वीभेदेनोभयत्रोभयार्थवाचकजातिसत्त्वे मानाभाव इति भावः। अभिव्यञ्जिकेतीति—इतिर्हेतौ। यतोऽभि-
व्यञ्जकभेदोऽत एकत्रैकस्या एव जातेर्व्यक्त्या रसोपस्थितेः सर उपस्थितेश्च कारणीभूतजातिज्ञानस्य भेद
ति योजना। एकया आनुपूर्व्या भिन्नं जातिज्ञानम्, अपरया आनुपूर्व्या भिन्नं जातिज्ञानमिति भावः। तारम-
वदिति=तारत्वमन्दत्ववदित्यर्थः। यथैकेन वायुसंयोगेन तारत्वस्य=उच्चैस्त्वस्य, अपरेण तेन मन्दत्वस्य=
नैस्त्वस्य ज्ञानम्। तेन तीव्रं-मन्दमिति ज्ञानभेदः॥ ७१ ॥ जातेरिति=घटपदादिवृत्तित्वेनाभिमतजातेरित्यर्थः,
धकजातेःसमुदायवृत्तित्वात्समुदायस्यावयवानतिरेकाज्जातेः समुदायावृत्तित्वस्य स्वभावसिद्धत्वात्प्रत्येकव-
भिव्यक्तजात्या बोधः स्यादिति भावः। वर्णव्यक्तीति—आनुपूर्वीविशिष्टवर्णव्यक्तिभिरित्यर्थः। स्फुटति=बोध
पयो भवत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटपदं बोधकपरमित्याह—योगेति। एतेन=पदघटकयावद्वर्णाभिव्य-

दर्पणव्याख्या

य च तदितरावृत्तित्वविशिष्टसकलतद्वृत्तित्वरूपतया तत्त्वासम्भवो गौरवादत आह—*तादात्म्येनेति* अभेदेनेत्यर्थः।
याच नोक्तदोष इति भावः। एतत्तत्त्वमभिहितं प्राक्। * जात्योरिति * तयोः पदयो रेफाकारसकारविसर्गघटितत्वा-
शेषाद्रसत्वविशिष्टोपस्थापकतावच्छेदकसरस्त्वविशिष्टोपस्थापकतावच्छेदकजात्योरेकतरस्या एव सत्ताया विनिगमकाभावात्ततो
लक्षणार्थबोधानुपपत्तिरित्यर्थः। वाशब्दस्य पक्षान्तरपरत्वभ्रमं निराकारोति—* वा त्वर्थ इति * अवधारणे इत्यर्थः।
भेद इति * तथाच तत्र वर्णतौल्येऽप्यानुपूर्वीवैलक्षण्येन रसत्वविशिष्टोपस्थापकतावच्छेदकजातेर्निरुक्ताव्यवहितोत्तरत्व-
म्बन्धेन रविशिष्टसत्त्वादिरूपानुपूर्व्या एव व्यञ्जकतया तदभावेन न सरः—पदाद्रसत्वविशिष्टबोधापत्तिः, एवमप्यत्रापीति
वः। मूले तारमन्दवदित्यत्र तारमन्दशब्दौ धर्मपरौ। तथाच यथा वर्णानां नित्यैकत्वमते विजातीयवायुताल्वाद्यभिघात-
त्वे तारत्वादिना भेदप्रतीतिस्तद्वदित्यर्थः॥ ७१ ॥ वर्णजातिस्फोटमभिप्रेत्य शङ्कते सारे—*नन्विति*। *जातेरिति*
र्थबोधकजातेरित्यर्थः। *प्रत्येकमिति* पदान्तर्गततत्तद्वर्णेष्वित्यर्थः। एवमग्रेऽपि। * अर्थबोधापत्तिरिति * तदभि-
व्यञ्जकवर्णसत्त्वादिति भावः। * योगार्थतयेति * स्फुटत्यर्थोऽस्मादिति वक्ष्यमाणावयवव्युत्पत्त्येत्यर्थः।

यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वदार्थबोधापत्तिरित्यपास्तम् । अयं भावः यद्यपि वर्णस्फोटपक्षे उक्तदोषोऽस्ति । तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति कैश्चिद् व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्ते इति शेषार्थः । उक्तं हि काव्यप्रकाशे —"बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति

प्रभा

क्तजातेर्बोधकत्वस्वीकारेण । अपास्तमिति=अभिव्यक्तजातेरेव बोधकत्वादिति भावः । वर्णजातिस्फोटपक्षे पदघटकवर्णवृत्तिगत्वादीनामेव स्फोटाभिव्यञ्जकत्वे उक्तदोषः=प्रतिवर्णमर्थबोधापत्तिरूपः । पदेति—पदवाक्यजातिस्फोटपक्षे प्रतिवर्णं नार्थबोधरूपो दोष इत्यर्थः । तत्र=पदवाक्यजातिस्फोटपक्षे । तस्याः=जातेः । व्यासज्येति=पर्याप्तिसम्बन्धेन समुदायवृत्तित्वस्येत्यर्थः । धर्मीति=धर्मो जातिरूपस्तद्ग्राहकंयन्मानं पदवाक्ययोर्बोधकत्वान्यथानुपपत्तिरूपं तत्सिद्धत्वादित्यर्थः । एतेन जातेः समवायेनैव सत्त्वं न पर्य्याप्त्येति न शङ्क्यम्, अनुपपत्तेरपरिहारात् ॥ ननु अनेकवर्णव्यङ्ग्या जातिरित्यनुपपन्नं वर्णानां जातिव्यञ्जकताया अप्रसिद्धत्वादित्यत आह—कैश्चिदिति । अस्याः=जातेः । आश्रयत्वं षष्ठ्यर्थः । व्यज्यते जातिरनयेति व्युत्पत्त्या जात्याश्रयीभूतव्यक्तयः=वर्णा एव व्यञ्जकत्वेन हेतुना ध्वनित्वेन प्रकल्पिताः=ध्वनय इति व्यवहृताः । वर्णव्यक्तीनां ध्वनित्वव्यवहारे प्रमाणमाह—उक्तमिति ॥ ७२ ॥ ननु जातेर्वाचकत्वमनुपपन्नम्, तादृशजातेरप्रसिद्धत्वात्, यद्वा जातेर्वाचकत्वं

दर्पणव्याख्या

एतेनेति—तत्पदघटकयावद्वर्णाभिव्यक्तजातेर्वाचकत्वाङ्गीकारेणेत्यर्थः । *सर्वदा*=पदाश्रवणेऽपि । *अपास्तमिति*—जातेः सनातनत्वेऽप्युक्तस्थले व्यञ्जकासमवधानात्तदभिव्यक्त्यभावेन बाधस्यापादयितुमशक्यत्वादिति भावः । ननु वर्णजातिस्फोटपक्षे पदघटकयावद्वर्णगतजातीनामेवार्थबोधकत्वमुपगन्तव्यम् । तत्र चान्यवर्णगतजातेरन्यवर्णानभिव्यङ्ग्यत्वात्तत्तद्वर्ण एवाभिव्यञ्जको वाच्यः । तथाचोक्तदोषस्तदवस्थ एवेत्यत आह —* अयम्भाव इति * । * उक्तदोष इति * तथाच दुष्टत्वात् स पक्षो नाश्रयणीय इति भावः । * तत्रेति * पदे वाक्ये च * तस्याः *=पदत्वादिजातेः । * व्यासज्यवृत्तित्वस्येति * । पर्य्याप्त्याख्यविलक्षणसम्बन्धेन वृत्तित्वस्येत्यर्थः । ननु जातेः समवेतत्वस्यैव सार्वत्रिकतया कथमेतस्याः पर्य्याप्तत्वमत आह—* धर्मिग्राहकेति * धर्मवती जातिस्तद्ग्राहकं मानं पदत्वस्य वाक्यत्वस्य वा वाचकत्वानुपपत्तिस्तत्सिद्धत्वादित्यर्थः । प्रत्येकवर्णविश्रान्तजातेर्वाचकत्वस्योक्तदूषणकवलितत्वेनासम्भवाद्वाचकत्वानुपपत्त्या कल्प्यमाना पदत्वादिजाति र्यदि पुनः प्रत्येकं विश्रान्ता स्यात् तदा तत्सिद्धिरेव न स्यात्, वाचकत्वानुपपत्तेरपरिहारादतस्तत्साधकमेव तत्पर्याप्तत्वसाधकमेव चानेकव्यक्त्यभिव्यङ्ग्येत्यस्यानेकव्यक्तिपर्य्याप्तेत्यर्थ इति भावः । वस्तुतस्तु घटादिप्रत्येकव्यक्त्यैक्ये घट इति सर्वसिद्धप्रतीत्या व्यवहारेण च सिद्ध्यतु घटत्वादेः प्रत्येकमात्रवृत्तित्वम् । न ह्येकवर्णे घटपदादिव्यवहारो येन पदत्वादेः प्रत्येकवृत्तिता स्यात् किन्तु पदशब्दः पदं न प्रकार इति वैपरीत्यमिति तादृशजातेः पर्य्याप्तत्वमावश्यकम् । पदत्वं न पर्याप्तम्, जातित्वादित्यनुमानं त्वप्रयोजकमनुकूलतर्काभावादिति विभावनीयम् । इदं पुनरिहावधेयम् । अनेकव्यक्त्यभिव्यङ्ग्येत्यस्यानुपूर्व्यवच्छिन्नवर्णाभिव्यङ्ग्येत्यर्थः । नातः सरो रस इत्यादौ अर्थभेदबोधानुपपत्तिः । एवञ्च पूर्वोक्तार्थस्यैवायं प्रपञ्चः । आनुपूर्वीवर्णयोर्विशेषणविशेष्यभावव्यत्यासः परं व्यतिरिच्यते । अत एवाग्रिमग्रन्थसङ्गतिरिति । व्यज्यतेऽनयेति व्युत्पत्त्या व्यक्तिपदार्थो वर्ण इत्यभिप्रेत्याह—* ध्वनिवर्णयोरिति * वर्णानां ध्वनिनैवत्यादभेदोपचारोऽत एव पस्पशायां "अथ गौरित्यत्र कः शब्द" इति प्रश्ने "लोकेऽर्थबोधकत्वेन गृहीतो ध्वनिवर्णात्मकः समूह" इत्यर्थकम् । "अथवा प्रतीतपदार्थको ध्वनिः शब्द" इत्युक्तमिति भावः । * शेषार्थ इति * प्रकृतकारिकोत्तरार्द्धार्थ इत्यर्थः । वर्णेषु ध्वनिव्यवहारे सम्मतिमाह—* उक्तं हीति * । * काव्यप्रकाश इति * 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः" । इति वृत्तिव्याख्यावसर इति शेषः । * स्फोटव्यङ्ग्येति *

हारः कृतः" इति ॥ ७२ ॥ ननु का सा जातिस्तत्राह—

सत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ॥ सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥७३॥

भावम्=प्रतिपदार्थम् । सत्यांशो जातिः, असत्या व्यक्तयः । तत्तद्व्यक्तिविशिष्टं ब्रह्मैव इति भावः । उक्तञ्च कैयटेन "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः" इति । तत्त्वमेव शब्दस्वरूपतया भाति" इति च । कथं तर्हि, ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्वाद-नित्यत्वम्, "आत्मैवेदं सर्वम्" इति श्रुतिवचनादिति कैयटः सङ्गच्छताम् । अविद्या=आविद्यको

प्रभा

निष्फलं मोक्षरूपपुरुषार्थानुपयोगित्वात्, साक्षात्परम्परया वा तदुपयोगित्वस्यैव फलत्वादित्याह—केनेति । व्यवस्थितौ=भासमानौ । सत्यम्=कालत्रये बाधरहितम् । तत्र बाधितमसत्यम् । तत्र=सत्यासत्ययोर्यत्सत्यं सा जातिः, विधेयप्राधान्यात्स्त्रीत्वम् । विशिष्टम्=उपलक्षितम्=आधेयतया व्यक्त्युपहितम्, विशेष्यान्वयित्वे सति विधेयानन्वयित्वरूपोपाधित्वस्यैव व्यक्तौ सत्त्वात् । विशेषणत्वं तु न विशेष्यान्वयित्वे सति अभेदेन विधेयान्वयित्वरूपविशेषणत्वस्याभावात् । जाति=जातिपदव्यवहार्यम् । 'द्रव्यं नित्यम्, इति भाष्ये कैयटेनोक्तम् । असत्योपाधिना=व्यक्त्याऽऽधेयतयाऽवच्छिन्नम् । द्रव्यशब्दवाच्यम्=द्रव्यवाचकघटादिवाच्यम्, द्रव्यात्मको यः शब्दस्तद्वाच्यं वा मीमांसकमते शब्दस्य द्रव्यत्वात् । प्रत्याहाराह्निकान्ते ब्रह्मराशिरिति प्रतीके कैयटः ब्रह्मतत्त्वमेवेति । वाचकशब्दरूपतया वेदरूपतया वा । कैयटे 'प्रतिभाति' इति पाठः । ब्रह्मणः साक्षाज्ज्ञातुमशक्यतया रूपनामनिरूपणद्वारा तज्ज्ञानाय शास्त्रस्योपयोग इति भावः । जाते ब्रह्मरूपत्वे 'आकृतिरनित्या' इति प्रतीकस्थकैयटविरोधमाशङ्क्य परिहरति—अविद्येति-कार्य्यमात्रोपादानभूता सदसदादिभिरनिर्वचनीया, मिथ्याज्ञानजन्यसंस्काररूपा वा अविद्या । ननूक्ताविद्याया अवृत्तिकतया घटपटादिसकलसाधारणतया च जातित्वासम्भव इत्यत आह—आविद्यक इति--आविद्यक इति चिन्त्यम्, बुद्धो विधायकाभावात् । अविद्यया

दर्पणव्याख्या

स्फोटरूपं यद् व्यङ्ग्यं तद्व्यञ्जकवर्णात्मकशब्दस्येत्यर्थः ॥ ७२ ॥ नन्वेतावता प्रबन्धेन पदत्वादेर्जातित्वस्य, तद्वाचकत्वस्य व्यवस्थापनमफलम्, पुरुषार्थानुपयोगित्वादित्याशङ्क्य समाधानपरतया मूलमवतारयति—*ननु का सेति* । सा=कत्वेनाभिमता जातिः केति योजना । * सत्यांश इति * सत्यत्वम्=कालत्रयाबाध्यत्वम्, तद्विपरीतमसत्यत्वम् । पर्य्यर्थमाह—* तद्व्यक्तीति * तद्व्यक्त्युपलक्षितमित्यर्थः, परमार्थब्रह्मणा व्यक्तीनां वैशिष्ट्यासम्भवात् । अत एव गोत्वादीनां तदुपलक्षणत्वमामनन्तीति बोध्यम् । *जातिरिति* तद्व्यवहारविषय इत्यर्थः । *असत्योपाधीति* तमुपाधित्वञ्च, वस्तुत एकस्या अपि नानाप्रतीतिजनकत्वं तदवच्छिन्नम्=तदुपलक्षितमित्यर्थः । *द्रव्यशब्देति* गवा-त्यर्थः । गुणगतजातेरनङ्गीकारादथवा द्रव्यात्मको यश्शब्दस्तद्वाच्यमित्यर्थः, मीमांसकैः शब्दस्य द्रव्यत्वोपगमात् । *शब्दस्वरूपतयेति* श्रुत्यात्मकशब्दरूपतयेत्यर्थः । 'द्वे ब्रह्मणी वेदितव्ये" इति श्रुतेः । अयमाशयः—"तस्मादेतस्माद्वा आत्मन आकाशः सम्भूतः" इत्यादितैत्तिरीयकश्रुतौ ब्रह्मणो जगदुपादानत्वश्रवणादुपादेयस्य चोपादानाभिन्नत्वस्य लोकप्रसिद्धत्वान्नामार्थयोरपि स्वाभिन्नोपादानाभिन्नत्वे न परस्पराभिन्नत्वे सुस्थे पृथक्प्रतीयमानजगतः 'नेह नानाऽस्ति" इति श्रुत्या बाधे दृढे बाधितार्थप्रतीतेरधिष्ठानसत्तैकनियम्यत्वेनावशिष्यमाणब्रह्मणः सद्रूपस्य साक्षाज्ज्ञातुमशक्यतयोपलक्षणीभूतरूपनामनिरूपणद्वारा तज्ज्ञानाय शास्त्रस्योपयोग इति । * कथमिति * सङ्गच्छतामित्यनेनान्वितम्, पूर्वापरविरोधादिति भावः । मिथ्याज्ञानरूपायास्तज्जन्यसंस्काररूपाया वा जातित्वासम्भवादाह—*आविद्यक इति* अविद्याकल्पित इत्यर्थः ।

धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम् ॥ ७३ ॥ तमेव सत्यांशे स्पष्टयति— इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् । ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥ ७४ ॥ अयमर्थः—"नामरूपे व्याकरवाणि" इति श्रुतिसिद्धा द्वयी सृष्टिः । तत्र

प्रभा

निर्वृत्तः, तस्या धर्म्यो वा इत्यर्थे 'तेन निर्वृत्तम्' इति 'तस्य धर्म्यम्' इति वा ठक्कि आविद्यिक इ॰ चितम् । तथा च मतभेदेन नित्यत्वानित्यत्वयोरुक्त्या न पूर्वापरकैयटविरोधः । वस्तुतस्तु तत्तद्व्यक्त्यवच्छिन्नसत्तैव जातिरिति उपाधेर्जन्यत्वादुपहितस्यापि जन्यत्वोक्तिर्न विरुद्धा । अनुपहितत्वाभिप्रायेण नित्यत्वम् । धर्म इति=धर्म इत्युक्त्या वृत्तिमत एव धर्मतया वृत्तिमत्त्वम्, विशेषपदेन घटाद्यर्थासाधारण्यञ्च सूचितम् । ७३ । पूर्वोक्ताखण्डवाक्यस्फोटपक्षे परम्परया, वाक्यजातिस्फोटपक्षे च साक्षान्मोक्षसाधनत्वं व्याकरणस्येत्यावेदयितुमवतारयति-तमेवेति-'अयमात्मा' 'तत्सत्यम्, इत्यादिश्रुत्युक्तम् 'सत्यं यत्तत्र' इति कारिकया चोक्तमित्यर्थः । इत्थम्=पूर्वकारिकोक्तप्रकारेण निष्कृष्यमाणम्=वाचकत्वेनाध्यस्तेभ्यः पृथक् क्रियमाणम्=जात्यादिसम्बन्धराहित्येन ज्ञाप्यमानम् । निरञ्जनम्=अञ्जनादुपाधेर्निर्गतमुपाधिरहितम् । अत एवाक्षरम्=अविनाशि, 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्' इत्यादि स्मृतेः । एतादृशं यद्ब्रह्म तदेव शब्दतत्त्वम्=शब्दोपादानम् । अत्र शब्दपदं रूपस्याप्युपलक्षणम् । 'नामरूपे व्याकरवाणि' (छा० ६ । ३ । २) इति श्रुतेः । वस्तुतस्तु इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वम्=शब्दस्वरूपं जात्यात्मकं तन्निरञ्जनं क्षरं ब्रह्मैवेत्यन्वयः । तथा च 'सर्वं खल्विदं ब्रह्म' इत्यादिना शब्दब्रह्मण एव सर्वाधिष्ठानत्वमुक्तं भवति । प्राहुरिति=हर्य्यादय इति शेषः । वाक्यजातिस्फोटरूपं शब्दतत्त्वं ब्रह्माभिन्नं जानन्तीत्यर्थः । ननु नैयायिका गगनोपादानकं शब्दं मन्यन्त इति ब्रह्मोपादानत्वमसङ्गतमत आह—अयमर्थ इति । द्वयीति=द्वावर्थशब्दात्मकावयवावस्था इति द्व्यवयवकसमूहरूपा सृष्टिरित्यर्थः । तत्र=सृष्टौ, घटकत्वं सप्तम्यर्थः । सृष्टिघटकरूपस्य

दर्पणव्याख्या

* धर्मविशेष इति * अत्र वृत्तिवारणाय धर्मेति तद्व्यक्तित्वादिवारणाय विशेषेति * पक्षान्तरमिति * तथाच मतभेदेनार्थद्वयस्याप्याकरस्थितत्वान्न पूर्वापरविरोध इति भावः । वस्तुतस्तु गवाद्युपाध्यवच्छिन्नसत्तात्वमेव गोत्वादिव्यवहार्यानियामकम्, अद्वैतदर्शने च गवादेरवच्छेदकस्याभावान्न सत्ताया विशिष्टसत्तात्वम् तदानीं निर्द्धर्मत्वेनैवावस्थानादित्यर्थः इति वादि विरोधः सुपरिहर इति बोध्यम् ॥७३॥ यद्यप्यविशेषेण वाक्यविषयेऽखण्डवाक्यतज्जातिरूपस्फोटद्वयमुक्तम्, दृत्वादेः नादात्मकस्फोटकल्पे शास्त्रस्य पुरुषार्थे परम्परयोपयोगित्वमन्तिमकल्पे तु साक्षादेवेति तस्यैव मुख्यत्वमित्याशयेन व्यकम् । तारयति—* तमेवेति * । "अयमात्मा" "तत्सत्यम्" इत्यादि श्रुतिसिद्धं यत्सत्यं तत्र सा जातिरित्यनेनोक्तमेवेदम् । मूले * इत्थमिति * पूर्वोक्तप्रकारेण अध्यस्तवाचकत्वेभ्यः प्रकृत्यादिभ्यः पृथक्क्रियमाणम् । अत एव *निरञ्जनत्वेः । उपाधिविनिर्मुक्तम् । अत एवाक्षरम्=अविनाशि । 'यस्य सर्वेषु भूतेषु नश्यत्सु न विनश्यति" इति स्मृतेः, सोपाधिकस्यैव विनाशप्रतियोगित्वात् * शब्दतत्त्वम् * शब्दपदं रूपस्याप्युपलक्षणम् । तेन नामरूपोपादानं यत्तद् ब्रह्मेवेति विशेषणसामर्थ्यात्तैवकारेण ब्रह्मतादात्म्याभावरूपे विशेषणायोगव्यवच्छेदे शब्दतत्त्वरूपान्वयितावच्छेदकव्यापकत्वं बोध्यते * प्राहुः *=प्रकर्षेण कथयन्ति । ब्रह्माभेदेन जानन्तीति यावदिति तदर्थः । तत्र शब्दोपादानत्वस्य तन्त्रान्तरे गगनादौ प्रसिद्धेः कथमस्तदुपादानत्वमित्याशङ्कायामाह—*अयमर्थ इत्यादि* । *नामरूपेति* "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुतिसिद्धेत्यर्थः । *द्वयीति* नामरूपात्मकद्व्यवयवसमूहरूपेत्यर्थः *तत्रेति* सृष्टिद्वयमध्ये *रूपस्येवेति*

देव तत्त्वम् । प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम् । उक्तञ्च वाक्यपदीये—
प्रक्रियाभेदैरविद्यैवोपवर्ण्यते । समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम् ॥ इति ॥
त्यनेन "अत्रायं पुरुषः स्वयञ्ज्योतिः" "तमेव भान्तमनुभाति सर्वम्" "तस्य भासा

प्रभा

ब्रह्म तथा शब्दस्यापि तदेव=ब्रह्मैव तत्त्वम्=उपादानम् । तथाच ब्रह्मापि शब्दात्मकमिति भावः । विवर्तरूपाणां शब्दात्मनां प्रकृतिप्रत्ययादीनाम्, अर्थात्मनां मनोमयादिकोशानामाकाशादीनाञ्च पादनन्तु अविद्या=अधिष्ठानभूतब्रह्माज्ञानविलास एव, रज्जूरगवत् । यद्वा ननु ब्रह्मज्ञाने कथं त आह—अविद्येति=पञ्चकोशादिज्ञानं परम्परया यथा ब्रह्मज्ञानोपकारकं तथा व्याकरणादि-ः । पूर्णेति=आत्मनि पूर्णत्वञ्च सर्वोपादानत्वम् । शास्त्रेष्विति=उत्तरार्द्धन्तु 'अनागमविकल्पा प्रवर्तते' इति अविद्योपमर्दनेन शास्त्रप्रक्रियाप्रपञ्चशून्या स्वयं विद्या प्रकाशते । यथा बटबीजेषु विना बटोऽस्तीति दर्शयितुं न शक्यते तथा अविद्याकृतोत्पत्तिप्रलयौ शास्त्राभ्यासाद्यनुशीलयेते यां शास्त्रमुपाय इव लक्ष्यते । एतदुक्तं भवति—अविद्यैव विद्योपाय इति । वस्तुस्थित्या तु प्रकाशते । प्रविवेकश्च शास्त्रप्रयोज्य एव । समारम्भस्त्विति—पूर्वार्द्धन्तु 'घटादिदर्शनाल्लोकः

दर्पणव्याख्या

शाद्यात्मकार्थम्येवेत्यर्थः । * नाम्न इति * तद्वाचकशब्दस्यापीत्यर्थः । * तदेव *=ब्रह्मैव *तत्त्वम्*= ः, 'तस्मादेतस्माद्वा आत्मनः" इत्यादिश्रुतेः । शब्दतन्मात्राकाशोपादानत्वे पर्य्यवसानाद्द्वयोरप्युपा- मत एव तयोः परस्परमभेदसिद्धिः, स्वोपादानब्रह्माभिन्नत्वात् । नच ब्रह्मणो जगदुपादानत्वे विकारित्वाऽपत्तिः, ' इति वदता मूलकृतैव समाहितत्वात् । तथाच व्यावहारिकप्रातिभासिकपदार्थनिरासेन श्रुत्या ब्रह्मैव परि- त प्रागुक्त एवार्थः । ननु नानात्वस्य सर्वथैव मिथ्यात्वे कथं स प्रत्ययो लोकानामत आह—* प्रक्रियांश- कृतिप्रत्ययपञ्चकोशादिव्यवहारांशस्त्वित्यर्थः । *अविद्येति* मलिनसत्त्वाज्ञानविलास एवेत्यर्थः । तथाच ब्रह्मा- ानामपि तेषां पार्थक्येन प्रतीतिरधिष्ठानाज्ञानकृतैवेति न यावदधिष्ठानाज्ञानं तावत् तन्निवृत्तिरिति भावः ज्ञाने कथं शास्त्राणामुपयोगाऽत आह—* प्रक्रियांश इति * प्रकृतिप्रत्ययादिव्युत्पादनं त्वित्यर्थः । * तथाच पञ्चकोशादिन्यायेन शास्त्राणामुपयोगः, नतु तज्ज्ञाने साक्षादुपयोग इति भावः । * अविद्यै * वाक्यपदीयानन्तरम्—'उपायाः शिक्ष्यमाणानां बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः । श्लोकः । "समारम्भस्तु भावानामित्यस्य" पूर्वार्द्धन्तु—घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयते ॥ इ॥ ा घटादिकं दृष्ट्वा लोका विश्वप्रपञ्चः परिच्छिन्नः किञ्चिन्निष्ठकारणतानिरूपककार्य्यतावत्त्वेनाऽनुमि- ाम्=आकाशादीनाम् * समारम्भस्त्विति *=सम्यगारम्भः=जननं यस्मात् । भावप्रधानश्च नि- ादित्यक्षरार्थः, भावोपादानत्वादिति यावत् । तादात्म्येन वा हेतुः । * समारम्भादिति * शाश्वतं नि- मत्सकारणकमित्यावगीयत इत्यनुषज्यते । परिणाम्युपादानत्वे तस्मिन्नभ्युपगम्यमाने विकारित्वप्रसङ्ग- त्प्रसक्तिः, विवर्त्तोपादानतया तदेवाङ्गीकाराद्रज्ज्वादौ प्रातिभासिकभुजङ्गस्येवेति भावः । 'अ- इति पाठस्त्वन्यतरविशेषणापादनवैयर्थ्यापत्त्या नादरणीयः । ननु नादे अपि ब्रह्मव्यपदेश- ार्थानुपयोगितदभेदज्ञानसम्पादनवैयर्थ्यमत आह—* ब्रह्मैवेति * तथाच प्रकृते ब्रह्मपदस्य स्व- कानुपपत्तिरिति भावः । "तमेव भान्तम्" इत्यस्य—'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा वि- ." इति पूर्वार्द्धम् । श्रुतीत्युपलक्षणम्—यदादित्यगतं तेजो जगद्भासयतेऽखिलम्, इत्य- स्वमिति * तत्र परप्रकाशकत्वे मानमुक्तम् । स्वप्रकाशकत्वञ्च—स्वभिन्नाप्रकाश्यत्वे सति

SGDF Sundaram Foundation

"सर्वमिदं विभाति" इति श्रुतिसिद्धस्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति
टशब्दाभिधेयत्वं सूचयति। निर्विघ्नप्रचारायान्ते मङ्गलं स्तुतिनतिरूपमाह—पूर्णात्मने इत्यादि
अशेषफलदातारमपि सर्वेश्वरं गुरुम् । श्रीमद्भूषणसारेण भूषये शेषभूषणम्
भट्टोजीदीक्षितैः श्रेष्ठैर्निर्मिताः कारिकाः शुभाः । कौण्डभट्टेन व्याख्याताः कारिकास्ताः सुवि
इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टाऽत्मजकौण्डभट्टकृते
वैयाकरणभूषणसारे स्फोटवादः ।
समाप्तोऽयं ग्रन्थश्च ॥

प्रभा

परिच्छिन्नोऽवसीयते' इति । घटादेर्देशकालावच्छिन्नत्वदर्शनेन लोकः=विश्वप्रपञ्चोऽदृष्टोऽपि परिच्छि
इति ज्ञायते । भावानां घटादीनां समारम्भात्=उत्पादाच्च । शाश्वतमपि=कालत्रयाबाधितमपि ब्रह्म
आदिमत्=सहेतुकमिति व्यपदिश्यते । वाक्यपदीये 'समारम्भाच्च' 'आदिमद्' इत्येव पाठः । 'अ
इति पाठस्तु अबुधानां स्थितिप्रदर्शनप्रस्तावविरुद्धः । स्तुतीति—पूर्णत्वेन नत्या चोभयरूपत्वम् । निर्मिता
मूलभूता कतिपयकारिका हर्य्युक्ता एव । तद्यथा ३७, ३८, ३९, ६८, ७२, ७३. इति ।

गत्यागतो निवर्तेते यज्ज्ञानाच्छब्दशास्त्रतः ।
तत्स्फोटप्रभया पूर्णा बालकृष्णकृता प्रभा ॥
॥ शुभम्भूयात् ॥

दर्पणव्याख्या

—ात्मकनित्यज्ञानविषयत्वमिति यावत् । "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुत्या ब्रह्मणो नित्यज्ञानानन्दस्वरूपत्वप्र
पादनात् प्रकृतश्रुतेः 'स्वयमेवात्मनात्मानं वेत्थि त्वं पुरुषोत्तम' इति स्मृतिश्च स्वप्रकाशत्वे पराप्रकाश्यत्वे च "न तत्र
सयते सूर्य्यः" इत्यादि स्मृतिश्च मानम् , अधिकमन्यत्रानुसन्धेयम् । * सूचयतीति * । स्फोटस्वप्रकाशपदयोः पर्य्यायत्व
बोधयत्यर्थः । तथाच जातिस्फोटवादिमते उपाधिनिरासद्वारा शब्दब्रह्मणः स्वप्रकाशत्वरूपेण पुरुषार्थोपयोगिनि ज्ञाने
व्यास्योपयोग इति सिद्धम् । नादस्फोटवादिमते यथोपयोगस्तथोपपादितं प्राक् । * निर्विघ्नेति * अप्रतिबद्धस्व
ग्रन्थारार्थमित्यर्थः । * अन्ते *=ग्रन्थावसाने । * मङ्गलमिति * नत्यात्मकं तदित्यर्थः । "मङ्गलादीनि मङ्गलान्तानि
मङ्गलध्यानि च शास्त्राणि प्रथन्ते" इति भाष्यकारोक्तश्रुतेरिति भावः । पूर्णत्वमखण्डानन्दत्वमप्रतिहतेच्छत्वं वा तेन रूपेण
तन्नति स्वीयग्रन्थप्रचारेच्छाविषयसिद्धय इति बोध्यम् ॥ ७४ ॥

नत्वा श्रीफणिवाक्यजालमतुलं नैयायिकाक्षीरपि मीमांसानयमाकलय्य च मया सम्यक्कृते दर्पणे ।
तस्मिन् भूषणसारतां जनः सोत्कण्ठमालोकतां यन्निश्वासमलीमसो न मुकुरस्तत्त्वार्थबोधक्षमः ॥ १ ॥
उपाधिविनिमु त् कुर्मगिरां धरासुरवरः श्रीवल्लभः कोविदो वेदान्तेषु विनोदमञ्जरिरिति ख्याताऽस्ति यन्निर्मितिः ।
विनाशप्रतियोगि रिवल्लभः समकरोत्सद्बुद्धिमण्युज्ज्वलं श्रीमद्भूषणसारदर्पणमिमम्मोदाय विद्यावताम् ॥ २ ॥
ङ्गतैवकारेण ब्रह्म ज्ञतार्था हि . मोदहेतवेऽस्यस्तो. भृशं साऽपि बु ो तथैव । इत्याकलय्योभयमत्र युक्तिप्रमाणसिद्धं समुदाहृतं मया ॥
प्रकर्षेण कथयन्ति र्थो बुधैः स्पृष्टो यद्यपीह तथापि मे । सत्सन्दर्भोज्झवितता ममता केन वार्य्यते ॥ ४ ॥
गस्तदुपादानत्वा कर्मा चलाभिजनोत्प्रभातीयोपनामकश्रीवल्लभाऽऽत्मजहरिवल्लभविरचिते भूषणसारदर्पणे स्फोटवादः
करवाणि" इति ॥

Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

आदर्शग्रन्थमालायाः प्रकाशयितव्यानि पुस्तकानि—

१—वैयाकरणसिद्धान्तकौमुदी, प्राङ्नव्यमतानुसारिणीतव्याख्यया तत्त्वबोधिन्या च सहिता

२—शब्दमात्रसहिता प्रौढमनोरमा, अभिनवव्याख्यया [illegible]व्या च संवलिता

३—वैयाकरणसिद्धान्तलघुमञ्जूषा, पं० सभापतिशर्मोपाध्यायकृत 'प्रभा' टीकासहिता द्वि[illegible]

[illegible]व्यपदीयम्, 'प्रभा' टीकया समलङ्कृतम्

पत्रव्यवहारसङ्केतस्थानम्—

प० बालकृष्ण पञ्चोली, कृष्णकुटीर १३। जतनवर, बनारस

एतानि पुस्तकानि काशीस्थप्रतिष्ठितसर्वपुस्तकविक्रेतॄणां सविधे प्राप्याणि भविष्यन्ति

प० [illegible]किशोरशास्त्रिपाठिना 'सूर्य' मुद्रणालये मुद्रितः

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gangeshwari Digital Foundation

SGDF
Sri Gurgeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

ಹೆಸ್ತುವಿಕೆ ಸಂಖ್ಯೆ.....E-688.....

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation